# Taittiriya Samhita

# તૈત્તિરીય-સંહિતા

## Document Information

Text title : Taittiriya SamhitA

File name : taittirIyasamhitA.itx

Category : veda, svara

Location : doc_veda

Transliterated by : Muralidhara B A muraliba at gmail.com

Description-comments : See Brahmana and Aranyaka as separate files

Acknowledge-Permission: Professor Anathakrishna

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

Taittiriya Samhita

# તૈત્તિરીય-સંહિતા

# તૈત્તિરીય-સંહિતા

## ॥ પ્રથમં કાણ્ડમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

### પ્રથમકાણ્ડે પ્રથમઃ પ્રશ્નઃ ૧

૧ ઇષે ત્વોર્જે ત્વા વાયવઃ સ્થોપાયવસ્સ્થ દેવો વસ્સવિતા પ્રાર્પયતુ
શ્રેષ્ઠતમાય કર્મણ આ પ્યાયધ્વમઘ્નિયા દેવભાગ મૂર્જસ્વતીઃ પયસ્વતીઃ
પ્રજાવતીરનમીવા અયક્ષ્મા મા વસ્સ્તેન ઈશત માઽઘશઁસો રુદ્રસ્ય
હેતિઃ પરિ વો વૃણક્તુ ધ્રુવા અસ્મિન્ગોપતૌ સ્યાત બહ્વીર્યજમાનસ્ય પશૂન્પાહિ
॥ ઇષે ત્રિચત્વારિઁશત્ ॥ ૧। ૧। ૧॥

૨ યજ્ઞસ્ય ઘોષદસિ પ્રત્યુષ્ટઁ રક્ષઃ પ્રત્યુષ્ટા અરાતયઃ
પ્રેયમગાદ્ધિષણા બર્હિરચ્છ મનુના કૃતા સ્વધયા વિતષ્ટા
ત આવહન્તિ કવયઃ પુરસ્તાદ્દેવેભ્યો જુષ્ટમિહ બર્હિરાસદે
દેવાનાં પરિષૂતમસિ વર્ષવૃદ્ધમસિ દેવબર્હિર્મા ત્વાઽન્વઙ્મા
તિર્યક્પર્વ તે રાધ્યા સમાચ્છેત્તા તે મા રિષન્દેવબર્હિઃ શતવલ્શં
વિ રોહ સહસ્રવલ્શા

૩ વિ વયઁ રુહેમ પૃથિવ્યાઃ સંપૃચઃ પાહિ સુસંભૃતા
ત્વા સમ્ભરામ્યદિત્યૈ રાસ્નાઽસીન્દ્રાણ્યૈ સન્નહનં પૂષા તે
ગ્રન્થિઙ્ગ્રથ્નાતુ સ તે માઽઽસ્થાદિન્દ્રસ્ય ત્વા બાહુભ્યામુદ્યચ્છે
બૃહસ્પતેર્મૂર્ધ્ના હરામ્યુર્વન્તરિક્ષમન્વિહિ દેવઙ્ગમમસિ ॥
સહસ્રવલ્શા અષ્ટાત્રિઁશચ્ચ ॥ ૧। ૧। ૨॥

૪ શુંધધ્વં દૈવ્યાય કર્મણે દેવયજ્યાયૈ માતરિશ્વનો

ધર્મોઽસિ ધૌરસિ પૃથિવ્યસિ વિશ્વધાયા અસિ પરમેણ ધામ્ના
દૃꣳહસ્વ મા હ્વાર્વસૂનામ્પવિત્રમસિ શતધારં વસૂનાં પવિત્રમસિ
સહસ્રધારꣳ હુતઃ સ્તોકો હુતો દ્રપ્સોઽગ્નયે બૃહતે નાકાય સ્વાહા
દ્યાવાપૃથિવીભ્યાꣳ સા વિશ્વાયુઃ સા વિશ્વવ્યચાઃ સા વિશ્વકર્મા
સમ્પૃચ્યધ્વમૃતાવરીરૂર્મિણીર્મધુમત્તમા મન્દ્રા ધનસ્ય સાતયે સોમેન
ત્વાઽઽતનચ્મીન્દ્રાય દધિ વિષ્ણો હવ્યꣳ રક્ષસ્વ ॥ સોમેનાષ્ટૌ ચ
॥ ૧। ૧। ૩॥

૫ કર્મણે વાન્દેવેભ્યઃ શકેયં વેષાય ત્વા પ્રત્યુષ્ટꣳ
રક્ષઃ પ્રત્યુષ્ટા અરાતયો ધૂરસિ ધૂર્વ ધૂર્વન્તન્ધૂર્વ
તં યોઽસ્માન્ધૂર્વતિ તન્ધૂર્વયં વયં ધૂર્વામસ્ત્વં દેવાનામસિ
સસ્નિતમં પપ્રિતમઞ્જુષ્ટતમં વહ્નિતમં દેવહૂતમમહ્રુતમસિ
હવિર્ધાનં દૃꣳહસ્વ મા હ્વાર્મિત્રસ્ય ત્વા ચક્ષુષા પ્રેક્ષે મા
ભેર્મા સંવિક્થા મા ત્વા

૬ હિꣳસિષમુરુ વાતાય દેવસ્ય ત્વા સવિતુઃ પ્રસવેઽશ્વિનોર્બાહુભ્યાં
પૂષ્ણો હસ્તાભ્યામગ્નયે જુષ્ટન્નિર્વપામ્યગ્નીષોમાભ્યામિદં
દેવાનામિદમુનઃ સહ સ્ફાત્યૈ ત્વા નારાત્યૈ
સુવરભિ વિખ્યેષં વૈશ્વાનરં જ્યોતિર્દૃꣳહન્તાન્દુર્યા
દ્યાવાપૃથિવ્યોરુર્વન્તરિક્ષમન્વિહ્યદિત્યાસ્ત્વોપસ્થે સાદયામ્યગ્ને
હવ્યꣳ રક્ષસ્વ ॥ માત્વા ષટ્ચત્વારિꣳશચ્ચ । ॥ ૧। ૧। ૪॥

૭ દેવો વસ્સવિતોત્પુનાત્વચ્છિદ્રેણ પવિત્રેણ વસોઃ સૂર્યસ્ય
રશ્મિભિરાપો દેવીરગ્રેપુવો અગ્રે ગુવોઽગ્ર ઇમં યજ્ઞં નયતાગ્રે
યજ્ઞપતિન્ધત્ત યુષ્માનિન્દ્રોઽવૃણીત વૃત્રતૂર્યે યૂયમિન્દ્રમવૃણીધ્વં
વૃત્રતૂર્યે પ્રોક્ષિતાઃ સ્થાગ્નયે વો જુષ્ટં પ્રોક્ષામ્યગ્નીષોમાભ્યાꣳ
શુન્ધધ્વન્દૈવ્યાય કર્મણે દેવયજ્યાયા અવધૂતꣳ રક્ષોઽવધૂતા
અરાતયોઽદિત્યાસ્ત્વગસિ પ્રતિ ત્વા

૮ પૃથિવી વેત્ત્વધિષવણમસિ વાનસ્પત્યં પ્રતિ
ત્વાઽદિત્યાસ્ત્વગ્વેત્ત્વગ્નેસ્તનૂરસિ વાચો વિસર્જનન્દેવવીતયે

ત્વા ગૃહ્ણામ્યદ્રિરસિ વાનસ્પત્યઃ સ ઇદં દેવેભ્યો હવ્યꣳ સુશમિ
શમિષ્વેષમા વદોર્જમા વદ દ્યુમદ્વદત વયꣳ સંઘાતઞ્જેષ્મ
વર્ષવૃદ્ધમસિ પ્રતિ ત્વા વર્ષવૃદ્ધંવેત્તુ પરાપૂતꣳ
રક્ષઃ પરાપૂતા અરાતયો રક્ષસાં ભાગોઽસિ વાયુર્વો વિવિનક્તુ દેવો
વઃ સવિતા હિરણ્યપાણિઃ પ્રતિ ગૃહ્ણાતુ ॥ ત્વા ભાગ એકાદશ ચ । ॥ ૧। ૧। ૫॥

૯ અવધૂતꣳ રક્ષોઽવધૂતા અરાતયોઽદિત્યાસ્ત્વગસિ પ્રતિત્વા
પૃથિવી વેત્તુ દિવસ્સ્કમ્ભનિરસિ પ્રતિ ત્વાઽદિત્યાસ્ત્વગ્વેત્તુ
ધિષણાઽસિ પર્વત્યા પ્રતિ ત્વા દિવસ્સ્કમ્ભનિર્વેત્તુ ધિષણાઽસિ પાર્વતેયી
પ્રતિ ત્વા પર્વતિર્વેત્તુ દેવસ્ય ત્વા સવિતુઃ પ્રસવેઽશ્વિનોર્બાહુભ્યાં
પૂષ્ણો હસ્તાભ્યામધિવપામિ ધાન્યમસિ ધિનુહિ દેવાન્પ્રાણાય ત્વાઽપાનાય
ત્વા વ્યાનાય ત્વા દીર્ઘામનુ પ્રસિતિમાયુષે ધાન્દેવો વસ્સવિતા હિરણ્યપાણિઃ
પ્રતિગૃહ્ણાતુ ॥ પ્રાણાયત્વા પઞ્ચદશ ચ । ॥ ૧। ૧। ૬॥

૧૦ ધૃષ્ટિરસિ બ્રહ્મ યચ્છાપાઽગ્નેઽગ્નિમામાદઞ્જહિ નિષ્ક્રવ્યાદꣳ
સેધા દેવયજં વહ નિર્દગ્ધꣳ રક્ષો નિર્દગ્ધા અરાતયો
ધ્રુવમસિ પૃથિવીન્દૃꣳહાયુર્દૃꣳહ પ્રજાન્દૃꣳહ સજાતાનસ્મૈ
યજમાનાય પર્યૂહ ધર્ત્રમસ્યન્તરિક્ષં દૃꣳહ પ્રાણં દૃꣳહાપાનં
દૃꣳહ સજાતાનસ્મૈ યજમાનાય પર્યૂહ ધરુણમસિ દિવં દૃꣳહ
ચક્ષુર્

૧૧ દૃꣳહ શ્રોત્રં દૃꣳહ સજાતાનસ્મૈ યજમાનાય પર્યૂહ ધર્માઽસિ
દિશો દૃꣳહ યોનિં દૃꣳહ પ્રજાં દૃꣳહ સજાતાનસ્મૈ યજમાનાય
પર્યૂહ ચિતસ્સ્થ પ્રજામસ્મૈ રયિમસ્મૈ સજાતાનસ્મૈ યજમાનાય
પર્યૂહ ભૃગૂણામંગિરસાં તપસા તપ્યધ્વં યાનિ ઘર્મે કપાલાન્યુપ
ચિન્વન્તિ વેધસઃ ॥ પૂષ્ણસ્તાન્યપિ વ્રત ઇન્દ્રવાયૂ વિ મુઞ્ચતામ્ ॥
ચક્ષુરષ્ટાચત્વારિꣳશચ્ચ ॥ ૧। ૧। ૭॥

૧૨ સંવપામિ સમાપો અદ્ભિરગ્મત સમોષધયો રસેન સꣳ
રેવતીર્જગતીભિર્મધુમતીર્મધુમતીભિઃ સૃજ્યધ્વમદ્ભ્યઃ પરિ
પ્રજાતા સ્સ્થ સમદ્ભિઃ પૃચ્યધ્વં જનયત્યૈ ત્વા સંયૌમ્યગ્નયે

ત્વાઽગ્નીષોમાભ્યાં મખસ્ય શિરોઽસિ ઘર્મોઽસિ વિશ્વાયુરુરુ પ્રથસ્વોરુ
તે યજ્ઞપતિઃ પ્રથતાન્ત્વચઙ્ગૃહ્ણીષ્વાઽન્તરિત ઁ રક્ષોઽન્તરિતા
અરાતયો દેવસ્ત્વા સવિતા શ્રપયતુ વર્ષિષ્ઠે અધિ નાકેઽગ્નિસ્તે તનુવં
માઽતિ ધાગગ્ને હવ્ય ઁ રક્ષસ્વ સમ્બ્રહ્મણા પૃચ્યસ્વૈકતાય સ્વાહા
દ્વિતાય સ્વાહા ત્રિતાય સ્વાહા ॥ સવિતા દ્વાવિ ઁશતિશ્ચ ॥ ૧। ૧। ૮॥
૧૩ આદદ ઇન્દ્રસ્ય બાહુરસિ દક્ષિણઃ સહસ્રભૃષ્ટિઃ શતતેજા
વાયુરસિ તિગ્મતેજાઃ પૃથિવિ દેવયજન્યોષધ્યાસ્તે મૂલં મા
હિ ઁસિષમપહતોઽરરુઃ પૃથિવ્યૈ વ્રજં ગચ્છ ગોસ્થાનં
વર્ષતુ તે દ્યૌર્બધાન દેવ સવિતઃ પરમસ્યાં પરાવતિ શતેન
પાશૈર્યોઽસ્માન્દ્વેષ્ટિ યઞ્ચ વયં દ્વિષ્મસ્તમતો મા મૌગપહતોઽરરુઃ
પૃથિવ્યૈ દેવયજન્યૈ વ્રજં
૧૪ ગચ્છ ગોસ્થાનં વર્ષતુ તે દ્યૌર્બધાન દેવ સવિતઃ પરમસ્યાં
પરાવતિ શતેન પાશૈર્યોઽસ્માન્દ્વેષ્ટિ યઞ્ચ વયં દ્વિષ્મસ્તમતો
મા મૌગપહતોઽરરુઃ પૃથિવ્યા અદેવયજનો વ્રજં ગચ્છ ગોસ્થાનં
વર્ષતુ તે દ્યૌર્બધાન દેવ સવિતઃ પરમસ્યાં પરાવતિ શતેન
પાશૈર્યોઽસ્માન્દ્વેષ્ટિ યઞ્ચ વયં દ્વિષ્મસ્તમતો મા
૧૫ મૌગરરુસ્તે દિવં મા સ્કાન્ વસવસ્ત્વા પરિગૃહ્ણન્તુ ગાયત્રેણ
છન્દસા રુદ્રાસ્ત્વા પરિગૃહ્ણન્તુ ત્રૈષ્ટુભેન છન્દસાઽઽદિત્યાસ્ત્વા
પરિગૃહ્ણન્તુ જાગતેન છન્દસા દેવસ્ય સવિતુઃ સવે કર્મ કૃણ્વન્તિ
વેધસ ઋતમસ્યૃત સદનમસ્યૃત શ્રીરસિ ધા અસિ સ્વધા અસ્યુર્વી
ચાસિ વસ્વી ચાસિ પુરા ક્રૂરસ્ય વિસૃપો વિરફ્શિન્નુદાદાય પૃથિવીં
જીરદાનુર્યામૈરયઞ્ચન્દ્રમસિ સ્વધાભિસ્તાન્ધીરાસો અનુદૃશ્ય યજન્તે
॥ દેવયજન્યૈવ્રજં તમતોમા વિરપ્શિન્નેકાદશ ચ ॥ ૧। ૧। ૯॥
૧૬ પ્રત્યુષ્ટ ઁ રક્ષઃ પ્રત્યુષ્ટા અરાતયોઽગ્નેર્વસ્તેજિષ્ઠેન તેજસા
નિષ્ટપામિ ગોષ્ઠમ્મા નિર્મૃક્ષં વાજિનન્ત્વા સપત્નસાહ ઁ સમ્માર્જ્મિ
વાચં પ્રાણં ચક્ષુઃ શ્રોત્રં પ્રજાં યોનિં મા નિર્મૃક્ષં વાજિનીન્ત્વા
સપત્નસાહી ઁ સમ્માર્જ્મ્યાશાસાના સૌમનસં પ્રજા ઁ સૌભાગ્યન્તનૂમ્ ॥

અગ્નેરનુવ્રતા ભૂત્વા સન્નહ્યે સુકૃતાય કમ્ ॥ સુપ્રજસસ્ત્વા વયꣳ
સુપત્નીરુપ
૧૭ સેદિમ ॥ અગ્ને સપત્નદમ્ભનમદબ્ધાસો અદાભ્યમ્ ॥ ઇમં વિષ્યામિ
વરુણસ્ય પાશં યમબધ્નીત સવિતા સુશેવઃ ॥ ધાતુશ્ચ યોનૌ
સુકૃતસ્ય લોકે સ્યોનં મે સહ પત્યા કૃણોમિ ॥ સમાયુષા સમ્પ્રજયા
સમગ્ને વર્ચસા પુનઃ ॥ સમ્પત્ની પત્યાઽહઙ્ગચ્છે સમાત્મા તનુવા
મમ ॥ મહીનાં પયોઽસ્યોષધીનાꣳ રસસ્તસ્ય તેઽક્ષીયમાણસ્ય નિ
૧૮ ર્વપામિ મહીનાં પયોઽસ્યોષધીનાꣳ રસોઽદબ્ધેન ત્વા
ચક્ષુષાઽવેક્ષે સુપ્રજાસ્ત્વાય તેજોઽસિ તેજોઽનુ પ્રેહ્યગ્નિસ્તે તેજો મા વિ
નૈદગ્નેર્જિહ્વાઽસિ સુભૂર્દેવાનાં ધામ્ને ધામ્ને દેવેભ્યો યજુષેયજુષે
ભવ શુક્રમસિ જ્યોતિરસિ તેજોઽસિ દેવો વસ્સવિતોત્પુનાત્વચ્છિદ્રેણ
પવિત્રેણ વસોઃ સૂર્યસ્ય રશ્મિભિઃ શુક્રન્ત્વા શુક્રાયાન્ધામ્નેધામ્ને
દેવેભ્યો યજુષેયજુષે ગૃહ્ણામિ જ્યોતિસ્ત્વા જ્યોતિષ્યર્ચિસ્ત્વાઽર્ચિષિ
ધામ્નેધામ્ને દેવેભ્યો યજુષેયજુષે ગૃહ્ણામિ ॥ ઉપનીરશ્મિભિઃ શુક્રꣳ
ષોડશ ચ ॥ ૧। ૧। ૧૦॥
૧૯ કૃષ્ણોઽસ્યાખરેષ્ઠોઽગ્નયે ત્વા સ્વાહા વેદિરસિ બર્હિષે ત્વા સ્વાહા
બર્હિરસિ સ્રુગ્ભ્યસ્ત્વા સ્વાહા દિવે ત્વાઽન્તરિક્ષાય ત્વા પૃથિવ્યૈ ત્વા
સ્વધા પિતૃભ્ય ઊર્ગ્ભવ બર્હિષદ્ભ્ય ઊર્જા પૃથિવીં ગચ્છત
વિષ્ણોઃ સ્તૂપોઽસ્યૂર્ણામ્રદસન્ત્વા સ્તૃણામિ સ્વાસસ્થન્દેવેભ્યો ગન્ધર્વોઽસિ
વિશ્વાવસુર્વિશ્વસ્માદીષતો યજમાનસ્ય પરિધિરિડ ઈડિત ઇન્દ્રસ્ય
બાહુરસિ
૨૦ દક્ષિણો યજમાનસ્ય પરિધિરિડ ઈડિતો મિત્રા વરુણૌ ત્વોત્તરતઃ
પરિધત્તાન્ધ્રુવેણ ધર્મણા યજમાનસ્ય પરિધિરિડ ઈડિતઃ સૂર્યસ્ત્વા
પુરસ્તાત્પાતુ કસ્યાશ્ચિદભિશસ્ત્યા વીતિહોત્રન્ત્વા કવે દ્યુમન્તꣳ
સમિધીમહ્યગ્ને બૃહન્તમધ્વરે વિશો યન્ત્રે સ્થો વસૂનાꣳ
રુદ્રાણામાદિત્યાનાꣳ સદસિ સીદ જુહૂરુપભૃદ્ધ્રુવાઽસિ ઘૃતાચી
નામ્ના પ્રિયેણ નામ્ના પ્રિયે સદસિ સીદૈતા અસદન્થ્સુકૃતસ્ય લોકે

તા વિષ્ણો પાહિ પાહિ યજ્ઞં પાહિ યજ્ઞપતિં પાહિ માં યજ્ઞનિયમ્ ॥

બાહુરસિ પ્રિયે સદસિ પઞ્ચદશ ચ ॥ ૧। ૧। ૧૧॥

૨૧ ભુવનમસિ વિ પ્રથસ્વાગ્ને યષ્ટરિદન્નમઃ ॥ જુહ્વેહ્યગ્નિસ્ત્વા હ્વયતિ
દેવયજ્યાયા ઉપભૃદેહિ દેવસ્ત્વા સવિતા હ્વયતિ દેવયજ્યાયા અગ્નાવિષ્ણૂ
મા વામવ ક્રમિષં વિ જિહાથાં મા મા સન્તાપ્તં લોકમ્મે લોકકૃતૌ કૃણુતં
વિષ્ણોઃ સ્થાનમસીત ઇન્દ્રો અકૃણોદ્વીર્યાણિ સમારભ્યોર્ધ્વો અધ્વરો
દિવિસ્પૃશમહ્રુતો યજ્ઞો યજ્ઞપતેરિન્દ્રાવાન્થ્સ્વાહા બૃહદ્ભાઃ પાહિ
માગ્ને દુશ્ચરિતાદા મા સુચરિતે ભજ મખસ્ય શિરોઽસિ સઞ્જ્યોતિષા
જ્યોતિરઙ્ક્તામ્ ॥ અહ્રુત એકવિꣳશતિશ્ચ ॥ ૧। ૧। ૧૨॥

૨૨ વાજસ્ય મા પ્રસવેનોદ્ગ્રાભેણોદગ્રભીત્ ॥ અથા સપત્નાꣳ ઇન્દ્રો
મે નિગ્રાભેણાધરાꣳ અકઃ ॥ ઉદ્ગ્રાભં ચ નિગ્રાભં ચ બ્રહ્મ દેવા
અવીવૃધન્ ॥ અથા સપત્નાનિન્દ્રાગ્ની મે વિષૂચીનાન્ વ્યસ્યતામ્ ॥ વસુભ્યસ્ત્વા
રુદ્રેભ્યસ્ત્વાઽઽદિત્યેભ્યસ્ત્વાક્તꣳ રિહાણા વિયન્તુ વયઃ ॥ પ્રજાં યોનિં
મા નિર્મૃક્ષમા પ્યાયન્તામાપ ઓષધયો મરુતાં પૃષતયસ્સ્થ દિવં

૨૩ ગચ્છ તતો નો વૃષ્ટિમેરય ॥ આયુષ્પા અગ્નેઽસ્યાયુર્મે પાહિ
ચક્ષુષ્પા અગ્નેઽસિ ચક્ષુર્મે પાહિ ધ્રુવાઽસિ યં પરિધિં પર્યધત્થા
અગ્ને દેવ પણિભિર્વીયમાણઃ ॥ તન્ત એતમનુ જોષં ભરામિ નેદેષ
ત્વદપચેતયાતૈ યજ્ઞસ્ય પાથ ઉપ સમિતꣳ સરꣳસ્રાવભાગાઃ
સ્થેષા બૃહન્તઃ પ્રસ્તરેષ્ઠા બર્હિષદશ્ચ

૨૪ દેવા ઇમાં વાચમભિ વિશ્વે ગૃણન્ત આસદ્યાસ્મિન્ બર્હિષિ
માદયધ્વમગ્નેર્વામપન્નગૃહસ્ય સદસિ સાદયામિ સુમ્નાય સુમ્નિની સુમ્ને મા
ધત્તન્ધુરિ ધુર્યૌ પાતમગ્નેઽદબ્ધાયોઽશીતતનો પાહિ માઽદ્ય દિવઃ પાહિ
પ્રસિત્યૈ પાહિ દુરિષ્ટ્યૈ પાહિ દુરદ્મન્યૈ પાહિ દુશ્ચરિતાદવિષન્નઃ
પિતુઙ્કૃણુ સુષદા યોનિગ્ગ્ સ્વાહા દેવા ગાતુવિદો ગાતું વિત્વા ગાતુમિત
મનસ સ્પત ઇમન્નો દેવ દેવેષુ યજ્ઞરꣳ સ્વાહા વાચિ સ્વાહા વાતે
ધાઃ ॥ દિવઞ્ચ વિત્વા ગાતું ત્રયોદશ ચ ॥ ૧। ૧। ૧૩॥

૨૫ ઉભા વામિન્દ્રાગ્ની આહુવધ્યા ઉભા રાધસઃ સહ માદયધ્યૈ ॥ ઉભા

દાતારાવિષાઁ રયીણામુભા વાજસ્ય સાતયે હુવે વામ્ ॥ અશ્રવ ઁ
હિ ભૂરિદાવત્તરા વાં વિજામાતુરુત વા ઘા સ્યાલાત્ ॥ અથા સોમસ્ય
પ્રયતી યુવભ્યામિન્દ્રાગ્ની સ્તોમં જનયામિ નવ્યમ્ ॥ ઇન્દ્રાગ્ની નવતિં પુરો
દાસપત્ની રધૂનુતમ્ ॥ સાકમેકેન કર્મણા ॥ શુચિન્નુ સ્તોમન્નવજાત
મદ્યેન્દ્રાગ્ની વૃત્રહણા જુષેથામ્ ॥
૨૬ ઉભા હિ વાઁસુહવા જોહવીમિ તા વાજઁસદ્ય ઉશતે ધેષ્ઠા
॥ વયમુ ત્વા પથસ્પતે રથન્ન વાજસાતયે ॥ ધિયે પૂષન્નયુજ્મહિ ॥
પથસ્પથઃ પરિપતિં વચસ્યા કામેન કૃતો અભ્યાનડર્કમ્ ॥ સ નો
રાસચ્છુરુધશ્ચન્દ્રાગ્રા ધિયન્ધિયઁ સીષધાતિ પ્ર પૂષા ॥ ક્ષેત્રસ્ય
પતિના વયઁ હિતેનેવ જયામસિ ॥ ગામશ્વં પોષયિત્વા સ નો
૨૭ મૃડાતીદૃશે ॥ ક્ષેત્રસ્ય પતે મધુમન્તમૂર્મિં ધેનુરિવ પયો
અસ્માસુ ધુક્ષ્વ ॥ મધુશ્ચુતઙ્ઘૃતમિવ સુપૂતમૃતસ્ય નઃ પતયો
મૃડયન્તુ ॥ અગ્ને નય સુપથા રાયે અસ્માન્, વિશ્વાનિ દેવ વયુનાનિ વિદ્વાન્ ॥
યુયોધ્યસ્મજ્જુહુરાણમેનો ભૂયિષ્ઠાન્તે નમ ઉક્તિં વિધેમ ॥ આ દેવાનામપિ
પન્થામગન્મ યચ્છક્નવામ તદનુ પ્રવોઢુમ્ ॥ અગ્નિર્વિદ્વાન્થ્સ યજા
૨૮ થ્સેદુ હોતા સો અધ્વરાન્થ્સ ઋતૂન્કલ્પયાતિ ॥ યદ્વાહિષ્ઠન્તદગ્નયે
બૃહદર્ચ વિભાવસો ॥ મહિષીવ ત્વદ્રયિસ્ત્વદ્વાજા ઉદીરતે ॥ અગ્ને ત્વં
પારયા નવ્યો અસ્માન્થ્સ્વસ્તિભિરતિ દુર્ગાણિ વિશ્વા ॥ પૂશ્ચ પૃથ્વી
બહુલા ન ઉર્વી ભવા તોકાય તનયાય શંયોઃ ॥ ત્વમગ્ને વ્રતપા
અસિ દેવ આ મર્ત્યેષ્વા ॥ ત્વં યજ્ઞેષ્વીડ્યઃ ॥ યદ્વો વયં પ્રમિનામ
વ્રતાનિ વિદુષાન્દેવા અવિદુષ્ટરાસઃ ॥ અગ્નિષ્ટદ્વિશ્વમા પૃણાતિ
વિદ્વાન્, યેભિર્દેવાઁ ઋતુભિઃ કલ્પયાતિ ॥ જુષેથામા સ નો યજાદા
ત્રયોવિઁશતિશ્ચ ॥ ૧। ૧। ૧૪॥

ઇષે ત્વા યજ્ઞસ્ય શુન્ધધ્વં કર્મણે દેવોડવધૂતં ધૃષ્ટિસ્સં
વપામ્યાદદે પ્રત્યુષ્ટં કૃષ્ણોડસિ ભુવનમસિ વાજસ્યોભાવાં
ચતુર્દશ ॥

ઇષેદૃꣳહ ભુવનમષ્ટા વિꣳશતિઃ ॥
ઇષે ત્વા કલ્પયાતિ ॥

## પ્રથમકાણ્ડે દ્વિતીયઃ પ્રશ્નઃ ૨

૧ આપ ઉન્દન્તુ જીવસે દીર્ઘાયુત્વાય વર્ચસ ઓષધે
ત્રાયસ્વૈનગ્ગ્ સ્વધિતે મૈનꣳહિꣳસીર્દેવશ્રૂરેતાનિ પ્ર વપે
સ્વસ્ત્યુત્તરાણ્યશીયાઽઽપો અસ્માન્માતરઃ શુન્ધન્તુ ઘૃતેન નો
ઘૃતપુવઃ પુનન્તુ વિશ્વમસ્મત્પ્ર વહન્તુ રિપ્રમુદાભ્યઃ શુચિરા
પૂત એમિ સોમસ્ય તનૂરસિ તનુવં મે પાહિ મહીનાં પયોઽસિ વર્ચોધા
અસિ વર્ચો

૨ મયિ ધેહિ વૃત્રસ્ય કનીનિકાઽસિ ચક્ષુષ્પા અસિ ચક્ષુર્મે પાહિ
ચિત્પતિસ્ત્વા પુનાતુ વાક્પતિસ્ત્વા પુનાતુ દેવસ્ત્વા સવિતા પુનાત્વચ્છિદ્રેણ
પવિત્રેણ વસોઃ સૂર્યસ્ય રશ્મિભિસ્તસ્ય તે પવિત્રપતે પવિત્રેણ
યસ્મૈ કં પુને તચ્છકેયમા વો દેવાસ ઈમહે સત્યધર્માણો અધ્વરે યદ્વો
દેવાસ આગુરે યજ્ઞિયાસો હવામહ ઇન્દ્રાગ્ની દ્યાવાપૃથિવી આપ ઓષધીસ્ત્વં
દીક્ષાણામધિપતિરસીહ મા સન્તં પાહિ ॥ વર્ચ ઓષધીરષ્ટૌ ચ ॥ ૧। ૨। ૧॥

૩ આકૂત્યૈ પ્રયુજેઽગ્નયે સ્વાહા મેધાયૈ મનસેઽગ્નયે સ્વાહા
દીક્ષાયૈ તપસેઽગ્નયે સ્વાહા સરસ્વત્યૈ પૂષ્ણેઽગ્નયે સ્વાહાઽઽપો
દેવીર્બૃહતીર્વિશ્વશમ્ભુવો દ્યાવાપૃથિવી ઉર્વન્તરિક્ષં બૃહસ્પતિર્નો
હવિષા વૃધાતુ સ્વાહા વિશ્વે દેવસ્ય નેતુર્મર્તોઽવૃણીત સખ્યં વિશ્વે
રાય ઇષુધ્યસિ દ્યુમ્નં વૃણીત પુષ્યસે સ્વાહર્ક્સામયોઃ શિલ્પે સ્થસ્તે
વામા રભે તે મા

૪ પાતમાઽસ્ય યજ્ઞસ્યોદૃચ ઇમાં ધિયꣳ શિક્ષમાણસ્ય દેવ
ક્રતું દક્ષં વરુણ સꣳશિશાધિ યયાઽતિ વિશ્વા દુરિતા તરેમ
સુતર્માણમધિ નાવꣳરુહેમોર્ગસ્યાઙ્ગિરસ્યૂર્ણમ્રદા ઊર્જં મે યચ્છ
પાહિ મા મા મા હિꣳસીર્વિષ્ણોઃ શર્માસિ શર્મ યજમાનસ્ય શર્મ

મે યચ્છ નક્ષત્રાણાં માઽતીકાશાત્ પાહીન્દ્રસ્ય યોનિરસિ

૫ મા મા હિꣳસીઃ કૃષ્યૈ ત્વા સુસસ્યાયૈ સુપિપ્પલાભ્યસ્ત્વૌષધીભ્યઃ
સૂપસ્થા દેવો વનસ્પતિરૂર્ધ્વો મા પાહ્યોદૃચઃ સ્વાહા યજ્ઞં મનસા
સ્વાહા દ્યાવાપૃથિવીભ્યાગ્ સ્વાહોરોરન્તરિક્ષાથ્સ્વાહા યજ્ઞં વાતાદા
રભે ॥ મા યોનિરસિ ત્રિꣳશચ્ચ ॥ ૧। ૨। ૨॥

૬ દૈવીં ધિયં મનામહે સુમૃડીકામભિષ્ટયે વર્ચોધાં યજ્ઞવાહસꣳ
સુપારા નો અસદ્વશે । યે દેવા મનોજાતા મનોયુજઃ સુદક્ષા દક્ષપિતારસ્તે
નઃ પાન્તુ તે નોઽવન્તુ તેભ્યો નમસ્તેભ્યઃ સ્વાહાઽગ્ને ત્વꣳ સુ જાગૃહિ
વયꣳ સુ મન્દિષીમહિ ગોપાય નઃ સ્વસ્તયે પ્રબુધે નઃ પુનર્દદઃ ।
ત્વમગ્ને વ્રતપા અસિ દેવ આ મર્ત્યેષ્વા । ત્વં

૭ યજ્ઞેષ્વીડ્યઃ ॥ વિશ્વે દેવા અભિ મા માઽવવૃત્રન્ પૂષા સન્યા સોમો
રાધસા દેવઃ સવિતા વસોર્વસુદાવા રાસ્વેયથ્સોમાઽઽભૂયો ભર મા
પૃણન્પૂર્ત્યા વિ રાધિ માઽહમાયુષા ચન્દ્રમસિ મમ ભોગાય ભવ
વસ્ત્રમસિ મમ ભોગાય ભવોસ્રાઽસિ મમ ભોગાય ભવ હયોઽસિ મમ
ભોગાય ભવ

૮ છાગોઽસિ મમ ભોગાય ભવ મેષોઽસિ મમ ભોગાય ભવ વાયવે
ત્વા વરુણાય ત્વા નિરૃત્યૈ ત્વા રુદ્રાય ત્વા દેવીરાપો અપાં નપાદ્ય
ઊર્મિર્હવિષ્ય ઇન્દ્રિયાવાન્મદિન્તમસ્તં વો માઽવક્રમિષમચ્છિન્નં
તન્તું પૃથિવ્યા અનુ ગેષં ભદ્રાદભિ શ્રેયઃ પ્રેહિ બૃહસ્પતિઃ પુર
એતા તે અસ્ત્વથેમવ સ્ય વર આ પૃથિવ્યા આરે શત્રૂન્ કૃણુહિ
સર્વવીર એદમગન્મ દેવયજનં પૃથિવ્યા વિશ્વે દેવા યદજુષન્ત
પૂર્વ ઋક્સામાભ્યાં યજુષા સન્તરન્તો રાયસ્પોષેણ સમિષા મદેમ ॥
આ ત્વꣳ હયોઽસિ મમ ભોગાય ભવ સ્ય પઞ્ચવિꣳશતિશ્ચ ॥ ૧। ૨। ૩॥

૯ ઇયં તે શુક્ર તનૂરિદં વર્ચસ્તયા સં ભવ ભ્રાજં ગચ્છ
જૂરસિ ધૃતા મનસા જુષ્ટા વિષ્ણવે તસ્યાસ્તે સત્યસવસઃ પ્રસવે
વાચો યન્ત્રમશીય સ્વાહા શુક્રમસ્યમૃતમસિ વૈશ્વદેવꣳ હવિઃ
સૂર્યસ્ય ચક્ષુરાઽરુહમગ્નેરક્ષ્ણઃ કનીનિકાં યદેતશેભિરીયસે

ભ્રાજમાનો વિપશ્ચિતા ચિદસિ મનાઽસિ ધીરસિ દક્ષિણા
૧૦ સિ યજ્ઞિયાઽસિ ક્ષત્રિયાઽસ્યદિતિરસ્યુભયતઃ શીર્ષ્ણી સા નઃ
સુપ્રાચી સુપ્રતીચી સં ભવ મિત્રસ્ત્વા પદિ બધ્નાતુ પૂષાઽધ્વનઃ
પાત્વિન્દ્રાયાધ્યક્ષાયાનુ ત્વા માતા મન્યતામનુ પિતાઽનુ ભ્રાતા
સગર્ભ્યોઽનુ સખા સયૂથ્યઃ સા દેવિ દેવમચ્છેહીન્દ્રાય સોમꣳ
રુદ્રસ્ત્વાઽઽવર્તયતુ મિત્રસ્ય પથા સ્વસ્તિ સોમસખા પુનરેહિ સહ
રય્યા ॥ દક્ષિણા સોમસખા પઞ્ચ ચ ॥ ૧। ૨। ૪॥

૧૧ વસ્વ્યસિ રુદ્રાઽસ્યદિતિરસ્યાદિત્યાઽસિ શુક્રાઽસિ ચન્દ્રાઽસિ
બૃહસ્પતિસ્ત્વા સુમ્ને રણ્વતુ રુદ્રો વસુભિરા ચિકેતુ પૃથિવ્યાસ્ત્વા
મૂર્ધન્ના જિઘર્મિ દેવયજન ઇડાયાઃ પદે ઘૃતવતિ સ્વાહા
પરિલિખિતꣳ રક્ષઃ પરિલિખિતા અરાતય ઇદમહꣳ રક્ષસો ગ્રીવા
અપિ કૃન્તામિ યોઽસ્માન્ દ્વેષ્ટિ યં ચ વયં દ્વિષ્મ ઇદમસ્ય ગ્રીવા
૧૨ અપિ કૃન્તામ્યસ્મે રાયસ્ત્વે રાયસ્તોતે રાયઃ સં દેવિ દેવ્યોર્વશ્યા પશ્યસ્વ
ત્વષ્ટીમતી તે સપેય સુરેતા રેતો દધાના વીરં વિદેય તવ સંદૃશિ
માઽહꣳ રાયસ્પોષેણ વિ યોષમ્ ॥ અસ્ય ગ્રીવા એકાન્નત્રિꣳશચ્ચ
॥ ૧। ૨। ૫॥

૧૩ અꣳશુના તે અꣳશુઃ પૃચ્યતાં પરુષા પરુર્ગન્ધસ્તે
કામમવતુ મદાય રસો અચ્યુતોઽમાત્યોઽસિ શુક્રસ્તે ગ્રહોઽભિ
ત્યં દેવꣳ સવિતારમૂણ્યોઃ કવિક્રતુમર્ચામિ સત્યસવસꣳ
રત્નધામભિ પ્રિયં મતિમૂર્ધ્વા યસ્યામતિર્ભા અદિદ્યુતત્સવીમનિ
હિરણ્યપાણિરમિમીત સુક્રતુઃ કૃપા સુવઃ । પ્રજાભ્યસ્ત્વા પ્રાણાય ત્વા
વ્યાનાય ત્વા પ્રજાસ્ત્વમનુ પ્રાણિહિ પ્રજાસ્ત્વામનુ પ્રાણન્તુ ॥ અનુ સપ્ત ચ
॥ ૧। ૨। ૬॥

૧૪ સોમં તે ક્રીણામ્યૂર્જસ્વન્તં પયસ્વન્તં વીર્યાવન્તમભિમાતિષાહꣳ
શુક્રં તે શુક્રેણ ક્રીણામિ ચન્દ્રં ચન્દ્રેણામૃતમમૃતેન
સમ્યત્તે ગોરસ્મે ચન્દ્રાણિ તપસસ્તનૂરસિ પ્રજાપતેર્વર્ણસ્તસ્યાસ્તે
સહસ્રપોષં પુષ્યન્ત્યાશ્ચરમેણ પશુના ક્રીણામ્યસ્મે તે બન્ધુર્મયિ

તે રાયઃ શ્રયન્તામસ્મે જ્યોતિઃ સોમવિક્રયિણિ તમો મિત્રો ન એહિ
સુમિત્રધા ઇન્દ્રસ્યોરુ મા વિશ દક્ષિણમુશન્નુશન્તગ્ગ્ સ્યોનઃ
સ્યોનગ્ગ્ સ્વાન ભ્રાજાઙ્ઘારે બમ્ભારે હસ્ત સુહસ્ત કૃશાનવેતે વઃ
સોમક્રયણાસ્તાન્રક્ષધ્વં મા વો દભન્ ॥ ઊરું દ્રાવિઁશતિશ્ચ ॥ ૧। ૨॥
૭॥ ।

૧૫ ઉદાયુષા સ્વાયુષોદોષધીનાઁ રસેનોત્પર્જન્યસ્ય
શુષ્મેણોદસ્થામમૃતાઁ અનુ । ઉર્વન્તરિક્ષમન્વિહ્યદિત્યાઃ
સદોઽસ્યદિત્યાઃ સદ આસીદાસ્તભ્નાદ્દ્યામૃષભો અન્તરિક્ષમમિમીત
વરિમાણં પૃથિવ્યા આસીદદ્વિશ્વા ભુવનાનિ સમ્રાડ્વિશ્વેત્તાનિ વરુણસ્ય
વ્રતાનિ વનેષુ વ્યન્તરિક્ષં તતાન વાજમર્વથ્સુ પયો અઘ્નિયાસુ
હૃથ્સુ

૧૬ ક્રતું વરુણો વિક્ષ્વગ્નિં દિવિ સૂર્યમદધાથ્સોમમદ્રાવુદુત્યં
જાતવેદસં દેવં વહન્તિ કેતવઃ । દૃશે વિશ્વાય સૂર્યમ્ ॥ ઉસ્રાવેતં
ધૂર્ષાહાવનશ્રૂ અવીરહણૌ બ્રહ્મચોદનૌ વરુણસ્ય સ્કમ્ભનમસિ
વરુણસ્ય સ્કમ્ભસર્જનમસિ પ્રત્યસ્તો વરુણસ્ય પાશઃ ॥ હૃથ્સુ
પઞ્ચત્રિઁશચ્ચ ॥ ૧। ૨। ૮॥

૧૭ પ્રચ્યવસ્વ ભુવસ્પતે વિશ્વાન્યભિ ધામાનિ મા ત્વા પરિપરી વિદન્મા
ત્વા પરિપન્થિનો વિદન્મા ત્વા વૃકા અઘાયવો મા ગન્ધર્વો વિશ્વાવસુરા
દઘચ્છ્યેનો ભૂત્વા પરા પત યજમાનસ્ય નો ગૃહે દેવૈઃ સગ્ગ્સ્કૃતં
યજમાનસ્ય સ્વસ્ત્યયન્યસ્યપિ પન્થામગસ્મહિ સ્વસ્તિગામનેહસં યેન
વિશ્વાઃ પરિ દ્વિષો વૃણક્તિ વિન્દતે વસુ નમો મિત્રસ્ય વરુણસ્ય
ચક્ષસે મહો દેવાય તદૃતઁ સપર્યત દૂરેદૃશે દેવજાતાય
કેતવે દિવસ્પુત્રાય સૂર્યાય શઁસત વરુણસ્ય સ્કમ્ભનમસિ
વરુણસ્ય સ્કમ્ભસર્જનમસ્યુન્મુક્તો વરુણસ્ય પાશઃ ॥ મિત્રસ્ય
ત્રયોવિઁશતિશ્ચ ॥ ૧। ૨। ૯॥

૧૮ અગ્નેરાતિથ્યમસિ વિષ્ણવે ત્વા સોમસ્યાઽઽતિથ્યમસિ વિષ્ણવે
ત્વાઽતિથેરાતિથ્યમસિ વિષ્ણવે ત્વાઽગ્નયે ત્વા રાયસ્પોષદાવ્ને વિષ્ણવે

ત્વા શ્યેનાય ત્વા સોમભૃતે વિષ્ણવે ત્વા યા તે ધામાનિ હવિષા યજન્તિ
તા તે વિશ્વા પરિભૂરસ્તુ યજ્ઞં ગયસ્ફાનઃ પ્રતરણઃ સુવીરોઽવીરહા
પ્ર ચરા સોમ દુર્યાનદિત્યાઃ સદોઽસ્યદિત્યાઃ સદ આ
૧૯ સીદ વરુણોઽસિ ધૃતવ્રતો વારુણમસિ શંયોર્દેવાના ँ સખ્યાન્મા
દેવાનામપસશ્છિથ્સ્મહ્યાપતયે ત્વા ગૃહ્ણામિ પરિપતયે ત્વા ગૃહ્ણામિ
તનૂનપ્ત્રે ત્વા ગૃહ્ણામિ શાક્વરાય ત્વા ગૃહ્ણામિ શક્મન્નોજિષ્ઠાય
ત્વા ગૃહ્ણામ્યનાધૃષ્ટમસ્યનાધૃષ્યં દેવાનામોજોઽભિશસ્તિપા
અનભિશસ્તેઽન્યમનુ મે દીક્ષાં દીક્ષાપતિર્મન્યતામનુ
તપસ્તપસ્પતિરઞ્જસા સત્યમુપ ગેષ ँ સુવિતે માધાઃ ॥ આ મૈકં ચ ॥

૧। ૨। ૧૦॥

૨૦ અ ँ શુર ँ શુસ્તે દેવ સોમાઽઽપ્યાયતામિન્દ્રાયૈકધનવિદ આ
તુભ્યમિન્દ્રઃ પ્યાયતામા ત્વમિન્દ્રાય પ્યાયસ્વાઽઽપ્યાયય સખીન્થ્સન્યા
મેધયા સ્વસ્તિ તે દેવ સોમ સુત્યામશીયેષ્ટા રાયઃ પ્રેષે
ભગાયર્તમૃતવાદિભ્યો નમો દિવે નમઃ પૃથિવ્યા અગ્ને વ્રતપતે
ત્વં વ્રતાનાં વ્રતપતિરસિ યા મમ તનૂરેષા સા ત્વયિ
૨૧ યા તવ તનૂરિય ँ સા મયિ સહ નૌ વ્રતપતે વ્રતિનોર્વ્રતાનિ યા
તે અગ્ને રુદ્રિયા તનૂસ્તયા નઃ પાહિ તસ્યાસ્તે સ્વાહા યા તે અગ્નેઽયાશયા
રજાશયા હરાશયા તનૂર્વર્ષિષ્ઠા ગહ્વરેષ્ઠોગ્રં વચો અપાવધીં
ત્વેષં વચો અપાવધીગ્ સ્વાહા ॥ ત્વયિ ચત્વારિ ँ શચ્ચ ॥ ૧। ૨। ૧૧॥
૨૨ વિત્તાયની મેઽસિ તિક્તાયની મેઽસ્યવતાન્મા નાથિતમવતાન્મા વ્યથિતં
વિદેરગ્નિર્નભો નામાગ્ને અઙ્ગિરો યોઽસ્યાં પૃથિવ્યામસ્યાયુષા નામ્નેહિ
યત્તેઽનાધૃષ્ટં નામ યજ્ઞિયં તેન ત્વાઽઽદધેઽગ્ને અઙ્ગિરો યો
દ્વિતીયસ્યાં તૃતીયસ્યાં પૃથિવ્યામસ્યાયુષા નામ્નેહિ યત્તેઽનાધૃષ્ટં
નામ
૨૩ યજ્ઞિયં તેન ત્વાઽઽદધે સિ ँ હીરસિ મહિષીરસ્યુરુ
પ્રથસ્વોરુ તે યજ્ઞપતિઃ પ્રથતાં ધ્રુવાઽસિ દેવેભ્યઃ શુન્ધસ્વ
દેવેભ્યઃ શુમ્ભસ્વેન્દ્ર ઘોષસ્ત્વા વસુભિઃ પુરસ્તાત્પાતુ મનોજવાસ્ત્વા

પિતૃભિર્દક્ષિણતઃ પાતુ પ્રચેતાસ્ત્વા રુદ્રૈઃ પશ્ચાત્પાતુ વિશ્વકર્મા
ત્વાऽऽદિત્યૈરુત્તરતઃ પાતુ સિ ꣳહીરસિ સપત્નસાહી સ્વાહા સિ ꣳહીરસિ
સુપ્રજાવનિઃ સ્વાહા સિ ꣳહી
૨૪ રસિ રાયસ્પોષવનિઃ સ્વાહા સિ ꣳહીરસ્યાદિત્યવનિઃ સ્વાહા
સિ ꣳહીરસ્યા વહ દેવાન્દેવયતે યજમાનાય સ્વાહા ભૂતેભ્યસ્ત્વા
વિશ્વાયુરસિ પૃથિવીં દૃ ꣳહ ધ્રુવક્ષિદસ્યન્તરિક્ષં
દૃ ꣳહાચ્યુતક્ષિદસિ દિવં દૃ ꣳહાગ્નેર્ભસ્માસ્યગ્નેઃ પુરીષમસિ ॥
નામ સુપ્રજાવનિઃ સ્વાહા સિ ꣳહીઃ પઞ્ચત્રિ ꣳશચ્ચ ॥ ૧। ૨। ૧૨॥
૨૫ યુઞ્જતે મન ઉત યુઞ્જતે ધિયો વિપ્રા વિપ્રસ્ય બૃહતો વિપશ્ચિતઃ
। વિ હોત્રા દધે વયુના વિદેક ઇન્મહી દેવસ્ય સવિતુઃ પરિષ્ટુતિઃ ॥
સુવાગ્દેવ દુર્યા ꣳ આ વદ દેવશ્રુતૌ દેવેષ્વા ઘોષેથામા નો
વીરો જાયતાં કર્મણ્યો ય ꣳ સર્વેऽનુજીવામ યો બહૂનામસદ્વશી ।
ઇદં વિષ્ણુર્વિ ચક્રમે ત્રેધા નિ દધે પદમ્ । સમૂઢમસ્ય
૨૬ પા ꣳ સુર ઇરાવતી ધેનુમતી હિ ભૂત ꣳ સૂયવસિની મનવે યશસ્યે
। વ્યસ્કભ્નાદ્રોદસી વિષ્ણુરેતે દાધાર પૃથિવીમભિતો મયૂખૈઃ ॥
પ્રાચી પ્રેતમધ્વરં કલ્પયન્તી ઊર્ધ્વં યજ્ઞં નયતં મા જીહ્વરતમત્ર
રમેથાં વર્ષ્મન્પૃથિવ્યા દિવો વા વિષ્ણવુત વા પૃથિવ્યા મહો વા
વિષ્ણવુત વાऽન્તરિક્ષાદ્ધસ્તૌ પૃણસ્વ બહુભિર્વસવ્યૈરા પ્ર યચ્છ
૨૭ દક્ષિણાદોત સવ્યાત્ । વિષ્ણોર્નુકં વીર્યાણિ પ્ર વોચં યઃ
પાર્થિવાનિ વિમમે રજા ꣳસિ યો અસ્કભાયદુત્તર ꣳ સધસ્થં
વિચક્રમાણસ્ત્રેધોરુગાયો વિષ્ણો રરાટમસિ વિષ્ણોઃ પૃષ્ઠમસિ
વિષ્ણોઃ શ્ઞપ્ત્રે સ્થો વિષ્ણોઃ સ્યૂરસિ વિષ્ણોર્ધ્રુવમસિ વૈષ્ણવમસિ
વિષ્ણવે ત્વા ॥ અસ્ય યચ્છૈકાન્નચત્વારિ ꣳશચ્ચ ॥ ૧। ૨। ૧૩॥
૨૮ કૃણુષ્વ પાજઃ પ્રસિતિં ન પૃથ્વીં યાહિ રાજે વામવા ꣳ ઇભેન ।
તૃષ્વીમનુ પ્રસિતિં દ્રૂણાનોऽસ્તાસિ વિધ્યરક્ષસસ્તપિષ્ઠૈઃ ॥ તવ
ભ્રમાસ આશુયા પતન્ત્યનુ સ્પૃશ ધૃષતા શોશુચાનઃ । તપૂગ્ષ્યગ્ને

જુહ્વા પતઙ્ગાનસંદિતો વિ સૃજ વિષ્વગુલ્કાઃ ॥ પ્રતિ સ્પશો વિ સૃજ
તૂર્ણિતમો ભવા પાયુર્વિશો અસ્યા અદબ્ધઃ । યો નો દૂરે અઘશꣳસો
૨૯ યો અન્ત્યગ્ને માકિષ્ટે વ્યથિરા દધર્ષીત્ । ઉદગ્ને તિષ્ઠ પ્રત્યાઽઽ
તનુષ્વ ન્યમિત્રાꣳ ઓષતાત્તિગ્મહેતે । યો નો અરાતિꣳ સમિધાન
ચક્રે નીચા તં ધક્ષ્યત સં ન શુષ્કમ્ ॥ ઊર્ધ્વો ભવ પ્રતિ
વિધ્યાધ્યસ્મદાવિષ્કૃણુષ્વ દૈવ્યાન્યગ્ને । અવ સ્થિરા તનુહિ યાતુજૂનાં
જામિમજામિં પ્ર મૃણીહિ શત્રૂન્ ॥ સ તે
૩૦ જાનાતિ સુમતિં યવિષ્ઠ ય ઈવતે બ્રહ્મણે ગાતુમૈરત્ । વિશ્વાન્યસ્મૈ
સુદિનાનિ રાયો દ્યુમ્નાન્યર્યો વિદુરો અભિ દ્યૌત્ ॥ સેદગ્ને અસ્તુ સુભગઃ
સુદાનુર્યસ્ત્વા નિત્યેન હવિષા ય ઉક્થૈઃ । પિપ્રીષતિ સ્વ આયુષિ દુરોણે
વિશ્વેદસ્મૈ સુદિના સાઽસદિષ્ટિઃ ॥ અર્ચામિ તે સુમતિં ઘોષ્યર્વાક્સં તે
વાવાતા જરતામિ
૩૧ યઙ્ગીઃ । સ્વશ્વાસ્ત્વા સુરથા મર્જયેમાસ્મે ક્ષત્રાણિ ધારયેરનુ દ્યૂન્ ॥
ઇહ ત્વા ભૂર્યા ચરેદુપ ત્મન્દોષાવસ્તર્દીદિવાꣳ સમનુ દ્યૂન્ । ક્રીડન્તસ્ત્વા
સુમનસઃ સપેમાભિ દ્યુમ્ના તસ્થિવાꣳ સો જનાનામ્ ॥ યસ્ત્વા સ્વશ્વઃ
સુહિરણ્યો અગ્ન ઉપયાતિ વસુમતા રથેન । તસ્ય ત્રાતા ભવસિ તસ્ય
સખા યસ્ત આતિથ્યમાનુષગ્જુજોષત્ ॥ મહો રુજામિ
૩૨ બન્ધુતા વચોભિસ્તન્મા પિતુર્ગોતમાદન્વિયાય ॥ ત્વં નો અસ્ય
વચસશ્ચિકિદ્ધિ હોતર્યવિષ્ઠ સુક્રતો દમૂનાઃ ॥ અસ્વપ્નજસ્તરણયઃ
સુશેવા અતન્દ્રાસોઽવૃકા અશ્રમિષ્ઠાઃ । તે પાયવઃ સધ્રિયઞ્ચો
નિષદ્યાઽગ્ને તવ નઃ પાન્ત્વમૂર ॥ યે પાયવો મામતેયં તે અગ્ને પશ્યન્તો
અન્ધં દુરિતાદરક્ષન્ । રરક્ષ તાન્થ્સુકૃતો વિશ્વવેદા દિપ્સન્ત
ઇદ્રિપવો ના હ
૩૩ દેભુઃ ॥ ત્વયા વયꣳ સધન્યસ્ત્વોતાસ્તવ પ્રણીત્યશ્યામ વાજાન્
। ઉભા શꣳસા સૂદય સત્યતાતેઽનુષ્ઠુયા કૃણુહ્યહ્રયાણ ॥ અયા તે અગ્ને
સમિધા વિધેમ પ્રતિ સ્તોમꣳ શસ્યમાનં ગૃભાય । દહાશસો રક્ષસઃ
પાહ્યસ્માન્દ્રુહો નિદો મિત્રમહો અવદ્યાત્ ॥ રક્ષોહણં વાજિનમાઽઽજિઘર્મિ

મિત્રં પ્રથિષ્ઠમુપ યામિ શર્મ । શિશાનો અગ્નિઃ ક્રતુભિઃ સમિદ્ધઃ
સ નો દિવા
૩૪ સ રિષઃ પાતુ નક્તમ્ ॥ વિ જ્યોતિષા બૃહતા ભાત્યગ્નિરાવિર્વિશ્વાનિ
કૃણુતે મહિત્વા । પ્રાદેવીર્માયાઃ સહતે દુરેવાઃ શિશીતે શૃઙ્ગે
રક્ષસે વિનિક્ષે ॥ ઉત સ્વાનાસો દિવિષન્ત્વગ્નેસ્તિગ્માયુધા રક્ષસે
હન્તવા ઉ । મદે ચિદસ્ય પ્રરુજન્તિ ભામા ન વરન્તે પરિબાધો અદેવીઃ
॥ અઘશꣳસઃ સ તે જરતાꣳ રુજામિ હ દિવૈકચત્વારિꣳ શચ્ચ ॥

૧। ૨। ૧૪॥

આપ ઉન્દન્ત્વાકૂત્યૈ દૈવીમિયં તે વસ્વ્યસ્યꣳ શુના તે સોમંત
ઉદાયુષા પ્ર ચ્યવસ્વાગ્નેરાતિથ્યમꣳ શુરꣳશુર્વિત્તાયની મેસિ
યુંજતે કૃણુષ્વ પાજશ્ચતુર્દશ ॥

આપો વસ્વ્યસિ યા તવેયંગીશ્ચતુસ્ત્રિꣳ શત્ ॥

આપ ઉન્દન્ત્વદેવીઃ ॥

## પ્રથમકાણ્ડે તૃતીયઃ પ્રશ્નઃ ૩

૧ દેવસ્ય ત્વા સવિતુઃ પ્રસવેઽશ્વિનોર્બાહુભ્યાં પૂષ્ણો
હસ્તાભ્યામાદદેઽભ્રિરસિ નારિરસિ પરિલિખિતꣳ રક્ષઃ
પરિલિખિતા અરાતય ઇદમહꣳ રક્ષસો ગ્રીવા અપિ કૃન્તામિ યોઽસ્માન્
દ્વેષ્ટિ યં ચ વયં દ્વિષ્મ ઇદમસ્ય ગ્રીવા અપિ કૃન્તામિ દિવે
ત્વાઽન્તરિક્ષાય ત્વા પૃથિવ્યૈ ત્વા શુન્ધતાં લોકઃ પિતૃષદનો
યવોઽસિ યવયાસ્મદ્દ્વેષો
૨ યવયારાતીઃ પિતૃણાꣳ સદનમસ્યુદ્દિવગ્ગ્ં સ્તભાનાઽન્તરિક્ષં પૃણ
પૃથિવીં દૃꣳહ દ્યુતાનસ્ત્વા મારુતો મિનોતુ મિત્રાવરુણયોર્ધ્રુવેણ
ધર્મણા બ્રહ્મવનિં ત્વા ક્ષત્રવનિꣳસુપ્રજાવનિꣳરાયસ્પોષવનિં
પર્યૂહામિ બ્રહ્મ દૃꣳહ ક્ષત્રં દૃꣳહ પ્રજાં દૃꣳહ
રાયસ્પોષં દૃꣳહ ઘૃતેન દ્યાવાપૃથિવી આ પૃણેથામિન્દ્રસ્ય

સદોઽસિ વિશ્વજનસ્ય છાયા પરિ ત્વા ગિર્વણો ગિર ઇમા ભવન્તુ
વિશ્વતો વૃદ્ધાયુમનુ વૃદ્ધયો જુષ્ટા ભવન્તુ જુષ્ટય ઇન્દ્રસ્ય
સ્યૂરસીન્દ્રસ્ય ધ્રુવમસ્યૈન્દ્રમસીન્દ્રાય ત્વા ॥ દ્વેષ ઇમા અષ્ટાદશ
ચ ॥ ૧। ૩। ૧॥

૩ રક્ષોહણો વલગહનો વૈષ્ણવાન્ખનામીદમહં તં વલગમુદ્વપામિ
યં નઃ સમાનો યમસમાનો નિચખાનેદમેનમધરં કરોમિ યો નઃ સમાનો
યોઽસમાનોઽરાતીયતિ ગાયત્રેણ છન્દસાઽવબાઢો વલગઃ કિમત્ર ભદ્રં
તન્નૌ સહ વિરાઽસિ સપત્નહા સમ્રાઽસિ ભ્રાતૃવ્યહા સ્વરાઽસ્યભિમાતિહા
વિશ્વારાઽસિ વિશ્વાસાં નાષ્ટ્રાણાꣳ હન્તા

૪ રક્ષોહણો વલગહનઃ પ્રોક્ષામિ વૈષ્ણવાન્ રક્ષોહણો વલગહનોઽવ
નયામિ વૈષ્ણવાન્, યવોઽસિ યવયાસ્મદ્વેષો યવયારાતી રક્ષોહણો
વલગહનોઽવ સ્તૃણામિ વૈષ્ણવાન્ રક્ષોહણો વલગહનોઽભિ જુહોમિ
વૈષ્ણવાન્ રક્ષોહણૌ વલગહનાવુપ દધામિ વૈષ્ણવી રક્ષોહણૌ
વલગહનૌ પર્યૂહામિ વૈષ્ણવી રક્ષોહણૌ વલગહનૌ પરિ સ્તૃણામિ
વૈષ્ણવી રક્ષોહણૌ વલગહનૌ વૈષ્ણવી બૃહન્નસિ બૃહદ્ગ્રાવા
બૃહતીમિન્દ્રાય વાચં વદ ॥ હન્તેન્દ્રાય દ્વે ચ ॥ ૧। ૩। ૨॥

૫ વિભૂરસિ પ્રવાહણો વહ્નિરસિ હવ્યવાહનઃ શ્વાત્રોઽસિ
પ્રચેતાસ્તુથોઽસિ વિશ્વવેદા ઉશિગસિ કવિરઙ્ઘારિરસિ
બમ્ભારિરવસ્યુરસિ દુવસ્વાઞ્છુન્ધ્યૂરસિ માર્જાલીયઃ સમ્રાઽસિ
કૃશાનુઃ પરિષદ્યોઽસિ પવમાનઃ પ્રતક્વાઽસિ નભસ્વાનસંમૃષ્ટોઽસિ
હવ્યસૂદ ઋતધામાઽસિ સુવર્જ્યોતિર્બ્રહ્મજ્યોતિરસિ
સુવર્ધામાઽજોઽસ્યેકપાદહિરસિ બુધ્નિયો રૌદ્રેણાનીકેન પાહિ માઽગ્ને
પિપૃહિ મા મા મા હિꣳસીઃ ॥ અનીકેનાષ્ટૌ ચ ॥ ૧। ૩। ૩॥

૬ ત્વꣳ સોમ તનૂકૃદ્ભ્યો દ્વેષોભ્યોઽન્યકૃતેભ્ય ઉરુ યન્તાસિ
વરૂથગ્ગ્ સ્વાહા જુષાણો અપ્તુરાજ્યસ્ય વેતુ સ્વાહાઽયં નો અગ્નિર્વરિવઃ
કૃણોત્વયં મૃધઃ પુર એતુ પ્રભિન્દન્ । અયꣳ શત્રૂઞ્જયતુ
જર્હૃષાણોઽયં વાજં જયતુ વાજસાતૌ ॥ ઉરુ વિષ્ણો વિ ક્રમસ્વોરુ

ક્ષયાય નઃ કૃધિ । ઘૃતં ઘૃતયોને પિબ પ્રપ્ર યજ્ઞપતિં તિર ॥

સોમો જિગાતિ ગાતુવિદ્

૭ દેવાનામેતિ નિષ્કૃતમૃતસ્ય યોનિમાસદમદિત્યાઃ સદોઽસ્યદિત્યાઃ
સદ આ સીદૈષ વો દેવ સવિતઃ સોમસ્ત ँ રક્ષધ્વં મા વો દભદેતત્
ત્વ ँ સોમ દેવો દેવાનુપાગા ઇદમહં મનુષ્યો મનુષ્યાન્થ્સહ
પ્રજયા સહ રાયસ્પોષેણ નમો દેવેભ્યઃ સ્વધા પિતૃભ્ય ઇદમહં
નિર્વરુણસ્ય પાશાત્ સુવરભિ

૮ વિ ખ્યેષં વૈશ્વાનરં જ્યોતિરગ્ને વ્રતપતે ત્વં વ્રતાનાં વ્રતપતિરસિ
યા મમ તનૂસ્ત્વય્યભૂદિય ँ સા મયિ યા તવ તનૂર્મય્યભૂદેષા સા ત્વયિ
યથાયથં નૌ વ્રતપતે વ્રતિનોર્વ્રતાનિ ॥ ગાતુવિદભ્યેકત્રિ ँ શચ્ચ
॥ ૧। ૩। ૪॥

૯ અત્યન્યાનગાં નાન્યાનુપાગામર્વાક્ત્વા પરૈરવિદં પરોઽવરૈસ્તં ત્વા
જુષે વૈષ્ણવં દેવયજ્યાયૈ દેવસ્ત્વા સવિતા મધ્વાઽનક્ત્વોષધે
ત્રાયસ્વૈનગ્ગ્ સ્વધિતે મૈન ँહિ ँ સીર્દિવમગ્રેણ મા
લેખીરન્તરિક્ષં મધ્યેન મા હિ ँસીઃ પૃથિવ્યા સં ભવ વનસ્પતે
શતવલ્શો વિ રોહ સહસ્રવલ્શા વિ વય ँ રુહેમ યં ત્વાઽયગ્ગ્
સ્વધિતિસ્તેતિજાનઃ પ્રણિનાય મહતે સૌભગાયાઽચ્છિન્નો રાયઃ સુવીરઃ
॥ યં દશ ચ ॥ ૧। ૩। ૫॥

૧૦ પૃથિવ્યૈ ત્વાઽન્તરિક્ષાય ત્વા દિવે ત્વા શુન્ધતાં લોકઃ
પિતૃષદનો યવોઽસિ યવયાસ્મદ્ દ્વેષો યવયારાતીઃ પિતૃણા ँ
સદનમસિ સ્વાવેશોઽસ્યગ્રેગા નેતૃણાં વનસ્પતિરધિ ત્વા સ્થાસ્યતિ તસ્ય
વિત્તાદ્દેવસ્ત્વા સવિતા મધ્વાઽનક્તુ સુપિપ્પલાભ્યસ્ત્વૌષધીભ્ય ઉદ્દિવગ્ગ્
સ્તભાનાન્તરિક્ષં પૃણ પૃથિવીમુપરેણ દૃ ँહ તે તે ધામાન્યુશ્મસી

૧૧ ગમધ્યે ગાવો યત્ર ભૂરિશ◌ૃઙ્ગા અયાસઃ । અત્રાહ તદુરુગાયસ્ય
વિષ્ણોઃ પરમં પદમવ ભાતિ ભૂરેઃ ॥ વિષ્ણોઃ કર્માણિ પશ્યત યતો
વ્રતાનિ પસ્પશે । ઇન્દ્રસ્ય યુજ્યઃ સખા ॥ તદ્વિષ્ણોઃ પરમં પદ ँ
સદા પશ્યન્તિ સૂરયઃ । દિવીવ ચક્ષુરાતતમ્ ॥ બ્રહ્મવનિં ત્વા

ક્ષત્રવનિꣳ સુપ્રજાવનિꣳ રાયસ્પોષવનિં પર્યૂહામિ બ્રહ્મ
દૃꣳહ ક્ષત્રં દૃꣳહ પ્રજાં દૃꣳહ રાયસ્પોષં દૃꣳહ
પરિવીરસિ પરિ ત્વા દૈવીર્વિશો વ્યયન્તાં પરીમꣳ રાયસ્પોષો
યજમાનં મનુષ્યા અન્તરિક્ષસ્ય ત્વા સાનાવવ ગૂહામિ ॥ ઉશ્મસી
પોષમેકાન્નવિꣳશતિશ્ચ ॥ ૧। ૩। ૬॥

૧૨ ઇષે ત્વોપવીરસ્યુપો દેવાન્દૈવીર્વિશઃ પ્રાગુર્વહ્નીરુશિજો બૃહસ્પતે
ધારયા વસૂનિ હવ્યા તે સ્વદન્તાં દેવ ત્વષ્ટર્વસુ રણ્વ રેવતી
રમધ્વમગ્નેર્જનિત્રમસિ વૃષણૌ સ્થ ઉર્વશ્યસ્યાયુરસિ પુરૂરવા
ઘૃતેનાક્તે વૃષણં દધાથાં ગાયત્રં છન્દોઽનુ પ્ર જાયસ્વ ત્રૈષ્ટુભં
જાગતં છન્દોઽનુ પ્રજાયસ્વ ભવતં

૧૩ નઃ સમનસૌ સમોકસાવરેપસૌ । મા યજ્ઞꣳ હિꣳસિષ્ટં મા
યજ્ઞપતિં જાતવેદસૌ શિવૌ ભવતમદ્ય નઃ ॥ અગ્નાવગ્નિશ્ચરતિ
પ્રવિષ્ટ ઋષીણાં પુત્રો અધિરાજ એષઃ । સ્વાહાકૃત્ય બ્રહ્મણા તે
જુહોમિ મા દેવાનાં મિથુયાકર્ભાગધેયમ્ ॥ ભવતમેકત્રિꣳશચ્ચ ॥
૧। ૩। ૭॥

૧૪ આ દદ ઋતસ્ય ત્વા દેવહવિઃ પાશેનાઽઽરભે ધર્ષા
માનુષાનદ્ભ્યસ્ત્વૌષધીભ્યઃ પ્રોક્ષામ્યપાં પેરુરસિ સ્વાત્તં ચિત્
સદેવꣳ હવ્યમાપો દેવીઃ સ્વદતૈનꣳ સં તે પ્રાણો વાયુના
ગચ્છતાꣳ સં યજત્રૈરઙ્ગાનિ સં યજ્ઞપતિરાશિષા ઘૃતેનાક્તૌ
પશું ત્રાયેથાꣳ રેવતીર્યજ્ઞપતિં પ્રિયધાઽઽ વિશતોરો અન્તરિક્ષ
સજૂર્દેવેન

૧૫ વાતેનાઽસ્ય હવિષસ્ત્મના યજ સમસ્ય તનુવા ભવ વર્ષીયો
વર્ષીયસિ યજ્ઞે યજ્ઞપતિં ધાઃ પૃથિવ્યાઃ સમ્પૃચઃ પાહિ
નમસ્ત આતાનાઽનર્વા પ્રેહિ ઘૃતસ્ય કુલ્યામનુ સહ પ્રજયા સહ
રાયસ્પોષેણાઽઽપો દેવીઃ શુદ્ધાયુવઃ શુદ્ધા યૂયં દેવાꣳ ઊઙ્ઢ્વꣳ શુદ્ધા
વયં પરિવિષ્ટાઃ પરિવેષ્ટારો વો ભૂયાસ્મ ॥ દેવેન ચતુશ્ચત્વારિꣳશચ્ચ
॥ ૧। ૩। ૮॥

૧૬ વાક્ત આ પ્યાયતાં પ્રાણસ્ત આ પ્યાયતાં ચક્ષુસ્ત આ પ્યાયતાગ્ શ્રોત્રં
ત આ પ્યાયતાં યા તે પ્રાણાઞ્છુગ્જગામ યા ચક્ષુર્યા શ્રોત્રં યત્ તે
ક્રૂરં યદાસ્થિતં તત્ ત આ પ્યાયતાં તત્ ત એતેન શુન્ધતાં નાભિસ્ત
આ પ્યાયતાં પાયુસ્ત આ પ્યાયતાઁ શુદ્ધાશ્ચરિત્રાઃ શમદ્ભ્યઃ
૧૭ શમોષધીભ્યઃ શં પૃથિવ્યૈ શમહોભ્યામોષધે ત્રાયસ્વૈનગ્
સ્વધિતે મૈનઁહિઁસી રક્ષસાં ભાગોઽસીદમહઁ રક્ષોઽધમં
તમો નયામિ યોઽસ્માન્ દ્વેષ્ટિ યં ચ વયં દ્વિષ્મ ઇદમેનમધમં તમો
નયામીષે ત્વા ઘૃતેન દ્યાવાપૃથિવી પ્રોર્ણ્વાથામચ્છિન્નો રાયઃ સુવીર
ઉર્વન્તરિક્ષમન્વિહિ વાયો વીહિ સ્તોકાનાગ્ સ્વાહોર્ધ્વનભસં મારુતં
ગચ્છતમ્ ॥ અદ્ભ્યો વીહિ પઞ્ચ ચ ॥ ૧। ૩। ૯॥
૧૮ સં તે મનસા મનઃ સં પ્રાણેન પ્રાણો જુષ્ટં દેવેભ્યો હવ્યં
ઘૃતવત્ સ્વાહૈન્દ્રઃ પ્રાણો અઙ્ગેઅઙ્ગે નિ દેધ્યદૈન્દ્રોઽપાનો અઙ્ગેઅઙ્ગે
વિ બોભુવદ્દેવ ત્વષ્ટર્ભૂરિ તે સઁસમેતુ વિષુરૂપા યત્ સલક્ષ્માણો
ભવથ દેવત્રા યન્તમવસે સખાયોઽનુ ત્વા માતા પિતરો મદન્તુ
શ્રીરસ્યગ્નિસ્ત્વા શ્રીણાત્વાપઃ સમરિણન્વાતસ્ય
૧૯ ત્વા ધ્રજ્યૈ પૂષ્ણો રઁહ્યા અપામોષધીનાઁ રોહિષ્યૈ ઘૃતં
ઘૃતપાવાનઃ પિબત વસાં વસાપાવાનઃ પિબતાન્તરિક્ષસ્ય હવિરસિ સ્વાહા
ત્વાઽન્તરિક્ષાય દિશઃ પ્રદિશ આદિશો વિદિશ ઉદ્દિશઃ સ્વાહા
દિગ્ભ્યો નમો દિગ્ભ્યઃ ॥ વાતસ્યાષ્ટાવિઁશતિશ્ચ ॥ ૧। ૩। ૧૦॥
૨૦ સમુદ્રં ગચ્છ સ્વાહાઽન્તરિક્ષં ગચ્છ સ્વાહા દેવઁ સવિતારં
ગચ્છ સ્વાહાઽહોરાત્રે ગચ્છ સ્વાહા મિત્રાવરુણૌ ગચ્છ સ્વાહા
સોમં ગચ્છ સ્વાહા યજ્ઞં ગચ્છ સ્વાહા છન્દાઁસિ ગચ્છ સ્વાહા
દ્યાવાપૃથિવી ગચ્છ સ્વાહા નભો દિવ્યં ગચ્છ સ્વાહાઽગ્નિં વૈશ્વાનરં
ગચ્છ સ્વાહાઽદ્ભ્યસ્ત્વૌષધીભ્યો મનો મે હાર્દિ યચ્છ તનૂં ત્વચં
પુત્રં નપ્તારમશીય શુગસિ તમભિ શોચ યોઽસ્માન્ દ્વેષ્ટિ યં ચ
વયં દ્વિષ્મો ધામ્નોધામ્નો રાજન્નિતો વરુણ નો મુઞ્ચ યદાપો અઘ્નિયા
વરુણેતિ શપામહે તતો વરુણ નો મુઞ્ચ ॥ અસિ ષડ્વિઁશતિશ્ચ ॥ ૧। ૩। ૧૧॥

૨૧ હવિષ્મતીરિમા આપો હવિષ્માન્ દેવો અધ્વરો હવિષ્મા ँ આ
વિવાસતિ હવિષ્મા ँ અસ્તુ સૂર્યઃ ॥ અગ્નેર્વોઽપન્નગૃહસ્ય સદસિ
સાદયામિ સુમ્નાય સુમ્નિનીઃ સુમ્ને મા ધત્તેન્દ્રાગ્નિયોર્ભાગધેયીઃ સ્થ
મિત્રાવરુણયોર્ભાગધેયીઃ સ્થ વિશ્વેષાં દેવાનાં ભાગધેયીઃ સ્થ યજ્ઞે
જાગૃત ॥ હવિષ્મતીશ્ચતુસ્ત્રિ ँ શત્ ॥ ૧। ૩। ૧૨॥

૨૨ હૃદે ત્વા મનસે ત્વા દિવે ત્વા સૂર્યાય ત્વોર્ધ્વમિમમધ્વરં કૃધિ
દિવિ દેવેષુ હોત્રા યચ્છ સોમ રાજન્નેહ્યવ રોહ મા ભેર્મા સં વિક્થા મા
ત્વા હિ ँ સિષં પ્રજાસ્ત્વમુપાવરોહ પ્રજાસ્ત્વામુપાવરોહન્તુ શ્ૃણોત્વગ્નિઃ
સમિધા હવં મે શ્ૃણ્વન્ત્વાપો ધિષણાશ્ચ દેવીઃ । શ્ૃણોત ગ્રાવાણો
વિદુષો નુ

૨૩ યજ્ઞ ँ શ્ૃણોતુ દેવઃ સવિતા હવં મે । દેવીરાપો અપાં નપાદ્ય
ઊર્મિર્હવિષ્ય ઇન્દ્રિયાવાન્મદિન્તમસ્તં દેવેભ્યો દેવત્રા ધત્ત
શુક્ર ँ શુક્રપેભ્યો યેષાં ભાગઃ સ્થ સ્વાહા કાર્ષિરસ્યપાપાં
મૃધ્ર ँ સમુદ્રસ્ય વોક્ષિત્યા ઉન્નયે । યમગ્ને પૃત્સુ મર્ત્યમાવો
વાજેષુ યં જુનાઃ । સ યન્તા શશ્વતીરિષઃ ॥ નુ સપ્તચત્વારિ ँ શચ્ચ
॥ ૧। ૩। ૧૩॥

૨૪ ત્વમગ્ને રુદ્રો અસુરો મહો દિવસ્ત્વ ँ શર્ધો મારુતં પૃક્ષ ઈશિષે
। ત્વં વાતૈરરુણૈર્યાસિ શઙ્ગયસ્ત્વં પૂષા વિધતઃ પાસિ નુ ત્મના ॥
આ વો રાજાનમધ્વરસ્ય રુદ્ર ँ હોતાર ँ સત્યયજ ँ રોદસ્યોઃ ।
અગ્નિં પુરા તનયિત્નોરચિત્તાદ્ધિરણ્યરૂપમવસે કૃણુધ્વમ્ ॥ અગ્નિર્હોતા
નિષસાદા યજીયાનુપસ્થે માતુસ્સુરભાવુ લોકે । યુવા કવિઃ પુરુનિષ્ઠ

૨૫ ઋતાવા ધર્તા કૃષ્ટીનામુત મધ્ય ઇદ્ધઃ ॥ સાધ્વીમકર્દેવવીતિં
નો અદ્ય યજ્ઞસ્ય જિહ્વામવિદામ ગુહ્યામ્ । સ આયુરાગાથ્સુરભિર્વસાનો
ભદ્રામકર્દેવહૂતિં નો અદ્ય ॥ અક્રન્દદગ્નિઃ સ્તનયન્નિવ દ્યૌઃ, ક્ષામા
રેરિહદ્વીરુધઃ સમઞ્જન્ । સદ્યો જજ્ઞાનો વિહીમિદ્ધો અખ્યદા રોદસી
ભાનુના ભાત્યન્તઃ ॥ ત્વે વસૂનિ પુર્વણીક

૨૬ હોતર્દોષા વસ્તોરેરિરે યજ્ઞિયાસઃ । ક્ષામેવ વિશ્વા ભુવનાનિ

યસ્મિન્થ્સ ँ સૌભગાનિ દધિરે પાવકે ॥ તુભ્યં તા અઙ્ગિરસ્તમ
વિશ્વાઃ સુક્ષિતયઃ પૃથક્ । અગ્ને કામાય યેમિરે ॥ અશ્યામ તં
કામમગ્ને તવોત્યશ્યામ રયિ ँ રયિવઃ સુવીરમ્ । અશ્યામ વાજમભિ
વાજયન્તોઽશ્યામ દ્યુમ્નમજરાજરં તે ॥ શ્રેષ્ઠં યવિષ્ઠ ભારતાગ્ને
દ્યુમન્તમાભર ।
૨૭ વસો પુરુસ્પૃહ ँ રયિમ્ ॥ સ શ્વિતાનસ્તન્યતૂ રોચનસ્થા
અજરેભિર્નાનદદ્ભિર્યવિષ્ઠઃ । યઃ પાવકઃ પુરુતમઃ પુરૂણિ
પૃથૂન્યગ્નિરનુયાતિ ભર્વન્ ॥ આયુષ્ટે વિશ્વતો દધદયમગ્નિર્વરેણ્યઃ
। પુનસ્તે પ્રાણ આયતિ પરા યક્ષ્મ ँ સુવામિ તે ॥ આયુર્દા અગ્ને હવિષો
જુષાણો ઘૃતપ્રતીકો ઘૃતયોનિરેધિ । ઘૃતં પીત્વા મધુ ચારુ ગવ્યં
પિતેવ પુત્રમભિ
૨૮ રક્ષતાદિમમ્ ॥ તસ્મૈ તે પ્રતિહર્યતે જાતવેદો વિચર્ષણે । અગ્ને
જનામિ સુષ્ટુતિમ્ ॥ દિવસ્પરિ પ્રથમં જજ્ઞે અગ્નિરસ્મદ્ દ્વિતીયં પરિ
જાતવેદાઃ । તૃતીયમપ્સુ નૃમણા અજસ્ર મિન્ધાન એનં જરતે સ્વાધીઃ
॥ શુચિઃ પાવક વન્દ્યોઽગ્ને બૃહદ્વિ રોચસે । ત્વં ઘૃતેભિરાહુતઃ
॥ દૃશાનો રુક્મ ઉર્વ્યા વ્યદ્યૌદ્દુર્મર્ષમાયુઃ શ્રિયે રુચાનઃ ।
અગ્નિરમૃતો અભવદ્વયોભિ
૨૯ ર્યદેનં દ્યૌરજનયથ્સુરેતાઃ ॥ આ યદિષે નૃપતિં તેજ આનટ્છુચિ
રેતો નિષિક્તં દ્યૌરભીકે । અગ્નિઃ શર્ધમનવદ્યં યુવાનગ્ગ્ સ્વાધિયં
જનયથ્સૂદયચ્ચ ॥ સ તેજીયસા મનસા ત્વોત ઉત શિક્ષ સ્વપત્યસ્ય
શિક્ષોઃ । અગ્ને રાયો નૃતમસ્ય પ્રભૂતૌ ભૂયામ તે સુષ્ટુતયશ્ચ
વસ્વઃ ॥ અગ્ને સહન્તમા ભર દ્યુમ્નસ્ય પ્રાસહા રયિમ્ । વિશ્વા ય
૩૦ શ્ચર્ષણીરભ્યાસા વાજેષુ સાસહત્ ॥ તમગ્ને પૃતનાસહ ँ
રયિ ँ સહસ્વ આ ભર । ત્વ ँ હિ સત્યો અદ્ભુતો દાતા વાજસ્ય ગોમતઃ
॥ ઉક્ષાન્નાય વશાન્નાય સોમપૃષ્ઠાય વેધસે । સ્તોમૈર્વિધેમાગ્નયે
॥ વદ્મા હિ સૂનો અસ્યદ્મસદ્વા ચક્રે અગ્નિર્જનુષાજ્માન્નમ્ । સ ત્વં ન
ઊર્જસન ઊર્જં ધા રાજેવ જેરવૃકે ક્ષેષ્યન્તઃ ॥ અગ્ન આયૂ ँષિ

૩૧ પવસ આ સુવોર્જમિષં ચ નઃ । આરે બાધસ્વ દુચ્છુનામ્ ॥ અગ્ને પવસ્વ
સ્વપા અસ્મે વર્ચઃ સુવીર્યમ્ । દધત્પોષꣳરયિં મયિ ॥ અગ્ને પાવક
રોચિષા મન્દ્રયા દેવ જિહ્વયા । આ દેવાન્, વક્ષિ યક્ષિ ચ ॥ સ નઃ
પાવક દીદિવોઽગ્ને દેવાꣳ ઇહા વહ । ઉપ યજ્ઞꣳ હવિશ્ચ નઃ ॥
અગ્નિઃ શુચિવ્રતતમઃ શુચિર્વિપ્રઃ શુચિઃ કવિઃ । શુચી રોચત આહુતઃ
॥ ઉદગ્ને શુચયસ્તવ શુક્રા ભ્રાજન્ત ઈરતે । તવ જ્યોતીગ્ષ્યર્ચયઃ
॥ પુરુનિષ્ઠઃ પુર્વણીક ભરાઽભિ વયોભિર્ય આયૂꣳષિ વિપ્રઃ
શુચિશ્ચતુર્દશ ચ ॥ ૧। ૩। ૧૪॥

દેવસ્ય રક્ષોહણો વિભૂસ્ત્વꣳ સોમાત્યન્યાનગાં પૃથિવ્યા ઇષે
ત્વાઽઽદદે વાક્તે સં તે સમુદ્રꣳ હવિષ્મતીર્હૃદે ત્વમગ્ને
રુદ્રશ્ચતુર્દશ ॥

દેવસ્ય ગમધ્યે હવિષ્મતીઃ પવસ એકત્રિꣳશત્ ॥

દેવસ્યાર્ચયઃ ॥

## પ્રથમકાણ્ડે ચતુર્થઃ પ્રશ્નઃ ૪

૧ આ દદે ગ્રાવાસ્યધ્વરકૃદ્દેવેભ્યો ગમ્ભીરમિમમધ્વરં
કૃધ્યુત્તમેન પવિનેન્દ્રાય સોમꣳ સુષુતં મધુમન્તં
પયસ્વન્તં વૃષ્ટિવનિમિન્દ્રાય ત્વા વૃત્રઘ્ન ઇન્દ્રાય ત્વા વૃત્રતુર
ઇન્દ્રાય ત્વાઽભિમાતિઘ્ન ઇન્દ્રાય ત્વાઽઽદિત્યવત ઇન્દ્રાય ત્વા વિશ્વદેવ્યાવતે
શ્વાત્રાઃ સ્થ વૃત્રતુરો રાધોગૂર્તા અમૃતસ્ય પત્નીસ્તા દેવીર્દેવત્રેમં
યજ્ઞં ધત્તોપહૂતાઃ સોમસ્ય પિબતોપહૂતો યુષ્માકꣳ
૨ સોમઃ પિબતુ યત્તે સોમ દિવિ જ્યોતિર્યત્ પૃથિવ્યાં યદુરાવન્તરિક્ષે
તેનાસ્મૈ યજમાનાયોરુ રાયા કૃધ્યધિ દાત્રે વોચો ધિષણે વીડૂ સતી
વીડયેથામૂર્જં દધાથામૂર્જં મે ધત્તં મા વાꣳહિꣳસિષં મા મા
હિꣳસિષ્ટ પ્રાગપાગુદગધરાક્તાસ્ત્વા દિશ આ ધાવન્ત્વમ્બ નિ ષ્વર
। યત્તે સોમાદાભ્યં નામ જાગૃવિ તસ્મૈ તે સોમ સોમાય સ્વાહા ॥

યુષ્માકઙ્ગ્ સ્વર યત્તે નવ ચ ॥ ૧। ૪। ૧॥

૩ વાચસ્પતયે પવસ્વ વાજિન્ વૃષા વૃષ્ણો અꣳશુભ્યાં ગભસ્તિપૂતો દેવો દેવાનાં પવિત્રમસિ યેષાં ભાગોઽસિ તેભ્યસ્ત્વા સ્વાંકૃતોઽસિ મધુમતીર્ન ઇષસ્કૃધિ વિશ્વેભ્યસ્ત્વેન્દ્રિયેભ્યો દિવ્યેભ્યઃ પાર્થિવેભ્યો મનસ્ત્વાષ્ટ્વુર્વન્તરિક્ષમન્વિહિ સ્વાહા ત્વા સુભવઃ સૂર્યાય દેવેભ્યસ્ત્વા મરીચિપેભ્ય એષ તે યોનિઃ પ્રાણાય ત્વા ॥ વાચઃ સપ્તચત્વારિꣳશત્ ॥ ૧। ૪। ૨॥

૪ ઉપયામગૃહીતોઽસ્યન્તર્યચ્છ મઘવન્ પાહિ સોમમુરુષ્ય રાયઃ સમિષો યજસ્વાન્તસ્તે દધામિ દ્યાવાપૃથિવી અન્તરુર્વન્તરિક્ષꣳ સજોષા દેવૈરવરૈઃ પરૈશ્ચાન્તર્યામે મઘવન્ માદયસ્વ સ્વાંકૃતોઽસિ મધુમતીર્ન ઇષસ્કૃધિ વિશ્વેભ્યસ્ત્વેન્દ્રિયેભ્યો દિવ્યેભ્યઃ પાર્થિવેભ્યો મનસ્ત્વાષ્ટ્વુર્વન્તરિક્ષમન્વિહિ સ્વાહા ત્વા સુભવઃ સૂર્યાય દેવેભ્યસ્ત્વા મરીચિપેભ્ય એષ તે યોનિરપાનાય ત્વા ॥ દેવેભ્યઃ સપ્ત ચ ॥ ૧। ૪। ૩॥

૫ આ વાયો ભૂષ શુચિપા ઉપ નઃ સહસ્રં તે નિયુતો વિશ્વવાર । ઉપો તે અન્ધો મદ્યમયામિ યસ્ય દેવ દધિષે પૂર્વપેયમ્ ॥ ઉપયામગૃહીતોઽસિ વાયવે ત્વેન્દ્રવાયૂ ઇમે સુતાઃ । ઉપ પ્રયોભિરા ગતમિન્દવો વામુશન્તિ હિ ॥ ઉપયામગૃહીતોઽસીન્દ્રવાયુભ્યાં ત્વૈષ તે યોનિઃ સજોષાભ્યાં ત્વા ॥ આ વાયો ત્રિચત્વારિꣳશત્ ॥ ૧। ૪। ૪॥

૬ અયં વાં મિત્રાવરુણા સુતઃ સોમ ઋતાવૃધા । મમેદિહ શ્રુતꣳ હવમ્ । ઉપયામગૃહીતોઽસિ મિત્રાવરુણાભ્યાં ત્વૈષ તે યોનિર્ ઋતાયુભ્યાં ત્વા ॥ અયં વાં વિꣳશતિઃ ॥ ૧। ૪। ૫॥

૭ યા વાં કશા મધુમત્યશ્વિના સૂનૃતાવતી । તયા યજ્ઞં મિમિક્ષતમ્ । ઉપયામગૃહીતોઽસ્યશ્વિભ્યાં ત્વૈષ તે યોનિર્માધ્વીભ્યાં ત્વા ॥ યા વામષ્ટાદશ ॥ ૧। ૪। ૬॥

૮ પ્રાતર્યુજૌ વિ મુચ્યેથામશ્વિનાવેહ ગચ્છતમ્ । અસ્ય સોમસ્ય પીતયે ॥ ઉપયામગૃહીતોઽસ્યશ્વિભ્યાં ત્વૈષ તે યોનિરશ્વિભ્યાં ત્વા ॥

પ્રાતર્યુજાવેકાન્નવિ ँશતિઃ ॥ ૧। ૪। ૭॥

૯ અયં વેનશ્ચોદયત્ પૃશ્નિગર્ભા જ્યોતિર્જરાયૂ રજસો વિમાને ।
ઇમમપા ँ સઙ્ગમે સૂર્યસ્ય શિશું ન વિપ્રા મતિભી રિહન્તિ ॥
ઉપયામગૃહીતોઽસિ શણ્ડાય ત્વૈષ તે યોનિર્વીરતાં પાહિ ॥ અયં
વેનઃ પઞ્ચવિ ँશતિઃ ॥ ૧। ૪। ૮॥

૧૦ તં પ્રત્નથા પૂર્વથા વિશ્વથેમથા જ્યેષ્ઠતાતિં બર્હિષદ ँ
સુવર્વિદં પ્રતીચીનં વૃજનં દોહસે ગિરાઽઽશું જયન્તમનુ યાસુ
વર્ધસે । ઉપયામગૃહીતોઽસિ મર્કાય ત્વૈષ તે યોનિઃ પ્રજાઃ પાહિ ॥
ત ँ ષડ્વિ ँશતિઃ ॥ ૧। ૪। ૯॥

૧૧ યે દેવા દિવ્યેકાદશ સ્થ પૃથિવ્યામધ્યેકાદશ
સ્થાઽપ્સુષદો મહિનૈકાદશ સ્થ તે દેવા યજ્ઞમિમં
જુષધ્વમુપયામગૃહીતોઽસ્યાગ્રયણોઽસિ સ્વાગ્રયણો જિન્વ યજ્ઞં જિન્વ
યજ્ઞપતિમભિ સવના પાહિ વિષ્ણુસ્ત્વાં પાતુ વિશં ત્વં પાહીન્દ્રિયેણૈષ
તે યોનિર્વિશ્વેભ્યસ્ત્વા દેવેભ્યઃ ॥ યે દેવાસ્ત્રિચત્વારિ ँશત્ ॥ ૧। ૪। ૧૦॥

૧૨ ત્રિ ँશત્રયશ્ચ ગણિનો રુજન્તો દિવ ँરુદ્રાઃ પૃથિવીં
ચ સચન્તે । એકાદશાસો અપ્સુષદઃ સુત ँ સોમં જુષન્તા ँ
સવનાય વિશ્વે ॥ ઉપયામગૃહીતોઽસ્યાગ્રયણોઽસિ સ્વાગ્રયણો જિન્વ
યજ્ઞં જિન્વ યજ્ઞપતિમભિ સવના પાહિ વિષ્ણુસ્ત્વાં પાતુ વિશં
ત્વં પાહીન્દ્રિયેણૈષ તે યોનિર્વિશ્વેભ્યસ્ત્વા દેવેભ્યઃ ॥ ત્રિ ँશદ્
દ્વિચત્વારિ ँશત્ ॥ ૧। ૪। ૧૧॥

૧૩ ઉપયામગૃહીતોઽસીન્દ્રાય ત્વા બૃહદ્વતે વયસ્વત ઉક્થાયુવે યત્ ત
ઇન્દ્ર બૃહદ્વયસ્તસ્મૈ ત્વા વિષ્ણવે ત્વૈષ તે યોનિરિન્દ્રાય ત્વોક્થાયુવે
॥ ઉપયામગૃહીતો દ્વાવિ ँશતિઃ ॥ ૧। ૪। ૧૨॥

૧૪ મૂર્ધાનં દિવો અરતિં પૃથિવ્યા વૈશ્વાનરમૃતાય
જાતમગ્નિમ્ । કવિ ँ સમ્રાજમતિથિં જનાનામાસન્ના પાત્રં જનયન્ત
દેવાઃ ॥ ઉપયામગૃહીતોઽસ્યગ્નયે ત્વા વૈશ્વાનરાય ધ્રુવોઽસિ

ધ્રુવક્ષિતિર્ધ્રુવાણાં ધ્રુવતમો ઽચ્યુતાનામચ્યુત ક્ષિત્તમ એષ તે
યોનિરગ્નયે ત્વા વૈશ્વાનરાય ॥ મૂર્ધાનં પઞ્ચત્રિꣳશત્ ॥ ૧। ૪। ૧૩॥

૧૫ મધુશ્ચ માધવશ્ચ શુક્રશ્ચ શુચિશ્ચ નભશ્ચ
નભસ્યશ્ચેષશ્ચોર્જશ્ચ સહશ્ચ સહસ્યશ્ચ તપશ્ચ
તપસ્યશ્ચોપયામગૃહીતોઽસિ સꣳસર્પોઽસ્યꣳહસ્પત્યાય ત્વા ॥
મધુસ્ત્રિꣳશત્ ॥ ૧। ૪। ૧૪॥

૧૬ ઇન્દ્રાગ્ની આ ગતꣳ સુતં ગીર્ભિર્નભો વરેણ્યમ્ । અસ્ય પાતં ધિયેષિતા
॥ ઉપયામગૃહીતોઽસીન્દ્રાગ્નિભ્યાં ત્વૈષ તે યોનિરિન્દ્રાગ્નિભ્યાં ત્વા ॥
ઇન્દ્રાગ્ની વિꣳશતિઃ ॥ ૧। ૪। ૧૫॥

૧૭ ઓમાસશ્ચર્ષણીધૃતો વિશ્વે દેવાસ આ ગત । દાશ્વાꣳસો દાશુષઃ
સુતમ્ ॥ ઉપયામગૃહીતોઽસિ વિશ્વેભ્યસ્ત્વા દેવેભ્ય એષ તે
યોનિર્વિશ્વેભ્યસ્ત્વા દેવેભ્યઃ ॥ ઓમાસો વિꣳશતિઃ ॥ ૧। ૪। ૧૬॥

૧૮ મરુત્વન્તં વૃષભં વાવૃધાનમકવારિં દિવ્યꣳ શાસમિન્દ્રમ્
। વિશ્વાસાહમવસે નૂતનાયોગ્રꣳ સહોદામિહ તꣳ હુવેમ ॥
ઉપયામગૃહીતોઽસીન્દ્રાય ત્વા મરુત્વત એષ તે યોનિરિન્દ્રાય ત્વા
મરુત્વતે ॥ મરુત્વન્તꣳ ષડ્વિꣳશતિઃ ॥ ૧। ૪। ૧૭॥

૧૯ ઇન્દ્ર મરુત્વ ઇહ પાહિ સોમં યથા શાર્યાતે અપિબઃ સુતસ્ય ।
તવ પ્રણીતી તવ શૂર શર્મન્ના વિવાસન્તિ કવયઃ સુયજ્ઞાઃ ॥
ઉપયામગૃહીતોઽસીન્દ્રાય ત્વા મરુત્વત એષ તે યોનિરિન્દ્રાય ત્વા
મરુત્વતે ॥ ઇન્દ્રૈકાન્નત્રિꣳશત્ ॥ ૧। ૪। ૧૮॥

૨૦ મરુત્વાꣳ ઇન્દ્ર વૃષભો રણાય પિબા સોમમનુષ્વધં મદાય ।
આ સિઞ્ચસ્વ જઠરે મધ્વ ઊર્મિં ત્વꣳ રાજાસિ પ્રદિવઃ સુતાનામ્ ॥
ઉપયામગૃહીતોઽસીન્દ્રાય ત્વા મરુત્વત એષ તે યોનિરિન્દ્રાય ત્વા
મરુત્વતે ॥ મરુત્વાનેકાન્ન ત્રિꣳશત્ ॥ ૧। ૪। ૧૯॥

૨૧ મહાꣳ ઇન્દ્રો ય ઓજસા પર્જન્યો વૃષ્ટિમાꣳ ઇવ । સ્તોમૈર્વત્સસ્ય
વાવૃધે ॥ ઉપયામગૃહીતોઽસિ મહેન્દ્રાય ત્વૈષ તે યોનિર્મહેન્દ્રાય

ત્વા ॥ મહાનેકાન્ન વિꣳશતિઃ ॥ ૧। ૪। ૨૦॥

૨૨ મહાꣳ ઇન્દ્રો નૃવદા ચર્ષણિપ્રા ઉત દ્વિબર્હા અમિનઃ સહોભિઃ ।
અસ્મદ્રિયગ્વાવૃધે વીર્યાયોરુઃ પૃથુઃ સુકૃતઃ કર્તૃભિર્ભૂત્ ॥
ઉપયામગૃહીતોઽસિ મહેન્દ્રાય ત્વૈષ તે યોનિર્મહેન્દ્રાય ત્વા ॥
મહાન્નૃવત્ષડ્વિꣳશતિઃ ॥ ૧। ૪। ૨૧॥

૨૩ કદા ચન સ્તરીરસિ નેન્દ્ર સશ્ચસિ દાશુષે । ઉપોપેન્નુ મઘવન્
ભૂય ઇન્નુ તે દાનં દેવસ્ય પૃચ્યતે ॥ ઉપયામગૃહીતોઽસ્યાદિત્યેભ્યસ્ત્વા
॥ કદા ચન પ્ર યુચ્છસ્યુભે નિ પાસિ જન્મની । તુરીયાદિત્ય સવનં ત
ઇન્દ્રિયમા તસ્થાવમૃતં દિવિ ॥ યજ્ઞો દેવાનાં પ્રત્યેતિ સુમ્નમાદિત્યાસો
ભવતા મૃડયન્તઃ । આ વો ર્વાચી સુમતિર્વવૃત્યાદꣳહોશ્ચિદ્યા
વરિવોવિત્તરાસત્ ॥ વિવસ્વ આદિત્યૈષ તે સોમપીથસ્તેન મન્દસ્વ તેન
તૃપ્ય તૃપ્યાસ્મ તે વયં તર્પયિતારો યા દિવ્યા વૃષ્ટિસ્તયા ત્વા શ્રીણામિ ॥
વઃ સપ્તવિꣳશતિશ્ચ ॥ ૧। ૪। ૨૨॥

૨૪ વામમદ્ય સવિતર્વામમુ શ્વો દિવેદિવે વામમસ્મભ્યꣳસાવીઃ
। વામસ્ય હિ ક્ષયસ્ય દેવ ભૂરેરયા ધિયા વામભાજઃ સ્યામ ॥
ઉપયામગૃહીતોઽસિ દેવાય ત્વા સવિત્રે ॥ વામં ચતુર્વિꣳશતિઃ ॥ ૧। ૪। ૨૩॥

૨૫ અદબ્ધેભિઃ સવિતઃ પાયુભિષ્ટ્વꣳ શિવેભિરદ્ય પરિ પાહિ નો ગયમ્
। હિરણ્યજિહ્વઃ સુવિતાય નવ્યસે રક્ષા માકિર્નો અઘશꣳસ ઈશત ॥
ઉપયામગૃહીતોઽસિ દેવાય ત્વા સવિત્રે ॥ અદબ્ધેભિસ્ત્રયોવિꣳશતિઃ ॥
૧। ૪। ૨૪॥

૨૬ હિરણ્યપાણિમૂતયે સવિતારમુપ હ્વયે । સ ચેત્તા દેવતા પદમ્ ॥
ઉપયામગૃહીતોઽસિ દેવાય ત્વા સવિત્રે ॥ હિરણ્યપાણિં ચતુર્દશ ॥ ૧। ૪। ૨૫॥

૨૭ સુશર્માઽસિ સુપ્રતિષ્ઠાનો બૃહદુક્ષે નમ એષ તે યોનિર્વિશ્વેભ્યસ્ત્વા
દેવેભ્યઃ ॥ સુશર્મા દ્વાદશ ॥ ૧। ૪। ૨૬॥

૨૮ બૃહસ્પતિસુતસ્ય ત ઇન્દો ઇન્દ્રિયાવતઃ પત્નીવન્તં ગ્રહં ગૃહ્ણામ્યગ્ના ૩
ઇ પત્નીવા ૩ સ્સજૂર્દેવેન ત્વષ્ટ્રા સોમં પિબ સ્વાહા ॥ બૃહસ્પતિસુતસ્ય

પઞ્ચદશ ॥ ૧। ૪। ૨૭॥

૨૯ હરિરસિ હારિયોજનો હર્યોઃ સ્થાતા વજ્રસ્ય ભર્તા પૃશ્ઞેઃ પ્રેતા તસ્ય
તે દેવ સોમેષ્ટયજુષઃ સ્તુતસ્તોમસ્ય શસ્તોક્થસ્ય હરિવન્તં ગ્રહં
ગૃહ્ણામિ હરીઃ સ્થ હર્યોર્ધાનાઃ સહ સોમા ઇન્દ્રાય સ્વાહા ॥ હરિઃ
ષડ્વિꣳશતિઃ ॥ ૧। ૪। ૨૮॥

૩૦ અગ્ન આયૂꣳષિ પવસ આ સુવોર્જમિષં ચ નઃ । આરે બાધસ્વ દુચ્છુનામ્
॥ ઉપયામગૃહીતોઽસ્યગ્નયે ત્વા તેજસ્વત એષ તે યોનિરગ્નયે ત્વા
તેજસ્વતે ॥ અગ્ન આયૂꣳષિ ત્રયોવિꣳશતિઃ ॥ ૧। ૪। ૨૯॥

૩૧ ઉત્તિષ્ઠન્નોજસા સહ પીત્વા શિપ્રે અવેપયઃ । સોમમિન્દ્ર ચમૂ સુતમ્
॥ ઉપયામગૃહીતોઽસીન્દ્રાય ત્વૌજસ્વત એષ તે યોનિરિન્દ્રાય
ત્વૌજસ્વતે ॥ ઉત્તિષ્ઠન્નેકવિꣳશતિઃ ॥ ૧। ૪। ૩૦॥

૩૨ તરણિર્વિશ્વદર્શતો જ્યોતિષ્કૃદસિ સૂર્ય । વિશ્વમા ભાસિ રોચનમ્ ॥
ઉપયામગૃહીતોઽસિ સૂર્યાય ત્વા ભ્રાજસ્વત એષ તે યોનિઃ સૂર્યાય ત્વા
ભ્રાજસ્વતે ॥ તરણિર્વિꣳશતિઃ ॥ ૧। ૪। ૩૧॥

૩૩ આ પ્યાયસ્વ મદિન્તમ સોમ વિશ્વાભિરૂતિભિઃ । ભવા નઃ સપ્રથસ્તમઃ ॥
આ પ્યાયસ્વ નવ ॥ ૧। ૪। ૩૨॥

૩૪ ઈયુષ્ટે યે પૂર્વતરામપશ્યન્ વ્યુચ્છન્તીમુષસં મર્ત્યાસઃ ।
અસ્માભિરૂ નુ પ્રતિચક્ષ્યાઽભૂદો તે યન્તિ યે અપરીષુ પશ્યાન્ ॥
ઈયુરેકાન્નવિꣳશતિઃ ॥ ૧। ૪। ૩૩॥

૩૫ જ્યોતિષ્મતીં ત્વા સાદયામિ જ્યોતિષ્કૃતં ત્વા સાદયામિ જ્યોતિર્વિદં ત્વા સાદયામિ
ભાસ્વતીં ત્વા સાદયામિ જ્વલન્તીં ત્વા સાદયામિ મલ્મલાભવન્તીં ત્વા સાદયામિ
દીપ્યમાનાં ત્વા સાદયામિ રોચમાનાં ત્વા સાદયામ્યજસ્રાં ત્વા સાદયામિ બૃહજ્જ્યોતિષં
ત્વા સાદયામિ બોધયન્તીં ત્વા સાદયામિ જાગ્રતીં ત્વા સાદયામિ ॥ જ્યોતિષ્મતી ꣳ
ષટ્ત્રિꣳશત્ ॥ ૧। ૪। ૩૪॥

૩૬ પ્રયાસાય સ્વાહાઽઽયાસાય સ્વાહા વિયાસાય સ્વાહા સંયાસાય
સ્વાહોદ્યાસાય સ્વાહાઽવયાસાય સ્વાહા શુચે સ્વાહા શોકાય સ્વાહા તપ્યત્વૈ

સ્વાહા તપતે સ્વાહા બ્રહ્મહત્યાયૈ સ્વાહા સર્વસ્મૈ સ્વાહા ॥ પ્રયાસાય ચતુર્વિꣳશતિઃ ॥ ૧। ૪। ૩૫॥

૩૭ ચિત્તꣳ સન્તાનેન ભવં યક્ના રુદ્રં તનિમ્ના પશુપતિગ્ં સ્થૂલહૃદયેનાગ્નિꣳ હૃદયેન રુદ્રં લોહિતેન શર્વં મતસ્નાભ્યાં મહાદેવમન્તઃપાર્શ્વેનૌષિષ્ઠહનꣳશિઙ્ગીનિકોશ્યાભ્યામ્ ॥

ચિત્તમષ્ટાદશ ॥ ૧। ૪। ૩૬॥

૩૮ આ તિષ્ઠ વૃત્રહન્ રથં યુક્તા તે બ્રહ્મણા હરી । અર્વાચીનꣳ સુ તે મનો ગ્રાવા કૃણોતુ વગ્નુના ॥ ઉપયામગૃહીતોઽસીન્દ્રાય ત્વા ષોડશિન એષ તે યોનિરિન્દ્રાય ત્વા ષોડશિને ॥ આ તિષ્ઠ ષડ્વિꣳશતિઃ ॥ ૧। ૪। ૩૭॥

૩૯ ઇન્દ્રમિદ્ધરી વહતોઽપ્રતિધૃષ્ટશવસમૃષીણાં ચ સ્તુતીરુપ યજ્ઞં ચ માનુષાણામ્ ॥ ઉપયામગૃહીતોઽસીન્દ્રાય ત્વા ષોડશિન એષ તે યોનિરિન્દ્રાય ત્વા ષોડશિને ॥ ઇન્દ્રમિત્ત્રયોવિꣳશતિઃ ॥ ૧। ૪। ૩૮॥

૪૦ અસાવિ સોમ ઇન્દ્ર તે શવિષ્ઠ ધૃષ્ણવા ગહિ । આ ત્વા પૃણક્ત્વિન્દ્રિયꣳ રજઃ સૂર્યં ન રશ્મિભિઃ ॥ ઉપયામગૃહીતોઽસીન્દ્રાય ત્વા ષોડશિન એષ તે યોનિરિન્દ્રાય ત્વા ષોડશિને ॥ અસાવિ સપ્તવિꣳશતિઃ ॥ ૧। ૪। ૩૯॥

૪૧ સર્વસ્ય પ્રતિશીવરી ભૂમિસ્ત્વોપસ્થ આઽધિત । સ્યોનાસ્મૈ સુષદા ભવ યચ્છાસ્મૈ શર્મ સપ્રથાઃ ॥ ઉપયામગૃહીતોઽસીન્દ્રાય ત્વા ષોડશિન એષ તે યોનિરિન્દ્રાય ત્વા ષોડશિને ॥ સર્વસ્ય ષડ્વિꣳશતિઃ ॥ ૧। ૪। ૪૦॥

૪૨ મહાꣳ ઇન્દ્રો વજ્રબાહુઃ ષોડશી શર્મ યચ્છતુ । સ્વસ્તિ નો મઘવા કરોતુ હન્તુ પાપ્માનં યોઽસ્માન્ દ્વેષ્ટિ ॥ ઉપયામગૃહીતોઽસીન્દ્રાય ત્વા ષોડશિન એષ તે યોનિરિન્દ્રાય ત્વા ષોડશિને ॥ સર્વસ્ય મહાન્થ્ષડ્વિꣳશતિષ્ષડ્વિꣳશતિઃ ॥ ૧। ૪। ૪૧॥

૪૩ સજોષા ઇન્દ્ર સગણો મરુદ્ભિઃ સોમં પિબ વૃત્રહઞ્છૂર વિદ્વાન્ । જહિ શત્રૂꣳ રપ મૃધો નુદસ્વાઽથાભયં કૃણુહિ વિશ્વતો નઃ ॥ ઉપયામગૃહીતોઽસીન્દ્રાય ત્વા ષોડશિન એષ તે યોનિરિન્દ્રાય ત્વા

ષોડશિને ॥ સજોષાસ્ત્રિઁશત્ ॥ ૧। ૪। ૪૨॥

૪૪ ઉદુ ત્યં જાતવેદસં દેવં વહન્તિ કેતવઃ । દૃશે વિશ્વાય સૂર્યમ્ ॥
ચિત્રં દેવાનામુદગાદનીકં ચક્ષુર્મિત્રસ્ય વરુણસ્યાગ્નેઃ । આઽપ્રા
ઘાવાપૃથિવી અન્તરિક્ષઁ સૂર્ય આત્મા જગતસ્તસ્થુષશ્ચ
॥ અગ્ને નય સુપથા રાયે અસ્માન્, વિશ્વાનિ દેવ વયુનાનિ વિદ્વાન્
। યુયોધ્યસ્મજ્જુહુરાણમેનો ભૂયિષ્ઠાં તે નમઉક્તિં વિધેમ ॥ દિવં
ગચ્છ સુવઃ પત રૂપેણ

૪૫ વો રૂપમભ્યૈમિ વયસા વયઃ । તુથો વો વિશ્વવેદા વિ ભજતુ
વર્ષિષ્ઠે અધિ નાકે ॥ એતત્ તે અગ્ને રાધ ઐતિ સોમચ્યુતં
તન્મિત્રસ્ય પથા નયર્તસ્ય પથા પ્રેત ચન્દ્રદક્ષિણા યજ્ઞસ્ય પથા
સુવિતા નયન્તીર્બ્રાહ્મણમદ્ય રાધ્યાસમૃષિમાર્ષેયં પિતૃમન્તં
પૈતૃમત્યઁ સુધાતુદક્ષિણં વિ સુવઃ પશ્ય વ્યન્તરિક્ષં
યતસ્વ સદસ્યૈ રસ્મદ્દાત્રા દેવત્રા ગચ્છત મધુમતીઃ પ્રદાતારમા
વિશતાનવહાયાસ્માન્ દેવયાનેન પથેત સુકૃતાં લોકે સીદત તન્નઃ
સરઁસ્કૃતમ્ ॥ રૂપેણ સદસ્યૈરષ્ટાદશ ચ ॥ ૧। ૪। ૪૩॥

૪૬ ધાતા રાતિઃ સવિતેદં જુષન્તાં પ્રજાપતિર્નિધિપતિર્નો અગ્નિઃ । ત્વષ્ટા
વિષ્ણુઃ પ્રજયા સઁરરાણો યજમાનાય દ્રવિણં દધાતુ ॥ સમિન્દ્ર ણો
મનસા નેષિ ગોભિઃ સઁ સૂરિભિર્મઘવન્ત્સરઁ સ્વસ્ત્યા । સં બ્રહ્મણા
દેવકૃતં યદસ્તિ સં દેવાનાઁસુમત્યા યજ્ઞિયાનામ્ ॥ સં વર્ચસા
પયસા સં તનૂભિરગન્મહિ મનસા સઁ શિવેન । ત્વષ્ટા નો અત્ર
વરિવઃ કૃણોત્વ

૪૭ નુ માર્ષ્ટુ તનુવો યદ્વિલિષ્ટમ્ ॥ યદદ્ય ત્વા પ્રયતિ યજ્ઞે અસ્મિન્નગ્ને
હોતારમવૃણીમહીહ । ઋધગયાડ્ઋધગુતાશમિષ્ઠાઃ પ્રજાનન્,
યજ્ઞમુપયાહિ વિદ્વાન્ ॥ સ્વગા વો દેવાઃ સદનમકર્મ ય આજગ્મ સવનેદં
જુષાણાઃ । જક્ષિવાઁસઃ પપિવાઁસશ્ચ વિશ્વેઽસ્મે ધત્ત વસવો
વસૂનિ ॥ યાનાઽવહ ઉશતો દેવ દેવાન્ તાન્

૪૮ પ્રેરય સ્વે અગ્ને સધસ્થે । વહમાના ભરમાણા હવીઁષિ વસું

ઘર્મં દિવમા તિષ્ઠતાનુ ॥ યજ્ઞ યજ્ઞં ગચ્છ યજ્ઞપતિં
ગચ્છ સ્વાં યોનિં ગચ્છ સ્વાહૈષ તે યજ્ઞો યજ્ઞપતે સહસૂક્તવાકઃ
સુવીરઃ સ્વાહા દેવા ગાતુવિદો ગાતું વિત્વા ગાતુમિત મનસસ્પત ઇમં
નો દેવ દેવેષુ યજ્ઞꣳ સ્વાહા વાચિ સ્વાહા વાતે ધાઃ ॥ કૃણોતુ
તાનષ્ટાચત્વારિꣳશચ્ચ ॥ ૧। ૪। ૪૪॥

૪૯ ઉરુꣳ હિ રાજા વરુણશ્ચકાર સૂર્યાય પન્થામન્વેતવા ઉ । અપદે
પાદા પ્રતિધાતવેઽકરુતાપવક્તા હૃદયાવિધશ્ચિત્ ॥ શતં તે રાજન્
ભિષજઃ સહસ્રમુર્વી ગમ્ભીરા સુમતિષ્ટે અસ્તુ । બાધસ્વ દ્વેષો
નિરૃતિં પરાચૈઃ કૃતં ચિદેનઃ પ્ર મુમુગ્ધ્યસ્મત્ ॥ અભિષ્ઠિતો
વરુણસ્ય પાશોઽગ્નેરનીકમપ આ વિવેશ । અપાં નપાત્ પ્રતિરક્ષન્નસુર્યં
દમેદમે

૫૦ સમિધં યક્ષ્યગ્ને ॥ પ્રતિ તે જિહ્વા ઘૃતમુચ્ચરણ્યેત્ સમુદ્રે તે
હૃદયમપ્સ્વન્તઃ । સં ત્વા વિશન્ત્વોષધીરુતાઽઽપો યજ્ઞસ્ય
ત્વા યજ્ઞપતે હવિર્ભિઃ ॥ સૂક્તવાકે નમોવાકે વિધેમાવભૃથ
નિચઙ્કુણ નિચેરુરસિ નિચઙ્કુણાવ દેવૈર્દેવકૃતમેનોઽયાઽવ
મર્ત્યૈર્મર્ત્યકૃતમુરોરા નો દેવ રિષસ્પાહિ સુમિત્રા ન આપ ઓષધયઃ

૫૧ સન્તુ દુર્મિત્રાસ્તસ્મૈ ભૂયાસુꣳ ર્યોઽસ્માન્ દ્વેષ્ટિ યં ચ વયં દ્વિષ્મો
દેવીરાપ એષ વો ગર્ભસ્તં વઃ સુપ્રીતꣳ સુભૃતમકર્મ દેવેષુ
નઃ સુકૃતો બ્રૂતાત્ પ્રતિયુતો વરુણસ્ય પાશઃ પ્રત્યસ્તો વરુણસ્ય
પાશ એધોઽસ્યેધિષીમહિ સમિદસિ તેજોઽસિ તેજો મયિ ધેહ્યપો
અન્વચારિષꣳ રસેન સમસૃક્ષ્મહિ । પયસ્વાꣳ અગ્ન આઽગમં
તં મા સꣳ સૃજ વર્ચસા ॥ દમેદમ ઓષધય આ ષટ્ ચ ॥ ૧। ૪। ૪૫॥

૫૨ યસ્ત્વા હૃદા કીરિણા મન્યમાનોઽમર્ત્યં મર્ત્યો જોહવીમિ । જાતવેદો
યશો અસ્માસુ ધેહિ પ્રજાભિરગ્ને અમૃતત્વમશ્યામ્ ॥ યસ્મૈ ત્વꣳ
સુકૃતે જાતવેદ ઉ લોકમગ્ને કૃણવઃ સ્યોનમ્ । અશ્વિનꣳ સ
પુત્રિણં વીરવન્તં ગોમન્તꣳ રયિં નશતે સ્વસ્તિ ॥ ત્વે સુ પુત્ર
શવસોઽવૃત્રન્ કામકાતયઃ । ન ત્વામિન્દ્રાતિ રિચ્યતે ॥ ઉક્થઉક્થે સોમ

ઇન્દ્રં મમાદ નીથેનીથે મઘવાનꣳ
૫૩ સુતાસઃ । યદીꣳસબાધઃ પિતરં ન પુત્રાઃ સમાનદક્ષા
અવસે હવન્તે ॥ અગ્ને રસેન તેજસા જાતવેદો વિ રોચસે
। રક્ષોહાઽમીવચાતનઃ ॥ અપો અન્વચારિષꣳ રસેન
સમસૃક્ષ્મહિ । પયસ્વાꣳ અગ્ન આઽગમં તં મા સꣳ સૃજ વર્ચસા ॥
વસુર્વસુપતિર્હિકમસ્યગ્ને વિભાવસુઃ । સ્યામ તે સુમતાવપિ ॥ ત્વામગ્ને
વસુપતિં વસૂનામભિ પ્ર મન્દે
૫૪ અધ્વરેષુ રાજન્ । ત્વયા વાજં વાજયન્તો જયેમાભિ ષ્યામ
પૃત્સુતીર્મર્ત્યાનામ્ । ત્વામગ્ને વાજસાતમં વિપ્રા વર્ધન્તિ સુષ્ટુતમ્ ।
સ નો રાસ્વ સુવીર્યમ્ ॥ અયં નો અગ્નિર્વરિવઃ કૃણોત્વયં મૃધઃ પુર
એતુ પ્રભિન્દન્ન્ । અયꣳ શત્રૂઞ્જયતુ જર્હૃષાણોઽયં વાજં જયતુ
વાજસાતૌ ॥ અગ્નિનાગ્નિઃ સમિધ્યતે કવિર્ગૃહપતિર્યુવા । હવ્યવાડ્
જુહ્વાસ્યઃ ॥ ત્વꣳ હ્યગ્ને અગ્નિના વિપ્રો વિપ્રેણ સન્ત્સતા । સખા
સખ્યા સમિધ્યસે ॥ ઉદગ્ને શુચયસ્તવ વિ જ્યોતિષા ॥ મઘવાનં
મન્દે હ્યગ્ને ચતુર્દશ ચ ॥ ૧। ૪। ૪૬॥
વાચઃ પ્રાણાય ત્વા । ઉપયામ ગૃહીતોસ્યપાનાય ત્વા । આ વાયો વાયવે
સજોષાભ્યાં ત્વા । અયમૃતાયુભ્યાં ત્વા । યા વામશ્વિભ્યાં માધ્વીભ્યાં
ત્વા । પ્રાતર્યુજાવશ્વિભ્યાં ત્વા । અયં વેનઃ શણ્ડાય ત્વૈષ તે
યોનિર્વીરતાં પાહિ । તં મર્કાય ત્વૈષ તે યોનિઃ પ્રજાઃ પાહિ । યે
દેવાસ્ત્રિꣳશદાગ્રયણોસિ વિશ્વેભ્યસ્ત્વા દેવેભ્યઃ । ઉપયામ
ગૃહીતોસીંદ્રાય ત્વોક્થાયુવે । મૂર્ધાનમગ્નયે ત્વા વૈશ્વાનરાય ।
મધુશ્ચ સꣳ સર્પોસિ । ઇંદ્રાગ્ની ઇંદ્રાગ્નિભ્યાં ત્વા । ઓમાસો વિશ્વેભ્યસ્ત્વા
દેવેભ્યઃ । મરુત્વંતં ત્રીણીંદ્રાય ત્વા મરુત્વતે । મહાન્ દ્વે મહેંદ્રાય
ત્વા । કદાચનાદિત્યેભ્યસ્ત્વા । કદાચનસ્તરીર્વિવસ્વ આદિત્ય । ઇંદ્રꣳ
શુચિરપઃ । વામં ત્રીન્દેવાય ત્વા સવિત્રે । સુશર્મા વિશ્વેભ્યસ્ત્વા
દેવેભ્યઃ । બૃહસ્પતિસ્ત્વષ્ટ્રા સોમં પિબ સ્વાહા । હરિરસિ સહ સોમા
ઇંદ્રાય સ્વાહા । અગ્ન આયૂગ્ષ્યગ્નયે ત્વા તેજસ્વતે । ઉત્તિષ્ઠન્નિંદ્રાય

ત્વૌજસ્વતે । તરણિઃ સૂર્યાય ત્વા ભ્રાજસ્વતે । આ તિષ્ઠાદ્યાઃ ષડિંદ્રાય ત્વા ષોડશિને । ઉદુ ત્યં ચિત્રમ્ । અગ્નેનય દિવં ગચ્છ । ઉરુમાયુષ્ટે યદ્દેવા મુમુગ્ધિ ।
અગ્નાવિષ્ણૂ મુમુક્તમ્ । પરા વૈ પંક્ત્યઃ । દેવા વૈ યે દેવાઃ પંક્ત્યૌ । પરા વૈ સવાચમ્ । દેવાસુરાઃ કાર્યમ્ । ભૂમિર્વ્યતૃષ્યન્ । પ્રજાપતિર્વ્યક્ષુધ્યન્ । ભૂમિરાદિત્યા વૈ । અગ્નિ હોત્રમાદિત્યો વૈ । ભૂમિર્લેકઃ સલેકઃ સુલેકઃ । વિષ્ણોરુદુત્તમમ્ । અન્નપતે પુનસ્ત્વાઽદિત્યાઃ । ઉરુ ँ સ ँ સૃજ વર્ચસા । યસ્ત્વા સુષ્ટુતમ્ । ત્વમગ્નેયુક્ષ્વાહિ સુષ્ટુતિમ્ । ત્વમગ્ને વિચર્ષણે । યસ્ત્વા વિરોચસે ॥
આ દદે વાચસ્પતય ઉપયામગૃહીતોસ્યા વાયો અયં વાં યા વાં પ્રાતર્યુજાવયં તં યે દેવાસ્ત્રિ ँ શદુપયામ ગૃહીતોસિ મૂર્ધાનં મધુશ્ચેંદ્રાગ્ની ઓમાસો મરુત્વંતમિંદ્ર મરુત્વો મરુત્વાન્મહાન્મહાન્નૃવત્કદા વામમદબ્ધેભિર્ હિરણ્યપાણિ ँ સુશર્મા બૃહસ્પતિસુતસ્ય હરિરસ્યગ્ન ઉત્તિષ્ઠન્તરણિરા પ્યાયસ્વેયુષ્ટે યે જ્યોતિષ્મતીં પ્રયાસાય ચિત્તમા તિષ્ઠેંદ્રમસાવિ સર્વસ્ય મહાન્થ્સજોષા ઉદુ ત્યં ધાતોરુ ँ હિ યસ્ત્વા ષટ્ચત્વારિ ँ શત્ ॥
આ દદે યે દેવા મહાનુત્તિષ્ઠન્થ્સર્વસ્ય સન્ દુર્મિત્રાશ્ચતુઃ પંચાશત્ ॥
આ દદે તવ વિ જ્યોતિષા ॥

## પ્રથમકાણ્ડે પઞ્ચમઃ પ્રશ્નઃ ૫

૧ દેવાસુરાઃ સંયત્તા આસન્ તે દેવા વિજયમુપયન્તોઽગ્નૌ વામં વસુ સં ન્યદધતેદમુ નો ભવિષ્યતિ યદિ નો જેષ્યન્તીતિ તદગ્નિર્ન્યકામયત તેનાપાક્રામત્ તદ્દેવા વિજિત્યાવરુરુત્સમાના અન્વાયન્ તદસ્ય સહસાઽદિથ્સન્ત સોઽરોદીદ્યદરોદીત્ તદ્રુદ્રસ્ય રુદ્રત્વં યદશ્રુવશીયત તદ્
૨ રજત ँ હિરણ્યમભવત્ તસ્માદ્રજત ँ

હિરણ્યમદક્ષિણ્યમશ્રુજꣳ હિ યો બર્હિષિ દદાતિ પુરાઽસ્ય
સંવથ્સરાદ્ગૃહે રુદન્તિ તસ્માદ્બર્હિષિ ન દેયꣳ
સોઽગ્નિરબ્રવીદ્ભાગ્યસાન્યથ વ ઇદમિતિ પુનરાધેયં
તે કેવલમિત્યબ્રુવન્નૃધ્નવત્ ખલુ સ ઇત્યબ્રવીદ્યો
મદ્દેવત્યમગ્નિમાદધાતા ઇતિ તં પૂષાઽઽધત્ત તેન
૩ પૂષાઽઽર્ધ્નોત્ તસ્માત્ પૌષ્ણાઃ પશવ ઉચ્યન્તે તં ત્વષ્ટાઽઽધત્ત તેન
ત્વષ્ટાઽઽર્ધ્નોત્ તસ્માત્ ત્વાષ્ટ્રાઃ પશવ ઉચ્યન્તે તં મનુરાઽધત્ત
તેન મનુરાર્ધ્નોત્ તસ્માન્માનવ્યઃ પ્રજા ઉચ્યન્તે તં ધાતા ઽઽધત્ત
તેન ધાતાઽઽર્ધ્નોત્ સંવથ્સરો વૈ ધાતા તસ્માત્ સંવથ્સરં પ્રજાઃ
પશવોઽનુ પ્ર જાયન્તે ય એવં પુનરાધેયસ્યર્દ્ધિં વેદ
૪ ર્ધ્નોત્યેવ યોઽસ્યૈવં બન્ધુતાં વેદ બન્ધુમાન્ ભવતિ ભાગધેયં વા
અગ્નિરાહિત ઇચ્છમાનઃ પ્રજાં પશૂન્, યજમાનસ્યોપ દોદ્રાવોદ્વાસ્ય
પુનરા દધીત ભાગધેયેનૈવૈનꣳ સમર્ધયત્યથો
શાન્તિરેવાસ્યૈષા પુનર્વસ્વોરા દધીતૈતદ્વૈ પુનરાધેયસ્ય
નક્ષત્રં યત્પુનર્વસૂ સ્વાયામેવૈનં દેવતાયામાધાય બ્રહ્મવર્ચસી
ભવતિ દર્ભૈરા દધાત્યયાતયામત્વાય દર્ભૈરા દધાત્યદ્ભ્ય
એવૈનમોષધીભ્યોઽવરુધ્યાઽઽધત્તે પઞ્ચકપાલઃ પુરોડાશો ભવતિ
પઞ્ચ વા ઋતવ ઋતુભ્ય એવૈનમવરુધ્યાઽઽધત્તે ॥ અશીયત
તત્ તેન વેદ દર્ભૈઃ પઞ્ચવિꣳશતિશ્ચ ॥ ૧। ૫। ૧॥
૫ પરા વા એષ યજ્ઞં પશૂન્, વપતિ યોઽગ્નિમુદ્વાસયતે પઞ્ચકપાલઃ
પુરોડાશો ભવતિ પાઙ્ક્તો યજ્ઞઃ પાઙ્ક્તાઃ પશવો યજ્ઞમેવ પશૂનવ
રુન્ધે વીરહા વા એષ દેવાનાં યોઽગ્નિમુદ્વાસયતે ન વા એતસ્ય બ્રાહ્મણા
ઋતાયવઃ પુરાઽન્નમક્ષન્ પઙ્ક્ત્યો યાજ્યાનુવાક્યા ભવન્તિ પાઙ્ક્તો
યજ્ઞઃ પાઙ્ક્તઃ પુરુષો દેવાનેવ વીરં નિરવદાયાગ્નિં પુનરા
૬ ધત્તે શતાક્ષરા ભવન્તિ શતાયુઃ પુરુષઃ શતેન્દ્રિય
આયુષ્યેવેન્દ્રિયે પ્રતિ તિષ્ઠતિ યદ્વા અગ્નિરાહિતો નર્ધ્યતે જ્યાયો
ભાગધેયં નિકામયમાનો યદાગ્નેયꣳ સર્વં ભવતિ સૈવાસ્યર્ધિઃ

સં વા એતસ્ય ગૃહે વાક્ સૃજ્યતે યોઽગ્નિમુદ્વાસયતે સ વાચꣳ
સꣳ સૃષ્ટાં યજમાન ઈશ્વરોઽનુ પરાભવિતોર્વિભક્તયો ભવન્તિ વાચો
વિધૃત્યૈ યજમાનસ્યાપરાભાવાય
૭ વિભક્તિં કરોતિ બ્રહ્મૈવ તદકરુપાꣳશુ યજતિ યથા વામં વસુ
વિવિદાનો ગૂહતિ તાદૃગેવ તદગ્નિં પ્રતિ સ્વિષ્ટકૃતં નિરાહ યથા
વામં વસુ વિવિદાનઃ પ્રકાશં જિગમિષતિ તાદૃગેવ તદ્વિભક્તિ મુક્ત્વા
પ્રયાજેન વષટ્કરોત્યાયતનાદેવ નૈતિ યજમાનો વૈ પુરોડાશઃ
પશવ એતે આહુતી યદભિતઃ પુરોડાશમેતે આહુતી
૮ જુહોતિ યજમાનમેવોભયતઃ પશુભિઃ પરિ ગૃહ્ણાતિ કૃતયજુઃ
સમ્ભૃતસમ્ભાર ઇત્યાહુર્ન સમ્ભૃત્યાઃ સમ્ભારા ન યજુઃ કર્તવ્યમિત્યથો
ખલુ સમ્ભૃત્યા એવ સમ્ભારાઃ કર્તવ્યં યજુર્યજ્ઞસ્ય સમૃદ્ધ્યૈ
પુનર્નિષ્કૃતો રથો દક્ષિણા પુનરુત્સ્યૂતં વાસઃ પુનરુત્સૃષ્ટોઽનડ્વાન્
પુનરાધેયસ્ય સમૃદ્ધ્યૈ સપ્ત તે અગ્ને સમિધઃ સપ્ત જિહ્વા
ઇત્યગ્નિહોત્રં જુહોતિ યત્રયત્રૈવાસ્ય ન્યક્તં તત
૯ એવૈનમવ રુન્ધે વીરહા વા એષ દેવાનાં યોઽગ્નિમુદ્વાસયતે તસ્ય
વરુણ એવર્ણયાદગ્નિવારુણમેકાદશકપાલમનુ નિર્વપેદ્યં ચૈવ હન્તિ
યશ્ચાસ્યર્ણયાત્તૌ ભાગધેયેન પ્રીણાતિ નાઽઽર્તિમાર્છતિ યજમાનઃ ॥
આઽપરાભાવાય પુરોડાશમેતે આહુતી તતષ્ષટ્ત્રિꣳશચ્ચ ॥ ૧। ૫। ૨॥
૧૦ ભૂમિર્ભૂમ્ના દ્યૌર્વરિણાઽન્તરિક્ષં મહિત્વા । ઉપસ્થે
તે દેવ્યદિતેઽગ્નિમન્નાદમન્નાદ્યાયાઽઽદધે ॥ આઽયં ગૌઃ
પૃશ્નિરક્રમીદસનન્માતરં પુનઃ । પિતરં ચ પ્રયન્ત્સુવઃ ॥
ત્રિꣳશદ્ધામ વિ રાજતિ વાક્પતઙ્ગાય શિશ્રિયે । પ્રત્યસ્ય વહ
દ્યુભિઃ ॥ અસ્ય પ્રાણાદપાનત્યન્તશ્ચરતિ રોચના । વ્યખ્યન્મહિષઃ
સુવઃ ॥ યત્ ત્વા
૧૧ ક્રુદ્ધઃ પરોવપ મન્યુના યદવર્ત્યા । સુકલ્પમગ્ને તત્ તવ
પુનસ્ત્વોદ્દીપયામસિ ॥ યત્ તે મન્યુપરોપ્તસ્ય પૃથિવીમનુ દધ્વસે ।

આદિત્યા વિશ્વે તદ્દેવા વસવશ્ચ સમાભરન્ ॥ મનો જ્યોતિર્જુષતામાજ્યં
વિચ્છિન્નં યજ્ઞꣳ સમિમં દધાતુ । બૃહસ્પતિસ્તનુતામિમં નો વિશ્વે
દેવા ઇહ માદયન્તામ્ ॥ સપ્ત તે અગ્ને સમિધઃ સપ્ત જિહ્વાઃ સપ્ત
૧૨ ઋષયઃ સપ્ત ધામ પ્રિયાણિ । સપ્ત હોત્રાઃ સપ્તધા ત્વા યજન્તિ સપ્ત
યોનીરા પૃણસ્વા ઘૃતેન ॥ પુનરૂર્જા નિ વર્તસ્વ પુનરગ્ન ઇષાઽઽયુષા
। પુનર્નઃ પાહિ વિશ્વતઃ ॥ સહ રય્યા નિ વર્તસ્વાગ્ને પિન્વસ્વ ધારયા ।
વિશ્વપ્સ્નિયા વિશ્વતસ્પરિ ॥ લેકઃ સલેકઃ સુલેકસ્તે ન આદિત્યા આજ્યં
જુષાણા વિયન્તુ કેતઃ સકેતઃ સુકેતસ્તે ન આદિત્યા આજ્યં જુષાણા વિયન્તુ
વિવસ્વાꣳ અદિતિર્દેવજૂતિસ્તે ન આદિત્યા આજ્યં જુષાણા વિયન્તુ ॥

ત્વા જિહ્વાઃ સપ્ત સુકેતસ્તે નસ્ત્રયોદશ ચ ॥ ૧। ૫। ૩॥

૧૩ ભૂમિર્ભૂમ્ના દ્યૌર્વરિણેત્યાહાઽઽશિષૈવૈનમા ધત્તે સર્પા
વૈ જીર્યન્તોઽમન્યન્ત સ એતં કસર્ણીરઃ કાદ્રવેયો મન્ત્રમપશ્યત્
તતો વૈ તે જીર્ણાસ્તનૂરપાઘ્નત સર્પરાજ્ઞિયા ઋગ્ભિર્ગાર્હપત્યમા
દધાતિ પુનર્નવમેવૈનમજરં કૃત્વાઽઽધત્તેઽથો પૂતમેવ
પૃથિવીમન્નાદ્યં નોપાનમત્સૈતં

૧૪ મન્ત્રમપશ્યત્ તતો વૈ તામન્નાદ્યમુપાનમદ્યત્સર્પરાજ્ઞિયા
ઋગ્ભિર્ગાર્હપત્યમાદધાત્યન્નાદ્યસ્યાવરુદ્ધ્યા અથો અસ્યામેવૈનં
પ્રતિષ્ઠિતમા ધત્તે યત્ત્વા ક્રુદ્ધઃ પરોવપેત્યાહાપહ્નુત એવાસ્મૈ તત્
પુનસ્ત્વોદ્દીપયામસીત્યાહ સમિન્ધ એવૈનં યત્તે મન્યુપરોપ્તસ્યેત્યાહ
દેવતાભિરેવૈ

૧૫ નꣳ સં ભરતિ વિ વા એતસ્ય યજ્ઞશ્છિદ્યતે
યોઽગ્નિમુદ્વાસયતે બૃહસ્પતિવત્યર્ચોપ તિષ્ઠતે બ્રહ્મ વૈ દેવાનાં
બૃહસ્પતિર્બ્રહ્મણૈવ યજ્ઞꣳ સં દધાતિ વિચ્છિન્નં યજ્ઞꣳ
સમિમં દધાત્વિત્યાહ સંતત્યૈ વિશ્વે દેવા ઇહ માદયન્તામિત્યાહ
સંતત્યૈવ યજ્ઞં દેવેભ્યોઽનુ દિશતિ સપ્ત તે અગ્ને સમિધઃ સપ્ત જિહ્વા

૧૬ ઇત્યાહ સપ્તસપ્ત વૈ સપ્તધાઽગ્નેઃ પ્રિયાસ્તનુવસ્તા એવાવ
રુન્ધે પુનરૂર્જા સહ રય્યેત્યભિતઃ પુરોડાશમાહુતી જુહોતિ

યજમાનમેવોર્જા ચ રચ્યા ચોભયતઃ પરિ ગૃહ્ણાત્યાદિત્યા વા
અસ્માલ્લોકાદમું લોકમાયન્તેઽમુષ્મિઉઁ લ્લોકે વ્યતૃષ્યન્ત ઇમં
લોકં પુનરભ્યવેત્યાગ્નિમાધાયૈતાન્ હોમાનજુહવુસ્ત આર્ધ્નુવન્ તે
સુવર્ગઉઁ લ્લોકમાયન્ યઃ પરાચીનં પુનરાધેયાદગ્નિમાદધીત
સ એતાન્ હોમાન્જુહુ યાદ્યામેવાઽઽદિત્યા ઋદ્ધિમાર્ધ્નુવન્ તામેવર્ધ્નોતિ ॥
સૈતં દેવતાભિરેવ જિહ્વા એતાન્ પઞ્ચવિઁ શતિશ્ચ ॥ ૧। ૫। ૪॥
૧૭ ઉપપ્રયન્તો અધ્વરં મન્ત્રં વોચેમાગ્નયે । આરે અસ્મે ચ શ◌ૃણ્વતે ॥
અસ્ય પ્રત્નામનુ દ્યુતઁ શુક્રં દુદુહ્રે અહ્રયઃ । પયઃ સહસ્રસામૃષિમ્
॥ અગ્નિર્મૂર્ધા દિવઃ કકુત્ પતિઃ પૃથિવ્યા અયમ્ । અપાઁ રેતાઁસિ જિન્વતિ
॥ અયમિહ પ્રથમો ધાયિ ધાતૃભિર્હોતા યજિષ્ઠો અધ્વરેષ્વીડ્યઃ ।
યમપ્નવાનો ભૃગવો વિરુરુચુર્વનેષુ ચિત્રં વિભ્વં વિશેવિશે ॥
ઉભા વામિન્દ્રાગ્ની આહુવધ્યા
૧૮ ઉભા રાધસઃ સહ માદયધ્યૈ । ઉભા દાતારાવિષાઁ રયીણામુભા
વાજસ્ય સાતયે હુવે વામ્ ॥ અયં તે યોનિરૃત્વિયો યતો જાતો અરોચથાઃ
। તં જાનન્નગ્ન આ રોહાથા નો વર્ધયા રયિમ્ ॥ અગ્ન આયૂઁષિ પવસ
આ સુવોર્જમિષં ચ નઃ । આરે બાધસ્વ દુચ્છુનામ્ ॥ અગ્ને પવસ્વ સ્વપા
અસ્મે વર્ચઃ સુવીર્યમ્ । દધત્પોષઁ રયિં
૧૯ મયિ ॥ અગ્ને પાવક રોચિષા મન્દ્રયા દેવ જિહ્વયા । આ દેવાન્, વક્ષિ
યક્ષિ ચ ॥ સ નઃ પાવક દીદિવોઽગ્ને દેવાઁ ઇહાઽઽવહ । ઉપ યજ્ઞઁ
હવિશ્ચ નઃ ॥ અગ્નિઃ શુચિવ્રતતમઃ શુચિર્વિપ્રઃ શુચિઃ કવિઃ ।
શુચી રોચત આહુતઃ ॥ ઉદગ્ને શુચયસ્તવ શુક્રા ભ્રાજન્ત ઈરતે ।
તવ જ્યોતીગ્ષ્યર્ચયઃ ॥ આયુર્દા અગ્નેઽસ્યાયુર્મે
૨૦ દેહિ વર્ચોદા અગ્નેઽસિ વર્ચો મે દેહિ તનૂપા અગ્નેઽસિ તનુવં મે
પાહ્યગ્ને યન્મે તનુવા ઊનં તન્મ આ પૃણ ચિત્રાવસો સ્વસ્તિ તે
પારમશીયેન્ધાનાસ્ત્વા શતઁ હિમા દ્યુમન્તઃ સમિધીમહિ વયસ્વન્તો
વયસ્કૃતં યશસ્વન્તો યશસ્કૃતઁ સુવીરાસો અદાભ્યમ્ । અગ્ને

સપત્નદમ્ભનં વર્ષિષ્ઠે અધિ નાકે ॥ સં ત્વમગ્ને સૂર્યસ્ય
વર્ચસાઽગથાઃ સમૃષીણાગ્ સ્તુતેન સં પ્રિયેણ ધામ્ના । ત્વમગ્ને
સૂર્યવર્ચા અસિ સં મામાયુષા વર્ચસા પ્રજયા સૃજ ॥ આહુવધ્યૈ
પોષꣳરયિં મે વર્ચસા સપ્તદશ ચ ॥ ૧। ૫। ૫॥
૨૧ સં પશ્યામિ પ્રજા અહમિડપ્રજસો માનવીઃ । સર્વા ભવન્તુ નો ગૃહે ॥
અમ્ભઃ સ્થામ્ભો વો ભક્ષીય મહઃ સ્થ મહો વો ભક્ષીય સહઃ સ્થ સહો
વો ભક્ષીયોર્જઃ સ્થોર્જં વો ભક્ષીય રેવતી રમધ્વમસ્મિꣳલ્લોકેઽસ્મિન્
ગોષ્ઠેઽસ્મિન્ ક્ષયેઽસ્મિન્, યોનાવિહૈવ સ્તેતો માઽપ ગાત બહ્વીર્મે ભૂયાસ્ત
૨૨ સꣳહિતાસિ વિશ્વરૂપીરા મોર્જા વિશાઽઽગૌપત્યેનાઽઽ રાયસ્પોષેણ
સહસ્રપોષં વઃ પુષ્યાસં મયિ વો રાયઃ શ્રયન્તામ્ ॥ ઉપ ત્વાઽગ્ને દિવેદિવે
દોષાવસ્તર્ધિયા વયમ્ । નમો ભરન્ત એમસિ । રાજન્તમધ્વરાણાં
ગોપામૃતસ્ય દીદિવિમ્ । વર્ધમાનગ્ગ્ સ્વે દમે ॥ સ નઃ પિતેવ
સૂનવેઽગ્ને સૂપાયનો ભવ । સચસ્વા નઃ સ્વસ્તયે ॥ અગ્ને
૨૩ ત્વં નો અન્તમઃ । ઉત ત્રાતા શિવો ભવ વરૂથ્યઃ ॥ તં ત્વા શોચિષ્ઠ
દીદિવઃ । સુમ્નાય નૂનમીમહે સખિભ્યઃ ॥ વસુરગ્નિર્વસુશ્રવાઃ ।
અચ્છા નક્ષિ દ્યુમત્તમો રયિં દાઃ ॥ ઊર્જા વઃ પશ્યામ્યૂર્જા મા પશ્યત
રાયસ્પોષેણ વઃ પશ્યામિ રાયસ્પોષેણ મા પશ્યતેઽઃ સ્થ મધુકૃતઃ
સ્યોના માઽઽવિશતેરા મદઃ । સહસ્રપોષં વઃ પુષ્યાસં
૨૪ મયિ વો રાયઃ શ્રયન્તામ્ ॥ તત્ સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ
। ધિયો યો નઃ પ્રચોદયાત્ ॥ સોમાનગ્ગ્ સ્વરણં કૃણુહિ બ્રહ્મણસ્પતે
। કક્ષીવન્તં ય ઔશિજમ્ ॥ કદા ચન સ્તરીરસિ નેન્દ્ર સશ્ચસિ
દાશુષે । ઉપોપેન્નુ મઘવન્ ભૂય ઇન્નુ તે દાનં દેવસ્ય પૃચ્યતે
॥ પરિ ત્વાગ્ને પુરં વયં વિપ્રꣳસહસ્ય ધીમહિ । ધૃષદ્વર્ણં
દિવેદિવે ભેત્તારં ભઙ્ગુરાવતઃ ॥ અગ્ને ગૃહપતે સુગૃહપતિરહં
ત્વયા ગૃહપતિના ભૂયાસꣳ સુગૃહપતિર્મયા ત્વં ગૃહપતિના ભૂયાઃ
શતꣳ હિમાસ્તામાશિષમા શાસે તન્તવે જ્યોતિષ્મતીં તામાશિષમા
શાસેઽમુષ્મૈ જ્યોતિષ્મતીમ્ ॥ ભૂયાસ્ત સ્વસ્તયેઽગ્ને પુષ્યાસં

ધૃષદ્વર્ણમેકાન્નત્રિꣳશચ્ચ ॥ ૧। ૫। ૬॥

૨૫ અયજ્ઞો વા એષ યોઽસામોપપ્રયન્તો અધ્વરમિત્યાહ સ્તોમમેવાસ્મૈ
યુનક્ત્યુપેત્યાહ પ્રજા વૈ પશવ ઉપેમં લોકં પ્રજામેવ પશૂનિમં
લોકમુપૈત્યસ્ય પ્રત્નામનુદ્યુતમિત્યાહ સુવર્ગો વૈ લોકઃ પ્રત્નઃ
સુવર્ગમેવ લોકꣳ સમારોહત્યગ્નિર્મૂર્ધા દિવઃ કકુદિત્યાહ મૂર્ધાન

૨૬ મેવૈનꣳસમાનાનાં કરોત્યથો દેવલોકાદેવ મનુષ્યલોકે
પ્રતિતિષ્ઠત્યયમિહ પ્રથમો ધાયિ ધાતૃભિરિત્યાહ મુખ્યમેવૈનં
કરોત્યુભા વામિન્દ્રાગ્ની આહુવધ્યા ઇત્યાહૌજો બલમેવાવ રુન્ધેઽયં તે
યોનિરૃત્વિય ઇત્યાહ પશવો વૈ રયિઃ પશૂનેવાવ રુન્ધે ષડ્ભિરુપ
તિષ્ઠતે ષડ્વા

૨૭ ઋતવ ઋતુષ્વેવ પ્રતિ તિષ્ઠતિ ષડ્ભિરુત્તરાભિરુપ તિષ્ઠતે
દ્વાદશ સં પદ્યન્તે દ્વાદશ માસાઃ સંવથ્સરઃ સંવથ્સર એવ
પ્રતિ તિષ્ઠતિ યથા વૈ પુરુષોઽશ્વો ગૌર્જીર્યત્યેવમગ્નિરાહિતો
જીર્યતિ સંવથ્સરસ્ય પરસ્તાદાગ્નિપાવમાનીભિરુપ તિષ્ઠતે
પુનર્નવમેવૈનમજરં કરોત્યથો પુનાત્યેવોપ તિષ્ઠતે યોગ
એવાસ્યૈષ ઉપ તિષ્ઠતે

૨૮ દમ એવાસ્યૈષ ઉપ તિષ્ઠતે યાચ્ઞૈવાસ્યૈષોપ તિષ્ઠતે
યથા પાપીયાઞ્છ્રેયસ આહૃત્ય નમસ્યતિ તાદૃગેવ તદાયુર્દા
અગ્નેઽસ્યાયુર્મે દેહીત્યાહાઽઽયુર્દા હ્યેષ વર્ચોદા અગ્નેઽસિ વર્ચો
મે દેહીત્યાહ વર્ચોદા હ્યેષ તનૂપા અગ્નેઽસિ તનુવં મે પાહીત્યાહ

૨૯ તનૂપા હ્યેષોઽગ્ને યન્મે તનુવા ઊનં તન્મ આ પૃણેત્યાહ યન્મે
પ્રજાયૈ પશૂનામૂનં તન્મ આ પૂરયેતિ વાવૈતદાહ ચિત્રાવસો સ્વસ્તિ
તે પારમશીયેત્યાહ રાત્રિર્વૈ ચિત્રાવસુરવ્યુષ્ટ્યૈ વા એતસ્યૈ
પુરા બ્રાહ્મણા અભૈષુર્વ્યુષ્ટિમેવાવ રુન્ધ ઇન્ધાનાસ્ત્વા શતꣳ

૩૦ હિમા ઇત્યાહ શતાયુઃ પુરુષઃ શતેન્દ્રિય આયુષ્યેવેન્દ્રિયે પ્રતિ
તિષ્ઠત્યેષા વૈ સૂર્મી કર્ણકાવત્યેતયા હ સ્મ વૈ દેવા અસુરાણાꣳ
શતતર્હાગ્ સ્તૃꣳહન્તિ યદેતયા સમિધમાદધાતિ

વજ્રમેવૈતચ્છતઘ્નીં યજમાનો ભ્રાતૃવ્યાય પ્રહરતિ
સ્તૃત્યા અછમ્બટ્કાર૯ં સં ત્વમગ્ને સૂર્યસ્ય વર્ચસા ગથા
ઇત્યાહૈતત્ત્વમસીદમહં ભૂયાસમિતિ વાવૈતદાહ ત્વમગ્ને સૂર્યવર્ચા
અસીત્યાહાઽઽશિષમેવૈતામા શાસ્તે ॥ મૂર્ધાન૯ં ષડ્ગા એષ ઉપ
તિષ્ઠતે પાહીત્યાહ શતમહ૯ં ષોડશ ચ ॥ ૧। ૫। ૭॥

૩૧ સં પશ્યામિ પ્રજા અહમિત્યાહ યાવન્ત એવ ગ્રામ્યાઃ પશવસ્તાનેવાવ
રુન્ધેઽમ્ભઃ સ્થામ્ભો વો ભક્ષીયેત્યાહામ્ભો હ્યેતા મહઃ સ્થ મહો વો
ભક્ષીયેત્યાહ મહો હ્યેતાઃ સહઃ સ્થ સહો વો ભક્ષીયેત્યાહ સહો
હ્યેતા ઊર્જસ્થોર્જં વો ભક્ષીયેત્યા

૩૨ હોર્જો હ્યેતા રેવતી રમધ્વમિત્યાહ પશવો વૈ રેવતીઃ પશૂનેવાત્મન્
રમયત ઇહૈવ સ્તેતો માઽપ ગાતેત્યાહ ધ્રુવા એવૈના અનપગાઃ કુરુત
ઇષ્ટકચિદ્વા અન્યોઽગ્નિઃ પશુચિદન્યઃ સ૯ંહિતાસિ વિશ્વરૂપીરિતિ
વથ્સમભિ મૃશત્યુપૈવૈનં ધત્તે પશુચિતમેનં કુરુતે પ્ર

૩૩ વા એષોઽસ્માલ્લોકાચ્ચ્યવતે ય આહવનીયમુપ તિષ્ઠતે
ગાર્હપત્યમુપ તિષ્ઠતેઽસ્મિન્નેવ લોકે પ્રતિ તિષ્ઠત્યથો ગાર્હપત્યાયૈવ
નિ હ્નુતે ગાયત્રીભિરુપ તિષ્ઠતે તેજો વૈ ગાયત્રી તેજ એવાત્મન્
ધત્તેઽથો યદેતં તૃચમન્વાહ સન્તત્યૈ ગાર્હપત્યં વા અનુ દ્વિપાદો
વીરાઃ પ્રજાયન્તે ય એવં વિદ્વાન્ દ્વિપદાભિર્ગાર્હપત્યમુપ તિષ્ઠત

૩૪ આઽસ્ય વીરો જાયત ઊર્જા વઃ પશ્યામ્યૂર્જા મા
પશ્યતેત્યાહાઽઽશિષમેવૈતામા શાસ્તે તથ્સવિતુર્વરેણ્યમિત્યાહ
પ્રસૂત્યૈ સોમાનગ્ગ્ સ્વરણમિત્યાહ સોમપીથમેવાવ રુન્ધે કૃણુહિ
બ્રહ્મણસ્પત ઇત્યાહ બ્રહ્મવર્ચસમેવાવ રુન્ધે કદા ચન સ્તરીરસીત્યાહ
ન સ્તરી૯ં રાત્રિં વસતિ

૩૫ ય એવં વિદ્વાનગ્નિમુપ તિષ્ઠતે પરિ ત્વાગ્ને પુરં વયમિત્યાહ
પરિધિમેવૈતં પરિ દધાત્યસ્કન્દાયાગ્ને ગૃહપત ઇત્યાહ
યથાયજુરેવૈતચ્છત૯ં હિમા ઇત્યાહ શતં ત્વા હેમન્તાનિન્ધિષીયેતિ
વાવૈતદાહ પુત્રસ્ય નામ ગૃહ્ણાત્યન્નાદમેવૈનં કરોતિ તામાશિષમા

શાસે તન્તવે જ્યોતિષ્મતીમિતિ બ્રૂયાદ્યસ્ય પુત્રોઽજાતઃ
સ્યાત્તેજસ્વ્યેવાસ્ય બ્રહ્મવર્ચસી પુત્રો જાયતે તામાશિષમા
શાસેઽમુષ્મૈ જ્યોતિષ્મતીમિતિ બ્રૂયાદ્યસ્ય પુત્રો જાતઃ સ્યાત્
તેજ એવાસ્મિન્ બ્રહ્મવર્ચસં દધાતિ ॥ ઊર્જં વો ભક્ષીયેતિ પ્ર
ગાર્હપત્યમુપતિષ્ઠતે વસતિ જ્યોતિષ્મતીમેકાન્નત્રિઁશચ્ચ ॥ ૧। ૫। ૮॥

૩૬ અગ્નિહોત્રં જુહોતિ યદેવ કિઞ્ચ યજમાનસ્ય સ્વં તસ્યૈવ તદ્રેતઃ
સિઞ્ચતિ પ્રજનને પ્રજનનઁ હિ વા અગ્નિરથૌષધીરન્તગતા દહતિ
તાસ્તતો ભૂયસીઃ પ્રજાયન્તે યત્સાયં જુહોતિ રેત એવ તત્સિઞ્ચતિ
પ્રૈવ પ્રાતસ્તનેન જનયતિ તદ્રેતઃ સિક્તં ન ત્વષ્ટ્રાઽવિકૃતં પ્રજાયતે
યાવચ્છો વૈ રેતસઃ સિક્તસ્ય

૩૭ ત્વષ્ટા રૂપાણિ વિકરોતિ તાવચ્છો વૈ તત્પ્રજાયત એષ વૈ દૈવ્યસ્ત્વષ્ટા
યો યજતે બહ્વીભિરુપ તિષ્ઠતે રેતસ એવ સિક્તસ્ય બહુશો રૂપાણિ વિ
કરોતિ સ પ્રૈવ જાયતે શ્વઃશ્વો ભૂયાન્ ભવતિ ય એવં વિદ્વાનગ્નિમુપ
તિષ્ઠતેઽહર્દેવાનામાસીદ્રાત્રિરસુરાણાં તેઽસુરા યદ્દેવાનાં વિત્તં
વેદ્યમાસીત્તેન સહ

૩૮ રાત્રિં પ્રાવિશન્ તે દેવા હીના અમન્યન્ત તેઽપશ્યન્નાગ્નેયી રાત્રિરાગ્નેયાઃ
પશવ ઇમમેવાગ્નિઁ સ્તવામ સ નઃ સ્તુતઃ પશૂન્ પુનર્દાસ્યતીતિ
તેઽગ્નિમસ્તુવન્થ્સ એભ્યઃ સ્તુતો રાત્રિયા અધ્યહરભિ પશૂન્નિરાર્જત્
તે દેવાઃ પશૂન્, વિત્વા કામાઁઅકુર્વત ય એવં વિદ્વાનગ્નિમુપતિષ્ઠતે
પશુમાન્ ભવત્યા

૩૯ દિત્યો વા અસ્માલ્લોકાદમું લોકમૈત્ સોઽમું લોકં ગત્વા પુનરિમં
લોકમભ્યધ્યાયત્ સ ઇમં લોકમાગત્ય મૃત્યોરબિભેન્મૃત્યુસંયુત
ઇવ હ્યયં લોકઃ સોઽમન્યતેમમેવાગ્નિઁ સ્તવાનિ સ મા સ્તુતઃ
સુવર્ગં લોકં ગમયિષ્યતીતિ સોઽગ્નિમસ્તૌત્ સ એનગ્ગ્ સ્તુતઃ સુવર્ગં
લોકમગમયદ્ય

૪૦ એવં વિદ્વાનગ્નિમુપતિષ્ઠતે સુવર્ગમેવ લોકમેતિ સર્વમાયુરેત્યભિ
વા એષોઽગ્ની આ રોહતિ ય એનાવુપતિષ્ઠતે યથા ખલુ વૈ

શ્રેયાનભ્યારૂઢઃ કામયતે તથા કરોતિ નક્તમુપ તિષ્ઠતે ન પ્રાતઃ
સ ँ હિ નક્તં વ્રતાનિ સૃજ્યન્તે સહ શ્રેયાગ્શ્ચ પાપીયાગ્શ્ચાસાતે
જ્યોતિર્વા અગ્નિસ્તમો રાત્રિર્ય
૪૧ ન્નક્તમુપતિષ્ઠતે જ્યોતિષૈવ તમસ્તરત્યુપસ્થેયોઽગ્ની૩ ર્ નોપસ્થેયા
૩ ઇત્યાહુર્મનુષ્યાયેન્વૈ યોઽહરહરાહૃત્યાથૈનં યાચતિ સ ઇન્વૈ
તમુપાર્છત્યથ કો દેવાનહરહર્યાચિષ્યતીતિ તસ્માન્નોપસ્થેયોઽથો
ખલ્વાહુરાશિષે વૈ કં યજમાનો યજત ઇત્યેષા ખલુ વા
૪૨ આહિતાગ્નેરાશીર્યદગ્નિમુપ તિષ્ઠતે તસ્માદુપસ્થેયઃ
પ્રજાપતિઃ પશૂનસૃજત તે સૃષ્ટા અહોરાત્રે પ્રાવિશન્
તાગ્છન્દોભિરન્વવિન્દદ્યચ્છન્દોભિરુપતિષ્ઠતે સ્વમેવ તદન્વિચ્છતિ
ન તત્ર જામ્યસ્તીત્યાહુરૅ્યોઽહરહરુપતિષ્ઠત ઇતિ યો વા અગ્નિં
પ્રત્યઙ્ઙુપતિષ્ઠતે પ્રત્યેનમોષતિ યઃ પરાઙ્ વિષ્વઙ્ પ્રજયા
પશુભિરેતિ કવાતિર્યઙ્ઙિવોપ તિષ્ઠેત નૈનં પ્રત્યોષતિ ન
વિષ્વઙ્ પ્રજયા પશુભિરેતિ ॥ સિક્તસ્ય સહ ભવતિ યો યત્ખલુ
વૈ પશુભિસ્ત્રયોદશ ચ ॥ ૧। ૫। ૯॥
૪૩ મમ નામ પ્રથમં જાતવેદઃ પિતા માતા ચ દધતુર્યદગ્રે । તત્ત્વં
બિભૃહિ પુનરા મદૈતોસ્તવાહં નામ બિભરાણ્યગ્ને ॥ મમ નામ તવ
ચ જાતવેદો વાસસી ઇવ વિવસાનૌ યે ચરાવઃ । આયુષે ત્વં જીવસે
વયં યથાયથં વિ પરિ દધાવહૈ પુનસ્તે ॥ નમોઽગ્નયેઽપ્રતિવિદ્ધાય
નમોઽનાધૃષ્ટાય નમઃ સમ્રાજે । અષાઢો
૪૪ અગ્નિર્બૃહદ્વયા વિશ્વજિત્સહન્ત્યઃ શ્રેષ્ઠો ગન્ધર્વઃ ॥ ત્વત્પિતારો
અગ્ને દેવાસ્ત્વામાહુતયસ્ત્વદ્વિવાચનાઃ । સં મામાયુષા સં ગૌપત્યેન સુહિતે
મા ધાઃ ॥ અયમગ્નિઃ શ્રેષ્ઠતમોઽયં ભગવત્તમોઽય ँ સહસ્રસાતમઃ
। અસ્મા અસ્તુ સુવીર્યમ્ ॥ મનો જ્યોતિર્જુષતામાજ્યં વિચ્છિન્નં યજ્ઞ ँ
સમિમં દધાતુ । યા ઇષ્ટા ઉષસો નિમ્રુચશ્ચ તાઃ સં દધામિ હવિષા
ઘૃતેન ॥ પયસ્વતીરોષધયઃ
૪૫ પયસ્વદ્વીરુધાં પયઃ । અપાં પયસો યત્પયસ્તેન મામિન્દ્ર સ ँ

સૃજ ॥ અગ્ને વ્રતપતે વ્રતં ચરિષ્યામિ તચ્છકેયં તન્મે રાધ્યતામ્
॥ અગ્નિઁ હોતારમિહ તઁ હુવે દેવાન્, યજ્ઞિયાનિહ યાન્ હવામહે ॥
આ યન્તુ દેવાઃ સુમનસ્યમાના વિયન્તુ દેવા હવિષો મે અસ્ય ॥ કસ્ત્વા
યુનક્તિ સ ત્વા યુનક્તુ યાનિ ઘર્મે કપાલાન્યુપચિન્વન્તિ
૪૬ વેધસઃ । પૂષ્ણસ્તાન્યપિ વ્રત ઇન્દ્રવાયૂ વિમુઞ્ચતામ્ ॥ અભિન્નો ઘર્મો
જીરદાનુર્યત આત્તસ્તદગન્ પુનઃ । ઇધ્મો વેદિઃ પરિધયશ્ચ
સર્વે યજ્ઞસ્યાઽઽયુરનુ સં ચરન્તિ ॥ ત્રયસ્ત્રિઁ શત્તન્તવો
યે વિતત્નિરે ય ઇમં યજ્ઞઁ સ્વધયા દદન્તે તેષાં છિન્નં
પ્રત્યેતદ્દધામિ સ્વાહા ઘર્મો દેવાઁ અપ્યેતુ ॥ અષાઢ ઓષધય
ઉપચિન્વન્તિ પઞ્ચચત્વારિઁ શચ્ચ ॥ ૧। ૫। ૧૦॥
૪૭ વૈશ્વાનરો ન ઊત્યાઽઽપ્ર યાતુ પરાવતઃ । અગ્નિરુક્થેન વાહસા ॥
ઋતાવાનં વૈશ્વાનરમૃતસ્ય જ્યોતિષસ્પતિમ્ । અજસ્રં ઘર્મમીમહે ॥
વૈશ્વાનરસ્ય દઁ સનાભ્યો બૃહદરિણાદેકઃ સ્વપસ્યયા કવિઃ
। ઉભા પિતરા મહયન્નજાયતાગ્નિર્દ્યાવાપૃથિવી ભૂરિરેતસા ॥ પૃષ્ટો
દિવિ પૃષ્ટો અગ્નિઃ પૃથિવ્યાં પૃષ્ટો વિશ્વા ઓષધીરા વિવેશ ।
વૈશ્વાનરઃ સહસા પૃષ્ટો અગ્નિઃ સ નો દિવા સ
૪૮ રિષઃ પાતુ નક્તમ્ ॥ જાતો યદગ્ને ભુવના વ્યખ્યઃ પશું ન ગોપા
ઇર્યઃ પરિજ્મા । વૈશ્વાનર બ્રહ્મણે વિન્દ ગાતું યૂયં પાત સ્વસ્તિભિઃ
સદા નઃ ॥ ત્વમગ્ને શોચિષા શોશુચાન આ રોદસી અપૃણા જાયમાનઃ ।
ત્વં દેવાઁ અભિશસ્તેરમુઞ્ચો વૈશ્વાનર જાતવેદો મહિત્વા ॥ અસ્માકમગ્ને
મઘવત્સુ ધારયાનામિ ક્ષત્રમજરઁ સુવીર્યમ્ । વયં જયેમ
શતિનઁ સહસ્રિણં વૈશ્વાનર
૪૯ વાજમગ્ને તવોતિભિઃ ॥ વૈશ્વાનરસ્ય સુમતૌ સ્યામ રાજા હિ કં
ભુવનાનામભિશ્રીઃ । ઇતો જાતો વિશ્વમિદં વિ ચષ્ટે વૈશ્વાનરો યતતે
સૂર્યેણ ॥ અવ તે હેડો વરુણ નમોભિરવ યજ્ઞેભિરીમહે હવિર્ભિઃ
। ક્ષયન્નસ્મભ્યમસુર પ્રચેતો રાજન્નેનાઁસિ શિશ્રથઃ કૃતાનિ ॥

ઉદુત્તમં વરુણ પાશમસ્મદવાધમં વિ મધ્યમꣳ શ્રથાય ।
અથા વયમાદિત્ય
૫૦ વ્રતે તવાનાગસો અદિતયે સ્યામ ॥ દધિક્રાવ્ણો અકારિષં જિષ્ણોરશ્વસ્ય
વાજિનઃ ॥ સુરભિ નો મુખા કરત્ પ્ર ણ આયૂꣳષિ તારિષત્ ॥ આ
દધિક્રાઃ શવસા પઞ્ચ કૃષ્ટીઃ સૂર્ય ઇવ જ્યોતિષાઽપસ્તતાન ।
સહસ્રસાઃ શતસા વાજ્યર્વા પૃણક્તુ મધ્વા સમિમા વચાꣳસિ ॥
અગ્નિર્મૂર્ધા ભુવઃ । મરુતો યદ્ધ વો દિવઃ સુમ્નાયન્તો હવામહે । આ તૂ ન
૫૧ ઉપ ગન્તન ॥ યા વઃ શર્મ શશમાનાય સન્તિ ત્રિધાતૂનિ દાશુષે
યચ્છતાધિ । અસ્મભ્યં તાનિ મરુતો વિ યન્ત રયિં નો ધત્ત વૃષણઃ
સુવીરમ્ ॥ અદિતિર્ન ઉરુષ્યત્વદિતિઃ શર્મ યચ્છતુ । અદિતિઃ પાત્વꣳહસઃ
॥ મહીમૂષુ માતરꣳ સુવ્રતાનામૃતસ્ય પત્નીમવસે હુવેમ ।
તુવિક્ષત્રામજરન્તીમુરૂચીꣳ સુશર્માણમદિતિꣳ સુપ્રણીતિમ્
॥ સુત્રામાણં પૃથિવીં દ્યામનેહસꣳ સુશર્માણમદિતિꣳ
સુપ્રણીતિમ્ । દૈવીં નાવꣳ સ્વરિત્રામનાગસમસ્રવન્તીમા રુહેમા સ્વસ્તયે
॥ ઇમાꣳ સુ નાવમાઽરુહꣳ શતારિત્રાꣳ શતસ્ફ્યામ્ । અચ્છિદ્રાં
પારયિષ્ણુમ્ ॥ દિવા સ સહસ્રિણં વૈશ્વાનરાઽઽદિત્ય તૂ નોઽનેહસꣳ
સુશર્માણમેકાન્નવિꣳશતિશ્ચ ॥ ૧। ૫। ૧૧॥ દેવાસુરાઃ પરા
ભૂમિર્ભૂમિરુપપ્રયન્તઃ સં પશ્યામ્યયજ્ઞઃ સં પશ્યામ્યગ્નિ હોત્રં મમ
નામ વૈશ્વાનર એકાદશ ॥ દેવાસુરાઃ ક્રુદ્ધઃ સં પશ્યામિ સં પશ્યામિ
નક્તમુપ ગન્તનૈક પંચાશત્ ॥ દેવાસુરાઃ પારયિષ્ણુમ્ ॥

## પ્રથમકાણ્ડે ષષ્ઠઃ પ્રશ્નઃ ૬

૧ સં ત્વા સિઞ્ચામિ યજુષા પ્રજામાયુર્ધનં ચ । બૃહસ્પતિપ્રસૂતો
યજમાન ઇહ મા રિષત્ ॥ આજ્યમસિ સત્યમસિ સત્યસ્યાધ્યક્ષમસિ હવિરસિ
વૈશ્વાનરં વૈશ્વદેવમુત્પૂતશુષ્મꣳ સત્યૌજાઃ સહોઽસિ સહમાનમસિ
સહસ્વારાતીઃ સહસ્વારાતીયતઃ સહસ્વ પૃતનાઃ સહસ્વ પૃતન્યતઃ ।

સહસ્રવીર્યમસિ તન્મા જિન્વાઽઽજ્યસ્યાઽઽજ્યમસિ સત્યસ્ય સત્યમસિ
સત્યાયુ
૨ રસિ સત્યશુષ્મમસિ સત્યેન ત્વાઽભિ ઘારયામિ તસ્ય તે ભક્ષીય પઞ્ચાનાં
ત્વા વાતાનાં યન્ત્રાય ધર્ત્રાય ગૃહ્ણામિ પઞ્ચાનાં ત્વર્તૂનાં યન્ત્રાય
ધર્ત્રાય ગૃહ્ણામિ પઞ્ચાનાં ત્વા દિશાં યન્ત્રાય ધર્ત્રાય ગૃહ્ણામિ
પઞ્ચાનાં ત્વા પઞ્ચજનાનાં યન્ત્રાય ધર્ત્રાય ગૃહ્ણામિ ચરોસ્ત્વા
પઞ્ચબિલસ્ય યન્ત્રાય ધર્ત્રાય ગૃહ્ણામિ બ્રહ્મણસ્ત્વા તેજસે યન્ત્રાય
ધર્ત્રાય ગૃહ્ણામિ ક્ષત્રસ્ય ત્વૌજસે યન્ત્રાય
૩ ધર્ત્રાય ગૃહ્ણામિ વિશે ત્વા યન્ત્રાય ધર્ત્રાય ગૃહ્ણામિ સુવીર્યાય ત્વા
ગૃહ્ણામિ સુપ્રજાસ્ત્વાય ત્વા ગૃહ્ણામિ રાયસ્પોષાય ત્વા ગૃહ્ણામિ બ્રહ્મવર્ચસાય
ત્વા ગૃહ્ણામિ ભૂરસ્માક ँ હવિર્દેવાનામાશિષો યજમાનસ્ય દેવાનાં
ત્વા દેવતાભ્યો ગૃહ્ણામિ કામાય ત્વા ગૃહ્ણામિ ॥ સત્યાયુરોજસે યન્ત્રાય
ત્રયસ્ત્રિँ શચ્ચ ॥ ૧। ૬। ૧॥
૪ ધ્રુવોઽસિ ધ્રુવોઽહ ँ સજાતેષુ ભૂયાસં ધીરશ્ચેત્તા
વસુવિદુગ્રોઽસ્યુગ્રોઽહ ँ સજાતેષુ ભૂયાસમુગ્રશ્ચેત્તા
વસુવિદભિભૂરસ્યભિભૂરહ ँ સજાતેષુ ભૂયાસમભિભૂશ્ચેત્તા
વસુવિદ્યુનજ્મિ ત્વા બ્રહ્મણા દૈવ્યેન હવ્યાયાસ્મૈ વોઢવે જાતવેદઃ ।
ઇન્ધાનાસ્ત્વા સુપ્રજસઃ સુવીરા જ્યોગ્જીવેમ બલિહૃતો વયં તે ॥ યન્મે
અગ્ને અસ્ય યજ્ઞસ્ય રિષ્યા
૫ દ્યદ્ધા સ્કન્દાદાજ્યસ્યોત વિષ્ણો । તેન હન્મિ સપત્નં દુર્મરાયુમૈનં
દધામિ નિરૃત્યા ઉપસ્થે । ભૂર્ભુવઃ સુવરુચ્છુષ્મો અગ્ને યજમાનાયૈધિ
નિશુષ્મો અભિદાસતે । અગ્ને દેવેદ્ધ મન્વિદ્ધ મન્દ્રજિહ્વામર્ત્યસ્ય
તે હોતર્મૂર્ધન્ના જિઘર્મિ રાયસ્પોષાય સુપ્રજાસ્ત્વાય સુવીર્યાય મનોઽસિ
પ્રાજાપત્યં મનસા મા ભૂતેનાઽઽવિશ વાગસ્યૈન્દ્રી સપત્નક્ષયણી
૬ વાચા મેન્દ્રિયેણાઽઽવિશ વસન્તમૃતૂનાં પ્રીણામિ સ મા પ્રીતઃ પ્રીણાતુ
ગ્રીષ્મમૃતૂનાં પ્રીણામિ સ મા પ્રીતઃ પ્રીણાતુ વર્ષા ઋતૂનાં પ્રીણામિ
તા મા પ્રીતાઃ પ્રીણન્તુ શરદમૃતૂનાં પ્રીણામિ સા મા પ્રીતા પ્રીણાતુ

હેમન્તશિશિરાવૃતૂનાં પ્રીણામિ તૌ મા પ્રીતૌ પ્રીણીતામગ્નીષોમયોરહં
દેવયજ્યયા ચક્ષુષ્માન્ ભૂયાસમગ્નેરહં દેવયજ્યયાન્નાદો ભૂયાસં
૭ દબ્ધિરસ્યદબ્ધો ભૂયાસમમું દભેયમગ્નીષોમયોરહં દેવયજ્યયા
વૃત્રહા ભૂયાસમિન્દ્રાગ્નિયોરહં દેવયજ્યયેન્દ્રિયાવ્યન્નાદો
ભૂયાસમિન્દ્રસ્યાહં દેવયજ્યયેન્દ્રિયાવી ભૂયાસં મહેન્દ્રસ્યાહં
દેવયજ્યયા જેમાનં મહિમાનં ગમેયમગ્નેઃ સ્વિષ્ટકૃતોઽહં
દેવયજ્યયાઽઽયુષ્માન્, યજ્ઞેન પ્રતિષ્ઠાં ગમેયમ્ ॥ રિષ્યાત્
સપત્નક્ષયણ્યન્નાદો ભૂયાસ ઁ ષટ્ત્રિઁશચ્ચ ॥ ૧। ૬। ૨॥
૮ અગ્નિર્મા દુરિષ્ટાત્ પાતુ સવિતાઽઘશઁસાદ્યો મેઽન્તિ દૂરેઽરાતીયતિ
તમેતેન જેષ ઁ સુરૂપવર્ષવર્ણ એહીમાન્ ભદ્રાન્ દુર્યાઁઅભ્યેહિ
મામનુવ્રતા ન્યુ શીર્ષાણિ મૃઢ્વમિડ એહ્યદિત એહિ સરસ્વત્યેહિ
રન્તિરસિ રમતિરસિ સૂનર્યસિ જુષ્ટે જુષ્ટિં તેઽશીયોપહૂત ઉપહવં
૯ તેઽશીય સા મે સત્યાશીરસ્ય યજ્ઞસ્ય ભૂયાદરેઽતા
મનસા તચ્છકેયં યજ્ઞો દિવઁરોહતુ યજ્ઞો દિવં ગચ્છતુ યો
દેવયાનઃ પન્થાસ્તેન યજ્ઞો દેવાઁ અપ્યેત્વસ્માસ્વિન્દ્ર ઇન્દ્રિયં
દધાત્વસ્માન્રાય ઉત યજ્ઞાઃ સચન્તામસ્માસુ સન્ત્વાશિષઃ સા નઃ
પ્રિયા સુપ્રતૂર્તિર્મઘોની જુષ્ટિરસિ જુષસ્વ નો જુષ્ટા નો
૧૦ ઽસિ જુષ્ટિં તે ગમેયં મનો જ્યોતિર્જુષતામાજ્યં વિચ્છિન્નં
યજ્ઞઁ સમિમં દધાતુ । બૃહસ્પતિસ્તનુતામિમં નો વિશ્વે દેવા ઇહ
માદયન્તામ્ ॥ બ્રધ્ન પિન્વસ્વ દદતો મે મા ક્ષાયિ કુર્વતો મે મોપદસત્
પ્રજાપતેર્ભાગોઽસ્યૂર્જસ્વાન્ પયસ્વાન્ પ્રાણાપાનૌ મે પાહિ સમાનવ્યાનૌ
મે પાહ્યુદાનવ્યાનૌ મે પાહ્યક્ષિતોઽસ્યક્ષિત્યૈ ત્વા મા મે ક્ષેષ્ઠા
અમુત્રામુષ્મિન્ લોકે ॥ ઉપહવં જુષ્ટા નસ્ત્વા ષટ્ ચ ॥ ૧। ૬। ૩॥
૧૧ બર્હિષોઽહં દેવયજ્યયા પ્રજાવાન્ ભૂયાસં
નરાશઁસસ્યાહં દેવયજ્યયા પશુમાન્ ભૂયાસમગ્નેઃ
સ્વિષ્ટકૃતોઽહં દેવયજ્યયાઽઽયુષ્માન્, યજ્ઞેન
પ્રતિષ્ઠાં ગમેયમગ્નેરહમુજ્જિતિમનૂજ્જેષ ઁ

સોમસ્યાહમુજ્જિતિમનૂજ્જેષમગ્નેરહમુજ્જિતિમનૂજ્જેષમગ્નીષોમયોરહમુજ્જિતિમનૂજ્જેષમિન્દ્રાગ્નિયોરહમુજ્જિતિમનૂજ્જેષમિન્-
૧૨ મુજ્જિતિમનૂજ્જેષં મહેન્દ્રસ્યાહમુજ્જિતિમનૂજ્જેષમગ્નેઃ
સ્વિષ્ટકૃતોઽહમુજ્જિતિમનૂજ્જેષં વાજસ્ય મા પ્રસવેનોદ્ગ્રાભેણોદગ્રભીત્
। અથા સપત્નાꣳ ઇન્દ્રો મે નિગ્રાભેણાધરાꣳ અકઃ ॥ ઉદ્ગ્રાભં
ચ નિગ્રાભં ચ બ્રહ્મ દેવા અવીવૃધન્ । અથા સપત્નાનિન્દ્રાગ્ની મે
વિષૂચીનાન્વ્યસ્યતામ્ ॥ એમા અગ્મન્નાશિષો દોહકામા ઇન્દ્રવન્તો
૧૩ વનામહે ધુક્ષીમહિ પ્રજામિષમ્ ॥ રોહિતેન ત્વાઽગ્નિર્દેવતાં ગમયતુ
હરિભ્યાં ત્વેન્દ્રો દેવતાં ગમયત્વેતશેન ત્વા સૂર્યો દેવતાં
ગમયતુ વિ તે મુઞ્ચામિ રશના વિ રશ્મીન્, વિ યોક્ત્રા યાનિ પરિચર્તનાનિ
ધત્તાદસ્માસુ દ્રવિણં યચ્ચ ભદ્રં પ્ર ણો બ્રૂતાદ્ભાગધાન્ દેવતાસુ
॥ વિષ્ણોઃ શંયોરહં દેવયજ્યયા યજ્ઞેન પ્રતિષ્ઠાં ગમેયꣳ
સોમસ્યાહં દેવયજ્યયા
૧૪ સુરેતા રેતો ધિષીય ત્વષ્ટુરહં દેવયજ્યયા પશૂનાꣳ રૂપં
પુષેયં દેવાનાં પત્નીરગ્નિર્ગૃહપતિર્યજ્ઞસ્ય મિથુનં તયોરહં
દેવયજ્યયા મિથુનેન પ્રભૂયાસં વેદોઽસિ વિત્તિરસિ વિદેય કર્માસિ
કરુણમસિ ક્રિયાસꣳસનિરસિ સનિતાસિ સનેયં ઘૃતવન્તં
કુલાયિનꣳરાયસ્પોષꣳસહસ્રિણં વેદો દદાતુ વાજિનમ્ ॥
ઇન્દ્રસ્યાહમિન્દ્રવન્તઃ સોમસ્યાહં દેવયજ્યયા ચતુશ્ચત્વારિꣳશચ્ચ
॥ ૧। ૬। ૪॥
૧૫ આ પ્યાયતાં ધ્રુવા ઘૃતેન યજ્ઞં યજ્ઞં પ્રતિ દેવયદ્ભ્યઃ
। સૂર્યાયા ઊધોઽદિત્યા ઉપસ્થ ઉરુધારા પૃથિવી યજ્ઞે અસ્મિન્ ॥
પ્રજાપતેર્વિભાન્નામ લોકસ્તસ્મિગ્ગ્સ્ત્વા દધામિ સહ યજમાનેન સદસિ સન્મે
ભૂયાઃ સર્વમસિ સર્વં મે ભૂયાઃ પૂર્ણમસિ પૂર્ણં મે ભૂયા અક્ષિતમસિ
મા મે ક્ષેષ્ઠાઃ પ્રાચ્યાં દિશિ દેવા ઋત્વિજો માર્જયન્તાં દક્ષિણાયાં
૧૬ દિશિ માસાઃ પિતરો માર્જયન્તાં પ્રતીચ્યાં દિશિ ગૃહાઃ પશવો
માર્જયન્તામુદીચ્યાં દિશ્યાપ ઓષધયો વનસ્પતયો માર્જયન્તામૂર્ધ્વાયાં
દિશિ યજ્ઞઃ સંવત્સરો યજ્ઞપતિર્માર્જયન્તાં વિષ્ણોઃ ક્રમોઽસ્યભિમાતિહા

ગાયત્રેણ છન્દસા પૃથિવીમનુ વિ ક્રમે નિર્ભક્તઃ સ યં દ્વિષ્મો
વિષ્ણોઃ ક્રમોઽસ્યભિશસ્તિહા ત્રૈષ્ટુભેન છન્દસાઽન્તરિક્ષમનુ વિ
ક્રમે નિર્ભક્તઃ સ યં દ્વિષ્મો વિષ્ણોઃ ક્રમોઽસ્યરાતીયતો હન્તા જાગતેન
છન્દસા દિવમનુ વિ ક્રમે નિર્ભક્તઃ સ યં દ્વિષ્મો વિષ્ણોઃ ક્રમોઽસિ
શત્રૂયતો હન્તાઽઽનુષ્ટુભેન છન્દસા દિશોઽનુ વિ ક્રમે નિર્ભક્તઃ
સ યં દ્વિષ્મઃ ॥ દક્ષિણાયામન્તરિક્ષમનુ વિ ક્રમે નિર્ભક્તઃ સ યં
દ્વિષ્મો વિષ્ણોરેકાન્ન ત્રિꣳશચ્ચ ॥ ૧। ૬। ૫॥

૧૭ અગન્મ સુવઃ સુવરગન્મ સંદૃશસ્તે મા છિથ્સિ યત્તે તપસ્તસ્મૈ
તે માઽઽવૃક્ષિ સુભૂરસિ શ્રેષ્ઠો રશ્મીનામાયુર્ધા અસ્યાયુર્મે ધેહિ
વર્ચોધા અસિ વર્ચો મયિ ધેહીદમહમમું ભ્રાતૃવ્યમાભ્યો દિગ્ભ્યોઽસ્યૈ
દિવોઽસ્માદન્તરિક્ષાદસ્યૈ પૃથિવ્યા અસ્માદન્નાદ્યાન્નિર્ભજામિ
નિર્ભક્તઃ સ યં દ્વિષ્મઃ ।

૧૮ સં જ્યોતિષાઽભૂવમૈન્દ્રીમાવૃતમન્વાવર્તે સમહં પ્રજયા સં મયા
પ્રજા સમહꣳ રાયસ્પોષેણ સં મયા રાયસ્પોષઃ સમિદ્ધો અગ્ને મે દીદિહિ
સમેદ્ધા તે અગ્ને દીદ્યાસં વસુમાન્, યજ્ઞો વસીયાન્ ભૂયાસમગ્ન આયૂꣳષિ
પવસ આ સુવોર્જમિષં ચનઃ । આરે બાધસ્વ દુચ્છુનામ્ ॥ અગ્ને પવસ્વ
સ્વપા અસ્મે વર્ચઃ સુવીર્યમ્ ।

૧૯ દધત્ પોષꣳરયિં મયિ । અગ્ને ગૃહપતે સુગૃહપતિરહં
ત્વયા ગૃહપતિના ભૂયાસꣳ સુગૃહપતિર્મયા ત્વં ગૃહપતિના
ભૂયાઃ શતꣳ હિમાસ્તામાશિષમા શાસે તન્તવે જ્યોતિષ્મતીં
તામાશિષમાશાસેઽમુષ્મૈ જ્યોતિષ્મતીં કસ્ત્વા યુનક્તિ સ ત્વા
વિમુઞ્ચત્વગ્ને વ્રતપતે વ્રતમચારિષં તદશકં તન્મેઽરાધિ યજ્ઞો
બભૂવ સ આ

૨૦ બભૂવ સ પ્ર જજ્ઞે સ વાવૃધે । સ દેવાનામધિપતિર્બભૂવ
સો અસ્માꣳ અધિપતીન્ કરોતુ વયગ્ગ્ સ્યામ પતયો રયીણામ્ ॥ ગોમાꣳ
અગ્નેઽવિમાꣳ અશ્વી યજ્ઞો નૃવથ્સખા સદમિદપ્રમૃષ્યઃ । ઇડાવાꣳ
એષો અસુર પ્રજાવાન્ દીર્ઘો રયિઃ પૃથુ બુધ્નઃ સભાવાન્ ॥ દ્વિષ્મઃ

સુવીર્યં સ આ પઞ્ચત્રિંશચ્ચ ॥ ૧। ૬। ૬॥

૨૧ યથા વૈ સમૃતસોમા એવં વા એતે સમૃતયજ્ઞા યદ્દર્શપૂર્ણમાસૌ
કસ્ય વાહ દેવા યજ્ઞમા ગચ્છન્તિ કસ્ય વા ન બહૂનાં યજમાનાનાં
યો વૈ દેવતાઃ પૂર્વઃ પરિગૃહ્ણાતિ સ એનાઃ શ્વો ભૂતે યજત એતદ્વૈ
દેવાનામાયતનં યદાહવનીયોઽન્તરાગ્ની પશૂનાં ગાર્હપત્યો
મનુષ્યાણામન્વાહાર્યપચનઃ પિતૃણામગ્નિં ગૃહ્ણાતિ સ્વ એવાયતને
દેવતાઃ પરિ

૨૨ ગૃહ્ણાતિ તાઃ શ્વો ભૂતે યજતે વ્રતેન વૈ મેધ્યોઽગ્નિર્વ્રતપતિર્બ્રાહ્મણો
વ્રતભૃદ્ વ્રતમુપૈષ્યન્ બ્રૂયાદગ્ને વ્રતપતે વ્રતં
ચરિષ્યામીત્યગ્નિર્વૈ દેવાનાં વ્રતપતિસ્તસ્મા એવ
પ્રતિપ્રોચ્ય વ્રતમાલભતે બર્હિષા પૂર્ણમાસે વ્રતમુપૈતિ
વત્સૈરમાવાસ્યાયામેતદ્ધ્યેતયોરાયતનમુપસ્તીર્યઃ
પૂર્વશ્ચાગ્નિરપરશ્ચેત્યાહુર્મનુષ્યા

૨૩ ઇન્વા ઉપસ્તીર્ણમિચ્છન્તિ કિમુ દેવા યેષાં નવાવસાનમુપાસ્મિઞ્છ્વો
યક્ષ્યમાણે દેવતા વસન્તિ ય એવં વિદ્વાનગ્નિમુપસ્તૃણાતિ યજમાનેન
ગ્રામ્યાશ્ચ પશવોઽવરુધ્યા આરણ્યાશ્ચેત્યાહુર્યદ્ગ્રામ્યાનુપવસતિ
તેન ગ્રામ્યાનવ રુન્ધે યદારણ્યસ્યાશ્ઞાતિ તેનારણ્યાન્,
યદનાશ્વાનુપવસેત્ પિતૃદેવત્યઃ સ્યાદારણ્યસ્યાશ્ઞાતીન્દ્રિયં

૨૪ વા આરણ્યમિન્દ્રિયમેવાઽઽત્મન્ ધત્તે યદનાશ્વાનુપવસેત્ ક્ષોધુકઃ
સ્યાદ્યદશ્ઞીયાદ્રુદ્રોઽસ્ય પશૂનભિમન્યેતાપોઽશ્ઞાતિ તન્નેવાશિતં
નેવાનશિતં ન ક્ષોધુકો ભવતિ નાસ્ય રુદ્રઃ પશૂનભિ મન્યતે વજ્રો
વૈ યજ્ઞઃ, ક્ષુત્ખલુ વૈ મનુષ્યસ્ય ભ્રાતૃવ્યો યદનાશ્વાનુપવસતિ
વજ્રેણૈવ સાક્ષાત્ક્ષુધં ભ્રાતૃવ્યં હન્તિ ॥ પરિ મનુષ્યા ઇન્દ્રિયં
સાક્ષાત્ ત્રીણિ ચ ॥ ૧। ૬। ૭॥

૨૫ યો વૈ શ્રદ્ધામનારભ્ય યજ્ઞેન યજતે નાસ્યેષ્ટાય શ્રદ્દધતેઽપઃ પ્ર
ણયતિ શ્રદ્ધા વા આપઃ શ્રદ્ધામેવાઽઽરભ્ય યજ્ઞેન યજત ઉભયેઽસ્ય
દેવમનુષ્યા ઇષ્ટાય શ્રદ્દધતે તદાહુરતિ વા એતા વર્ત્રન્નેદન્ત્યતિ

વાચં મનો વાવૈતા નાતિ નેદન્તીતિ મનસા પ્ર ણયતીયં વૈ મનો
૨૬ ડનયૈવૈનાઃ પ્ર ણયત્યસ્કન્નહવિર્ભવતિ ય એવં વેદ યજ્ઞાયુધાનિ
સંભરતિ યજ્ઞો વૈ યજ્ઞાયુધાનિ યજ્ઞમેવ તથ્સંભરતિ યદેકમેકꣳ
સંભરેત્ પિતૃદેવત્યાનિ સ્યુર્યત્ સહ સર્વાણિ માનુષાણિ દ્વે દ્વે સંભરતિ
યાજ્યાનુવાક્યયોરેવ રૂપં કરોત્યથો મિથુનમેવ યો વૈ દશ યજ્ઞાયુધાનિ
વેદ મુખતોઽસ્ય યજ્ઞઃ કલ્પતે સ્ફ્ય
૨૭ શ્ચ કપાલાનિ ચાગ્નિહોત્રહવણી ચ શૂર્પં ચ કૃષ્ણાજિનં ચ
શમ્યા ચોલૂખલં ચ મુસલં ચ દૃષચ્ચોપલા ચૈતાનિ વૈ
દશ યજ્ઞાયુધાનિ ય એવં વેદ મુખતોઽસ્ય યજ્ઞઃ કલ્પતે યો વૈ
દેવેભ્યઃ પ્રતિપ્રોચ્ય યજ્ઞેન યજતે જુષન્તેઽસ્ય દેવા હવ્યꣳ
હવિર્નિરુપ્યમાણમભિ મન્ત્રયેતાગ્નિꣳ હોતારમિહ તꣳ હુવ ઇતિ
૨૮ દેવેભ્ય એવ પ્રતિપ્રોચ્ય યજ્ઞેન યજતે જુષન્તેઽસ્ય દેવા
હવ્યમેષ વૈ યજ્ઞસ્ય ગ્રહો ગૃહીત્વૈવ યજ્ઞેન યજતે
તદુદિત્વા વાચં યચ્છતિ યજ્ઞસ્ય ધૃત્યા અથો મનસા
વૈ પ્રજાપતિર્યજ્ઞમતનુત મનસૈવ તદ્યજ્ઞં તનુતે
રક્ષસામનન્વવચારાય યો વૈ યજ્ઞં યોગ આગતે યુનક્તિ યુઙ્ક્તે
યુઞ્જાનેષુ કસ્ત્વા યુનક્તિ સ ત્વા યુનક્ત્વિત્યાહ પ્રજાપતિર્વૈ કઃ
પ્રજાપતિનૈવૈનં યુનક્તિ યુઙ્ક્તે યુઞ્જાનેષુ ॥ વૈ મનઃ સ્ફ્ય ઇતિ
યુનક્ત્વેકાદશ ચ ॥ ૧। ૬। ૮॥
૨૯ પ્રજાપતિર્યજ્ઞાનસૃજતાગ્નિહોત્રં ચાગ્નિષ્ટોમં ચ
પૌર્ણમાસીં ચોક્થ્યં ચામાવાસ્યાં ચાતિરાત્રં ચ તાનુદમિમીત
યાવદગ્નિહોત્રમાસીત્ તાવાનગ્નિષ્ટોમો યાવતી પૌર્ણમાસી તાવાનુક્થ્યો
યાવત્યમાવાસ્યા તાવાનતિરાત્રો ય એવં વિદ્વાનગ્નિહોત્રં જુહોતિ
યાવદગ્નિષ્ટોમેનોપાપ્નોતિ તાવદુપાઽઽપ્નોતિ ય એવં વિદ્વાન્ પૌર્ણમાસીં
યજતે યાવદુક્થ્યેનોપાપ્નોતિ
૩૦ તાવદુપાઽઽપ્નોતિ ય એવં વિદ્વાનમાવાસ્યાં યજતે
યાવદતિરાત્રેણોપાપ્નોતિ તાવદુપાઽઽપ્નોતિ પરમેષ્ઠિનો વા એષ યજ્ઞોઽગ્ર

આસીત્ તેન સ પરમાં કાષ્ઠામગચ્છત્ તેન પ્રજાપતિં નિરવાસાયયત્
તેન પ્રજાપતિઃ પરમાં કાષ્ઠામગચ્છત્ તેનેન્દ્રં નિરવાસાયયત્ તેનેન્દ્રઃ
પરમાં કાષ્ઠામગચ્છત્ તેનાગ્નીષોમૌ નિરવાસાયયત્ તેનાગ્નીષોમૌ
પરમાં કાષ્ઠામગચ્છતાં ય

૩૧ એવં વિદ્વાન્ દર્શપૂર્ણમાસૌ યજતે પરમામેવ કાષ્ઠાં ગચ્છતિ યો
વૈ પ્રજાતેન યજ્ઞેન યજતે પ્ર પ્રજયા પશુભિર્મિથુનૈર્જાયતે
દ્વાદશ માસાઃ સંવથ્સરો દ્વાદશ દ્વન્દ્વાનિ દર્શપૂર્ણમાસયોસ્તાનિ
સંપાદ્યાનીત્યાહુર્વથ્સં ચોપાવસૃજત્યુખાં ચાધિ શ્રયત્યવ ચ
હન્તિ દૃષદૌ ચ સમાહન્ત્યધિ ચ વપતે કપાલાનિ ચોપ દધાતિ
પુરોડાશં ચા

૩૨ ઽધિશ્રયત્યાજ્યં ચ સ્તમ્બયજુશ્ચ હરત્યભિ ચ ગૃહ્ણાતિ વેદિં
ચ પરિગૃહ્ણાતિ પત્નીં ચ સં નહ્યતિ પ્રોક્ષણીશ્ચાઽઽસાદયત્યાજ્યં
ચૈતાનિ વૈ દ્વાદશ દ્વન્દ્વાનિ દર્શપૂર્ણમાસયોસ્તાનિ ય એવꣳ સંપાદ્ય
યજતે પ્રજાતેનૈવ યજ્ઞેન યજતે પ્ર પ્રજયા પશુભિર્મિથુનૈર્જાયતે
॥ ઉક્થ્યેનોપાપ્રોત્યગચ્છતાં યઃ પુરોડાશં ચ ચત્વારિ ꣳ શચ્ચ
॥ ૧। ૬। ૯॥

૩૩ ધ્રુવોઽસિ ધ્રુવોઽહꣳ સજાતેષુ ભૂયાસમિત્યાહ ધ્રુવાનેવૈનાન્
કુરુત ઉગ્રોઽસ્યુગ્રોઽહꣳ સજાતેષુ ભૂયાસમિત્યાહાપ્રતિવાદિન
એવૈનાન્કુરુતેઽભિભૂરસ્યભિભૂરહꣳ સજાતેષુ ભૂયાસમિત્યાહ
ય એવૈનં પ્રત્યુત્પિપીતે તમુપાસ્યતે યુનજ્મિ ત્વા બ્રહ્મણા
દૈવ્યેનેત્યાહૈષ વા અગ્નેર્યોગસ્તેનૈ

૩૪ વૈનં યુનક્તિ યજ્ઞસ્ય વૈ સમૃદ્ધેન દેવાઃ સુવર્ગં લોકમાયન્,
યજ્ઞસ્ય વ્યૃદ્ધેનાસુરાન્ પરાભાવયન્, યન્મે અગ્ને અસ્ય
યજ્ઞસ્ય રિષ્યાદિત્યાહ યજ્ઞસ્યૈવ તથ્સમૃદ્ધેન યજમાનઃ
સુવર્ગં લોકમેતિ યજ્ઞસ્ય વ્યૃદ્ધેન ભ્રાતૃવ્યાન્ પરા ભાવયત્યગ્નિ
હોત્રમેતાભિર્વ્યાહૃતીભિરુપ સાદયેદ્યજ્ઞમુખં વા અગ્નિહોત્રં બ્રહ્મૈતા
વ્યાહૃતયો યજ્ઞમુખ એવ બ્રહ્મ

૩૫ કુરુતે સંવત્સરે પર્યાગત એતાભિરેવોપસાદયેદ્ બ્રહ્મણૈવોભયતઃ
સંવત્સરં પરિગૃહ્ણાતિ દર્શપૂર્ણમાસૌ ચાતુર્માસ્યાન્યાલભમાન
એતાભિર્વ્યાહૃતીભિર્ હવીꣳષ્યાસાદયેદ્યજ્ઞમુખં વૈ દર્શપૂર્ણમાસૌ
ચાતુર્માસ્યાનિ બ્રહ્મૈતા વ્યાહૃતયો યજ્ઞમુખ એવ બ્રહ્મ કુરુતે સંવત્સરે
પર્યાગત એતાભિરેવાસાદયેદ્ બ્રહ્મણૈવોભયતઃ સંવત્સરં
પરિગૃહ્ણાતિ યદ્વૈ યજ્ઞસ્ય સામ્ના ક્રિયતે રાષ્ટ્રં
૩૬ યજ્ઞસ્યાઽઽશીર્ગચ્છતિ યદૃચા વિશં
યજ્ઞસ્યાઽઽશીર્ગચ્છત્યથ બ્રાહ્મણોઽનાશીર્કેણ યજ્ઞેન
યજતે સામિધેનીરનુવક્ષ્યન્નેતા વ્યાહૃતીઃ પુરસ્તાદ્દધ્યાદ્ બ્રહ્મૈવ
પ્રતિપદં કુરુતે તથા બ્રાહ્મણઃ સાશીર્કેણ યજ્ઞેન યજતે યં
કામયેત યજમાનં ભ્રાતૃવ્યમસ્ય યજ્ઞસ્યાઽઽશીર્ગચ્છેદિતિ તસ્યૈતા
વ્યાહૃતીઃ પુરોઽનુવાક્યાયાં દધ્યાદ્ ભ્રાતૃવ્યદેવત્યા વૈ પુરોઽનુવાક્યા
ભ્રાતૃવ્યમેવાસ્ય યજ્ઞસ્યા
૩૭ ઽશીર્ગચ્છતિ યાન્ કામયેત યજમાનાન્થ્સમાવત્યેનાન્,
યજ્ઞસ્યાઽઽશીર્ગચ્છેદિતિ તેષામેતા વ્યાહૃતીઃ પુરોઽનુવાક્યાયા
અર્ધર્ચ એકાં દધ્યાદ્યાજ્યાયૈ પુરસ્તાદેકાં યાજ્યાયા અર્ધર્ચ એકાં
તથૈનાન્થ્સમાવતી યજ્ઞસ્યાઽઽશીર્ગચ્છતિ યથા વૈ પર્જન્યઃ
સુવૃષ્ટં વર્ષત્યેવં યજ્ઞો યજમાનાય વર્ષતિ સ્થલયોદકં
પરિગૃહ્ણન્ત્યાશિષા યજ્ઞં યજમાનઃ પરિગૃહ્ણાતિ મનોઽસિ પ્રાજાપત્યં
૩૮ મનસા મા ભૂતેનાઽઽવિશેત્યાહ મનો વૈ પ્રાજાપત્યં પ્રાજાપત્યો
યજ્ઞો મન એવ યજ્ઞમાત્મન્ ધત્તે વાગસ્યૈન્દ્રી સપત્નક્ષયણી વાચા
મેન્દ્રિયેણાઽઽ વિશેત્યાહૈન્દ્રી વૈ વાગ્વાચમેવૈન્દ્રીમાત્મન્ ધત્તે ॥ તેનૈવ
બ્રહ્મ રાષ્ટ્રમેવાસ્ય યજ્ઞસ્ય પ્રાજાપત્યꣳ ષટ્ત્રિꣳશચ્ચ ॥ ૧। ૬। ૧૦॥
૩૯ યો વૈ સપ્તદશં પ્રજાપતિં યજ્ઞમન્વાયત્તં વેદ
પ્રતિ યજ્ઞેન તિષ્ઠતિ ન યજ્ઞાદ્ ભ્રꣳશત આ શ્રાવયેતિ
ચતુરક્ષરમસ્તુ શ્રૌષડિતિ ચતુરક્ષરં યજેતિ દ્વ્યક્ષરં યે
યજામહ ઇતિ પઞ્ચાક્ષરં દ્વ્યક્ષરો વષટ્કાર એષ વૈ સપ્તદશઃ

પ્રજાપતિર્યજ્ઞમન્વાયત્તો ય એવં વેદ પ્રતિ યજ્ઞેન તિષ્ઠતિ
ન યજ્ઞાદ્ ભ્રꣳશતે યો વૈ યજ્ઞસ્ય પ્રાયણં પ્રતિષ્ઠા
૪૦ મુદયનં વેદ પ્રતિષ્ઠિતેનારિષ્ટેન યજ્ઞેન સગ્ગ્સ્થાં ગચ્છત્યા
શ્રાવયાસ્તુ શ્રૌષડ્યજ યે યજામહે વષટ્કાર એતદ્વૈ યજ્ઞસ્ય
પ્રાયણમેષા પ્રતિષ્ઠૈતદુદયનં ય એવં વેદ પ્રતિષ્ઠિતેનારિષ્ટેન
યજ્ઞેન સગ્ગ્સ્થાં ગચ્છતિ યો વૈ સૂનૃતાયૈ દોહં વેદ દુહ
એવૈનાં યજ્ઞો વૈ સૂનૃતાઽઽશ્રાવયેત્યૈવૈનામહ્વદસ્તુ
૪૧ શ્રૌષડિત્યુપાવાસ્રાગ્યજેત્યુદનૈષીદ્યે યજામહ ઇત્યુપાસદદ્વષટ્કારેણ
દોગ્ધ્યેષ વૈ સૂનૃતાયૈ દોહો ય એવં વેદ દુહ એવૈનાં દેવા વૈ
સત્રમાસત તેષાં દિશોઽદસ્યન્ત એતામાર્દ્રાં પઙ્ક્તિમપશ્યન્ના
શ્રાવયેતિ પુરોવાતમજનયન્નસ્તુ શ્રૌષડિત્યભ્રꣳ સમપ્લાવયન્
યજેતિ વિદ્યુત
૪૨ મજનયન્, યે યજામહ ઇતિ પ્રાવર્ષયન્નભ્યસ્તનયન્ વષટ્કારેણ
તતો વૈ તેભ્યો દિશઃ પ્રાપ્યાયન્ત ય એવં વેદ પ્રાસ્મૈ દિશઃ પ્યાયન્તે
પ્રજાપતિં ત્વો વેદ પ્રજાપતિસ્ત્વં વેદ યં પ્રજાપતિર્વેદ સ પુણ્યો
ભવત્યેષ વૈ છન્દસ્યઃ પ્રજાપતિરા શ્રાવયાસ્તુ શ્રૌષડ્યજ
યે યજામહે વષટ્કારો ય એવં વેદ પુણ્યો ભવતિ વસન્ત
૪૩ મૃતૂનાં પ્રીણામીત્યાહર્તવો વૈ પ્રયાજા ઋતૂનેવ પ્રીણાતિ
તેઽસ્મૈ પ્રીતા યથાપૂર્વં કલ્પન્તે કલ્પન્તેઽસ્મા ઋતવો ય એવં
વેદાગ્નીષોમયોરહં દેવયજ્યયા ચક્ષુષ્માન્ ભૂયાસમિત્યાહાગ્નીષોમાભ્યાં
વૈ યજ્ઞશ્ચક્ષુષ્માન્ તાભ્યામેવ ચક્ષુરાત્મન્ ધત્તેઽગ્નેરહં
દેવયજ્યયાન્નાદો ભૂયાસમિત્યાહાગ્નિર્વૈ દેવાનામન્નાદસ્તેનૈવા
૪૪ ન્નાદ્યમાત્મન્ ધત્તે દબ્ધિરસ્યદબ્ધો ભૂયાસમમું
દભેયમિત્યાહૈતયા વૈ દબ્ધ્યા દેવા અસુરાનદભ્નુવન્ તયૈવ
ભ્રાતૃવ્યં દભ્નોત્યગ્નીષોમયોરહં દેવયજ્યયા વૃત્રહા
ભૂયાસમિત્યાહાગ્નીષોમાભ્યાં વા ઇન્દ્રો વૃત્રમહન્ તાભ્યામેવ
ભ્રાતૃવ્યગ્ગ્ સ્તૃણુત ઇન્દ્રાગ્નિયોરહં દેવયજ્યયેન્દ્રિયાવ્યન્નાદો

ભૂયાસમિત્યાહેન્દ્રિયાવ્યેવાન્નાદો ભવતીન્દ્રસ્યા
૪૫ હં દેવયજ્યયેન્દ્રિયાવી ભૂયાસમિત્યાહેન્દ્રિયાવ્યેવ ભવતિ
મહેન્દ્રસ્યાહં દેવયજ્યયા જેમાનં મહિમાનં ગમેયમિત્યાહ
જેમાનમેવ મહિમાનં ગચ્છત્યગ્નેઃ સ્વિષ્ટકૃતોઽહં
દેવયજ્યયાઽઽયુષ્માન્, યજ્ઞેન પ્રતિષ્ઠાં ગમેયમિત્યાહાયુરેવાત્મન્
ધત્તે પ્રતિ યજ્ઞેન તિષ્ઠતિ ॥ પ્રતિષ્ઠામહ્વદસ્તુ વિધુતં
વસન્તમેવેન્દ્રસ્યાઽષ્ટાત્રિꣳશચ્ચ ॥ ૧। ૬। ૧૧॥

૪૬ ઇન્દ્રં વો વિશ્વતસ્પરિ હવામહે જનેભ્યઃ । અસ્માકમસ્તુ કેવલઃ
॥ ઇન્દ્રં નરો નેમધિતા હવન્તે યત્પાર્યા યુનજતે ધિયસ્તાઃ । શૂરો
નૃષાતા શવસશ્ચકાન આ ગોમતિ વ્રજે ભજા ત્વં નઃ ॥ ઇન્દ્રિયાણિ
શતક્રતો યા તે જનેષુ પઞ્ચસુ । ઇન્દ્ર તાનિ ત આ વૃણે ॥ અનુ તે દાયિ
મહ ઇન્દ્રિયાય સત્રા તે વિશ્વમનુ વૃત્રહત્યે । અનુ
૪૭ ક્ષત્રમનુ સહો યજત્રેન્દ્ર દેવેભિરનુ તે નૃષહ્યે ॥ આ
યસ્મિન્થ્સપ્ત વાસવાસ્તિષ્ઠન્તિ સ્વારુહો યથા । ઋષિર્હ દીર્ઘશ્રુત્તમ
ઇન્દ્રસ્ય ઘર્મો અતિથિઃ ॥ આમાસુ પક્વમૈરય આ સૂર્યꣳરોહયો
દિવિ । ઘર્મં ન સામન્તપતા સુવૃક્તિભિર્જુષ્ટં ગિર્વણસે ગિરઃ ॥
ઇન્દ્રમિદ્ગાથિનો બૃહદિન્દ્રમર્કેભિરર્કિણઃ । ઇન્દ્રં વાણીરનૂષત ॥
ગાયન્તિ ત્વા ગાયત્રિણો
૪૮ ઽર્ચન્ત્યર્કમર્કિણઃ । બ્રહ્માણસ્ત્વા શતક્રતવુદ્વꣳશમિવ યેમિરે
॥ અꣳહોમુચે પ્ર ભરેમા મનીષામોષિષ્ઠદાવ્ને સુમતિં ગૃણાનાઃ
। ઇદમિન્દ્ર પ્રતિ હવ્યં ગૃભાય સત્યાઃ સન્તુ યજમાનસ્ય કામાઃ
॥ વિવેષ યન્મા ધિષણા જજાન સ્તવૈ પુરા પાર્યાદિન્દ્રમહ્નઃ ।
અꣳહસો યત્ર પીપરદ્યથા નો નાવેવ યાન્તમુભયે હવન્તે ॥ પ્ર
સમ્રાજં પ્રથમમધ્વરાણા
૪૯ મꣳહોમુચં વૃષભં યજ્ઞિયાનામ્ । અપાં નપાતમશ્વિના
હયન્તમસ્મિન્નર ઇન્દ્રિયં ધત્તમોજઃ ॥ વિ ન ઇન્દ્ર મૃધો જહિ નીચા

યચ્છ પૃતન્યતઃ । અધસ્પદં તમીં કૃધિ યો અસ્માꣳ અભિદાસતિ
॥ ઇન્દ્ર ક્ષત્રમભિ વામમોજોઽજાયથા વૃષભ ચર્ષણીનામ્ । અપાનુદો
જનમમિત્રયન્તમુરું દેવેભ્યો અકૃણોરુ લોકમ્ ॥ મૃગો ન ભીમઃ કુચરો
ગિરિષ્ઠાઃ પરાવત

૫૦ આ જગામા પરસ્યાઃ । સૃકꣳ સꣳશાય પવિમિન્દ્ર તિગ્મં
વિ શત્રૂન્ તાઢિ વિ મૃધો નુદસ્વ ॥ વિ શત્રૂન્ વિ મૃધો નુદ વિ
વૃત્રસ્ય હનૂ રુજ । વિ મન્યુમિન્દ્ર ભામિતોઽમિત્રસ્યાભિદાસતઃ ॥
ત્રાતારમિન્દ્રમવિતારમિન્દ્રꣳ હવેહવે સુહવꣳ શૂર મિન્દ્રમ્
। હુવે નુ શક્રં પુરુહૂતમિન્દ્રગ્ગ્ં સ્વસ્તિ નો મઘવા ધાત્વિન્દ્રઃ ॥
મા તે અસ્યાꣳ

૫૧ સહસાવન્ પરિષ્ટાવઘાય ભૂમ હરિવઃ પરાદૈ । ત્રાયસ્વ
નોઽવૃકેભિર્વરૂથૈસ્તવ પ્રિયાસઃ સૂરિષુ સ્યામ ॥ અનવસ્તે
રથમશ્વાય તક્ષન્ ત્વષ્ટા વજ્રં પુરુહૂત દ્યુમન્તમ્ । બ્રહ્માણ ઇન્દ્રં
મહયન્તો અર્કૈરવર્ધયન્નહયે હન્તવા ઉ ॥ વૃષ્ણે યત્ તે વૃષણો
અર્કમર્ચાનિન્દ્ર ગ્રાવાણો અદિતિઃ સજોષાઃ । અનશ્વાસો યે પવયોઽરથા
ઇન્દ્રેષિતા અભ્યવર્તન્ત દસ્યૂન્ ॥ વૃત્રહત્યેઽનુ ગાયત્રિણોઽધ્વરાણાં
પરાવતોઽસ્યામષ્ટાચત્વારિꣳશચ્ચ ॥ ૧। ૬। ૧૨॥

સં ત્વા સિંચામિ ધ્રુવોસ્યગ્નિર્મા બર્હિષોઽહમાપ્યાયતામગન્મ યથા વૈ
યો વૈ શ્રદ્ધાં પ્રજાપતિર્યજ્ઞાન્ ધ્રુવોસીત્યાહ યો વૈ સપ્તદશમિંદ્ર
વો દ્વાદશ ॥

સં ત્વા બર્હિષોઽહં યથા વા એવં વિદ્વાઞ્છ્રૌષટ્થ્ સહસાવન્નેક
પંચાશત્ ॥

સં ત્વા સિંચામિ દસ્યૂન્ ॥

## પ્રથમકાણ્ડે સપ્તમઃ પ્રશ્નઃ ૭

૧ પાકયજ્ઞં વા અન્વાહિતાગ્નેઃ પશવ ઉપ તિષ્ઠન્ત ઇડા ખલુ

વૈ પાકયજ્ઞઃ સૈષાન્તરા પ્રયાજાનૂયાજાન્, યજમાનસ્ય લોકેઽવહિતા
તામાહ્રિયમાણામભિ મન્ત્રયેત સુરૂપવર્ષવર્ણે એહીતિ પશવો વા ઇડા
પશૂનેવોપ હ્વયતે યજ્ઞં વૈ દેવા અદુહ્રન્, યજ્ઞોઽસુરાઁ અદુહત્
તેઽસુરા યજ્ઞદુગ્ધાઃ પરાઽભવન્ યો વૈ યજ્ઞસ્ય દોહં વિદ્વાન્
૨ યજતેઽપ્યન્યં યજમાનં દુહે સા મે સત્યાઽઽશીરસ્ય યજ્ઞસ્ય
ભૂયાદિત્યાહૈષ વૈ યજ્ઞસ્ય દોહસ્તેનૈવૈનં દુહે પ્રત્તા વૈ ગૌર્દુહે
પ્રત્તેડા યજમાનાય દુહ એતે વા ઇડાયૈ સ્તના ઇડોપહૂતેતિ વાયુર્વથ્સો
યર્હિ હોતેડામુપહ્વયેત તર્હિ યજમાનો હોતારમીક્ષમાણો વાયું
મનસા ધ્યાયેન્
૩ માત્રે વથ્સમુપાવસૃજતિ સર્વેણ વૈ યજ્ઞેન દેવાઃ સુવર્ગં
લોકમાયન્ પાકયજ્ઞેન મનુરશ્રામ્યથ્સેડા મનુમુપાવર્તત તાન્દેવાસુરા
વ્યહ્વયન્ત પ્રતીચીં દેવાઃ પરાચીમસુરાઃ સા દેવાનુપાવર્તત પશવો
વૈ તદ્દેવાનવૃણત પશવોઽસુરાનજહુર્યં કામયેતાપશુઃ સ્યાદિતિ
પરાચીં તસ્યેડામુપહ્વયેતાપશુરેવ ભવતિ યં
૪ કામયેત પશુમાન્થ્સ્યાદિતિ પ્રતીચીં તસ્યેડામુપહ્વયેત
પશુમાનેવ ભવતિ બ્રહ્મવાદિનો વદન્તિ સ ત્વા ઇડામુપહ્વયેત
ય ઇડામુપહૂયાત્માનમિડાયામુપહ્વયેતેતિ સા નઃ પ્રિયા
સુપ્રતૂર્તિર્મઘોનીત્યાહેડામેવોપ હૂયાઽઽત્માનમિડાયામુપ હ્વયતે
વ્યસ્તમિવ વા એતદ્યજ્ઞસ્ય યદિડા સામિ પ્રાશ્ઞન્તિ
૫ સામિ માર્જયન્ત એતત્ પ્રતિ વા અસુરાણાં યજ્ઞો વ્યચ્છિદ્યત બ્રહ્મણા
દેવાઃ સમદધુ બૃહસ્પતિસ્તનુતામિમં ન ઇત્યાહ બ્રહ્મ વૈ દેવાનાં
બૃહસ્પતિર્બ્રહ્મણૈવ યજ્ઞઁ સંદધાતિ વિચ્છિન્નં યજ્ઞઁ
સમિમં દધાત્વિત્યાહ સંતત્યૈ વિશ્વે દેવા ઇહ માદયન્તામિત્યાહ
સંતત્યૈવ યજ્ઞં દેવેભ્યોઽનુ દિશતિ યાં વૈ
૬ યજ્ઞે દક્ષિણાં દદાતિ તામસ્ય પશવોઽનુ સંક્રામન્તિ સ એષ
ઈજાનોઽપશુર્ભાવુકો યજમાનેન ખલુ વૈ તત્કાર્યમિત્યાહુર્યથા
દેવત્રા દત્તં કુર્વીતાત્મન્ પશૂન્ રમયેતેતિ બ્રધ્ન પિન્વસ્વેત્યાહ યજ્ઞો

વૈ બ્રહ્મો યજ્ઞમેવ તન્મહયત્યથો દેવત્રૈવ દત્તં કુરુત આત્મન્
પશૂન્ રમયતે દદતો મે મા ક્ષાયીત્યાહાક્ષિતિમેવોપૈતિ કુર્વતો મે મોપ
દસદિત્યાહ ભૂમાનમેવોપૈતિ ॥ વિદ્વાન્ ધ્યાયેદ્ભવતિ યં પ્રાશ્ઞન્તિ
યાં વૈ મ એકાન્નવિꣳશતિશ્ચ ॥ ૧। ૭। ૧॥
૭ સરꣳશ્રવા હ સૌવર્ચનસસ્તુમિઞ્જમૌપોદિતિમુવાચ યથ્સત્રિણાꣳ
હોતાઽભૂઃ કામિડામુપાહ્વથા ઇતિ તામુપાહ્વ ઇતિ હોવાચ યા પ્રાણેન દેવાન્
દાધાર વ્યાનેન મનુષ્યાનપાનેન પિતૃનિતિ છિનત્તિ સા ન છિનત્તી
૩ ઇતિ છિનત્તીતિ હોવાચ શરીરં વા અસ્યૈ તદુપાહ્વથા ઇતિ હોવાચ ગૌર્વા
૮ અસ્યૈ શરીરં ગાં વાવ તૌ તત્પર્યવદતાં યા યજ્ઞે દીયતે સા
પ્રાણેન દેવાન્ દાધાર યયા મનુષ્યા જીવન્તિ સા વ્યાનેન મનુષ્યાન્ યાં
પિતૃભ્યો ઘ્નન્તિ સાઽપાનેન પિતૄન્, ય એવં વેદ પશુમાન્ ભવત્યથ
વૈ તામુપાહ્વ ઇતિ હોવાચ યા પ્રજાઃ પ્રભવન્તીઃ પ્રત્યાભવતીત્યન્નં
વા અસ્યૈ તદુ
૯ પાહ્વથા ઇતિ હોવાચૌષધયો વા અસ્યા અન્નમોષધયો વૈ પ્રજાઃ
પ્રભવન્તીઃ પ્રત્યા ભવન્તિ ય એવં વેદાન્નાદો ભવત્યથ વૈ તામુપાહ્વ
ઇતિ હોવાચ યા પ્રજાઃ પરાભવન્તીરનુગૃહ્ણાતિ પ્રત્યાભવન્તીર્ગૃહ્ણાતીતિ
પ્રતિષ્ઠાં વા અસ્યૈ તદુપાહ્વથા ઇતિ હોવાચેયં વા અસ્યૈ પ્રતિષ્ઠે
૧૦ યં વૈ પ્રજાઃ પરાભવન્તીરનુ ગૃહ્ણાતિ પ્રત્યાભવન્તીર્ગૃહ્ણાતિ
ય એવં વેદ પ્રત્યેવ તિષ્ઠત્યથ વૈ તામુપાહ્વ ઇતિ હોવાચ યસ્યૈ
નિક્રમણે ઘૃતં પ્રજાઃ સંજીવન્તીઃ પિબન્તીતિ છિનત્તિ સા ન છિનત્તી
૩ ઇતિ ન છિનત્તીતિ હોવાચ પ્ર તુ જનયતીત્યેષ વા ઇડામુપાહ્વથા
ઇતિ હોવાચ વૃષ્ટિર્વા ઇડા વૃષ્ટ્યૈ વૈ નિક્રમણે ઘૃતં પ્રજાઃ
સંજીવન્તીઃ પિબન્તિ ય એવં વેદ પ્રૈવ જાયતેઽન્નાદો ભવતિ ॥ ગૌર્વા અસ્યૈ
તત્ પ્રતિષ્ઠાઽહ્વથા ઇતિ વિꣳશતિશ્ચ ॥ ૧। ૭। ૨॥
૧૧ પરોક્ષં વા અન્યે દેવા ઇજ્યન્તે પ્રત્યક્ષમન્યે યદ્યજતે ય એવ દેવાઃ
પરોક્ષમિજ્યન્તે તાનેવ તદ્યજતિ યદન્વાહાર્યમાહરત્યેતે વૈ દેવાઃ
પ્રત્યક્ષં યદ્ બ્રાહ્મણાસ્તાનેવ તેન પ્રીણાત્યથો દક્ષિણૈવાસ્યૈષાઽથો

યજ્ઞસ્યૈવ છિદ્રમપિ દધાતિ યદ્વૈ યજ્ઞસ્ય ક્રૂરં યદ્વિલિષ્ટં
તદન્વાહાર્યેણા
૧૨ ઽન્વાહરતિ તદન્વાહાર્યસ્યાન્વાહાર્યત્વં દેવદૂતા વા એતે યદૃત્વિજો
યદન્વાહાર્યમાહરતિ દેવદૂતાનેવ પ્રીણાતિ પ્રજાપતિર્દેવેભ્યો યજ્ઞાન્
વ્યાદિશત્ સ રિરિચાનોઽમન્યત સ એતમન્વાહાર્યમભક્તમપશ્યત્
તમાત્મન્નધત્ત સ વા એષ પ્રાજાપત્યો યદન્વાહાર્યો યસ્યૈવં
વિદુષોઽન્વાહાર્ય આહ્રિયતે સાક્ષાદેવ પ્રજાપતિમૃધ્નોત્યપરિમિતો
નિરુપ્યોઽપરિમિતઃ પ્રજાપતિઃ પ્રજાપતે
૧૩ રાપ્ત્યૈ દેવા વૈ યદ્યજ્ઞેઽકુર્વત તદસુરા અકુર્વત તે દેવા એતં
પ્રાજાપત્યમન્વાહાર્યમપશ્યન્ તમન્વાહરન્ત તતો દેવા અભવન્
પરાસુરા યસ્યૈવં વિદુષોઽન્વાહાર્ય આહ્રિયતે ભવત્યાત્મના
પરાસ્ય ભ્રાતૃવ્યો ભવતિ યજ્ઞેન વા ઇષ્ટી પક્વેન પૂર્તી યસ્યૈવં
વિદુષોઽન્વાહાર્ય આહ્રિયતે સ ત્વેવેષ્ટાપૂર્તી પ્રજાપતેર્ભાગોઽસી
૧૪ ત્યાહ પ્રજાપતિમેવ ભાગધેયેન સમર્ધયત્યૂર્જસ્વાન્
પયસ્વાનિત્યાહોર્જમેવાસ્મિન્ પયો દધાતિ પ્રાણાપાનૌ મે પાહિ સમાનવ્યાનૌ
મે પાહીત્યાહાઽઽશિષમેવૈતામા શાસ્તે ઽક્ષિતોઽસ્યક્ષિત્યૈ
ત્વા મા મે ક્ષેષ્ઠા અમુત્રામુષ્મિꣳલ્લોક ઇત્યાહ ક્ષીયતે
વા અમુષ્મિꣳલ્લોકેઽન્નમિતઃ પ્રદાનꣳ હ્યમુષ્મિꣳલ્લોકે
પ્રજા ઉપજીવન્તિ યદેવમભિ મૃશત્યક્ષિતિમેવૈનદ્ગમયતિ
નાસ્યામુષ્મિꣳલ્લોકેઽન્નં ક્ષીયતે ॥ અન્વાહાર્યેણ પ્રજાપતેરસિ
હ્યમુષ્મિꣳલ્લોકે પઞ્ચદશ ચ ॥ ૧। ૭। ૩॥
૧૫ બર્હિષોઽહં દેવયજ્યયા પ્રજાવાન્ ભૂયાસમિત્યાહ બર્હિષા વૈ
પ્રજાપતિઃ પ્રજા અસૃજત તેનૈવ પ્રજાઃ સૃજતે નરાશꣳસસ્યાહં
દેવયજ્યયા પશુમાન્ ભૂયાસમિત્યાહ નરાશꣳસેન વૈ પ્રજાપતિઃ
પશૂનસૃજત તેનૈવ પશૂન્થ્સૃજતેઽગ્નેઃ સ્વિષ્ટકૃતોઽહં
દેવયજ્યયા ઽઽયુષ્માન્, યજ્ઞેન પ્રતિષ્ઠાં ગમેયમિત્યાહાઽઽયુરેવાત્મન્
ધત્તે પ્રતિ યજ્ઞેન તિષ્ઠતિ દર્શપૂર્ણમાસયો

૧૬ વૈ દેવા ઉજ્જિતિમનૂદજયન્ દર્શપૂર્ણમાસાભ્યામસુરાનપાનુ
દન્તાગ્નેરહમુજ્જિતિમનૂજ્જે ષમિત્યાહ દર્શપૂર્ણમાસયોરેવ દેવતાનાં
યજમાન ઉજ્જિતિમનૂજ્જયતિ દર્શપૂર્ણમાસાભ્યાં ભ્રાતૃવ્યાનપ
નુદતે વાજવતીભ્યાં વ્યૂહત્યન્નં વૈ વાજોઽન્નમેવાવરુન્ધે દ્વાભ્યાં
પ્રતિષ્ઠિત્યૈ યો વૈ યજ્ઞસ્ય દ્વૌ દોહૌ વિદ્વાન્, યજત ઉભયત

૧૭ એવ યજ્ઞં દુહે પુરસ્તાચ્ચોપ રિષ્ટાચ્ચૈષ વા અન્યો યજ્ઞસ્ય
દોહ ઇડાયામન્યો યર્હિ હોતા યજમાનસ્ય નામ ગૃહ્ણીયાત્ તર્હિ બ્રૂયાદેમા
અગ્મન્નાશિષો દોહકામા ઇતિ સરꣳ સ્તુતા એવ દેવતા દુહેઽથો ઉભયત
એવ યજ્ઞં દુહે પુરસ્તાચ્ચોપરિષ્ટાચ્ચ રોહિતેન ત્વાઽગ્નિર્દેવતાં
ગમયત્વિત્યાહૈતે વૈ દેવાશ્વા

૧૮ યજમાનઃ પ્રસ્તરો યદેતૈઃ પ્રસ્તરં પ્રહરતિ દેવાશ્વૈરેવ યજમાનꣳ
સુવર્ગં લોકં ગમયતિ વિ તે મુઞ્ચામિ રશના વિ રશ્મીનિત્યાહૈષ વા
અગ્નેર્વિમોકસ્તેનૈવૈનં વિ મુઞ્ચતિ વિષ્ણોઃ શંયોરહં દેવયજ્યયા
યજ્ઞેન પ્રતિષ્ઠાં ગમેયમિત્યાહ યજ્ઞો વૈ વિષ્ણુર્યજ્ઞ એવાન્તતઃ
પ્રતિ તિષ્ઠતિ સોમસ્યાહં દેવયજ્યયા સુરેતા

૧૯ રેતો ધિષીયેત્યાહ સોમો વૈ રેતોધાસ્તેનૈવ રેત આત્મન્ ધત્તે
ત્વષ્ટુરહં દેવયજ્યયા પશૂનાꣳ રૂપં પુષેયમિત્યાહ ત્વષ્ટા વૈ
પશૂનાં મિથુનાનાꣳરૂપકૃત્તેનૈવ પશૂનાꣳ રૂપમાત્મન્ ધત્તે
દેવાનાં પત્નીરગ્નિર્ગૃહપતિર્યજ્ઞસ્ય મિથુનં તયોરહં દેવયજ્યયા
મિથુનેન પ્ર ભૂયાસમિત્યાહૈતસ્માદ્વૈ મિથુનાત્ પ્રજાપતિર્મિથુનેન

૨૦ પ્રાજાયત તસ્માદેવ યજમાનો મિથુનેન પ્ર જાયતે વેદોઽસિ વિત્તિરસિ
વિદેયેત્યાહ વેદેન વૈ દેવા અસુરાણાં વિત્તં વેદ્યમવિન્દન્ત તદ્વેદસ્ય
વેદત્વં યદ્યદ્ ભ્રાતૃવ્યસ્યાભિધ્યાયેત્ તસ્ય નામ ગૃહ્ણીયાત્ તદેવાસ્ય
સર્વં વૃઙ્ક્તે ઘૃતવન્તં કુલાયિનꣳરાયસ્પોષꣳસહસ્રિણં
વેદો દદાતુ વાજિનમિત્યાહ પ્ર સહસ્રં પશૂનાપ્નોત્યાસ્ય પ્રજાયાં
વાજી જાયતે ય એવં વેદ ॥ દર્શપૂર્ણમાસયો રુભયતો દેવાશ્વાઃ
સુરેતાઃ પ્રજાપતિર્મિથુનેનાઽઽપ્નોત્યષ્ટૌ ચ ॥ ૧। ૭। ૪॥

૨૧ ધ્રુવાં વૈ રિચ્યમાનાં યજ્ઞોઽનુ રિચ્યતે યજ્ઞં યજમાનો યજમાનં પ્રજા
ધ્રુવામાપ્યાયમાનાં યજ્ઞોઽન્વા પ્યાયતે યજ્ઞં યજમાનો યજમાનં પ્રજા
આ પ્યાયતાં ધ્રુવા ઘૃતેનેત્યાહ ધ્રુવામેવાઽઽપ્યાયયતિ તામાપ્યાયમાનાં
યજ્ઞોઽન્વા પ્યાયતે યજ્ઞં યજમાનો યજમાનં પ્રજાઃ પ્રજાપતેર્વિભાન્નામ
લોકસ્તસ્મિગ્ગ્ સ્ત્વા દધામિ સહ યજમાનેનેત્યા

૨૨ હાયં વૈ પ્રજાપતેર્વિભાન્નામ લોકસ્તસ્મિન્નેવૈનં દધાતિ
સહ યજમાનેન રિચ્યત ઇવ વા એતદ્યદ્યજતે યદ્યજમાનભાગં
પ્રાશ્ઞાત્યાત્માનમેવ પ્રીણાત્યેતાવાન્ વૈ યજ્ઞો યાવાન્ યજમાનભાગો
યજ્ઞો યજમાનો યદ્યજમાનભાગં પ્રાશ્ઞાતિ યજ્ઞ એવ યજ્ઞં
પ્રતિષ્ઠાપયત્યેતદ્વૈ સૂયવસઁ સોદકં યદ્બર્હિશ્ચાઽઽપશ્ચૈતદ્

૨૩ યજમાનસ્યાઽઽયતનં યદ્વેદિર્યત્ પૂર્ણપાત્રમન્તર્વેદિ નિનયતિ
સ્વ એવાઽઽયતને સૂયવસઁ સોદકં કુરુતે સદસિ સન્મે ભૂયા
ઇત્યાહાઽઽપો વૈ યજ્ઞ આપોઽમૃતં યજ્ઞમેવામૃતમાત્મન્ ધત્તે
સર્વાણિ વૈ ભૂતાનિ વ્રતમુપયન્તમનૂપ યન્તિ પ્રાચ્યાં દિશિ દેવા
ઋત્વિજો માર્જયન્તામિત્યાહૈષ વૈ દર્શપૂર્ણમાસયોરવભૃથો

૨૪ યાન્યેવૈનં ભૂતાનિ વ્રતમુપયન્ત મનૂપયન્તિ તૈરેવ
સહાવભૃથમવૈતિ વિષ્ણુમુખા વૈ દેવાશ્છન્દોભિરિમાન્
લોકાનનપજય્યમભ્યજયન્ યદ્વિષ્ણુક્રમાન્ ક્રમતે વિષ્ણુરેવ
ભૂત્વા યજમાનશ્છન્દોભિરિમાન્ લોકાનનપજય્યમભિ જયતિ વિષ્ણોઃ
ક્રમોઽસ્યભિમાતિહેત્યાહ ગાયત્રી વૈ પૃથિવી ત્રૈષ્ટુભમન્તરિક્ષં
જાગતી દ્યૌરાનુષ્ટુભીર્દિશ શ્છન્દોભિરેવેમાન્ લોકાન્, યથાપૂર્વમભિ
જયતિ ॥ ઇત્યેતદવભૃથો દિશઃ સપ્ત ચ ॥ ૧। ૭। ૫॥

૨૫ અગન્મ સુવઃ સુવરગન્મેત્યાહ સુવર્ગમેવ લોકમેતિ
સંદૃશસ્તે મા છિથ્સિ યત્તે તપસ્તસ્મૈ તે મા વૃક્ષીત્યાહ
યથાયજુરેવૈતત્ સુભૂરસિ શ્રેષ્ઠો રશ્મીનામાયુર્ધા અસ્યાયુર્મે
ધેહીત્યાહાઽઽશિષમેવૈતામા શાસ્તે પ્ર વા એષોઽસ્માલ્લોકાચ્ચ્યવતે યો

૨૬ વિષ્ણુક્રમાન્ ક્રમતે સુવર્ગાય હિ લોકાય વિષ્ણુક્રમાઃ ક્રમ્યન્તે

બ્રહ્મવાદિનો વદન્તિ સ ત્વૈ વિષ્ણુક્રમાન્ ક્રમેત ય ઇમાન્ લોકાન્ ભ્રાતૃવ્યસ્ય
સંવિદ્ય પુનરિમં લોકં પ્રત્યવરોહેદિત્યેષ વા અસ્ય લોકસ્ય
પ્રત્યવરોહો યદાહેદમહમમું ભ્રાતૃવ્યમાભ્યો દિગ્ભ્યોઽસ્યૈ દિવ
ઇતીમાનેવ લોકાન્ ભ્રાતૃવ્યસ્ય સંવિદ્ય પુનરિમં લોકં પ્રત્યવરોહતિ સં
૨૭ જ્યોતિષાઽભૂવમિત્યાહાસ્મિન્નેવ લોકે પ્રતિ
તિષ્ઠત્યૈન્દ્રીમાવૃતમન્વાવર્ત ઇત્યાહાસૌ વા આદિત્ય
ઇન્દ્રસ્તસ્યૈવાઽઽવૃતમનુ પર્યાવર્તતે દક્ષિણા પર્યાવર્તતે સ્વમેવ
વીર્યમનુ પર્યાવર્તતે તસ્માદ્દક્ષિણોઽર્ધ આત્મનો વીર્યાવત્તરોઽથો
આદિત્યસ્યૈવાઽઽવૃતમનુ પર્યાવર્તતે સમહં પ્રજયા સં મયા
પ્રજેત્યાહાઽઽશિષ
૨૮ મેવૈતામા શાસ્તે સમિદ્ધો અગ્ને મે દીદિહિ સમેદ્ધા તે અગ્ને દીદ્યાસમિત્યાહ
યથાયજુરેવૈતદ્વસુમાન્, યજ્ઞો વસીયાન્ ભૂયાસમિત્યાહાઽઽશિષમેવૈતામા
શાસ્તે બહુ વૈ ગાર્હપત્યસ્યાન્તે મિશ્રમિવ ચર્યત આગ્નિપાવમાનીભ્યાં
ગાર્હપત્યમુપ તિષ્ઠતે પુનાત્યેવાગ્નિં પુનીત આત્માનં દ્વાભ્યાં
પ્રતિષ્ઠિત્યા અગ્ને ગૃહપત ઇત્યાહ
૨૯ યથાયજુરેવૈતચ્છતꣳ હિમા ઇત્યાહ શતં ત્વા હેમન્તાનિન્ધિષીયેતિ
વાવૈતદાહ પુત્રસ્ય નામ ગૃહ્ણાત્યન્નાદમેવૈનં કરોતિ તામાશિષમા
શાસે તન્તવે જ્યોતિષ્મતીમિતિ બ્રૂયાદ્યસ્ય પુત્રોઽજાતઃ સ્યાત્
તેજસ્વ્યેવાસ્ય બ્રહ્મવર્ચસી પુત્રો જાયતે તામાશિષમા શાસેઽમુષ્મૈ
જ્યોતિષ્મતીમિતિ બ્રૂયાદ્યસ્ય પુત્રો
૩૦ જાતઃ સ્યાત્ તેજ એવાસ્મિન્ બ્રહ્મવર્ચસં દધાતિ યો વૈ યજ્ઞં પ્રયુજ્ય
ન વિમુઞ્ચત્યપ્રતિષ્ઠાનો વૈ સ ભવતિ કસ્ત્વા યુનક્તિ સ ત્વા વિ
મુઞ્ચત્વિત્યાહ પ્રજાપતિર્વૈ કઃ પ્રજાપતિનૈવૈનં યુનક્તિ
પ્રજાપતિના વિ મુઞ્ચતિ પ્રતિષ્ઠિત્યા ઈશ્વરં વૈ વ્રતમવિસૃષ્ટં
પ્રદહોઽગ્ને વ્રતપતે વ્રતમચારિષમિત્યાહ વ્રતમેવ
૩૧ વિ સૃજતે શાન્ત્યા અપ્રદાહાય પરાઙ્ વાવ યજ્ઞ એતિ ન નિ વર્તતે
પુનરꣳ યો વૈ યજ્ઞસ્ય પુનરાલમ્ભં વિદ્વાન્, યજતે તમભિ નિ વર્તતે યજ્ઞો

બભૂવ સ આ બભૂવેત્યાહૈષ વૈ યજ્ઞસ્ય પુનરાલમ્ભસ્તેનૈવૈનં
પુનરાલભતેઽનવરુદ્ધા વા એતસ્ય વિરાડ્ય આહિતાગ્નિઃ સન્નસભઃ
પશવઃ ખલુ વૈ બ્રાહ્મણસ્ય સભેષ્ટ્વા પ્રાઙુત્ક્રમ્ય બ્રૂયાદ્ગોમાઁ
અગ્નેઽવિમાઁ અશ્વી યજ્ઞ ઇત્યવ સભાઁ રુન્ધે પ્ર સહસ્રં
પશૂનાપ્નોત્યાસ્ય પ્રજાયાં વાજી જાયતે ॥ યઃ સ માશિષં ગૃહપત
ઇત્યાહામુષ્મૈ જ્યોતિષ્મતીમિતિ બ્રૂયાદ્યસ્ય પુત્રો વ્રતમેવ ખલુ વૈ
ચતુર્વિઁ શતિશ્ચ ॥ ૧। ૭। ૬॥
૩૨ દેવ સવિતઃ પ્રસુવ યજ્ઞં પ્રસુવ યજ્ઞપતિં ભગાય દિવ્યો
ગન્ધર્વઃ । કેતપૂઃ કેતં નઃ પુનાતુ વાચસ્પતિર્વાચમદ્ય સ્વદાતિ નઃ ॥
ઇન્દ્રસ્ય વજ્રોઽસિ વાર્ત્રઘ્નસ્ત્વયાઽયં વૃત્રં વધ્યાત્ ॥ વાજસ્ય નુ
પ્રસવે માતરં મહીમદિતિં નામ વચસા કરામહે । યસ્યામિદં વિશ્વં
ભુવનમાવિવેશ તસ્યાં નો દેવઃ સવિતા ધર્મ સાવિષત્ ॥ અપ્સ્વ
૩૩ ન્તરમૃતમપ્સુ ભેષજમપામુત પ્રશસ્તિષ્વશ્વા ભવથ
વાજિનઃ ॥ વાયુર્વા ત્વા મનુર્વા ત્વા ગન્ધર્વાઃ સપ્તવિઁ શતિઃ । તે અગ્રે
અશ્વમાયુઞ્જન્તે અસ્મિઞ્જવમાદધુઃ ॥ અપાં નપાદાશુહેમન્ ય ઊર્મિઃ કકુદ્માન્
પ્રતૂર્તિર્વાજસાતમસ્તેનાયં વાજઁ સેત્ ॥ વિષ્ણોઃ ક્રમોઽસિ વિષ્ણોઃ
ક્રાન્તમસિ વિષ્ણોર્વિક્રાન્તમસ્યઙ્કૌ ન્યઙ્કાવભિતો રથં યૌ ધ્વાન્તં
વાતાગ્રમનુ સંચરન્તૌ દૂરેહેતિરિન્દ્રિયાવાન્ પતત્રી તે નોઽગ્નયઃ
પપ્રયઃ પારયન્તુ ॥ અપ્સુ ન્યઙ્કૌ પઞ્ચદશ ચ ॥ ૧। ૭। ૭॥
૩૪ દેવસ્યાહઁ સવિતુઃ પ્રસવે બૃહસ્પતિના વાજજિતા વાજં જેષં
દેવસ્યાહઁ સવિતુઃ પ્રસવે બૃહસ્પતિના વાજજિતા વર્ષિષ્ઠં
નાકઁ રુહેયમિન્દ્રાય વાચં વદતેન્દ્રં વાજં જાપયતેન્દ્રો વાજમજયિત્
। અશ્વાજનિ વાજિનિ વાજેષુ વાજિનીવત્યશ્વાન્થ્સમત્સુ વાજય ॥ અર્વાસિ
સપ્તિરસિ વાજ્યસિ વાજિનો વાજં ધાવત મરુતાં પ્રસવે જયત વિ
યોજના મિમીધ્વમધ્વનઃ સ્કભ્નીત
૩૫ કાષ્ઠાં ગચ્છત વાજે વાજેઽવત વાજિનો નો ધનેષુ વિપ્રા અમૃતા ઋતજ્ઞાઃ ॥
અસ્ય મધ્વઃ પિબત માદયધ્વં તૃપ્તા યાત પથિભિર્દેવયાનૈઃ ॥ તે નો

અર્વન્તો હવનશ્રુતો હવં વિશ્વે શૃણ્વન્તુ વાજિનઃ ॥ મિતદ્રવઃ સહસ્રસા
મેધસાતા સનિષ્યવઃ । મહો યે રત્નꣳસમિધેષુ જભ્રિરે શં નો
ભવન્તુ વાજિનો હવેષુ ॥ દેવતાતા મિતદ્રવઃ સ્વર્કાઃ । જમ્ભયન્તોઽહિં
વૃકꣳ રક્ષાꣳસિ સનેમ્યસ્મદ્યુયવ
૩૬ ન્નમીવાઃ ॥ એષ સ્ય વાજી ક્ષિપણિં તુરણ્યતિ ગ્રીવાયાં બદ્ધો અપિકક્ષ
આસનિ । ક્રતું દધિક્રા અનુ સંતવીત્વત્ પથામઙ્કાગ્સ્યન્વાપનીફણત્
॥ ઉત સ્માસ્ય દ્રવતસ્તુરણ્યતઃ પર્ણં ન વેરનુ વાતિ પ્રગર્ધિનઃ ।
શ્યેનસ્યેવ ધ્રજતો અઙ્કસં પરિ દધિક્રાવ્ણઃ સહોર્જા તરિત્રતઃ ॥ આ મા
વાજસ્ય પ્રસવો જગમ્યાદા દ્યાવાપૃથિવી વિશ્વશમ્ભૂ । આ મા ગન્તાં પિતરા
૩૭ માતરા ચાઽઽમા સોમો અમૃતત્વાય ગમ્યાત્ ॥ વાજિનો વાજજિતો વાજꣳ
સરિષ્યન્તો વાજં જેષ્યન્તો બૃહસ્પતેર્ભાગમવ જિઘ્રત વાજિનો
વાજજિતો વાજꣳસસૃવાꣳસો વાજં જિગિવાꣳસો બૃહસ્પતેર્ભાગે નિ
મૃઢ્વમિયં વઃ સા સત્યા સંધાઽભૂદ્યામિન્દ્રેણ સમધધ્વમજીજિપત
વનસ્પતય ઇન્દ્રં વાજં વિમુચ્યધ્વમ્ ॥ સ્કભ્નીત યુયવન્પિતરા
દ્વિચત્વારિꣳશચ્ચ ॥ ૧। ૭। ૮॥
૩૮ ક્ષત્રસ્યોલ્બમસિ ક્ષત્રસ્ય યોનિરસિ જાય એહિ સુવો રોહાવ રોહાવ
હિ સુવરહં નાવુભયોઃ સુવો રોક્ષ્યામિ વાજશ્ચ પ્રસવશ્ચાપિજશ્ચ
ક્રતુશ્ચ સુવશ્ચ મૂર્ધા ચ વ્યશ્નિયશ્ચાઽઽન્ત્યાયનશ્ચાન્ત્યશ્ચ
ભૌવનશ્ચ ભુવનશ્ચાધિપતિશ્ચ । આયુર્યજ્ઞેન કલ્પતાં પ્રાણો
યજ્ઞેન કલ્પતામપાનો
૩૯ યજ્ઞેન કલ્પતાં વ્યાનો યજ્ઞેન કલ્પતાં ચક્ષુર્યજ્ઞેન કલ્પતાગ્
શ્રોત્રં યજ્ઞેન કલ્પતાં મનો યજ્ઞેન કલ્પતાં વાગ્યજ્ઞેન કલ્પતામાત્મા
યજ્ઞેન કલ્પતાં યજ્ઞો યજ્ઞેન કલ્પતાꣳ સુવર્દેવાꣳ અગન્મામૃતા
અભૂમ પ્રજાપતેઃ પ્રજા અભૂમ સમહં પ્રજયા સં મયા પ્રજા સમહꣳ
રાયસ્પોષેણ સં મયા રાયસ્પોષોઽન્નાય ત્વાઽન્નાદ્યાય ત્વા વાજાય ત્વા
વાજજિત્યાયૈ ત્વાઽમૃતમસિ પુષ્ટિરસિ પ્રજનનમસિ ॥ અપાનો વાજાય
નવ ચ ॥ ૧। ૭। ૯॥

૪૦ વાજસ્યેમં પ્રસવઃ સુષુવે અગ્રે સોમꣳ રાજાનમોષધીષ્વપ્સુ
। તા અસ્મભ્યં મધુમતીર્ભવન્તુ વયꣳ રાષ્ટ્રે જાગ્રિયામ પુરોહિતાઃ ॥
વાજસ્યેદં પ્રસવ આ બભૂવેમા ચ વિશ્વા ભુવનાનિ સર્વતઃ । સ
વિરાજં પર્યેતિ પ્રજાનન્ પ્રજાં પુષ્ટિં વર્ધયમાનો અસ્મે ॥ વાજસ્યેમાં
પ્રસવઃ શિશ્રિયે દિવમિમા ચ વિશ્વા ભુવનાનિ સમ્રાટ્ । અદિથ્સન્તં
દાપયતુ પ્રજાનન્ રયિં

૪૧ ચ નઃ સર્વવીરાં નિ યચ્છતુ ॥ અગ્ને અચ્છા વદેહ નઃ પ્રતિ
નઃ સુમના ભવ । પ્ર ણો યચ્છ ભુવસ્પતે ધનદા અસિ નસ્ત્વમ્ ॥ પ્ર ણો
યચ્છત્વર્યમા પ્ર ભગઃ પ્ર બૃહસ્પતિઃ । પ્ર દેવાઃ પ્રોત સૂનૃતા પ્ર
વાગ્દેવી દદાતુ નઃ ॥ અર્યમણં બૃહસ્પતિમિન્દ્રં દાનાય ચોદય । વાચં
વિષ્ણુꣳ સરસ્વતીꣳ સવિતારં

૪૨ ચ વાજિનમ્ ॥ સોમꣳ રાજાનં વરુણમગ્નિમન્વારભામહે । આદિત્યાન્,
વિષ્ણુꣳ સૂર્યં બ્રહ્માણં ચ બૃહસ્પતિમ્ ॥ દેવસ્ય ત્વા સવિતુઃ
પ્રસવેઽશ્વિનોર્બાહુભ્યાં પૂષ્ણો હસ્તાભ્યાꣳ સરસ્વત્યૈ વાચો
યન્તુર્યન્ત્રેણાગ્નેસ્ત્વા સામ્રાજ્યેનાભિષિઞ્ચામીન્દ્રસ્ય બૃહસ્પતેસ્ત્વા
સામ્રાજ્યેનાભિષિઞ્ચામિ ॥ રયિꣳ સવિતારꣳ ષટ્ત્રિꣳશચ્ચ ॥

૧। ૭। ૧૦॥

૪૩ અગ્નિરેકાક્ષરેણ વાચમુદજયદશ્વિનૌ દ્વ્યક્ષરેણ પ્રાણાપાનાવુદજયતાં
વિષ્ણુસ્ત્ર્યક્ષરેણ ત્રીન્ લોકાનુદજયત્ સોમશ્ચતુરક્ષરેણ
ચતુષ્પદઃ પશૂનુદજયત્ પૂષા પઞ્ચાક્ષરેણ પઙ્ક્તિમુદજયદ્ધાતા
ષડક્ષરેણ ષડૃતૂનુદજયન્મરુતઃ સપ્તાક્ષરેણ સપ્તપદાꣳ
શક્વરીમુદજયન્ બૃહસ્પતિરષ્ટાક્ષરેણ ગાયત્રીમુદજયન્મિત્રો
નવાક્ષરેણ ત્રિવૃતꣳ સ્તોમમુદજયદ્

૪૪ વરુણો દશાક્ષરેણ વિરાજમુદજયદિન્દ્ર
એકાદશાક્ષરેણ ત્રિષ્ટુભમુદજયદ્વિશ્વે દેવા દ્વાદશાક્ષરેણ
જગતીમુદજયન્વસવસ્ત્રયોદશાક્ષરેણ ત્રયોદશꣳ સ્તોમમુદજયન્
રુદ્રાશ્ચતુર્દશાક્ષરેણ ચતુર્દશꣳ સ્તોમમુદજયન્નાદિત્યાઃ પઞ્ચદશાક્ષરેણ

પઞ્ચદશગ્ગ્ં સ્તોમમુદજયન્નદિતિષ્ષોડશાક્ષરેણ ષોડશગ્ગ્ં
સ્તોમમુદજયત્ પ્રજાપતિઃ સપ્તદશાક્ષરેણ સપ્તદશગ્ગ્ં સ્તોમમુદજયત્ ॥
ત્રિવૃતગ્ગ્ં સ્તોમમુદજયત્ ષટ્ચત્વારિꣳ શચ્ચ ॥ ૧। ૭। ૧૧॥
૪૫ ઉપયામગૃહીતોઽસિ નૃષદં ત્વા દ્રુષદં ભુવનસદમિન્દ્રાય
જુષ્ટં ગૃહ્ણામ્યેષ તે યોનિરિન્દ્રાય ત્વોપયામગૃહીતોઽસ્યપ્સુષદં ત્વા
ઘૃતસદં વ્યોમસદમિન્દ્રાય જુષ્ટં ગૃહ્ણામ્યેષ તે યોનિરિન્દ્રાય
ત્વોપયામગૃહીતોઽસિ પૃથિવિષદં ત્વાઽન્તરિક્ષસદં નાકસદમિન્દ્રાય
જુષ્ટં ગૃહ્ણામ્યેષ તે યોનિરિન્દ્રાય ત્વા ॥ યે ગ્રહાઃ પઞ્ચજનીના યેષાં
તિસ્રઃ પરમજાઃ । દૈવ્યઃ કોશઃ
૪૬ સમુબ્જિતઃ । તેષાં વિશિપ્રિયાણામિષમૂર્જꣳ સમગ્રભીમેષ તે
યોનિરિન્દ્રાય ત્વા ॥ અપાꣳ રસમુદ્વયસꣳ સૂર્યરશ્મિꣳ સમાભૃતમ્
। અપાꣳ રસસ્ય યો રસસ્તં વો ગૃહ્ણામ્યુત્તમમેષ તે યોનિરિન્દ્રાય
ત્વા ॥ અયા વિષ્ઠા જનયન્ કર્વરાણિ સ હિ ઘૃણિરુરુર્વરાય ગાતુઃ ।
સ પ્રત્યુદૈદ્ધરુણો મધ્વો અગ્રગ્ગ્ં સ્વાયાં યત્તનુવાં તનૂમૈરયત ।
ઉપયામગૃહીતોઽસિ પ્રજાપતયે ત્વા જુષ્ટં ગૃહ્ણામ્યેષ તે યોનિઃ
પ્રજાપતયે ત્વા ॥ કોશસ્તનુવાં ત્રયોદશ ચ ॥ ૧। ૭। ૧૨॥
૪૭ અન્વહ માસા અન્વિદ્વનાન્યન્વોષધીરનુ પર્વતાસઃ । અન્વિન્દ્રꣳ રોદસી
વાવશાને અન્વાપો અજિહત જાયમાનમ્ ॥ અનુ તે દાયિ મહ ઇન્દ્રિયાય સત્રા તે
વિશ્વમનુ વૃત્રહત્યે । અનુ ક્ષત્રમનુ સહો યજત્રેન્દ્ર દેવેભિરનુ
તે નૃષહ્યે ॥ ઇન્દ્રાણીમાસુ નારિષુ સુપત્નીમહમશ્રવમ્ । ન હ્યસ્યા
અપરં ચન જરસા
૪૮ મરતે પતિઃ ॥ નાહમિન્દ્રાણિ રારણ સખ્યુર્વૃષાકપેર્ ઋતે ।
યસ્યેદમપ્યꣳ હવિઃ પ્રિયં દેવેષુ ગચ્છતિ ॥ યો જાત એવ પ્રથમો
મનસ્વાન્ દેવો દેવાન્ ક્રતુના પર્યભૂષત્ । યસ્ય શુષ્માદ્રોદસી અભ્યસેતાં
નૃમ્ણસ્ય મહ્ના સ જનાસ ઇન્દ્રઃ ॥ આ તે મહ ઇન્દ્રોત્યુગ્ર સમન્યવો
યત્ સમરન્ત સેનાઃ । પતાતિ દિદ્યુન્નર્યસ્ય બાહુવોર્મા તે
૪૯ મનો વિષ્વદ્રિયગ્વિચારીત્ ॥ મા નો મર્ધીરા ભરા દદ્ધિ તન્નઃ પ્ર

દાશુષે દાતવે ભૂરિ યત્ તે । નવ્યે દેષ્ણે શસ્તે અસ્મિન્ ત ઉક્થે પ્ર
બ્રવામ વયમિન્દ્ર સ્તુવન્તઃ ॥ આ તૂ ભર માકિરેતત્ પરિષ્ઠાદ્વિદ્મા
હિ ત્વા વસુપતિં વસૂનામ્ । ઇન્દ્ર યત્ તે માહિનં દત્રમસ્ત્યસ્મભ્યં
તદ્ધર્યશ્વ
૫૦ પ્ર યન્ધિ ॥ પ્રદાતારꣳ હવામહ ઇન્દ્રમા હવિષા વયમ્ । ઉભા
હિ હસ્તા વસુના પૃણસ્વાઽઽપ્ર યચ્છ દક્ષિણાદોત સવ્યાત્ ॥ પ્રદાતા
વજ્રી વૃષભસ્તુરાષાટ્છુષ્મી રાજા વૃત્રહા સોમપાવા । અસ્મિન્,
યજ્ઞે બર્હિષ્યા નિષદ્યાથા ભવ યજમાનાય શં યોઃ ॥ ઇન્દ્રઃ સુત્રામા
સ્વવાꣳ અવોભિઃ સુમૃડીકો ભવતુ વિશ્વવેદાઃ । બાધતાં દ્વેષો
અભયં કૃણોતુ સુવીર્યસ્ય
૫૧ પતયઃ સ્યામ ॥ તસ્ય વયꣳ સુમતૌ યજ્ઞિયસ્યાપિ ભદ્રે સૌમનસે
સ્યામ । સ સુત્રામા સ્વવાꣳ ઇન્દ્રો અસ્મે આરાચ્ચિદ્દ્વેષઃ સનુતર્યુયોતુ
॥ રેવતીર્નઃ સધમાદ ઇન્દ્રે સન્તુ તુવિવાજાઃ । ક્ષુમન્તો યાભિર્મદેમ ॥
પ્રોષ્વસ્મૈ પુરોરથમિન્દ્રાય શૂષમર્ચત । અભીકે ચિદુ લોકકૃત્ સઙ્ગે
સમત્સુ વૃત્રહા । અસ્માકં બોધિ ચોદિતા નભન્તામન્યકેષામ્ । જ્યાકા
અધિ ધન્વસુ ॥ જરસા મા તે હર્યશ્વ સુવીર્યસ્યાધ્યેકં ચ ॥ ૧। ૭। ૧૩॥

પાકયજ્ઞꣳ સગ્ગ્ શ્રવાઃ પરોક્ષં બર્હિષોહં ધ્રુવામગન્મેત્યાહ
દેવ સવિતર્દેવસ્યાહં ક્ષત્રસ્યોલ્બં વાજસ્યેમમગ્નિરેકાક્ષરેણોઽપયામ
ગૃહીતોઽસ્યન્વહ માસાસ્ત્રયોદશ ॥

પાકયજ્ઞં પરોક્ષં ધ્રુવાં વિ સૃજતે ચ નઃ સર્વવીરાં પતયઃ
સ્યામૈક પંચાશત્ ॥

પાકયજ્ઞં ધન્વસુ ॥

## પ્રથમકાણ્ડે અષ્ટમઃ પ્રશ્નઃ ૮

૧ અનુમત્યૈ પુરોડાશમષ્ટાકપાલં નિર્વપતિ ધેનુર્દક્ષિણા યે
પ્રત્યઞ્ચઃ શમ્યાયા અવશીયન્તે તન્નૈરૃતમેકકપાલં કૃષ્ણં

વાસઃ કૃષ્ણતૂષં દક્ષિણા વીહિ સ્વાહાઽઽહુતિં જુષાણ એષ
તે નિરૃતે ભાગો ભૂતે હવિષ્મત્યસિ મુઞ્ચેમમꣳહસઃ સ્વાહા
નમો ય ઇદં ચકારાઽઽદિત્યં ચરું નિર્વપતિ વરો દક્ષિણા
ઽઽગ્નાવૈષ્ણવમેકાદશકપાલં વામનો વહી દક્ષિણાઽગ્નીષોમીયમે
૨ કાદશકપાલꣳ હિરણ્યં દક્ષિણૈન્દ્રમેકાદશકપાલમૃષભો વહી
દક્ષિણાઽઽગ્નેયમષ્ટાકપાલમૈન્દ્રં દધ્યૃષભો વહી દક્ષિણૈન્દ્રાગ્નં
દ્વાદશકપાલં વૈશ્વદેવં ચરું પ્રથમજો વત્સો દક્ષિણા સૌમ્યગ્ગ્
શ્યામાકં ચરું વાસો દક્ષિણા સરસ્વત્યૈ ચરુꣳ સરસ્વતે ચરું
મિથુનૌ ગાવૌ દક્ષિણા ॥ અગ્નીષોમીયં ચતુસ્ત્રિꣳશચ્ચ ॥ ૧। ૮। ૧॥
૩ આગ્નેયમષ્ટાકપાલં નિર્વપતિ સૌમ્યં ચરુꣳ સાવિત્રં
દ્વાદશકપાલꣳ સારસ્વતં ચરું પૌષ્ણં ચરું મારુતꣳ સપ્તકપાલં
વૈશ્વદેવીમામિક્ષાં દ્યાવાપૃથિવ્યમેકકપાલમ્ ॥ આગ્નેયꣳ સૌમ્યં
મારુતમષ્ટાદશ ॥ ૧। ૮। ૨॥
૪ ઐન્દ્રાગ્નમેકાદશકપાલં મારુતીમામિક્ષાં વારુણીમામિક્ષાં કાયમેકકપાલં
પ્રઘાસ્યાન્ હવામહે મરુતો યજ્ઞવાહસઃ કરમ્ભેણ સજોષસઃ ॥ મો ષૂ ણ
ઇન્દ્ર પૃત્સુ દેવાસ્તુ સ્મ તે શુષ્મિન્નવયા । મહી હ્યસ્ય મીઢુષો યવ્યા
। હવિષ્મતો મરુતો વન્દતે ગીઃ ॥ યદ્ ગ્રામે યદરણ્યે યત્ સભાયાં
યદિન્દ્રિયે । યચ્છૂદ્રે યદર્યે એનશ્ચકૃમા વયમ્ । યદેકસ્યાધિ
ધર્મણિ તસ્યાવયજનમસિ સ્વાહા ॥ અક્રન્ કર્મ કર્મકૃતઃ સહ
વાચા મયો ભુવા । દેવેભ્યઃ કર્મ કૃત્વાઽસ્તં પ્રેત સુદાનવઃ ॥ વયં
યદ્ધિꣳશતિશ્ચ ॥ ૧। ૮। ૩॥
૫ અગ્નયેઽનીકવતે પુરોડાશમષ્ટાકપાલં નિર્વપતિ સાકꣳ સૂર્યેણોદ્યતા
મરુદ્ભ્યઃ સાન્તપનેભ્યો મધ્યંદિને ચરું મરુદ્ભ્યો ગૃહમેધિભ્યઃ
સર્વાસાં દુગ્ધે સાયં ચરુમ્ પૂર્ણા દર્વિ પરા પત સુપૂર્ણા પુનરાપત ।
વસ્નેવ વિ ક્રીણાવહા ઇષમૂર્જꣳશતક્રતો ॥ દેહિ મે દદામિ તે નિ મે
ધેહિ નિ તે દધે । નિહારમિન્નિ મે હરા નિહારં
૬ નિ હરામિ તે ॥ મરુદ્ભ્યઃ ક્રીડિભ્યઃ પુરોડાશꣳસપ્તકપાલં

નિર્વપતિ સાકꣳ સૂર્યેણોદ્યતાગ્નેયમષ્ટાકપાલં નિર્વપતિ સૌમ્યં
ચરુꣳ સાવિત્રં દ્વાદશકપાલꣳ સારસ્વતં ચરું પૌષ્ણં
ચરુમૈન્દ્રાગ્નમેકાદશકપાલમૈન્દ્રં ચરું વૈશ્વકર્મણમેકકપાલમ્ ॥
હરા નિહારં ત્રિꣳશચ્ચ ॥ ૧। ૮। ૪॥
૭ સોમાય પિતૃમતે પુરોડાશꣳ ષટ્કપાલં નિર્વપતિ પિતૃભ્યો
બર્હિષદ્ભ્યો ધાનાઃ પિતૃભ્યોઽગ્નિષ્વાત્તેભ્યોઽભિવાન્યાયૈ દુગ્ધે મન્થ
મેતત્ તે તત યે ચ ત્વામન્વેતત્ તે પિતામહ પ્રપિતામહ યે ચ ત્વામન્વત્ર
પિતરો યથાભાગં મન્દધ્વꣳ સુસંદૃશં ત્વા વયં મઘવન્ મન્દિષીમહિ
। પ્ર નૂનં પૂર્ણવન્ધુરઃ સ્તુતો યાસિ વશાꣳ અનુ । યોજા ન્વિન્દ્ર તે
હરી ॥
૮ અક્ષન્નમીમદન્ત હ્યવ પ્રિયા અધૂષત । અસ્તોષત સ્વભાનવો વિપ્રા
નવિષ્ઠયા મતી । યોજા ન્વિન્દ્ર તે હરી ॥ અક્ષન્ પિતરોઽમીમદન્ત
પિતરોઽતીતૃપન્ત પિતરોઽમીમૃજન્ત પિતરઃ ॥ પરેત પિતરઃ સોમ્યા
ગમ્ભીરૈઃ પથિભિઃ પૂર્વ્યૈઃ । અથા પિતૄન્થ્સુવિદત્રાꣳ અપીત
યમેન યે સધમાદં મદન્તિ ॥ મનો ન્વા હુવામહે નારાશꣳસેન
સ્તોમેન પિતૃણાં ચ મન્મભિઃ ॥ આ
૯ ન એતુ મનઃ પુનઃ ક્રત્વે દક્ષાય જીવસે । જ્યોક્ ચ સૂર્યં દૃશે ॥
પુનર્નઃ પિતરો મનો દદાતુ દૈવ્યો જનઃ । જીવં વ્રાતꣳસચેમહિ ॥
યદન્તરિક્ષં પૃથિવીમુત દ્યાં યન્માતરં પિતરં વા જિહિꣳસિમ ।
અગ્નિર્મા તસ્માદેનસો ગાર્હપત્યઃ પ્ર મુઞ્ચતુ દુરિતા યાનિ ચકૃમ
કરોતુ મામનેનસમ્ ॥ હરી મન્મભિરા ચતુશ્ચત્વારિꣳશચ્ચ ॥ ૧। ૮। ૫॥
૧૦ પ્રતિપૂરુષમેકકપાલાન્નિર્વપત્યેકમતિરિક્તં યાવન્તો ગૃહ્યાઃ
સ્મસ્તેભ્યઃ કમકરં પશૂનાꣳ શર્માસિ શર્મ યજમાનસ્ય શર્મ
મે યચ્છૈક એવ રુદ્રો ન દ્વિતીયાય તસ્થ આખુસ્તે રુદ્ર પશુસ્તં
જુષસ્વૈષ તે રુદ્ર ભાગઃ સહ સ્વસ્રાઽમ્બિકયા તં જુષસ્વ ભેષજં
ગવેઽશ્વાય પુરુષાય ભેષજમથો અસ્મભ્યં ભેષજꣳ સુભેષજં

૧૧ યથાઽસતિ । સુગં મેષાય મેષ્યા અવામ્બ રુદ્રમદિમહ્યવ દેવં
ત્ર્યમ્બકમ્ । યથા નઃ શ્રેયસઃ કરદ્યથા નો વસ્યસઃ કરદ્યથા
નઃ પશુમતઃ કરદ્યથા નો વ્યવસાયયાત્ ॥ ત્ર્યમ્બકં યજામહે સુગન્ધિં
પુષ્ટિવર્ધનમ્ । ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય
માઽમૃતાત્ ॥ એષ તે રુદ્ર ભાગસ્તં જુષસ્વ તેનાવસેન પરો
મૂજવતોઽતીહ્યવતતધન્વા પિનાકહસ્તઃ કૃત્તિવાસાઃ ॥ સુભેષજમિહિ
ત્રીણિ ચ ॥ ૧। ૮। ૬॥

૧૨ ઐન્દ્રાગ્નં દ્વાદશકપાલં વૈશ્વદેવં ચરુમિન્દ્રાય શુનાસીરાય
પુરોડાશં દ્વાદશકપાલં વાયવ્યં પયઃ સૌર્યમેકકપાલં દ્વાદશગવઁ
સીરં દક્ષિણા ઽઽગ્નેયમષ્ટાકપાલં નિર્વપતિ રૌદ્રં ગાવીધુકં
ચરુમૈન્દ્રં દધિ વારુણં યવમયં ચરું વહિની ધેનુર્દક્ષિણા
યે દેવાઃ પુરઃસદોઽગ્નિનેત્રા દક્ષિણસદો યમનેત્રાઃ પશ્ચાથ્સદઃ
સવિતૃનેત્રા ઉત્તરસદો વરુણનેત્રા ઉપરિષદો બૃહસ્પતિનેત્રા
રક્ષોહણસ્તે નઃ પાન્તુ તે નોઽવન્તુ તેભ્યો

૧૩ નમસ્તેભ્યઃ સ્વાહા સમૂઢઁ રક્ષઃ સંદગ્ધઁ રક્ષ
ઇદમહઁ રક્ષોઽભિ સં દહામ્યગ્નયે રક્ષોઘ્ને સ્વાહા યમાય
સવિત્રે વરુણાય બૃહસ્પતયે દુવસ્વતે રક્ષોઘ્ને સ્વાહા પ્રષ્ટિવાહી
રથો દક્ષિણા દેવસ્ય ત્વા સવિતુઃ પ્રસવેઽશ્વિનોર્બાહુભ્યાં પૂષ્ણો
હસ્તાભ્યાઁ રક્ષસો વધં જુહોમિ હતઁ રક્ષોઽવધિષ્મ રક્ષો
યદ્વસ્તે તદ્દક્ષિણા ॥ તેભ્યઃ પઞ્ચચત્વારિઁશચ્ચ ॥ ૧। ૮। ૭॥

૧૪ ધાત્રે પુરોડાશં દ્વાદશકપાલં નિર્વપત્યનુમત્યૈ ચરુઁ
રાકાયૈ ચરુઁ સિનીવાલ્યૈ ચરું કુહ્વૈ ચરું મિથુનૌ ગાવૌ
દક્ષિણાઽઽગ્નાવૈષ્ણવમેકાદશ કપાલં નિર્વપત્યૈન્દ્રાવૈષ્ણવમેકાદશ કપાલં
વૈષ્ણવં ત્રિકપાલં વામનો વહી દક્ષિણાઽગ્નીષોમીયમેકાદશકપાલં
નિર્વપતીન્દ્રાસોમીયમેકાદશકપાલઁ સૌમ્યં ચરું બભ્રુર્દક્ષિણા
સોમાપૌષ્ણં ચરું નિર્વપત્યૈન્દ્રાપૌષ્ણં ચરું પૌષ્ણં ચરુગ્ગ્ શ્યામો
દક્ષિણા વૈશ્વાનરં દ્વાદશકપાલં નિર્વપતિ હિરણ્યં દક્ષિણા વારુણં

યવમયં ચરુમશ્વો દક્ષિણા ॥ વૈશ્વાનરં દ્વાદશકપાલં નિરષ્ટૌ
ચ ॥ ૧। ૮। ૮॥

૧૫ બાર્હસ્પત્યં ચરું નિર્વપતિ બ્રહ્મણો ગૃહે શિતિપૃષ્ઠો
દક્ષિણૈન્દ્રમેકાદશકપાલꣳ રાજન્યસ્ય ગૃહ ઋષભો
દક્ષિણાઽઽદિત્યં ચરું મહિષ્યૈ ગૃહે ધેનુર્દક્ષિણા નૈરૃતં ચરું
પરિવૃક્ત્યૈ ગૃહે કૃષ્ણાનાં વ્રીહીણાં નખનિર્ભિન્નં કૃષ્ણા કૂટા
દક્ષિણાઽઽગ્નેયમષ્ટાકપાલꣳ સેનાન્યો ગૃહે હિરણ્યં દક્ષિણા
વારુણં દશકપાલꣳ સૂતસ્ય ગૃહે મહાનિરષ્ટો દક્ષિણા મારુતꣳ
સપ્તકપાલં ગ્રામણ્યો ગૃહે પૃશ્ઞિર્દક્ષિણા સાવિત્રં દ્વાદશકપાલં

૧૬ ક્ષત્તુર્ગૃહ ઉપધ્વસ્તો દક્ષિણાઽઽશ્વિનં દ્વિકપાલꣳ
સંગ્રહીતુર્ગૃહે સવાત્યૌ દક્ષિણા પૌષ્ણં ચરું ભાગદુઘસ્ય
ગૃહે શ્યામો દક્ષિણા રૌદ્રં ગાવીધુકં ચરુમક્ષાવાપસ્ય ગૃહે
શબલ ઉદ્વારો દક્ષિણેન્દ્રાય સુત્રામ્ણે પુરોડાશમેકાદશકપાલં
પ્રતિ નિર્વપતીન્દ્રાયાꣳ હોમુચેઽયં નો રાજા વૃત્રહા રાજા ભૂત્વા
વૃત્રં વધ્યાન્મૈત્રાબાર્હસ્પત્યં ભવતિ શ્વેતાયૈ શ્વેતવત્સાયૈ દુગ્ધે
સ્વયંમૂર્તે સ્વયંમથિત આજ્ય આશ્વત્થે

૧૭ પાત્રે ચતુઃસ્રક્તૌ સ્વયમવપન્નાયૈ શાખાયૈ કર્ણાગ્શ્ચાઽકર્ણાગ્શ્ચ
તણ્ડુલાન્, વિ ચિનુયાદ્યે કર્ણાઃ સ પયસિ બાર્હસ્પત્યો યેઽકર્ણાઃ સ આજ્યે
મૈત્રઃ સ્વયંકૃતા વેદિર્ભવતિ સ્વયંદિનં બર્હિઃ સ્વયંકૃત ઇધ્મઃ
સૈવ શ્વેતા શ્વેતવત્સા દક્ષિણા ॥ સાવિત્રં દ્વાદશકપાલમાશ્વત્થે
ત્રયસ્ત્રિꣳશચ્ચ ॥ ૧। ૮। ૯॥

૧૮ અગ્નયે ગૃહપતયે પુરોડાશમષ્ટાકપાલં નિર્વપતિ
કૃષ્ણાનાં વ્રીહીણાꣳ સોમાય વનસ્પતયે શ્યામાકં ચરુꣳ
સવિત્રે સત્યપ્રસવાય પુરોડાશં દ્વાદશકપાલમાશૂનાં વ્રીહીણાꣳ
રુદ્રાય પશુપતયે ગાવીધુકં ચરું બૃહસ્પતયે વાચસ્પતયે નૈવારં
ચરુમિન્દ્રાય જ્યેષ્ઠાય પુરોડાશમેકાદશકપાલં મહાવ્રીહીણાં મિત્રાય
સત્યાયાઽઽમ્બાનાં ચરું વરુણાય ધર્મપતયે યવમયં ચરુꣳ સવિતા

ત્વા પ્રસવાના ઁસુવતામગ્નિર્ગૃહપતીના ઁ સોમો વનસ્પતીના ઁ
રુદ્રઃ પશૂનાં
૧૯ બૃહસ્પતિર્વાચામિન્દ્રો જ્યેષ્ઠાનાં મિત્રઃ સત્યાનાં વરુણો
ધર્મપતીનાં યે દેવા દેવસુવઃ સ્થ ત ઇમમામુષ્યાયણમનમિત્રાય
સુવધ્વં મહતે ક્ષત્રાય મહત આધિપત્યાય મહતે જાનરાજ્યાયૈષ
વો ભરતા રાજા સોમોઽસ્માકં બ્રાહ્મણાના ઁ રાજા પ્રતિ ત્યન્નામ
રાજ્યમધાયિ સ્વાં તનુવં વરુણો અશિશ્રેચ્છુચેર્મિત્રસ્ય વ્રત્યા
અભૂમામન્મહિ મહત ઋતસ્ય નામ સર્વે વ્રાતા વરુણસ્યાભૂવન્વિ મિત્ર
એવૈરરાતિમતારીદસૂષુદન્ત યજ્ઞિયા ઋતેન વ્યુ ત્રિતો જરિમાણં
ન આનડ્ વિષ્ણોઃ ક્રમોઽસિ વિષ્ણોઃ ક્રાન્તમસિ વિષ્ણોર્વિક્રાન્તમસિ ॥

પશૂનાં વ્રાતાઃ પઞ્ચવિ ઁ શતિશ્ચ ॥ ૧। ૮। ૧૦॥

૨૦ અર્થેતઃ સ્થાઽપાં પતિરસિ વૃષાસ્યૂર્મિર્વૃષસેનોઽસિ
વ્રજક્ષિતઃ સ્થ મરુતામોજઃ સ્થ સૂર્યવર્ચસઃ સ્થ સૂર્યત્વચસઃ
સ્થ માન્દાઃ સ્થ વાશાઃ સ્થ શક્વરીઃ સ્થ વિશ્વભૃતઃ
સ્થ જનભૃતઃ સ્થાઽગ્નેસ્તેજસ્યાઃ સ્થાઽપામોષધીના ઁ
રસસ્સ્થાઽપો દેવીર્મધુમતીરગૃહ્ણન્નૂર્જસ્વતી રાજસૂયાય ચિતાનાઃ ।
યાભિર્મિત્રાવરુણાવભ્યષિઞ્ચન્ યાભિરિન્દ્રમનયન્નત્યરાતીઃ ॥
રાષ્ટ્રદાઃ સ્થ રાષ્ટ્રં દત્ત સ્વાહા રાષ્ટ્રદાઃ સ્થ રાષ્ટ્રમમુષ્મૈ
દત્ત ॥ અત્યેકાદશ ચ ॥ ૧। ૮। ૧૧॥

૨૧ દેવીરાપઃ સં મધુમતીર્મધુમતીભિઃ સૃજ્યધ્વં મહિ વર્ચઃ,
ક્ષત્રિયાય વન્વાના અનાધૃષ્ટાઃ સીદતોર્જસ્વતીર્મહિ વર્ચઃ, ક્ષત્રિયાય
દધતીરનિભૃષ્ટમસિ વાચો બન્ધુસ્તપોજાઃ સોમસ્ય દાત્રમસિ શુક્રા વઃ
શુક્રેણોત્પુનામિ ચન્દ્રાશ્ચન્દ્રેણામૃતા અમૃતેન સ્વાહા રાજસૂયાય
ચિતાનાઃ ॥ સધમાદો દ્યુમ્નિનીરૂર્જ એતા અનિભૃષ્ટા અપસ્યુવો વસાનઃ ।
પસ્ત્યાસુ ચક્રે વરુણઃ સધસ્થમપા ઁ શિશુ
૨૨ ર્માતૃતમાસ્વન્તઃ ॥ ક્ષત્રસ્યોલ્બમસિ ક્ષત્રસ્ય યોનિરસ્યાવિન્નો
અગ્નિર્ગૃહપતિરાવિન્ન ઇન્દ્રો વૃદ્ધશ્રવા આવિન્નઃ પૂષા વિશ્વવેદા

આવિન્નૌ મિત્રાવરુણાવૃતાવૃધાવાવિન્ને દ્યાવાપૃથિવી ધૃતવ્રતે
આવિન્ના દેવ્યદિતિર્વિશ્વરૂપ્યા વિન્નોઽયમસાવામુષ્યાયણોઽસ્યાં વિશ્યસ્મિન્
રાષ્ટ્રે મહતે ક્ષત્રાય મહત આધિપત્યાય મહતે જાનરાજ્યાયૈષ વો
ભરતા રાજા સોમોઽસ્માકં બ્રાહ્મણાનાꣳ રાજેન્દ્રસ્ય
૨૩ વજ્રોઽસિ વાર્ત્રઘ્નસ્ત્વયાયં વૃત્રં વધ્યાચ્છત્રુબાધનાઃ
સ્થ પાત મા પ્રત્યઞ્ચં પાત મા તિર્યઞ્ચમન્વઞ્ચં મા પાત
દિગ્ભ્યો મા પાત વિશ્વાભ્યો મા નાષ્ટ્રાભ્યઃ પાત હિરણ્યવર્ણાવુષસાં
વિરોકેઽયઃ સ્થૂણાવુદિતૌ સૂર્યસ્યાઽઽરોહતં વરુણ મિત્ર ગર્તં
તતશ્ચક્ષાથામદિતિં દિતિં ચ ॥ શિશુરિન્દ્રસ્યૈકચત્વારિꣳશચ્ચ ॥

૧। ૮। ૧૨॥

૨૪ સમિધમા તિષ્ઠ ગાયત્રી ત્વા છન્દસામવતુ ત્રિવૃથ્ સ્તોમો રથન્તરꣳ
સામાગ્નિર્દેવતા બ્રહ્મ દ્રવિણ મુગ્રામા તિષ્ઠ ત્રિષ્ટુપ્ ત્વા છન્દસામવતુ
પઞ્ચદશઃ સ્તોમો બૃહથ્સામેન્દ્રો દેવતા ક્ષત્રં દ્રવિણં વિરાજમા
તિષ્ઠ જગતી ત્વા છન્દસામવતુ સપ્તદશઃ સ્તોમો વૈરૂપꣳ સામ
મરુતો દેવતા વિડ્દ્રવિણમુદીચીમા તિષ્ઠાનુષ્ટુપ્ ત્વા
૨૫ છન્દસામવત્વેકવિꣳશઃ સ્તોમો વૈરાજꣳ સામ મિત્રાવરુણૌ
દેવતા બલં દ્રવિણમૂર્ધ્વામા તિષ્ઠ પઙ્ક્તિસ્ત્વા છન્દસામવતુ
ત્રિણવત્રયસ્ત્રિꣳશૌ સ્તોમૌ શાક્વરરૈવતે સામની બૃહસ્પતિર્દેવતા
વર્ચો દ્રવિણમીદૃઙ્ ચાન્યાદૃઙ્ ચૈતાદૃઙ્ ચ પ્રતિદૃઙ્ ચ
મિતશ્ચ સંમિતશ્ચ સભરાઃ । શુક્રજ્યોતિશ્ચ ચિત્રજ્યોતિશ્ચ
સત્યજ્યોતિશ્ચ જ્યોતિષ્માગ્શ્ચ સત્યશ્ચર્તપાશ્ચા
૨૬ ઽત્યꣳહાઃ । અગ્નયે સ્વાહા સોમાય સ્વાહા સવિત્રે સ્વાહા સરસ્વત્યૈ
સ્વાહા પૂષ્ણે સ્વાહા બૃહસ્પતયે સ્વાહેન્દ્રાય સ્વાહા ઘોષાય
સ્વાહા શ્લોકાય સ્વાહાઽꣳશાય સ્વાહા ભગાય સ્વાહા ક્ષેત્રસ્ય
પતયે સ્વાહા પૃથિવ્યૈ સ્વાહાઽન્તરિક્ષાય સ્વાહા દિવે સ્વાહા સૂર્યાય
સ્વાહા ચન્દ્રમસે સ્વાહા નક્ષત્રેભ્યઃ સ્વાહાઽદ્ભ્યઃ સ્વાહૌષધીભ્યઃ
સ્વાહા વનસ્પતિભ્યઃ સ્વાહા ચરાચરેભ્યઃ સ્વાહા પરિપ્લવેભ્યઃ સ્વાહા

સરીસૃપેભ્યઃ સ્વાહા ॥ અનુષ્ટુપ્સ્વર્તપાશ્ચ સરીસૃપેભ્યઃ સ્વાહા ॥
૧। ૮। ૧૩॥

૨૭ સોમસ્ય ત્વિષિરસિ તવેવ મે ત્વિષિર્ભૂયાદમૃતમસિ મૃત્યોર્મા
પાહિ દિદ્યોન્મા પાહ્યવેષ્ટા દન્દશૂકા નિરસ્તં નમુચેઃ શિરઃ ॥ સોમો
રાજા વરુણો દેવા ધર્મસુવશ્ચ યે । તે તે વાચꣳસુવન્તાં તે તે
પ્રાણꣳ સુવન્તાં તે તે ચક્ષુઃ સુવન્તાં તે તે શ્રોત્રꣳસુવન્તાꣳ
સોમસ્ય ત્વા દ્યુમ્નેનાભિષિઞ્ચામ્યગ્ને

૨૮ સ્તેજસા સૂર્યસ્ય વર્ચસેન્દ્રસ્યેન્દ્રિયેણ મિત્રાવરુણયોર્વીર્યેણ
મરુતામોજસા ક્ષત્રાણાં ક્ષત્રપતિરસ્યતિ દિવસ્પાહિ
સમાવવૃત્રન્નધરાગુદીચીરહિં બુધ્નિયમનુ સંચરન્તીસ્તાઃ
પર્વતસ્ય વૃષભસ્ય પૃષ્ઠે નાવશ્ચરન્તિ સ્વસિચ ઇયાનાઃ ॥ રુદ્ર
યત્તે ક્રયી પરં નામ તસ્મૈ હુતમસિ યમેષ્ટમસિ । પ્રજાપતે ન
ત્વદેતાન્યન્યો વિશ્વા જાતાનિ પરિ તા બભૂવ । યત્કામાસ્તે જુહુમસ્તન્નો
અસ્તુ વયગ્ગ્ સ્યામ પતયો રયીણામ્ ॥ અગ્ને સ્તૈકાદશ ચ ॥ ૧। ૮। ૧૪॥

૨૯ ઇન્દ્રસ્ય વજ્રોઽસિ વાર્ત્રઘ્નસ્ત્વયાઽયં વૃત્રં
વધ્યાન્મિત્રાવરુણયોસ્ત્વા પ્રશાસ્ત્રોઃ પ્રશિષા યુનજ્મિ યજ્ઞસ્ય યોગેન
વિષ્ણોઃ ક્રમોઽસિ વિષ્ણોઃ ક્રાન્તમસિ વિષ્ણોર્વિક્રાન્તમસિ મરુતાં પ્રસવે
જેષમાપ્તં મનઃ સમહમિન્દ્રિયેણ વીર્યેણ પશૂનાં મન્યુરસિ તવેવ
મે મન્યુર્ભૂયાન્નમો માત્રે પૃથિવ્યૈ માઽહં માતરં પૃથિવીꣳ
હિꣳસિષં મા

૩૦ માં માતા પૃથિવી હિꣳસીદિયદસ્યાયુરસ્યાયુર્મે ધેહ્યૂર્ગસ્યૂર્જં
મે ધેહિ યુઙ્ઙસિ વર્ચોઽસિ વર્ચો મયિ ધેહ્યગ્નયે ગૃહપતયે સ્વાહા
સોમાય વનસ્પતયે સ્વાહેન્દ્રસ્ય બલાય સ્વાહા મરુતામોજસે સ્વાહા
હꣳસઃ શુચિષદ્વસુરન્તરિક્ષસદ્ધોતા વેદિષદતિથિર્દુરોણસત્ ।
નૃષદ્વરસદૃતસદ્વ્યોમસદબ્જા ગોજા ઋતજા અદ્રિજા ઋતં
બૃહત્ ॥ હિꣳસિષં મર્તજાસ્ત્રીણિ ચ ॥ ૧। ૮। ૧૫॥

૩૧ મિત્રોઽસિ વરુણોઽસિ સમહં વિશ્વૈર્દેવૈઃ, ક્ષત્રસ્ય નાભિરસિ

ક્ષત્રસ્ય યોનિરસિ સ્યોનામા સીદ સુષદામા સીદ મા ત્વા હિꣳસીન્મા મા
હિꣳસીન્નિષસાદ ધૃતવ્રતો વરુણઃ પસ્ત્યાસ્વા સામ્રાજ્યાય સુક્રતુર્બ્રહ્મા
3 ન્ ત્વꣳ રાજન્ બ્રહ્માઽસિ સવિતાઽસિ સત્યસવો બ્રહ્મા 3 ન્ ત્વꣳ રાજન્
બ્રહ્માઽસીન્દ્રોઽસિ સત્યૌજા

૩૨ બ્રહ્મા 3 ન્ ત્વꣳ રાજન્ બ્રહ્માઽસિ મિત્રોઽસિ સુશેવો બ્રહ્મા 3 ન્ ત્વꣳ
રાજન્ બ્રહ્માઽસિ વરુણોઽસિ સત્યધર્મેન્દ્રસ્ય વજ્રોઽસિ વાર્ત્રઘ્નસ્તેન
મે રધ્ય દિશોઽભ્યયꣳ રાજાઽભૂત્ સુશ્લોકા ૪ ં સુમઙ્ગલા ૪ ં સત્યરાજા
3 ન્ । અપાં નપ્ત્રે સ્વાહોર્જો નપ્ત્રે સ્વાહાઽગ્નયે ગૃહપતયે સ્વાહા ॥
સત્યૌજાશ્ચત્વારિꣳશચ્ચ ॥ ૧। ૮। ૧૬॥

૩૩ આગ્નેયમષ્ટાકપાલં નિર્વપતિ હિરણ્યં દક્ષિણા સારસ્વતં
ચરું વથ્સતરી દક્ષિણા સાવિત્રં દ્વાદશકપાલમુપધ્વસ્તો
દક્ષિણા પૌષ્ણં ચરુગ્ગ્ શ્યામો દક્ષિણા બાર્હસ્પત્યં ચરુꣳ
શિતિપૃષ્ઠો દક્ષિણૈન્દ્રમેકાદશકપાલમૃષભો દક્ષિણા વારુણં
દશકપાલં મહાનિરષ્ટો દક્ષિણા સૌમ્યં ચરું બભ્રુર્દક્ષિણા
ત્વાષ્ટ્રમષ્ટાકપાલꣳ શુણ્ઠો દક્ષિણા વૈષ્ણવં ત્રિકપાલં વામનો
દક્ષિણા ॥ આગ્નેયꣳ હિરણ્યꣳ સારસ્વતં દ્વિચત્વારિꣳશત્ ॥ ૧। ૮। ૧૭॥

૩૪ સદ્યો દીક્ષયન્તિ સદ્યઃ સોમં ક્રીણન્તિ પુણ્ડરિસ્રજાં પ્ર યચ્છતિ
દશભિર્વથ્સતરૈઃ સોમં ક્રીણાતિ દશપેયો ભવતિ શતં બ્રાહ્મણાઃ પિબન્તિ
સપ્તદશગ્ગ્ સ્તોત્રં ભવતિ પ્રાકાશાવધ્વર્યવે દદાતિ સ્રજમુદ્ગાત્રે
રુક્મꣳ હોત્રેઽશ્વં પ્રસ્તોતૃપ્રતિહર્તૃભ્યાં દ્વાદશ પષ્ઠૌહીર્બ્રહ્મણે
વશાં મૈત્રાવરુણાય ઋષભં બ્રાહ્મણાચ્છꣳસિને વાસસી
નેષ્ટાપોતૃભ્યાગ્ સ્થૂરિ યવાચિતમચ્છાવાકાયાનડ્વાહમગ્નીધે ભાર્ગવો
હોતા ભવતિ શ્રાયન્તીયં બ્રહ્મસામં ભવતિ વારવન્તીય મગ્નિષ્ટોમસામꣳ
સારસ્વતીરપો ગૃહ્ણાતિ ॥ વારવન્તીયં ચત્વારિ ચ ॥ ૧। ૮। ૧૮॥

૩૫ આગ્નેયમષ્ટાકપાલં નિર્વપતિ હિરણ્યં
દક્ષિણૈન્દ્રમેકાદશકપાલમૃષભો દક્ષિણા વૈશ્વદેવં ચરું પિશઙ્ગી
પષ્ઠૌહી દક્ષિણા મૈત્રાવરુણીમામિક્ષાં વશા દક્ષિણા બાર્હસ્પત્યં ચરુꣳ

શિતિપૃષ્ઠો દક્ષિણા ઽઽદિત્યાં મલ્હાં ગર્ભિણીમા લભતે મારુતીં
પૃશ્નિં પષ્ઠૌહીમશ્વિભ્યાં પૂષ્ણે પુરોડાશં દ્વાદશકપાલં
નિર્વપતિ સરસ્વતે સત્યવાચે ચરુꣳ સવિત્રે સત્યપ્રસવાય
પુરોડાશં દ્વાદશકપાલં તિસૃધન્વꣳ શુષ્કદૃતિર્દક્ષિણા ॥ આગ્નેયં
બાર્હસ્પત્યꣳ સપ્તચત્વારિꣳશત્ ॥ ૧। ૮। ૧૯॥

૩૬ આગ્નેયમષ્ટાકપાલં નિર્વપતિ સૌમ્યં ચરુꣳ સાવિત્રં દ્વાદશકપાલં
બાર્હસ્પત્યં ચરું ત્વાષ્ટ્રમષ્ટાકપાલં વૈશ્વાનરં દ્વાદશકપાલં
દક્ષિણો રથવાહનવાહો દક્ષિણા સારસ્વતં ચરું નિર્વપતિ પૌષ્ણં ચરું
મૈત્રં ચરું વારુણં ચરું ક્ષૈત્રપત્યં ચરુમાદિત્યં ચરુમુત્તરો
રથવાહનવાહો દક્ષિણા ॥ આગ્નેયꣳ સૌમ્યં બાર્હસ્પત્યં ચતુસ્ત્રિꣳશત્
॥ ૧। ૮। ૨૦॥

૩૭ સ્વાદ્વીં ત્વા સ્વાદુના તીવ્રાં તીવ્રેણામૃતામમૃતેન સૃજામિ
સꣳ સોમેન સોમોઽસ્યશ્વિભ્યાં પચ્યસ્વ સરસ્વત્યૈ પચ્યસ્વેન્દ્રાય
સુત્રામ્ણે પચ્યસ્વ પુનાતુ તે પરિસ્રુતꣳ સોમꣳ સૂર્યસ્ય દુહિતા
। વારેણ શશ્વતા તના ॥ વાયુઃ પૂતઃ પવિત્રેણ પ્રત્યઙ્ક્સોમો
અતિદ્રુતઃ । ઇન્દ્રસ્ય યુજ્યઃ સખા ॥ કુવિદઙ્ગ યવમન્તો યવં
ચિદ્યથા દાન્ત્યનુપૂર્વં વિયૂય । ઇહેહૈષાં કૃણુત ભોજનાનિ
યે બર્હિષો નમોવૃક્તિં ન જગ્મુઃ ॥ આશ્વિનં ધૂમ્રમા લભતે
સારસ્વતં મેષમૈન્દ્રમૃષભ મૈન્દ્રમેકાદશકપાલં નિર્વપતિ સાવિત્રં
દ્વાદશકપાલં વારુણં દશકપાલꣳ સોમપ્રતીકાઃ પિતરસ્તૃપ્ણુત વડબા
દક્ષિણા ॥ ભોજનાનિ ષડ્વિꣳશતિશ્ચ ॥ ૧। ૮। ૨૧॥

૩૮ અગ્નાવિષ્ણૂ મહિ તદ્વાં મહિત્વં વીતં ઘૃતસ્ય ગુહ્યાનિ નામ
। દમેદમે સપ્ત રત્ના દધાના પ્રતિ વાં જિહ્વા ઘૃતમા ચરણ્યેત્
॥ અગ્નાવિષ્ણૂ મહિ ધામ પ્રિયં વાં વીથો ઘૃતસ્ય ગુહ્યા જુષાણા ।
દમેદમે સુષ્ટુતીર્વાવૃધાના પ્રતિ વાં જિહ્વા ઘૃતમુચ્ચરણ્યેત્ ॥ પ્ર
ણો દેવી સરસ્વતી વાજેભિર્વાજિનીવતી । ધીનામવિત્ર્યવતુ । આ નો
દિવો બૃહતઃ

૩૯ પર્વતાદા સરસ્વતી યજતા ગન્તુ યજ્ઞમ્ । હવં દેવી જુજુષાણા
ઘૃતાચી શગ્માં નો વાચમુશતી શૃણોતુ ॥ બૃહસ્પતે જુષસ્વ નો
હવ્યાનિ વિશ્વદેવ્ય । રાસ્વ રત્નાનિ દાશુષે ॥ એવા પિત્રે વિશ્વદેવાય
વૃષ્ણે યજ્ઞૈર્વિધેમ નમસા હવિર્ભિઃ । બૃહસ્પતે સુપ્રજા
વીરવન્તો વયગ્ગ્ સ્યામ પતયો રયીણામ્ ॥ બૃહસ્પતે અતિ યદર્યો
અર્હાદ્દ્યુમદ્વિભાતિ ક્રતુમજ્જનેષુ । યદ્દીદયચ્છવસ
૪૦ ર્તપ્રજાત તદસ્માસુ દ્રવિણં ધેહિ ચિત્રમ્ ॥ આ નો મિત્રાવરુણા
ઘૃતૈર્ગવ્યૂતિમુક્ષતમ્ । મધ્વા રજાꣳસિ સુક્રતૂ ॥ પ્ર બાહવા સિસૃતં
જીવસે ન આ નો ગવ્યૂતિમુક્ષતં ઘૃતેન । આ નો જને શ્રવયતં યુવાના
શ્રુતં મે મિત્રાવરુણા હવેમા ॥ અગ્નિં વઃ પૂર્વ્યં ગિરા દેવમીડે વસૂનામ્
। સપર્યન્તઃ પુરુપ્રિયં મિત્રં ન ક્ષેત્રસાધસમ્ ॥ મક્ષૂ દેવવતો
રથઃ
૪૧ શૂરો વા પૃત્સુ કાસુ ચિત્ । દેવાનાં ય ઇન્મનો યજમાન
ઇયક્ષત્યભીદયજ્વનો ભુવત્ ॥ ન યજમાન રિષ્યસિ ન સુન્વાન ન દેવયો
॥ અસદત્ર સુવીર્યમુત ત્યદાશ્વશ્વિયમ્ ॥ નકિષ્ટં કર્મણા નશન્ન
પ્ર યોષન્ન યોષતિ ॥ ઉપ ક્ષરન્તિ સિન્ધવો મયોભુવ ઈજાનં ચ
યક્ષ્યમાણં ચ ધેનવઃ । પૃણન્તં ચ પપુરિં ચ
૪૨ શ્રવસ્યવો ઘૃતસ્ય ધારા ઉપ યન્તિ વિશ્વતઃ ॥ સોમારુદ્રા વિ
વૃહતં વિષૂચીમમીવા યા નો ગયમાવિવેશ । આરે બાધેથાં
નિરૃતિં પરાચૈઃ કૃતં ચિદેનઃ પ્રમુમુક્તમસ્મત્ ॥ સોમારુદ્રા
યુવમેતાન્યસ્મે વિશ્વા તનૂષુ ભેષજાનિ ધત્તમ્ । અવ સ્યતં મુઞ્ચતં
યન્નો અસ્તિ તનૂષુ બદ્ધં કૃતમેનો અસ્મત્ ॥ સોમાપૂષણા જનના
રયીણાં જનના દિવો જનના પૃથિવ્યાઃ । જાતૌ વિશ્વસ્ય ભુવનસ્ય ગોપૌ
દેવા અકૃણ્વન્નમૃતસ્ય નાભિમ્ ॥ ઇમૌ દેવૌ જાયમાનૌ જુષન્તેમૌ
તમાꣳસિ ગૂહતામજુષ્ટા । આભ્યામિન્દ્રઃ પક્વમામાસ્વન્તઃ સોમાપૂષભ્યાં
જનદુસ્રિયાસુ ॥ બૃહતઃ શવસા રથઃ પપુરિં ચ દિવો જનના
પઞ્ચવિꣳશતિશ્ચ ॥ ૧। ૮। ૨૨॥

અનુમત્યા આગ્નેયમૈંદ્રાગ્નમગ્નયે સોમાય પ્રતિ પૂરુષમૈંદ્રાગ્નં

ધાત્રે બાર્હસ્પત્યમગ્નયે ગૃહપતયેઽર્થેતો દેવીઃ સમિધ ઁ

સોમસ્યેંદ્રસ્ય મિત્ર આગ્નેય ઁ સદ્ય આગ્નેય ઁ હિરણ્યમાગ્નેયર ઁ

સ્વાદ્વીં ત્વાગ્નાવિષ્ણૂ દ્વાવિ ઁશતિઃ ॥

અનુમત્યૈ યથાસતિ દેવીરાપો મિત્રોસિ શૂરો વા દ્વિચત્વારિ ઁ શત્ ॥

અનુમત્યા ઉસ્રિયાસુ ॥

ઇતિ પ્રથમં કાણ્ડં સંપૂર્ણમ્ ॥

॥ તૈત્તિરીય-સંહિતા ॥

# તૈત્તિરીય-સંહિતા

## ॥ દ્વિતીયં કાણ્ડમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

### દ્વિતીયકાણ્ડે પ્રથમઃ પ્રશ્નઃ ૧

૧ વાયવ્યગ્ં શ્વેતમા લભેત ભૂતિકામો વાયુર્વૈ ક્ષેપિષ્ઠા દેવતા
વાયુમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવૈનં ભૂતિં ગમયતિ
ભવત્યેવાતિક્ષિપ્રા દેવતેત્યાહુઃ સૈનમીશ્વરા પ્રદહ ઇત્યેતમેવ
સન્તં વાયવે નિયુત્વત આ લભેત નિયુદ્વા અસ્ય ધૃતિર્ધૃત એવ
ભૂતિમુપૈત્યપ્રદાહાય ભવત્યેવ
૨ વાયવે નિયુત્વત આ લભેત ગ્રામકામો વાયુર્વા ઇમાઃ પ્રજા નસ્યોતા
નેનીય તે વાયુમેવ નિયુત્વન્તગ્ં સ્વેન ભાગધેયેનોપધાવતિ સ
એવાસ્મૈ પ્રજા નસ્યોતા નિયચ્છતિ ગ્રામ્યેવ ભવતિ નિયુત્વ તે ભવતિ
ધ્રુવા એવાસ્મા અનપગાઃ કરોતિ વાયવે નિયુત્વત આ લભેત પ્રજાકામઃ
પ્રાણો વૈ વાયુરપાનો નિયુત્પ્રાણાપાનૌ ખલુ વા એતસ્ય પ્રજાયા
૩ અપ ક્રામતો યોડલં પ્રજાયૈ સન્પ્રજાં ન વિંદતે વાયુમેવ
નિયુત્વન્તગ્ં સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ
પ્રાણાપાનાભ્યાં પ્રજાં પ્ર જનયતિ વિન્દતે પ્રજાં વાયવે નિયુત્વત
આલભેત જ્યોગામયાવી પ્રાણો વૈ વાયુરપાનો નિયુત્પ્રાણાપાનૌ ખલુ વા
એતસ્માદપક્રામતો યસ્ય જ્યોગામયતિ વાયુમેવ નિયુત્વન્તગ્ં સ્વેન
ભાગધેયેનોપ
૪ ધાવતિ સ એવાસ્મિન્ પ્રાણાપાનૌ દધાત્યુત યદીતાસુર્ભવતિ જીવત્યેવ

પ્રજાપતિર્વા ઇદમેક આસીથ્સોઽકામયત પ્રજાઃ પશૂન્થ્સૃજેયેતિ
સ આત્મનો વપામુદક્ખિદત્ તામગ્નૌ પ્રાગૃહ્ણાત્ તતોઽજસ્તૂપરઃ
સમભવત્તરઁ સ્વાયૈ દેવતાયા આલભત તતો વૈ સ પ્રજાઃ
પશૂનસૃજત યઃ પ્રજાકામઃ
૫ પશુકામઃ સ્યાત્ સ એતં પ્રાજાપત્યમજં તૂપરમા લભેત
પ્રજાપતિમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ
પ્રજાં પશૂન્ પ્ર જનયતિ યચ્છ્મશ્રુણસ્તત્પુરુષાણાઁ રૂપં
યત્તૂપરસ્તદશ્વાનાં યદન્યતોદન્તદ્ગવાં યદવ્યા ઇવ શફાસ્તદવીનાં
યદજસ્તદજાનામેતાવન્તો વૈ ગ્રામ્યાઃ પશવસ્તાન્
૬ રૂપેણૈવાવરુન્ધે સોમાપૌષ્ણં ત્રૈતમા લભેત પશુકામો દ્વૌ વા અજાયૈ
સ્તનૌ નાનૈવ દ્વાવભિ જાયેતે ઊર્જં પુષ્ટિં તૃતીયઃ સોમાપૂષણાવેવ
સ્વેન ભાગધેયેનોપ ધાવતિ તાવેવાસ્મૈ પશૂન્ પ્ર જનયતઃ સોમો વૈ
રેતોધાઃ પૂષા પશૂનાં પ્રજનયિતા સોમ એવાસ્મૈ રેતો દધાતિ પૂષા
પશૂન્ પ્રજનયત્યૌદુંબરો યૂપો ભવત્યૂર્ગ્વા ઉદુંબર ઊર્ક્પશવ
ઊર્જૈવાસ્મા ઊર્જં પશૂનવ રુન્ધે ॥ ૨। ૧। ૧॥ અપ્રદાહાય ભવત્યેવ પ્રજાયા
આમયતિ વાયુમેવ નિયુત્ત્વંતગ્ગ્ સ્વેન ભાગધેયેનોપ પ્રજાકામસ્તાન્,
યૂપસ્ત્રયોદશ ચ ॥ ૨। ૧। ૧॥
૭ પ્રજાપતિઃ પ્રજા અસૃજત તા અસ્માથ્સૃષ્ટાઃ પરાચીરાયન્તા
વરુણમગચ્છન્તા અન્વૈત્તાઃ પુનરયાચત તા અસ્મૈ ન
પુનરદદાથ્સોઽબ્રવીદ્વરં વૃણીષ્વાથ મે પુનર્દેહીતિ તાસાં
વરમાલભત સ કૃષ્ણ એકશિતિપાદભવદ્યો વરુણગૃહીતઃ સ્યાથ્સ એતં
વારુણં કૃષ્ણમેકશિતિપાદમા લભેત વરુણ
૮ મેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવૈનં
વરુણપાશાન્મુઞ્ચતિ કૃષ્ણ એકશિતિપાદ્ભવતિ વારુણો હ્યેષ
દેવતયા સમૃદ્ધ્યૈ સુવર્ભાનુરાસુરઃ સૂર્યં તમસાવિધ્યત્
તસ્મૈ દેવાઃ પ્રાયશ્ચિત્તિમૈચ્છન્તસ્ય યત્પ્રથમં તમોઽપાઘ્નન્થ્સા
કૃષ્ણાવિરભવદ્યદ્વિતીયઁ સા ફલ્ગુની યત્તૃતીયઁ સા

બલક્ષી યદધ્યસ્થાદપાકૃન્તન્ થ્સાવિર્વંશા
૯ સમભવત્તે દેવા અબ્રુવન્ દેવપશુર્વા અયꣳ સમભૂત્કસ્મા
ઇમમા લપ્સ્યામહ ઇત્યથ વૈતર્હ્યલ્પા પૃથિવ્યાસીદજાતા
ઓષધયસ્તામવિં વશામાદિત્યેભ્યઃ કામાયાલભન્ત તતો વા અપ્રથત
પૃથિવ્યજાયન્તૌષધયો યઃ કામયેત પ્રથેય પશુભિઃ પ્ર પ્રજયા
જાયેયેતિ સ એતામવિં વશામાદિત્યેભ્યઃ કામાયા
૧૦ ऽલભેતાદિત્યાનેવ કામગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ ત
એવૈનં પ્રથયન્તિ પશુભિઃ પ્ર પ્રજયા જનયન્ત્યસાવાદિત્યો
ન વ્યરોચત તસ્મૈ દેવાઃ પ્રાયશ્ચિત્તિમૈચ્છન્તસ્મા એતા મલ્હા
આલભન્તાગ્નેયીં કૃષ્ણગ્રીવીꣳ સꣳહિતામૈંદ્રીગ્ શ્વેતાં બાર્હસ્પત્યાં
તાભિરેવાસ્મિન્રુચમદધુર્꣡યો બ્રહ્મવર્ચસકામઃ સ્યાત્તસ્મા એતા મલ્હા
આલભેતા
૧૧ ऽગ્નેયીં કૃષ્ણગ્રીવીꣳ સꣳહિતામૈંદ્રીગ્ શ્વેતાં બાર્હસ્પત્યામેતા
એવ દેવતાઃ સ્વેન ભાગધેયેનોપ ધાવતિ તા એવાસ્મિન્ બ્રહ્મવર્ચસં
દધતિ બ્રહ્મવર્ચસ્યેવ ભવતિ વસન્તા પ્રાતરાગ્નેયીં કૃષ્ણગ્રીવીમા
લભેત ગ્રીષ્મે મધ્યન્દિને સꣳહિતામૈંદ્રીꣳ શરદ્યપરાહ્ણે શ્વેતાં
બાર્હસ્પત્યાં ત્રીણિ વા આદિત્યસ્ય તેજાꣳસિ વસન્તા પ્રાતર્ગ્રીષ્મે
મધ્યન્દિને શરદ્યપરાહ્ણે યાવન્ત્યેવ તેજાꣳસિ તાન્યેવા
૧૨ ऽવ રુન્ધે સંવથ્સરં પર્યાલભ્યન્તે સંવથ્સરો વૈ બ્રહ્મવર્ચસસ્ય
પ્રદાતા સંવથ્સર એવાસ્મૈ બ્રહ્મવર્ચસં પ્ર યચ્છતિ બ્રહ્મવર્ચસ્યેવ
ભવતિ ગર્ભિણયો ભવન્તીંદ્રિયં વૈ ગર્ભ ઇંદ્રિયમેવાસ્મિન્દધતિ સારસ્વતીં
મેષીમા લભેત ય ઈશ્વરો વાચો વદિતોઃ સન્વાચં ન વદેદ્વાગ્વૈ
સરસ્વતી સરસ્વતીમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સૈવાસ્મિન્
૧૩ વાચં દધાતિ પ્રવદિતા વાચો ભવત્યપન્નદતી ભવતિ તસ્માન્મનુષ્યાઃ
સર્વાં વાચં વદન્ત્યાગ્નેયં કૃષ્ણગ્રીવમા લભેત સૌમ્યં બભ્રું
જ્યોગામયાવ્યગ્નિં વા એતસ્ય શરીરં ગચ્છતિ સોમꣳ રસો
યસ્ય જ્યોગામયત્યગ્નેરેવાસ્ય શરીરં નિષ્ક્રીણાતિ સોમાદ્રસમુત

યદીતાસુર્ભવતિ જીવત્યેવ સૌમ્યં બભ્રુમા લભેતાગ્નેયં કૃષ્ણગ્રીવં
પ્રજાકામઃ સોમો

૧૪ વૈ રેતોધા અગ્નિઃ પ્રજાનાં પ્રજનયિતા સોમ એવાસ્મૈ રેતો દધાત્યગ્નિઃ
પ્રજાં પ્ર જનયતિ વિન્દતે પ્રજામાગ્નેયં કૃષ્ણગ્રીવમા લભેત સૌમ્યં
બભ્રું યો બ્રાહ્મણો વિદ્યામનૂચ્ય ન વિરોચેત યદાગ્નેયો ભવતિ
તેજ એવાસ્મિન્તેન દધાતિ યત્સૌમ્યો બ્રહ્મવર્ચસં તેન કૃષ્ણગ્રીવ
આગ્નેયો ભવતિ તમ એવાસ્માદપ હન્તિ શ્વેતો ભવતિ

૧૫ રુચમેવાસ્મિન્દધાતિ બભ્રુઃ સૌમ્યો ભવતિ બ્રહ્મવર્ચસમેવાસ્મિન્
ત્વિષિં દધાત્યાગ્નેયં કૃષ્ણગ્રીવમા લભેત સૌમ્યં બભ્રુમાગ્નેયં
કૃષ્ણગ્રીવં પુરોધાયાગ્ સ્પર્ધમાન આગ્નેયો વૈ બ્રાહ્મણઃ સૌમ્યો
રાજન્યોઽભિતઃ સૌમ્યમાગ્નેયૌ ભવતસ્તેજસૈવ બ્રહ્મણોભયતો
રાષ્ટ્રં પરિ ગૃહ્ણાત્યેકધા સમાવૃઙ્ક્તે પુર એનં દધતે ॥ ૨। ૧। ૨॥

લભેત વરુણં વશૈતામવિં વશામાદિત્યેભ્યઃ કામાય મલ્હા આ
લભેત તાન્યેવ સૈવાસ્મિન્થ્સોમઃ શ્વેતોભવતિ ત્રિચત્વારિꣳ શચ્ચ ॥
૨। ૧। ૨॥

૧૬ દેવાસુરા એષુ લોકેષ્વસ્પર્ધન્ત સ એતં વિષ્ણુર્વામનમપશ્યત્તꣳ
સ્વાયૈ દેવતાયા આલભત તતો વૈ સ ઇમાન્ લોકાનભ્યજયદ્વૈષ્ણવં
વામનમાલભેત સ્પર્ધમાનો વિષ્ણુરેવ ભૂત્વેમાꣳ લ્લોકાનભિ જયતિ
વિષમ આ લભેત વિષમા ઇવ હીમે લોકાઃ સમૃદ્ધ્યા ઇંદ્રાય મન્યુમતે
મનસ્વતે લલામં પ્રાશꣳ ઙ્ગમા લભેત સંગ્રામે

૧૭ સંયત્ત ઇંદ્રિયેણ વૈ મન્યુના મનસા સંગ્રામં જયતીંદ્રમેવ
મન્યુમન્તં મનસ્વન્તગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ સ
એવાસ્મિન્નિંદ્રિયં મન્યું મનો દધાતિ જયતિ તꣳ સંગ્રામમિંદ્રાય
મરુત્વતે પૃશ્નિસક્થમા લભેત ગ્રામકામ ઇંદ્રમેવ મરુત્વન્તગ્ગ્
સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ સજાતાન્ પ્ર યચ્છતિ ગ્રામ્યેવ
ભવતિ યદૃષભસ્તેનૈં

૧૮ દ્રો યત્પૃશ્નિસ્તેન મારુતઃ સમૃદ્ધ્યૈ પશ્ચાત્પૃશ્નિસક્થો ભવતિ
પશ્ચાદન્વવસાયિનીમેવાસ્મૈ વિશં કરોતિ સૌમ્યં બભ્રુમા લભેતાન્નકામઃ
સૌમ્યં વા અન્નꣳ સોમમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મા
અન્નં પ્રયચ્છત્યન્નાદ એવ ભવતિ બભ્રુર્ભવત્યેતદ્વા અન્નસ્ય રૂપꣳ
સમૃદ્ધ્યૈ સૌમ્યં બભ્રુમા લભેત યમલꣳ
૧૯ રાજ્યાય સન્તꣳરાજ્યં નોપનમેથ્સૌમ્યં વૈ રાજ્યꣳ સોમમેવ
સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ રાજ્યં પ્રયચ્છત્યુપૈનꣳ
રાજ્યં નમતિ બભ્રુર્ભવત્યેતદ્વૈ સોમસ્ય રૂપꣳ સમૃદ્ધ્યા ઇંદ્રાય
વૃત્રતુરે લલામં પ્રાશ઼ૃઙ્ગમા લભેત ગતશ્રીઃ પ્રતિષ્ઠાકામઃ
પાપ્માનમેવ વૃત્રં તીર્ત્વા પ્રતિષ્ઠાં ગચ્છતીંદ્રાયાભિમાતિઘ્ને
લલામં પ્રાશ઼ૃઙ્ગમા
૨૦ લભેત યઃ પાપ્મના ગૃહીતઃ સ્યાત્પાપ્મા વા
અભિમાતિરિંદ્રમેવાભિમાતિહનગ્ગ્ સ્વેન ભાગધેયેનોપ
ધાવતિ સ એવાસ્માત્ પાપ્માનમભિમાતિં પ્ર ણુદત ઇંદ્રાય વજ્રિણે
લલામં પ્રાશ઼ૃઙ્ગમા લભેત યમલꣳરાજ્યાય સન્તꣳરાજ્યં
નોપનમેદિંદ્રમેવ વજ્રિણગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ
વજ્રં પ્રયચ્છતિ સ એનં વજ્રો ભૂત્યા ઇન્ધ ઉપૈનꣳ રાજ્યં નમતિ
લલામઃ પ્રાશ઼ૃઙ્ગો ભવત્યેતદ્વૈ વજ્રસ્ય રૂપꣳ સમૃદ્ધ્યૈ ॥ ૨। ૧। ૩॥
સંગ્રામે તેનાલમભિમાતિઘ્ને લલામં પ્રાશ઼ૃઙ્ગમૈનં પઞ્ચદશ ચ ॥
૨। ૧। ૩॥
૨૧ અસાવાદિત્યો ન વ્યરોચત તસ્મૈ દેવાઃ પ્રાયશ્ચિત્તિમૈચ્છન્તસ્મા એતાં
દશર્ષભામાલભન્ત તયૈવાસ્મિન્રુચમદધુર્યો બ્રહ્મવર્ચસકામઃ
સ્યાત્તસ્મા એતાં દશર્ષભામા લભેતામુમેવાદિત્યꣳ સ્વેન
ભાગધેયેનોપ ધાવતિ સ એવાસ્મિન્ બ્રહ્મવર્ચસં દધાતિ બ્રહ્મવર્ચસ્યેવ
ભવતિ વસન્તા પ્રાતસ્ત્રીꣳલ્લલામાના લભેત ગ્રીષ્મે મધ્યન્દિને
૨૨ ત્રીઙ્છિતિપૃષ્ઠાં છરદ્યપરાહ્ણે ત્રીઙ્છિતિવારાન્ ત્રીણિ વા આદિત્યસ્ય
તેજાꣳસિ વસન્તા પ્રાતર્ગ્રીષ્મે મધ્યન્દિને શરદ્યપરાહ્ણે યાવન્ત્યેવ

તેજાꣳસિ તાન્યેવાવ રુન્ધે ત્રયસ્ત્રય આ લભ્યન્તેઽભિપૂર્વમેવાસ્મિન્તેજો
દધાતિ સંવત્સરં પર્યાલભ્યન્તે સંવત્સરો વૈ બ્રહ્મવર્ચસસ્ય પ્રદાતા
સંવત્સર એવાસ્મૈ બ્રહ્મવર્ચસં પ્ર યચ્છતિ બ્રહ્મવર્ચસ્યેવ ભવતિ
સંવત્સરસ્ય પરસ્તાત્પ્રાજાપત્યં કદ્રુ

૨૩ મા લભેત પ્રજાપતિઃ સર્વા દેવતા દેવતાસ્વેવ પ્રતિતિષ્ઠતિ
યદિ બિભીયાદ્દુશ્ચર્મા ભવિષ્યામીતિ સોમાપૌષ્ણꣳ શ્યામમા લભેત
સૌમ્યો વૈ દેવતયા પુરુષઃ પૌષ્ણાઃ પશવઃ સ્વયૈવાસ્મૈ દેવતયા
પશુભિસ્ત્વચં કરોતિ ન દુશ્ચર્મા ભવતિ દેવાશ્ચ વૈ યમશ્ચાસ્મિન્
લોકેઽસ્પર્ધન્ત સ યમો દેવાનામિંદ્રિ યં વીર્યમયુવત તદ્યમસ્ય

૨૪ યમત્વં તે દેવા અમન્યન્ત યમો વા ઇદમભૂદ્યદ્વયꣳ સ્મ ઇતિ તે
પ્રજાપતિમુપાધાવન્થ્સ એતૌ પ્રજાપતિરાત્મન ઉક્ષવશૌ નિરમિમીત
તે દેવા વૈષ્ણાવરુણીં વશામાલભન્તૈંદ્રમુક્ષાણં તં વરુણેનૈવ
ગ્રાહયિત્વા વિષ્ણુના યજ્ઞેન પ્રાણુદન્તૈંદ્રેણૈવાસ્યેંદ્રિયમવૃઞ્જત
યો ભ્રાતૃવ્યવાન્થ્સ્યાથ્સ સ્પર્ધમાનો વૈષ્ણાવરુણીં

૨૫ વશામા લભેતૈંદ્રમુક્ષાણં વરુણેનૈવ ભ્રાતૃવ્યં ગ્રાહયિત્વા વિષ્ણુના
યજ્ઞેન પ્ર ણુદત ઐંદ્રેણૈવાસ્યેંદ્રિયં વૃઙ્ક્તે ભવત્યાત્મના
પરાસ્ય ભ્રાતૃવ્યો ભવતીંદ્રો વૃત્રમહન્તં વૃત્રો હતઃ
ષોડશભિર્ભોગૈરસિનાત્તસ્ય વૃત્રસ્ય શીર્ષતો ગાવ ઉદાયન્તા
વૈદેહ્યોઽભવન્તાસામૃષભો જઘનેઽનૂદૈત્તમિંદ્રો

૨૬ ઽચાયથ્સોઽમન્યત યો વા ઇમમાલભેત મુચ્યેતાસ્માત્ પાપ્મન
ઇતિ સ આગ્નેયં કૃષ્ણગ્રીવમા લભતૈંદ્રમૃષભં
તસ્યાગ્નિરેવ સ્વેન ભાગધેયેનોપસૃતઃ ષોડશધા વૃત્રસ્ય
ભોગાનપ્યદહદૈંદ્રેણેંદ્રિયમાત્મન્નધત્ત યઃ પાપ્મના ગૃહીતઃ સ્યાથ્સ
આગ્નેયં કૃષ્ણગ્રીવમા લભેતૈંદ્રમૃષભમગ્નિરેવાસ્ય સ્વેન
ભાગધેયેનોપસૃતઃ

૨૭ પાપ્માનમપિ દહત્યૈંદ્રેણેંદ્રિયમાત્મન્ધત્તે મુચ્યતે પાપ્મનો
ભવત્યેવ દ્યાવાપૃથિવ્યાં ધેનુમા લભેત જ્યોગપરુદ્ધોઽનયોર્હિ

વા એષોઽપ્રતિષ્ઠિતોઽથૈષ જ્યોગપરુદ્ધો ધાવાપૃથિવી એવ સ્વેન
ભાગધેયેનોપ ધાવતિ તે એવૈનં પ્રતિષ્ઠાં ગમયતઃ પ્રત્યેવતિષ્ઠતિ
પર્યારિણી ભવતિ પર્યારીવ હ્યેતસ્ય રાષ્ટ્રં યો જ્યોગપરુદ્ધઃ સમૃદ્ધ્યૈ
વાયવ્યં
૨૮ વથ્સમા લભેત વાયુર્વા અનયોર્વથ્સ ઇમે વા એતસ્મૈ લોકા અપશુષ્કા
વિડપશુષ્કાથૈષ જ્યોગપરુદ્ધો વાયુમેવ સ્વેન ભાગધેયેનોપ ધાવતિ
સ એવાસ્મા ઇમાઉઁ લ્લોકાન્, વિશં પ્ર દાપયતિ પ્રાસ્મા ઇમે લોકાઃ સ્નુવન્તિ
ભુઞ્જત્યેનં વિડુપતિષ્ઠ તે ॥ ૨। ૧। ૪॥ મધ્યંદિને કર્તું યમસ્ય
સ્પર્ધમાનો વૈષ્ણાવરુણીં તમિંદ્રોસ્ય સ્વેન ભાગધેયેનોપસૃતો વાયવ્યં
દ્વિચત્વારિગ્ંશચ્ચ ॥ ૨। ૧। ૪॥
૨૯ ઇંદ્રો વલસ્ય બિલમપૌર્ણોથ્સ ય ઉત્તમઃ પશુરાસીત્તં પૃષ્ઠં
પ્રતિ સંગૃહ્યોદક્ખિદત્તઁ સહસ્રં પશવોઽનૂદાયન્થ્સ
ઉન્નતોઽભવદ્યઃ પશુકામઃ સ્યાથ્સ એતમૈંદ્રમુન્નતમા
લભેતેંદ્રમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ પશૂન્ પ્ર
યચ્છતિ પશુમાનેવ ભવત્યુન્નતો
૩૦ ભવતિ સાહસ્રી વા એષા લક્ષ્મી યદુન્નતો લક્ષ્મિયૈવ પશૂનવ
રુન્ધે યદા સહસ્રં પશૂન્ પ્રાપ્નુયાદથ વૈષ્ણવં વામનમા
લભેતૈતસ્મિન્વૈ તથ્સહસ્રમધ્યતિષ્ઠત્તસ્માદેષ વામનઃ સમીષિતઃ
પશુભ્ય એવ પ્રજાતેભ્યઃ પ્રતિષ્ઠાં દધાતિ કોઽર્હતિ સહસ્રં પશૂન્
પ્રાપ્તુમિત્યાહુરહોરાત્રાણ્યેવ સહસ્રઁસંપાદ્યા લભેત પશવો વા
૩૧ અહોરાત્રાણિ પશૂનેવ પ્રજાતાન્ પ્રતિષ્ઠાં ગમયત્યોષધીભ્યો વેહતમા
લભેત પ્રજાકામ ઓષધયો વા એતં પ્રજાયૈ પરિ બાધન્તે યોઽલં
પ્રજાયૈ સન્પ્રજાં ન વિન્દત ઓષધયઃ ખલુ વા એતસ્યૈ સૂતુમપિ
ઘ્નન્તિ યા વેહદ્ભવત્યોષધીરેવ સ્વેન ભાગધેયેનોપ ધાવતિ તા એવાસ્મૈ
સ્વાદ્યોનેઃ પ્રજાં પ્ર જનયન્તિ વિન્દતે
૩૨ પ્રજામાપો વા ઓષધયોઽસત્પુરુષ આપ એવાસ્મા અસતઃ સદ્દતિ
તસ્માદાહુર્યશ્ચૈવં વેદ યશ્ચ નાપસ્ત્વાવાસતઃ સદ્દતીત્યૈંદ્રીઁ

સૂતવશામા લભેત ભૂતિકામોઽજાતો વા એષ યોઽલંભૂત્યૈ સન્ભૂતિં
ન પ્રાપ્નોતીંદ્રં ખલુ વા એષા સૂત્વા વશાભવ
૩૩ દિંદ્રમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવૈનં ભૂતિં
ગમયતિ ભવત્યેવ યઁ સૂત્વા વશા સ્યાત્તમૈંદ્રમેવા લભેતૈતદ્વાવ
તદિંદ્રિયઁ સાક્ષાદેવેંદ્રિયમવ રુન્ધ ઐંદ્રાગ્નં પુનરુત્સૃષ્ટમા
લભેત ય આતૃતીયાત્પુરુષાત્સોમં ન પિબેદ્વિચ્છિન્નો વા એતસ્ય
સોમપીથો યો બ્રાહ્મણઃ સન્ના
૩૪ તૃતીયાત્ પુરુષાત્ સોમં ન પિબતીંદ્રાગ્ની એવ સ્વેન ભાગધેયેનોપ
ધાવતિ તાવેવાસ્મૈ સોમપીથં પ્ર યચ્છત ઉપૈનઁ સોમપીથો નમતિ
યદૈંદ્રો ભવતીંદ્રિયં વૈ સોમપીથ ઇંદ્રિયમેવ સોમપીથમવ રુન્ધે
યદાગ્નેયો ભવત્યાગ્નેયો વૈ બ્રાહ્મણઃ સ્વામેવ દેવતામનુ સંતનોતિ
પુનરુત્સૃષ્ટો ભવતિ પુનરુત્સૃષ્ટ ઇવ હ્યેતસ્ય
૩૫ સોમપીથઃ સમૃદ્ધ્યૈ બ્રાહ્મણસ્પત્યં તૂપરમા
લભેતાભિચરન્બ્રહ્મણસ્પતિમેવ સ્વેન ભાગધેયેનોપ ધાવતિ તસ્મા
એવૈનમા વૃશ્ચતિ તાજગાર્તિમાર્ચ્છતિ તૂપરો ભવતિ ક્ષુરપવિર્વા
એષા લક્ષ્મી યત્તૂપરઃ સમૃદ્ધ્યૈ સ્ફ્યો યૂપો ભવતિ વજ્રો વૈ સ્ફ્યો
વજ્રમેવાસ્મૈ પ્ર હરતિ શરમયં બર્હિઃ શૃણાત્યેવૈનં વૈભીદક
ઇધ્મો ભિનત્ત્યેવૈનમ્ ॥ ૨। ૧। ૫॥ ભવત્યુન્નતઃ પશવો જનયંતિ
વિંદતેભવત્સન્નેતસ્યેધ્મસ્ત્રીણિ ચ ॥ ૨। ૧। ૫॥
૩૬ બાર્હસ્પત્યઁ શિતિપૃષ્ઠમા લભેત ગ્રામકામો યઃ
કામયેત પૃષ્ઠઁ સમાનાનાગ્ સ્યામિતિ બૃહસ્પતિમેવ સ્વેન
ભાગધેયેનોપ ધાવતિ સ એવૈનં પૃષ્ઠઁ સમાનાનાં કરોતિ ગ્રામ્યેવ
ભવતિ શિતિપૃષ્ઠો ભવતિ બાર્હસ્પત્યો હ્યેષ દેવતયા સમૃદ્ધ્યૈ
પૌષ્ણઁ શ્યામમા લભેતાન્નકામોઽન્નં વૈ પૂષા પૂષણમેવ સ્વેન
ભાગધેયેનોપ ધાવતિ સ એવાસ્મા અન્નં
૩૭ પ્ર યચ્છત્યન્નાદ એવ ભવતિ શ્યામો ભવત્યેતદ્વા અન્નસ્ય રૂપઁ
સમૃદ્ધ્યૈ મારુતં પૃશ્નિમા લભેતાન્નકામોઽન્નં વૈ મરુતો મરુત

એવ સ્વેન ભાગધેયેનોપ ધાવતિ ત એવાસ્મા અન્નં પ્ર યચ્છન્ત્યન્નાદ એવ
ભવતિ પૃશ્નિર્ભવત્યેતદ્ધા અન્નસ્ય રૂપઁ સમૃદ્ધ્યા ઐંદ્રમરુણમા
લભેતેંદ્રિયકામ ઇંદ્રમેવ
૩૮ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મિન્નિંદ્રિયં દધાતીંદ્રિયાવ્યેવ
ભવત્યરુણો ભ્રૂમાન્ભવત્યેતદ્ધા ઇંદ્રસ્ય રૂપઁ સમૃદ્ધ્યૈ
સાવિત્રમુપધ્વસ્તમા લભેત સનિકામઃ સવિતા વૈ પ્રસવાનામીશે
સવિતારમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ સનિં પ્રસુવતિ
દાનકામા અસ્મૈ પ્રજા ભવન્ત્યુપધ્વસ્તો ભવતિ સાવિત્રો હ્યેષ
૩૯ દેવતયા સમૃદ્ધ્યૈ વૈશ્વદેવં બહુરૂપમા લભેતાન્નકામો વૈશ્વદેવં
વા અન્નં વિશ્વાનેવ દેવાન્થ્સ્વેન ભાગધેયેનોપ ધાવતિ ત એવાસ્મા અન્નં
પ્રયચ્છન્ત્યન્નાદ એવ ભવતિ બહુરૂપો ભવતિ બહુરૂપરઁ હ્યન્ન ઁ
સમૃદ્ધ્યૈ વૈશ્વદેવં બહુરૂપમા લભેત ગ્રામકામો વૈશ્વદેવા વૈ સજાતા
વિશ્વાનેવ દેવાન્થ્સ્વેન ભાગધેયેનોપ ધાવતિ ત એવાસ્મૈ
૪૦ સજાતાન્ પ્ર યચ્છન્તિ ગ્રામ્યેવ ભવતિ બહુરૂપો ભવતિ બહુદેવત્યો
૧ હ્યેષ સમૃદ્ધ્યૈ પ્રાજાપત્યં તૂપરમા લભેત યસ્યાનાજ્ઞાતમિવ
જ્યોગામયેત્પ્રાજાપત્યો વૈ પુરુષઃ પ્રજાપતિઃ ખલુ વૈ તસ્ય વેદ
યસ્યાનાજ્ઞાતમિવ જ્યોગામયતિ પ્રજાપતિમેવ સ્વેન ભાગધેયેનોપ ધાવતિ
સ એવૈનં તસ્માથ્સ્રામાન્મુઞ્ચતિ તૂપરો ભવતિ પ્રાજાપત્યો હ્યેષ દેવતયા
સમૃદ્ધ્યૈ ॥ ૨। ૧। ૬॥ અસ્મા ઇંદ્રમેવૈષ સજાતા વિશ્વાનેવ દેવાન્થ્સ્વેન
ભાગધેયેનોપ ધાવતિ ત એવાસ્મૈ પ્રાજાપત્યો હિ ત્રીણિ ચ ॥ ૨। ૧। ૬॥
૪૧ વષટ્કારો વૈ ગાયત્રિયૈ શિરોઽચ્છિનત્તસ્યૈ રસઃ પરાપતત્તં
બૃહસ્પતિરુપાગૃહ્ણાથ્સા શિતિપૃષ્ઠા વશાભવદ્યો દ્વિતીયઃ
પરાપતત્તં મિત્રાવરુણાવુપાગૃહ્ણીતા ઁ સા દ્વિરૂપા
વશાભવદ્યસ્તૃતીયઃ પરાપતત્તં વિશ્વેદેવા ઉપાગૃહ્ણન્થ્સા
બહુરૂપા વશા ભવદ્યશ્ચતુર્થઃ પરાપતથ્સ પૃથિવીં
પ્રાવિશત્તં બૃહસ્પતિરભ્ય
૪૨ ગૃહ્ણાદસ્ત્વેવાયં ભોગાયેતિ સ ઉક્ષવશઃ સમભવદ્યલ્લોહિતં

પરાપતત્તદ્રુદ્ર ઉપાગૃહ્ણાથ્સા રૌદ્રી રોહિણી વશાભવદ્બાર્હસ્પત્યાꣳ
શિતિપૃષ્ઠામા લભેત બ્રહ્મવર્ચસકામો બૃહસ્પતિમેવ સ્વેન
ભાગધેયેનોપ ધાવતિ સ એવાસ્મિન્ બ્રહ્મવર્ચસં દધાતિ બ્રહ્મવર્ચસ્યેવ
ભવતિ છન્દસાં વા એષ રસો યદ્વશા રસ ઇવ ખલુ
૪૩ વૈ બ્રહ્મવર્ચસં છન્દસામેવ રસેન રસં બ્રહ્મવર્ચસમવ રુન્ધે
મૈત્રાવરુણીં દ્વિરૂપામા લભેત વૃષ્ટિકામો મૈત્રં વા અહર્વારુણી
રાત્રિરહોરાત્રાભ્યાં ખલુ વૈ પર્જન્યો વર્ષતિ મિત્રાવરુણાવેવ
સ્વેન ભાગધેયેનોપ ધાવતિ તાવેવાસ્મા અહોરાત્રાભ્યાં પર્જન્યં
વર્ષયતશ્છન્દસાં વા એષ રસો યદ્વશા રસ ઇવ ખલુ વૈ
વૃષ્ટિશ્છન્દસામેવ રસેન
૪૪ રસં વૃષ્ટિમવ રુન્ધે મૈત્રાવરુણીં દ્વિરૂપામા લભેત પ્રજાકામો
મૈત્રં વા અહર્વારુણી રાત્રિરહોરાત્રાભ્યાં ખલુ વૈ પ્રજાઃ પ્રજાયન્તે
મિત્રાવરુણાવેવ સ્વેન ભાગધેયેનોપ ધાવતિ તાવેવાસ્મા અહોરાત્રાભ્યાં
પ્રજાં પ્રજનયતશ્છન્દસાં વા એષ રસો યદ્વશા રસ ઇવ ખલુ
વૈ પ્રજા છન્દસામેવ રસેન રસં પ્રજામવ
૪૫ રુન્ધે વૈશ્વદેવીં બહુરૂપામા લભેતાન્નકામો વૈશ્વદેવં વા અન્નં
વિશ્વાનેવ દેવાન્થ્સ્વેન ભાગધેયેનોપ ધાવતિ ત એવાસ્મા અન્નં પ્ર
યચ્છન્ત્યન્નાદ એવ ભવતિ છન્દસાં વા એષ રસો યદ્વશા રસ
ઇવ ખલુ વા અન્નં છન્દસામેવ રસેન રસમન્નમવ રુન્ધે વૈશ્વદેવીં
બહુરૂપામા લભેત ગ્રામકામો વૈશ્વદેવા વૈ
૪૬ સજાતા વિશ્વાનેવ દેવાન્થ્સ્વેન ભાગધેયેનોપ ધાવતિ ત એવાસ્મૈ
સજાતાન્ પ્ર યચ્છન્તિ ગ્રામ્યેવ ભવતિ છન્દસાં વા એષ રસો યદ્વશા
રસ ઇવ ખલુ વૈ સજાતાશ્છન્દસામેવ રસેન રસꣳસજાતાનવ
રુન્ધે બાર્હસ્પત્યમુક્ષવશમા લભેત બ્રહ્મવર્ચસકામો બૃહસ્પતિમેવ
સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મિન્બ્રહ્મવર્ચસં
૪૭ દધાતિ બ્રહ્મવર્ચસ્યેવ ભવતિ વશં વા એષ ચરતિ યદુક્ષા વશ
ઇવ ખલુ વૈ બ્રહ્મવર્ચસં વશેનૈવ વશં બ્રહ્મવર્ચસમવ રુન્ધે

રૌદ્રીꣳ રોહિણીમા લભેતાભિચરન્ રુદ્રમેવ સ્વેન ભાગધેયેનોપ
ધાવતિ તસ્મા એવૈનમા વૃશ્ચતિ તાજગાર્તિમાર્ચ્છતિ રોહિણી ભવતિ
રૌદ્રી હ્યેષા દેવતયા સમૃદ્ધ્યૈ સ્ફ્યો યૂપો ભવતિ વજ્રો વૈ સ્ફ્યો
વજ્રમેવાસ્મૈ પ્ર હરતિ શરમયં બર્હિઃ શ઼ૃણાત્યેવૈનં વૈભીદક
ઇધ્મો ભિનત્ત્યેવૈનમ્ ॥ ૨। ૧। ૭॥ અભિ ખલુ વૃષ્ટિશ્છંદસામેવ
રસેન રસં પ્રજામવ વૈશ્વદેવા વૈ બ્રહ્મવર્ચસં યૂપ એકાન્ન
વિꣳશતિશ્ચ ૨। ૧। ૭॥

૪૮ અસાવાદિત્યો ન વ્યરોચત તસ્મૈ દેવાઃ પ્રાયશ્ચિત્તિમૈચ્છન્તસ્મા
એતાꣳ સૌરીગ્ શ્વેતાં વશામાલભન્ત તયૈવાસ્મિન્ રુચમદધુર્ય઼ો
બ્રહ્મવર્ચસકામઃ સ્યાત્તસ્મા એતાꣳ સૌરીગ્ શ્વેતાં વશામા
લભેતામુમેવાદિત્યꣳ સ્વેન ભાગધેયેનોપ ધાવતિ સ
એવાસ્મિન્બ્રહ્મવર્ચસં દધાતિ બ્રહ્મવર્ચસ્યેવ ભવતિ બૈલ્વો યૂપો
ભવત્યસૌ

૪૯ વા આદિત્યો યતોઽજાયત તતો બિલ્વ ઉદતિષ્ઠથ્સયોન્યેવ
બ્રહ્મવર્ચસમવ રુન્ધે બ્રાહ્મણસ્પત્યાં બભ્રુકર્ણીમા લભેતાભિ
ચરન્વારુણં દશકપાલં પુરસ્તાન્નિર્વપેદ્વરુણેનૈવ ભ્રાતૃવ્યં
ગ્રાહયિત્વા બ્રહ્મણા સ્તૃણુતે બભ્રુકર્ણી ભવત્યેતદ્વૈ બ્રહ્મણો રૂપꣳ
સમૃદ્ધ્યૈ સ્ફ્યો યૂપો ભવતિ વજ્રો વૈ સ્ફ્યો વજ્રમેવાસ્મૈ પ્ર હરતિ
શરમયં બર્હિઃ શ઼ૃણા

૫૦ ત્યેવૈનં વૈભીદક ઇધ્મો ભિનત્ત્યેવૈનં વૈષ્ણવં વામનમા લભેત
યં યજ્ઞો નોપનમેદ્વિષ્ણુર્વૈ યજ્ઞો વિષ્ણુમેવ સ્વેન ભાગધેયેનોપ
ધાવતિ સ એવાસ્મૈ યજ્ઞં પ્ર યચ્છત્યુપૈનં યજ્ઞો નમતિ વામનો
ભવતિ વૈષ્ણવો હ્યેષ દેવતયા સમૃદ્ધ્યૈ ત્વાષ્ટ્રં વડબમા લભેત
પશુકામસ્ત્વષ્ટા વૈ પશૂનાં મિથુનાનાં

૫૧ પ્રજનયિતા ત્વષ્ટારમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ
પશૂન્મિથુનાન્ પ્ર જનયતિ પ્રજા હિ વા એતસ્મિન્પશવઃ પ્રવિષ્ટા અથૈષ
પુમાન્થ્સન્વડબઃ સાક્ષાદેવ પ્રજાં પશૂનવ રુન્ધે મૈત્રꣳ શ્વેતમા

લભેત સંગ્રામે સંયત્તે સમયકામો મિત્રમેવ સ્વેન ભાગધેયેનોપ
ધાવતિ સ એવૈનં મિત્રેણ સં નયતિ
૫૨ વિશાલો ભવતિ વ્યવસાયયત્યેવૈનં પ્રાજાપત્યં કૃષ્ણમા
લભેત વૃષ્ટિકામઃ પ્રજાપતિ ર્વૈ વૃષ્ટ્યા ઈશે પ્રજાપતિમેવ
સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ પર્જન્યં વર્ષયતિ કૃષ્ણો
ભવત્યેતદ્વૈ વૃષ્ટ્યૈ રૂપꣳ રૂપેણૈવ વૃષ્ટિમવ રુન્ધે શબલો
ભવતિ વિદ્યુતમેવાસ્મૈ જનયિત્વા
વર્ષયત્યવાશૃઙ્ગો ભવતિ વૃષ્ટિમેવાસ્મૈ નિ યચ્છતિ ॥ ૨। ૧। ૮॥
અસૌ શૃણાતિ મિથુનાનાં નયતિ યચ્છતિ ॥ ૨। ૧। ૮॥
૫૩ વરુણꣳ સુષુવાણમન્નાદ્યં નોપાનમથ્સ એતાં વારુણીં
કૃષ્ણાં વશામપશ્યત્તાગ્ સ્વાયૈ દેવતાયા આલભત તતો વૈ
તમન્નાદ્યમુપાનમદ્યમલમન્નાદ્યાય સંતમન્નાદ્યં નોપનમેથ્સ
એતાં વારુણીં કૃષ્ણાં વશામા લભેત વરુણમેવ સ્વેન ભાગધેયેનોપ
ધાવતિ સ એવાસ્મા અન્નં પ્ર યચ્છત્યન્નાદ
૫૪ એવ ભવતિ કૃષ્ણા ભવતિ વારુણી હ્યેષા દેવતયા સમૃદ્ધ્યૈ
મૈત્રꣳ શ્વેતમા લભેત વારુણં કૃષ્ણમપાં ચૌષધીનાં ચ
સંધાવન્નકામો મૈત્રીર્વા ઓષધયો વારુણીરાપોઽપાં ચ ખલુ વા ઓષધીનાં
ચ રસમુપ જીવામો મિત્રાવરુણાવેવ સ્વેન ભાગધેયેનોપ ધાવતિ
તાવેવાસ્મા અન્નં પ્ર યચ્છતોઽન્નાદ એવ ભવ
૫૫ ત્યપાં ચૌષધીનાં ચ સંધાવા લભત ઉભયસ્યાવરુદ્ધ્યૈ
વિશાખો યૂપો ભવતિ દ્વે હ્યેતે દેવતે સમૃદ્ધ્યૈ મૈત્રꣳ શ્વેતમા
લભેત વારુણં કૃષ્ણં જ્યોગામયાવી યન્મૈત્રો ભવતિ મિત્રેણૈવાસ્મૈ
વરુણꣳ શમયતિ યદ્વારુણઃ સાક્ષાદેવૈનં વરુણપાશાન્મુઞ્ચત્યુત
યદીતાસુર્ભવતિ જીવત્યેવ દેવા વૈ પુષ્ટિં નાવિન્દન્
૫૬ તાં મિથુનેઽપશ્યન્ તસ્યાં ન સમરાધયન્ તાવશ્વિનાવબ્રૂતામાવયોર્વા
એષામૈતસ્યાં વદધ્વમિતિ સાશ્વિનોરેવાભવદ્યઃ પુષ્ટિકામઃ સ્યાથ્સ
એતામાશ્વિનીં યમીં વશામા લભેતાશ્વિનાવેવ સ્વેન ભાગધેયેનોપ

ધાવતિ તાવેવાસ્મિન્પુષ્ટિં ધત્તઃ પુષ્યતિ પ્રજયા પશુભિઃ ॥ ૨। ૧। ૯॥
અન્નાદોઽન્નાદ એવ ભવત્યવિંદન્ પંચચત્વારિગ્ંશચ્ચ ॥ ૨। ૧। ૯॥
૫૭ આશ્વિનં ધૂમ્રલલામમા લભેત યો દુર્બ્રાહ્મણઃ સોમં પિપાસેદશ્વિનૌ
વૈ દેવાનામસોમપાવાસ્તાં તૌ પશ્ચા સોમપીથં પ્રાપ્નુતામશ્વિનાવેતસ્ય
દેવતા યો દુર્બ્રાહ્મણઃ સોમં પિપાસત્યશ્વિનાવેવ સ્વેન ભાગધેયેનોપ
ધાવતિ તાવેવાસ્મૈ સોમપીથં પ્ર યચ્છત ઉપૈનꣳ સોમપીથો નમતિ
યદ્ધૂમ્રો ભવતિ ધૂમ્રિમાણમેવાસ્માદપ હન્તિ લલામો
૫૮ ભવતિ મુખત એવાસ્મિન્તેજો દધાતિ વાયવ્યં ગોમૃગમા લભેત
યમજધ્વિવાꣳ સમભિશꣳ સેયુરપૂતા વા એતં વાગૃચ્છતિ
યમજધ્વિવાꣳ સમભિશꣳ સન્તિ નૈષ ગ્રામ્યઃ પશુર્નારણ્યો યદ્ગોમૃગો
નેવૈષ ગ્રામે નારણ્યે યમજધ્વિવાꣳ સમભિશꣳ સન્તિ વાયુર્વૈ દેવાનાં
પવિત્રં વાયુમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવૈ
૫૯ નં પવયતિ પરાચી વા એતસ્મૈ વ્યુચ્છન્તી વ્યુચ્છતિ તમઃ પાપ્માનં
પ્ર વિશતિ યસ્યાશ્વિને શસ્યમાને સૂર્યો નાવિર્ભવતિ સૌર્યં બહુરૂપમા
લભેતામુમેવાદિત્યꣳ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્માત્તમઃ
પાપ્માનમપ હન્તિ પ્રતીચ્યસ્મૈ વ્યુચ્છન્તી વ્યુચ્છત્યપ તમઃ
પાપ્માનꣳહતે ॥ ૨। ૧। ૧૦॥ લલામઃ સ એવ ષટ્ચત્વારિꣳ શચ્ચ ॥ ૨। ૧। ૧૦॥
૬૦ ઇંદ્રં વો વિશ્વતસ્પરીંદ્રં નરો મરુતો યદ્ધ વો દિવો યા વઃ શર્મ ॥
ભરેષ્વિંદ્રꣳ સુહવꣳ હવામહેઽꣳ હોમુચꣳ સુકૃતં દૈવ્યં
જનમ્ । અગ્નિં મિત્રં વરુણꣳ સાતયે ભગં દ્યાવાપૃથિવી મરુતઃ
સ્વસ્તયે ॥ મમત્તુ નઃ પરિજ્મા વસર્હા મમત્તુ વાતો અપાં વૃષણ્વાન્
। શિશીતમિંદ્રાપર્વતા યુવં નસ્તન્નો વિશ્વે વરિવસ્યન્તુ દેવાઃ ॥ પ્રિયા
વો નામ
૬૧ હુવે તુરાણામ્ । આયત્તૃપન્મરુતો વાવશાનાઃ ॥ શ્રિયસે કંભાનુભિઃ સં
મિમિક્ષિરે તે રશ્મિભિસ્ત ઋક્વભિઃ સુખાદયઃ । તે વાશીમન્ત ઇષ્મિણો
અભીરવો વિદ્રે પ્રિયસ્ય મારુતસ્ય ધામ્નઃ ॥ અગ્નિઃ પ્રથમો વસુભિર્નો

અવ્યાથ્સોમો રુદ્રેભિરભિ રક્ષતુ ત્મના । ઇંદ્રો મરુદ્ભિરૃતુધા
કૃણોત્વાદિત્યૈર્નો વરુણઃ સꣳ શિશાતુ ॥ સં નો દેવો વસુભિરગ્નિઃ
સꣳ
૬૨ સોમસ્તનૂભી રુદ્રિયાભિઃ । સમિંદ્રો મરુદ્ભિર્યજ્ઞિયૈઃ સમાદિત્યૈર્નો
વરુણો અજિજ્ઞિપત્ ॥ યથાદિત્યા વસુભિઃ સંબભૂવુર્મરુદ્ભી રુદ્રાઃ
સમજાનતાભિ । એવા ત્રિણામન્નહૃણીયમાના વિશ્વે દેવાઃ સમનસો ભવંતુ ॥
કુત્રા ચિદ્યસ્ય સમૃતૌ રણ્વા નરો નૃષદને । અર્હન્તશ્ચિદ્યમિન્ધતે
સંજનયન્તિ જન્તવઃ ॥ સં યદિષો વનામહે સꣳ હવ્યા માનુષાણામ્ ।
ઉત દ્યુમ્નસ્ય શવસ
૬૩ ઋતસ્ય રશ્મિમા દદે ॥ યજ્ઞો દેવાનાં પ્રત્યેતિ સુમ્નમાદિત્યાસો
ભવતા મૃડયન્તઃ । આ વોડર્વાચી સુમતિર્વવૃત્યાદ ꣳહોશ્ચિદ્યા
વરિવોવિત્તરાસત્ ॥ શુચિરપઃ સૂયવસા અદબ્ધ ઉપ ક્ષેતિ
વૃદ્ધવયાઃ સુવીરઃ । નકિષ્ટં ર ઘ્નન્ત્યન્તિતો ન દૂરાદ્ય આદિત્યાનાં
ભવતિ પ્રણીતૌ ॥ ધારયન્ત આદિત્યાસો જગથ્સ્થા દેવા વિશ્વસ્ય
ભુવનસ્ય ગોપાઃ । દીર્ઘાધિયો રક્ષમાણા
૬૪ અસુર્યમૃતાવાનશ્ચયમાના ઋણાનિ ॥ તિસ્રો ભૂમીર્ધારયન્ત્રીꣳ
રુત દ્યૂન્ત્રીણિ વ્રતા વિદથે અન્તરેષામ્ । ઋતેનાદિત્યા મહિ વો મહિત્વં
તદર્યમન્વરુણ મિત્ર ચારુ ॥ ત્યાન્નુ ક્ષત્રિયાꣳ અવ આદિત્યાન્, યાચિષામ
હે । સુમૃડીકાꣳ અભિષ્ટયે ॥ ન દક્ષિણા વિ ચિકિતે ન સવ્યા ન
પ્રાચીનમાદિત્યા નોત પશ્ચા । પાક્યા ચિદ્વસવો ધીર્યા ચિદ્
૬૫ યુષ્માનીતો અભયં જ્યોતિરશ્યામ્ ॥ આદિત્યાનામવસા નૂતનેન
સક્ષીમહિ શર્મણા શંતમેન । અનાગાસ્ત્વે અદિતિત્વે તુરાસ ઇમં
યજ્ઞં દધતુ શ્રોષમાણાઃ ॥ ઇમં મે વરુણ શ્રુધી હવમદ્યા ચ મૃડય
। ત્વામવસ્યુરા ચ કે ॥ તત્ત્વા યામિ બ્રહ્મણા વન્દમાનસ્તદા શાસ્તે
યજમાનો હવિર્ભિઃ । અહેડમાનો વરુણેહ બોધ્યુરુશꣳ સ મા ન આયુઃ પ્ર
મોષીઃ ॥ ૨। ૧। ૧૧॥ નામાડગ્નિસ્સꣳ શવસો રક્ષમાણા ધીર્યા ચિદેકાન્ન
પંચાશચ્ચ ॥ ૨। ૧। ૧૧॥

વાયવ્યં પ્રજાપતિસ્તા વરુણં દેવાસુરા એષ્વસાવાદિત્યો
દશર્ષભામિંદ્રો વલસ્ય બાર્હસ્પત્યં વષટ્કારોઽસૌ સૌરીં
વરુણમાશ્વિનમિંદ્રં વો નર એકાદશ ॥
વાયવ્યમાગ્નેયીં કૃષ્ણગ્રીવીમસાવાદિત્યો વા અહોરાત્રાણિ વષટ્કારઃ
પ્રજનયિતા હુવે તુરાણાં પંચષષ્ટિઃ ॥
વાયવ્યાં પ્રમોષીઃ ॥

## દ્વિતીયકાણ્ડે દ્વિતીયઃ પ્રશ્નઃ ૨

૧ પ્રજાપતિઃ પ્રજા અસૃજત તાઃ સૃષ્ટા ઇંદ્રાગ્ની અપાગૂહતા ઁ
સોઽચાયત્પ્રજાપતિરિંદ્રાગ્ની વૈ મે પ્રજા અપાઘુક્ષતામિતિ સ
એતમૈંદ્રાગ્નમેકાદશકપાલમપશ્યત્તં નિરવપત્તાવસ્મૈ પ્રજાઃ
પ્રાસાધયતામિંદ્રાગ્ની વા એતસ્ય પ્રજામપ ગૂહતો યોઽલં પ્રજાયૈ
સન્પ્રજાં ન વિન્દત ઐંદ્રાગ્નમેકાદશકપાલં નિર્વપેત્પ્રજાકામ ઇંદ્રાગ્ની
૨ એવ સ્વેન ભાગધેયેનોપ ધાવતિ તાવેવાસ્મૈ પ્રજાં પ્ર સાધયતો
વિન્દતે પ્રજામૈંદ્રાગ્નમેકાદશકપાલં નિર્વપેત્ સ્પર્ધમાનઃ,
ક્ષેત્રે વા સજાતેષુ વેંદ્રાગ્ની એવ સ્વેન ભાગધેયેનોપ ધાવતિ
તાભ્યામેવેંદ્રિયં વીર્યં ભ્રાતૃવ્યસ્ય વૃઙ્ક્તે વિ પાપ્મના
ભ્રાતૃવ્યેણ જયતેઽપ વા એતસ્માદિંદ્રિયં વીર્યં ક્રામતિ યઃ
સંગ્રામમુપપ્રયાત્યૈંદ્રાગ્નમેકાદશકપાલં નિ
૩ ર્વપેથ્સંગ્રામમુપપ્રયાસ્યન્નિંદ્રાગ્ની એવ સ્વેન ભાગધેયેનોપ ધાવતિ
તાવેવાસ્મિન્નિંદ્રિયં વીર્યં ધત્તઃ સહેંદ્રિયેણ વીર્યેણોપ પ્ર યાતિ
જયતિ તઁ સંગ્રામં વિ વા એષ ઇંદ્રિયેણ વીર્યેણર્ધ્યતે યઃ
સંગ્રામં જયત્યૈંદ્રાગ્નમેકાદશકપાલં નિર્વપેથ્સંગ્રામં જિત્વેંદ્રાગ્ની
એવ સ્વેન ભાગધેયેનોપ ધાવતિ તાવેવાસ્મિન્નિંદ્રિયં વીર્યં
૪ ધત્તો નેંદ્રિયેણ વીર્યેણ વ્યૃધ્યતેઽપ વા એતસ્માદિંદ્રિયં
વીર્યં ક્રામતિ ય એતિ જનતામૈંદ્રાગ્નમેકાદશકપાલં

નિર્વપેજ્જનતામેષ્યન્નિંદ્રાગ્ની એવ સ્વેન ભાગધેયેનોપ ધાવતિ
તાવેવાસ્મિન્નિંદ્રિયં વીર્યં ધત્તઃ સહેંદ્રિયેણ વીર્યેણ જનતામેતિ
પૌષ્ણં ચરુમનુ નિર્વપેત્પૂષા વા ઇંદ્રિયસ્ય વીર્યસ્યાનુપ્રદાતા
પૂષણમેવ
૫ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મા
ઇંદ્રિયં વીર્યમનુ પ્ર યચ્છતિ ક્ષૈત્રપત્યં ચરું
નિર્વપેજ્જનતામાગત્યેયં વૈ ક્ષેત્રસ્ય પતિરસ્યામેવ પ્રતિ
તિષ્ઠત્યૈંદ્રાગ્નમેકાદશકપાલમુપરિષ્ટાન્નિર્વપેદસ્યામેવ
પ્રતિષ્ઠાયેંદ્રિયં વીર્યમુપરિષ્ટાદાત્મન્ધત્તે ॥ ૨। ૨। ૧॥
પ્રજાકામ ઇંદ્રાગ્ની ઉપપ્રયાત્યૈંદ્રાગ્નમેકાદશકપાલં નિર્વીર્યં
પૂષણમેવૈકાન્નચત્વારિ ँ શચ્ચ ॥ ૨। ૨। ૧॥
૬ અગ્નયે પથિકૃતે પુરોડાશમષ્ટાકપાલં નિર્વપેદ્યો
દર્શપૂર્ણમાસયાજી સન્નમાવાસ્યાં વા પૌર્ણમાસીં વાતિપાદયેત્પથો વા
એષોઽધ્યપથેનૈતિ યો દર્શપૂર્ણમાસયાજી સન્નમાવાસ્યાં વા પૌર્ણમાસીં
વાતિપાદયત્યગ્નિમેવ પથિકૃતગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ
સ એવૈનમપથાત્પન્થામપિ નયત્યનડ્વાન્દક્ષિણા વહી હ્યેષ સમૃદ્ધ્યા
અગ્નયે વ્રતપતયે
૭ પુરોડાશમષ્ટાકપાલં નિર્વપેદ્ય આહિતાગ્નિઃ સન્નવ્રત્યમિવ
ચરેદગ્નિમેવ વ્રતપતિગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ
સ એવૈનં વ્રતમા લંભયતિ વ્રત્યો ભવત્યગ્નયે રક્ષોઘ્ને
પુરોડાશમષ્ટાકપાલં નિર્વપેદ્ય ँ રક્ષા ँસિ સચેરન્નગ્નિમેવ
રક્ષોહણગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્માદ્રક્ષાગ્ંસ્યપ
હન્તિ નિશિતાયાં નિર્વપેન્
૮ નિશિતાયા ँ હિ રક્ષા ँસિ પ્રેરતે સંપ્રેર્ણાન્યેવૈનાનિ હન્તિ
પરિશ્રિતે યાજયેદ્રક્ષસામનન્વવચારાય રક્ષોઘ્ની યાજ્યાનુવાક્યે ભવતો
રક્ષસાગ્ સ્તૃત્યા અગ્નયે રુદ્રવતે પુરોડાશમષ્ટાકપાલં
નિર્વપેદભિચરન્નેષા વા અસ્ય ઘોરાતનૂર્યદ્રુદ્રસ્તસ્મા એવૈનમા

વૃશ્ચતિ તાજગાર્તિમાર્ચ્છત્યગ્નયે સુરભિમતે પુરોડાશમષ્ટાકપાલં
નિર્વપેદ્યસ્ય ગાવો વા પુરુષા

૯ વા પ્રમીયેરન્ યો વા બિભીયાદેષા વા અસ્ય ભેષજ્યા
તનૂર્યથ્સુરભિમતી તયૈવાસ્મૈ ભેષજં કરોતિ સુરભિમતે
ભવતિ પૂતીગન્ધસ્યાપહત્યા અગ્નયે ક્ષામવતે પુરોડાશમષ્ટાકપાલં
નિર્વપેથ્સંગ્રામે સંયત્તે ભાગધેયેનૈવૈન ँ શમયિત્વા પરાનભિ
નિર્દિશતિ યમવરેષાં વિધ્યન્તિ જીવતિ સ યં પરેષાં પ્ર સ મીયતે
જયતિ ત ँ સંગ્રામ

૧૦ મભિ વા એષ એતાનુચ્યતિ યેષાં પૂર્વાપરા અન્વઞ્ચઃ પ્રમીયન્તે
પુરુષાહુતિર્હ્યસ્ય પ્રિયતમાગ્નયે ક્ષામવતે પુરોડાશમષ્ટાકપાલં
નિર્વપેદ્ભાગધેયેનૈવૈન ँ શમયતિ નૈષાં પુરાયુષોપરઃ પ્ર
મીયતેઽભિ વા એષ એતસ્ય ગૃહાનુચ્યતિ યસ્ય ગૃહાન્દહત્યગ્નયે
ક્ષામવતે પુરોડાશમષ્ટાકપાલં નિર્વપેદ્ભાગધેયેનૈવૈન ँ
શમયતિ નાસ્યાપરં ગૃહાન્દહતિ ॥ ૨। ૨। ૨॥ વ્રતપતયે નિશિતાયાં
નિર્વપેત્પુરુષાઃ સંગ્રામં ન ચત્વારિ ચ ॥ ૨। ૨। ૨॥

૧૧ અગ્નયે કામાય પુરોડાશમષ્ટાકપાલં નિર્વપેદ્યં કામો
નોપનમેદગ્નિમેવ કામગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ સ
એવૈનં કામેન સમર્ધયત્યુપૈનં કામો નમત્યગ્નયે યવિષ્ઠાય
પુરોડાશમષ્ટાકપાલં નિર્વપેથ્સ્પર્ધમાનઃ, ક્ષેત્રે વા સજાતેષુ
વાગ્નિમેવ યવિષ્ઠગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ તેનૈવેંદ્રિયં
વીર્યં ભ્રાતૃવ્યસ્ય

૧૨ યુવતે વિ પાપ્મના ભ્રાતૃવ્યેણ જયતેઽગ્નયે યવિષ્ઠાય
પુરોડાશમષ્ટાકપાલં નિર્વપેદભિચર્યમાણોઽગ્નિમેવ યવિષ્ઠગ્ગ્
સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્માદ્રક્ષા ँસિ યવયતિ
નૈનમભિચરન્થ્ સ્તૃણુતેઽગ્નય આયુષ્મતે પુરોડાશમષ્ટાકપાલં
નિર્વપેદ્યઃ કામયેત સર્વમાયુરિયામિત્યગ્નિમેવાયુષ્મન્તગ્ગ્ સ્વેન
ભાગધેયેનોપ ધાવતિ સ એવાસ્મિ

૧૩ ન્નાયુર્દધાતિ સર્વમાયુરેત્યગ્નયે જાતવેદસે પુરોડાશમષ્ટાકપાલં
 નિર્વપેદ્ભૂતિકામોઽગ્નિમેવ જાતવેદસગ્ગ્ સ્વેન ભાગધેયેનોપ
 ધાવતિ સ એવૈનં ભૂતિં ગમયતિ ભવત્યેવાગ્નયે રુક્મતે
 પુરોડાશમષ્ટાકપાલં નિર્વપેદ્રુક્કામોઽગ્નિમેવ રુક્મન્તગ્ગ્ સ્વેન
 ભાગધેયેનોપ ધાવતિ સ એવાસ્મિન્રુચં દધાતિ રોચત એવાગ્નયે
 તેજસ્વતે પુરોડાશ

૧૪ મષ્ટાકપાલં નિર્વપેત્તેજસ્કામોઽગ્નિમેવ તેજસ્વન્તગ્ગ્ સ્વેન
 ભાગધેયેનોપ ધાવતિ સ એવાસ્મિન્તેજો દધાતિ તેજસ્વ્યેવ ભવત્યગ્નયે
 સાહન્ત્યાય પુરોડાશમષ્ટાકપાલં નિર્વપેથ્સીક્ષમાણોઽગ્નિમેવ
 સાહન્ત્યꣳ સ્વેન ભાગધેયેનોપ ધાવતિ તેનૈવ સહતે યꣳ સીક્ષતે
 ॥ ૨। ૨। ૩॥ ભ્રાતૃવ્યસ્યાઽસ્મિન્તેજસ્વતે પુરોડાશમષ્ટાત્રિꣳશચ્ચ ॥
 ૨। ૨। ૩॥

૧૫ અગ્નયેઽન્નવતે પુરોડાશમષ્ટાકપાલં નિર્વપેદ્યઃ
 કામયેતાન્નવાન્થ્સ્યામિત્યગ્નિમેવાન્નવન્તગ્ગ્ સ્વેન
 ભાગધેયેનોપ ધાવતિ સ એવૈનમન્નવન્તં કરોત્યન્નવાનેવ
 ભવત્યગ્નયેઽન્નાદાય પુરોડાશમષ્ટાકપાલં નિર્વપેદ્યઃ
 કામયેતાન્નાદઃ સ્યામિત્યગ્નિમેવાન્નાદꣳ સ્વેન ભાગધેયેનોપ ધાવતિ
 સ એવૈનમન્નાદં કરોત્યન્નાદ

૧૬ એવ ભવત્યગ્નયેઽન્નપતયે પુરોડાશમષ્ટાકપાલં નિર્વપેદ્યઃ
 કામયેતાન્નપતિઃ સ્યામિત્યગ્નિમેવાન્નપતિગ્ગ્ સ્વેન ભાગધેયેનોપ
 ધાવતિ સ એવૈનમન્નપતિં કરોત્યન્નપતિરેવ ભવત્યગ્નયે પવમાનાય
 પુરોડાશમષ્ટાકપાલં નિર્વપેદગ્નયે પાવકાયાગ્નયે શુચયે
 જ્યોગામયાવી યદગ્નયે પવમાનાય નિર્વપતિ પ્રાણમેવાસ્મિન્તેન દધાતિ
 યદગ્નયે

૧૭ પાવકાય વાચમેવાસ્મિન્તેન દધાતિ યદગ્નયે શુચય
 આયુરેવાસ્મિન્તેન દધાત્યુત યદીતાસુર્ભવતિ જીવત્યેવૈતામેવ
 નિર્વપેચ્ચક્ષુષ્કામો યદગ્નયે પવમાનાય નિર્વપતિ પ્રાણમેવાસ્મિન્તેન

દધાતિ યદગ્નયે પાવકાય વાચમેવાસ્મિન્તેન દધાતિ યદગ્નયે
શુચયે ચક્ષુરેવાસ્મિન્તેન દધા
૧૮ ત્યુત યદ્યન્ધો ભવતિ પ્રૈવ પશ્યત્યગ્નયે પુત્રવતે
પુરોડાશમષ્ટાકપાલં નિર્વપેદિંદ્રાય પુત્રિણે પુરોડાશમેકાદશકપાલં
પ્રજાકામોઽગ્નિરેવાસ્મૈ પ્રજાં પ્રજનયતિ વૃદ્ધામિંદ્રઃ પ્ર
યચ્છત્યગ્નયે રસવતેઽજક્ષીરે ચરું નિર્વપેદ્યઃ કામયેત
રસવાન્થ્સ્યામિત્યગ્નિમેવ રસવન્તગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ
સ એવૈન ઁ રસવન્તં કરોતિ
૧૯ રસવાનેવ ભવત્યજક્ષીરે ભવત્યાગ્નેયી વા એષા યદજા સાક્ષાદેવ
રસમવ રુન્ધેઽગ્નયે વસુમતે પુરોડાશમષ્ટાકપાલં નિર્વપેદ્યઃ
કામયેત વસુમાન્થ્સ્યામિત્યગ્નિમેવ વસુમન્તગ્ગ્ સ્વેન ભાગધેયેનોપ
ધાવતિ સ એવૈનં વસુમન્તં કરોતિ વસુમાનેવ ભવત્યગ્નયે વાજસૃતે
પુરોડાશમષ્ટાકપાલં નિર્વપેથ્સંગ્રામે સંયત્તે વાજં
૨૦ વા એષ સિસીર્ષતિ યઃ સંગ્રામં જિગીષત્યગ્નિઃ ખલુ વૈ દેવાનાં
વાજસૃદગ્નિમેવ વાજસૃતગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ ધાવતિ
વાજ ઁ હન્તિ વૃત્રં જયતિ તઁ સંગ્રામમથો અગ્નિરિવ
ન પ્રતિધૃષે ભવત્યગ્નયેઽગ્નિવતે પુરોડાશમષ્ટાકપાલં
નિર્વપેદ્યસ્યાગ્નાવગ્નિમભ્યુદ્ધરેયુર્નિર્દિષ્ટભાગો વા
એતયોરન્યોઽનિર્દિષ્ટભાગોઽન્યસ્તૌ સંભવન્તૌ યજમાન
૨૧ મભિ સંભવતઃ સ ઈશ્વર આર્તિમાર્તોર્યદગ્નયેઽગ્નિવતે નિર્વપતિ
ભાગધેયેનૈવૈનૌ શમયતિ નાર્તિમાર્ચ્છતિ યજમાનોઽગ્નયે જ્યોતિષ્મતે
પુરોડાશમષ્ટાકપાલં નિર્વપેદ્યસ્યાગ્નિરુદ્ધૃતોઽહુતેઽગ્નિહોત્ર
ઉદ્વાયેદપર આદીપ્યાનૂદ્ધૃત્ય ઇત્યાહુસ્તત્તથા ન કાર્યં
યદ્ભાગધેયમભિ પૂર્વ ઉદ્ધ્રિયતે કિમપરોઽભ્યુ
૨૨ દ્ધ્રિયેતેતિ તાન્યેવાવક્ષાણાનિ સંનિધાય મન્થેદિતઃ પ્રથમં
જજ્ઞે અગ્નિઃ સ્વાદ્યોનેરધિ જાતવેદાઃ । સ ગાયત્રિયા ત્રિષ્ટુભા જગત્યા
દેવેભ્યો હવ્યં વહતુ પ્રજાનન્નિતિ છન્દોભિરેવૈનગ્ગ્ સ્વાદ્યોનેઃ પ્ર

જનયત્યેષ વાવ સોઽગ્નિરિત્યાહુર્જ્યોતિસ્ત્વા અસ્ય પરાપતિતમિતિ યદગ્નયે
જ્યોતિષ્મતે નિર્વપતિ યદેવાસ્ય જ્યોતિઃ પરાપતિતં તદેવાવ રુન્ધે ॥ ૨। ૨। ૪॥
કરોત્યન્નાદો દધાતિ યદગ્નયે શુચયે ચક્ષુરેવાસ્મિન્તેન
દધાતિ કરોતિ વાજં યજમાનમુદેવાસ્ય ષટ્ચ ॥ ૨। ૨। ૪॥
૨૩ વૈશ્વાનરં દ્વાદશકપાલં નિર્વપેદ્વારુણં ચરું દધિક્રાવ્ણે
ચરુમભિશસ્યમાનો યદ્વૈશ્વાનરો દ્વાદશકપાલો ભવતિ સંવથ્સરો
વા અગ્નિર્વૈશ્વાનરઃ સંવથ્સરેણૈવૈનગ્ગ્ સ્વદયત્યપ પાપં વર્ણꣳ
હતે વારુણેનૈવૈનં વરુણપાશાન્મુઞ્ચતિ દધિક્રાવ્ણા પુનાતિ હિરણ્યં
દક્ષિણા પવિત્રં વૈ હિરણ્યં પુનાત્યેવૈનમાદ્યમસ્યાન્નં ભવત્યેતામેવ
નિર્વપેત્પ્રજાકામઃ સંવથ્સરો
૨૪ વા એતસ્યાશાન્તો યોનિં પ્રજાયૈ પશૂનાં નિર્દહતિ યોઽલં પ્રજાયૈ
સન્પ્રજાં ન વિન્દતે યદ્વૈશ્વાનરો દ્વાદશકપાલો ભવતિ સંવથ્સરો
વા અગ્નિર્વૈશ્વાનરઃ સંવથ્સરમેવ ભાગધેયેન શમયતિ સોઽસ્મૈ
શાન્તઃ સ્વાદ્યોનેઃ પ્રજાં પ્ર જનયતિ વારુણેનૈવૈનં વરુણપાશાન્મુઞ્ચતિ
દધિક્રાવ્ણા પુનાતિ હિરણ્યં દક્ષિણા પવિત્રં વૈ હિરણ્યં પુનાત્યેવૈનં
૨૫ વિન્દતે પ્રજાં વૈશ્વાનરં દ્વાદશકપાલં નિર્વપેત્ પુત્રે
જાતે યદષ્ટાકપાલો ભવતિ ગાયત્રિયૈવૈનં બ્રહ્મવર્ચસેન
પુનાતિ યન્નવકપાલસ્ત્રિવૃતૈવાસ્મિન્તેજો દધાતિ યદ્દશકપાલો
વિરાજૈવાસ્મિન્નન્નાદ્યં દધાતિ યદેકાદશકપાલસ્ત્રિષ્ટુભૈવાસ્મિન્નિંદ્રિયં
દધાતિ યદ્દ્વાદશકપાલો જગત્યૈવાસ્મિન્ પશૂન્ દધાતિ યસ્મિઞ્જાત
એતામિષ્ટિં નિર્વપતિ પૂત
૨૬ એવ તેજસ્વ્યન્નાદ ઇંદ્રિયાવી પશુમાન્ભવત્યવ વા એષ
સુવર્ગાલ્લોકાચ્છિદ્યતે યો દર્શપૂર્ણમાસયાજી સન્નમાવાસ્યાં વા પૌર્ણમાસીં
વાતિપાદયતિ સુવર્ગાય હિ લોકાય દર્શપૂર્ણમાસાવિજ્યેતે વૈશ્વાનરં
દ્વાદશકપાલં નિર્વપેદમાવાસ્યાં વા પૌર્ણમાસીં વાતિપાદ્ય સંવથ્સરો
વા અગ્નિર્વૈશ્વાનરઃ સંવથ્સરમેવ પ્રીણાત્યથો સંવથ્સરમેવાસ્મા
ઉપ દધાતિ સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યા

૨૭ અથો દેવતા એવાન્વારભ્ય સુવર્ગં લોકમેતિ વીરહા વા
એષ દેવાનાં યોઽગ્નિમુદ્વાસયતે ન વા એતસ્ય બ્રાહ્મણા
ઋતાયવઃ પુરાન્નમક્ષન્નાગ્નેયમષ્ટાકપાલં નિર્વપેદ્વૈશ્વાનરં
દ્વાદશકપાલમગ્નિમુદ્વાસયિષ્યન્, યદષ્ટાકપાલો ભવત્યષ્ટાક્ષરા
ગાયત્રી ગાયત્રોઽગ્નિર્યાવાનેવાગ્નિસ્તસ્મા આતિથ્યં કરોત્યથો યથા
જનં યતેઽવસં કરોતિ તાદૃ

૨૮ ગેવ તદ્દ્વાદશકપાલો વૈશ્વાનરો ભવતિ દ્વાદશ માસાઃ સંવત્સરઃ
સંવત્સરઃ ખલુ વા અગ્નેર્યોનિઃ સ્વામેવૈનં યોનિં ગમયત્યાદ્યમસ્યાન્નં
ભવતિ વૈશ્વાનરં દ્વાદશકપાલં નિર્વપેન્મારુતꣳ સપ્તકપાલં ગ્રામકામ
આહવનીયે વૈશ્વાનરમધિ શ્રયતિ ગાર્હપત્યે મારુતં પાપવસ્યસસ્ય
વિધૃત્યૈ દ્વાદશકપાલો વૈશ્વાનરો ભવતિ દ્વાદશ માસાઃ સંવત્સરઃ
સંવત્સરેણૈવાસ્મૈ સજાતાગ્શ્ચ્યાવયતિ મારુતો ભવતિ

૨૯ મરુતો વૈ દેવાનાં વિશો દેવવિશેનૈવાસ્મૈ મનુષ્યવિશમવ રુન્ધે
સપ્તકપાલો ભવતિ સપ્તગણા વૈ મરુતો ગણશ એવાસ્મૈ સજાતાનવ
રુન્ધેઽનૂચ્યમાન આ સાદયતિ વિશમેવાસ્મા અનુવર્ત્માનં કરોતિ ॥ ૨। ૨। ૫॥
પ્રજાકામઃ સંવત્સરઃ પુનાત્યેવૈનં પૂતસ્સમષ્ટ્યૈ તાદૃઙ્મારુતો
ભવત્યેકાન્ન ત્રિꣳશચ્ચ ॥ ૨। ૨। ૫॥

૩૦ આદિત્યં ચરું નિર્વપેથ્સંગ્રામમુપપ્રયાસ્યન્નિયં વા અદિતિરસ્યામેવ
પૂર્વે પ્રતિ તિષ્ઠન્તિ વૈશ્વાનરં દ્વાદશકપાલં નિર્વપેદાયતનં
ગત્વા સંવત્સરો વા અગ્નિર્વૈશ્વાનરઃ સંવત્સરઃ ખલુ વૈ
દેવાનામાયતનમેતસ્માદ્વા આયતનાદ્દેવા અસુરાનજયન્ યદ્વૈશ્વાનરં
દ્વાદશકપાલં નિર્વપતિ દેવાનામેવાયતને યતતે જયતિ તꣳ
સંગ્રામમેતસ્મિન્વા એતૌ મૃજાતે

૩૧ યો વિદ્વિષાણયોરન્નમત્તિ વૈશ્વાનરં દ્વાદશકપાલં
નિર્વપેદ્વિદ્વિષાણયોરન્નં જગ્ધ્વા સંવત્સરો વા અગ્નિર્વૈશ્વાનરઃ
સંવત્સરસ્વદિતમેવાત્તિ નાસ્મિન્મૃજાતે સંવત્સરાય વા એતૌ સમમાતે

યૌ સમમાતે તયોર્યઃ પૂર્વોઽભિ દ્રુહ્યતિ તં વરુણો ગૃહ્ણાતિ વૈશ્વાનરં
દ્વાદશકપાલં નિર્વપેથ્સમમાનયોઃ પૂર્વોઽભિદ્રુહ્ય સંવથ્સરો વા
અગ્નિર્વૈશ્વાનરઃ સંવથ્સરમેવાપ્ત્વા નિર્વરુણં
૩૨ પરસ્તાદભિ દ્રુહ્યતિ નૈનં વરુણો ગૃહ્ણાત્યાવ્યં વા એષ પ્રતિ
ગૃહ્ણાતિ યોઽવિં પ્રતિગૃહ્ણાતિ વૈશ્વાનરં દ્વાદશકપાલં નિર્વપેદવિં
પ્રતિગૃહ્ય સંવથ્સરો વા અગ્નિર્વૈશ્વાનરઃ સંવથ્સરસ્વદિતામેવ
પ્રતિગૃહ્ણાતિ નાવ્યં પ્રતિ ગૃહ્ણાત્યાત્મનો વા એષ માત્રામાપ્નોતિ ય
ઉભયાદત્પ્રતિગૃહ્ણાત્યશ્વં વા પુરુષં વા વૈશ્વાનરં દ્વાદશકપાલં
નિર્વપેદુભયાદત્
૩૩ પ્રતિગૃહ્ય સંવથ્સરો વા અગ્નિર્વૈશ્વાનરઃ સંવથ્સરસ્વદિતમેવ
પ્રતિ ગૃહ્ણાતિ નાત્મનો માત્રામાપ્નોતિ વૈશ્વાનરં દ્વાદશકપાલં
નિર્વપેથ્સનિમેષ્યન્થ્સંવથ્સરો વા અગ્નિર્વૈશ્વાનરો યદા ખલુ વૈ
સંવથ્સરં જનતાયાં ચરત્યથ સ ધનાર્ઘો ભવતિ યદ્વૈશ્વાનરં
દ્વાદશકપાલં નિર્વપતિ સંવથ્સરસાતામેવ સનિમભિ પ્ર ચ્યવતે
દાનકામા અસ્મૈ પ્રજા ભવન્તિ યો વૈ સંવથ્સરં
૩૪ પ્રયુજ્ય ન વિમુઞ્ચત્યપ્રતિષ્ઠાનો વૈ સ ભવત્યેતમેવ વૈશ્વાનરં
પુનરાગત્ય નિર્વપેદ્યમેવ પ્રયુઙ્ક્તે તં ભાગધેયેન વિ
મુઞ્ચતિ પ્રતિષ્ઠિત્યૈ યયા રજ્જ્વોત્તમાં ગામાજેત્તાં ભ્રાતૃવ્યાય પ્ર
હિણુયાન્નિરૃતિમેવાસ્મૈ પ્ર હિણોતિ ॥ ૨। ૨। ૬॥ મૃજાતે નિર્વરુણં
વપેદુભયાદદ્યો વૈ સંવથ્સરગ્ં ષટ્ત્રિꣳશચ્ચ ॥ ૨। ૨। ૬॥
૩૫ ઐંદ્રં ચરું નિર્વપેત્પશુકામ ઐંદ્રા વૈ પશવ ઇંદ્રમેવ સ્વેન
ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ પશૂન્ પ્ર યચ્છતિ પશુમાનેવ ભવતિ
ચરુર્ભવતિ સ્વાદેવાસ્મૈ યોનેઃ પશૂન્ પ્ર જનયતીંદ્રાયેંદ્રિયાવતે
પુરોડાશમેકાદશકપાલં નિર્વપેત્પશુકામ ઇંદ્રિયં વૈ પશવ
ઇંદ્રમેવેંદ્રિયાવન્તગ્ં સ્વેન ભાગધેયેનોપ ધાવતિ સ
૩૬ એવાસ્મા ઇંદ્રિયં પશૂન્પ્ર યચ્છતિ પશુમાનેવ ભવતીંદ્રાય
ઘર્મવતે પુરોડાશમેકાદશકપાલં નિર્વપેદ્બ્રહ્મવર્ચસકામો

બ્રહ્મવર્ચસં વૈ ઘર્મ ઇંદ્રમેવ ઘર્મવન્તગ્ગ્ં સ્વેન
ભાગધેયેનોપ ધાવતિ સ એવાસ્મિન્બ્રહ્મવર્ચસં દધાતિ બ્રહ્મવર્ચસ્યેવ
ભવતીંદ્રાયાર્કવતે પુરોડાશમેકાદશકપાલં નિર્વપેદન્નકામોઽર્કો
વૈ દેવાનામન્નમિંદ્રમેવાર્કવન્તગ્ગ્ં સ્વેન ભાગધેયેનો
૩૭ ૫ ધાવતિ સ એવાસ્મા અન્નં પ્ર યચ્છત્યન્નાદ એવ ભવતીંદ્રાય
ઘર્મવતે પુરોડાશમેકાદશકપાલં નિર્વપેદિંદ્રાયેંદ્રિયાવત
ઇંદ્રાયાર્કવતે ભૂતિકામો યદિંદ્રાય ઘર્મવતે નિર્વપતિ શિર
એવાસ્ય તેન કરોતિ યદિંદ્રાયેંદ્રિયાવત આત્માનમેવાસ્ય તેન કરોતિ
યદિંદ્રાયાર્કવતે ભૂત એવાન્નાદ્યે પ્રતિ તિષ્ઠતિ ભવત્યેવેંદ્રાયા
૩૮ ૬ઁ હોમુચે પુરોડાશમેકાદશકપાલં નિર્વપેદ્યઃ પાપ્મના ગૃહીતઃ
સ્યાત્પાપ્મા વા અઁહ ઇંદ્રમેવાઁહોમુચગ્ગ્ં સ્વેન ભાગધેયેનોપ
ધાવતિ સ એવૈનં પાપ્મનોઽગ્ંહસો મુઞ્ચતીંદ્રાય વૈમૃધાય
પુરોડાશમેકાદશકપાલં નિર્વપેદ્યં મૃધોઽભિ પ્રવેપેરન્રાષ્ટ્રાણિ
વાભિ સમિયુરિંદ્રમેવ વૈમૃધરઁ સ્વેન ભાગધેયેનોપ ધાવતિ
સ એવાસ્માન્મૃધો
૩૯ ૬૫ હન્તીંદ્રાય ત્રાત્રે પુરોડાશમેકાદશકપાલં નિર્વપેદ્બદ્ધો
વા પરિયત્તો વેંદ્રમેવ ત્રાતારગ્ગ્ં સ્વેન ભાગધેયેનોપ ધાવતિ
સ એવૈનં ત્રાયત ઇંદ્રાયાર્કાશ્વમેધવતે પુરોડાશમેકાદશકપાલં
નિર્વપેદ્યં મહાયજ્ઞો નોપનમેદેતે વૈ મહાયજ્ઞસ્યાન્ત્યે તનૂ
યદર્કાશ્વમેધાવિંદ્રમેવાર્કાશ્વમેધવન્તગ્ગ્ં સ્વેન ભાગધેયેનોપ
ધાવતિ સ એવાસ્મા અન્તતો મહાયજ્ઞં ચ્યાવયત્યુપૈનં મહાયજ્ઞો નમતિ ॥
૨। ૨। ૭॥ ઇંદ્રિયાવંતગ્ગ્ં સ્વેન ભાગધેયેનોપ ધાવતિ સોઽર્કવંતગ્ગ્ં
સ્વેન ભાગધેયેનૈવેંદ્રાયાસ્માન્મૃધોઽસ્મૈ સપ્ત ચ ॥ ૨। ૨। ૭॥
૪૦ ઇંદ્રાયાન્વૃજવે પુરોડાશમેકાદશકપાલં નિર્વપેદ્ગ્રામકામ
ઇંદ્રમેવાન્વૃજુગ્ગ્ં સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ
સજાતાનનુકાન્કરોતિ ગ્રામ્યેવ ભવતીંદ્રાણ્યૈ ચરું નિર્વપેદ્યસ્ય
સેનાસઁશિતેવ સ્યાદિંદ્રાણી વૈ સેનાયૈ દેવતેંદ્રાણીમેવ સ્વેન

ભાગધેયેનોપ ધાવતિ સૈવાસ્ય સેના સર શ્યતિ બલ્બજાનપી

૪૧ ધ્મે સં નહ્યેદ્ગૌર્યત્રાધિષ્કન્ના ન્યમેહત્તતો બલ્બજા

ઉદતિષ્ઠન્ગવામેવૈનં ન્યાયમપિનીય ગા વેદયતીંદ્રાય મન્યુમતે

મનસ્વતે પુરોડાશમેકાદશકપાલં નિર્વપેથ્સંગ્રામે સંયત્ત ઇંદ્રિયેણ

વૈ મન્યુના મનસા સંગ્રામં જયતીંદ્રમેવ મન્યુમન્તં મનસ્વન્તગ્ગ્

સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મિન્નિંદ્રિયં મન્યું મનો દધાતિ

જયતિ ત

૪૨ સંગ્રામમેતામેવ નિર્વપેદ્યો હતમનાઃ સ્વયં પાપ ઇવ

સ્યાદેતાનિ હિ વા એતસ્માદપક્રાન્તાન્યથૈષ હતમનાઃ સ્વયં પાપ

ઇંદ્રમેવ મન્યુમન્તં મનસ્વન્તગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ

સ એવાસ્મિન્નિંદ્રિયં મન્યું મનો દધાતિ ન હતમનાઃ સ્વયં પાપો

ભવતીંદ્રાય દાત્રે પુરોડાશમેકાદશકપાલં નિર્વપેદ્યઃ કામયેત

દાનકામા મે પ્રજાઃ સ્યુ

૪૩ રિતીંદ્રમેવ દાતારગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ

દાનકામાઃ પ્રજાઃ કરોતિ દાનકામા અસ્મૈ પ્રજા ભવન્તીંદ્રાય

પ્રદાત્રે પુરોડાશમેકાદશકપાલં નિર્વપેદ્યસ્મૈ પ્રત્તમિવ સન્ન

પ્રદીયેતેંદ્રમેવ પ્રદાતારગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ

સ એવાસ્મૈ પ્ર દાપયતીંદ્રાય સુત્રામ્ણે પુરોડાશમેકાદશકપાલં

નિર્વપેદપરુદ્ધો વા

૪૪ ઽપરુધ્યમાનો વેંદ્રમેવ સુત્રામાણગ્ગ્ સ્વેન ભાગધેયેનોપ ધાવતિ

સ એવૈનં ત્રાયતેઽનપરુધ્યો ભવતીંદ્રો વૈ સદૃઙ્ગેવતાભિરાસીથ્સ

ન વ્યાવૃતમગચ્છથ્સ પ્રજાપતિમુપાધાવત્તસ્મા

એતમૈંદ્રમેકાદશકપાલં નિરવપત્તેનૈવાસ્મિન્નિંદ્રિયમદધાચ્છક્વરી

યાજ્યાનુવાક્યે અકરોદ્વજ્રો વૈ શક્વરી સ એનં વજ્રો ભૂત્યા ઐન્ધ

૪૫ સોઽભવથ્સોઽબિભેદ્ભૂતઃ પ્ર મા ધક્ષ્યતીતિ સ પ્રજાપતિં

પુનરુપાધાવથ્સ પ્રજાપતિઃ શક્વર્યા અધિ રેવતીં નિરમિમીત

શાન્ત્યા અપ્રદાહાય યોઽલગ્ગ્ શ્રિયૈ સન્થ્સદૃઙ્ખ્સમાનૈઃ સ્યાત્તસ્મા

એતમૈંદ્રમેકાદશકપાલં નિર્વપેદિંદ્રમેવ સ્વેન ભાગધેયેનોપ
ધાવતિ સ એવાસ્મિન્નિંદ્રિયં દધાતિ રેવતી પુરોઽનુવાક્યા ભવતિ શાન્ત્યા
અપ્રદાહાય શક્વરી યાજ્યા વજ્રો વૈ શક્વરી સ એનં વજ્રો ભૂત્યા ઇન્ધે
ભવત્યેવ ॥ ૨। ૨। ૮॥ અપિ તગ્ગ્ સ્યુર્વૈન્ધ ભવતિ ચતુર્દશ ચ ॥ ૨। ૨। ૮॥

૪૬ આગ્નાવૈષ્ણવમેકાદશકપાલં નિર્વપેદભિ ચરન્થ્સરસ્વત્યાજ્યભાગા
સ્યાદ્બાર્હસ્પત્યશ્ચરુર્યદાગ્નાવૈષ્ણવ એકાદશકપાલો ભવત્યગ્નિઃ
સર્વા દેવતા વિષ્ણુર્યજ્ઞો દેવતાભિશ્ચૈવૈનં યજ્ઞેન
ચાભિ ચરતિ સરસ્વત્યાજ્યભાગા ભવતિ વાગ્વૈ સરસ્વતી
વાચૈવૈનમભિ ચરતિ બાર્હસ્પત્યશ્ચરુર્ભવતિ બ્રહ્મ વૈ દેવાનાં
બૃહસ્પતિર્બ્રહ્મણૈવૈનમભિ ચરતિ

૪૭ પ્રતિ વૈ પરસ્તાદભિચરન્તમભિ ચરન્તિ દ્વે દ્વે પુરોઽનુવાક્યે
કુર્યાદતિ પ્રયુક્ત્યા એતયૈવ યજેતાભિચર્યમાણો દેવતાભિરેવ
દેવતાઃ પ્રતિચરતિ યજ્ઞેન યજ્ઞં વાચા વાચં બ્રહ્મણા
બ્રહ્મ સ દેવતાશ્ચૈવ યજ્ઞં ચ મધ્યતો વ્યવસર્પતિ તસ્ય
ન કુતશ્ચનોપાવ્યાધો ભવતિ નૈનમભિચરન્થ્ સ્તૃણુત
આગ્નાવૈષ્ણવમેકાદશકપાલં નિર્વપેદ્યં યજ્ઞો નો

૪૮ પનમેદગ્નિઃ સર્વા દેવતા વિષ્ણુર્યજ્ઞોઽગ્નિં ચૈવ વિષ્ણું ચ
સ્વેન ભાગધેયેનોપ ધાવતિ તાવેવાસ્મૈ યજ્ઞં પ્ર યચ્છત ઉપૈનં
યજ્ઞો નમત્યાગ્નાવૈષ્ણવં ઘૃતે ચરું નિર્વપેચ્ચક્ષુષ્કામોઽગ્નેર્વૈ
ચક્ષુષા મનુષ્યા વિ પશ્યન્તિ યજ્ઞસ્ય દેવા અગ્નિં ચૈવ વિષ્ણું ચ
સ્વેન ભાગધેયેનોપ ધાવતિ તાવેવા

૪૯ ઽસ્મિંચ્ચક્ષુર્ધત્તશ્ચક્ષુષ્માનેવ ભવતિ ધેન્વૈ વા એતદ્રેતો
યદાજ્યમનડુહસ્તણ્ડુલા મિથુનાદેવાસ્મૈ ચક્ષુઃ પ્ર જનયતિ
ઘૃતે ભવતિ તેજો વૈ ઘૃતં તેજશ્ચક્ષુસ્તેજસૈવાસ્મૈ
તેજશ્ચક્ષુરવ રુન્ધ ઇંદ્રિયં વૈ વીર્યં વૃઙ્ક્તે ભ્રાતૃવ્યો
યજમાનોઽયજમાનસ્યાધ્વરકલ્પાં પ્રતિ નિર્વપેદ્ભ્રાતૃવ્યે યજમાને
નાસ્યેંદ્રિયં

૫૦ વીર્યં વૃઙ્ક્તે પુરા વાચઃ પ્રવદિતોર્નિર્વપેદ્યાવત્યેવ
વાક્તામપ્રોદિતાં ભ્રાતૃવ્યસ્ય વૃઙ્ક્તે તામસ્ય વાચં
પ્રવદન્તીમન્યા વાચોઽનુ પ્ર વદન્તિ તા ઇંદ્રિયં વીર્યં યજમાને
દધત્યાગ્નાવૈષ્ણવમષ્ટાકપાલં નિર્વપેત્પ્રાતઃસવનસ્યાકાલે
સરસ્વત્યાજ્યભાગા સ્યાદ્બાર્હસ્પત્યશ્ચરુર્યદષ્ટાકપાલો
ભવત્યષ્ટાક્ષરા ગાયત્રી ગાયત્રં પ્રાતઃ સવનં પ્રાતઃ સવનમેવ
તેનાપ્નો

૫૧ ત્યાગ્નાવૈષ્ણવમેકાદશકપાલં નિર્વપેન્માધ્યન્દિનસ્ય સવનસ્યાકાલે
સરસ્વત્યાજ્યભાગા સ્યાદ્બાર્હસ્પત્યશ્ચરુર્યદેકાદશકપાલો
ભવત્યેકાદશાક્ષરા ત્રિષ્ટુપ્ત્રૈષ્ટુભં માધ્યન્દિન ँ
સવનં માધ્યન્દિનમેવ સવનં તેનાપ્નોત્યાગ્નાવૈષ્ણવં
દ્વાદશકપાલં નિર્વપેત્તૃતીયસવનસ્યાકાલે સરસ્વત્યાજ્યભાગા
સ્યાદ્બાર્હસ્પત્યશ્ચરુર્યદ્દ્વાદશકપાલો ભવતિ દ્વાદશાક્ષરા જગતી
જાગતં તૃતીયસવનં તૃતીયસવનમેવ તેનાપ્નોતિ દેવતાભિરેવ દેવતાઃ

૫૨ પ્રતિચરતિ યજ્ઞેન યજ્ઞં વાચા વાચં બ્રહ્મણા બ્રહ્મ
કપાલૈરેવ છન્દાગ્ંસ્યાપ્નોતિ પુરોડાશૈઃ સવનાનિ મૈત્રાવરુણમેકકપાલં
નિર્વપેદ્વશાયૈ કાલે યૈવાસૌ ભ્રાતૃવ્યસ્ય વશાનૂબન્ધ્યાસો
એવૈષૈતસ્યૈકકપાલો ભવતિ ન હિ કપાલૈઃ પશુમર્હત્યાપ્તુમ્ ॥ ૨। ૨। ૯॥
બ્રહ્મણૈવૈનમભિ ચરતિ યજ્ઞો ન તાવેવાઽસ્યેંદ્રિયમાપ્નોતિ દેવતાઃ
સપ્તત્રિँશચ્ચ ॥ ૨। ૨। ૯॥

૫૩ અસાવાદિત્યો ન વ્યરોચત તસ્મૈ દેવાઃ પ્રાયશ્ચિત્તિમૈચ્છન્તસ્મા
એતँ સોમારૌદ્રં ચરું નિરવપન્તેનૈવાસ્મિન્રુચમદધુર્યો
બ્રહ્મવર્ચસકામઃ સ્યાત્તસ્મા એતँ સોમારૌદ્રં ચરું નિર્વપેત્સોમં
ચૈવ રુદ્રં ચ સ્વેન ભાગધેયેનોપ ધાવતિ તાવેવાસ્મિન્બ્રહ્મવર્ચસં
ધત્તો બ્રહ્મવર્ચસ્યેવ ભવતિ તિષ્યાપૂર્ણમાસે નિર્વપેદ્રુદ્રો

૫૪ વૈ તિષ્યઃ સોમઃ પૂર્ણમાસઃ સાક્ષાદેવ બ્રહ્મવર્ચસમવ રુન્ધે
પરિશ્રિતે યાજયતિ બ્રહ્મવર્ચસસ્ય પરિગૃહીત્યૈ શ્વેતાયૈ શ્વેતવત્સાયૈ

દુગ્ધં મથિતમાજ્યં ભવત્યાજ્યં પ્રોક્ષણમાજ્યેન માર્જયન્તે યાવદેવ
બ્રહ્મવર્ચસં તથ્સર્વં કરોત્યતિ બ્રહ્મવર્ચસં ક્રિયત ઇત્યાહુરીશ્વરો
દુશ્ચર્મા ભવિતોરિતિ માનવી ઋચૌ ધાય્યે કુર્યાદ્યદ્વૈ કિં ચ
મનુરવદત્તદ્ભેષજં
૫૫ ભેષજમેવાસ્મૈ કરોતિ યદિ બિભીયાદ્દુશ્ચર્મા ભવિષ્યામીતિ
સોમાપૌષ્ણં ચરું નિર્વપેથ્સૌમ્યો વૈ દેવતયા પુરુષઃ પૌષ્ણાઃ પશવઃ
સ્વયૈવાસ્મૈ દેવતયા પશુભિસ્ત્વચં કરોતિ ન દુશ્ચર્મા ભવતિ
સોમારૌદ્રં ચરું નિર્વપેત્પ્રજાકામઃ સોમો વૈ રેતોધા અગ્નિઃ પ્રજાનાં
પ્રજનયિતા સોમ એવાસ્મૈ રેતો દધાત્યગ્નિઃ પ્રજાં પ્ર જનયતિ વિન્દતે
૫૬ પ્રજાઁ સોમારૌદ્રં ચરું નિર્વપેદભિચરન્થ્સૌમ્યો વૈ દેવતયા
પુરુષ એષ રુદ્રો યદગ્નિઃ સ્વાયા એવૈનં દેવતાયૈ નિષ્ક્રીયરુદ્રાયાપિ
દધાતિ તાજગાર્તિમાર્ચ્છતિ સોમારૌદ્રં ચરું નિર્વપેજ્જ્યોગામયાવી સોમં વા
એતસ્ય રસો ગચ્છત્યગ્નિઁ શરીરં યસ્ય જ્યોગામયતિ સોમાદેવાસ્ય
રસં નિષ્ક્રીણાત્યગ્નેઃ શરીરમુત યદી
૫૭ તાસુર્ભવતિ જીવત્યેવ સોમારુદ્રયોર્વા એતં ગ્રસિતઁ હોતા
નિષ્ખિદતિ સ ઈશ્વર આર્તિમાર્તોરનડ્વાન્, હોત્રા દેયો વહ્નિર્વા અનડ્વાન્,
વહ્નિર્હોતા વહ્નિનૈવ વહ્નિમાત્માનગ્ંસ્પૃણોતિ સોમારૌદ્રં ચરું
નિર્વપેદ્યઃ કામયેત સ્વેઽસ્મા આયતને ભ્રાતૃવ્યં જનયેયમિતિ
વેદિં પરિગૃહ્યાર્ધમુદ્ધન્યાદર્ધં નાર્ધં બર્હિષઃ સ્તૃણીયાદર્ધં
નાર્ધમિધ્મસ્યાભ્યાદધ્યાદર્ધં ન સ્વ એવાસ્મા આયતને ભ્રાતૃવ્યં જનયતિ
॥ ૨। ૨। ૧૦॥ રુદ્રો ભેષજં વિંદતે યદિ સ્તૃણીયાદર્ધં દ્વાદશ ચ ॥
૨। ૨। ૧૦॥
૫૮ ઐંદ્રમેકાદશકપાલં નિર્વપેન્મારુતઁ સપ્તકપાલં ગ્રામકામ
ઇંદ્રં ચૈવ મરુતશ્ચ સ્વેન ભાગધેયેનોપ ધાવતિ ત એવાસ્મૈ
સજાતાન્ પ્ર યચ્છન્તિ ગ્રામ્યેવ ભવત્યાહવનીય ઐંદ્રમધિ શ્રયતિ
ગાર્હપત્યે મારુતં પાપવસ્યસસ્ય વિધૃત્યૈ સપ્તકપાલો મારુતો ભવતિ
સપ્તગણા વૈ મરુતો ગણશ એવાસ્મૈ સજાતાનવ રુન્ધેઽનૂચ્યમાન

આ સાદયતિ  વિશમેવા

૫૯ ઽસ્મા  અનુવર્ત્માનં કરોત્યેતામેવ નિર્વપેદ્યઃ કામયેત ક્ષત્રાય
ચ વિશે ચ  સમદં  દધ્યામિત્યૈંદ્રસ્યાવદ્યન્ બ્રૂયાદિંદ્રાયાનુ
બ્રૂહીત્યાશ્રાવ્ય  બ્રૂયાન્મરુતો  યજેતિ  મારુતસ્યાવદ્યન્ બ્રૂયાન્મરુદ્ભ્યોઽનુ
બ્રૂહીત્યાશ્રાવ્ય  બ્રૂયાદિંદ્રં  યજેતિ  સ્વ એવૈભ્યો  ભાગધેયે  સમદં
દધાતિ વિતૃꣳહાણાસ્તિષ્ઠન્ત્યેતામેવ

૬૦ નિર્વપેદ્યઃ કામયેત  કલ્પેરન્નિતિ  યથાદેવતમવદાય
યથાદેવતં યજેદ્ભાગધેયેનૈવૈનાન્, યથાયથં કલ્પયતિ  કલ્પન્ત
એવૈંદ્રમેકાદશકપાલં  નિર્વપેદ્વૈશ્વદેવં દ્વાદશકપાલં  ગ્રામકામ
ઇંદ્રં  ચૈવ વિશ્વાગ્શ્ચ દેવાન્થ્સ્વેન  ભાગધેયેનોપ  ધાવતિ  ત
એવાસ્મૈ  સજાતાન્ પ્ર યચ્છન્તિ ગ્રામ્યેવ ભવત્યૈંદ્રસ્યાવદાય
વૈશ્વદેવસ્યાવદ્યેદથૈંદ્રસ્યો

૬૧ પરિષ્ટાદિંદ્રિયેણૈવાસ્મા  ઉભયતઃ  સજાતાન્પરિ  ગૃહ્ણાત્યુપાધાય્યપૂર્વયં
વાસો  દક્ષિણા સજાતાનામુપહિત્યૈ  પૃશ્નિયૈ દુગ્ધે પ્રૈયઙ્ગવં ચરું
નિર્વપેન્મરુદ્ભ્યો  ગ્રામકામઃ  પૃશ્નિયૈ  વૈ પયસો મરુતો  જાતાઃ
પૃશ્નિયૈ પ્રિયઙ્ગવો મારુતાઃ ખલુ  વૈ દેવતયા સજાતા મરુત  એવ
સ્વેન  ભાગધેયેનોપ  ધાવતિ  ત એવાસ્મૈ  સજાતાન્ પ્ર યચ્છન્તિ ગ્રામ્યેવ
ભવતિ પ્રિયવતી યાજ્યાનુવાક્યે

૬૨ ભવતઃ પ્રિયમેવૈનꣳસમાનાનાં  કરોતિ દ્વિપદા  પુરોઽનુવાક્યા  ભવતિ
દ્વિપદ  એવાવ  રુન્ધે  ચતુષ્પદા યાજ્યા  ચતુષ્પદ એવ પશૂનવ
રુન્ધે દેવાસુરાઃ સંયત્તા આસન્ તે દેવા મિથો વિપ્રિયા આસન્તે૧ઽન્યોઽન્યસ્મૈ
જ્યૈષ્ઠ્યાયાતિષ્ઠમાનાશ્ચતુર્ધા વ્યક્રામન્નગ્નિર્વસુભિઃ  સોમો  રુદ્રૈરિંદ્રો
મરુદ્ભિર્વરુણ આદિત્યૈઃ સ ઇંદ્રઃ  પ્રજાપતિમુપાધાવત્ત

૬૩ મેતયા  સંજ્ઞાન્યાયાજયદગ્નયે  વસુમતે પુરોડાશમષ્ટાકપાલં
નિરવપથ્સોમાય રુદ્રવતે ચરુમિંદ્રાય મરુત્વતે
પુરોડાશમેકાદશકપાલં  વરુણાયાદિત્યવતે ચરું તતો  વા ઇંદ્રં  દેવા
જ્યૈષ્ઠ્યાયાભિ સમજાનત  યઃ સમાનૈર્મિથો વિપ્રિયઃ  સ્યાત્તમેતયા

સંજ્ઞાન્યા યાજયેદગ્નયે વસુમતે પુરોડાશમષ્ટાકપાલં નિર્વપેથ્સોમાય
રુદ્રવતે ચરુમિંદ્રાય મરુત્વતે પુરોડાશમેકાદશકપાલં
વરુણાયાદિત્યવતે ચરુમિંદ્રમેવૈનં ભૂતં જ્યૈષ્ઠ્યાય સમાના
અભિ સં જાનતે વસિષ્ઠઃ સમાનાનાં ભવતિ ॥ ૨। ૨। ૧૧॥ વિશમેવ
તિષ્ઠંત્યેતામેવાથૈંદ્રસ્ય યાજ્યાનુવાક્યે તં વરુણાય ચતુર્દશ ચ ॥

૨। ૨। ૧૧॥

૬૪ હિરણ્યગર્ભ આપો હ યત્ પ્રજાપતે । સ વેદ પુત્રઃ
પિતરꣳ સ માતરꣳ સ સૂનુર્ભુવથ્સ ભુવત્પુનર્મઘઃ । સ
દ્યામૌર્ણોદન્તરિક્ષꣳ સ સુવઃ સ વિશ્વા ભુવો અભવથ્સ આભવત્
॥ ઉદુ ત્યં ચિત્રમ્ ॥ સ પ્રત્નવન્નવીયસાગ્ને દ્યુમ્નેન સંયતા ।
બૃહત્તતન્થ ભાનુના ॥ નિ કાવ્યા વેધસઃ શશ્વતસ્કર્હસ્તે દધાનો
૬૫ નર્યા પુરૂ ણિ । અગ્નિર્ભુવદ્રયિપતી રયીણાꣳ સત્રા ચક્રાણો
અમૃતાનિ વિશ્વા ॥ હિરણ્યપાણિમૂતયે સવિતારમુપ હ્વયે । સ ચેત્તા
દેવતા પદમ્ ॥ વામમદ્ય સવિતર્વામમુ શ્વો દિવેદિવે વામમસ્મભ્યꣳ
સાવીઃ । વામસ્ય હિ ક્ષયસ્ય દેવ ભૂરેરયા ધિયા વામભાજઃ સ્યામ ॥
બડિત્થા પર્વતાનાં ખિદ્રં બિભર્ષિ પૃથિવિ । પ્ર યા ભૂમિ પ્રવત્વતિ મહ્ના
જિનોષિ
૬૬ મહિનિ ॥ સ્તોમાસસ્ત્વા વિચારિણિ પ્રતિષ્ટોભન્ત્યક્તુભિઃ । પ્ર યા વાજં
ન હેષન્તં પેરુમસ્યસ્યર્જુનિ ॥ ઋદૂદરેણ સખ્યા સચેય
યો મા ન રિષ્યેદ્ધર્યશ્વ પીતઃ । અયં યઃ સોમો ન્યધાય્યસ્મે તસ્મા
ઇંદ્રં પ્રતિરમેમ્યચ્છ ॥ આપાન્તમન્યુસ્તૃપલ પ્રભર્મા ધુનિઃ
શિમીવાઞ્છરુમાꣳ ઋજીષી । સોમો વિશ્વાન્યતસા વનાનિ નાર્વાગિંદ્રં
પ્રતિમાનાનિ દેભુઃ ॥ પ્ર
૬૭ સુવાનઃ સોમ ઋતયુશ્ચિકેતેંદ્રાય બ્રહ્મ જમદગ્નિરર્ચન્ન્ ।
વૃષા યન્તાસિ શવસસ્તુરસ્યાન્તર્યચ્છ ગૃણતે ધર્ત્રં દૃꣳહ ॥
સબાધસ્તે મદંચ શુષ્મયં ચ બ્રહ્મ નરો બ્રહ્મકૃતઃ સપર્યન્ન્ ।

અર્કો વા યત્તુરતે સોમચક્ષાસ્તત્રેદિંદ્રો દધતે પૃથ્સુ તુર્યામ્ ॥ વષટ્
તે વિષ્ણવાસ આ કૃણોમિ તન્મે જુષસ્વ શિપિવિષ્ટ હવ્યમ્ ।
૬૮ વર્ધન્તુ ત્વા સુષ્ટુતયો ગિરો મે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥
પ્રતત્તે અદ્ય શિપિવિષ્ટ નામાર્યઃ શꣳસામિ વયુનાનિ વિદ્વાન્ । તં ત્વા
ગૃણામિ તવસમતવીયાન્ ક્ષયન્તમસ્ય રજસઃ પરાકે ॥ કિમિત્તે વિષ્ણો
પરિચક્ષ્યં ભૂત્ પ્ર યદ્વવ ક્ષે શિપિવિષ્ટો અસ્મિ । મા વર્પો અસ્મદપ
ગૂહ એતદ્યદન્યરૂપઃ સમિથે બભૂથ ॥
૬૯ અગ્ને દા દાશુષે રયિં વીરવન્તં પરીણસમ્ । શિશીહિ નઃ સૂનુમતઃ
॥ દા નો અગ્ને શતિનો દાઃ સહસ્રિણો દુરો ન વાજꣳ શ્રુત્યા અપા વૃધિ ।
પ્રાચી દ્યાવાપૃથિવી બ્રહ્મણા કૃધિ સુવર્ણ શુક્રમુષસો વિ દિદ્યુતુઃ ॥
અગ્નિર્દા દ્રવિણં વીરપેશા અગ્નિરૃષિં યઃ સહસ્રા સનોતિ । અગ્નિર્દિવિ
હવ્યમાતતાનાગ્નેર્ધામાનિ વિભૃતા પુરુત્રા ॥ મા
૭૦ નો મર્ધીરા તૂ ભર ॥ ઘૃતં ન પૂતં તનૂરરેપાઃ શુચિ હિરણ્યમ્ ।
તત્તે રુક્મો ન રોચત સ્વધાવઃ । ઉભે સુશ્ચંદ્ર સર્પિષો દર્વી શ્રીણીષ
આસનિ । ઉતો ન ઉત્પુપૂર્યા ઉક્થેષુ શવસસ્પત ઇષꣳ સ્તોતૃભ્ય આ
ભર ॥ વાયો શતꣳ હરીણાં યુવસ્વ પોષ્યાનામ્ । ઉત વા તે સહસ્રિણો
રથ આ યાતુ પાજસા ॥ પ્ર યાભિ
૭૧ ર્યાસિ દાશ્વાꣳ સમચ્છા નિયુદ્ભિર્વાયવિષ્ટયે દુરોણે । નિ નો
રયિꣳ સુભોજસં યુવેહ નિ વીરવદ્ગવ્યમશ્વિયં ચ રાધઃ ॥
રેવતીર્નઃ સધમાદ ઇંદ્રે સન્તુ તુવિવાજાઃ । ક્ષુમન્તો યાભિર્મદેમ
॥ રેવાꣳ ઇદ્રેવતઃ સ્તોતા સ્યાત્ત્વાવતો મઘોનઃ । પ્રે દુ હરિવઃ
શ્રુતસ્ય ॥ ૨। ૨। ૧૨॥ દધાનો જિનોષિ દેભુઃ પ્ર હવ્યં બભૂથ મા
યાભિશ્ચત્વારિꣳશચ્ચ ॥ ૨। ૨। ૧૨॥
પ્રજાપતિસ્તાસ્સૃષ્ટા અગ્નયે પથિકૃતેઽગ્નયે કામાયાગ્નયેઽન્નવતે
વૈશ્વાનરમાદિત્યં ચરુમૈંદ્રં ચરુમિંદ્રાયાન્વૃજવ આગ્નાવૈષ્ણવમસૌ
સોમારૌદ્રમૈંદ્રમેકાદશકપાલꣳ હિરણ્યગર્ભો દ્વાદશ ॥

પ્રજાપતિરગ્નયે કામાયાઽભિ સં ભવતો યો વિદ્વિષાણયોરિધ્મે
સંનહ્યેદાગ્નાવૈષ્ણવમુપરિષ્ટાધાસિ દાશ્વાꣳ સમેકસમ્મતિઃ ॥
પ્રજાપતિઃ પ્રેદુ હરિ વઃ શ્રુતસ્ય ॥

## દ્વિતીયકાણ્ડે તૃતીયઃ પ્રશ્નઃ ૩

૧ આદિત્યેભ્યો ભુવદ્વદ્ભ્યશ્ચરું નિર્વપેદ્ભૂતિકામ આદિત્યા વા એતં
ભૂત્યૈ પ્રતિ નુદન્તે યોઽલં ભૂત્યૈ સન્ભૂતિં ન પ્રાપ્નોત્યાદિત્યાનેવ
ભુવદ્વતઃ સ્વેન ભાગધેયેનોપ ધાવતિ ત એવૈનં ભૂતિં ગમયન્તિ
ભવત્યેવાઽદિત્યેભ્યો ધારયદ્વદ્ભ્યશ્ચરું નિર્વપેદપરુદ્ધો
વાપરુધ્યમાનો વાઽદિત્યા વા અપરોદ્ધાર આદિત્યા અવગમયિતાર આદિત્યાનેવ
ધારયદ્વતઃ
૨ સ્વેન ભાગધેયેનોપ ધાવતિ ત એવૈનં વિશિ દાધ્રત્યનપરુધ્યો
ભવત્યદિતેઽનુ મન્યસ્વેત્યપરુધ્યમાનોઽસ્ય પદમા દદીતેયં વા
અદિતિરિયમેવાસ્મૈ રાજ્યમનુ મન્યતે સત્યાશીરિત્યાહ સત્યામેવાશિષં
કુરુત ઇહ મન ઇત્યાહ પ્રજા એવાસ્મૈ સમનસઃ કરોત્યુપ પ્રેત મરુતઃ
૩ સુદાનવ એના વિશ્પતિનાભ્યમુꣳ રાજાનમિત્યાહ મારુતી વૈ વિડ્જ્યેષ્ઠો
વિશ્પતિર્વિશૈવૈનꣳરાષ્ટ્રેણ સમર્ધયતિ યઃ પરસ્તાદ્ગ્રામ્યવાદી
સ્યાત્તસ્ય ગૃહાદ્વ્રીહીના હરેચ્છુક્લાગ્શ્ચ કૃષ્ણાગ્શ્ચ વિ ચિનુયા દ્યે
શુક્લાઃ સ્યુસ્તમાદિત્યં ચરું નિર્વપેદાદિત્યા વૈ દેવતયા વિડ્વિશમેવાવ
ગચ્છ
૪ ત્યવગતાસ્ય વિડનવગતꣳ રાષ્ટ્રમિત્યાહુર્યે કૃષ્ણાઃ સ્યુસ્તં
વારુણં ચરું નિર્વપેદ્વારુણં વૈ રાષ્ટ્રમુભે એવ વિશં ચ
રાષ્ટ્રં ચાવ ગચ્છતિ યદિ નાવગચ્છેદિમમહમાદિત્યેભ્યો ભાગં
નિર્વપામ્યામુષ્માદમુષ્યૈ વિશોઽવગન્તોરિતિ નિર્વપેદાદિત્યા એવૈનં
ભાગધેયં પ્રેપ્સન્તો વિશમવ
૫ ગમયન્તિ યદિ નાવગચ્છેદાશ્વત્થાન્મયૂખાન્થ્સપ્ત મધ્યમેષાયામુપ

હન્યાદિદમહમાદિત્યાન્બધ્નામ્યામુષ્માદમુષ્યૈ વિશોઽવગન્તોરિત્યાદિત્યા
એવૈનં બદ્ધવીરા વિશમવ ગમયન્તિ યદિ નાવગચ્છેદેતમેવાદિત્યં
ચરું નિર્વપેદિધ્મેઽપિ મયૂખાન્થ્સં નહ્યેદનપરુધ્યમેવાવ
ગચ્છત્યાશ્વત્થા ભવન્તિ મરુતાં વા એતદોજો યદશ્વત્થ ઓજસૈવ
વિશમવ ગચ્છતિ સપ્ત ભવન્તિ સપ્તગણા વૈ મરુતો ગણશ
એવ વિશમવ ગચ્છતિ ॥ ૨। ૩। ૧॥ ધારયદ્ભતો મરુતો ગચ્છતિ
વિશમવૈતદષ્ટાદશ ચ ॥ ૨। ૩। ૧॥

૬ દેવા વૈ મૃત્યોરબિભયુસ્તે પ્રજાપતિમુપાધાવન્તેભ્ય એતાં
પ્રાજાપત્યાઁ શતકૃષ્ણલાં નિરવપત્તયૈવૈષ્વમૃતમદધાદ્યો
મૃત્યોર્બિભીયાત્તસ્મા એતાં પ્રાજાપત્યાઁ શતકૃષ્ણલાં
નિર્વપેત્પ્રજાપતિમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ
એવાસ્મિન્નાયુર્દધાતિ સર્વમાયુરેતિ શતકૃષ્ણલા ભવતિ શતાયુઃ
પુરુષઃ શતેંદ્રિય આયુષ્યેવેંદ્રિયે

૭ પ્રતિ તિષ્ઠતિ ઘૃતે ભવત્યાયુર્વૈ ઘૃતમમૃતઁ
હિરણ્યમાયુશ્ચૈવાસ્મા અમૃતં ચ સમીચી દધાતિ ચત્વારિચત્વારિ
કૃષ્ણલાન્યવદ્યતિ ચતુરવત્તસ્યાપ્ત્યા એકધા બ્રહ્મણ ઉપ
હરત્યેકધૈવ યજમાન આયુર્દધાત્યસાવાદિત્યો ન વ્યરોચત તસ્મૈ દેવાઃ
પ્રાયશ્ચિત્તિમૈચ્છન્તસ્મા એતઁ સૌર્યં ચરું નિરવપન્તેનૈવાસ્મિન્

૮ રુચમદધુર◌્યો બ્રહ્મવર્ચસકામઃ સ્યાત્તસ્મા એતઁ સૌર્યં
ચરું નિર્વપેદમુમેવાદિત્યરઁ સ્વેન ભાગધેયેનોપ ધાવતિ સ
એવાસ્મિન્બ્રહ્મવર્ચસં દધાતિ બ્રહ્મવર્ચસ્યેવ ભવત્યુભયતો રુક્મૌ
ભવત ઉભયત એવાસ્મિન્રુચં દધાતિ પ્રયાજેપ્રયાજે કૃષ્ણલં
જુહોતિ દિગ્ભ્ય એવાસ્મૈ બ્રહ્મવર્ચસમવ રુન્ધ આગ્નેયમષ્ટાકપાલં
નિર્વપેથ્સાવિત્રં દ્વાદશકપાલં ભૂમ્યૈ

૯ ચરું યઃ કામયેત હિરણ્યં વિન્દેય હિરણ્યં મોપ
નમેદિતિ યદાગ્નેયો ભવત્યાગ્નેયં વૈ હિરણ્યં યસ્યૈવ હિરણ્યં
તેનૈવૈનદ્વિન્દતે સાવિત્રો ભવતિ સવિતૃપ્રસૂત એવૈનદ્વિન્દતે ભૂમ્યૈ

ચરુર્ભવત્યસ્યામેવૈનદ્વિન્દત ઉપૈનꣳ હિરણ્યં નમતિ વિ વા એષ
ઇંદ્રિયેણ વીર્યેણર્ધ્યતે યો હિરણ્યં વિન્દત એતા
૧૦ મેવ નિર્વપેદ્ધિરણ્યં વિત્ત્વા નેંદ્રિયેણ વીર્યેણ વ્યૃધ્યત
એતામેવ નિર્વપેદ્યસ્ય હિરણ્યં નશ્યેદ્યદાગ્નેયો ભવત્યાગ્નેયં
વૈ હિરણ્યં યસ્યૈવ હિરણ્યં તેનૈવૈનદ્વિન્દતિ સાવિત્રો ભવતિ
સવિતૃપ્રસૂત એવૈનદ્વિન્દતિ ભૂમ્યૈ ચરુર્ભવત્યસ્યાં વા એતન્નશ્યતિ
યન્નશ્યત્યસ્યામેવૈનદ્વિન્દતીંદ્ર
૧૧ સ્ત્વષ્ટુઃ સોમમભીષહાપિબથ્સ વિષ્વઙ્વ્યાર્છથ્સ ઇંદ્રિયેણ
સોમપીથેન વ્યાર્ધ્યત સ યદૂર્ધ્વમુદવમીત્તે શ્યામાકા અભવન્થ્સ
પ્રજાપતિમુપાધાવત્તસ્મા એતꣳ સોમેંદ્રꣳ શ્યામાકં ચરું
નિરવપત્તેનૈવાસ્મિન્નિંદ્રિયꣳ સોમપીથમદધાદ્વિ વા એષ ઇંદ્રિયેણ
સોમપીથેનર્ધ્યતે યઃ સોમં વમિતિ યઃ સોમવામી સ્યાત્તસ્મા
૧૨ એતꣳ સોમેંદ્રꣳ શ્યામાકં ચરું નિર્વપેથ્સોમં ચૈવેંદ્રં ચ
સ્વેન ભાગધેયેનોપ ધાવતિ તાવેવાસ્મિન્નિંદ્રિયꣳ સોમપીથં ધત્તો
નેંદ્રિયેણ સોમપીથેન વ્યૃધ્યતે યથ્સૌમ્યો ભવતિ સોમપીથમેવાવ
રુન્ધે યદૈંદ્રો ભવતીંદ્રિયં વૈ સોમપીથ ઇંદ્રિયમેવ સોમપીથમવ
રુન્ધે શ્યામાકો ભવત્યેષ વાવ સ સોમઃ
૧૩ સાક્ષાદેવ સોમપીથમવ રુન્ધેઽગ્નયે દાત્રે પુરોડાશમષ્ટાકપાલં
નિર્વપેદિંદ્રાય પ્રદાત્રે પુરોડાશમેકાદશકપાલં
પશુકામોઽગ્નિરેવાસ્મૈ પશૂન્ પ્રજનયતિ વૃદ્ધાનિંદ્રઃ પ્ર યચ્છતિ
દધિ મધુ ઘૃતમાપો ધાના ભવન્ત્યેતદ્વૈ પશૂનાꣳ રૂપꣳ
રૂપેણૈવ પશૂનવ રુન્ધે પઞ્ચગૃહીતં ભવતિ પાઙ્ક્તા હિ પશવો
બહુરૂપં ભવતિ બહુરૂપા હિ પશવઃ
૧૪ સમૃધ્યૈ પ્રાજાપત્યં ભવતિ પ્રાજાપત્યા વૈ પશવઃ પ્રજાપતિરેવાસ્મૈ
પશૂન્ પ્ર જનયત્યાત્મા વૈ પુરુષસ્ય મધુ યન્મધ્વગ્નૌ જુહોત્યાત્માનમેવ
તદ્યજમાનોઽગ્નૌ પ્ર દધાતિ પઙ્ક્ત્યૌ યાજ્યાનુવાક્યે ભવતઃ પાઙ્ક્તઃ
પુરુષઃ પાઙ્ક્તાઃ પશવ આત્માનમેવ મૃત્યોર્નિષ્ક્રીયપશૂનવ

રુન્ધે ॥ ૨। ૩। ૨॥ ઇંદ્રિયેસ્મિન્ ભૂમ્યા એતામિંદ્રઃ સ્યાત્તસ્મૈ સોમો બહુરૂપા
હિ પશવ એકચત્વારિઁશચ્ચ ॥ ૨। ૩। ૨॥
૧૫ દેવા વૈ સત્ત્રમાસતર્દ્ધિપરિમિતં યશસ્કામાસ્તેષાઁ સોમઁ
રાજાનં યશ આર્ચ્છથ્સ ગિરિમુદૈત્તમગ્નિરનૂદૈત્તાવગ્નીષોમૌ
સમભવતાં તાવિંદ્રો યજ્ઞવિભ્રષ્ટોઽનુ પરૈત્તાવબ્રવીદ્યાજયતં
મેતિ તસ્મા એતામિષ્ટિં નિરવપતામાગ્નેયમષ્ટાકપાલમૈંદ્રમેકાદશકપાલઁ
સૌમ્યં ચરું તયૈવાસ્મિન્તેજ
૧૬ ઇંદ્રિયં બ્રહ્મવર્ચસમધત્તાં યો યજ્ઞવિભ્રષ્ટઃ સ્યાત્તસ્મા
એતામિષ્ટિં નિર્વપેદાગ્નેયમષ્ટાકપાલમૈંદ્રમેકાદશકપાલઁ
સૌમ્યં ચરું યદાગ્નેયો ભવતિ તેજ એવાસ્મિન્તેન દધાતિ યદૈંદ્રો
ભવતીંદ્રિયમેવાસ્મિન્તેન દધાતિ યથ્સૌમ્યો બ્રહ્મવર્ચસં તેનાગ્નેયસ્ય
ચ સૌમ્યસ્ય ચૈંદ્રે સમાશ્લેષયેત્તેજશ્ચૈવાસ્મિન્ બ્રહ્મવર્ચસં
ચ સમીચી
૧૭ દધાત્યગ્નીષોમીયમેકાદશકપાલં નિર્વપેદ્યં કામો નોપનમેદાગ્નેયો વૈ
બ્રાહ્મણઃ સ સોમં પિબતિ સ્વામેવ દેવતાગ્ં સ્વેન ભાગધેયેનોપ ધાવતિ
સૈવૈનં કામેન સમર્ધયત્યુપૈનં કામો નમત્યગ્નીષોમીયમષ્ટાકપાલં
નિર્વપેદ્બ્રહ્મવર્ચસકામોઽગ્નીષોમાવેવ સ્વેન ભાગધેયેનોપ ધાવતિ
તાવેવાસ્મિન્બ્રહ્મવર્ચસં ધત્તો બ્રહ્મવર્ચસ્યેવ
૧૮ ભવતિ યદષ્ટાકપાલસ્તેનાગ્નેયો યચ્છ્યામાકસ્તેન
સૌમ્યઃ સમૃદ્ધ્યૈ સોમાય વાજિને શ્યામાકં ચરું નિર્વપેદ્યઃ
ક્લૈબ્યાદ્બિભીયાદ્રેતો હિ વા એતસ્માદ્વાજિનમપક્રામત્યથૈષ ક્લૈબ્યાદ્બિભાય
સોમમેવ વાજિનગ્ં સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મિન્રેતો વાજિનં
દધાતિ ન ક્લીબો ભવતિ બ્રાહ્મણસ્પત્યમેકાદશકપાલં નિર્વપેદ્ગ્રામકામો
૧૯ બ્રહ્મણસ્પતિમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ સજાતાન્ પ્ર
યચ્છતિ ગ્રામ્યેવ ભવતિ ગણવતી યાજ્યાનુવાક્યે ભવતઃ સજાતૈરેવૈનં
ગણવન્તં કરોત્યેતામેવ નિર્વપેદ્યઃ કામયેત બ્રહ્મન્વિશં વિ
નાશયેયમિતિ મારુતી યાજ્યાનુવાક્યે કુર્યાદ્બ્રહ્મન્નેવ વિશં વિ નાશયતિ ॥

૨। ૩। ૩॥ તેજઃ સમીચી બ્રહ્મવર્ચસ્યેવ ગ્રામકામસ્ત્રિચત્વારિꣳ શચ્ચ ॥

૨। ૩। ૩॥

૨૦ અર્યમ્ણે ચરું નિર્વપેથ્સુવર્ગકામોઽસૌ વા આદિત્યોર્યમાર્યમણમેવ
સ્વેન ભાગધેયેનોપ ધાવતિ સ એવૈનꣳ સુવર્ગં લોકં ગમયત્યર્યમ્ણે
ચરું નિર્વપેદ્યઃ કામયેત દાનકામા મે પ્રજાઃ સ્યુરિત્યસૌ વા
આદિત્યોર્યમા યઃ ખલુ વૈ દદાતિ સોર્યમાર્યમણમેવ સ્વેન
ભાગધેયેનોપ ધાવતિ સ એવા

૨૧ ઽસ્મૈ દાનકામાઃ પ્રજાઃ કરોતિ દાનકામા અસ્મૈ પ્રજા ભવન્ત્યર્યમ્ણે
ચરું નિર્વપેદ્યઃ કામયેત સ્વસ્તિ જનતામિયામિત્યસૌ વા
આદિત્યોર્યમાર્યમણમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવૈનં
તદ્ગમયતિ યત્ર જિગમિષતીંદ્રો વૈ દેવાનામાનુજાવર આસીથ્સ
પ્રજાપતિમુપાધાવત્તસ્મા એતમૈંદ્રમાનુષૂકમેકાદશકપાલં નિ

૨૨ રવપત્ તેનૈવૈનમગ્રં દેવતાનાં પર્યણયદ્બુધ્નવતી અગ્રવતી
યાજ્યાનુવાક્યે અકરોદ્બુધ્નાદેવૈનમગ્રં પર્યણયદ્યો રાજન્ય આનુજાવરઃ
સ્યાત્તસ્મા એતમૈંદ્રમાનુષૂકમેકા દશકપાલં નિર્વપેદિંદ્રમેવ
સ્વેન ભાગધેયેનોપ ધાવતિ સ એવૈનમગ્રꣳ સમાનાનાં પરિ ણયતિ
બુધ્નવતી અગ્રવતી યાજ્યાનુવાક્યે ભવતો બુધ્નાદેવૈનમગ્રં

૨૩ પરિ ણયત્યાનુષૂકો ભવત્યેષા હ્યેતસ્ય દેવતા ય આનુજાવરઃ
સમૃદ્ધ્યૈ યો બ્રાહ્મણ આનુજાવરઃ સ્યાત્તસ્મા એતં બાર્હસ્પત્યમાનુષૂકં
ચરું નિર્વપેદ્ બૃહસ્પતિમેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ
એવૈનમગ્રꣳ સમાનાનાં પરિ ણયતિ બુધ્નવતી અગ્રવતી યાજ્યાનુવાક્યે
ભવતો બુધ્નાદેવૈનમગ્રં પરિ ણયત્યાનુષૂકો ભવત્યેષા હ્યેતસ્ય
દેવતા ય આનુજાવરઃ સમૃદ્ધ્યૈ ॥ ૨। ૩। ૪॥ એવ નિરગ્રમેતસ્ય ચત્વારિ
ચ ॥ ૨। ૩। ૪॥

૨૪ પ્રજાપતેસ્ત્રયસ્ત્રિꣳ શદ્દુહિતર આસન્તાઃ સોમાય
રાજ્ઞેઽદદાત્તાસા ꣳ રોહિણીમુપૈત્તા ઈર્ષ્યન્તીઃ પુનરગચ્છન્તા અન્વૈત્તાઃ

પુનરયાચત તા અસ્મૈ ન પુનરદદાથ્સોબ્રવીદૃતમમીષ્વ યથા
સમાવચ્છ ઉપૈષ્યામ્યથ તે પુનર્દાસ્યામીતિ સ ઋતમામીત્તા અસ્મૈ
પુનરદદાત્તાસાꣳ રોહિણીમેવોપૈત્
૨૫ તં યક્ષ્મ આર્ચ્છદ્રાજાનં યક્ષ્મ આરદિતિ તદ્રાજયક્ષ્મસ્ય જન્મ
યત્પાપીયાનભવત્તત્પાપયક્ષ્મસ્ય યજ્જાયાભ્યોઽવિન્દત્તજ્જાયેન્યસ્ય
ય એવમેતેષાં યક્ષ્માણાં જન્મ વેદ નૈનમેતે યક્ષ્મા વિન્દન્તિ સ એતા
એવ નમસ્યન્નુપાધાવત્તા અબ્રુવન્વરં વૃણામહૈ સમાવચ્છ એવ ન
ઉપાય ઇતિ તસ્મા એત
૨૬ માદિત્યં ચરું નિરવપન્તેનૈવૈનં પાપાથ્ સ્રામાદમુઞ્ચન્, યઃ
પાપયક્ષ્મગૃહીતઃ સ્યાત્તસ્મા એતમાદિત્યં ચરું નિર્વપેદાદિત્યાનેવ
સ્વેન ભાગધેયેનોપ ધાવતિ ત એવૈનં પાપાથ્સ્રામાન્મુઞ્ચન્ત્યમાવાસ્યાયાં
નિર્વપેદમુમેવૈનમાપ્યાયમાનમન્વા પ્યાયયતિ નવો નવો ભવતિ
જાયમાન ઇતિ પુરોઽનુવાક્યા ભવત્યાયુરેવાસ્મિન્તયા દધાતિ યમાદિત્યા
અꣳશુમાપ્યાયયન્તીતિ યાજ્યૈવૈનમેતયાઽપ્યાયયતિ ॥ ૨। ૩। ૫॥
એવોપૈતમસ્મિન્ ત્રયોદશ ચ ॥ ૨। ૩। ૫॥
૨૭ પ્રજાપતિર્દેવેભ્યોઽન્નાદ્યં
વ્યાદિશથ્સોઽબ્રવીદ્યદિમાન્લોકાનભ્યતિરિચ્યાતૈ તન્મમાસદિતિ
તદિમાન્લોકાનભ્યત્યરિચ્યતેંદ્રꣳ રાજાનમિંદ્રમધિરાજમિંદ્રગ્ગ્
સ્વરાજાનં તતો વૈ સ ઇમાન્લોકાગ્ સ્ત્રેધાઽદુહત્ તત્ ત્રિધાતોસ્ત્રિધાતુત્વં
યં કામયેતાન્નાદઃ સ્યાદિતિ તસ્મા એતં ત્રિધાતું નિર્વપેદિંદ્રાય
રાજ્ઞે પુરોડાશ
૨૮ મેકાદશકપાલમિંદ્રાયાધિરાજાયેંદ્રાય સ્વરાજ્ઞેઽયં વા ઇંદ્રો
રાજાયમિંદ્રોઽધિરાજોઽસાવિંદ્રઃ સ્વરાડિમાનેવ લોકાન્થ્સ્વેન
ભાગધેયેનોપ ધાવતિ ત એવાસ્મા અન્નં પ્ર યચ્છન્ત્યન્નાદ એવ ભવતિ
યથા વથ્સેન પ્રત્તાં ગાં દુહ એવમેવેમાન્લોકાન્ પ્રત્તાન્ કામમન્નાદ્યં દુહ
ઉત્તાનેષુ કપાલેષ્વધિ શ્રયત્યયાતયામત્વાય ત્રયઃ પુરોડાશા ભવન્તિ
ત્રય ઇમે લોકા એષા લોકાનામાપ્ત્યા ઉત્તરોત્તરો જ્યાયાન્ભવત્યેવમિવ

હી મે લોકાઃ સમૃદ્ધ્યૈ સર્વેષામભિગમયન્નવ દ્યત્યચ્છંબટ્કારં વ્યત્યાસમન્વાહાનિર્દાહાય ॥ ૨। ૩। ૬॥ પુરોડાશં ત્રયષ્ષષ્ટિ શ્ઁ શતિશ્ચ ॥ ૨। ૩। ૬॥

(મેરએલ્લગીએહેળબેકુ)

૨૯ દેવાસુરાઃ સંયત્તા આસન્તાન્દેવાનસુરા અજયન્તે દેવાઃ પરાજિગ્યાના અસુરાણાં વૈશ્યમુપાયન્તેભ્ય ઇંદ્રિયં વીર્યમપાક્રામત્ તદિંદ્રોઽચાયત્ તદન્વપાક્રામત્ તદવરુધં નાશક્નોત્ તદસ્માદભ્યર્ધોઽચરથ્સ પ્રજાપતિમુપાધાવત્ તમેતયા સર્વપૃષ્ઠયા યાજયત્ તયૈવાસ્મિન્નિંદ્રિયં વીર્યમદધાદ્ય ઇંદ્રિયકામો

(ઇલ્લિયવરેરએગીએમેરએલ્લગીએહેળબેકુ)

૩૦ વીર્યકામઃ સ્યાત્તમેતયા સર્વપૃષ્ઠયા યાજયેદેતા એવ દેવતાઃ સ્વેન ભાગધેયેનોપ ધાવતિ તા એવાસ્મિન્નિંદ્રિયં વીર્યં દધતિ યદિંદ્રાય રાથંતરાય નિર્વપતિ યદેવાગ્નેસ્તેજસ્તદેવાવ રુન્ધે યદિંદ્રાય બાર્હતાય યદેવેંદ્રસ્ય તેજસ્તદેવાવ રુન્ધે યદિંદ્રાય વૈરૂપાય યદેવ સવિતુસ્તેજસ્ત

૩૧ દેવાવ રુન્ધે યદિંદ્રાય વૈરાજાય યદેવ ધાતુસ્તેજસ્તદેવાવ રુન્ધે યદિંદ્રાય શાક્વરાય યદેવ મરુતાં તેજસ્તદેવાવ રુન્ધે યદિંદ્રાય રૈવતાય યદેવ બૃહસ્પતેસ્તેજસ્તદેવાવ રુન્ધ એતાવન્તિ વૈ તેજાઁસિ તાન્યેવાવ રુન્ધ ઉત્તાનેષુ કપાલેષ્વધિ શ્રયત્યયાતયામત્વાય દ્વાદશકપાલઃ પુરોડાશો

૩૨ ભવતિ વૈશ્વદેવત્વાય સમન્તં પર્યવદ્યતિ સમન્તમેવેંદ્રિયં વીર્યં યજમાને દધાતિ વ્યત્યાસમન્વાહાનિર્દહાયાશ્વ ઋષભો વૃષ્ણિર્બસ્તઃ સા દક્ષિણા વૃષસ્ત્વાયૈતયૈવ યજેતાભિશસ્યમાન એતાશ્ચેદ્વા અસ્ય દેવતા અન્નમદન્ત્યદન્ત્યુવેવાસ્ય મનુષ્યાઃ ॥ ૨। ૩। ૭॥ ઇંદ્રિયકામઃ સવિતુસ્તેજસ્તત્પુરોડાશોઽષ્ટાત્રિઁશચ્ચ ॥ ૨। ૩। ૭॥

૩૩ રજનો વૈ કૌણેયઃ ક્રતુજિતં જાનકિં ચક્ષુર્વન્યમયાત્તસ્મા એતામિષ્ટિં નિરવપદગ્નયે ભ્રાજસ્વતે પુરોડાશમષ્ટાકપાલઁ

સૌર્યં ચરુમગ્નયે ભ્રાજસ્વતે પુરોડાશમષ્ટાકપાલં
તયૈવાસ્મિઞ્ચક્ષુરદધાદ્યશ્ચક્ષુષ્કામઃ સ્યાત્તસ્મા એતામિષ્ટિં
નિર્વપેદગ્નયે ભ્રાજસ્વતે પુરોડાશમષ્ટાકપાલꣳ સૌર્યં ચરુમગ્નયે
ભ્રાજસ્વતે પુરોડાશમષ્ટાકપાલમગ્નેર્વૈ ચક્ષુષા મનુષ્યા વિ
૩૪ પશ્યન્તિ સૂર્યસ્ય દેવા અગ્નિં ચૈવ સૂર્યં ચ સ્વેન ભાગધેયેનોપ
ધાવતિ તાવેવાસ્મિઞ્ચક્ષુર્ધત્તશ્ચક્ષુષ્માનેવ ભવતિ યદાગ્નેયૌ
ભવતશ્ચક્ષુષી એવાસ્મિન્તત્પ્રતિ દધાતિ યત્સૌર્ꣳયો નાસિકાં
તેનાભિતઃ સૌર્યમાગ્નેયૌ ભવતસ્તસ્માદભિતો નાસિકાં ચક્ષુષી
તસ્માન્નાસિકયા ચક્ષુષી વિધૃતે સમાની યાજ્યાનુવાક્યે ભવતઃ સમાનꣳ
હિ ચક્ષુઃ સમૃદ્ધ્યા ઉદુ ત્યં જાતવેદસꣳ સપ્ત ત્વા હરિતો રથે
ચિત્રં દેવાનામુદગાદનીકમિતિ પિણ્ડાન્ પ્ર યચ્છતિ ચક્ષુરેવાસ્મૈ
પ્ર યચ્છતિ યદેવ તસ્ય તત્ ॥ ૨। ૩। ૮॥ વિ હ્યષ્ટાવિꣳશતિશ્ચ ॥ ૨। ૩। ૮॥
૩૫ ધ્રુવોઽસિ ધ્રુવોઽહꣳ સજાતેષુ ભૂયાસં ધીરશ્ચેત્તા
વસુવિદ્ધ્રુવોઽસિ ધ્રુવોઽહꣳ સજાતેષુ ભૂયાસમુગ્રશ્ચેત્તા
વસુવિદ્ધ્રુવોઽસિ ધ્રુવોઽહꣳ સજાતેષુ ભૂયાસમભિભૂશ્ચેત્તા
વસુવિદામનમસ્યામનસ્ય દેવા યે સજાતાઃ કુમારાઃ સમનસસ્તાનહં
કામયે હૃદા તે માં કામયન્તાꣳ હૃદા તાન્મ આમનસઃ કૃધિ સ્વાહામનમ
૩૬ સ્યામનસ્ય દેવા યાઃ સ્ત્રિયઃ સમનસસ્તા અહં કામયે હૃદા તા
માં કામયન્તાꣳ હૃદા તા મ આમનસઃ કૃધિ સ્વાહા વૈશ્વદેવીꣳ
સાંગ્રહણીં નિર્વપેદ્ગ્રામકામો વૈશ્વદેવા વૈ સજાતા વિશ્વાનેવ
દેવાન્થ્સ્વેન ભાગધેયેનોપ ધાવતિ ત એવાસ્મૈ સજાતાન્ પ્ર યચ્છન્તિ
ગ્રામ્યેવ ભવતિ સાંગ્રહણી ભવતિ મનોગ્રહણં વૈ સંગ્રહણં મન
એવ સજાતાનાં
૩૭ ગૃહ્ણાતિ ધ્રુવોઽસિ ધ્રુવોઽહꣳ સજાતેષુ ભૂયાસમિતિ પરિધીન્પરિ
દધાત્યાશિષમેવૈતામા શાસ્તેઽથો એતદેવ સર્વꣳસજાતેષ્વધિ ભવતિ
યસ્યૈવં વિદુષ એતે પરિધયઃ પરિધીયન્ત આમનમસ્યામનસ્ય દેવા
ઇતિ તિસ્ર આહુતીર્જુહોત્યેતાવન્તો વૈ સજાતા યે મહાન્તો યે ક્ષુલ્લકા

યાઃ સ્ત્રિયસ્તાનેવાવ રુન્ધે ત એનમવરુદ્ધા ઉપતિષ્ઠન્તે ॥ ૨। ૩। ૯॥

સ્વાહાઽમનમસિ સજાતાનાꣳરુંધે પંચ ચ ॥ ૨। ૩। ૯॥

૩૮ યન્નવમૈત્ તન્નવનીતમભવદ્યદસર્પત્ તથ્સર્પિરભવદ્યદધ્રિયત
તદ્ધૃતમભવદશ્વિનોઃ પ્રાણોઽસિ તસ્ય તે દત્તાં યયોઃ
પ્રાણોઽસિ સ્વાહેંદ્રસ્ય પ્રાણોઽસિ તસ્ય તે દદાતુ યસ્ય પ્રાણોઽસિ સ્વાહા
મિત્રાવરુણયોઃ પ્રાણોઽસિ તસ્ય તે દત્તાં યયોઃ પ્રાણોઽસિ સ્વાહા વિશ્વેષાં
દેવાનાં પ્રાણોઽસિ

૩૯ તસ્ય તે દદતુ યેષાં પ્રાણોઽસિ સ્વાહા ઘૃતસ્ય
ધારામમૃતસ્ય પન્થામિંદ્રેણ દત્તાં પ્રયતાં મરુદ્ભિઃ । તત્ત્વા
વિષ્ણુઃ પર્યપશ્યત્તત્ત્વેડા ગવ્યૈરયત્ ॥ પાવમાનેન ત્વા સ્તોમેન
ગાયત્રસ્ય વર્તન્યોપાꣳશોર્વીર્યેણ દેવસ્ત્વા સવિતોથ્સૃજતુ જીવાતવે
જીવનસ્યાયૈ બૃહદ્રથન્તરયોસ્ત્વા સ્તોમેન ત્રિષ્ટુભો વર્તન્યા શુક્રસ્ય
વીર્યેણ દેવસ્ત્વા સવિતોથ્

૪૦ સૃજતુ જીવાતવે જીવનસ્યાયા અગ્નેસ્ત્વા માત્રયા જગત્યૈ
વર્તન્યાગ્રયણસ્ય વીર્યેણ દેવસ્ત્વા સવિતોથ્સૃજતુ જીવાતવે
જીવનસ્યાયા ઇમમગ્ન આયુષે વર્ચસે કૃધિ પ્રિયꣳ રેતો વરુણ સોમ
રાજન્ । માતેવાસ્મા અદિતે શર્મ યચ્છ વિશ્વે દેવા જરદષ્ટિર્યથાસત્ ॥
અગ્નિરાયુષ્માન્થ્સ વનસ્પતિભિરાયુષ્માન્ તેન ત્વાયુષાયુષ્મન્તં કરોમિ
સોમ આયુષ્માન્થ્સ ઓષધીભિર્યજ્ઞ આયુષ્માન્થ્સ દક્ષિણાભિર્બ્રહ્માયુષ્મત્
તદ્ બ્રાહ્મણૈરાયુષ્મદ્દેવા આયુષ્મન્તસ્તેઽમૃતેન પિતર આયુષ્મન્તસ્તે
સ્વધયાયુષ્મન્તસ્તેન ત્વાયુષાયુષ્મન્તં કરોમિ ॥ ૨। ૩। ૧૦॥ વિશ્વેષાં
દેવાનાં પ્રાણોસિ ત્રિષ્ટુભો વર્તન્યા શુક્રસ્ય વીર્યેણ દેવસ્ત્વા
સવિતોથ્સોમ આયુષ્માન્પંચ વિગ્ંશતિશ્ચ ॥ ૨। ૩। ૧૦॥

૪૧ અગ્નિં વા એતસ્ય શરીરં ગચ્છતિ સોમꣳ રસો વરુણ એનં
વરુણપાશેન ગૃહ્ણાતિ સરસ્વતીં વાગગ્નાવિષ્ણૂ આત્મા યસ્ય જ્યોગામયતિ
યો જ્યોગામયાવી સ્યાદ્યો વા કામયેત સર્વમાયુરિયામિતિ તસ્મા એતામિષ્ટિં
નિર્વપેદાગ્નેયમષ્ટાકપાલꣳ સૌમ્યં ચરું વારુણં દશકપાલꣳ

સારસ્વતં ચરુમાગ્નાવૈષ્ણવમેકાદશકપાલમગ્નેરેવાસ્ય શરીરં
નિષ્ક્રીણાતિ સોમાદ્રસં
૪૨ વારુણેનૈવૈનં વરુણપાશાન્મુઞ્ચતિ સારસ્વતેન વાચં દધાત્યગ્નિઃ સર્વા
દેવતા વિષ્ણુર્યજ્ઞો દેવતાભિશ્ચૈવૈનં યજ્ઞેન ચ ભિષજ્યત્યુત
યદીતાસુર્ભવતિ જીવત્યેવ યન્નવમૈત્ તન્નવનીતમભવદિત્યાજ્યમવેક્ષતે
રૂપમેવાસ્યૈતન્મહિમાનં વ્યાચષ્ટેઽશ્વિનોઃ પ્રાણોઽસીત્યાહાશ્વિનૌ
વૈ દેવાનાં
૪૩ ભિષજૌ તાભ્યામેવાસ્મૈ ભેષજં કરોતીંદ્રસ્ય
પ્રાણોઽસીત્યાહેંદ્રિયમેવાસ્મિન્નેતેન દધાતિ મિત્રાવરુણયોઃ પ્રાણોઽસીત્યાહ
પ્રાણાપાનાવેવાસ્મિન્નેતેન દધાતિ વિશ્વેષાં દેવાનાં પ્રાણોઽસીત્યાહ
વીર્યમેવાસ્મિન્નેતેન દધાતિ ઘૃતસ્ય ધારામમૃતસ્ય પન્થામિત્યાહ
યથાયજુરેવૈતત્પાવમાને ન ત્વા સ્તોમેનેત્યા
૪૪ હ પ્રાણમેવાસ્મિન્નેતેન દધાતિ બૃહદ્રથન્તરયોસ્ત્વા સ્તોમેનેત્યાહૌજ
એવાસ્મિન્નેતેન દધાત્યગ્નેસ્ત્વા માત્રયેત્યાહાત્માનમેવાસ્મિન્નેતેન
દધાત્યૃત્વિજઃ પર્યાહુર્યાવન્ત એવર્ત્વિજસ્ત એનં ભિષજ્યન્તિ બ્રહ્મણો
હસ્તમન્વારભ્ય પર્યાહુરેકધૈવ યજમાન આયુર્દધતિ યદેવ તસ્ય
તદ્ધિરણ્યાદ્
૪૫ ઘૃતં નિષ્પિબત્યાયુર્વૈ ઘૃતમમૃત ઁ
હિરણ્યમમૃતાદેવાયુર્નિષ્પિબતિ શતમાનં ભવતિ શતાયુઃ પુરુષઃ
શતેંદ્રિય આયુષ્યેવેંદ્રિયે પ્રતિતિષ્ઠત્યથો ખલુ યાવતીઃ
સમા એષ્યન્મન્યેત તાવન્માનર ઁ સ્યાથ્સમૃદ્ધ્યા ઇમમગ્ન
આયુષે વર્ચસે કૃધીત્યાહાયુરેવાસ્મિન્વર્ચોદધાતિ વિશ્વે દેવા
જરદષ્ટિર્યથાસદિત્યાહ જરદષ્ટિમેવૈનં કરોત્યગ્નિરાયુષ્માનિતિ
હસ્તં ગૃહ્ણાત્યેતે વૈ દેવા આયુષ્મન્તસ્ત એવાસ્મિન્નાયુર્દધતિ સર્વમાયુરેતિ
॥ ૨। ૩। ૧૧॥ રસં દેવાનાગ્ સ્તોમેનેતિ હિરણ્યાદસદિતિ દ્વાવિ ઁશતિશ્ચ
॥ ૨। ૩। ૧૧॥
૪૬ પ્રજાપતિર્વરુણાયાશ્વમનયથ્સ સ્વાં દેવતામાર્ચ્છથ્સ

પર્યદીર્યત સ એતં વારુણં ચતુષ્કપાલમપશ્યત્ તં નિરવપત્
તતો વૈ સ વરુણપાશાદમુચ્યત વરુણો વા એતં ગૃહ્ણાતિ
યોઽશ્વં પ્રતિ ગૃહ્ણાતિ યાવતોઽશ્વાન્ પ્રતિ ગૃહ્ણીયાત્તાવતો
વારુણાઞ્ચતુષ્કપાલાન્નિર્વપેદ્વરુણમેવ સ્વેન ભાગધેયેનોપ ધાવતિ
સ એવૈનં વરુણપાશાન્મુઞ્ચતિ
૪૭ ચતુષ્કપાલા ભવન્તિ ચતુષ્પાદ્ધ્યશ્વઃ સમૃદ્ધ્યા એકમતિરિક્તં
નિર્વપેદ્યમેવ પ્રતિગ્રાહી ભવતિ યં વા નાધ્યેતિ તસ્માદેવ
વરુણપાશાન્મુચ્યતે યદ્યપરં પ્રતિગ્રાહી સ્યાત્સૌર્યમેકકપાલમનુ
નિર્વપેદમુમેવાદિત્યમુચ્ચારં કુરુતેઽપોઽવભૃથમવૈત્યપ્સુ
વૈ વરુણઃ સાક્ષાદેવ વરુણમવ યજતેઽપોનપ્ત્રીયં ચરું પુનરેત્ય
નિર્વપેદપ્સુયોનિર્વા અશ્વઃ સ્વામેવૈનં યોનિં ગમયતિ સ એનँ શાન્ત
ઉપતિષ્ઠતે ॥ ૨। ૩। ૧૨॥ મુંચતિ ચરુગ્ં સપ્તદશ ચ ॥ ૨। ૩। ૧૨॥
૪૮ યા વામિંદ્રાવરુણા યતવ્યા તનૂસ્તયેમમँ હસો મુઞ્ચતં યા વામિંદ્રાવરુણા
સહસ્યા રક્ષસ્યા તેજસ્યા તનૂસ્તયેમમँ હસો મુઞ્ચતં યો
વામિંદ્રાવરુણાવગ્નૌ સ્રામસ્તં વામેતેનાવ યજે યો વામિંદ્રાવરુણા દ્વિપાત્સુ
પશુષુ ચતુષ્પાત્સુ ગોષ્ઠે ગૃહેષ્વપ્સ્વોષધીષુ વનસ્પતિષુ
સ્રામસ્તં વામેતેનાવ યજ ઇંદ્રો વા એતસ્યે
૪૯ ન્દ્રિયેણાઽપ ક્રામતિ વરુણ એનં વરુણપાશેન ગૃહ્ણાતિ યઃ પાપ્મના
ગૃહીતો ભવતિ યઃ પાપ્મના ગૃહીતઃ સ્યાત્તસ્મા એતામૈંદ્રાવરુણીં
પયસ્યાં નિર્વપેદિંદ્ર એવાસ્મિન્નિંદ્રિયં દધાતિ વરુણ એનં
વરુણપાશાન્મુઞ્ચતિ પયસ્યા ભવતિ પયો હિ વા એતસ્માદપક્રામત્યથૈષ
પાપ્મના ગૃહીતો યત્પયસ્યા ભવતિ પય એવાસ્મિન્તયા દધાતિ
પયસ્યાયાં
૫૦ પુરોડાશમવ દધાત્યાત્મન્વન્તમેવૈનં કરોત્યથો આયતનવન્તમેવ
ચતુર્ધા વ્યૂહતિ દિક્ષ્વેવ પ્રતિ તિષ્ઠતિ પુનઃ સમૂહતિ દિગ્ભ્ય
એવાસ્મૈ ભેષજં કરોતિ સમૂહ્યાવ દ્યતિ યથાવિદ્ધં નિષ્કૃન્તતિ
તાદૃગેવ તદ્યો વામિંદ્રાવરુણાવગ્નૌ સ્રામસ્તં વામેતેનાવ યજ ઇત્યાહ

દુરિષ્ટ્યા એવૈનં પાતિ યો વામિંદ્રાવરુણા દ્વિપાઘ્સુ પશુષુ સ્રામસ્તં
વામેતેનાવ યજ ઇત્યાહૈતાવતીર્વા આપ ઓષધયો વનસ્પતયઃ પ્રજાઃ
પશવ ઉપજીવનીયાસ્તા એવાસ્મૈ વરુણપાશાન્મુઞ્ચતિ ॥ ૨। ૩। ૧૩॥ એતસ્ય
પયસ્યાયાં પાતિ ષડ્વિઁશતિશ્ચ ॥ ૨। ૩। ૧૩॥
૫૧ સ પ્રત્નવન્નિ કાવ્યેંદ્રં વો વિશ્વતસ્પરીંદ્રં નરઃ । ત્વં નઃ
સોમ વિશ્વતો રક્ષા રાજન્નઘાયતઃ । ન રિષ્યેત્ત્વાવતઃ સખા ॥ યા
તે ધામાનિ દિવિ યા પૃથિવ્યાં યા પર્વતેષ્વોષધીષ્વપ્સુ । તેભિર્નો
વિશ્વૈઃ સુમના અહેડન્રાજન્થ્સોમ પ્રતિ હવ્યા ગૃભાય ॥ અગ્નીષોમા
સવેદસા સહૂતી વનતં ગિરઃ । સં દેવત્રા બભૂવથુઃ ॥ યુવ
૫૨ મેતાનિ દિવિ રોચનાન્યગ્નિશ્ચ સોમ સક્રતૂ અધત્તમ્ । યુવઁ
સિન્ધૂઁરભિશસ્તેરવદ્યાદગ્નીષોમાવમુઞ્ચતં ગૃભીતાન્ ॥
અગ્નીષોમાવિમઁ સુ મે શ઼ૃણુતં વૃષણા હવમ્ । પ્રતિ સૂક્તાનિ હર્યતં
ભવતં દાશુષે મયઃ ॥ આન્યં દિવો માતરિશ્વા જભારામથ્નાદન્યં
પરિ શ્યેનો અદ્રેઃ । અગ્નીષોમા બ્રહ્મણા વાવૃધાનોરું યજ્ઞાય ચક્રથુરુ
લોકમ્ ॥ અગ્નીષોમા હવિષઃ પ્રસ્થિતસ્ય વીતઁ
૫૩ હર્યતં વૃષણા જુષેથામ્ । સુશર્માણા સ્વવસા હિ ભૂતમથા ધત્તં
યજમાનાય શં યોઃ ॥ આ પ્યાયસ્વ સં તે ॥ ગણાનાં ત્વા ગણપતિઁ હવામહે
કવિં કવીનામુપમશ્રવસ્તમમ્ । જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત
આ નઃ શ઼ૃણ્વન્નૂતિભિઃ સીદ સાદનમ્ ॥ સ ઇજ્જનેન સ વિશા સ જન્મના
સ પુત્રૈર્વાજં ભરતે ધના નૃભિઃ । દેવાનાં યઃ પિતરમાવિવાસતિ
૫૪ શ્રદ્ધામના હવિષા બ્રહ્મણસ્પતિમ્ ॥ સ સુષ્ટુભા સ ઋક્વતા ગણેન
વલઁ રુરોજ ફલિગઁ રવેણ । બૃહસ્પતિરુસ્રિયા હવ્યસૂદઃ
કનિક્રદદ્વાવશતીરુદાજત્ ॥ મરુતો યદ્ધ વો દિવો યા વઃ શર્મ ॥
અર્યમા યાતિ વૃષભસ્તુવિષ્માન્દાતા વસૂનાં પુરુહૂતો અર્હન્ । સહસ્રાક્ષો
ગોત્રભિદ્વજ્બાહુરસ્માસુ દેવો દ્રવિણં દધાતુ ॥ યે તેઽર્યમન્બહવો
દેવયાનાઃ પન્થાનો

૫૫ રાજન્દિવ આચરન્તિ । તેભિર્નો દેવ મહિ શર્મ યચ્છ શં ન એધિ
દ્વિપદે શં ચતુષ્પદે ॥ બુધ્નાદગ્રમંગિરોભિર્ગૃણાનો વિ પર્વતસ્ય
દૃꣳહિતાન્યૈરત્ । રુજદ્રોધાꣳસિ કૃત્રિમાણ્યેષાꣳ સોમસ્ય
તા મદ ઇંદ્રશ્ચકાર ॥ બુધ્નાદગ્રેણ વિ મિમાય માનૈર્વજ્રેણ
ખાન્યતૃણન્નદીનામ્ । વૃથાસૃજત્પથિભિર્દીર્ઘયાથૈઃ સોમસ્ય તા મદ
ઇંદ્રશ્ચકાર ।

૫૬ પ્ર યો જજ્ઞે વિદ્વાꣳ અસ્ય બંધું વિશ્વાનિ દેવો જનિમા વિવક્તિ ।
બ્રહ્મ બ્રહ્મણ ઉજ્જભાર મધ્યાન્નીચાદુચ્ચા સ્વધયાભિ પ્રતસ્થૌ
॥ મહાન્મહી અસ્તભાયદ્વિ જાતો દ્યાꣳ સદ્મ પાર્થિવં ચ રજઃ । સ
બુધ્નાદાષ્ટ જનુષાભ્યગ્રં બૃહસ્પતિર્દેવતા યસ્ય સમ્રાટ્ ॥ બુધ્નાદ્યો
અગ્રમભ્યર્ત્યોજસા બૃહસ્પતિમા વિવાસન્તિ દેવાઃ । ભિનદ્વલં વિ પુરો
દર્દરીતિ કનિક્રદથ્સુવરપો જિગાય ॥ ૨। ૩। ૧૪॥ યુવં વીતમાવિવાસતિ
પન્થાનો દીર્ઘયાથૈઃ સોમસ્ય તા મદ ઇંદ્રશ્ચકાર દેવા નવ ચ ॥ ૨। ૩। ૧૪॥

આદિત્યેભ્યો દેવા વૈ મૃત્યોર્દેવા વૈ સત્રમર્યમ્ણે
પ્રજાપતેસ્ત્રયસ્ત્રિꣳશત્ પ્રજાપતિર્દેવેભ્યોઽન્નાદ્યં દેવાસુરાસ્તાન્નજનો
ધ્રુવોસિ યન્નવમૈદગ્નિં વૈ પ્રજાપતિર્વરુણાય યાવામિંદ્રાવરુણા
સ પ્રત્નવચ્ચતુર્દશ ॥

આદિત્યેભ્યસ્ત્વષ્ટુરસ્મૈ દાનકામા એવાવ રુંધેગ્નિં વૈ સ
પ્રત્નવથ્ષટ્પંચાશત્ ॥

આદિત્યેભ્યઃ સુવરપો જિગાય ॥

## દ્વિતીયકાણ્ડે ચતુર્થઃ પ્રશ્નઃ ૪

૧ દેવા મનુષ્યાઃ પિતરસ્તેઽન્યત આસન્નસુરા
રક્ષાꣳસિ પિશાચાસ્તેઽન્યતસ્તેષાં દેવાનામુત યદલ્પં
લોહિતમકુર્વન્તદ્રક્ષાꣳસિ રાત્રીભિરસુભ્નન્તાન્થ્સુબ્ધાન્મૃતાનભિ
વ્યૌચ્છત્તે દેવા અવિદુર્યો વૈ નોઽયં મ્રિયતે રક્ષાꣳસિવા ઇમં

ઘ્નન્તીતિ તે રક્ષાગ્સ્યુપામંત્રયંત તાન્યબ્રુવન્વરં વૃણામહૈ ય
૨ દસુરાઞ્જયામ તન્નઃ સહાસદિતિ તતો વૈ દેવા
અસુરાનજયન્તેઽસુરાંજિત્વા રક્ષાગ્સ્યપાનુદન્ત તાનિ
રક્ષાગ્સ્યનૃતમકર્તેતિ સમન્તં દેવાન્પર્યવિશન્તે દેવા
અગ્નાવનાથન્ત તેઽગ્નયે પ્રવતે પુરોડાશમષ્ટાકપાલં
નિરવપન્નગ્નયે વિબાધવતેઽગ્નયે પ્રતીકવતે યદગ્નયે પ્રવતે
નિરવપન્ યાન્યેવ પુરસ્તાદ્રક્ષાગ્સ્યા
૩ ઽસન્તાનિ તેન પ્રાણુદન્ત યદગ્નયે વિબાધવતે યાન્યેવાભિતો
રક્ષાગ્સ્યાસન્ તાનિ તેન વ્યબાધન્ત યદગ્નયે પ્રતીકવતે યાન્યેવ
પશ્ચાદ્રક્ષાગ્સ્યાસન્ તાનિ તેનાપાનુદન્ત તતો દેવા અભવન્પરાસુરા
યો ભ્રાતૃવ્યવાન્થ્સ્યાથ્સ સ્પર્ધમાન એતયેષ્ટ્યા યજેતાગ્નયે પ્રવતે
પુરોડાશમષ્ટાકપાલં નિર્વપેદગ્નયે વિબાધવતે
૪ ઽગ્નયે પ્રતીકવતે યદગ્નયે પ્રવતે નિર્વપતિ ય
એવાસ્માચ્છ્રેયાન્ભ્રાતૃવ્યસ્તં તેન પ્ર ણુદતે યદગ્નયે વિબાધવતે
ય એવૈનેન સદૃઙ્તં તેન વિ બાધતે યદગ્નયે પ્રતીકવતે ય
એવાસ્માત્પાપીયાન્તં તેનાપ નુદતે પ્ર શ્રેયાꣳસં ભ્રાતૃવ્યં નુદતેઽતિ
સદૃશં ક્રામતિ નૈનં પાપીયાનાપ્નોતિ ય એવં વિદ્વાનેતયેષ્ટ્યા યજતે
॥ ૨। ૪। ૧॥ વૃણામહૈ યત્પુરસ્તાદ્રક્ષાꣳસિ વપેદગ્નયે વિબાધવત
એવં ચત્વારિ ચ ॥ ૨। ૪। ૧॥
૫ દેવાસુરાઃ સંયત્તા આસન્ તે દેવા અબ્રુવન્ યો નો વીર્યાવત્તમસ્તમનુ
સમારભામહા ઇતિ ત ઇંદ્રમબ્રુવન્ત્વં વૈ નો વીર્યાવત્તમોઽસિ ત્વામનુ
સમારભામહા ઇતિ સોઽબ્રવીત્તિસ્રો મ ઇમાસ્તનુવો વીર્યાવતીસ્તાઃ
પ્રીણીતાથાસુરાનભિ ભવિષ્યથેતિ તા વૈ બ્રૂહીત્યબ્રુવન્નિયમꣳ
હોમુગિયં વિમૃધેયમિંદ્રિયાવતી
૬ ત્યબ્રવીત્ત ઇંદ્રાયાꣳ હોમુચે પુરોડાશમેકાદશકપાલં
નિરવપન્નિંદ્રાય વૈમૃધાયેંદ્રાયેંદ્રિયાવતે યદિંદ્રાયાꣳ હોમુચે
નિરવપન્નꣳહસ એવ તેનામુચ્યન્ત યદિંદ્રાય વૈમૃધાય મૃધ

એવ તેનાપાઘ્નત યદિંદ્રાયેંદ્રિયાવત ઇંદ્રિયમેવ તેનાત્મન્નદધત
ત્રયસ્ત્રિઁ શત્કપાલં પુરોડાશં નિરવપન્ત્રયસ્ત્રિઁ શદ્વૈ દેવતાસ્તા
ઇંદ્ર આત્મન્નનુ સમારંભયત ભૂત્યૈ
૭ તાં વાવ દેવા વિજિતિમુત્તમામસુરૈર્વ્યજયન્ત યો ભ્રાતૃવ્યવાન્થ્સ્યાથ્સ
સ્પર્ધમાન એતયેષ્ટ્યા યજેતેંદ્રાયાઁ હોમુચે પુરોડાશમેકાદશકપાલં
નિર્વપેદિંદ્રાય વૈમૃધાયેંદ્રાયેંદ્રિયાવતેઽઁ હસા વા એષ ગૃહીતો
યસ્માચ્છ્રેયાન્ભ્રાતૃવ્યોયદિંદ્રાયાઁ હોમુચે નિર્વપત્યઁ હસ એવ
તેન મુચ્યતે મૃધા વા એષોઽભિષણ્ણો યસ્માથ્સમાનેષ્વન્યઃ શ્રેયાનુતા
૮ ઽભ્રાતૃવ્યો યદિંદ્રાય વૈમૃધાય મૃધ એવ તેનાઽપ હતે
યદિંદ્રાયેંદ્રિયાવત ઇંદ્રિયમેવ તેનાત્મન્ધત્તે ત્રયસ્ત્રિઁ શત્ કપાલં
પુરોડાશં નિર્વપતિ ત્રયસ્ત્રિઁ શદ્વૈ દેવતાસ્તા એવ યજમાન
આત્મન્નનુ સમારંભયતે ભૂત્યૈ સા વા એષા વિજિતિર્નામેષ્ટિર્ય એવં
વિદ્વાનેતયેષ્ટ્યા યજત ઉત્તમામેવ વિજિતિં ભ્રાતૃવ્યેણ વિ જયતે ॥
૨। ૪। ૨॥ ઇંદ્રિયાવતી ભૂત્યા ઉતૈકાન્ન પંચાશચ્ચ ॥ ૨। ૪। ૨॥
૯ દેવાસુરાઃ સંયત્તા આસન્તેષાં ગાયત્ર્યોજો બલમિંદ્રિયં વીર્યં
પ્રજાં પશૂન્થ્સંગૃહ્યાદાયાપ ક્રમ્યાતિષ્ઠત્ તેઽમન્યન્ત યતરાન્,
વા ઇયમુપાવર્થ્સ્યતિ ત ઇદં ભવિષ્યન્તીતિ તાં વ્યહ્વયન્ત
વિશ્વકર્મન્નિતિ દેવા દાભીત્યસુરાઃ સા નાન્યતરાગ્શ્ચ નોપાવર્તત
તે દેવા એતદ્યજુરપશ્યન્નોજોઽસિ સહોઽસિ બલમસિ
૧૦ ભ્રાજોઽસિ દેવાનાં ધામ નામાસિ વિશ્વમસિ વિશ્વાયુઃ સર્વમસિ
સર્વાયુરભિભૂરિતિ વાવ દેવા અસુરાણામોજો બલમિંદ્રિયં વીર્યં
પ્રજાં પશૂનવૃઞ્જત યદ્ગાયત્ર્યપક્રમ્યાતિષ્ઠત્તસ્માદેતાં
ગાયત્રીતીષ્ટિમાહુઃ સંવથ્સરો વૈ ગાયત્રી સંવથ્સરો વૈ
તદપક્રમ્યાતિષ્ઠદ્યદેતયા દેવા અસુરાણામોજો બલમિંદ્રિયં વીર્યં
૧૧ પ્રજાં પશૂનવૃઞ્જત તસ્માદેતાઁ સંવર્ગ ઇતીષ્ટિમાહુર્યો
ભ્રાતૃવ્યવાન્થ્સ્યાથ્સ સ્પર્ધમાન એતયેષ્ટ્યા યજેતાગ્નયે સંવર્ગાય
પુરોડાશમષ્ટાકપાલં નિર્વપેત્તઁ શૃતમાસન્નમેતેન યજુષાભિ

મૃશેદોજ એવ બલમિંદ્રિયં વીર્યં પ્રજાં પશૂન્ભ્રાતૃવ્યસ્ય વૃઙ્ક્તે
ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો ભવતિ ॥ ૨। ૪। ૩॥ બલમસ્યેતયા દેવા
અસુરાણામોજો બલમિંદ્રિયં વીર્યં પંચ ચત્વારિઁશચ્ચ ॥ ૨। ૪। ૩॥

૧૨ પ્રજાપતિઃ પ્રજા અસૃજત તા અસ્માથ્સૃષ્ટાઃ પરાચીરાયન્તા
યત્રાવસન્તતો ગર્મુદુદતિષ્ઠત્તા બૃહસ્પતિશ્ચાન્વવૈતાઁ
સોઽબ્રવીદ્બૃહસ્પતિરનયા ત્વા પ્રતિષ્ઠાન્યથ ત્વા
પ્રજા ઉપાવર્થ્સ્યન્તીતિ તં પ્રાતિષ્ઠત્તતો વૈ પ્રજાપતિં પ્રજા
ઉપાવર્તન્ત યઃ પ્રજાકામઃ સ્યાત્તસ્મા એતં પ્રાજાપત્યં ગાર્મુતં ચરું
નિર્વપેત્પ્રજાપતિ

૧૩ મેવ સ્વેન ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ પ્રજાં પ્ર જનયતિ
પ્રજાપતિઃ પશૂનસૃજત તેઽસ્માથ્સૃષ્ટાઃ પરાઞ્ચ આયન્ તે
યત્રાવસન્તતો ગર્મુદુદતિષ્ઠત્ તાન્પૂષા ચાન્વવૈતાઁ સોઽબ્રવીત્
પૂષાનયા મા પ્રતિષ્ઠાથ ત્વા પશવ ઉપાવર્થ્સ્યન્તીતિ માં પ્રતિષ્ઠેતિ
સોમોઽબ્રવીન્મમ વા

૧૪ અકૃષ્ટપચ્યમિત્યુભૌ વાં પ્રતિષ્ઠાનીત્યબ્રવીત્તૌ પ્રાતિષ્ઠત્તતો
વૈ પ્રજાપતિં પશવ ઉપાવર્તન્ત યઃ પશુકામઃ સ્યાત્તસ્મા
એતઁ સોમાપૌષ્ણં ગાર્મુતં ચરું નિર્વપેથ્સોમાપૂષણાવેવ સ્વેન
ભાગધેયેનોપ ધાવતિ તાવેવાસ્મૈ પશૂન્ પ્ર જનયતઃ સોમો વૈ રેતોધાઃ
પૂષા પશૂનાં પ્રજનયિતા સોમ એવાસ્મૈ રેતો દધાતિ પૂષા પશૂન્ પ્ર
જનયતિ ॥ ૨। ૪। ૪॥ વપેત્ પ્રજાપતિં વૈ દધાતિ પૂષા ત્રીણિ ચ ॥ ૨। ૪। ૪॥

૧૫ અગ્ને ગોભિર્ન આ ગહીન્દો પુષ્ટ્યા જુષસ્વ નઃ । ઇંદ્રો ધર્તા ગૃહેષુ
નઃ ॥ સવિતા યઃ સહસ્રિયઃ સ નો ગૃહેષુ રારણત્ । આ પૂષા એત્વા વસુ
॥ ધાતા દદાતુ નો રયિમીશાનો જગતસ્પતિઃ । સ નઃ પૂર્ણે ન વાવનત્ ॥
ત્વષ્ટા યો વૃષભો વૃષા સ નો ગૃહેષુ રારણત્ । સહસ્રેણાયુતેન
ચ ॥ યેન દેવા અમૃતં

૧૬ દીર્ઘરઁ શ્રવો દિવ્યૈરયન્ત । રાયસ્પોષ ત્વમસ્મભ્યં ગવાં
કુલ્મિં જીવસ આ યુવસ્વ ॥ અગ્નિર્ગૃહપતિઃ સોમો વિશ્વવનિઃ સવિતા

સુમેધાઃ સ્વાહા । અગ્ને ગૃહપતે યસ્તે ઘૃત્યો ભાગસ્તેન સહ ઓજ
આક્રમમાણાય ધેહિ શ્રૈષ્ઠ્યાત્પથો મા યોષં મૂર્ધા ભૂયાસગ્ગ્ સ્વાહા
॥ ૨। ૪। ૫॥ અમૃતમષ્ટાત્રિꣳશચ્ચ ॥ ૨। ૪। ૫॥

૧૭ ચિત્રયા યજેત પશુકામ ઇયં વૈ ચિત્રા યદ્વા અસ્યાં વિશ્વં ભૂતમધિ
પ્રજાયતે તેનેયં ચિત્રા ય એવં વિદ્વાઞ્ચિત્રયા પશુકામો યજતે
પ્ર પ્રજયા પશુભિર્મિથુનૈર્જાયતે પ્રૈવાગ્ને યેન વાપયતિ રેતઃ
સૌમ્યેન દધાતિ રેત એવ હિતં ત્વષ્ટા રૂપાણિ વિ કરોતિ સારસ્વતૌ
ભવત એતદ્વૈ દૈવ્યં મિથુનં દૈવ્યમેવાસ્મૈ

૧૮ મિથુનં મધ્યતો દધાતિ પુષ્ટ્યૈ પ્રજનનાય સિનીવાલ્યૈ ચરુર્ભવતિ
વાગ્વૈ સિનીવાલી પુષ્ટિઃ ખલુ વૈ વાક્પુષ્ટિમેવ વાચમુપૈત્યૈંદ્ર ઉત્તમો
ભવતિ તેનૈવ તન્મિથુનꣳ સપ્તૈતાનિ હવીꣳષિ ભવન્તિ સપ્ત
ગ્રામ્યાઃ પશવઃ સપ્તારણ્યાઃ સપ્ત છંદાગ્સ્યુભયસ્યાવરુદ્ધ્યા અથૈતા
આહુતીર્જુહોત્યેતે વૈ દેવાઃ પુષ્ટિપતયસ્ત એવાસ્મિન્પુષ્ટિં દધતિ પુષ્યતિ
પ્રજયા પશુભિરથો યદેતા આહુતીર્જુહોતિ પ્રતિષ્ઠિત્યૈ ॥ ૨। ૪। ૬॥

અસ્મૈ ત એવ દ્વાદશ ચ ॥ ૨। ૪। ૬॥

૧૯ મારુતમસિ મરુતામોજોઽપાં ધારાં ભિન્ધિ રમયત મરુતઃ
શ્યેનમાયિનં મનોજવસં વૃષણꣳ સુવૃક્તિમ્ । યેન
શર્ધ ઉગ્રમવસૃષ્ટમેતિ તદશ્વિના પરિ ધત્તરꣳ સ્વસ્તિ ॥

પુરોવાતો વર્ષંજિન્વરાવૃથ્સ્વાહા વાતાવદ્વર્ષન્નુગ્રરાવૃથ્સ્વાહા
સ્તનયન્વર્ષન્ ભીમરાવૃથ્સ્વાહાઽનશન્યવસ્ફૂર્જન્ દિદ્યુદ્વર્ષન્
ત્વેષરાવૃથ્સ્વાહાતિરાત્રં વર્ષન્પૂર્તિરાવૃથ્

૨૦ સ્વાહા બહુ હાયમવૃષાદિતિ શ્રુતરાવૃથ્સ્વાહાતપતિ
વર્ષન્વિરાડાવૃથ્સ્વાહાવસ્ફૂર્જન્ દિદ્યુદ્વર્ષન્ ભૂતરાવૃથ્સ્વાહા
માન્દા વાશાઃ શુન્ધ્યૂરજિરાઃ । જ્યોતિષ્મતીસ્તમસ્વરીરુન્દતીઃ
સુફેનાઃ । મિત્રભૃતઃ, ક્ષત્રભૃતઃ સુરાષ્ટ્રા ઇહ માવત ।
વૃષ્ણો અશ્વસ્ય સંદાનમસિવૃષ્ટ્યૈ ત્વોપ નહ્યામિ ॥ ૨। ૪। ૭॥

પૂર્તિરાવૃદ્વિચત્વારિ ँ શચ્ચ ॥ ૨। ૪। ૭॥

૨૧ દેવા વસવ્યા અગ્ને સોમ સૂર્ય । દેવાઃ શર્મણ્યા મિત્રાવરુણાર્યમન્ ।
દેવાઃ સપીતયોઽપાં નપાદાશુહેમન્ । ઉદ્નો દત્તોઽદધિં ભિન્ત દિવઃ
પર્જન્યાદન્તરિક્ષાત્ પૃથિવ્યાસ્તતો નો વૃષ્ટ્યાવત । દિવા ચિત્તમઃ
કૃણ્વન્તિ પર્જન્યેનોદવાહેન । પૃથિવીં યદ્વ્યુંદન્તિ ॥ આ યં નરઃ
સુદાનવો દદાશુષે દિવઃ કોશમચુચ્યવુઃ । વિ પર્જન્યાઃ સૃજન્તિ
રોદસી અનુ ધન્વના યન્તિ

૨૨ વૃષ્ટયઃ ॥ ઉદીરયથા મરુતઃ સમુદ્રતો યૂયં વૃષ્ટિં વર્ષયથા
પુરીષિણઃ । ન વો દસ્રા ઉપ દસ્યન્તિ ધેનવઃ શુભં યાતામનુ રથા
અવૃત્સત ॥ સૃજા વૃષ્ટિં દિવ આદ્ભિઃ સમુદ્રં પૃણ । અબ્જા અસિ
પ્રથમજા બલમસિ સમુદ્રિયમ્ ॥ ઉન્નં ભય પૃથિવીં ભિન્ધીદં દિવ્યં
નભઃ । ઉદ્નો દિવ્યસ્ય નો દેહીશાનો વિ સૃજા દૃતિમ્ ॥ યે દેવા
દિવિભાગા યેઽન્તરિક્ષભાગા યે પૃથિવિભાગાઃ । ત ઇમં યજ્ઞમવન્તુ
ત ઇદં ક્ષેત્રમા વિશન્તુ ત ઇદં ક્ષેત્રમનુ વિ વિશન્તુ ॥ ૨। ૪। ૮॥

યન્તિ દેવા વિ ँશતિશ્ચ ॥ ૨। ૪। ૮॥

૨૩ મારુતમસિ મરુતામોજ ઇતિ કૃષ્ણં વાસઃ કૃષ્ણતૂષં પરિ ધત્ત
એતદ્વૈ વૃષ્ટ્યૈ રૂપ ँ સરૂપ એવ ભૂત્વા પર્જન્યં વર્ષયતિ રમયત
મરુતઃ શ્યેનમાયિનમિતિ પશ્ચાદ્વાતં પ્રતિ મીવતિ પુરોવાતમેવ જનયતિ
વર્ષસ્યાવરુદ્ધ્યૈ વાતનામાનિ જુહોતિ વાયુર્વૈ વૃષ્ટ્યા ઈશે વાયુમેવ સ્વેન
ભાગધેયેનોપ ધાવતિ સ એવાસ્મૈ પર્જન્યં વર્ષયત્યષ્ટૌ

૨૪ જુહોતિ ચતસ્રો વૈ દિશશ્ચતસ્રોઽવાન્તરદિશા દિગ્ભ્ય એવ
વૃષ્ટિ ँ સં પ્ર ચ્યાવયતિ કૃષ્ણાજિને સં યૌતિ હવિરેવાકરન્તર્વેદિ સં
યૌત્યવરુદ્ધ્યૈ યતીનામદ્યમાનાના ँ શીર્ષાણિ પરાપતન્તે ખર્જૂરા
અભવન્તેષા ँ રસ ઊર્ધ્વોઽપતત્તાનિ કરીરાણ્યભવન્થ્સૌમ્યાનિ
વૈ કરીરાણિ સૌમ્યા ખલુ વા આહુતિર્દિવો વૃષ્ટિં ચ્યાવયતિ યત્કરીરાણિ
ભવન્તિ

૨૫ સૌમ્યયૈવાહુત્યા દિવો વૃષ્ટિમવ રુન્ધે મધુષા સં યૌત્યપાં

વા એષ ઓષધીનાꣳ રસો યન્મધ્વદ્ભ્ય એવૌષધીભ્યો વર્ષત્યથો
અદ્ભ્ય એવૌષધીભ્યો વૃષ્ટિં નિ નયતિ માન્દા વાશા ઇતિ સં યૌતિ
નામધેયૈરેવૈના અચ્છૈત્યથો યથા બ્રૂયાદસાવેહીત્યેવમેવૈના
નામધેયૈરા

૨૬ ચ્યાવયતિ વૃષ્ણો અશ્વસ્ય સંદાનમસિ વૃષ્ટ્યૈ ત્વોપ નહ્યામીત્યાહ
વૃષા વા અશ્વો વૃષા પર્જન્યઃ કૃષ્ણ ઇવ ખલુ વૈ ભૂત્વા વર્ષતિ
રૂપેણૈવૈનꣳ સમર્ધયતિ વર્ષસ્યાવરુદ્ધ્યૈ ॥ ૨। ૪। ૯॥ અષ્ટૌ ભવંતિ
નામધેયૈરૈકાન્ન ત્રિꣳશચ્ચ ॥ ૨। ૪। ૯॥

૨૭ દેવા વસવ્યા દેવાઃ શર્મણ્યા દેવાઃ સપીતય ઇત્યા બધ્નાતિ
દેવતાભિરેવાન્વહં વૃષ્ટિમિચ્છતિ યદિ વર્ષેત્તાવત્યેવ હોતવ્યં
યદિ ન વર્ષેચ્છ્વો ભૂતે હવિર્નિર્વપેદહોરાત્રે વૈ મિત્રાવરુણાવહોરાત્રાભ્યાં
ખલુ વૈ પર્જન્યો વર્ષતિ નક્તં વા હિ દિવા વા વર્ષતિ મિત્રાવરુણાવેવ
સ્વેન ભાગધેયેનોપ ધાવતિ તાવેવાસ્મા

૨૮ અહોરાત્રાભ્યાં પર્જન્યં વર્ષયતોઽગ્નયે ધામચ્છદે
પુરોડાશમષ્ટાકપાલં નિર્વપેન્મારુતꣳ સપ્તકપાલꣳ
સૌર્યમેકકપાલમગ્નિર્વા ઇતો વૃષ્ટિમુદીરયતિ મરુતઃ સૃષ્ટાં નયન્તિ
યદા ખલુ વા અસાવાદિત્યો ન્યઙ્રશ્મિભિઃ પર્યાવર્તતેઽથ વર્ષતિ
ધામચ્છદિવ ખલુ વૈ ભૂત્વા વર્ષત્યેતા વૈ દેવતા વૃષ્ટ્યા ઈશતે
તા એવ સ્વેન ભાગધેયેનોપ ધાવતિ તા

૨૯ એવાસ્મૈ પર્જન્યં વર્ષયન્ત્યુતાવર્ષિષ્યન્વર્ષત્યેવ સૃજા વૃષ્ટિં
દિવ આદ્ભિઃ સમુદ્રં પૃણેત્યાહેમાશ્ચૈવામૂશ્ચાપઃ સમર્ધયત્યથો
આભિરેવામૂરચ્છૈત્યબ્જા અસિ પ્રથમજા બલમસિ સમુદ્રિયમિત્યાહ
યથાયજુરેવૈતદુન્નં ભય પૃથિવીમિતિ વર્ષાહ્વાં જુહોત્યેષા વા ઓષધીનાં
વૃષ્ટિવનિસ્તયૈવ વૃષ્ટિમા ચ્યાવયતિ યે દેવા દિવિભાગા ઇતિ
કૃષ્ણાજિનમવ ધૂનોતીમ એવાસ્મૈ લોકાઃ પ્રીતા અભીષ્ટા ભવન્તિ ॥ ૨। ૪। ૧૦॥
અસ્મૈ ધાવતિ તા વા એકવિꣳશતિશ્ચ ॥ ૨। ૪। ૧૦॥

૩૦ સર્વાણિ છન્દાગ્સ્યેતસ્યામિષ્ટ્યામનૂચ્યાનીત્યાહુસ્ત્રિષ્ટુભો વા

એતદ્વીર્યં યત્ કકુદુષ્ણિહા જગત્યૈ યદુષ્ણિહ કકુભાવન્વાહ
તેનૈવ સર્વાણિ છન્દાગ્સ્યવ રુન્ધે ગાયત્રી વા એષા યદુષ્ણિહા યાનિ
ચત્વાર્યધ્યક્ષરાણિ ચતુષ્પાદ એવ તે પશવો યથા પુરોડાશે
પુરોડાશોઽધ્યેવમેવ તદ્યદૃચ્યધ્યક્ષરાણિ યજ્જગત્યા

૩૧ પરિદધ્યાદન્તં યજ્ઞં ગમયેત્ત્રિષ્ટુભા પરિ દધાતીંદ્રિયં વૈ વીર્યં
ત્રિષ્ટુગિંદ્રિય એવ વીર્યે યજ્ઞં પ્રતિ ષ્ઠાપયતિ નાન્તં ગમયત્યગ્ને
ત્રી તે વાજિના ત્રી ષધસ્થેતિ ત્રિવત્યા પરિ દધાતિ સરૂપત્વાય સર્વો
વા એષ યજ્ઞો યત્ત્રૈધાતવીયં કામાયકામાય પ્ર યુજ્યતે સર્વેભ્યો
હિ કામેભ્યો યજ્ઞઃ પ્રયુજ્યતે ત્રૈધાતવીયેન યજેતાભિચરન્થ્સર્વો વા

૩૨ એષ યજ્ઞો યત્ત્રૈધાતવીયઁ સર્વેણૈવૈનં યજ્ઞેનાભિ
ચરતિ સ્તૃણુત એવૈનમેતયૈવ યજેતાભિચર્યમાણઃ સર્વો
વા એષ યજ્ઞો યત્ત્રૈધાતવીયઁ સર્વેણૈવ યજ્ઞેન યજતે
નૈનમભિચરન્થ્સ્તૃણુત એતયૈવ યજેત સહસ્રેણ યક્ષ્યમાણઃ
પ્રજાતમેવૈનદ્દદાત્યેતયૈવ યજેત સહસ્રેણેજાનોઽન્તં વા એષ
પશૂનાં ગચ્છતિ

૩૩ યઃ સહસ્રેણ યજતેપ્રજાપતિઃ ખલુ વૈ પશૂનસૃજત
તાગ્ સ્ત્રૈધાતવીયેનૈવાસૃજત ય એવં વિદ્વાગ્ સ્ત્રૈધાતવીયેન
પશુકામો યજતે યસ્માદેવ યોનેઃ પ્રજાપતિઃ પશૂનસૃજત
તસ્માદેવૈનાન્થ્સૃજત ઉપૈનમુત્તરઁ સહસ્રં નમતિ દેવતાભ્યો
વા એષ આ વૃશ્ચ્યતે યો યક્ષ્ય ઇત્યુક્ત્વા ન યજતે ત્રૈધાતવીયેન યજેત
સર્વો વા એષ યજ્ઞો

૩૪ યત્ત્રૈધાતવીયઁ સર્વેણૈવ યજ્ઞેન યજતે ન દેવતાભ્ય
આ વૃશ્ચ્યતે દ્વાદશકપાલઃ પુરોડાશો ભવતિ તે ત્રયશ્ચતુષ્કપાલાત્
ત્રિષ્ષમૃદ્ધત્વાય ત્રયઃ પુરોડાશા ભવન્તિ ત્રય ઇમે લોકા એષાં
લોકાનામાપ્ત્યા ઉત્તરૌત્તરો જ્યાયાન્ભવત્યેવમિવ હીમે લોકા યવમયો
મધ્ય એતદ્વા અન્તરિક્ષસ્ય રૂપઁ સમૃદ્ધ્યૈ સર્વેષામભિ
ગમયન્નવદ્યત્યચ્છંબટ્કારઁ હિરણ્યં દદાતિ તેજ એવા

૩૫ ઽવ રુન્ધે તાર્પ્યં દદાતિ પશૂનેવાવ રુન્ધે ધેનું દદાત્યાશિષ
એવાવ રુન્ધે સામ્નો વા એષ વર્ણો યદ્ધિરણ્યં યજુષાં
તાર્પ્યમુક્થામદાનાં ધેનુરેતાનેવ સર્વાન્વર્ણાનવ રુન્ધે ॥ ૨। ૪। ૧૧॥
જગત્યાભિચરન્થ્સર્વો વૈ ગચ્છતિ યજ્ઞસ્તેજ એવ ત્રિ ૅ શચ્ચ
॥ ૨। ૪। ૧૧॥

૩૬ ત્વષ્ટા હતપુત્રો વીંદ્ર ૅ સોમમાહરત્તસ્મિન્નિંદ્ર
ઉપહવમૈચ્છત તં નોપાહ્વયત પુત્રં મેઽવધીરિતિ સ યજ્ઞવેશસં
કૃત્વા પ્રાસહા સોમમપિબત્તસ્ય યદત્યશિષ્યત તત્ત્વષ્ટાહવનીયમુપ
પ્રાવર્તયથ્સ્વાહેંદ્રશત્રુર્વર્ધસ્વેતિ સ યાવદૂર્ધ્વઃ પરાવિધ્યતિ
તાવતિ સ્વયમેવ વ્યરમત યદિ વા તાવત્પ્રવણમા

૩૭ ઽસીદ્યદિ વા તાવદધ્યગ્નેરાસીથ્સ સંભવન્નગ્નીષોમાવભિ
સમભવથ્સ ઇષુમાત્રમિષુમાત્રં વિષ્વઙ્ઙવર્ધત સ ઇમાઉ ૅ
લ્લોકાનવૃણોદ્યદિમાઉ ૅ લ્લોકાનવૃણોત્તદ્વૃત્રસ્ય વૃત્રત્વં
તસ્માદિંદ્રોઽબિભેદપિ ત્વષ્ટા તસ્મૈ ત્વષ્ટા વજ્રમસિઞ્ચત્તપો વૈ સ
વજ્ર આસીત્તમુદ્યન્તું નાશક્નોદથ વૈ તર્હિ વિષ્ણુ

૩૮ રન્યા દેવતાઽસીથ્સોઽબ્રવીદ્વિષ્ણવેહીદમા હરિષ્યાવો યેનાયમિદમિતિ
સ વિષ્ણુસ્ત્રેધાત્માનં વિ ન્યધત્ત પૃથિવ્યાં તૃતીયમન્તરિક્ષે તૃતીયં
દિવિ તૃતીયમભિ પર્યાવર્તાદ્ધ્યબિભેદ્યત્ પૃથિવ્યાં તૃતીયમાસીત્
તેનેંદ્રો વજ્રમુદયચ્છદ્વિષ્ણ્વનુસ્થિતઃ સોઽબ્રવીન્મા મે પ્ર હારસ્તિ
વા ઇદં

૩૯ મયિ વીર્યં તત્તે પ્ર દાસ્યામીતિ તદસ્મૈ
પ્રાયચ્છત્તત્પ્રત્યગૃહ્ણાદધા મેતિ તદ્વિષ્ણવેતિ પ્રાયચ્છત્તદ્વિષ્ણુઃ
પ્રત્યગૃહ્ણાદસ્માસ્વિંદ્ર ઇંદ્રિયં દધાત્વિતિ યદન્તરિક્ષે
તૃતીયમાસીત્તેનેંદ્રો વજ્રમુદયચ્છદ્વિષ્ણ્વનુસ્થિતઃ સોઽબ્રવીન્મા મે
પ્ર હારસ્તિ વા ઇદં

૪૦ મયિ વીર્યં તત્તે પ્ર દાસ્યામીતિ તદસ્મૈ પ્રાયચ્છત્
તત્પ્રત્યગૃહ્ણાદ્વિર્માધા ઇતિ તદ્વિષ્ણવેતિ પ્રાયચ્છત્તદ્વિષ્ણુઃ

પ્રત્યગૃહ્ણાદસ્માસ્વિંદ્ર ઇંદ્રિયં દધાત્વિતિ યદ્દ્વિ
તૃતીયમાસીત્તેનેંદ્રો વજ્રમુદયચ્છદ્વિષ્ણવનુસ્થિતઃ સોઽબ્રવીન્મા મે
પ્ર હાર્યેનાહ
૪૧ મિદમસ્મિ તત્તે પ્ર દાસ્યામીતિ ત્વી(૩) ઇત્યબ્રવીથ્સંધાં તુ સં
દધાવ હૈ ત્વામેવ પ્ર વિશાનીતિ યન્માં પ્રવિશેઃ કિં મા ભુઞ્જ્યા
ઇત્યબ્રવીત્ત્વામેવેન્ધીય તવ ભોગાય ત્વાં પ્ર વિશેયમિત્યબ્રવીત્તમ્
વૃત્રઃ પ્રાવિશદુદરં વૈ વૃત્રઃ, ક્ષુત્ખલુ વૈ મનુષ્યસ્ય
ભ્રાતૃવ્યો
૪૨ ય એવં વેદ હન્તિ ક્ષુધં ભ્રાતૃવ્યં તદસ્મૈ
પ્રાયચ્છત્તત્પ્રત્યગૃહ્ણાત્ત્રિર્માધા ઇતિ તદ્વિષ્ણવેતિ
પ્રાયચ્છત્તદ્વિષ્ણુઃ પ્રત્યગૃહ્ણાદસ્માસ્વિંદ્ર ઇંદ્રિયં દધાત્વિતિ
યત્ત્રિઃ પ્રાયચ્છત્ત્રિઃ પ્રત્યગૃહ્ણાત્તત્ત્રિધાતોસ્ત્રિધાતુત્વં
યદ્વિષ્ણુરન્વતિષ્ઠત વિષ્ણવેતિ પ્રાયચ્છત્તસ્માદૈંદ્રાવૈષ્ણવઁ
હવિર્ભવતિ યદ્વા ઇદં કિં ચ તદસ્મૈ તત્પ્રાયચ્છદૃચઃ સામાનિ
યજૂઁષિ સહસ્રં વા અસ્મૈ તત્પ્રાયચ્છત્તસ્માથ્સહસ્રદક્ષિણમ્ ॥
૨। ૪। ૧૨॥ પ્રવણં વિષ્ણુર્વા ઇદમિદમહં યો ભવત્યેકવિઁશતિશ્ચ ॥
૨। ૪। ૧૨॥
૪૩ દેવા વૈ રાજન્યાજ્જાયમાનાદબિભયુસ્તમન્તરેવ સન્તં દામ્નાપૌંભન્થ્સ
વા એષોઽપોબ્ધો જાયતે યદ્રાજન્યો યદ્વા એષોઽનપોબ્ધો જાયેત
વૃત્રાન્ ઘ્નઁશ્ચરેદ્યં કામયેત રાજન્યમનપોબ્ધો જાયેત
વૃત્રાન્ઘ્નઁશ્ચરેદિતિ તસ્મા એતમૈંદ્રાબાર્હસ્પત્યં ચરું
નિર્વપેદૈંદ્રો વૈ રાજન્યો બ્રહ્મ બૃહસ્પતિર્બ્રહ્મણૈવૈનં
દામ્નોઽપોંભનાન્મુઞ્ચતિ હિરણ્મયં દામ દક્ષિણા સાક્ષાદેવૈનં
દામ્નોઽપોંભનાન્મુઞ્ચતિ ॥ ૨। ૪। ૧૩॥ એનં દ્વાદશ ચ ॥ ૨। ૪। ૧૩॥
૪૪ નવોનવો ભવતિ જાયમાનોઽહ્નાં કેતુરુષસામેત્યગ્રે । ભાગં
દેવેભ્યો વિ દધાત્યાયન્ પ્ર ચંદ્રમાસ્તિરતિ દીર્ઘમાયુઃ ॥ યમાદિત્યા
અઁશુમાપ્યાયયન્તિ યમક્ષિતમક્ષિતયઃ પિબન્તિ । તેન નો

રાજા વરુણો બૃહસ્પતિરા પ્યાયયન્તુ ભુવનસ્ય ગોપાઃ ॥ પ્રાચ્યાં દિશિ
ત્વમિંદ્રાસિ રાજોતોદીચ્યાં વૃત્રહન્વૃત્રહાસિ । યત્ર યન્તિ સ્રોત્યાસ્ત
૪૫ જ્જિતં તે દક્ષિણતો વૃષભ એધિ હવ્યઃ । ઇંદ્રો જયાતિ ન પરા
જયાતા અધિરાજો રાજસુ રાજયાતિ । વિશ્વા હિ ભૂયાઃ પૃતના અભિષ્ટીરુપસદ્યો
નમસ્યો યથાસત્ ॥ અસ્યેદેવ પ્ર રિરિચે મહિત્વં દિવઃ પૃથિવ્યાઃ
પર્યન્તરિક્ષાત્ । સ્વરાડિંદ્રો દમ આ વિશ્વગૂર્તઃ સ્વરિરમત્રો વવક્ષે
રણાય । અભિ ત્વા શૂર નોનુમો ઽદુગ્ધા ઇવ ધેનવઃ । ઈશાન
૪૬ મસ્ય જગતઃ સુવર્દૃશમીશાનમિંદ્ર તસ્થુષઃ ॥ ત્વામિદ્ધિ હવામહે
સાતા વાજસ્ય કારવઃ । ત્વાં વૃત્રેષ્વિંદ્ર સત્પતિં નરસ્ત્વાં
કાષ્ઠાસ્વર્વતઃ ॥ યદ્દ્યાવ ઇંદ્ર તે શતꣳ શતં ભૂમીરુત સ્યુઃ । ન ત્વા
વજ્રિન્થ્સહસ્રꣳ સૂર્યા અનુ ન જાતમષ્ટ રોદસી ॥ પિબા સોમમિંદ્ર
મન્દતુ ત્વા યં તે સુષાવ હર્યશ્વાદ્રિઃ ॥
૪૭ સોતુર્બાહુભ્યાꣳ સુયતો નાર્વા ॥ રેવતીર્નઃ સધમાદ ઇંદ્રે
સન્તુ તુવિવાજાઃ । ક્ષુમન્તો યાભિર્મદેમ ॥ ઉદગ્ને શુચયસ્તવ
વિ જ્યોતિષોદુ ત્યં જાતવેદસꣳ સપ્ત ત્વા હરિતો રથે વહન્તિ
દેવ સૂર્ય । શોચિષ્કેશં વિચક્ષણ ॥ ચિત્રં દેવાનામુદગાદનીકં
ચક્ષુર્મિત્રસ્ય વરુણસ્યાગ્નેઃ । આપ્રા દ્યાવાપૃથિવી અન્તરિક્ષꣳ
સૂર્ય આત્મા જગતસ્તસ્થુષ
૪૮ શ્ચ ॥ વિશ્વે દેવા ઋતાવૃધ ઋતુભિર્હવનશ્રુતઃ । જુષન્તાં
યુજ્યં પયઃ ॥ વિશ્વે દેવાઃ શꣳ‍ણુતેમꣳ હવં મે યે અન્તરિક્ષે ય ઉપ
દ્યવિષ્ઠ । યે અગ્નિજિહ્વા ઉત વા યજત્રા આસદ્યાસ્મિન્બર્હિષિ માદયધ્વમ્ ॥
૨। ૪। ૧૪॥ તદીશાનમદ્રિસ્તસ્થુષસ્ત્રિꣳ શચ્ચ ॥ ૨। ૪। ૧૪॥
દેવા મનુષ્યા દેવાસુરા અબ્રુવન્દેવાસુરાસ્તેષાં ગાયત્રી પ્રજાપતિસ્તા
યત્રાગ્ને ગોભિશ્ચિત્રયા મારુતં દેવા વસવ્યા અગ્ને મારુતમિતિ
દેવા વસવ્યા દેવાઃ શર્મણ્યાઃ સર્વાણિ ત્વષ્ટા હતપુત્રો દેવા વૈ
રાજન્યાન્નવોનવશ્ચતુર્દશ ॥

દેવા મનુષ્યાઃ પ્રજાં પશૂન્દેવા વસવ્યાઃ
પરિદધ્યાદિદમસ્મ્યષ્ટાચત્વારિꣳ શત્ ॥
દેવા મનુષ્યા માદયધ્વમ્ ॥

## દ્વિતીયકાણ્ડે પઞ્ચમઃ પ્રશ્નઃ ૫

૧ વિશ્વરૂપો વૈ ત્વાષ્ટ્રઃ પુરોહિતો દેવાનામાસીથ્સ્વસ્રીયોઽસુરાણાં
તસ્ય ત્રીણિ શીર્ષાણ્યાસન્થ્સોમપાનꣳસુરાપાનમન્નાદનꣳ
સ પ્રત્યક્ષં દેવેભ્યો ભાગમવદત્પરોઽક્ષમસુરેભ્યઃ સર્વસ્મૈ
વૈ પ્રત્યક્ષં ભાગં વદન્તિ યસ્મા એવ પરોઽક્ષં વદન્તિ તસ્ય
ભાગ ઉદિતસ્તસ્માદિંદ્રોઽબિભેદીદૃઙ્વૈ રાષ્ટ્રં વિ પર્યાવર્તયતીતિ
તસ્ય વજ્રમાદાય શીર્ષાણ્યચ્છિનદ્યથ્સોમપાન
૨ માસીથ્સ કપિઞ્જલોઽભવદ્યથ્સુરાપાનꣳ સ કલવિઙ્કો
યદન્નાદનꣳ સ તિત્તિરિસ્તસ્યાઞ્જલિના બ્રહ્મહત્યામુપાગૃહ્ણાત્તાꣳ
સંવથ્સરમબિભસ્તં ભૂતાન્યભ્યક્રોશન્ બ્રહ્મહન્નિતિ સ
પૃથિવીમુપાસીદદસ્યૈ બ્રહ્મહત્યાયૈ તૃતીયં પ્રતિ ગૃહાણેતિ
સાબ્રવીદ્વરં વૃણૈ ખાતાત્ પરાભવિષ્યન્તી મન્યે તતો મા પરા
ભૂવમિતિ પુરા તે
૩ સંવથ્સરાદપિ રોહાદિત્યબ્રવીત્ તસ્માત્પુરા સંવથ્સરાત્ પૃથિવ્યૈ
ખાતમપિ રોહતિ વારેવૃતꣳ હ્યસ્યૈ તૃતીયં બ્રહ્મહત્યાયૈ
પ્રત્યગૃહ્ણાત્ તથ્સ્વકૃતમિરિણમભવત્ તસ્માદાહિતાગ્નિઃ
શ્રદ્ધાદેવઃ સ્વકૃત ઇરિણે નાવ સ્યેદ્બ્રહ્મહત્યાયૈ હ્યેષ વર્ણઃ
સ વનસ્પતીનુપાસીદદસ્યૈ બ્રહ્મહત્યાયૈ તૃતીયં પ્રતિ ગૃહ્ણીતેતિ
તેઽબ્રુવન્વરં વૃણામહૈ વૃક્ણાત્
૪ પરાભવિષ્યન્તો મન્યામહે તતો મા પરા ભૂમેત્યાવ્રશ્ચનાદ્વો
ભૂયાꣳસ ઉત્તિષ્ઠાનિત્યબ્રવીત્ તસ્માદાવ્રશ્ચનાદ્ વૃક્ષાણાં
ભૂયાꣳસ ઉત્તિષ્ઠન્તિ વારેવૃતꣳ હ્યેષાં તૃતીયં

બ્રહ્મહત્યાયૈ પ્રત્યગૃહ્ણન્થ્સ નિર્યાસોઽભવત્ તસ્માન્નિર્યાસસ્ય
નાશ્યં બ્રહ્મહત્યાયૈ હ્યેષ વર્ણોઽથો ખલુ ય એવ લોહિતો યો
વાવ્રશ્ચનાન્નિર્યેષતિ તસ્ય નાશ્યં
૫ કામમન્યસ્ય સ સ્ત્રીષઁ સાદમુપાસીદદસ્યૈ બ્રહ્મહત્યાયૈ તૃતીયં
પ્રતિ ગૃહ્ણીતેતિ તા અબ્રુવન્વરં વૃણામહા ઋત્વિયાત્પ્રજાં વિન્દામહૈ
કામમા વિજનિતોઃ સંભવામેતિ તસ્માદૃત્વિયાથ્સ્ત્રિયઃ પ્રજાં
વિન્દન્તે કામમા વિજનિતોઃ સંભવન્તિ વારેવૃતઽગ્ગ્ હ્યાસાં તૃતીયં
બ્રહ્મહત્યાયૈ પ્રત્યગૃહ્ણન્થ્સા મલવદ્વાસા અભવત્ તસ્માન્મલવદ્વાસસા
ન સં વદેત
૬ ન સહાસીત નાસ્યા અન્નમદ્યાદ્ બ્રહ્મહત્યાયૈ હ્યેષા વર્ણં
પ્રતિમુચ્યાસ્તેઽથો ખલ્વાહુરભ્યઞ્જનં વાવ સ્ત્રિયા અન્નમભ્યઞ્જનમેવ
ન પ્રતિગૃહ્યં કામમન્યદિતિ યાં મલવદ્વાસસઁ સંભવન્તિ
યસ્તતો જાયતે સોઽભિશસ્તો યામરણ્યે તસ્યૈ સ્તેનો યાં પરાચીં
તસ્યૈ હ્રીતમુખ્યપગલ્ભો યા સ્નાતિ તસ્યા અપ્સુ મારુકો યા
૭ ઽભ્યઙ્ક્તે તસ્યૈ દુશ્ચર્મા યા પ્રલિખતે તસ્યૈ ખલતિરપમારી યાઙ્ક્તે
તસ્યૈ કાણો યા દતો ધાવતે તસ્યૈ શ્યાવદન્ યા નખાનિ નિકૃન્તતે
તસ્યૈ કુનખી યા કૃણત્તિ તસ્યૈ ક્લીબો યા રજ્જુઁસૃજતિ તસ્યા
ઉદ્બન્ધુકો યા પર્ણેન પિબતિ તસ્યા ઉન્માદુકો યા ખર્વેણ પિબતિ
તસ્યૈ ખર્વસ્તિસ્રો રાત્રીર્વ્રતં ચરેદઞ્જલિના વા પિબેદખર્વેણ વા
પાત્રેણ પ્રજાયૈ ગોપીથાય ॥ ૨। ૫। ૧॥ યથ્સોમપાનં તે વૃક્ણાત્તસ્ય
નાશ્યં વદેત મારુકો યાખર્વેણ વા ત્રીણિ ચ ॥ ૨। ૫। ૧॥
૮ ત્વષ્ટા હતપુત્રો વીંદ્રઁ સોમમાહરત્ તસ્મિન્નિંદ્ર
ઉપહવમૈચ્છત તં નોપાહ્વયત પુત્રં મેઽવધીરિતિ સ
યજ્ઞવેશસં કૃત્વા પ્રાસહા સોમમપિબત્ તસ્ય યદત્યશિષ્યત તત્
ત્વષ્ટાહવનીયમુપ પ્રાવર્તયથ્ સ્વાહેંદ્રશત્રુર્વર્ધસ્વેતિ યદવર્તયત્
તદ્વૃત્રસ્ય વૃત્રત્વં યદબ્રવીથ્ સ્વાહેંદ્રશત્રુર્વર્ધસ્વેતિ તસ્માદસ્યે
૯ ન્દ્રઃ શત્રુરભવથ્સ સંભવન્નગ્નીષોમાવભિ

સમભવથ્સ ઇષુમાત્રમિષુમાત્રં વિષ્વઙ્ઙવર્ધત સ ઇમાઉઁ
લ્લોકાનવૃણોદ્યદિમાઉઁ લ્લોકાનવૃણોત્ તદ્ વૃત્રસ્ય વૃત્રત્વં
તસ્માદિંદ્રોઽબિભેથ્સ પ્રજાપતિમુપાધાવચ્છત્રુર્મેઽજનીતિ
તસ્મૈ વજ્રઁસિક્ત્વા પ્રાયચ્છદેતેન જહીતિ તેનાભ્યાયત
તાવબ્રૂતામગ્નીષોમૌ મા
૧૦ પ્ર હારાવમન્તઃ સ્વ ઇતિ મમ વૈ યુવરઁ સ્થ
ઇત્યબ્રવીન્મામભ્યેતમિતિ તૌ ભાગધેયમૈચ્છેતાં તાભ્યામેતમગ્ની
ષોમીયમેકા દશકપાલં પૂર્ણમાસે પ્રાયચ્છત્ તાવબ્રૂતામભિ સંદષ્ટૌ
વૈ સ્વો ન શક્નુવ ઐતુમિતિ સ ઇંદ્ર આત્મનઃ શીતરૂરાવજનયત્
તચ્છીતરૂરયોર્જન્મ ય એવઁ શીતરૂરયોર્જન્મ વેદ
૧૧ નૈનઁશીતરૂરૌ હતસ્તાભ્યામેનમભ્ય નયત્
તસ્માજ્જઞ્જભ્યમાનાદગ્નીષોમૌ નિરક્રામતાં પ્રાણાપાનૌ વા એનં તદજહિતાં
પ્રાણો વૈ દક્ષોઽપાનઃ ક્રતુસ્તસ્માજ્જઞ્જભ્યમાનો બ્રૂયાન્મયિ દક્ષક્રતૂ
ઇતિ પ્રાણાપાનાવેવાત્મન્ધત્તે સર્વમાયુરેતિ સ દેવતા વૃત્રાન્નિર્હૂય
વાર્ત્રઘ્નઁ હવિઃ પૂર્ણમાસે નિરવપદ્ઘ્નન્તિ વા એનં પૂર્ણમાસ આ
૧૨ ઽમાવાસ્યાયાં પ્યાયયન્તિ તસ્માદ્વાર્ત્રઘ્ની પૂર્ણમાસેઽનૂચ્યેતે
વૃધન્વતી અમાવાસ્યાયાં તથ્સગ્ગ્ સ્થાપ્ય વાર્ત્રઘ્નઁ હવિર્વજ્રમાદાય
પુનરભ્યાયત તે અબ્રૂતાં દ્યાવાપૃથિવી મા પ્ર હારાવયોર્વૈ શ્રિત ઇતિ
તે અબ્રૂતાં વરં વૃણાવહૈ નક્ષત્ર વિહિતાહમસાનીત્યસાવબ્રવીચ્ચિત્ર
વિહિતાહમિતીયં તસ્માન્નક્ષત્ર વિહિતાસૌ ચિત્રવિહિતેઽયં ય એવં
દ્યાવાપૃથિવ્યો
૧૩ ર્વરં વેદૈનં વરો ગચ્છતિ સ આભ્યામેવ પ્રસૂત ઇંદ્રો
વૃત્રમહન્તે દેવા વૃત્રઁ હત્વાગ્નીષોમાવબ્રુવન્, હવ્યં નો વહતમિતિ
તાવબ્રૂતામપતેજસૌ વૈ ત્યૌ વૃત્રે વૈ ત્યયોસ્તેજ ઇતિ તેઽબ્રુવન્ક
ઇદમચ્છૈતીતિ ગૌરિત્યબ્રુવન્ગૌર્વાવ સર્વસ્ય મિત્રમિતિ સાબ્રવીદ્
૧૪ વરં વૃણૈ મય્યેવ સતોઽભયેન ભુનજાધ્વા ઇતિ તદ્ગૌરાહરત્
તસ્માદ્ગવિ સતોઽભયેન ભુઞ્જત એતદ્વા અગ્નેસ્તેજો યદ્ઘૃતમેતથ્સોમસ્ય

યત્પયો ચ એવમગ્નીષોમયોસ્તેજો વેદ તેજસ્વ્યેવ ભવતિ બ્રહ્મવાદિનો
વદન્તિ કિંદેવત્યં પૌર્ણમાસમિતિ પ્રાજાપત્યમિતિ બ્રૂયાત્તેનેંદ્રં જ્યેષ્ઠં
પુત્રં નિરવાસાયયદિતિ તસ્માજ્જ્યેષ્ઠં પુત્રં ધનેન નિરવસાયયન્તિ ॥
૨। ૫। ૨॥ અસ્ય મા વેદા દ્યાવાપૃથિવ્યોરબ્રવીદિતિ તસ્માચ્ચત્વારિ ચ ॥
૨। ૫। ૨॥

૧૫ ઇંદ્રં વૃત્રં જઘ્નિવાꣳ સં મૃધોઽભિ પ્રાવેપન્ત સ એતં
વૈમૃધં પૂર્ણમાસેઽનુ નિર્વાપ્યમપશ્યત્ તં નિરવપત્ તેન વૈ સ
મૃધોઽપાહત યદ્વૈમૃધઃ પૂર્ણમાસેઽનુ નિર્વાપ્યો ભવતિ મૃધ એવ
તેન યજમાનોઽપ હત ઇંદ્રો વૃત્રꣳ હત્વા દેવતાભિશ્ચેંદ્રિયેણ
ચ વ્યાર્ધ્યત સ એતમાગ્નેયમષ્ટા કપાલમમાવાસ્યાયામપશ્યદૈંદ્રં દધિ
૧૬ તં નિરવપત્તેન વૈ સ દેવતાશ્ચેંદ્રિયં ચાવારુન્ધ
યદાગ્નેયોઽષ્ટાકપાલોઽમાવાસ્યાયાં ભવત્યૈંદ્રં દધિ દેવતાશ્ચૈવ
તેનેંદ્રિયં ચ યજમાનોઽવ રુન્ધ ઇંદ્રસ્ય વૃત્રં જઘ્નુષ
ઇંદ્રિયં વીર્યં પૃથિવીમનુ વ્યાર્ચ્છત્તદોષધયો વીરુધોઽભવન્થ્સ
પ્રજાપતિમુપાધાવદ્વૃત્રં મે જઘ્નુષ ઇંદ્રિયં વીર્યં
૧૭ પૃથિવીમનુ વ્યારત્તદોષધયો વીરુધોઽભૂવન્નિતિ સ
પ્રજાપતિઃ પશૂનબ્રવીદેતદસ્મૈ સં નયતેતિ તત્પશવ
ઓષધીભ્યોઽધ્યાત્મન્થ્સમનયન્ તત્પ્રત્યદુહન્, યથ્સમનયન્
તથ્સાંનાય્યસ્ય સાંનાય્યત્વં યત્પ્રત્યદુહન્ તત્પ્રતિધુષઃ
પ્રતિધુક્ત્વꣳ સમનૈષુઃ પ્રત્યધુક્ષન્ન તુ મયિ શ્રયત
ઇત્યબ્રવીદેતદસ્મૈ
૧૮ શૃતં કુરુતેત્યબ્રવીત્તદસ્મૈ શૃતમકુર્વન્નિંદ્રિયં
વાવાસ્મિન્વીર્યં તદશ્રયન્તચ્છૃતસ્ય શૃતત્વꣳ સમનૈષુઃ
પ્રત્યધુક્ષઙ્છૃતમક્રન્ન તુ મા ધિનોતીત્યબ્રવીદેતદસ્મૈ દધિ
કુરુતેત્યબ્રવીત્તદસ્મૈ દધ્યકુર્વન્તદેનમધિનોત્તદ્ધ્નો દધિત્વં
બ્રહ્મવાદિનો વદન્તિ દધ્નઃ પૂર્વસ્યાવદેયં

૧૯ દધિ  હિ પૂર્વં  ક્રિયત  ઇત્યનાદૃત્ય  તચ્છૃતસ્યૈવ
પૂર્વસ્યાવદ્યેદિંદ્રિયમેવાસ્મિન્ વીર્યꣳ શ્રિત્વા દધ્નોપરિષ્ટાદ્ધિનોતિ
યથાપૂર્વમુપૈતિ  યત્પૂતીકૈર્વા પર્ણવલ્કૈર્વાતઞ્ચ્યાત્સૌમ્યં તદ્યત્ક્વલૈ
રાક્ષસં તદ્યત્તણ્ડુલૈર્વૈશ્વદેવં તદ્યદાતઞ્ચનેન માનુષં તદ્યદ્દધ્ના
તત્સેંદ્રં  દધ્નાતનક્તિ

૨૦ સેંદ્રત્વાયાગ્નિહોત્રોચ્છેષણમભ્યાતનક્તિ યજ્ઞસ્ય  સંતત્યા  ઇંદ્રો
વૃત્રꣳ  હત્વા પરાં  પરાવતમગચ્છદપારાધમિતિ  મન્યમાનસ્તં
દેવતાઃ  પ્રૈષમૈચ્છન્થ્સોઽબ્રવીત્પ્રજાપતિર્યઃ પ્રથમોઽનુ વિન્દતિ
તસ્ય  પ્રથમં ભાગધેયમિતિ  તં પિતરોઽન્વવિન્દન્તસ્માત્પિતૃભ્યઃ
પૂર્વેદ્યુઃ ક્રિયતે  સોઽમાવાસ્યાં  પ્રત્યાગચ્છત્તં દેવા અભિ
સમગચ્છન્તામા વૈ નો

૨૧ ઽદ્ય વસુ  વસતીતીંદ્રો  હિ દેવાનાં  વસુ  તદમાવાસ્યાયા અમાવાસ્યત્વં
બ્રહ્મવાદિનો  વદન્તિ કિંદેવત્યꣳ સાંનાય્યમિતિ  વૈશ્વદેવમિતિ
બ્રૂયાદ્વિશ્વે  હિ તદ્દેવા ભાગધેયમભિ સમગચ્છન્તેત્યથો
ખલ્વૈંદ્રમિત્યેવ બ્રૂયાદિંદ્રં  વાવ તે તદ્ભિષજ્યન્તોઽભિ
સમગચ્છન્તેતિ  ॥ ૨। ૫। ૩॥ દધિ  મે જઘ્નુષ  ઇંદ્રિયં
વીર્યમિત્યબ્રવીદેતદસ્મા અવદેયં  તનક્તિ નો  દ્વિચત્વારિꣳ શચ્ચ ॥ ૨। ૫। ૩॥

૨૨ બ્રહ્મવાદિનો  વદન્તિ  સ ત્વૈ દર્શપૂર્ણમાસૌ યજેત  ય એનૌ
સેંદ્રૌ  યજેતેતિ  વૈમૃધઃ પૂર્ણમાસેઽનુ નિર્વાપ્યો  ભવતિ  તેન
પૂર્ણમાસઃ  સેંદ્ર  ઐંદ્રં દધ્યમાવાસ્યાયાં  તેનામાવાસ્યા  સેંદ્રા  ય એવં
વિદ્વાન્દર્શપૂર્ણમાસૌ યજતે  સેંદ્રાવેવૈનૌ  યજતે  શ્વઃશ્વોઽસ્મા ઈજાનાય
વસીયો ભવતિ દેવા વૈ યદ્યજ્ઞેઽકુર્વત  તદસુરા અકુર્વત  તે દેવા એતા

૨૩ મિષ્ટિમપશ્યન્નાગ્નાવૈષ્ણવમેકાદશકપાલꣳ  સરસ્વત્યૈ ચરુꣳ
સરસ્વતે ચરું તાં પૌર્ણમાસꣳ સગ્ગ્સ્થાપ્યાનુ  નિરવપન્તતો
દેવા અભવન્ પરાસુરા  યો ભ્રાતૃવ્યવાન્થ્સ્યાત્સ પૌર્ણમાસꣳ
સગ્ગ્સ્થાપ્યૈતામિષ્ટિમનુ  નિર્વપેત્ પૌર્ણમાસેનૈવ વજ્રં  ભ્રાતૃવ્યાય
પ્રહૃત્યાગ્નાવૈષ્ણવેન  દેવતાશ્ચ યજ્ઞં ચ  ભ્રાતૃવ્યસ્ય વૃઙ્ક્તે

મિથુનાન્ પશૂન્થ્સારસ્વતાભ્યાં યાવદેવાસ્યાસ્તિ તથ્
૨૪ સર્વં વૃઙ્ક્તે પૌર્ણમાસીમેવ યજેત ભ્રાતૃવ્યવાન્નામાવાસ્યાꣳ
હત્વા ભ્રાતૃવ્યં નાપ્યાયયતિ સાકં પ્રસ્થાયીયેન યજેત પશુકામો
યસ્મૈ વા અલ્પેનાહરન્તિ નાત્મના તૃપ્યતિ નાન્યસ્મૈ દદાતિ યસ્મૈ
મહતા તૃપ્યત્યાત્મના દદાત્યન્યસ્મૈ મહતા પૂર્ણꣳ હોતવ્યં
તૃપ્ત એવૈનમિંદ્રઃ પ્રજયા પશુભિસ્તર્પયતિ દારુપાત્રેણ જુહોતિ ન હિ
મૃન્મયમાહુતિમાનશ ઔદુંબરં
૨૫ ભવત્યૂર્ગ્વા ઉદુંબર ઊર્ક્પશવ ઊર્જૈવાસ્મા ઊર્જં પશૂનવ રુન્ધે
નાગતશ્રીર્મહેંદ્રં યજેત ત્રયો વૈ ગતશ્રિયઃ શુશ્રુવાન્ગ્રામણી
રાજન્યસ્તેષાં મહેંદ્રો દેવતા યો વૈ સ્વાં દેવતામતિયજતે પ્ર સ્વાયૈ
દેવતાયૈ ચ્યવતે ન પરાં પ્રાપ્નોતિ પાપીયાન્ભવતિ સંવથ્સરમિંદ્રં
યજેત સંવથ્સરꣳ હિ વ્રતં નાતિ સ્વૈ
૨૬ વૈનં દેવતેજ્યમાના ભૂત્યા ઇન્ધે વસીયાન્ભવતિ સંવથ્સરસ્ય
પરસ્તાદગ્નયે વ્રતપતયે પુરોડાશમષ્ટાકપાલં
નિર્વપેથ્સંવથ્સરમેવૈનં વૃત્રં જઘ્નિવાꣳ
સમગ્નિર્વ્રતપતિર્વ્રતમા લંભયતિ તતોઽધિ કામં યજેત ॥ ૨। ૫। ૪॥

એતાં તદૌદુંબરગ્ગ્ સ્વા ત્રિꣳશચ્ચ ॥ ૨। ૫। ૪॥

૨૭ નાસોમયાજી સં નયેદનાગતં વા એતસ્ય પયો યોઽસોમયાજી યદસોમયાજી
સં નયેત્પરિમોષ એવ સોઽનૃતં કરોત્યથો પરૈવ સિચ્યતે સોમયાજ્યેવ
સં નયેત્પયો વૈ સોમઃ પયઃ સાંનાય્યં પયસૈવ પય આત્મન્ધત્તે
વિ વા એતં પ્રજયા પશુભિરર્ધયતિ વર્ધયત્યસ્ય ભ્રાતૃવ્યં યસ્ય
હવિર્નિરુપ્તં પુરસ્તાચ્ચંદ્રમા
૨૮ અભ્યુદેતિ ત્રેધાતણ્ડુલાન્વિ ભજેદ્યે મધ્યમાઃ સ્યુસ્તાનગ્નયે
દાત્રે પુરોડાશમષ્ટાકપાલં કુર્યાદ્યે સ્થવિષ્ઠાસ્તાનિંદ્રાય પ્રદાત્રે
દધરꣳ શ્ચરું યેઽણિષ્ઠાસ્તાન્, વિષ્ણવે શિપિવિષ્ટાય શ◌ૃતે
ચરુમગ્નિરેવાસ્મૈ પ્રજાં પ્રજનયતિ વૃદ્ધામિંદ્રઃ પ્ર યચ્છતિ
યજ્ઞો વૈ વિષ્ણુઃ પશવઃ શિપિર્યજ્ઞ એવ પશુષુ પ્રતિતિષ્ઠતિ ન દ્વે

૨૯ યજેત યત્પૂર્વયા સંપ્રતિ યજેતોત્તરયા છંબટ્કુર્યાદ્યદુત્તરયા
સંપ્રતિ યજેત પૂર્વયા છંબટ્કુર્યાન્નેષ્ટિર્ભવતિ ન યજ્ઞાસ્તદનુ હ્રીત
મુખ્યપગલ્ભો જાયત એકામેવ યજેત પ્રગલ્ભોઽસ્ય જાયતેઽનાદૃત્ય
તદ્વે એવ યજેત યજ્ઞમુખમેવ પૂર્વયાલભતે યજત ઉત્તરયા દેવતા
એવ પૂર્વયાવરુન્ધ ઇંદ્રિયમુત્તરયા દેવલોકમેવ
૩૦ પૂર્વયાભિજયતિ મનુષ્યલોકમુત્તરયા ભૂયસો યજ્ઞક્રતૂનુપૈત્યેષા વૈ
સુમના નામેષ્ટિર્યમદ્યેજાનં પશ્ચાચ્ચંદ્રમા અભ્યુદેત્યસ્મિન્નેવાસ્મૈ
લોકેઽર્ધુકં ભવતિ દાક્ષાયણયજ્ઞેન સુવર્ગકામો યજેત પૂર્ણમાસે
સં નયેન્ મૈત્રા વરુણ્યામિક્ષયામાવાસ્યાયાં યજેત પૂર્ણમાસે વૈ
દેવાનાઁ સુતસ્તેષામેતમર્ધમાસં પ્રસુતસ્તેષાં મૈત્રાવરુણી
વશામાવાસ્યાયામનૂબન્ધ્યા યત્
૩૧ પૂર્વેદ્યુર્યજતે વેદિમેવ તત્કરોતિ યદ્વથ્સાનપા કરોતિ
સદોહવિર્ધાને એવ સં મિનોતિ યદ્યજતે દેવૈરેવ સુત્યાઁ સંપાદયતિ
સ એતમર્ધમાસઁ સધમાદં દેવૈઃ સોમં પિબતિ યન્મૈત્રા
વરુણ્યામિક્ષયામા વાસ્યાયાં યજતે યૈવાસૌ દેવાનાં વશાનૂબન્ધ્યા
સો એવૈષૈતસ્ય સાક્ષાદ્વા એષ દેવાનભ્યારોહતિ ય એષાં યજ્ઞ
૩૨ મભ્યારોહતિ યથા ખલુ વૈ શ્રેયાનભ્યારૂઢઃ કામયતે
તથા કરોતિ યદ્યવવિધ્યતિ પાપીયાન્ભવતિ યદિ નાવવિધ્યતિ
સદૃઙ્વ્યાવૃત્કામ એતેન યજ્ઞેન યજેત ક્ષુરપવિર્હ્યેષ
યજ્ઞસ્તાજક્ પુણ્યો વા ભવતિ પ્ર વા મીયતે તસ્યૈતદ્વ્રતં નાનૃતં
વદેન્ન માઁ સમશ્નીયાન્ન સ્ત્રિયમુપેયાન્નાસ્ય પલ્પૂલનેન વાસઃ
પલ્પૂલયેયુરેતદ્ધિ દેવાઃ સર્વં ન કુર્વન્તિ ॥ ૨। ૫। ૫॥ ચંદ્રમા દ્વે
દેવલોકમેવ યદ્યજ્ઞં પલ્પૂલયેયુષ્ષટ્ચ ॥ ૨। ૫। ૫॥
૩૩ એષ વૈ દેવરથો યદ્દર્શપૂર્ણમાસૌ યો દર્શપૂર્ણમાસાવિષ્ટ્વા
સોમેન યજતે રથસ્પષ્ટ એવાવસાને વરે દેવાનામવ
સ્યત્યેતાનિ વા અઙ્ગાપરૂઁષિ સંવથ્સરસ્ય યદ્દર્શપૂર્ણમાસૌ ય એવં

વિદ્વાન્દર્શપૂર્ણમાસૌ યજતેઽઙ્ગાપરુગ્ષ્યેવ સંવથ્સરસ્ય પ્રતિ
દધાત્યેતે વૈ સંવથ્સરસ્ય ચક્ષુષી યદ્દર્શપૂર્ણમાસૌ ય એવં
વિદ્વાન્દર્શપૂર્ણમાસૌ યજતે તાભ્યામેવ સુવર્ગં લોકમનુ પશ્ય
૩૪ ત્યેષા વૈ દેવાનાં વિક્રાન્તિર્યદ્દર્શપૂર્ણમાસૌ ય એવં વિદ્વાન્
દર્શપૂર્ણમાસૌ યજતે દેવાનામેવ વિક્રાન્તિમનુ વિ ક્રમત એષ વૈ
દેવયાનઃ પન્થા યદ્દર્શપૂર્ણમાસૌ ય એવં વિદ્વાન્ દર્શપૂર્ણમાસૌ
યજતે ય એવ દેવયાનઃ પન્થાસ્તꣳ સમારોહત્યેતૌ વૈ દેવાનાꣳ
હરી યદ્દર્શપૂર્ણમાસૌ ય એવં વિદ્વાન્ દર્શપૂર્ણમાસૌ યજતે યાવેવ
દેવાનાꣳ હરી તાભ્યા
૩૫ મેવૈભ્યો હવ્યં વહત્યેતદ્વૈ દેવાનામાસ્યં યદ્દર્શપૂર્ણમાસૌ ય
એવં વિદ્વાન્ દર્શપૂર્ણમાસૌ યજતે સાક્ષાદેવ દેવાનામાસ્યે જુહોત્યેષ
વૈ હવિર્ધાની યો દર્શપૂર્ણમાસ યાજી સાયં પ્રાતરગ્નિહોત્રં જુહોતિ
યજતે દર્શપૂર્ણ માસાવહરહર્ હવિર્ધાનિનાꣳસુતો ય એવં વિદ્વાન્
દર્શપૂર્ણમાસૌ યજતે હવિર્ધાન્યસ્મીતિ સર્વમેવાસ્ય બર્હિષ્યં
દત્તંભવતિ દેવા વા અહ
૩૬ ર્યજ્ઞિયં નાવિન્દન્તે દર્શપૂર્ણમાસાવપુનન્તૌ વા એતૌ પૂતૌ
મેધ્યૌ યદ્દર્શપૂર્ણમાસૌ ય એવં વિદ્વાન્ દર્શપૂર્ણમાસૌ યજતે
પૂતાવેવૈનૌ મેધ્યૌ યજતે નામાવાસ્યાયાં ચ પૌર્ણમાસ્યાં ચ
સ્ત્રિયમુપેયાદ્યદુપેયાન્નિરિંદ્રિયઃ સ્યાથ્સોમસ્ય વૈ રાજ્ઞોઽર્ધમાસસ્ય
રાત્રયઃ પત્નય આસન્તાસામમાવાસ્યાં ચ પૌર્ણમાસીં ચ નોપૈત્
૩૭ તે એનમભિ સમનહ્યેતાં તં યક્ષ્મ આર્ચ્છદ્રાજાનં યક્ષ્મ
આરદિતિ તદ્રાજયક્ષ્મસ્ય જન્મ યત્પાપીયાનભવત્ તત્પાપયક્ષ્મસ્ય
યજ્જાયાભ્યામવિન્દત્ તજ્જાયેન્યસ્ય ય એવમેતેષાં યક્ષ્માણાં જન્મ
વેદ નૈનમેતે યક્ષ્મા વિન્દન્તિ સ એતે એવ નમસ્યન્નુપાધાવત્તે અબ્રૂતાં
વરં વૃણાવહા આવં દેવાનાં ભાગધે અસાવા
૩૮ ઽવદધિ દેવા ઇજ્યાન્તા ઇતિ તસ્માથ્ સદૃશીનાꣳ
રાત્રીણામમાવાસ્યાયાં ચ પૌર્ણમાસ્યાં ચ દેવા ઇજ્યન્ત એતે હિ દેવાનાં

ભાગધે ભાગધા અસ્મૈ મનુષ્યા ભવન્તિ ય એવં વેદ ભૂતાનિ
ક્ષુધમઘ્નન્થ્સધો મનુષ્યા અર્ધમાસે દેવા માસિ પિતરઃ સંવત્સરે
વનસ્પતયસ્તસ્માદહરહર્મનુષ્યા અશનમિચ્છન્તેઽર્ધમાસે દેવા ઇજ્યન્તે
માસિ પિતૃભ્યઃ ક્રિયતે સંવત્સરે વનસ્પતયઃ ફલં ગૃહ્ણન્તિ ય એવં
વેદ હન્તિ ક્ષુધં ભ્રાતૃવ્યમ્ ॥ ૨। ૫। ૬॥ પશ્યતિ તાભ્યામહરૈદસાવ
ફલઁસપ્ત ચ ॥ ૨। ૫। ૬॥

૩૯ દેવા વૈ નર્ચિ ન યજુષ્યશ્રયન્ત તે સામન્નેવાશ્રયન્ત હિં કરોતિ
સામૈવાકર્હિં કરોતિ યત્રૈવ દેવા અશ્રયન્ત તત એવૈનાન્ પ્ર યુઙ્ક્તે
હિં કરોતિ વાચ એવૈષ યોગો હિં કરોતિ પ્રજા એવ તદ્યજમાનઃ સૃજતે
ત્રિઃ પ્રથમામન્વાહ ત્રિરુત્તમાં યજ્ઞસ્યૈવ તદ્બર્સં

૪૦ નહ્યત્યપ્રસ્રઁસાય સંતતમન્વાહ પ્રાણાનામન્નાદ્યસ્ય સંતત્યા
અથો રક્ષસામપહત્યૈ રાથંતરીં પ્રથમામન્વાહ રાથંતરો વા અયં
લોક ઇમમેવ લોકમભિ જયતિ ત્રિર્વિ ગૃહ્ણાતિ ત્રય ઇમે લોકા ઇમાનેવ
લોકાનભિ જયતિ બાર્હતીમુત્તમામન્વાહ બાર્હતો વા અસૌ લોકોઽમુમેવ
લોકમભિ જયતિ પ્ર વો

૪૧ વાજા ઇત્યનિરુક્તાં પ્રાજાપત્યામન્વાહ યજ્ઞો વૈ પ્રજાપતિર્યજ્ઞમેવ
પ્રજાપતિમા રભતે પ્ર વો વાજા ઇત્યન્વાહાન્નં વૈ વાજોઽન્નમેવાવ
રુન્ધે પ્ર વો વાજા ઇત્યન્વાહ તસ્માત્પ્રાચીનઁ રેતો ધીયતેઽગ્ન
આ યાહિ વીતય ઇત્યાહ તસ્માત્પ્રતીચીઃ પ્રજા જાયન્તે પ્ર વો વાજા

૪૨ ઇત્યન્વાહ માસા વૈ વાજા અર્ધમાસા અભિદ્યવો દેવા હવિષ્મન્તો
ગૌર્ઘૃતાચી યજ્ઞો દેવાઞ્જિગાતિ યજમાનઃ સુમ્નયુરિદમસીદમસીત્યેવ
યજ્ઞસ્ય પ્રિયં ધામાવ રુન્ધે યં કામયેત સર્વમાયુરિયાદિતિ પ્ર વો
વાજા ઇતિ તસ્યાનૂચ્યાગ્ન આ યાહિ વીતય ઇતિ સંતતમુત્તરમર્ધર્ચમા
લભેત

૪૩ પ્રાણેનૈવાસ્યાપાનં દાધાર સર્વમાયુરેતિ યો વા અરત્નિઁ
સામિધેનીનાં વેદારત્નાવેવ ભ્રાતૃવ્યં કુરુતેઽર્ધર્ચૌ સં દધાત્યેષ
વા અરત્નિઃ સામિધેનીનાં ય એવં વેદારત્નાવેવ ભ્રાતૃવ્યં કુરુત

ઋષેર્ઋષેર્વા એતા નિર્મિતા  યથ્સામિધેન્યસ્તા યદસંયુક્તાઃ  સ્યુઃ
પ્રજયા  પશુભિર્યજમાનસ્ય  વિ તિષ્ઠેરન્નર્ધર્ચૌ સંદધાતિ  સં
યુનક્ત્યેવૈનાસ્તા અસ્મૈ  સંયુક્તા  અવરુદ્ધાઃ  સર્વામાશિષં  દુહ્રે ॥ ૨। ૫। ૭॥
બર્સં વો  જાયંતે  પ્ર વો  વાજા  લભેત દધાતિ  સં દશ  ચ ॥ ૨। ૫। ૭॥

૪૪ અયજ્ઞો  વા એષ યોઽસામાઽગ્ન  આ યાહિ વીતય  ઇત્યાહ રથંતરસ્યૈષ
વર્ણસ્તં ત્વા  સમિદ્ભિરઙ્ગિર  ઇત્યાહ વામદેવ્યસ્યૈષ વર્ણો  બૃહદગ્ને
સુવીર્યમિત્યાહ બૃહત એષ વર્ણો  યદેતં તૃચમન્વાહ  યજ્ઞમેવ
તથ્સામન્વન્તં કરોત્યગ્નિરમુષ્મિꣳ લ્લોક આસીદાદિત્યોઽસ્મિન્તાવિમૌ
લોકાવશાન્તા

૪૫ વાસ્તાં  તે દેવા અબ્રુવન્નેતેમૌ વિ પર્યૂહામેત્યગ્ન  આ યાહિ વીતય
ઇત્યꣳસ્મિલ્લોકેઽગ્નિમદધુર્બૃહદગ્ને સુવીર્યમિત્યમુષ્મિꣳ લ્લોક
આદિત્યં તતો  વા ઇમૌ લોકાવશામ્યતાં  યદેવમન્વાહાનયોર્લોકયોઃ
શાન્ત્યૈ  શામ્યતોઽસ્મા ઇમૌ લોકૌ ય એવં વેદ  પઞ્ચદશ સામિધેનીરન્વાહ
પઞ્ચદશ

૪૬ વા અર્ધમાસસ્ય  રાત્રયોઽર્ધમાસશઃ સંવથ્સર આપ્યતે  તાસાં
ત્રીણિ  ચ શતાનિ  ષષ્ટિશ્ચાક્ષરાણિ  તાવતીઃ સંવથ્સરસ્ય
રાત્રયોઽક્ષરશ એવ સંવથ્સરમાપ્નોતિ નૃમેધશ્ચ  પરુચ્છેપશ્ચ
બ્રહ્મવાદ્યમવદેતામસ્મિન્દારાવાર્દ્રેઽગ્નિં જનયાવ યતરો નૌ  બ્રહ્મીયાનિતિ
નૃમેધોઽભ્યવદથ્સ ધૂમમજનયત્ પરુચ્છેપોઽભ્યવદત્
સોઽગ્નિમજનયદૃષ  ઇત્યબ્રવીદ્

૪૭ યથ્સમાવદ્વિદ્ધ કથા ત્વમગ્નિમજીજનો  નાહમિતિ  સામિધેનીનામેવાહં
વર્ણં  વેદેત્યબ્રવીદ્યદ્ ઘૃતવત્ પદમનૂચ્યતે  સ આસાં  વર્ણસ્તં
ત્વા  સમિદ્ભિરઙ્ગિર  ઇત્યાહ સામિધેનીષ્વેવ તજ્જ્યોતિર્જનયતિ  સ્ત્રિયસ્તેન
યદૃચ  સ્ત્રિયસ્તેન  યદ્ગાયત્રિયઃ  સ્ત્રિયસ્તેન  યથ્સામિધેન્યો
વૃષણ્વતીમન્વાહ

૪૮ તેન  પુરꣳસ્વતીસ્તેન  સેંદ્રાસ્તેન  મિથુના અગ્નિર્દેવાનાં  દૂત
આસીદુશના  કાવ્યોઽસુરાણાં  તૌ પ્રજાપતિં પ્રશ્નમૈતાꣳ  સ

પ્રજાપતિરગ્નિં દૂતં વૃણીમહ ઇત્યભિ પર્યાવર્તત તતો દેવા
અભવન્પરાસુરા યસ્યૈવં વિદુષોઽગ્નિં દૂતં વૃણીમહ ઇત્યન્વાહ
ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો ભવત્યધ્વરવતીમન્વાહ
ભ્રાતૃવ્યમેવૈતયા

૪૯ ધ્વરતિ શોચિષ્કેશસ્તમીમહ ઇત્યાહ પવિત્રમેવૈતદ્યજમાનમેવૈતયા
પવયતિ સમિદ્ધો અગ્ન આહુતેત્યાહ પરિધિમેવૈતં પરિ દધાત્યસ્કન્દાય
યદત ઊર્ધ્વમભ્યાદધ્યાદ્યથા બહિઃ પરિધિ સ્કન્દતિ તાદૃગેવ તત્ત્રયો
વા અગ્નયો હવ્યવાહનો દેવાનાં કવ્યવાહનઃ પિતૃણાꣳ સહરક્ષા
અસુરાણાં ત એતર્હ્યા શꣳસન્તે માં વરિષ્યતે મા

૫૦ મિતિ વૃણીધ્વꣳ હવ્યવાહનમિત્યાહ ય એવ દેવાનાં તં વૃણીત
આર્ષેયં વૃણીતે બન્ધોરેવ નૈત્યથો સંતત્યૈ પરસ્તાદર્વાચો
વૃણીતે તસ્માત્પરસ્તાદર્વાઞ્ચો મનુષ્યાન્પિતરોઽનુ પ્ર પિપતે ॥
૨। ૫। ૮॥ આશાંતાવાહ પંચદશાબ્રવીદન્વાહૈતયા વરિષ્યતે મામેકાન્ન
ત્રિꣳશચ્ચ ॥ ૨। ૫। ૮॥

૫૧ અગ્ને મહાꣳ અસીત્યાહ મહાન્ હ્યેષ યદગ્નિર્બ્રાહ્મણેત્યાહ બ્રાહ્મણો
હ્યેષ ભારતેત્યાહૈષ હિ દેવેભ્યો હવ્યં ભરતિ દેવેદ્ધ ઇત્યાહ
દેવા હ્યેતમૈન્ધત મન્વિદ્ધ ઇત્યાહ મનુર્હ્યેતમુત્તરો દેવેભ્ય
ઐન્ધર્ષિષ્ટુત ઇત્યાહર્ષયો હ્યેતમસ્તુવન્વિપ્રાનુમદિત ઇત્યાહ

૫૨ વિપ્રા હ્યેતે યચ્છુશ્રુવાꣳસઃ કવિશસ્ત ઇત્યાહ કવયો હ્યેતે
યચ્છુશ્રુવાꣳસો બ્રહ્મસꣳશિત ઇત્યાહ બ્રહ્મસꣳશિતો હ્યેષ
ઘૃતાહવન ઇત્યાહ ઘૃતાહુતિર્હ્યસ્ય પ્રિયતમા પ્રણીર્યજ્ઞાનામિત્યાહ
પ્રણીર્હ્યેષ યજ્ઞાનાꣳરથીરધ્વરાણામિત્યાહૈષ હિ
દેવરથોઽતૂર્તો હોતેત્યાહ ન હ્યેતં કશ્ચન

૫૩ તરતિ તૂર્ણિર્હવ્યવાડિત્યાહ સર્વꣳ હ્યેષ તરત્યાસ્પાત્રં
જુહૂર્દેવાનામિત્યાહ જુહૂર્હ્યેષ દેવાનાં ચમસો દેવપાન ઇત્યાહ
ચમસો હ્યેષ દેવપાનોઽરાꣳ ઇવાગ્ને નેમિર્દેવાꣳસ્ત્વં પરિભૂરસીત્યાહ
દેવાન્ હ્યેષ પરિભૂર્યદ્બ્રૂયાદા વહ દેવાન્દેવયતે યજમાનાયેતિ

ભ્રાતૃવ્યમસ્મૈ

૫૪ જનયેદા વહ દેવાન્, યજમાનાયેત્યાહ યજમાનમેવૈતેન
વર્ધયત્યગ્નિમગ્ન આ વહ સોમમા વહેત્યાહ દેવતા એવ
તદ્યથાપૂર્વમુપ હ્વયત આ ચાગ્ને દેવાન્, વહ સુયજા ચ યજ જાતવેદ
ઇત્યાહાગ્નિમેવ તથ્સરꣳ શ્યતિ સોઽસ્ય સꣳ શિતો દેવેભ્યો હવ્યં
વહત્યગ્નિર્હોતે

૫૫ ત્યાહાગ્નિર્વૈ દેવાનાꣳ હોતા ય એવ દેવાનાꣳ હોતા તં
વૃણીતે સ્મો વયમિત્યાહાત્માનમેવ સત્ત્વં ગમયતિ સાધુ તે યજમાન
દેવતેત્યાહાશિષમેવૈતામા શાસ્તે યદ્બ્રૂયાદ્યોઽગ્નિꣳ હોતારમવૃથા
ઇત્યગ્નિનોઽભયતો યજમાનં પરિ ગૃહ્ણીયાત્ પ્રમાયુકઃ સ્યાદ્યજમાનદેવત્યા
વૈ જુહૂર્ભ્રાતૃવ્યદેવત્યોઽપભૃદ્

૫૬ યદ્વે ઇવ બ્રૂયાદ્ભ્રાતૃવ્યમસ્મૈ જનયેદ્ઘૃતવતીમધ્વર્ ્યો
સ્રુચમાસ્યસ્વેત્યાહ યજમાનમેવૈતેન વર્ધયતિ દેવાયુવમિત્યાહ દેવાન્
હ્યેષાવતિ વિશ્વવારામિત્યાહ વિશ્વꣳ હ્યેષાવતીડામહૈ દેવાꣳ
ઈડેન્યાન્નમસ્યામ નમસ્યાન્ યજામ યજ્ઞિયાનિત્યાહ મનુષ્યા વા ઈડેન્યાઃ
પિતરો નમસ્યા દેવા યજ્ઞિયા દેવતા એવ તદ્યથાભાગં યજતિ ॥

૨। ૫। ૯॥ વિપ્રાનુમદિત ઇત્યાહ ચનાસ્મૈ હોતોપભૃદ્દેવતા એવ ત્રીણિ
ચ ॥ ૨। ૫। ૯॥

૫૭ ત્રીગ્ સ્તૃચાનનુ બ્રૂયાદ્રાજન્યસ્ય ત્રયો વા અન્યે રાજન્યાત્પુરુષા
બ્રાહ્મણો વૈશ્યઃ શૂદ્રસ્તાનેવાસ્મા અનુકાન્કરોતિ પઞ્ચદશાનુ
બ્રૂયાદ્રાજન્યસ્ય પઞ્ચદશો વૈ રાજન્યઃ સ્વ એવૈનꣳ સ્તોમે પ્રતિ
ષ્ઠાપયતિ ત્રિષ્ટુભા પરિ દધ્યાદિંદ્રિયં વૈ ત્રિષ્ટુગિંદ્રિયકામઃ ખલુ
વૈ રાજન્યો યજતે ત્રિષ્ટુભૈવાસ્મા ઇંદ્રિયં પરિ ગૃહ્ણાતિ યદિ કામયેત

૫૮ બ્રહ્મવર્ચસમસ્ત્વિતિ ગાયત્રિયા પરિ દધ્યાદ્બ્રહ્મવર્ચસં વૈ
ગાયત્રી બ્રહ્મવર્ચસમેવ ભવતિ સપ્તદશાનુ બ્રૂયાદ્વૈશ્યસ્ય
સપ્તદશો વૈ વૈશ્યઃ સ્વ એવૈનꣳ સ્તોમે પ્રતિષ્ઠાપયતિ જગત્યા
પરિ દધ્યાજ્જાગતા વૈ પશવઃ પશુકામઃ ખલુ વૈ વૈશ્યો યજતે

જગત્યૈવાસ્મૈ પશૂન્પરિ ગૃહ્ણાત્યેકવિꣳશતિમનુ બ્રૂયાત્ પ્રતિષ્ઠા
કામસ્યૈકવિꣳશઃ સ્તોમાનાં પ્રતિષ્ઠા પ્રતિષ્ઠિત્યૈ
૫૯ ચતુર્વિꣳશતિમનુ બ્રૂયાદ્બ્રહ્મવર્ચસકામસ્ય ચતુર્વિꣳશત્યક્ષરા
ગાયત્રી ગાયત્રી બ્રહ્મવર્ચસં ગાયત્રિયૈવાસ્મૈ બ્રહ્મવર્ચસમવ રુન્ધે
ત્રિꣳશતમનુ બ્રૂયાદન્નકામસ્ય ત્રિꣳશદક્ષરા વિરાડન્નં
વિરાડ્વિરાજૈવાસ્મા અન્નાદ્યમવ રુન્ધે દ્વાત્રિꣳશતમનુ
બ્રૂયાત્પ્રતિષ્ઠાકામસ્ય દ્વાત્રિꣳશદક્ષરાનુષ્ટુગનુષ્ટુપ્ છન્દસાં
પ્રતિષ્ઠા પ્રતિષ્ઠિત્યૈ ષટ્ત્રિꣳશતમનુ બ્રૂયાત્પશુકામસ્ય
ષટ્ત્રિꣳશદક્ષરા બૃહતી બાર્હતાઃ પશવો બૃહત્યૈવાસ્મૈ પશૂ
૬૦ નવ રુન્ધે ચતુશ્ચત્વારિꣳશતમનુ
બ્રૂયાદિંદ્રિયકામસ્ય ચતુશ્ચત્વારિꣳશદક્ષરા ત્રિષ્ટુગિંદ્રિયં
ત્રિષ્ટુપ્ત્રિષ્ટુભૈવાસ્મા ઇંદ્રિયમવ રુન્ધેઽષ્ટાચત્વારિꣳશતમનુ
બ્રૂયાત્પશુકામસ્યાષ્ટાચત્વારિꣳશદક્ષરા જગતી જાગતાઃ પશવો
જગત્યૈવાસ્મૈ પશૂનવ રુન્ધે સર્વાણિ છન્દાગ્સ્યનુ બ્રૂયાદ્બહુયાજિનઃ
સર્વાણિ વા એતસ્ય છન્દાગ્સ્યવરુદ્ધાનિ યો બહુયાજ્યપરિમિતમનુ
બ્રૂયાદપરિમિતસ્યાવરુદ્ધ્યૈ ॥ ૨। ૫। ૧૦॥ કામયેત પ્રતિષ્ઠિત્યૈ
પશૂન્થ્સપ્ત ચત્વારિꣳશચ્ચ ॥ ૨। ૫। ૧૦॥
૬૧ નિવીતં મનુષ્યાણાં પ્રાચીનાવીતં પિતૃણામુપવીતં દેવાનામુપ વ્યયતે
દેવલક્ષ્મમેવ તત્કુરુતે તિષ્ઠન્નન્વાહ તિષ્ઠન્ હ્યાશ્રુતતરં વદતિ
તિષ્ઠન્નન્વાહ સુવર્ગસ્ય લોકસ્યાભિજિત્યા આસીનો યજત્યસ્મિન્નેવ લોકે
પ્રતિતિષ્ઠતિ યત્ક્રૌઞ્ચમન્વાહાસુરં તદ્યન્મંદ્રં માનુષં તદ્યદન્તરા
તથ્સદેવમન્તરાનૂચ્યꣳસદેવત્વાય વિદ્વાꣳસો વૈ
૬૨ પુરા હોતારોઽભૂવન્તસ્માદ્વિધૃતા અધ્વાનોઽભૂવન્ન પન્થાનઃ
સમરુક્ષન્નન્તર્વેદ્યન્યઃ પાદો ભવતિ બહિર્વેદ્યન્યોઽથાન્વાહાધ્વનાં
વિધૃત્યૈ પથામસꣳરોહાયાથો ભૂતં ચૈવ ભવિષ્યચ્ચાવ
રુન્ધેઽથો પરિમિતં ચૈવાપરિમિતં ચાવ રુન્ધેઽથો ગ્રામ્યાꣳશ્ચૈવ
પશૂનારણ્યાꣳશ્ચાવ રુન્ધેઽથો

૬૩ દેવલોકં ચૈવ મનુષ્યલોકં ચાભિ જયતિ દેવા વૈ સામિધેનીરનૂચ્ય
યજ્ઞં નાન્વપશ્યન્થ્સ પ્રજાપતિસ્તૂષ્ણીમાઘારમાઽઘારયત્તતો વૈ દેવા
યજ્ઞમન્વપશ્યન્ યત્તૂષ્ણીમાઘારમાઘારયતિ યજ્ઞસ્યાનુખ્યાત્યા
અથો સામિધેનીરેવાભ્યનક્ત્યલૂક્ષો ભવતિ ય એવં વેદાથો
તર્પયત્યેવૈનાસ્તૃપ્યતિ પ્રજયા પશુભિ

૬૪ ર્ય એવં વેદ યદેકયાઘારયેદેકાં પ્રીણીયાદ્યદ્વાભ્યાં દ્વે
પ્રીણીયાદ્યત્તિસૃભિરતિ તદ્રેચયેન્મનસાઘારયતિ મનસા
હ્યનાપ્તમાપ્યતે તિર્યઞ્ચમા ઘારયત્યચ્છંબટ્કારં વાક્ચ
મનશ્ચાર્તીયેતામહં દેવેભ્યો હવ્યં વહામીતિ વાગબ્રવીદહં દેવેભ્ય
ઇતિ મનસ્તૌ પ્રજાપતિં પ્રશ્નમૈતા ઁ સોઽબ્રવીત્

૬૫ પ્રજાપતિર્દૂતીરેવ ત્વં મનસોઽસિ યદ્ધિ મનસા ધ્યાયતિ તદ્વાચા
વદતીતિ તત્ખલુ તુભ્યં ન વાચા જુહવન્નિત્યબ્રવીત્ તસ્માન્મનસા
પ્રજાપતયે જુહ્વતિ મન ઇવ હિ પ્રજાપતિઃ પ્રજાપતેરાપ્ત્યૈ પરિધીન્થ્સં
માર્ષ્ટિ પુનાત્યેવૈનાન્ત્રિર્મધ્યમં ત્રયો વૈ પ્રાણાઃ પ્રાણાનેવાભિ જયતિ
ત્રિર્દક્ષિણાર્ધ્યં ત્રય

૬૬ ઇમે લોકા ઇમાનેવ લોકાનભિ જયતિ ત્રિરુત્તરાર્ધ્યં ત્રયો
વૈ દેવયાનાઃ પન્થાનસ્તાનેવાભિ જયતિ ત્રિરુપ વાજયતિ ત્રયો વૈ
દેવલોકા દેવલોકાનેવાભિ જયતિ દ્વાદશ સંપદ્યન્તે દ્વાદશ
માસાઃ સંવથ્સરઃ સંવથ્સરમેવ પ્રીણાત્યથો સંવથ્સરમેવાસ્મા ઉપ
દધાતિ સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યા આઘારમા ઘારયતિ તિર ઇવ

૬૭ વૈ સુવર્ગો લોકઃ સુવર્ગમેવાસ્મૈ લોકં પ્ર રોચયત્યૃજુમા
ઘારયત્યૃજુરિવ હિ પ્રાણઃ સંતતમા ઘારયતિ પ્રાણાનામન્નાદ્યસ્ય
સંતત્યા અથો રક્ષસામપહત્યૈ યં કામયેત પ્રમાયુકઃ સ્યાદિતિ
જિહ્મં તસ્યાઘારયેત્ પ્રાણમેવાસ્માજ્જિહ્મં નયતિ તાજક્ પ્ર મીયતે શિરો
વા એતદ્યજ્ઞસ્ય યદાઘાર આત્મા ધ્રુવા

૬૮ ઽઘારમાઘાર્ય ધ્રુવા ઁ સમનક્ત્યાત્મન્નેવ યજ્ઞસ્ય શિરઃ
પ્રતિ દધાત્યગ્નિર્દેવાનાં દૂત આસીદ્દૈવ્યોઽસુરાણાં તૌ પ્રજાપતિં

પ્રશ્નમૈતા ꣳ સ પ્રજાપતિર્બ્રાહ્મણમબ્રવીદેતદ્ધિ બ્રૂહીત્યા
શ્રાવયેતીદં દેવાઃ શ઼ૃણુતેતિ વાવ તદબ્રવીદગ્નિર્દેવો હોતેતિ ય એવ
દેવાનાં તમવૃણીત તતો દેવા
૬૯ અભવન્પરાસુરા યસ્યૈવં વિદુષઃ પ્રવરં પ્રવૃણતે
ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો ભવતિ યદ્બ્રાહ્મણશ્ચાબ્રાહ્મણશ્ચ
પ્રશ્નમેયાતાં બ્રાહ્મણાયાધિ બ્રૂયાદ્યદ્બ્રાહ્મણાયાધ્યાહાત્મનેઽધ્યાહ
યદ્બ્રાહ્મણં પરાહાત્માનં પરાહ તસ્માદ્ બ્રાહ્મણો ન પરોચ્યઃ ॥ ૨। ૫। ૧૧॥
વા આરણ્યાગ્શ્ચાવ રુંધેથો પશુભિઃ સોબ્રવીદ્દક્ષિણાર્ધ્યં ત્રય
ઇવ ધ્રુવા દેવાશ્ચત્વારિ ꣳ શચ્ચ ॥ ૨। ૫। ૧૧॥
૭૦ આયુષ્ટ આયુર્દા અગ્ન આ પ્યાયસ્વ સંતેઽવ તે હેડ ઉદુત્તમં પ્ર ણો
દેવ્યા નો દિવોઽગ્નાવિષ્ણૂ અગ્નાવિષ્ણૂ ઇમં મે વરુણ તત્ત્વાયામ્યુદુ ત્યં
ચિત્રમ્ ॥ અપાં નપાદા હ્યસ્થાદુપસ્થં જિહ્માનામૂર્ધ્વો વિદ્યુતં વસાનઃ
। તસ્ય જ્યેષ્ઠં મહિમાનં વહન્તીર્હિરણ્યવર્ણાઃ પરિ યન્તિ યહ્વીઃ ॥ સ
૭૧ મન્યા યન્ત્યુપ યન્ત્યન્યાઃ સમાનમૂર્વં નદ્યઃ પૃણન્તિ । તમૂ
શુચિ ꣳ શુચયો દીદિવાꣳ સમપાં નપાતં પરિ તસ્થુરાપઃ
॥ તમસ્મેરા યુવતયો યુવાનં મર્મૃજ્યમાનાઃ પરિ યન્ત્યાપઃ ।
સ શુક્રેણ શિક્વના રેવદગ્નિર્દીદાયાનિધ્મો ઘૃતનિર્ણિગપ્સુ ॥
ઇંદ્રાવરુણયોરહꣳ સમ્રાજોરવ આ વૃણે । તા નો મૃડાત ઈદૃશે ॥
ઇંદ્રાવરુણા યુવમધ્વરાય નો
૭૨ વિશે જનાય મહિ શર્મ યચ્છતમ્ । દીર્ઘપ્રયજ્યુમતિ યો વનુષ્યતિ
વયં જયેમ પૃતનાસુ દૂઢ્યઃ ॥ આ નો મિત્રાવરુણા પ્ર બાહવા । ત્વં નો
અગ્ને વરુણસ્ય વિદ્વાન્દેવસ્ય હેડોઽવ યા સિસીષ્ઠાઃ । યજિષ્ઠો વહ્નિતમઃ
શોશુચાનો વિશ્વા દ્વેષાꣳસિ પ્ર મુમુગ્ધ્યસ્મત્ ॥ સ ત્વં નો અગ્નેઽવમો
ભવોતી નેદિષ્ઠો અસ્યા ઉષસો વ્યુષ્ટૌ । અવ યક્ષ્વ નો વરુણ ꣳ
૭૩ રરાણો વીહિ મૃડીકꣳ સુહવો ન એધિ ॥ પ્રપ્રાયમગ્નિર્ભરતસ્ય
શ઼ૃણ્વે વિ યત્સૂર઼્યો ન રોચતે બૃહદ્ભાઃ । અભિ યઃ પૂરું પૃતનાસુ

તસ્થૌ દીદાય દૈવ્યો અતિથિઃ શિવો નઃ ॥ પ્ર તે યક્ષિ પ્રત ઇયર્મિ
મન્મ ભુવો યથા વન્દ્યો નો હવેષુ । ધન્વન્નિવ પ્રપા અસિ ત્વમગ્ન
ઇયક્ષવે પૂરવે પ્રત્ન રાજન્ ॥

૭૪ વિ પાજસા વિ જ્યોતિષા ॥ સ ત્વમગ્ને પ્રતીકેન પ્રત્યોષ યાતુધાન્યઃ
। ઉરુક્ષયેષુ દીદ્યત્ ॥ તꣳ સુપ્રતીકꣳ સુદૃશગ્ગ્
સ્વઞ્ચમવિદ્વાꣳસો વિદુષ્ટરꣳ સપેમ । સ યક્ષદ્વિશ્વા વયુનાનિ
વિદ્વાન્ પ્ર હવ્યમગ્નિરમૃતેષુ વોચત્ ॥ અꣳહોમુચે વિવેષ યન્મા
વિ ન ઇંદ્રેંદ્ર ક્ષત્રમિંદ્રિયાણિ શતક્રતોઽનુ તે દાયિ ॥ ૨। ૫। ૧૨॥
યજ્ઞીસ્સમધ્વરાય નો વરુણꣳ રાજગ્ગ્શ્ચતુશ્ચત્વારિꣳશચ્ચ ॥ ૨। ૫। ૧૨॥

વિશ્વરૂપસ્ત્વષ્ટેંદ્રં વૃત્રં બ્રહ્મવાદિનસ્સ ત્વૈ નાસોમયાજ્યેષ વૈ
દેવરથો દેવા વૈ નર્ચિ નાયજ્ઞોગ્ને મહાન્ત્રીન્નિવીતમાયુષ્ટે દ્વાદશ
॥ વિશ્વરૂપો નૈનꣳશિતરૂરાવદ્ધ વસુ પૂર્વેદ્યુર્વાજા ઇત્યગ્ને
મહાન્નિવીતમન્ત્યા યંતિ ચતુસ્સપ્તતિઃ ॥ વિશ્વરૂપોનુ તે દાયિ ॥

## દ્વિતીયકાણ્ડે ષષ્ઠઃ પ્રશ્નઃ ૬

૧ સમિધો યજતિ વસન્તમેવર્તૂનામવ રુન્ધે તનૂનપાતં યજતિ
ગ્રીષ્મમેવાવ રુન્ધ ઇડો યજતિ વર્ષા એવાવ રુન્ધે બર્હિર્યજતિ
શરદમેવાવ રુન્ધે સ્વાહાકારં યજતિ હેમન્તમેવાવ રુન્ધે
તસ્માથ્સ્વાહાકૃતા હેમન્પશવોઽવ સીદન્તિ સમિધો યજત્યુષસ એવ
દેવતાનામવ રુન્ધે તનૂનપાતં યજતિ યજ્ઞમેવાવ રુન્ધ
૨ ઇડો યજતિ પશૂનેવાવ રુન્ધે બર્હિર્યજતિ પ્રજામેવાવ રુન્ધે
સમાનયત ઉપભૃતસ્તેજો વા આજ્યં પ્રજા બર્હિઃ પ્રજાસ્વેવ તેજો
દધાતિ સ્વાહાકારં યજતિ વાચમેવાવ રુન્ધે દશ સંપદ્યન્તે દશાક્ષરા
વિરાડન્નં વિરાડ્વિરાજૈવાન્નાદ્યમવ રુન્ધે સમિધો યજત્યસ્મિન્નેવ લોકે
પ્રતિ તિષ્ઠતિ તનૂનપાતં યજતિ
૩ યજ્ઞ એવાન્તરિક્ષે પ્રતિ તિષ્ઠતીડો યજતિ પશુષ્વેવ પ્રતિ

તિષ્ઠતિ બર્હિર્યજતિ ય એવ દેવયાનાઃ પન્થાનસ્તેષ્વેવ પ્રતિ
તિષ્ઠતિ સ્વાહાકારં યજતિ સુવર્ગ એવ લોકે પ્રતિ તિષ્ઠત્યેતાવન્તો
વૈ દેવલોકાસ્તેષ્વેવ યથાપૂર્વં પ્રતિ તિષ્ઠતિ દેવાસુરા એષુ
લોકેષ્વસ્પર્ધન્ત તે દેવાઃ પ્રયાજૈરેભ્યો લોકેભ્યોઽસુરાન્પ્રાણુદન્ત
તત્પ્રયાજાનાં

૪ પ્રયાજત્વં યસ્યૈવં વિદુષઃ પ્રયાજા ઇજ્યન્તે પ્રૈભ્યો લોકેભ્યો
ભ્રાતૃવ્યાન્નુદતેઽભિક્રામં જુહોત્યભિજિત્યૈ યો વૈ પ્રયાજાનાં
મિથુનં વેદ પ્ર પ્રજયા પશુભિર્મિથુનૈર્જાયતે સમિધો બહ્વીરિવ
યજતિતનૂનપાતમેકમિવ મિથુનં તદિડો બહ્વીરિવ યજતિ બર્હિરેકમિવ
મિથુનં તદેતદ્વૈ પ્રયાજાનાં મિથુનં ય એવં વેદ પ્ર

૫ પ્રજયા પશુભિર્મિથુનૈર્જાયતે દેવાનાં વા અનિષ્ટા દેવતા
આસન્નથાસુરા યજ્ઞમજિઘાઁ સન્તે દેવા ગાયત્રીં વ્યૌહન્
પઞ્ચાક્ષરાણિ પ્રાચીનાનિ ત્રીણિ પ્રતીચીનાનિ તતો વર્મ
યજ્ઞાયાભવદ્વર્મ યજમાનાય યત્પ્રયાજાનૂયાજા ઇજ્યન્તે વર્મૈવ
તદ્યજ્ઞાય ક્રિયતે વર્મ યજમાનાય ભ્રાતૃવ્યાભિભૂત્યૈ તસ્માદ્વરૂથં
પુરસ્તાદ્વર્ષીયઃ પશ્ચાદ્ધ્રસીયો દેવા વૈ પુરા રક્ષોભ્ય

૬ ઇતિ સ્વાહાકારેણ પ્રયાજેષુ યજ્ઞઁ સગ્ગ્સ્થાપ્યમપશ્યન્તરઁ
સ્વાહાકારેણ પ્રયાજેષુ સમસ્થાપયન્વિ વા એતદ્યજ્ઞં છિન્દન્તિ
યથ્સ્વાહાકારેણ પ્રયાજેષુ સરઁ સ્થાપયન્તિ પ્રયાજાનિષ્ટ્વા હવીગ્ષ્યભિ
ઘારયતિ યજ્ઞસ્ય સંતત્યા અથો હવિરેવાકરથો યથાપૂર્વમુપૈતિ
પિતા વૈ પ્રયાજાઃ પ્રજાનૂયાજા યત્પ્રયાજાનિષ્ટ્વા હવીગ્ષ્યભિઘારયતિ
પિતૈવ તત્પુત્રેણ સાધારણં

૭ કુરુતે તસ્માદાહુર્યશ્ચૈવં વેદ યશ્ચ ન કથા પુત્રસ્ય કેવલં
કથા સાધારણં પિતુરિત્યસ્કન્નમેવ તદ્યત્પ્રયાજેષ્વિષ્ટેષુ સ્કન્દતિ
ગાયત્ર્યેવ તેન ગર્ભં ધત્તે સા પ્રજાં પશૂન્, યજમાનાય પ્ર જનયતિ ॥

૨। ૬। ૧॥ યજતિ યજ્ઞમેવાવ રુંધે તનૂનપાતં યજતિ પ્રયાજાનામેવં
વેદ પ્ર રક્ષોભ્યઃ સાધારણં પંચત્રિઁ શચ્ચ ॥ ૨। ૬। ૧॥

૮ ચક્ષુષી વા એતે યજ્ઞસ્ય યદાજ્યભાગૌ યદાજ્યભાગૌ યજતિ
ચક્ષુષી એવ તદ્યજ્ઞસ્ય પ્રતિ દધાતિ પૂર્વાર્ધે જુહોતિ તસ્માત્ પૂર્વાર્ધે
ચક્ષુષી પ્રબાહુગ્જુહોતિ તસ્માત્પ્રબાહુક્ચક્ષુષી દેવલોકં વા અગ્નિના
યજમાનોઽનુ પશ્યતિ પિતૃલોકꣳ સોમેનોત્તરાર્ધેઽગ્નયે જુહોતિ દક્ષિણાર્ધે
સોમાયૈવમિવ હીમૌ લોકાવનયોર્લોકયોરનુખ્યાત્યૈ રાજાનૌ વા એતૌ
દેવતાનાં
૯ યદગ્નીષોમાવન્તરા દેવતા ઇજ્યેતે દેવતાનાં વિધૃત્યૈ
તસ્માદ્રાજ્ઞા મનુષ્યા વિધૃતા બ્રહ્મવાદિનો વદન્તિ
કિં તદ્યજ્ઞે યજમાનઃ કુરુતે યેનાન્યતોદતશ્ચ પશૂન્
દાધારોઽભયતોદતશ્ચેત્યૃચમનૂચ્યાજ્યભાગસ્ય જુષાણેન
યજતિ તેનાન્યતોદતો દાધારર્ચમનૂચ્ય હવિષ ઋચા
યજતિ તેનોભયતોદતો દાધાર મૂર્ધન્વતી પુરોઽનુવાક્યા ભવતિ
મૂર્ધાનમેવૈનꣳસમાનાનાં કરોતિ
૧૦ નિયુત્વત્યા યજતિ ભ્રાતૃવ્યસ્યૈવ પશૂન્નિ યુવતે કેશિનꣳ
હ દાર્ભ્યં કેશી સાત્યકામિરુવાચ સપ્તપદાં તે શક્વરીગ્ શ્વો
યજ્ઞે પ્રયોક્તાસે યસ્યૈ વીર્યેણ પ્ર જાતાન્ ભ્રાતૃવ્યાન્નુદતે
પ્રતિ જનિષ્યમાણાન્, યસ્યૈ વીર્યેણોભયોર્લોકયોર્જ્યોતિર્ધત્તે
યસ્યૈ વીર્યેણ પૂર્વાર્ધેનાનડ્વાન્ભુનક્તિ જઘનાર્ધેન ધેનુરિતિ
પુરસ્તાલ્લક્ષ્મા પુરોઽનુવાક્યા ભવતિ જાતાનેવ ભ્રાતૃવ્યાન્ પ્ર ણુદત
ઉપરિષ્ટાલ્લક્ષ્મા
૧૧ યાજ્યા જનિષ્યમાણાનેવ પ્રતિ નુદતે પુરસ્તાલ્લક્ષ્મા પુરોઽનુવાક્યા
ભવત્યસ્મિન્નેવ લોકે જ્યોતિર્ધત્ત ઉપરિષ્ટાલ્લક્ષ્મા યાજ્યામુષ્મિન્નેવ
લોકે જ્યોતિર્ધત્તે જ્યોતિષ્મન્તાવસ્મા ઇમૌ લોકૌ ભવતો ય એવં
વેદ પુરસ્તાલ્લક્ષ્મા પુરોઽનુવાક્યા ભવતિ તસ્માત્ પૂર્વાર્ધેનાનડ્વાન્
ભુનક્ત્યુપરિષ્ટાલ્લક્ષ્મા યાજ્યા તસ્માજ્જઘનાર્ધેન ધેનુર્ય એવં વેદ
ભુઙ્ક્ત એનમેતૌ વજ્ર આજ્યં વજ્ર આજ્યભાગૌ

૧૨ વજ્રો વષટ્કારસ્ત્રિવૃતમેવ વજ્રꣳસંભૃત્ય ભ્રાતૃવ્યાય પ્ર
હરત્યચ્છંબટ્કારમપગૂર્ય વષટ્કરોતિ સ્તૃત્યૈ ગાયત્રી પુરોઽનુવાક્યા
ભવતિ ત્રિષ્ટુગ્યાજ્યા બ્રહ્મન્નેવ ક્ષત્રમન્વારંભયતિ તસ્માદ્ બ્રાહ્મણો
મુખ્યો મુખ્યો ભવતિ ય એવં વેદ પ્રૈવૈનં પુરોઽનુવાક્યયાહ પ્રણયતિ
યાજ્યયા ગમયતિ વષટ્કારેણૈવૈનં પુરોઽનુવાક્યયા દત્તે પ્ર યચ્છતિ
યાજ્યયા પ્રતિ

૧૩ વષટ્કારેણ સ્થાપયતિ ત્રિપદા પુરોઽનુવાક્યા ભવતિ ત્રય ઇમે લોકા
એષ્વેવ લોકેષુ પ્રતિતિષ્ઠતિ ચતુષ્પદા યાજ્યા ચતુષ્પદ એવ
પશૂનવ રુન્ધે દ્વ્યક્ષરો વષટ્કારો દ્વિપાદ્યજમાનઃ પશુષ્વેવોપરિષ્ટાત્
પ્રતિ તિષ્ઠતિ ગાયત્રી પુરોઽનુવાક્યા ભવતિ ત્રિષ્ટુગ્યાજ્યૈષા વૈ
સપ્તપદા શક્વરી યદ્વા એતયા દેવા અશિક્ષન્તદશક્નુવન્
ય એવં વેદ શક્નોત્યેવ યચ્છિક્ષતિ ॥ ૨। ૬। ૨॥ દેવતાનાં
કરોત્યુપરિષ્ટાલ્લક્ષ્માજ્ય ભાગૌ પ્રતિ શક્નોત્યેવ દ્વે ચ ॥ ૨। ૬। ૨॥

૧૪ પ્રજાપતિર્દેવેભ્યો યજ્ઞાન્ વ્યાદિશથ્સ આત્મન્નાજ્યમધત્ત તં દેવા
અબ્રુવન્નેષ વાવ યજ્ઞો યદાજ્યમપ્યેવ નોત્રાસ્ત્વિતિ સોઽબ્રવીદ્યજાન્,
વ આજ્યભાગાવુપ સ્તૃણાનભિ ઘારયાનિતિ તસ્માદ્યજન્ત્યાજ્યભાગાવુપ
સ્તૃણન્ત્યભિ ઘારયન્તિ બ્રહ્મવાદિનો વદન્તિ કસ્માથ્સત્યાદ્યાતયામાન્યન્યાનિ
હવીગ્મ્ષ્યયાતયામમાજ્યમિતિ પ્રાજાપત્ય

૧૫ મિતિ બ્રૂયાદયાતયામા હિ દેવાનાં પ્રજાપતિરિતિ છન્દાꣳસિ
દેવેભ્યોઽપાક્રામન્ન વોઽભાગાનિ હવ્યં વક્ષ્યામ ઇતિ તેભ્ય
એતચ્ચતુરવત્તમધારયન્પુરોઽનુવાક્યાયૈ યાજ્યાયૈ દેવતાયૈ
વષટ્કારાય યચ્ચતુરવત્તં જુહોતિ છન્દાગ્સ્યેવ તત્પ્રીણાતિ તાન્યસ્ય
પ્રીતાનિ દેવેભ્યો હવ્યં વહન્ત્યંગિરસો વા ઇત ઉત્તમાઃ સુવર્ગં
લોકમાયન્તદૃષયો યજ્ઞવાસ્ત્વભ્યવાયન્તે

૧૬ ઽપશ્યન્પુરોડાશં કૂર્મં ભૂતꣳ સર્પન્તં તમબ્રુવન્નિંદ્રાય
ધ્રિયસ્વ બૃહસ્પતયે ધ્રિયસ્વ વિશ્વેભ્યો દેવેભ્યો ધ્રિયસ્વેતિ
સ નાધ્રિયત તમબ્રુવન્નગ્નયે ધ્રિયસ્વેતિ સોઽગ્નયેઽધ્રિયત

યદાગ્નેયોઽષ્ટાકપાલોઽમાવાસ્યાયાં ચ પૌર્ણમાસ્યાં ચાચ્યુતો ભવતિ
સુવર્ગસ્ય લોકસ્યાભિજિત્યૈ તમબ્રુવન્ કથાહાસ્થા ઇત્યનુ
પાક્તોઽભૂવમિત્યબ્રવીદ્યથાક્ષોઽનુ પાક્તો
૧૭ ઽવાર્ચ્છત્યેવમવારમિત્યુપરિષ્ટાદભ્યજ્યાધસ્તાદુપાનક્તિ
સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ સર્વાણિ કપાલાન્યભિ પ્રથયતિ
તાવતઃ પુરોડાશાનમુષ્મિꣳલ્લોકેઽભિ જયતિ યો વિદગ્ધઃ સ
નૈરૃતો યોઽશૃતઃ સ રૌદ્રો યઃ શૃતઃ સ સદેવસ્તસ્માદવિદહતા
શૃતંકૃત્યઃ સદેવત્વાય ભસ્મનાભિ વાસયતિ તસ્માન્માꣳસેનાસ્થિ
છન્નં વેદેનાભિ વાસયતિ તસ્માત્
૧૮ કેશૈઃ શિરશ્છન્નં પ્રચ્યુતં વા એતદસ્માલ્લોકાદગતં દેવલોકં
યચ્છૃતꣳહવિરનભિ ઘારિતમભિ ઘાર્યોદ્વાસયતિ દેવત્રૈવૈનદ્ગમયતિ
યદ્યેકં કપાલં નશ્યેદેકો માસઃ સંવથ્સરસ્યાનવેતઃ સ્યાદથ યજમાનઃ
પ્ર મીયેત યદ્ દ્વે નશ્યેતાં દ્વૌ માસૌ સંવથ્સરસ્યાનવેતૌ સ્યાતામથ
યજમાનઃ પ્ર મીયેત સંખ્યાયોદ્વાસયતિ યજમાનસ્ય
૧૯ ગોપીથાય યદિ નશ્યેદાશ્વિનં દ્વિકપાલં નિર્વપેદ્દ્યાવાપૃથિવ્યમેકં
કપાલમશ્વિનૌ વૈ દેવાનાં ભિષજૌ તાભ્યામેવાસ્મૈ ભેષજં
કરોતિ દ્યાવાપૃથિવ્ય એકકપાલો ભવત્યનયોર્વા એતન્નશ્યતિ
યન્નશ્યત્યનયોરેવૈનદ્વિન્દતિ પ્રતિષ્ઠિત્યૈ ॥ ૨। ૬। ૩॥ પ્રાજાપત્યં
તેક્ષોનુ પાક્તો વેદેનાભિ વાનયતિ તસ્માદ્યજમાનસ્ય દ્વાત્રિꣳશચ્ચ ॥
૨। ૬। ૩॥
૨૦ દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇતિ સ્ફ્યમા દત્તે પ્રસૂત્યા
અશ્વિનોર્બાહુભ્યામિત્યાહાશ્વિનૌ હિ દેવાનામધ્વર્યૂ આસ્તાં પૂષ્ણો
હસ્તાભ્યામિત્યાહ યત્યૈ શતભૃષ્ટિરસિ વાનસ્પત્યો દ્વિષતો વધ
ઇત્યાહ વજ્રમેવ તથ્સꣳશ્યતિ ભ્રાતૃવ્યાય પ્રહરિષ્યન્થ્સ્તંબ
યજુર્હરત્યેતાવતી વૈ પૃથિવી યાવતી વેદિસ્તસ્યા એતાવત એવ
ભ્રાતૃવ્યં નિર્ભજતિ
૨૧ તસ્માન્નાભાગં નિર્ભજન્તિ ત્રિર્હરતિ ત્રય ઇમે લોકા એભ્ય એવૈનં

લોકેભ્યો નિર્ભજતિ તૂષ્ણીં ચતુર્થꣳ હરત્યપરિમિતાદેવૈનં
નિર્ભજત્યુદ્ધન્તિ યદેવાસ્યા અમેધ્યં તદપ હંત્યુદ્ધન્તિ
તસ્માદોષધયઃ પરા ભવન્તિ મૂલં છિનત્તિ ભ્રાતૃવ્યસ્યૈવ મૂલં
છિનત્તિ પિતૃદેવત્યાતિ ખાતેયતીં ખનતિ પ્રજાપતિના

૨૨ યજ્ઞમુખેન સં મિતામા પ્રતિષ્ઠાયૈ ખનતિ યજમાનમેવ પ્રતિષ્ઠાં
ગમયતિ દક્ષિણતો વર્ષીયસીં કરોતિ દેવયજનસ્યૈવ રૂપમકઃ પુરીષવતીં
કરોતિ પ્રજા વૈ પશવઃ પુરીષં પ્રજયૈવૈનં પશુભિઃ પુરીષવન્તં
કરોત્યુત્તરં પરિગ્રાહં પરિ ગૃહ્ણાત્યેતાવતી વૈ પૃથિવી યાવતી
વેદિસ્તસ્યા એતાવત એવ ભ્રાતૃવ્યં નિર્ભજ્યાત્મન ઉત્તરં પરિગ્રાહં
પરિ ગૃહ્ણાતિ ક્રૂરમિવ વા

૨૩ એતત્કરોતિ યદ્વેદિં કરોતિ ધા અસિ સ્વધા અસીતિ યોયુપ્યતે
શાન્ત્યૈ પ્રોક્ષણીરા સાદયત્યાપો વૈ રક્ષોઘ્ની રક્ષસામપહત્યૈ
સ્ફ્યસ્ય વર્ત્મન્થ્સાદયતિ યજ્ઞસ્ય સંતત્યૈ યં દ્વિષ્યાત્તં
ધ્યાયેચ્છુચૈવૈનમર્પયતિ ॥ ૨। ૬। ૪॥ ભજતિ પ્રજાપતિનેવ વૈ
ત્રયસ્ત્રિꣳશચ્ચ ॥ ૨। ૬। ૪॥

૨૪ બ્રહ્મવાદિનો વદન્ત્યદ્ભિર્હવીꣳષિ પ્રૌક્ષીઃ કેનાપ ઇતિ
બ્રહ્મણેતિ બ્રૂયાદદ્ભિર્હ્યેવ હવીꣳષિ પ્રોક્ષતિ બ્રહ્મણાપ
ઇધ્માબર્હિઃ પ્રોક્ષતિ મેધ્યમેવૈનત્કરોતિ વેદિં પ્રોક્ષત્યૃક્ષા વા
એષાલોમકામેધ્યા યદ્વેદિર્મેધ્યામેવૈનાં કરોતિ દિવે ત્વાન્તરિક્ષાય ત્વા
પૃથિવ્યૈ ત્વેતિ બર્હિરાસાદ્ય પ્રો

૨૫ ક્ષત્યેભ્ય એવૈનલ્લોકેભ્યઃ પ્રોક્ષતિ ક્રૂરમિવ વા એતત્કરોતિ
યત્ખનત્યપો નિ નયતિ શાન્ત્યૈ પુરસ્તાત્પ્રસ્તરં ગૃહ્ણાતિ
મુખ્યમેવૈનં કરોતીયન્તં ગૃહ્ણાતિ પ્રજાપતિના યજ્ઞમુખેન સં
મિતં બર્હિઃ સ્તૃણાતિ પ્રજા વૈ બર્હિઃ પૃથિવી વેદિઃ પ્રજા એવ
પૃથિવ્યાં પ્રતિ ષ્ઠાપયત્યનતિદૃશ્નꣳ સ્તૃણાતિ પ્રજયૈવૈનં
પશુભિરનતિદૃશ્નં કરો

૨૬ ત્યુત્તરં બર્હિષઃ પ્રસ્તરꣳ સાદયતિ પ્રજા વૈ

બર્હિર્યજમાનઃ પ્રસ્તરો યજમાનમેવાયજમાનાદુત્તરં કરોતિ
તસ્માદ્યજમાનોઽયજમાનાદુત્તરોઽન્તર્દધાતિ વ્યાવૃત્યા અનક્તિ
હવિષ્કૃતમેવૈન ँ સુવર્ગં લોકં ગમયતિ ત્રેધાનક્તિ ત્રય
ઇમે લોકા એભ્ય એવૈનં લોકેભ્યોઽનક્તિ ન પ્રતિ શ઼ૃણાતિ યત્પ્રતિ
શ઼ૃણીયાદનૂર્ધ્વં ભાવુકં યજમાનસ્ય સ્યાદુપરીવ પ્ર હર
૨૭ ત્યુપરીવ હિ સુવર્ગો લોકો નિ યચ્છતિ વૃષ્ટિમેવાસ્મૈ નિ યચ્છતિ
નાત્યગ્રં પ્ર હરેદ્યદત્યગ્રં પ્રહરેદત્યાસારિણ્યધ્વર્યોર્નાશુકા સ્યાન્ન
પુરસ્તાત્ પ્રત્યસ્યેદ્યત્પુરસ્તાત્ પ્રત્યસ્યેથ્ સુવર્ગાલ્લોકાદ્યજમાનં
પ્રતિ નુદેત્પ્રાઞ્ચં પ્ર હરતિ યજમાનમેવ સુવર્ગં લોકં ગમયતિ
ન વિષ્વઞ્ચં વિ યુયાદ્યદ્વિષ્વઞ્ચં વિયુયાથ્
૨૮ સ્ત્ર્યસ્ય જાયેતોર્ધ્વમુદ્યૌત્યૂર્ધ્વમિવ હિ પુ ँ સઃ પુમાનેવાસ્ય
જાયતે યથ્સ્ફ્યેન વોપવેષેણ વા યોયુપ્યેત સ્તૃતિરેવાસ્ય સા હસ્તેન
યોયુપ્યતે યજમાનસ્ય ગોપીથાય બ્રહ્મવાદિનો વદન્તિ કિં યજ્ઞસ્ય
યજમાન ઇતિ પ્રસ્તર ઇતિ તસ્ય ક્વ સુવર્ગો લોક ઇત્યાહવનીય ઇતિ
બ્રૂયાદ્યત્પ્રસ્તરમાહવનીયે પ્રહરતિ યજમાનમેવ
૨૯ સુવર્ગં લોકં ગમયતિ વિ વા એતદ્યજમાનો લિશતે યત્પ્રસ્તરં
યોયુપ્યન્તે બર્હિરનુ પ્ર હરતિ શાન્ત્યા અનારંભણ ઇવ વા
એતર્હ્યધ્વર્યુઃ સ ઈશ્વરો વેપનો ભવિતોર્ધ્રુવાસીતીમામભિ મૃશતીયં
વૈ ધ્રુવાસ્યામેવ પ્રતિતિષ્ઠતિ ન વેપનો ભવત્યગાઉનગ્નીદિત્યાહ
યદ્બ્રૂયાદગન્નગ્નિરિત્યગ્નાવગ્નિં ગમયેન્નિર્યજમાન ँ
સુવર્ગાલ્લોકાદ્ભજેદગન્નિત્યેવ બ્રૂયાદ્યજમાનમેવ સુવર્ગં
લોકં ગમયતિ ॥ ૨। ૬। ૫॥ આસાદ્ય પ્રનતિદૃશ્નં કરોતિ હરતિ
વિયુયાદ્યજમાનમેવાગ્નિરિતિ સપ્તદશ ચ ॥ ૨। ૬। ૫॥
૩૦ અગ્નેસ્ત્રયો જ્યાયા ँ સો ભ્રાતર આસન્ તે દેવેભ્યો હવ્યં વહન્તઃ
પ્રામીયન્ત સોઽગ્નિરબિભેદિત્થં વાવ સ્ય આર્તિમારિષ્યતીતિ સ
નિલાયત સોઽપઃ પ્રાવિશત્તં દેવતાઃ પ્રૈષમૈચ્છન્તં મથ્સ્યઃ
પ્રાબ્રવીત્તમશપદ્ધિયાધિયા ત્વા વધ્યાસુર્યો મા પ્રાવોચ ઇતિ

તસ્માન્મથ્સ્યં ધિયાધિયા ઘ્નન્તિ શપ્તો
૩૧ હિ તમન્વવિન્દન્તમબ્રુવન્નુપ ન આ વર્તસ્વ હવ્યં નો વહેતિ
સોઽબ્રવીદ્વરં વૃણૈ યદેવ ગૃહીતસ્યાહુતસ્ય બહિઃપરિધિ સ્કન્દાત્ તન્મે
ભ્રાતૃણાં ભાગધેયમસદિતિ તસ્માદ્યદ્ગૃહીતસ્યાહુતસ્ય બહિઃપરિધિ
સ્કન્દતિ તેષાં તદ્ભાગધેયં તાનેવ તેન પ્રીણાતિ પરિધીન્ પરિ દધાતિ
રક્ષસામપહત્યૈ સરꣳ સ્પર્શયતિ
૩૨ રક્ષસામનન્વવચારાય ન પુરસ્તાત્ પરિ દધાત્યાદિત્યો હ્યેવોદ્યન્
પુરસ્તાદ્રક્ષાગ્સ્યપ હન્ત્યૂર્ધ્વે સમિધાવા દધાત્યુપરિષ્ટાદેવ
રક્ષાગ્સ્યપ હન્તિ યજુષાન્યાં તૂષ્ણીમન્યાં મિથુનત્વાય દ્વે આ દધાતિ
દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યૈ બ્રહ્મવાદિનો વદન્તિ સ ત્વૈ યજેત યો
યજ્ઞસ્યાર્ત્યા વસીયાન્થ્સ્યાદિતિ ભૂપતયે સ્વાહા ભુવનપતયે સ્વાહા
ભૂતાનાં
૩૩ પતયે સ્વાહેતિ સ્કન્નમનુ મન્ત્રયેત યજ્ઞસ્યૈવ તદાર્ત્યા
યજમાનો વસીયાન્ભવતિ ભૂયસીર્હિ દેવતાઃ પ્રીણાતિ જામિ વા
એતદ્યજ્ઞસ્ય ક્રિયતે યદન્વઞ્ચૌ પુરોડાશાવુપાꣳશુયાજમન્તરા
યજત્યજામિત્વાયાથો મિથુનત્વાયા ગ્નિરમુષ્મિꣳલ્લોક આસીદ્યમોઽસ્મિન્
તે દેવા અબ્રુવન્નેતેમૌ વિ પર્યૂહામેત્યન્નાદ્યેન દેવા અગ્નિ
૩૪ મુપામન્ત્રયન્ત રાજ્યેન પિતરો યમં તસ્માદગ્નિર્દેવાનામન્નાદો
યમઃ પિતૃણાꣳ રાજા ય એવં વેદ પ્ર રાજ્યમન્નાદ્યમાપ્નોતિ તસ્મા
એતદ્ભાગધેયં પ્રાયચ્છન્ યદગ્નયે સ્વિષ્ટકૃતેઽવદ્યન્તિ
યદગ્નયે સ્વિષ્ટકૃતેઽવદ્યતિ ભાગધેયેનૈવ તદ્રુદ્રꣳ સમર્ધયતિ
સકૃથ્સકૃદવ દ્યતિ સકૃદિવ હિ રુદ્ર ઉત્તરાર્ધાદવ દ્યત્યેષા
વૈ રુદ્રસ્ય
૩૫ દિક્સ્વાયામેવ દિશિ રુદ્રં નિરવદયતે દ્વિરભિ ઘારયતિ
ચતુરવત્તસ્યાપ્ત્યૈ પશવો વૈ પૂર્વા આહુતય એષ રુદ્રો યદગ્નિર્યત્પૂર્વા
આહુતીરભિ જુહુયાદ્રુદ્રાય પશૂનપિ દધ્યાદપશુર્યજમાનઃ સ્યાદતિહાય
પૂર્વા આહુતીર્જુહોતિ પશૂનાં ગોપીથાય ॥ ૨। ૬। ૬॥ શમ્નસ્પર્શયતિ

ભૂતાનામગ્નિꣳ રુદ્રસ્ય સમગ્નિꣳશચ્ચ ॥ ૨। ૬। ૬॥

૩૬ મનુઃ પૃથિવ્યા યજ્ઞિયમૈચ્છથ્સ ઘૃતં
નિષિક્તમવિન્દથ્સોઽબ્રવીત્કોઽસ્યેશ્વરો યજ્ઞેઽપિ કર્તોરિતિ
તાવબ્રૂતાં મિત્રાવરુણૌ ગોરેવાવમીશ્વરૌ કર્તોઃ સ્વ ઇતિ તૌ તતો
ગાꣳ સમૈરયતાꣳ સા યત્રયત્ર ન્યક્રામત્તતો ઘૃતમપીડ્યત
તસ્માદ્ ઘૃતપદ્યુચ્યતે તદસ્યૈ જન્મોપહૂતꣳ રથંતરꣳ સહ
પૃથિવ્યેત્યાહે

૩૭ યં વૈ રથંતરમિમામેવ સહાન્નાદ્યેનોપ હ્વયત ઉપહૂતં
વામદેવ્યꣳ સહાન્તરિક્ષેણેત્યાહ પશવો વૈ વામદેવ્યં પશૂનેવ
સહાન્તરિક્ષેણોપ હ્વયત ઉપહૂતં બૃહથ્સહ દિવેત્યાહૈરં વૈ
બૃહદિરામેવ સહ દિવોપ હ્વયત ઉપહૂતાઃ સપ્ત હોત્રા ઇત્યાહ હોત્રા
એવોપ હ્વયત ઉપહૂતા ધેનુઃ

૩૮ સહર્ષભેત્યાહ મિથુનમેવોપ હ્વયત ઉપહૂતો ભક્ષઃ સખેત્યાહ
સોમપીથમેવોપ હ્વયત ઉપહૂતાં ૩ હો ઇત્યાહાત્માનમેવોપ હ્વયત આત્મા
હ્યુપહૂતાનાં વસિષ્ઠ ઇડામુપ હ્વયતે પશવો વા ઇડા પશૂનેવોપ
હ્વયતે ચતુરુપ હ્વયતે ચતુષ્પાદો હિ પશવો માનવીત્યાહ મનુર્હ્યેતા

૩૯ મગ્રેઽપશ્યદ્ ઘૃતપદીત્યાહ યદેવાસ્યૈ પદાદ્ ઘૃતમપીડ્યત
તસ્માદેવમાહ મૈત્રાવરુણીત્યાહ મિત્રાવરુણૌ હ્યેનાꣳ સમૈરયતાં
બ્રહ્મ દેવકૃતમુપ હૂતમિત્યાહ બ્રહ્મૈવોપ હ્વયતે દૈવ્યા
અધ્વર્યવ ઉપહૂતા ઉપહૂતા મનુષ્યા ઇત્યાહ દેવમનુષ્યાનેવોપ હ્વયતે
ય ઇમં યજ્ઞમવાન્ યે યજ્ઞપતિં વર્ધાનિત્યાહ

૪૦ યજ્ઞાય ચૈવ યજમાનાય ચાશિષમા શાસ્ત ઉપહૂતે દ્યાવાપૃથિવી
ઇત્યાહ દ્યાવાપૃથિવી એવોપ હ્વયતે પૂર્વજે ઋતાવરી ઇત્યાહ પૂર્વજે
હ્યેતે ઋતાવરી દેવી દેવપુત્રે ઇત્યાહ દેવી હ્યેતે દેવપુત્રે
ઉપહૂતોઽયં યજમાન ઇત્યાહ યજમાનમેવોપ હ્વયત ઉત્તરસ્યાં
દેવયજ્યાયામુપહૂતો ભૂયસિ હવિષ્કરણ ઉપહૂતો દિવ્યે ધામન્નુપહૂત

૪૧ ઇત્યાહ પ્રજા વા ઉત્તરા દેવયજ્યા પશવો ભૂયો હવિષ્કરણꣳ સુવર્ગો

લોકો દિવ્યં ધામેદમસીદમસીત્યેવ યજ્ઞસ્ય પ્રિયં ધામોપ હ્વયતે
વિશ્વમસ્ય પ્રિયમુપ હૂતમિત્યાહાછંબટ્કારમેવોપ હ્વયતે ॥ ૨। ૬। ૭॥ આહ
ધેનુરેતાં વર્ધાનિત્યાહ ધામન્નુપહૂતશ્ચતુસ્ત્રિઁ શચ્ચ ॥ ૨। ૬। ૭॥

૪૨ પશવો વા ઇડા સ્વયમા દત્તે કામમેવાત્મના પશૂનામા
દત્તે ન હ્યન્યઃ કામં પશૂનાં પ્રયચ્છતિ વાચસ્પતયે ત્વા હુતં
પ્રાશ્નામીત્યાહ વાચમેવ ભાગધેયેન પ્રીણાતિ સદસસ્પતયે ત્વા હુતં
પ્રાશ્નામીત્યાહ સ્વગાકૃત્યૈ ચતુરવત્તં ભવતિ હવિર્વૈ ચતુરવત્તં
પશવશ્ચતુરવત્તં યદ્ધોતા પ્રાશ્નીયાદ્ધોતા

૪૩ ઽર્તિમાર્ચ્છેદ્યદગ્નૌ જુહુયાદ્રુદ્રાય પશૂનપિ દધ્યાદપશુર્યજમાનઃ
સ્યાદ્વાચસ્પતયે ત્વા હુતં પ્રાશ્નામીત્યાહ પરોઽક્ષમેવૈનજ્જુહોતિ
સદસસ્પતયે ત્વા હુતં પ્રાશ્નામીત્યાહ સ્વગાકૃત્યૈ પ્રાશ્નન્તિ તીર્થ
એવ પ્રાશ્નન્તિ દક્ષિણાં દદાતિ તીર્થ એવ દક્ષિણાં દદાતિ વિ વા એતદ્યજ્ઞં

૪૪ છિન્દન્તિ યન્મધ્યતઃ પ્રાશ્નન્ત્યદ્ભિર્માર્જયન્ત આપો વૈ સર્વા દેવતા
દેવતાભિરેવ યજ્ઞઁ સં તન્વન્તિ દેવા વૈ યજ્ઞાદ્રુદ્રમન્તરાયન્થ્સ
યજ્ઞમવિધ્યત્તં દેવા અભિ સમગચ્છન્ત કલ્પતાં ન ઇદમિતિ
તેઽબ્રુવન્થ્સ્વિષ્ટં વૈ ન ઇદં ભવિષ્યતિ યદિમઁ રાધયિષ્યામ
ઇતિ તથ્સ્વિષ્ટકૃતઃ સ્વિષ્ટકૃત્ત્વં તસ્યાવિદ્ધં

૪૫ નિરકૃન્તન્ યવેન સંમિતં તસ્માદ્યવમાત્રમવ
દ્યેદ્યજ્જ્યાયોઽવદ્યેદ્રોપયેત્તદ્યજ્ઞસ્ય યદુપ ચ સ્તૃણીયાદભિ ચ
ધારયેદુભયતઃસરઁ શ્વાયિ કુર્યાદવદાયાભિ ઘારયતિ દ્વિઃ સં પદ્યતે
દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યૈ યત્તિરશ્ચીનમતિહરેદનભિવિદ્ધં
યજ્ઞસ્યાભિ વિધ્યેદગ્રેણ પરિ હરતિ તીર્થેનૈવ પરિ હરતિ તત્પૂષ્ણે
પર્યહરન્તત્

૪૬ પૂષા પ્રાશ્ય દતોઽરુણત્તસ્માત્પૂષા પ્રપિષ્ટભાગોઽદન્તકો
હિ તં દેવા અબ્રુવન્, વિ વા અયમાર્ધ્યપ્રાશિત્રિયો વા અયમભૂદિતિ
તદ્બૃહસ્પતયે પર્યહરન્થ્સોઽબિભેદ્ બૃહસ્પતિરિત્થં વાવ સ્ય
આર્તિમારિષ્યતીતિ સ એતં મન્ત્રમપશ્યથ્સૂર્યસ્ય ત્વા ચક્ષુષા પ્રતિ

પશ્યામીત્યબ્રવીન્ન હિ સૂર્યસ્ય ચક્ષુઃ
૪૭ કિં ચન હિનસ્તિ સોઽબિભેત્ પ્રતિગૃહ્ણન્તં મા હિꣳ સિષ્યતીતિ
દેવસ્ય ત્વા સવિતુઃ પ્રસવેઽશ્વિનોર્બાહુભ્યાં પૂષ્ણો હસ્તાભ્યાં
પ્રતિ ગૃહ્ણામીત્યબ્રવીત્ સવિતૃપ્રસૂત એવૈનદ્બ્રહ્મણા દેવતાભિઃ
પ્રત્યગૃહ્ણાત્ સોઽબિભેત્ પ્રાશ્નન્તં મા હિꣳ સિષ્યતીત્યગ્નેસ્ત્વાસ્યેન
પ્રાશ્નામીત્યબ્રવીન્ન હ્યગ્નેરાસ્યં કિં ચન હિનસ્તિ સોઽબિભેત્
૪૮ પ્રાશિતં મા હિꣳ સિષ્યતીતિ બ્રાહ્મણસ્યોદરેણેત્યબ્રવીન્ન
હિ બ્રાહ્મણસ્યોદરં કિં ચન હિનસ્તિ બૃહસ્પતેર્બ્રહ્મણેતિ
સ હિ બ્રહ્મિષ્ઠોઽપ વા એતસ્માત્ પ્રાણાઃ ક્રામન્તિ યઃ પ્રાશિત્રં
પ્રાશ્નાત્યદ્ભિર્માર્જયિત્વા પ્રાણાન્થ્સં મૃશતેઽમૃતં વૈ
પ્રાણા અમૃતમાપઃ પ્રાણાનેવ યથાસ્થાનમુપ હ્વયતે ॥ ૨। ૬। ૮॥
પ્રાશ્નીયાદ્ધોતા યજ્ઞં નિરહરન્તચ્ચક્ષુરાસ્યં કિંચન હિનસ્તિ
સોબિભેચ્ચતુશ્ચત્વારિꣳ શચ્ચ ॥ ૨। ૬। ૮॥
૪૯ અગ્નીધ આ દધાત્યગ્નિમુખાનેવર્તૂન્ પ્રીણાતિ સમિધમા
દધાત્યુત્તરાસામાહુતીનાં પ્રતિષ્ઠિત્યા અથો સમિદ્ધત્યેવ જુહોતિ
પરિધીન્થ્સં માર્ષ્ટિ પુનાત્યેવૈનાન્થ્સકૃથ્સકૃથ્સં માર્ષ્ટિ પરાઙિવ
હ્યેતર્હિ યજ્ઞશ્ચતુઃ સંપદ્ય તે ચતુષ્પાદઃ પશવઃ પશૂનેવાવ
રુન્ધે બ્રહ્મન્ પ્ર સ્થાસ્યામ ઇત્યાહાત્ર વા એતર્હિ યજ્ઞઃ શ્રિતો
૫૦ યત્ર બ્રહ્મા યત્રૈવ યજ્ઞઃ શ્રિતસ્તત એવૈનમા રભતે
યદ્ધસ્તેન પ્રમીવેદ્વેપનઃ સ્યાદ્યચ્છીર્ષ્ણા શીર્ષક્તિમાન્થ્સ્યાદ્યત્
તૂષ્ણીમાસીતાસંપ્રત્તો યજ્ઞઃ સ્યાત્પ્રતિષ્ઠેત્યેવ બ્રૂયાદ્વાચિ વૈ યજ્ઞઃ
શ્રિતો યત્રૈવ યજ્ઞઃ શ્રિતસ્તત એવૈનꣳ સંપ્ર યચ્છતિ દેવ
સવિતરેતત્તે પ્રા
૫૧ ઽહેત્યાહ પ્રસૂત્યૈ બૃહસ્પતિર્બ્રહ્મેત્યાહ સ હિ બ્રહ્મિષ્ઠઃ
સ યજ્ઞં પાહિ સ યજ્ઞપતિં પાહિ સ માં પાહીત્યાહ યજ્ઞાય
યજમાનાયાત્મને તેભ્ય એવાશિષમા શાસ્તેઽનાર્ત્યા આશ્રાવ્યાહ દેવાન્,
યજેતિ બ્રહ્મવાદિનો વદન્તીષ્ટા દેવતા અથ કતમ એતે દેવા ઇતિ

છન્દા ꣳ સીતિ બ્રૂયાદ્ગાયત્રીં ત્રિષ્ટુભં

૫૨ જગતીમિત્યથો ખલ્વાહુર્બ્રાહ્મણા વૈ છન્દા ꣳ સીતિ તાનેવ
તદ્યજતિ દેવાનાં વા ઇષ્ટા દેવતા આસન્નથાગ્નિર્નોદજ્વલત્તં દેવા
આહુતીભિરનૂયાજેષ્વન્વવિન્દન્ યદનૂયાજાન્, યજત્યગ્નિમેવ તથ્સમિન્ધ
એતદુર્વૈ નામાસુર આસીથ્સ એતર્હિ યજ્ઞસ્યાશિષમવૃઙ્ક્ત યદ્
બ્રૂયાદેત

૫૩ દુ દ્યાવાપૃથિવી ભદ્રમભૂદિત્યેતદુમેવાસુરં
યજ્ઞસ્યાશિષં ગમયેદિદં દ્યાવાપૃથિવી ભદ્રમભૂદિત્યેવ
બ્રૂયાદ્યજમાનમેવ યજ્ઞસ્યાશિષં ગમયત્યાર્ધ્મ સૂક્તવાકમુત
નમોવાકમિત્યાહેદમરાથ્સ્મેતિ વાવૈતદાહોપશ્રિતો દિવઃ
પૃથિવ્યોરિત્યાહ દ્યાવાપૃથિવ્યોર્હિ યજ્ઞ ઉપશ્રિત ઓમન્વતી તેઽસ્મિન્,
યજ્ઞે યજમાન દ્યાવાપૃથિવી

૫૪ સ્તામિત્યાહાશિષમેવૈતામા શાસ્તે યદ્બ્રૂયાથ્સૂપાવસાના ચ સ્વધ્યવસાના
ચેતિ પ્રમાયુકો યજમાનઃ સ્યાદ્યદા હિ પ્રમીયતેઽથેમામુપાવસ્યતિ
સૂપચરણા ચ સ્વધિચરણા ચેત્યેવ બ્રૂયાદ્વરીયસીમેવાસ્મૈ ગવ્યૂતિમા
શાસ્તે ન પ્રમાયુકો ભવતિ તયોરાવિદ્યગ્નિરિદꣳ હવિરજુષતેત્યાહ
યા અયાક્ષ્મ

૫૫ દેવતાસ્તા અરીરધામેતિ વાવૈતદાહ યન્ન નિર્દિશેત્
પ્રતિવેશં યજ્ઞસ્યાશીર્ગચ્છેદા શાસ્તેઽયં યજમાનોઽસાવિત્યાહ
નિર્દિશ્યૈવૈન ꣳ સુવર્ગં લોકં ગમયત્યાયુરા શાસ્તે સુપ્રજાસ્ત્વમા
શાસ્ત ઇત્યાહાશિષમેવૈતામા શાસ્તે સજાતવનસ્યામા શાસ્ત ઇત્યાહ પ્રાણા
વૈ સજાતાઃ પ્રાણાનેવ

૫૬ નાન્તરેતિ તદગ્નિર્દેવો દેવેભ્યો વનતે વયમગ્નેર્માનુષા
ઇત્યાહાગ્નિર્દેવેભ્યો વનુતે વયં મનુષ્યેભ્ય ઇતિ વાવૈતદાહેહ
ગતિર્વામસ્યેદં ચ નમો દેવેભ્ય ઇત્યાહ યાશ્ચૈવ દેવતા યજતિ
યાશ્ચ ન તાભ્ય એવોભયીભ્યો નમસ્કરોત્યાત્મનોઽનાર્ત્યૈ ॥ ૨। ૬। ૯॥

શ્રિતસ્તે પ્ર ત્રિષ્ટુભમેતદ્દ્યાવાપૃથિવી યા અયાક્ષ્મ પ્રાણાનેવ

ષટ્ચત્વારિꣳશચ્ચ ॥ ૨। ૬। ૯॥

૫૭ દેવા વૈ યજ્ઞસ્ય સ્વગાકર્તારં નાવિન્દન્તે શંયું
બાર્હસ્પત્યમબ્રુવન્નિમં નો યજ્ઞꣳ સ્વગા કુર્વિતિ
સોઽબ્રવીદ્વરં વૃણૈ યદેવાબ્રાહ્મણોક્તોઽશ્રદ્દધાનો યજાતૈ સા
મે યજ્ઞસ્યાશીરસદિતિ તસ્માદ્યદબ્રાહ્મણોક્તોઽશ્રદ્દધાનો યજતે
શંયુમેવ તસ્ય બાર્હસ્પત્યં યજ્ઞસ્યાશીર્ગચ્છત્યેતન્મમેત્યબ્રવીત્કિં
મે પ્રજાયા

૫૮ ઇતિ યોઽપગુરાતૈ શતેન યાતયાદ્યો નિહનત્ સહસ્રેણ યાતયાદ્યો
લોહિતં કરવદ્યાવતઃ પ્રસ્કદ્ય પાꣳસૂન્થ્સં ગૃહ્ણાત્તાવતઃ
સંવથ્સરાન્પિતૃલોકં ન પ્ર જાનાદિતિ તસ્માદ્બ્રાહ્મણાય નાપ ગુરેત ન
નિ હન્યાન્ન લોહિતં કુર્યાદેતાવતા હૈનસા ભવતિ તચ્છંયોરા વૃણીમહ
ઇત્યાહ યજ્ઞમેવતથ્સ્વગા કરોતિ ત

૫૯ ચ્છંયોરા વૃણીમહ ઇત્યાહ શંયુમેવ બાર્હસ્પત્યં ભાગધેયેન
સમર્ધયતિ ગાતું યજ્ઞાય ગાતું યજ્ઞપતય ઇત્યાહાશિષમેવૈતામા
શાસ્તે સોમં યજતિ રેત એવ તદ્દધાતિ ત્વષ્ટારં યજતિ રેત એવ
હિતં ત્વષ્ટા રૂપાણિ વિ કરોતિ દેવાનાં પત્નીર્યજતિ મિથુનત્વાયાગ્નિં
ગૃહપતિં યજતિ પ્રતિષ્ઠિત્યૈ જામિ વા એતદ્યજ્ઞસ્ય ક્રિયતે

૬૦ યદાજ્યેન પ્રયાજા ઇજ્યન્ત આજ્યેન પત્નીસંયાજા ઋચમનૂચ્ય
પત્નીસંયાજાનામૃચા યજત્યજામિત્વાયાથો મિથુનત્વાય પંક્તિપ્રાયણો
વૈ યજ્ઞઃ પંક્ત્યુદયનઃ પંચ પ્રયાજા ઇજ્યન્તે ચત્વારઃ પત્નીસંયાજાઃ
સમિષ્ટયજુઃ પંચમં પંક્તિમેવાનુ પ્રયન્તિ પંક્તિમનૂદ્યન્તિ ॥ ૨। ૬। ૧૦॥

પ્રજાયાઃ કરોતિ તત્ક્રિયતે ત્રયસ્ત્રિꣳશચ્ચ ॥ ૨। ૬। ૧૦॥

૬૧ યુક્ષ્વા હિ દેવહૂતમાꣳ અશ્વાꣳઅગ્ને રથીરિવ । નિ હોતા પૂર્વ્યઃ
સદઃ ॥ ઉત નો દેવ દેવાꣳ અચ્છા વોચો વિદુષ્ટરઃ । શ્રદ્વિશ્વા વાર્યા
કૃધિ ॥ ત્વꣳ હ યદ્યવિષ્ઠ્ય સહસઃ સૂનવાહુત । ઋતાવા યજ્ઞિયો
ભુવઃ ॥ અયમગ્નિઃ સહસ્રિણો વાજસ્ય શતિનસ્પતિઃ । મૂર્ધા કવી
રયીણામ્ ॥ તં નેમિમૃભવો યથાનમસ્વ સહૂતિભિઃ । નેદીયો યજ્ઞ

૬૨ મઙ્ગિરઃ ॥ તસ્મૈ નૂનમભિદ્યવે વાચા વિરૂપ નિત્યયા । વૃષ્ણે ચોદસ્વ
સુષ્ટુતિમ્ ॥ કમુ ષ્વિદસ્ય સેનયાગ્નેરપાકચક્ષસઃ । પણિં ગોષુ સ્તરામહે
॥ મા નો દેવાનાં વિશઃ પ્રસ્નાતીરિવોસ્રાઃ । કૃશં ન હાસુરઘ્નિયાઃ ॥
મા નઃ સમસ્ય દૂઢ્યઃ પરિદ્વેષસો અꣳહતિઃ । ઊર્મિર્ન નાવમા વધીત્ ॥
નમસ્તે અગ્ન ઓજસે ગૃણન્તિ દેવ કૃષ્ટયઃ । અમૈ
૬૩ રમિત્રમર્દય ॥ કુવિત્સુ નો ગવિષ્ટયેઽગ્ને સંવેષિષો રયિમ્ ।
ઉરુકૃદુરુણસ્કૃધિ ॥ મા નો અસ્મિન્મહાધને પરા વર્ગ્ભારભૃદ્યથા
। સંવર્ગꣳ સꣳ રયિં જય ॥ અન્યમસ્મદ્ભિયા ઇયમગ્ને
સિષક્તુ દુચ્છુના । વર્ધા નો અમવચ્છવઃ ॥ યસ્યાજુષન્નમસ્વિનઃ
શમીમદુર્મખસ્ય વા । તં ઘેદગ્નિર્વૃધાવતિ ॥ પરસ્યા અધિ
૬૪ સંવતોઽવરાꣳ અભ્યા તર । યત્રાહમસ્મિ તાꣳ અવ ॥ વિદ્મા હિ તે
પુરા વયમગ્ને પિતુર્યથાવસઃ । અધાતે સુમ્નમીમ હે । ય ઉગ્ર ઇવ શર્યહા
તિગ્મશૃઙ્ગો ન વꣳસગઃ । અગ્ને પુરો રુરોજિથ ॥ સખાયઃ સં વઃ
સમ્યઞ્ચમિષગ્ગ્ સ્તોમં ચાગ્નયે । વર્ષિષ્ઠાય ક્ષિતીનામૂર્જો નપ્ત્રે
સહસ્વતે ॥ સꣳ સમિદ્યુવસે વૃષન્નગ્ને વિશ્વાન્યર્ય આ । ઇડસ્પદે
સમિધ્યસે સ નો વસૂન્યા ભર ॥ પ્રજાપતે સ વેદ સોમાપૂષણેમૌ દેવૌ
॥ ૨। ૬। ૧૧॥ યજ્ઞમમૈરધિ વૃષન્નેકાન્ન વિꣳશતિશ્ચ ॥ ૨। ૬। ૧૧॥
૬૫ ઉશન્તસ્ત્વા હવામહ ઉશન્તઃ સમિધીમહિ । ઉશન્નુશત આ વહ પિતૄન્
હવિષે અત્તવે ॥ ત્વꣳ સોમ પ્રચિકિતો મનીષા ત્વꣳ રજિષ્ઠમનુ
નેષિ પન્થામ્ । તવ પ્રણીતી પિતરો ન ઇન્દો દેવેષુ રત્નમભજન્ત
ધીરાઃ ॥ ત્વયા હિ નઃ પિતરઃ સોમ પૂર્વે કર્માણિ ચક્રુઃ પવમાન
ધીરાઃ । વન્વન્નવાતઃ પરિધીꣳ રપોર્ણુ વીરેભિરશ્વૈર્મઘવા ભવા
૬૬ નઃ ॥ ત્વꣳ સોમ પિતૃભિઃ સંવિદાનોઽનુ દ્યાવાપૃથિવી આતતન્થ ।
તસ્મૈ ત ઇન્દો હવિષા વિધેમ વયꣳ સ્યામ પતયો રયીણામ્ ॥ અગ્નિષ્વાત્તાઃ
પિતર એહ ગચ્છત સદઃ સદઃ સદત સુપ્રણીતયઃ । અત્તા હવીꣳષિ પ્રયતાનિ
બર્હિષ્યથા રયિꣳ સર્વવીરં દધાતન ॥ બર્હિષદઃ પિતર ઊત્યર્વાગિમા

વો હવ્યા ચકૃમા જુષધ્વમ્ । ત આ ગતાવસા શંતમેનાથાસ્મભ્ય ꣳ
૬૭ શં યોરરપો દધાત ॥ આહં પિતૄન્થ્સુવિદત્રા ꣳઅવિથ્સિ નપાતં
ચ વિક્રમણં ચ વિષ્ણોઃ । બર્‌હિષદો યે સ્વધયા સુતસ્ય ભજન્ત
પિત્વસ્ત ઇહાગમિષ્ઠાઃ ॥ ઉપહૂતાઃ પિતરઃ સોમ્યાસો બર્હિષ્યેષુ નિધિષુ
પ્રિયેષુ । ત આ ગમન્તુ ત ઇહ શ્રુવન્ત્વધિ બ્રુવન્તુ તે અવન્ત્વસ્માન્ ॥
ઉદીરતામવર ઉત્પરાસ ઉન્મધ્યમાઃ પિતરઃ સોમ્યાસઃ । અસું
૬૮ ય ઈયુરવૃકા ઋતજ્ઞાસ્તે નોઽવન્તુ પિતરો હવેષુ ॥ ઇદં પિતૃભ્યો
નમો અસ્ત્વદ્ય યે પૂર્વાસો ય ઉપરાસ ઈયુઃ । યે પાર્થિવે રજસ્યા નિષત્તા
યે વા નૂન ꣳ સુવૃજનાસુ વિક્ષુ ॥ અધા યથા નઃ પિતરઃ પરાસઃ
પ્રત્નાસો અગ્ન ઋતમાશુષાણાઃ । શુચીદયન્દીધિતિમુક્થશાસઃ, ક્ષામા
ભિન્દન્તો અરુણીરપ વ્રન્ ॥ યદગ્ને
૬૯ કવ્યવાહન પિતૄન્, યક્ષ્યૃતાવૃધઃ । પ્ર ચ હવ્યાનિ વક્ષ્યસિ
દેવેભ્યશ્ચ પિતૃભ્ય આ ॥ ત્વમગ્ન ઈડિતો જાતવેદો ઽવાડ્ઢવ્યાનિ
સુરભીણિ કૃત્વા । પ્રાદાઃ પિતૃભ્યઃ સ્વધયા તે અક્ષન્નદ્ધિ ત્વં દેવ
પ્રયતા હવી ꣳ ષિ ॥ માતલી કવ્યૈર્યમો અંગિરોભિર્બૃહસ્પતિર્
ઋક્વભિર્વાવૃધાનઃ । યાગ્શ્ચ દેવા વાવૃધુર્યે ચ દેવાન્થ્સ્વાહાન્
યે સ્વધયાન્યે મદન્તિ ।
૭૦ ઇમં યમ પ્રસ્તરમા હિ સીદાંગિરોભિઃ પિતૃભિઃ સંવિદાનઃ । આ ત્વા
મન્ત્રાઃ કવિશસ્તા વહન્ત્વેના રાજન્ હવિષા માદયસ્વ ॥ અંગિરોભિરા
ગહિ યજ્ઞિયેભિર્યમ વૈરૂપૈરિહ માદયસ્વ । વિવસ્વન્ત ꣳ હુવે
યઃ પિતા તેઽસ્મિન્, યજ્ઞે બર્‌હિષ્યા નિષદ્ય ॥ અંગિરસો નઃ પિતરો
નવગ્વા અથર્વાણો ભૃગવઃ સોમ્યાસઃ । તેષાં વય ꣳ સુમતૌ
યજ્ઞિયાનામપિ ભદ્રે સૌમનસે સ્યામ ॥ ૨। ૬। ૧૨॥ ભવાસ્મભ્યમસું
યદગ્ને મદન્તિ સૌમનસ એકં ચ ॥ ૨। ૬। ૧૨॥

સમિધશ્ચક્ષુષી પ્રજાપતિરાજ્યં દેવસ્ય સ્ફ્યં
બ્રહ્મવાદિનોદ્ભિરગ્નેસ્ત્રયો મનુઃ પૃથિવ્યાઃ પશવોગ્નીધે દેવા વૈ
યજ્ઞસ્ય યુક્ષ્વોશંતસ્ત્વા દ્વાદશ ॥

સમિધો યાજ્યા તસ્માન્નાભાગꣳ હિતમન્વિત્યાહ પ્રજા વા આહેત્યાહ યુક્ષ્વા
હિ સપ્તતિઃ ॥

સમિધઃ સૌમનસે સ્યામ ॥

ઇતિ દ્વિતીયં કાણ્ડં સંપૂર્ણમ્ ॥

॥ તૈત્તિરીય-સંહિતા ॥

# તૈત્તિરીય-સંહિતા

## ॥ તૃતીયં કાણ્ડમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

### તૃતીયકાણ્ડે પ્રથમઃ પ્રશ્નઃ ૧

૧ પ્રજાપતિરકામયત પ્રજાઃ સૃજેયેતિ સ તપોઽતપ્યત સ
સર્પાનસૃજત સોઽકામયત પ્રજાઃ સૃજેયેતિ સ દ્વિતીયમતપ્યત
સ વયાગ્ંસ્યસૃજત સોઽકામયત પ્રજાઃ સૃજેયેતિ સ તૃતીયમતપ્યત
સ એતં દીક્ષિતવાદમપશ્યત્ તમવદત્ તતો વૈ સ પ્રજા અસૃજત
યત્તપસ્તપ્ત્વા દીક્ષિતવાદં વદતિ પ્રજા એવ તદ્યજમાનઃ

૨ સૃજતે યદ્વૈ દીક્ષિતોઽમેધ્યં પશ્યત્યપાસ્માદ્દીક્ષા ક્રામતિ
નીલમસ્ય હરો વ્યેત્યબદ્ધં મનો દરિદ્રં ચક્ષુઃ સૂર્યો જ્યોતિષાગ્ં
શ્રેષ્ઠો દીક્ષે મા મા હાસીરિત્યાહ નાસ્માદ્દીક્ષાઽપ ક્રામતિ નાસ્ય
નીલં ન હરો વ્યેતિ યદ્વૈ દીક્ષિતમભિવર્ષતિ દિવ્યા આપોઽશાન્તા
ઓજો બલં દીક્ષાં

3 તપોઽસ્ય નિર્ઘ્નન્ત્યુન્દતીર્બલં ધત્તૌજો ધત્ત બલં ધત્ત મા મે
દીક્ષાં મા તપો નિર્વધિષ્ટેત્યાહૈતદેવ સર્વમાત્મન્ધત્તે નાસ્યૌજો
બલં ન દીક્ષાં ન તપો નિર્ઘ્નન્ત્યગ્નિર્વૈ દીક્ષિતસ્ય દેવતા
સોઽસ્માદેતર્હિ તિર ઇવ યર્હિ યાતિ તમીશ્વરꣳ રક્ષાꣳસિ હન્તો

૪ ર્ભદ્રાદભિ શ્રેયઃ પ્રેહિ બૃહસ્પતિઃ પુર એતા તે અસ્ત્વિત્યાહ
બ્રહ્મ વૈ દેવાનાં બૃહસ્પતિસ્તમેવાન્વારભતે સ એનꣳ સં
પારયત્યેદમગન્મ દેવયજનં પૃથિવ્યા ઇત્યાહ દેવયજનગ્ંગ્ હ્યેષ

પૃથિવ્યા આગચ્છતિ યો યજતે વિશ્વે દેવા યદજુષન્ત પૂર્વ
ઇત્યાહ વિશ્વે હ્યેતદ્દેવા જોષયન્તે યદ્બ્રાહ્મણા ઋક્સામાભ્યાં
યજુષા સન્તરન્ત ઇત્યાહઋક્સામાભ્યાગ્ં હ્યેષ યજુષા સન્તરતિ યો
યજતે રાયસ્પોષેણ સમિષા મદેમેત્યાહાશિષમેવૈતામા શાસ્તે ॥ ૩। ૧। ૧॥
યજમાનો દીક્ષાઁ હંતોર્બ્રાહ્મણાશ્ચતુર્વિઁ શતિશ્ચ ॥ ૩। ૧। ૧॥
૫ એષ તે ગાયત્રો ભાગ ઇતિ મે સોમાય બ્રૂતાદેષ તે ત્રૈષ્ટુભો જાગતો
ભાગ ઇતિ મે સોમાય બ્રૂતાચ્છન્દોમાનાઁ સામ્રાજ્યં ગચ્છેતિ મે સોમાય
બ્રૂતાદ્યો વૈ સોમઁ રાજાનઁ સામ્રાજ્યં લોકં ગમયિત્વા ક્રીણાતિ
ગચ્છતિ સ્વાનાઁ સામ્રાજ્યં છન્દાઁસિ ખલુ વૈ સોમસ્ય રાજ્ઞઃ
સામ્રાજ્યો લોકઃ પુરસ્તાથ્સોમસ્ય ક્રયાદેવમભિ મન્ત્રયેત સામ્રાજ્યમેવૈ
૬ નં લોકં ગમયિત્વા ક્રીણાતિ ગચ્છતિ સ્વાનાઁ સામ્રાજ્યં યો વૈ
તાનૂનપ્ત્રસ્ય પ્રતિષ્ઠાં વેદ પ્રત્યેવ તિષ્ઠતિ બ્રહ્મવાદિનો વદન્તિ ન
પ્રાશ્નન્તિ ન જુહ્વત્યથ ક્વ તાનૂનપ્ત્રં પ્રતિ તિષ્ઠતીતિ પ્રજાપતૌ
મનસીતિ બ્રૂયાત્ત્રિરવ જિઘ્રેત્પ્રજાપતૌ ત્વા મનસિ જુહોમીત્યેષા વૈ
તાનૂનપ્ત્રસ્ય પ્રતિષ્ઠા ય એવં વેદ પ્રત્યેવ તિષ્ઠતિ યો
૭ વા અધ્વર્યોઃ પ્રતિષ્ઠાં વેદ પ્રત્યેવ તિષ્ઠતિ યતો મન્યેતાનભિક્રમ્ય
હોષ્યામીતિ તત્તિષ્ઠન્ના શ્રાવયેદેષા વા અધ્વર્યોઃ પ્રતિષ્ઠા ય એવં
વેદ પ્રત્યેવ તિષ્ઠતિ યદભિક્રમ્ય જુહુયાત્પ્રતિષ્ઠાયા ઇયાત્
તસ્માથ્સમાનત્ર તિષ્ઠતા હોતવ્યં પ્રતિષ્ઠિત્યૈ યો વા અધ્વર્યોઃ સ્વં
વેદ સ્વવાનેવ ભવતિ સ્રુગ્વા અસ્ય સ્વં વાયવ્યમસ્ય
૮ સ્વં ચમસોઽસ્ય સ્વં યદ્વાયવ્યં વા ચમસં વાનન્વારભ્યાશ્રાવયેત્
સ્વાદિયાત્ તસ્માદન્વારભ્યાશ્રાવ્યગ્ં સ્વાદેવ નૈતિ યો વૈ
સોમમપ્રતિષ્ઠાપ્ય સ્તોત્રમુપાકરોત્યપ્રતિષ્ઠિતઃ સોમો
ભવત્યપ્રતિષ્ઠિતઃ સ્તોમોઽપ્રતિષ્ઠિતાન્યુક્થાન્યપ્રતિષ્ઠિતો
યજમાનોઽપ્રતિષ્ઠિતોઽધ્વર્યુર્વાયવ્યં વૈ સોમસ્ય પ્રતિષ્ઠા
ચમસોઽસ્ય પ્રતિષ્ઠા સોમઃ સ્તોમસ્ય સ્તોમ ઉક્થાનાં ગ્રહં વા ગૃહીત્વા
ચમસં વોન્નીય સ્તોત્રમુપાકુર્યાત્પ્રત્યેવ સોમગ્ં સ્થાપયતિ પ્રતિ

સ્તોમં પ્રત્યુક્થાનિ પ્રતિ યજમાનસ્તિષ્ઠતિ પ્રત્યધ્વર્યુઃ ॥ ૩। ૧। ૨॥

એવ તિષ્ઠતિ યો વાયવ્યમસ્ય ગ્રહંવૈકાન્ન વિ શતિશ્ચ ॥ ૩। ૧। ૨॥

૯ યજ્ઞં વા એતથ્સં ભરન્તિ યથ્સોમક્રયણ્યૈ પદં યજ્ઞમુખ

હવિર્ધાને યર્હિ હવિર્ધાને પ્રાચી પ્રવર્તયેયુસ્તર્હિ

તેનાક્ષમુપાઞ્જ્યાદ્યજ્ઞમુખ એવ યજ્ઞમનુ સં તનોતિ પ્રાઞ્ચમગ્નિં પ્ર

હરન્ત્યુત્પત્નીમા નયન્ત્યન્વના સિ પ્ર વર્તયન્ત્યથ વા અસ્યૈષ

ધિષ્ણિયો હીયતે સોઽનુ ધ્યાયતિ સ ઈશ્વરો રુદ્રો ભૂત્વા

૧૦ પ્રજાં પશૂન્, યજમાનસ્ય શમયિતોર્યર્હિ પશુમાપ્રીતમુદઞ્ચં

નયન્તિ તર્હિ તસ્ય પશુશ્રપણ હરેત્ તેનૈવૈનં ભાગિનં

કરોતિ યજમાનો વા આહવનીયો યજમાનં વા એતદ્વિ કર્ષન્તે

યદાહવનીયાત્ પશુશ્રપણ હરન્તિ સ વૈવ સ્યાન્નિર્મન્થ્યં

વા કુર્યાદ્યજમાનસ્ય સાત્મત્વાય યદિ પશોરવદાનં નશ્યેદાજ્યસ્ય

પ્રત્યાખ્યાયમવ દ્યેથ્સૈવ તતઃ પ્રાયશ્ચિત્તિર્યે પશું વિમથ્નીરન્, યસ્તાન્

કામયેતાર્તિમાર્ચ્છેયુરિતિ કુવિદઙ્ગેતિ નમો વૃક્તિવત્યર્ચાગ્નીધ્રે

જુહુયાન્નમો વૃક્તિમેવૈષાં વૃઙ્ક્તે તાજગાર્તિમાર્ચ્છન્તિ ॥ ૩। ૧। ૩॥ ભૂત્વા

તતષ્ષડ્વિ શતિશ્ચ ॥ ૩। ૧। ૩॥

૧૧ પ્રજાપતેર્જાયમાનાઃ પ્રજા જાતાશ્ચ યા ઇમાઃ । તસ્મૈ પ્રતિ પ્ર વેદય

ચિકિત્વા અનુ મન્યતામ્ ॥ ઇમં પશું પશુપતે તે અદ્ય બધ્નામ્યગ્ને

સુકૃતસ્ય મધ્યે । અનુ મન્યસ્વ સુયજા યજામ જુષ્ટં દેવાનામિદમસ્તુ

હવ્યમ્ ॥ પ્રજાનન્તઃ પ્રતિ ગૃહ્ણન્તિ પૂર્વે પ્રાણમઙ્ગેભ્યઃ

પર્યાચરન્તમ્ । સુવર્ગં યાહિ પથિભિર્દેવયાનૈરોષધીષુ પ્રતિ

તિષ્ઠા શરીરૈઃ ॥ યેષામીશે

૧૨ પશુપતિઃ પશૂનાં ચતુષ્પદામુત ચ દ્વિપદામ્ । નિષ્ક્રીતોઽયં

યજ્ઞિયં ભાગમેતુ રાયસ્પોષા યજમાનસ્ય સન્તુ ॥ યે બધ્યમાનમનુ

બધ્યમાના અભ્યૈક્ષન્ત મનસા ચક્ષુષા ચ । અગ્નિસ્તા અગ્રે

પ્ર મુમોક્તુ દેવઃ પ્રજાપતિઃ પ્રજયા સંવિદાનઃ ॥ ય આરણ્યાઃ પશવો

વિશ્વરૂપા વિરૂપાઃ સન્તો બહુધૈકરૂપાઃ । વાયુસ્તા અગ્રે પ્ર મુમોક્તુ

દેવઃ પ્રજાપતિઃ પ્રજયા સંવિદાનઃ ॥ પ્રમુઞ્ચમાના
૧૩ ભુવનસ્ય રેતો ગાતું ધત્ત યજમાનાય દેવાઃ । ઉપાકૃત ँ શશમાનં
યદસ્થાજ્જીવં દેવાનામપ્યેતુ પાથઃ ॥ નાના પ્રાણો યજમાનસ્ય પશુના
યજ્ઞો દેવેભિઃ સહ દેવયાનઃ । જીવં દેવાનામપ્યેતુ પાથઃ સત્યાઃ
સન્તુ યજમાનસ્ય કામાઃ ॥ યત્પશુર્માયુમકૃતોરો વા પદ્ભિરાહતે ।
અગ્નિર્મા તસ્માદેનસો વિશ્વાન્મુઞ્ચત્વ ँ હસઃ ॥ શમિતાર ઉપેતન
યજ્ઞં
૧૪ દેવેભિરિન્વિતમ્ । પાશાત્ પશું પ્ર મુઞ્ચત બન્ધાધજ્ઞપતિં પરિ
॥ અદિતિઃ પાશં પ્ર મુમોક્ત્વેતં નમઃ પશુભ્યઃ પશુપતયે કરોમિ ।
અરાતીયન્તમધરં કૃણોમિ યં દ્વિષ્મસ્તસ્મિન્પ્રતિ મુઞ્ચામિ પાશમ્ ॥
ત્વામુ તે દધિરે હવ્યવાહ ँશ ृતં કર્તારમુત યજ્ઞિયં ચ । અગ્ને
સદક્ષઃ સતનુર્હિ ભૂત્વાથ હવ્યા જાતવેદો જુષસ્વ ॥ જાતવેદો વપયા
ગચ્છ દેવાન્ત્વ ँ હિ હોતા પ્રથમો બભૂથ । ઘૃતેન ત્વં તનુવો
વર્ધયસ્વ સ્વાહાકૃત ँ હવિરદન્તુ દેવાઃ ॥ સ્વાહા દેવેભ્યો દેવેભ્યઃ
સ્વાહા ॥ ૩। ૧। ૪॥ ઈશે પ્રમુંચમાના યજ્ઞં ત્વ ँ ષોડશ ચ ॥ ૩। ૧। ૪॥
૧૫ પ્રાજાપત્યા વૈ પશવસ્તેષા ँરુદ્રોઽધિપતિર્યદેતાભ્યામુપાકરોતિ
તાભ્યામેવૈનં પ્રતિપ્રોચ્યા લભત આત્મનોઽનાવ્રસ્કાય દ્વાભ્યામુપાકરોતિ
દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યા ઉપાકૃત્ય પઞ્ચ જુહોતિ પાઙ્ક્તાઃ પશવઃ
પશૂનેવાવ રુંધે મૃત્યવે વા એષ નીયતે યત્પશુસ્તં યદન્વારભેત
પ્રમાયુકો યજમાનઃ સ્યાન્નાના પ્રાણો યજમાનસ્ય પશુનેત્યાહ વ્યાવૃત્ત્યૈ
૧૬ યત્પશુર્માયુમકૃતેતિ જુહોતિ શાન્ત્યૈ શમિતાર ઉપેતનેત્યાહ
યથાયજુરેવૈતદ્વપાયાં વા આહ્રિયમાણાયામગ્નેર્મેધોઽપ ક્રામતિ ત્વામુ તે
દધિરે હવ્યવાહમિતિ વપામભિ જુહોત્યગ્નેરેવ મેધમવ રુંધેઽથો
શ ृતત્વાય પુરસ્તાથ્સ્વાહાકૃતયો વા અન્યે દેવા ઉપરિષ્ટાથ્સ્વાહાકૃતયોઽન્યે
સ્વાહા દેવેભ્યો દેવેભ્યઃ સ્વાહેત્યભિતો વપાં જુહોતિ તાનેવોભયાન્પ્રીણાતિ
॥ ૩। ૧। ૫॥ વ્યાવૃત્યા અભિતો વપાં પંચ ચ ॥ ૩। ૧। ૫॥
૧૭ યો વા અયથાદેવતં યજ્ઞમુપચરત્યા દેવતાભ્યો વૃશ્ચ્યતે

પાપીયાન્ભવતિ યો યથાદેવતં ન દેવતાભ્ય આ વૃશ્ચતે
વસીયાન્ભવત્યાગ્નેય્યર્ચાગ્નીધ્રમભિ મૃશેદ્વૈષ્ણવ્યા હવિર્ધાનમાગ્નેય્યા
સ્રુચો વાયવ્યયા વાયવ્યાન્યૈન્દ્રિયા સદો યથાદેવતમેવ યજ્ઞમુપ
ચરતિ ન દેવતાભ્ય આ વૃશ્ચતે વસીયાન્ભવતિ યુનજ્મિ તે પૃથિવીં
જ્યોતિષા સહ યુનજ્મિ વાયુમન્તરિક્ષેણ

૧૮ તે સહ યુનજ્મિ વાચꣳસહ સૂર્યેણ તે યુનજ્મિ તિસ્રો વિપૃચઃ
સૂર્યસ્ય તે । અગ્નિર્દેવતા ગાયત્રી છંદ ઉપાꣳશોઃ પાત્રમસિ સોમો
દેવતા ત્રિષ્ટુપ્છન્દોઽન્તર્યામસ્ય પાત્રમસીન્દ્રો દેવતા જગતી છંદ
ઇન્દ્રવાયુવોઃ પાત્રમસિ બૃહસ્પતિર્દેવતાનુષ્ટુપ્છન્દો મિત્રાવરુણયોઃ
પાત્રમસ્યશ્વિનૌ દેવતા પઙ્ક્તિશ્છન્દોઽશ્વિનોઃ પાત્રમસિ સૂર્‌યો
દેવતા બૃહતી

૧૯ છંદઃ શુક્રસ્ય પાત્રમસિ ચન્દ્રમા દેવતા સતોબૃહતી છન્દો
મન્થિનઃ પાત્રમસિ વિશ્વે દેવા દેવતોષ્ણિહા છંદ આગ્રયણસ્ય
પાત્રમસીન્દ્રો દેવતા કકુચ્છંદ ઉક્થાનાં પાત્રમસિ પૃથિવી
દેવતા વિરાટ્છન્દો ધ્રુવસ્ય પાત્રમસિ ॥ ૩। ૧। ૬॥ અંતરિક્ષેણ બૃહતી
ત્રયસ્ત્રિꣳશચ્ચ ॥ ૩। ૧। ૬॥

૨૦ ઇષ્ટર્ગો વા અધ્વર્યુર્યજમાનસ્યેષ્ટર્ગઃ ખલુ વૈ પૂર્વોઽર્ષ્ટુઃ,
ક્ષીયત આસન્યાન્મા મન્ત્રાત્પાહિ કસ્યાશ્ચિદભિશસ્ત્યા ઇતિ પુરા
પ્રાતરનુવાકાજ્જુહુયાદાત્મન એવ તદધ્વર્યુઃ પુરસ્તાચ્છર્મ
નહ્યતેઽનાર્ત્યૈ સંવેશાય ત્વોપવેશાય ત્વા ગાયત્રિયાસ્ત્રિષ્ટુભો જગત્યા
અભિભૂત્યૈ સ્વાહા પ્રાણાપાનૌ મૃત્યોર્મા પાતં પ્રાણાપાનૌ મા મા હાસિષ્ટં
દેવતાસુ વા એતે પ્રાણાપાનયો

૨૧ વ્યાંયચ્છન્તે યેષાꣳ સોમઃ સમૃચ્છતે સંવેશાય ત્વોપવેશાય
ત્વેત્યાહ છન્દાꣳસિ વૈ સંવેશ ઉપવેશશ્છન્દોભિરેવાસ્ય
છન્દાꣳસિ વૃઙ્ક્તે પ્રેતિવન્ત્યાજ્યાનિ ભવન્ત્યભિજિત્યૈ મરુત્વતીઃ
પ્રતિપદો વિજિત્યા ઉભે બૃહદ્રથન્તરે ભવત ઇયં વાવ રથંતરમસૌ
બૃહદાભ્યામેવૈનમન્તરેત્યદ્ય વાવ રથંતરꣳ શ્વો

બૃહદદ્યાશ્ચાદેવૈનમન્તરેતિ ભૂતં
૨૨ વાવ રથંતરં ભવિષ્યદ્ બૃહદ્ભૂતાશ્ચૈવૈનં
ભવિષ્યતશ્ચાન્તરેતિ પરિમિતં વાવ રથંતરમપરિમિતં
બૃહત્ પરિમિતાચ્ચૈવૈનમપરિમિતાચ્ચાન્તરેતિ
વિશ્વામિત્રજમદગ્નીવસિષ્ઠેનાસ્પર્ધેતા ઙ્ગ્ સ
એતજ્જમદગ્નિર્વિહવ્યમપશ્યત્તેન વૈ સ વસિષ્ઠસ્યેન્દ્રિયં
વીર્યમવૃઙ્ક્ત યદ્વિહવ્ય ઙ્ગ્ શસ્યત ઇન્દ્રિયમેવ તદ્વીર્યં
યજમાનો ભ્રાતૃવ્યસ્ય વૃઙ્ક્તે યસ્ય ભૂયા ઙ્ગ્ સો યજ્ઞક્રતવ ઇત્યાહુઃ
સ દેવતા વૃઙ્ક્ત ઇતિ યદ્યગ્નિષ્ટોમઃ સોમઃ પરસ્તાથ્સ્યાદુક્થ્યં કુર્વીત
યદ્યુક્થ્યઃ સ્યાદતિરાત્રં કુર્વીત યજ્ઞક્રતુભિરેવાસ્ય દેવતા વૃઙ્ક્તે
વસીયાન્ભવતિ ॥ ૩। ૧। ૭॥ પ્રાણાપાનયોર્ભૂતં વૃંક્તેષ્ટાવિ ઙ્ગ્ શતિશ્ચ
॥ ૩। ૧। ૭॥

૨૩ નિગ્રાભ્યાઃ સ્થ દેવશ્રુત આયુર્મે તર્પયત પ્રાણં મે તર્પયતાપાનં મે
તર્પયત વ્યાનં મે તર્પયત ચક્ષુર્મે તર્પયત શ્રોત્રં મે તર્પયત મનો
મે તર્પયત વાચં મે તર્પયતાત્માનં મે તર્પયતાઙ્ગાનિ મે તર્પયત પ્રજાં મે
તર્પયત પશૂન્ મે તર્પયત ગૃહાન્ મે તર્પયત ગણાન્ મે તર્પયત સર્વગણં
મા તર્પયત તર્પયત મા

૨૪ ગણા મે મા વિ તૃષન્નોષધયો વૈ સોમસ્ય વિશો વિશઃ ખલુ
વૈ રાજ્ઞઃ પ્રદાતોરીશ્વરા ઐન્દ્રઃ સોમોઽવીવૃધં વો મનસા સુજાતા
ઋતપ્રજાતા ભગ ઇદ્ધઃ સ્યામ । ઇન્દ્રેણ દેવીર્વીરુધઃ સંવિદાના અનુ
મન્યન્તા ઙ્ગ્ સવનાય સોમમિત્યાહૌષધીભ્ય એવૈનગ્ગ્ સ્વાયૈ વિશઃ
સ્વાયૈ દેવતાયૈ નિર્યાચ્યાભિ ષુણોતિ યો વૈ સોમસ્યાભિષૂયમાણસ્ય
૨૫ પ્રથમો ઙ્ગ્ શુઃ સ્કન્દતિ સ ઈશ્વર ઇન્દ્રિયં વીર્યં પ્રજાં
પશૂન્, યજમાનસ્ય નિર્હન્તોસ્તમભિ મન્ત્રયેતા માસ્કાન્થ્સહ પ્રજયા
સહ રાયસ્પોષેણેન્દ્રિયમ્ મે વીર્યં મા નિર્વધીરિત્યાશિષમેવૈતામા
શાસ્ત ઇન્દ્રિયસ્ય વીર્યસ્ય પ્રજાયૈ પશૂનામનિર્ઘાતાય દ્રપ્સશ્ચસ્કન્દ
પૃથિવીમનુ દ્યામિમં ચ યોનિમનુ યશ્ચ પૂર્વઃ । તૃતીયં યોનિમનુ

સંચરન્તં દ્રપ્સં જુહોમ્યનુ સપ્ત હોત્રાઃ ॥ ૩। ૧। ૮॥ તર્પયત
માભિષૂયમાણસ્ય યશ્ચ દશ ચ ॥ ૩। ૧। ૮॥
૨૬ યો વૈ દેવાન્ દેવયશસેનાર્પયતિ મનુષ્યાન્મનુષ્યયશસેન
દેવયશસ્યેવ દેવેષુ ભવતિ મનુષ્યયશસી મનુષ્યેષુ યાન્
પ્રાચીનમાગ્રયણાદ્ ગ્રહાન્ ગૃહ્ણીયાત્ તાનુપાꣳશુ ગૃહ્ણીયાદ્યાનૂર્ધ્વાꣳ
સ્તાનુપબ્દિમતો દેવાનેવ તદ્દેવયશસેનાર્પયતિ મનુષ્યાન્
મનુષ્યયશસેન દેવયશસ્યેવ દેવેષુ ભવતિ મનુષ્યયશસી
મનુષ્યેષ્વગ્નિઃ પ્રાતઃસવને પાત્વસ્માન્વૈશ્વાનરો મહિના
વિશ્વશંભૂઃ । સ નઃ પાવકો દ્રવિણં દધા
૨૭ ત્વાયુષ્મન્તઃ સહભક્ષાઃ સ્યામ ॥ વિશ્વે દેવા મરુત ઇન્દ્રો
અસ્માનસ્મિન્દ્વિતીયે સવને ન જહ્યુઃ । આયુષ્મન્તઃ પ્રિયમેષાં
વદન્તો વયં દેવાનાꣳસુમતૌ સ્યામ ॥ ઇદં તૃતીયꣳ સવનં
કવીનામૃતેન યે ચમસમૈરયન્ત । તે સૌધન્વનાઃ સુવરાનશાનાઃ
સ્વિષ્ટિં નો અભિ વસીયો નયન્તુ ॥ આયતનવતીર્વા અન્યા આહુતયો
હૂયન્તેઽનાયતના અન્યા યા આઘારવતીસ્તા આયતનવતીર્યાઃ
૨૮ સૌમ્યાસ્તા અનાયતના ઐન્દ્રવાયવમાદાયાઘારમાઘારયેદધ્વરો
યજ્ઞોઽયમસ્તુ દેવા ઓષધીભ્યઃ પશવે નો જનાય વિશ્વસ્મૈ
ભૂતાયાધ્વરોઽસિ સ પિન્વસ્વ ઘૃતવદ્દેવ સોમેતિ સૌમ્યા એવ
તદાહુતીરાયતનવતીઃ કરોત્યાયતનવાન્ભવતિ ય એવં વેદાથો દ્યાવાપૃથિવી
એવ ઘૃતેન વ્યુનત્તિ તે વ્યુત્તે ઉપજીવની યે ભવત ઉપજીવનીયો ભવતિ
૨૯ ય એવં વેદૈષ તે રુદ્ર ભાગો યં નિરયાચથાસ્તં જુષસ્વ
વિદેર્ગૌપત્યꣳ રાયસ્પોષꣳસુવીર્યꣳસંવથ્સરીણાꣳ સ્વસ્તિમ્
॥ મનુઃ પુત્રેભ્યો દાયં વ્યભજથ્સ નાભાનેદિષ્ઠં બ્રહ્મચર્યં
વસન્તં નિરભજથ્સ આગચ્છથ્સોઽબ્રવીત્કથા મા નિરભાગિતિ ન ત્વા
નિરભાક્ષમિત્યબ્રવીદંગિરસ ઇમે સત્રમાસતે તે
૩૦ સુવર્ગં લોકં ન પ્ર જાનન્તિ તેભ્ય ઇદં બ્રાહ્મણં બ્રૂહિ તે સુવર્ગં
લોકં યન્તો ય એષાં પશવસ્તાꣳસ્તે દાસ્યન્તીતિ તદેભ્યોઽબ્રવીત્તે સુવર્ગં

લોકં યન્તો ય એષાં પશવ આસન્તાનસ્મા અદદુસ્તં પશુભિશ્ચરન્તં
યજ્ઞવાસ્તૌ રુદ્ર આગચ્છથ્સોઽબ્રવીન્મમ વા ઇમે પશવ ઇત્યદુર્વૈ
૩૧ મહ્યમિમાનિત્યબ્રવીન્ન વૈ તસ્ય ત ઈશત ઇત્યબ્રવીદ્યદ્યજ્ઞવાસ્તૌ
હીયતે મમ વૈ તદિતિ તસ્માદ્યજ્ઞવાસ્તુ નાભ્યવેત્યꣳ સોઽબ્રવીદ્યજ્ઞે
મા ભજાથ તે પશૂન્નાભિ મꣳસ્ય ઇતિ તસ્મા એતં મન્થિનઃ સꣳ
સ્રાવમજુહોત્તતો વૈ તસ્ય રુદ્રઃ પશૂન્નાભ્યમન્યત યત્રૈતમેવં
વિદ્વાન્મન્થિનઃ સꣳસ્રાવં જુહોતિ ન તત્ર રુદ્રઃ પશૂનભિ મન્યતે
॥ ૩। ૧। ૯॥ દધાત્વાયતનવતીર્યા ઉપ જીવનીયો ભવતિ તેઽદુર્વૈ
યત્રૈતમેકાદશ ચ ॥ ૩। ૧। ૯॥
૩૨ જુષ્ટો વાચો ભૂયાસં જુષ્ટો વાચસ્પતયે દેવિ વાક્ । યદ્વાચો
મધુમત્તસ્મિન્માધાઃ સ્વાહા સરસ્વત્યૈ ॥ ઋચા સ્તોમꣳ સમર્ધય
ગાયત્રેણ રથંતરમ્ । બૃહદ્ગાયત્રવર્તનિ ॥ યસ્તે દ્રપ્સ સ્કન્દતિ
યસ્તે અꣳશુર્બાહુચ્યુતો ધિષણયોરુપસ્થાત્ । અધ્વર્યોર્વા પરિ
યસ્તે પવિત્રાથ્ સ્વાહાકૃતમિંદ્રાય તં જુહોમિ ॥ યો દ્રપ્સો અꣳશુઃ
પતિતઃ પૃથિવ્યાં પરિવાપાત્
૩૩ પુરોડાશાત્ કરંભાત્ । ધાનાસોમાન્મન્થિન ઇન્દ્ર શુક્રાત્
સ્વાહાકૃતમિન્દ્રાય તં જુહોમિ ॥ યસ્તે દ્રપ્સો મધુમાꣳ
ઇન્દ્રિયાવાન્થ્સ્વાહાકૃતઃ પુનરપ્યેતિ દેવાન્ । દિવઃ પૃથિવ્યાઃ
પર્યન્તરિક્ષાથ્સ્વાહાકૃતમિન્દ્રાય તં જુહોમિ ॥ અધ્વર્યુર્વા ઋત્વિજાં
પ્રથમો યુજ્યતે તેન સ્તોમો યોક્તવ્ય ઇત્યાહુર્વાગગ્રેગા અગ્ર એત્વૃજુગા
દેવેભ્યો યશો મયિ દધતી પ્રાણાન્પશુષુ પ્રજાં મયિ
૩૪ ચ યજમાને ચેત્યાહ વાચમેવ તદ્યજ્ઞમુખે યુનક્તિ વાસ્તુ વા
એતદ્યજ્ઞસ્ય ક્રિયતે યદ્ગ્રહાન્ગૃહીત્વા બહિષ્પવમાનꣳ સર્પન્તિ
પરાઞ્ચો હિ યન્તિ પરાચીભિઃ સ્તુવતે વૈષ્ણવ્યર્ચા પુનરેત્યોપ તિષ્ઠતે
યજ્ઞો વૈ વિષ્ણુર્યજ્ઞમેવાકર્વિષ્ણો ત્વં નો અન્તમઃ શર્મ યચ્છ
સહન્ત્ય । પ્ર તે ધારા મધુશ્ચુત ઉત્સં દુહ્રતે અક્ષિતમિત્યાહ
યદેવાસ્ય શયાનસ્યોપ શુષ્યતિ તદેવાસ્યૈતેનાપ્યાયયતિ ॥ ૩। ૧। ૧૦॥

પરિવાપાત્પ્રજાં મયિ દુહ્રતે ચતુર્દશ ચ ॥ ૩। ૧। ૧૦॥

૩૫ અગ્નિના રયિમશ્નવત્ પોષમેવ દિવે દિવે । યશસં વીરવત્તમમ્ ॥
ગોમા ঁঁ অગ્નેઽવિમા ঁঁ અશ્વી યજ્ઞો નૃવત્સખા સદમિદપ્રમૃષ્યઃ
। ઇડાવા ঁঁ એષો અસુર પ્રજાવાન્દીર્ઘો રયિઃ પૃથુબુધ્નઃ સભાવાન્
॥ આ પ્યાયસ્વ સં તે ॥ ઇહ ત્વષ્ટારમગ્રિયં વિશ્વરૂપમુપ હ્વયે ।
અસ્માકમસ્તુ કેવલઃ ॥ તન્નસ્તુરીપમધ પોષયિત્નુ દેવ ત્વષ્ટર્વિ
રરાણઃ સ્યસ્વ । યતો વીરઃ

૩૬ કર્મણ્યઃ સુદક્ષો યુક્તગ્રાવા જાયતે દેવકામઃ ॥ શિવસ્ત્વષ્ટરિહા
ગહિ વિભુઃ પોષ ઉત ત્મના । યજ્ઞે યજ્ઞે ન ઉદવ ॥ પિશંગરૂપઃ
સુભરો વયોધાઃ શ્રુષ્ટી વીરો જાયતે દેવકામઃ । પ્રજાં ત્વષ્ટા
વિષ્યતુ નાભિમસ્મે અથા દેવાનામપ્યેતુ પાથઃ ॥ પ્રણો દેવ્યા નો
દિવઃ ॥ પીપિવા ঁঁ સ ঁঁ સરસ્વતઃ સ્તનં યો વિશ્વદર્શતઃ ।
ધુક્ષીમહિ પ્રજામિષમ્ ॥

૩૭ યે તે સરસ્વ ઊર્મયો મધુમન્તો ઘૃતશ્ચુતઃ । તેષાં તે સુમ્નમીમહે
॥ યસ્ય વ્રતં પશવો યન્તિ સર્વે યસ્ય વ્રતમુપતિષ્ઠન્ત આપઃ
। યસ્ય વ્રતે પુષ્ટિપતિર્નિવિષ્ટસ્ત ঁঁ સરસ્વન્તમવસે હુવેમ ॥
દિવ્ય ঁঁ સુપર્ણં વયસં બૃહન્તમપાં ગર્ભં વૃષભમોષધીનામ્ ।
અભીપતો વૃષ્ટ્યા તર્પયન્તં ત ঁঁ સરસ્વન્તમવસે હુવેમ ॥ સિનીવાલિ
પૃથુષ્ટુકે યા દેવાનામસિ સ્વસા । જુષસ્વ હવ્ય

૩૮ માહુતં પ્રજાં દેવિ દિદિડ્ઢિ નઃ ॥ યા સુપાણિઃ સ્વઙ્ગુરિઃ સુષૂમા
બહુસૂવરી । તસ્યૈ વિશ્પત્નિયૈ હવિઃ સિનીવાલ્યૈ જુહોતન ॥ ઇન્દ્રં
વો વિશ્વતસ્પરીન્દ્રં નરઃ ॥ અસિતવર્ણા હરયઃ સુપર્ણા મિહો
વસાના દિવમુત્પતન્તિ । ત આવવૃત્રન્ત્સદનાનિ કૃત્વાદિત્પૃથિવી
ઘૃતૈર્વ્યુદ્યતે ॥ હિરણ્યકેશો રજસો વિસારેઽહિર્ધુનિર્વાત ઇવ
ધ્રજીમાન્ । શુચિભ્રાજા ઉષસો

૩૯ નવેદા યશસ્વતીરપસ્યુવો ન સત્યાઃ ॥ આ તે સુપર્ણા અમિનન્ત એવૈઃ

કૃષ્ણો નોનાવ વૃષભો યદીદમ્ । શિવાભિર્ન સ્મયમાનાભિરાગાત્પતન્તિ
મિહઃ સ્તનયન્ત્યભ્રા ॥ વાશ્રેવ વિદ્યુન્મિમાતિ વત્સં ન માતા
સિષક્તિ । યદેષાં વૃષ્ટિરસર્જિ ॥ પર્વતશ્ચિન્મહિ વૃદ્ધો બિભાય
દિવશ્ચિત્સાનુ રેજત સ્વને વઃ । યત્ક્રીડથ મરુત
૪૦ ઋષ્ટિમન્ત આપ ઇવ સધ્રિયઞ્ચો ધવધ્વે ॥ અભિ ક્રન્દ સ્તનય
ગર્ભમા ધા ઉદન્વતા પરિ દીયા રથેન । દૃતિꣳ સુ કર્ષ વિષિતં
ન્યઞ્ચꣳ સમા ભવન્તૂદ્વતા નિપાદાઃ ॥ ત્વં ત્યા ચિદચ્યુતાગ્ને પશુર્ન
યવસે । ધામાહ યત્તે અજર વના વૃશ્ચન્તિ શિક્વસઃ ॥ અગ્ને ભૂરીણિ
તવ જાતવેદો દેવ સ્વધાવોઽમૃતસ્ય ધામ । યાશ્ચ
૪૧ માયા માયિનાં વિશ્વમિન્વ ત્વે પૂર્વીઃ સંદધુઃ પૃષ્ટબન્ધો ॥
દિવો નો વૃષ્ટિં મરુતો રરીધ્વં પ્ર પિન્વત વૃષ્ણો અશ્વસ્ય
ધારાઃ । અર્વાઙેતેન સ્તનયિત્નુનેહ્યપો નિષિઞ્ચન્નસુરઃ પિતા નઃ ॥
પિન્વન્ત્યપો મરુતઃ સુદાનવઃ પયો ઘૃતવદ્વિદથેષ્વાભુવઃ
। અત્યં ન મિહે વિ નયન્તિ વાજિનમુત્સં દુહન્તિ સ્તનયન્તમક્ષિતમ્ ॥
ઉદપ્રુતો મરુતસ્તાꣳ ઇયર્ત વૃષ્ટિં
૪૨ યે વિશ્વે મરુતો જુનન્તિ । ક્રોશાતિ ગર્દા કન્યેવ તુન્ના
પેરું તુઞ્જાના પત્યેવ જાયા ॥ ઘૃતેન દ્યાવાપૃથિવી મધુના
સમુક્ષત પયસ્વતીઃ કૃણુતાપ ઓષધીઃ । ઊર્જં ચ તત્ર સુમતિં
ચ પિન્વથ યત્રા નરો મરુતઃ સિઞ્ચથા મધુ ॥ ઉદુ ત્યં ચિત્રમ્ ॥
ઔર્વભૃગુવચ્છુચિમપ્નવાનવદા હુવે । અગ્નિꣳ સમુદ્રવાસસમ્
॥ આ સવꣳ સવિતુર્યથા ભગસ્યેવ ભુજિꣳ હુવે । અગ્નિꣳ
સમુદ્રવાસસમ્ ॥ હુવે વાતસ્વનં કવિં પર્જન્યક્રન્દ્યꣳ સહઃ
। અગ્નિꣳ સમુદ્રવાસસમ્ ॥ ૩। ૧। ૧૧॥ વીર ઇષꣳહવ્યમુષસો
મરુતશ્ચ વૃષ્ટિં ભગસ્ય દ્વાદશ ચ ॥ ૩। ૧। ૧૧॥
પ્રજાપતિરકામયતૈષ તે ગાયત્રો યજ્ઞં વૈ પ્રજાપતેર્જાયમાનાઃ
પ્રાજાપત્યા યો વા અયથા દેવતમિષ્ટર્ગો નિગ્રાભ્યાસ્સ્થ યો વૈ દેવાઞ્જુષ્ટોઽગ્નિના

રયિમેકાદશ ॥

પ્રજાપતિરકામયત પ્રજાપતેર્જાયમાના વ્યાયચ્છંતે મહ્યમિમાન્માયા

માયિનાં દ્વિચત્વારિઁ શત્ ॥

પ્રજાપતિરકામયતાગ્નિઁ સમુદ્રવાસસમ્ ॥

## તૃતીયકાણ્ડે દ્વિતીયઃ પ્રશ્નઃ ૨

૧ યો વૈ પવમાનાનામન્વારોહાન્, વિદ્વાન્, યજતેઽનુ પવમાનાના રોહતિ ન
પવમાનેભ્યોઽવચ્છિદ્યતે શ્યેનોઽસિ ગાયત્ર છન્દા અનુ ત્વારભે
સ્વસ્તિ મા સં પારય સુપર્ણોઽસિ ત્રિષ્ટુપ્છન્દા અનુ ત્વારભે સ્વસ્તિ
મા સં પારય સઘાસિ જગતી છન્દા અનુ ત્વારભે સ્વસ્તિ મા સં
પારયેત્યાહૈતે

૨ વૈ પવમાનાનામન્વારોહાસ્તાન્, ય એવં વિદ્વાન્, યજતેઽનુ પવમાનાના
રોહતિ ન પવમાનેભ્યોઽવ ચ્છિદ્યતે યો વૈ પવમાનસ્ય સન્તતિં
વેદ સર્વમાયુરેતિ ન પુરાયુષઃ પ્ર મીયતે પશુમાન્ભવતિ વિન્દતે
પ્રજાં પવમાનસ્ય ગ્રહા ગૃહ્યન્તેઽથ વા અસ્યૈતેઽગૃહીતા દ્રોણકલશ
આધવનીયઃ પૂતભૃત્તાન્, યદગૃહીત્વોપાકુર્યાત્પવમાનં વિ

૩ ચ્છિન્દ્યાત્તં વિચ્છિદ્યમાનમધ્વર્યોઃ પ્રાણોઽનુ વિ
ચ્છિદ્યેતોપયામગૃહીતોઽસિ પ્રજાપતયે ત્વેતિ દ્રોણકલશમભિ
મૃશેદિન્દ્રાય ત્વેત્યાધવનીયં વિશ્વેભ્યસ્ત્વા દેવેભ્ય ઇતિ
પૂતભૃતં પવમાનમેવ તથ્સં તનોતિ સર્વમાયુરેતિ ન પુરાયુષઃ પ્ર
મીયતે પશુમાન્ભવતિ વિન્દતે પ્રજામ્ ॥ ૩। ૨। ૧॥ એતે દ્વિચત્વારિઁ શચ્ચ
॥ ૩। ૨। ૧॥

૪ ત્રીણિ વાવ સવનાન્યથ તૃતીયઁ સવનમવ
લુંપન્ત્યનઁ શુ કુર્વન્ત ઉપાઁ શુઁ હુત્વોપાઁ શુ
પાત્રેઽઁ શુમવાસ્ય તં તૃતીય સવનેઽપિસૃજ્યાભિ
ષુણુયાદ્યદાપ્યાયયતિ તેનાઁ શુમદ્યદભિષુણોતિ તેનર્જીષિ

સર્વાણ્યેવ તથ્સવનાન્યઁ શુમન્તિ શુક્રવન્તિ સમાવદ્વીર્યાણિ કરોતિ
દ્વૌ સમુદ્રૌ વિતતાવજૂર્યૌ પર્યાવર્તતે જઠરેવ પાદાઃ । તયોઃ
પશ્યન્તો અતિ યન્ત્યન્યમપશ્યન્તઃ
૫ સેતુનાતિ યન્ત્યન્યમ્ ॥ દ્વે દ્રધસી સતતી વસ્ત એકઃ કેશી વિશ્વા
ભુવનાનિ વિદ્વાન્ । તિરોધાયૈત્યસિતં વસાનઃ શુક્રમા દત્તે અનુહાય
જાર્યૈ ॥ દેવા વૈ યદ્યજ્ઞેઽકુર્વત તદસુરા અકુર્વત તે દેવા એતં
મહાયજ્ઞમપશ્યન્તમતન્વતાગ્નિહોત્રં વ્રતમકુર્વત તસ્માદ્દ્વિવ્રતઃ
સ્યાદ્દ્વિર્હ્યગ્નિહોત્રં જુહ્વતિ પૌર્ણમાસં યજ્ઞમગ્નીષોમીયં
૬ પશુમકુર્વત દાર્શ્યં યજ્ઞમાગ્નેયં પશુમકુર્વત વૈશ્વદેવં
પ્રાતઃ સવનમકુર્વત વરુણપ્રઘાસાન્માધ્યન્દિનઁ સવનઁ
સાકમેધાન્ પિતૃયજ્ઞં ત્ર્યંબકાગ્ સ્તૃતીયસવનમકુર્વત તમેષામસુરા
યજ્ઞમન્વવાજિગાઁ સન્તં નાન્વવાયન્તેઽબ્રુવન્નધ્વર્તવ્યા વા ઇમે દેવા
અભૂવન્નિતિ તદધ્વરસ્યાધ્વરત્વં તતો દેવા અભવન્પરાસુરા ય
એવં વિદ્વાન્થ્સોમેન યજતે ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો ભવતિ ॥
૩। ૨। ૨॥ અપશ્યંતોઽગ્નીષોમીયમાત્મના પરા ત્રીણિ ચ ॥ ૩। ૨। ૨॥
૭ પરિભૂરગ્નિં પરિભૂરિન્દ્રં પરિભૂર્વિશ્વાન્ દેવાન્પરિભૂર્માઁ
સહ બ્રહ્મવર્ચસેન સ નઃ પવસ્વ શં ગવે શં જનાય શમર્વતે
શઁ રાજન્નોષધીભ્યોઽચ્છિન્નસ્ય તે રયિપતે સુવીર્યસ્ય રાયસ્પોષસ્ય
દદિતારઃ સ્યામ । તસ્ય મે રાસ્વ તસ્ય તે ભક્ષીય તસ્ય ત ઇદમુન્મૃજે ॥
પ્રાણાય મે વર્ચોદા વર્ચસે પવસ્વાપાનાય વ્યાનાય વાચે
૮ દક્ષ ક્રતુભ્યાં ચક્ષુર્ભ્યાં મે વર્ચોદૌ વર્ચસે પવેથાગ્
શ્રોત્રાયાત્મનેઽઙ્ગેભ્ય આયુષે વીર્યાય વિષ્ણોરિન્દ્રસ્ય વિશ્વેષાં
દેવાનાં જઠરમસિ વર્ચોદા મે વર્ચસે પવસ્વ કોઽસિ કો નામ
કસ્મૈ ત્વા કાય ત્વા યં ત્વા સોમેનાતીતૃપં યં ત્વા સોમેનામીમદઁ
સુપ્રજાઃ પ્રજયા ભૂયાસઁ સુવીરો વીરૈઃ સુવર્ચા વર્ચસા સુપોષઃ
પોષૈર્વિશ્વેભ્યો મે રૂપેભ્યો વર્ચોદા

૯ વર્ચસે પવસ્વ તસ્ય મે રાસ્વ તસ્ય તે ભક્ષીય તસ્ય ત ઇદમુન્મૃજે ॥
બુભૂષન્નવેક્ષેતૈષ વૈ પાત્રિયઃ પ્રજાપતિર્યજ્ઞઃ પ્રજાપતિસ્તમેવ
તર્પયતિ સ એનં તૃપ્તો ભૂત્યાભિ પવતે બ્રહ્મવર્ચસકામોઽવેક્ષેતૈષ
વૈ પાત્રિયઃ પ્રજાપતિર્યજ્ઞઃ પ્રજાપતિસ્તમેવ તર્પયતિ સ એનં
તૃપ્તો બ્રહ્મવર્ચસેનાભિ પવત આમયાવ્ય
૧૦ વેક્ષેતૈષ વૈ પાત્રિયઃ પ્રજાપતિર્યજ્ઞઃ પ્રજાપતિસ્તમેવ
તર્પયતિ સ એનં તૃપ્ત આયુષાભિ પવતેઽભિચરન્નવેક્ષેતૈષ
વૈ પાત્રિયઃ પ્રજાપતિર્યજ્ઞઃ પ્રજાપતિસ્તમેવ તર્પયતિ સ એનં
તૃપ્તઃ પ્રાણાપાનાભ્યાં વાચો દક્ષક્રતુભ્યાં ચક્ષુર્ભ્યાગ્ં
શ્રોત્રાભ્યામાત્મનોઽઙ્ગેભ્ય આયુષોઽન્તરેતિ તાજક્ પ્ર ધન્વતિ ॥ ૩। ૨। ૩॥
વાચે રૂપેભ્યો વર્ચોદા આમયાવી પંચ ચત્વારિँ શચ્ચ ॥ ૩। ૨। ૩॥
૧૧ સ્ફ્યઃ સ્વસ્તિર્વિઘનઃ સ્વસ્તિઃ પર્શુર્વેદિઃ પરશુર્નઃ સ્વસ્તિઃ ।
યજ્ઞિયા યજ્ઞકૃતઃ સ્થ તે માસ્મિન્, યજ્ઞ ઉપ હ્વયધ્વમુપ મા
દ્યાવાપૃથિવી હ્વયેતામુપાસ્તાવઃ કલશઃ સોમો અગ્નિરુપ દેવા ઉપ
યજ્ઞ ઉપ મા હોત્રા ઉપહવે હ્વયન્તાં નમોઽગ્રયે મખઘ્ને મખસ્ય
મા યશોઽર્યાદિત્યાહવનીયમુપ તિષ્ઠતે યજ્ઞો વૈ મખો
૧૨ યજ્ઞં વાવ સ તદહન્તસ્મા એવ નમસ્કૃત્ય સદઃ પ્ર
સર્પત્યાત્મનોઽનાર્ત્યૈ નમો રુદ્રાય મખઘ્ને નમસ્કૃત્યા મા
પાહીત્યાગ્નીધ્રં તસ્મા એવ નમસ્કૃત્ય સદઃ પ્ર સર્પત્યાત્મનોઽનાર્ત્યૈ
નમ ઇન્દ્રાય મખઘ્ન ઇંદ્રિયં મે વીર્યં મા નિર્વધીરિતિ
હોત્રીયમાશિષમેવૈતામા શાસ્ત ઇન્દ્રિયસ્ય વીર્યસ્યાનિર્ઘાતાય યા વૈ
૧૩ દેવતાઃ સદસ્યાર્તિમાર્પયન્તિ યસ્તા વિદ્વાન્પ્રસર્પતિ ન
સદસ્યાર્તિમાર્ચ્છતિ નમોઽગ્રયે મખઘ્ન ઇત્યાહૈતા વૈ દેવતાઃ
સદસ્યાર્તિમાર્પયન્તિ તા ય એવં વિદ્વાન્પ્રસર્પતિ ન સદસ્યાર્તિમાર્છતિ
દૃઢે સ્થઃ શિથિરે સમીચી માँ હસસ્પાત ँ સૂર્યો મા દેવો
દિવ્યાદँ હસસ્પાતુ વાયુરન્તરિક્ષા

૧૪ ऽદગ્નિઃ પૃથિવ્યા યમઃ પિતૃભ્યઃ  સરસ્વતી મનુષ્યેભ્યો
 દેવી  દ્વારૌ  મા મા  સંતાપ્તં  નમઃ  સદસે  નમઃ  સદસસ્પતયે
 નમઃ  સખીનાં પુરોગાણાં  ચક્ષુષે  નમો  દિવે નમઃ  પૃથિવ્યા અહે
 દૈધિષવ્યોદતસ્તિષ્ઠાન્યસ્ય  સદને સીદ  યોऽસ્મત્પાકતર  ઉન્નિવત
 ઉદુદ્વતશ્ચ ગેષં પાતં મા  દ્યાવાપૃથિવી અદ્યાહ્નઃ  સદો  વૈ પ્રસર્પન્તં
૧૫ પિતરોऽનુ  પ્ર સર્પન્તિ  ત એનમીશ્વરા હિઁ સિતોઃ  સદઃ  પ્રસૃપ્ય
 દક્ષિણાર્ધં પરેક્ષેતાગન્ત પિતરઃ પિતૃમાનહં યુષ્માભિર્ભૂયાસઁ
 સુપ્રજસો  મયા  યૂયં ભૂયાસ્તેતિ  તેભ્ય  એવ નમસ્કૃત્ય  સદઃ
 પ્ર સર્પત્યાત્મનોऽનાર્ત્યૈ ॥ ૩। ૨। ૪॥ મખો વા અંતરિક્ષાત્પ્રસર્પંતં
 ત્રયસ્ત્રિઁ શચ્ચ ॥ ૩। ૨। ૪॥
૧૬ ભક્ષેહિ  મા વિશ દીર્ઘાયુત્વાય  શન્તનુત્વાય  રાયસ્પોષાય
 વર્ચસે સુપ્રજાસ્ત્વાયેહિ  વસો પુરોવસો પ્રિયો મે  હૃદોऽસ્યશ્વિનોસ્ત્વા
 બાહુભ્યાઁ સઘ્યાસં નૃચક્ષસં ત્વા દેવ સોમ સુચક્ષા  અવ  ખ્યેષં
 મન્દ્રાભિભૂતિઃ કેતુર્યજ્ઞાનાં  વાગ્જુષાણા સોમસ્ય તૃપ્યતુ મન્દ્રા
 સ્વર્વાચ્યદિતિરનાહતશીર્ષ્ણી  વાગ્જુષાણા સોમસ્ય તૃપ્યત્વેહિ
 વિશ્વચર્ષણે
૧૭ શં  ભૂર્મયોભૂઃ સ્વસ્તિ મા  હરિવર્ણ  પ્ર ચર  ક્રત્વે  દક્ષાય
 રાયસ્પોષાય સુવીરતાયૈ  મા મા  રાજન્વિ બીભિષો  મા મે  હાર્દિત્વિષા વધીઃ
 । વૃષણે  શુષ્માયાયુષે  વર્ચસે ॥ વસુમદ્ગણસ્ય સોમ દેવ તે મતિવિદઃ
 પ્રાતઃ સવનસ્ય  ગાયત્ર છંદસ  ઇન્દ્રપીતસ્ય  નરાશઁ સપીતસ્ય
 પિતૃપીતસ્ય  મધુમત  ઉપહૂતસ્યોપહૂતો ભક્ષયામિ રુદ્રવદ્ગણસ્ય સોમ
 દેવ તે મતિવિદો  માધ્યન્દિનસ્ય  સવનસ્ય ત્રિષ્ટુપ્છંદસ  ઇન્દ્રપીતસ્ય
 નરાશઁ સપીતસ્ય
૧૮ પિતૃપીતસ્ય  મધુમત  ઉપહૂતસ્યોપહૂતો ભક્ષયામ્યાદિત્યવદ્ગણસ્ય
 સોમ દેવ તે મતિવિદસ્તૃતીયસ્ય  સવનસ્ય  જગતી છંદસ  ઇન્દ્રપીતસ્ય
 નરાશઁ સપીતસ્ય પિતૃપીતસ્ય  મધુમત  ઉપહૂતસ્યોપહૂતો ભક્ષયામિ ॥
 આ પ્યાયસ્વ  સમેતુ તે વિશ્વતઃ  સોમ  વૃષ્ણિયમ્ । ભવા  વાજસ્ય સઙ્ગથે ॥

હિન્વ મે ગાત્રા હરિવો ગણાન્મે મા વિ તીતૃષઃ । શિવો મે સપ્તર્ષીનુપ
તિષ્ઠસ્વ મા મેવાઙ્નાભિમતિ
૧૯ ગાઃ ॥ અપામ સોમમમૃતા અભૂમાદર્શ્મ જ્યોતિરવિદામ દેવાન્
। કિમસ્માન્કૃણવદરાતિઃ કિમુ ધૂર્તિરમૃત મર્ત્યસ્ય ॥
યન્મ આત્મનો મિન્દાભૂદગ્નિસ્તત્પુનરાહાર્જાતવેદા વિચર્ષણિઃ ।
પુનરગ્નિશ્ચક્ષુરદાત્પુનરિન્દ્રો બૃહસ્પતિઃ । પુનર્મે અશ્વિના યુવં
ચક્ષુરા ધત્તમક્ષ્યોઃ ॥ ઇષ્ટયજુષસ્તે દેવ સોમ સ્તુતસ્તોમસ્ય
૨૦ શસ્તોક્થસ્ય હરિવત ઇન્દ્રપીતસ્ય મધુમત ઉપહૂતસ્યોપહૂતો
ભક્ષયામિ ॥ આપૂર્યાઃ સ્થા મા પૂરયત પ્રજયા ચ ધનેન ચ ॥ એતત્તે તત
યે ચ ત્વામન્વેતત્તે પિતામહ પ્રપિતામહ યે ચ ત્વામન્વત્ર પિતરો યથાભાગં
મન્દધ્વં નમો વઃ પિતરો રસાય નમો વઃ પિતરઃ શુષ્માય નમો વઃ
પિતરો જીવાય નમો વઃ પિતરઃ
૨૧ સ્વધાયૈ નમો વઃ પિતરો મન્યવે નમો વઃ પિતરો ઘોરાય પિતરો નમો
વો ય એતસ્મિઁલ્લોકે સ્થ યુષ્માઁસ્તેઽનુ યેઽસ્મિઁલ્લોકે માં તેઽનુ ય
એતસ્મિઁલ્લોકે સ્થ યૂયં તેષાં વસિષ્ઠા ભૂયાસ્ત યેઽસ્મિઁલ્લોકેઽહં
તેષાં વસિષ્ઠો ભૂયાસં પ્રજાપતે ન ત્વદેતાન્યન્યો વિશ્વા જાતાનિ પરિ
તા બભૂવ ।
૨૨ યત્કામાસ્તે જુહુમસ્તન્નો અસ્તુ વયઁ સ્યામ પતયો રયીણામ્ ॥
દેવકૃતસ્યૈનસોઽવયજનમસિ મનુષ્યકૃતસ્યૈનસોઽવયજનમસિ
પિતૃકૃતસ્યૈનસોઽવયજનમસ્યપ્સુ ધૌતસ્ય સોમ દેવ તે નૃભિઃ
સુતસ્યેષ્ટયજુષઃ સ્તુતસ્તોમસ્ય શસ્તોક્થસ્ય યો ભક્ષો અશ્વસનિર્યો
ગોસનિસ્તસ્ય તે પિતૃભિર્ભક્ષં કૃતસ્યોપહૂતસ્યોપહૂતો
ભક્ષયામિ ॥ ૩। ૨। ૫॥ વિશ્વચર્ષણે ત્રિષ્ટુપ્છંદસ ઇંદ્રપીતસ્ય
નરાશઁસપીતસ્યાતિ સ્તુતસ્તોમસ્ય જીવાય નમો વઃ પિતરો બભૂવ
ચતુશ્ચત્વારિઁશચ્ચ ॥ ૩। ૨। ૫॥
૨૩ મહીનાં પયોઽસિ વિશ્વેષાં દેવાનાં તનૂરૃધ્યાસમદ્ય પૃષતીનાં

ગ્રહં પૃષતીનાં ગ્રહોઽસિ વિષ્ણોર્હૃદયમસ્યેકમિષ વિષ્ણુસ્ત્વાનુ
વિ ચક્રમે ભૂતિર્દધ્ના ઘૃતેન વર્ધતાં તસ્ય મેષ્ટસ્ય વીતસ્ય
દ્રવિણમા ગમ્યાજ્જ્યોતિરસિ વૈશ્વાનરં પૃશ્નિયૈ દુગ્ધં યાવતી
દ્યાવાપૃથિવી મહિત્વા યાવચ્ચ સપ્ત સિન્ધવો વિતસ્થુઃ । તાવન્તમિન્દ્ર તે
૨૪ ગ્રહꣳ સહોર્જા ગૃહ્ણામ્યસ્તૃતમ્ ॥ યત્કૃષ્ણશકુનઃ
પૃષદાજ્યમવમૃશેચ્છૂદ્રા અસ્ય પ્રમાયુકાઃ સ્યુર્યચ્છ્વાવ
મૃશેચ્ચતુષ્પાદોઽસ્ય પશવઃ પ્રમાયુકાઃ સ્યુર્યત્ સ્કન્દેદ્યજમાનઃ
પ્રમાયુકઃ સ્યાત્પશવો વૈ પૃષદાજ્યં પશવો વા એતસ્ય સ્કન્દન્તિ યસ્ય
પૃષદાજ્યꣳ સ્કન્દતિ યત્પૃષદાજ્યં પુનર્ગૃહ્ણાતિ પશૂનેવાસ્મૈ
પુનર્ગૃહ્ણાતિ પ્રાણો વૈ પૃષદાજ્યં પ્રાણો વા
૨૫ એતસ્ય સ્કન્દતિ યસ્ય પૃષદાજ્યꣳ સ્કન્દતિ યત્પૃષદાજ્યં
પુનર્ગૃહ્ણાતિ પ્રાણમેવાસ્મૈ પુનર્ગૃહ્ણાતિ હિરણ્યમવધાય
ગૃહ્ણાત્યમૃતં વૈ હિરણ્યં પ્રાણઃ પૃષદાજ્યમમૃતમેવાસ્ય પ્રાણે
દધાતિ શતમાનં ભવતિ શતાયુઃ પુરુષઃ શતેંદ્રિય આયુષ્યેવેન્દ્રિયે
પ્રતિ તિષ્ઠત્યશ્વમવ ઘ્રાપયતિ પ્રાજાપત્યો વા અશ્વઃ પ્રાજાપત્યઃ પ્રાણઃ
સ્વાદેવાસ્મૈ યોનેઃ પ્રાણં નિર્મિમીતે વિ વા એતસ્ય યજ્ઞશ્છિદ્યતે
યસ્ય પૃષદાજ્યꣳ સ્કન્દતિ વૈષ્ણવ્યર્ચા પુનર્ગૃહ્ણાતિ યજ્ઞો વૈ
વિષ્ણુર્યજ્ઞેનૈવ યજ્ઞꣳ સં તનોતિ ॥ ૩। ૨। ૬॥ તે પૃષદાજ્યં
પ્રાણો વૈ યોનેઃ પ્રાણં દ્વાવિꣳશતિશ્ચ ॥ ૩। ૨। ૬॥
૨૬ દેવ સવિતરેતત્તે પ્રાહ તત્પ્ર ચ સુવ પ્ર ચ યજ
બૃહસ્પતિર્બ્રહ્માયુષ્મત્યા ઋચો મા ગાત તનૂપાત્સામ્નઃ સત્યા વ
આશિષઃ સન્તુ સત્યા આકૂતય ઋતં ચ સત્યં ચ વદત સ્તુત દેવસ્ય
સવિતુઃ પ્રસવે સ્તુતસ્ય સ્તુતમસ્યૂર્જં મહ્યગ્ગ્ સ્તુતં દુહામા મા
સ્તુતસ્ય સ્તુતં ગમ્યાચ્છસ્ત્રસ્ય શસ્ત્ર
૨૭ મસ્યૂર્જં મહ્યꣳ શસ્ત્રં દુહામા મા શસ્ત્રસ્ય શસ્ત્રં
ગમ્યાદિન્દ્રિયાવન્તો વનામહે ધુક્ષીમહિ પ્રજામિષમ્ ॥ સા મે
સત્યાશીર્દેવેષુ ભૂયાદ્બ્રહ્મ વર્ચસં માગમ્યાત્ ॥ યજ્ઞો બભૂવ સ આ

બભૂવ સ પ્ર જજ્ઞે સ વાવૃધે । સ દેવાનામધિપતિર્બભૂવ સો અસ્મા ँ
અધિપતીન્કરોતુ વયર ँ સ્યામ પતયો રયીણામ્ ॥ યજ્ઞો વા વૈ
૨૮ યજ્ઞપતિં દુહે યજ્ઞપતિર્વા યજ્ઞં દુહે સ યઃ
સ્તુતશસ્ત્રયોર્દોહમવિદ્વાન્ યજતે તં યજ્ઞો દુહે સ ઇષ્ટ્વા
પાપીયાન્ભવતિ ય એનયોર્દોહં વિદ્વાન્ યજતે સ યજ્ઞં દુહે સ ઇષ્ટ્વા
વસીયાન્ભવતિ સ્તુતસ્ય સ્તુતમસ્યૂર્જં મહ્યગ્ગ્ સ્તુતં દુહામા મા સ્તુતસ્ય
સ્તુતં ગમ્યાચ્છસ્ત્રસ્ય શસ્ત્રમસ્યૂર્જં મહ્ય ँશસ્ત્રં દુહામા
મા શસ્ત્રસ્ય શસ્ત્રં ગમ્યાદિત્યાહૈષ વૈ સ્તુતશસ્ત્રયોર્દોહસ્તં
ય એવં વિદ્વાન્ યજતે દુહ એવ યજ્ઞમિષ્ટ્વા વસીયાન્ભવતિ ॥ ૩। ૨। ૭॥
શસ્ત્રં વૈ શસ્ત્રં દુહાં દ્વાવિ ँશતિશ્ચ ॥ ૩। ૨। ૭॥
૨૯ શ્યેનાય પત્વને સ્વાહા વટ્થ્સ્વયમભિગૂર્તાય નમો
વિષ્ટંભાય ધર્મણે સ્વાહા વટ્થ્સ્વયમભિગૂર્તાય નમઃ
પરિધયે જનપ્રથનાય સ્વાહા વટ્થ્સ્વયમભિગૂર્તાય નમ
ઊર્જે હોત્રાણાગ્ સ્વાહા વટ્થ્સ્વયમભિગૂર્તાય નમઃ પયસે
હોત્રાણાગ્ સ્વાહા વટ્થ્સ્વયમભિગૂર્તાય નમઃ પ્રજાપતયે મનવે
સ્વાહા વટ્થ્સ્વયમભિગૂર્તાય નમ ઋતમૃતપાઃ સુવર્વાટ્ થ્સ્વાહા
વટ્થ્સ્વયમભિગૂર્તાય નમસ્તૃંપન્તા ँ હોત્રા મધોર્ઘૃતસ્ય
યજ્ઞપતિમૃષય એનસા
૩૦ ઽહુઃ । પ્રજા નિર્ભક્તા અનુતપ્યમાના મધવ્યૌ સ્તોકાવપ તૌ રરાધ
। સં નસ્તાભ્યા ँસૃજતુ વિશ્વકર્મા ઘોરા ઋષયો નમો અસ્ત્વેભ્યઃ ।
ચક્ષુષ એષાં મનસશ્ચ સન્ધૌ બૃહસ્પતયે મહિ ષદ્દ્યુમન્નમઃ ।
નમો વિશ્વકર્મણે સ ઉ પાત્વસ્માનનન્યાન્થ્સોમપાન્ મન્યમાનઃ । પ્રાણસ્ય
વિદ્વાન્થ્સમરે ન ધીર એનશ્ચકૃવાન્મહિ બદ્ધ એષામ્ ॥ તં વિશ્વકર્મન્
૩૧ પ્ર મુઞ્ચા સ્વસ્તયે યે ભક્ષયન્તો ન વસૂન્યાનૃહુઃ ।
યાનગ્નયોઽન્વતપ્યન્ત ધિષ્ણિયા ઇયં તેષામવયા દુરિષ્ટ્યૈ સ્વિષ્ટિં
નસ્તાં કૃણોતુ વિશ્વકર્મા ॥ નમઃ પિતૃભ્યો અભિ યે નો અખ્યન્,
યજ્ઞકૃતો યજ્ઞકામાઃ સુદેવા અકામા વો દક્ષિણાં ન નીનિમ મા

નસ્તસ્માદેનસઃ પાપયિષ્ટ । યાવન્તો વૈ સદસ્યાસ્તે સર્વેદક્ષિણ્યાસ્તેભ્યો યો દક્ષિણાં ન

૩૨ નયેદૈભ્યો વૃશ્ચેત યદ્વૈશ્વકર્મણાનિ જુહોતિ સદસ્યાનેવ તત્પ્રીણાત્યસ્મે દેવાસો વપુષે ચિકિત્સત યમાશિરા દંપતી વામમશ્નુતઃ । પુમાન્પુત્રો જાયતે વિન્દતે વસ્વથ વિશ્વે અરપા એધતે ગૃહઃ ॥ આશીર્દાયા દંપતી વામમશ્નુતામરિષ્ટો રાયઃ સચતા ँ સમોકસા । ય આસિચત્સંદુગ્ધં કુંભ્યા સહેષ્ટેન યામન્નમતિં જહાતુ સઃ ॥ સર્પિર્ગ્રીવી

૩૩ પીવર્યસ્ય જાયા પીવાનઃ પુત્રા અકૃશાસો અસ્ય । સહજાનિર્યઃ સુમખસ્યમાન ઇન્દ્રાયાશિર ँસહ કુંભ્યાદાત્ ॥ આશીર્મ ઊર્જમુત સુપ્રજાસ્ત્વમિષં દધાતુ દ્રવિણ ँ સવર્ચસમ્ । સઞ્જયન્ ક્ષેત્રાણિ સહસાહમિન્દ્ર કૃણ્વાનો અન્યા ँ અધરાન્થ્સપત્નાન્ ॥ ભૂતમસિ ભૂતે મા ધા મુખમસિ મુખં ભૂયાસં દ્યાવાપૃથિવીભ્યાં ત્વા પરિ ગૃહ્ણામિ વિશ્વે ત્વા દેવા વૈશ્વાનરાઃ

૩૪ પ્ર ચ્યાવયન્તુ દિવિ દેવાન્ દૃँહાન્તરિક્ષે વયાँસિ પૃથિવ્યાં પાર્થિવાન્ધ્રુવં ધ્રુવેણ હવિષાવ સોમં નયામસિ । યથા નઃ સર્વમિજ્જગદયક્ષ્મ ँ સુમના અસત્ ॥ યથા ન ઇન્દ્ર ઇદ્વિશઃ કેવલીઃ સર્વાઃ સમનસઃ કરત્ । યથા નઃ સર્વા ઇદ્દિશોઽસ્માકં કેવલીરસન્ ॥ ૩। ૨। ૮॥ એનસા વિશ્વકર્મન્ યો દક્ષિણાં ન સર્પિર્ગ્રીવી વૈશ્વાનરાશ્ચત્વારિ ँ શચ્ચ ॥ ૩। ૨। ૮॥

૩૫ યદ્વૈ હોતાધ્વર્યુમભ્યાહ્વયતે વજ્રમેનમભિ પ્ર વર્તયત્યુક્થશા ઇત્યાહ પ્રાતઃસવનં પ્રતિગીર્ય ત્રીણ્યેતાન્યક્ષરાણિ ત્રિપદા ગાયત્રી ગાયત્રં પ્રાતઃસવનં ગાયત્રિયૈવ પ્રાતઃસવને વજ્રમન્તર્ધત્ત ઉક્થં વાચીત્યાહ માધ્યન્દિન ँ સવનં પ્રતિગીર્ય ચત્વાર્યેતાન્યક્ષરાણિ ચતુષ્પદા ત્રિષ્ટુપ્ત્રૈષ્ટુભં માધ્યન્દિન ँ સવનં ત્રિષ્ટુભૈવ માધ્યન્દિને સવને વજ્રમન્તર્ધત્ત

૩૬ ઉક્થં વાચીન્દ્રાયેત્યાહ તૃતીયસવનં પ્રતિગીર્ય સપ્તૈતાન્યક્ષરાણિ
સપ્તપદા શક્વરી શાક્વરો વજ્રો વજ્રેણૈવ તૃતીયસવને
વજ્રમન્તર્ધત્તે બ્રહ્મવાદિનો વદન્તિ સ ત્વા અધ્વર્યુઃ સ્યાદ્યો યથાસવનં
પ્રતિગરે છન્દાꣳસિ સંપાદયેત્તેજઃ પ્રાતઃસવન આત્મન્ દધીતેંદ્રિયં
માધ્યન્દિને સવને પશૂગ્સ્તૃતીયસવન ઇત્યુક્થશા ઇત્યાહ પ્રાતઃસવનં
પ્રતિગીર્ય ત્રીણ્યેતાન્યક્ષરાણિ
૩૭ ત્રિપદા ગાયત્રી ગાયત્રં પ્રાતઃસવનં પ્રાતઃસવન એવ પ્રતિગરે
છન્દાꣳસિ સં પાદયત્યથો તેજો વૈ ગાયત્રી તેજઃ પ્રાતઃસવનં તેજ
એવ પ્રાતઃસવન આત્મન્ધત્ત ઉક્થં વાચીત્યાહ માધ્યન્દિનꣳ સવનં
પ્રતિગીર્ય ચત્વાર્યેતાન્યક્ષરાણિ ચતુષ્પદા ત્રિષ્ટુપ્ત્રૈષ્ટુભં
માધ્યન્દિનꣳ સવનં માધ્યન્દિન એવ સવને પ્રતિગરે છન્દાꣳસિ
સં પાદયત્યથો ઇંદ્રિયં વૈ ત્રિષ્ટુગિંદ્રિયં માધ્યન્દિનꣳ સવન
૩૮ મિન્દ્રિયમેવ માધ્યન્દિને સવન આત્મન્ધત્ત ઉક્થં વાચીન્દ્રાયેત્યાહ
તૃતીયસવનં પ્રતિગીર્ય સપ્તૈતાન્યક્ષરાણિ સપ્તપદા શક્વરી
શાક્વરાઃ પશવો જાગતં તૃતીયસવનં તૃતીયસવન એવ પ્રતિગરે
છન્દાꣳસિ સં પાદયત્યથો પશવો વૈ જગતી પશવસ્તૃતીયસવનં
પશૂનેવ તૃતીયસવન આત્મન્ધત્તે યદ્વૈ હોતાધ્વર્યુમભ્યાહ્વયત
આવ્યમસ્મિન્દધાતિ તદ્યન્ના
૩૯ ऽપહનીત પુરાસ્ય સંવથ્સરાદ્ગૃહ આ વેવીરઙ્છોꣳ સા મોદ
ઇવેતિ પ્રત્યાહ્વયતે તેનૈવ તદપ હતે યથા વા આયતાં પ્રતીક્ષત
એવમધ્વર્યુઃ પ્રતિગરં પ્રતીક્ષતે યદભિપ્રતિગૃણીયાદ્યથાયતયા
સમૃચ્છતે તાદૃગેવ તદ્યદર્ધર્ચાલ્લુપ્યેત યથા ધાવદ્ભ્યો
હીયતે તાદૃગેવ તત્પ્રબાહુગ્વા ઋત્વિજામુદ્ગીથા ઉદ્ગીથ એવોદ્ગાતૃણા
૪૦ મૃચઃ પ્રણવ ઉક્થશꣳસિનાં પ્રતિગરોऽધ્વર્યૂણાં ય એવં
વિદ્વાન્પ્રતિગૃણાત્યન્નાદ એવ ભવત્યાસ્ય પ્રજાયાં વાજી જાયત ઇયં
વૈ હોતાસાવધ્વર્યુર્યદાસીનઃ શꣳસત્યસ્યા એવ તદ્ધોતા નૈત્યાસ્ત
ઇવ હીયમથો ઇમામેવ તેન યજમાનો દુહે યત્તિષ્ઠન્ પ્રતિગૃણાત્યમુષ્યા

એવ તદધ્વર્યુર્નૈતિ

૪૧ તિષ્ઠતીવ હ્યસાવથો અમૂમેવ તેન યજમાનો દુહે યદાસીનઃ
શઁસતિ તસ્માદિતઃ પ્રદાનં દેવા ઉપ જીવન્તિ યત્તિષ્ઠન્પ્રતિગૃણાતિ
તસ્માદમુતઃ પ્રદાનં મનુષ્યા ઉપ જીવન્તિ યત્પ્રાઙાસીનઃ શઁસતિ
પ્રત્યઙ્તિષ્ઠન્પ્રતિગૃણાતિ તસ્માત્પ્રાચીનઁ રેતો ધીયતે પ્રતીચીઃ
પ્રજા જાયન્તે યદ્વૈ હોતાધ્વર્યુમભ્યાહ્વયતે વજ્રમેનમભિ પ્ર
વર્તયતિ પરાઙા વર્તતે વજ્રમેવ તન્નિ કરોતિ ॥ ૩। ૨। ૯॥ સવને
વજ્રમંતર્ધત્તે ત્રીણ્યૈતાન્યક્ષરાણીંદ્રિયં માધ્યંદિનઁ સવનં
નોદ્ગાતૃણામધ્વર્યુર્નૈતિ વર્તયત્યષ્ટૌ ચ ॥ ૩। ૨। ૯॥

૪૨ ઉપયામગૃહીતોઽસિ વાક્ષસદસિ વાક્પાભ્યાં ત્વા ક્રતુપાભ્યામસ્ય
યજ્ઞસ્ય ધ્રુવસ્યાધ્યક્ષાભ્યાં ગૃહ્ણામ્યુપયામગૃહીતોઽસ્યૃતસદસિ
ચક્ષુષ્પાભ્યાં ત્વા ક્રતુપાભ્યામસ્ય યજ્ઞસ્ય ધ્રુવસ્યાધ્યક્ષાભ્યાં
ગૃહ્ણામ્યુપયામગૃહીતોઽસિ શ્રુતસદસિ શ્રોત્રપાભ્યાં ત્વા ક્રતુપાભ્યામસ્ય
યજ્ઞસ્ય ધ્રુવસ્યાધ્યક્ષાભ્યાં ગૃહ્ણામિ દેવેભ્યસ્ત્વા વિશ્વદેવેભ્યસ્ત્વા
વિશ્વેભ્યસ્ત્વા દેવેભ્યો વિષ્ણવુરુક્રમૈષ તે સોમસ્તઁ રક્ષસ્વ

૪૩ તં તે દુશ્ચક્ષા મા વ ખ્યન્મયિ વસુઃ પુરોવસુર્વાક્પા વાચં મે પાહિ
મયિ વસુર્વિદદ્વસુશ્ચક્ષુષ્પાશ્ચક્ષુર્મે પાહિ મયિ વસુઃ સંયદ્વસુઃ
શ્રોત્રપાઃ શ્રોત્રમ્ મે પાહિ ભૂરસિ શ્રેષ્ઠો રશ્મીનાં પ્રાણપાઃ પ્રાણં મે
પાહિ ધૂરસિ શ્રેષ્ઠો રશ્મીનામપાનપા અપાનં મે પાહિ યો ન ઇન્દ્રવાયૂ
મિત્રાવરુણાવશ્વિનાવભિદાસતિ ભ્રાતૃવ્ય ઉત્પિપીતે શુભસ્પતી ઇદમહં
તમધરં પાદયામિ યથેન્દ્રાહમુત્તમશ્ચેતયાનિ ॥ ૩। ૨। ૧૦॥ રક્ષસ્વ
ભ્રાતૃવ્યસ્ત્રયોદશ ચ ॥ ૩। ૨। ૧૦॥

૪૪ પ્ર સો અગ્ને તવોતિભિઃ સુવીરાભિસ્તરતિ વાજકર્મભિઃ । યસ્ય ત્વઁ
સખ્યમાવિથ ॥ પ્ર હોત્રે પૂર્વ્યં વચોઽગ્નયે ભરતા બૃહત્ । વિપાં
જ્યોતીઁષિ બિભ્રતે ન વેધસે ॥ અગ્ને ત્રીતે વાજિના ત્રીષધસ્થા
તિસ્રસ્તે જિહ્વા ઋતજાત પૂર્વીઃ । તિસ્ર ઉ તે તનુવો દેવવાતાસ્તાભિર્નઃ
પાહિ ગિરો અપ્રયુચ્છન્ ॥ સં વાં કર્મણા સમિષા

૪૫ હિનોમીન્દ્રાવિષ્ણૂ અપસસ્પારે અસ્ય । જુષેથાં યજ્ઞં દ્રવિણં
ચ ધત્તમરિષ્ટૈર્નઃ પથિભિઃ પારયન્તા ॥ ઉભા જિગ્યથુર્ન પરા
જયેથે ન પરા જિગ્યે કતરશ્ચનૈનોઃ । ઇન્દ્રશ્ચ વિષ્ણો યદપસ્પૃધેથાં
ત્રેધા સહસ્રં વિ તદૈરયેથામ્ ॥ ત્રીણ્યાયૂઁષિ તવ જાતવેદસ્તિસ્ર
આજાનીરુષસસ્તે અગ્ને । તાભિર્દેવાનામવો યક્ષિ વિદ્વાનથા
૪૬ ભવ યજમાનાય શં યોઃ ॥ અગ્નિસ્ત્રીણિ ત્રિધાતૂન્યા ક્ષેતિ વિદથા કવિઃ
। સ ત્રીઁ રેકાદશાઁ ઇહ । યક્ષચ્ચ પિપ્રયચ્ચ નો વિપ્રો દૂતઃ
પરિષ્કૃતઃ । નભન્તામન્યકે સમે ॥ ઇન્દ્રાવિષ્ણૂ દૃઁ હિતાઃ શંબરસ્ય
નવ પુરો નવતિં ચ શ્નથિષ્ટમ્ । શતં વર્ચિનઃ સહસ્રં ચ સાકઁ
હથો અપ્રત્યસુરસ્ય વીરાન્ ॥ ઉત માતા મહિષમન્વવેનદમી ત્વા
જહતિ પુત્ર દેવાઃ । અથાબ્રવીદ્ વૃત્રમિન્દ્રો હનિષ્યન્થ્સખે વિષ્ણો વિતરં
વિ ક્રમસ્વ ॥ ૩। ૨। ૧૧॥ ઇષાથ ત્વા ત્રયોદશ ચ ॥ ૩। ૨। ૧૧॥

યો વૈ પવમાનાનાં ત્રીણિ પરિભૂસ્ફ્યસ્વસ્તિર્ભક્ષેહિ મહીનાં પયોસિ દેવ
સવિતરેતત્તે શ્યેનાય યદ્વૈ હોતોપયામગૃહીતોઽસિ વાક્ષસદસિ પ્ર સો
અગ્ન એકાદશ ॥

યોવૈ સ્ફ્યસ્વસ્તિ સ્વધાયૈ નમઃ પ્રમુંચ તિષ્ઠતી વષટ્ચત્વારિઁ શત્ ॥

યોવૈ પવમાનાનાં વિ ક્રમસ્વ ॥

## તૃતીયકાણ્ડે તૃતીયઃ પ્રશ્નઃ ૩

૧ અગ્ને તેજસ્વિન્તેજસ્વી ત્વં દેવેષુ ભૂયાસ્તેજસ્વન્તં મામાયુષ્મન્તં
વર્ચસ્વન્તં મનુષ્યેષુ કુરુ દીક્ષાયૈ ચ ત્વા તપસશ્ચ તેજસે
જુહોમિ તેજોવિદસિ તેજો મા મા હાસીન્માહં તેજો હાસિષં મા માં તેજો
હાસીદિન્દ્રૌજસ્વિન્નોજસ્વી ત્વં દેવેષુ ભૂયા ઓજસ્વન્તં મામાયુષ્મન્તં
વર્ચસ્વન્તં મનુષ્યેષુ કુરુ બ્રહ્મણશ્ચ ત્વા ક્ષત્રસ્ય ચૌ
૨ જસે જુહોમ્યોજોવિદસ્યોજો મા મા હાસીન્માહમોજો હાસિષં મા મામોજો
હાસીથ્સૂર્ય ભ્રાજસ્વિન્ભ્રાજસ્વી ત્વં દેવેષુ ભૂયા ભ્રાજસ્વન્તં

મામાયુષ્મન્તં વર્ચસ્વન્તં મનુષ્યેષુ કુરુ વાયોશ્ચ ત્વાપાં ચ ભ્રાજસે
જુહોમિ સુવર્વિદસિ સુવર્મા મા હાસીન્માહꣳ સુવર્હાસિષં મા માꣳ
સુવર્હાસીન્મયિ મેધાં મયિ પ્રજાં મય્યગ્નિસ્તેજો દધાતુ મયિ મેધાં મયિ
પ્રજાં મયીન્દ્ર ઇન્દ્રિયં દધાતુ મયિ મેધાં મયિ પ્રજાં મયિ સૂર્યો
ભ્રાજો દધાતુ ॥ ૩। ૩। ૧॥ ક્ષત્રસ્ય ચ મયિ ત્રયોવિꣳશતિશ્ચ ॥ ૩। ૩। ૧॥
૩ વાયુર્હિંકર્તાગ્નિઃ પ્રસ્તોતા પ્રજાપતિઃ સામ બૃહસ્પતિરુદ્ગાતા
વિશ્વે દેવા ઉપગાતારો મરુતઃ પ્રતિહર્તાર ઇન્દ્રો
નિધનં તે દેવાઃ પ્રાણભૃતઃ પ્રાણં મયિ દધત્વેતદ્વૈ
સર્વમધ્વર્યુરુપાકુર્વન્નુદ્ગાતૃભ્ય ઉપાકરોતિ તે દેવાઃ
પ્રાણભૃતઃ પ્રાણં મયિ દધત્વિત્યાહૈતદેવ સર્વમાત્મન્ધત્ત
ઇડા દેવહૂર્મનુર્યજ્ઞનીર્બૃહસ્પતિરુક્થામદાનિ શꣳસિષદ્વિશ્વે દેવાઃ
૪ સૂક્તવાચઃ પૃથિવિ માતર્મા મા હિꣳસીર્મધુ મનિષ્યે મધુ જનિષ્યે
મધુ વક્ષ્યામિ મધુ વદિષ્યામિ મધુમતીં દેવેભ્યો વાચમુદ્યાસꣳ
શુશ્રૂષેણ્યાં મનુષ્યેભ્યસ્તં મા દેવા અવન્તુ શોભાયૈ પિતરોઽનુ
મદન્તુ ॥ ૩। ૩। ૨॥ શꣳસિષદ્વિશ્વે દેવા અષ્ટાવિꣳશતિશ્ચ ॥ ૩। ૩। ૨॥
૫ વસવસ્ત્વા પ્ર વૃહન્તુ ગાયત્રેણ છંદસાગ્નેઃ પ્રિયં પાથ ઉપેહિ
રુદ્રાસ્ત્વા પ્ર વૃહન્તુ ત્રૈષ્ટુભેન છંદસેન્દ્રસ્ય પ્રિયં પાથ
ઉપેહ્યાદિત્યાસ્ત્વા પ્ર વૃહન્તુ જાગતેન છંદસા વિશ્વેષાં દેવાનાં
પ્રિયં પાથ ઉપેહિ માન્દા સુ તે શુક્ર શુક્રમા ધૂનોમિ ભન્દનાસુ કોતનાસુ
નૂતનાસુ રેશીષુ મેષીષુ વાશીષુ વિશ્વભૃત્સુ માધ્વીષુ કકુહાસુ
શક્વરીષુ
૬ શુક્રાસુ તે શુક્ર શુક્રમા ધૂનોમિ શુક્રં તે શુક્રેણ ગૃહ્ણામ્યહ્નો
રૂપેણ સૂર્યસ્ય રશ્મિભિઃ । આસ્મિન્નુગ્રા અચુચ્યવુર્દિવો ધારા અસશ્ચત
॥ કકુહꣳ રૂપં વૃષભસ્ય રોચતે બૃહચ્છુક્રઃ સોમઃ સોમસ્ય પુરોગાઃ
શુક્રઃ શુક્રસ્ય પુરોગાઃ । યત્તે સોમાદાભ્યં નામ જાગૃવિ તસ્મૈ
તે સોમ સોમાય સ્વાહોશિક્ત્વં દેવ સોમ ગાયત્રેણ છંદસાગ્નેઃ
૭ પ્રિયં પાથો અપીહિ વશી ત્વં દેવ સોમ ત્રૈષ્ટુભેન છંદસેન્દ્રસ્ય

પ્રિયં પાથો અપીહ્યસ્મત્સખા ત્વં દેવ સોમ જાગતેન છંદસા
વિશ્વેષાં દેવાનાં પ્રિયં પાથો અપીહ્યા નઃ પ્રાણ એતુ પરાવત
આન્તરિક્ષાદ્દિવસ્પરિ । આયુઃ પૃથિવ્યા અધ્યમૃતમસિ પ્રાણાય
ત્વા । ઇન્દ્રાગ્ની મે વર્ચઃ કૃણુતાં વર્ચઃ સોમો બૃહસ્પતિઃ ।
વર્ચો મે વિશ્વે દેવા વર્ચો મે ધત્તમશ્વિના ॥ દધન્વે વા યદીમનુ
વોચદ્બ્રહ્માણિ વેરુ તત્ । પરિ વિશ્વાનિ કાવ્યા નેમિશ્ચક્રમિવાભવત્ ॥
૩। ૩। ૩॥ શક્વરીષ્વગ્નેર્બૃહસ્પતિઃ પંચવિꣳશતિશ્ચ ॥ ૩। ૩। ૩॥

૮ એતદ્વા અપાં નામધેયં ગુહ્યં યદાધાવા માન્દાસુ તે શુક્ર શુક્રમા
ધૂનોમીત્યાહાપામેવ નામધેયેન ગુહ્યેન દિવો વૃષ્ટિમવ રુંધે
શુક્રં તે શુક્રેણ ગૃહ્ણામીત્યાહૈતદ્વા અહ્નો રૂપં યદ્રાત્રિઃ સૂર્યસ્ય
રશ્મયો વૃષ્ટ્યા ઈશતેઽહ્ન એવ રૂપેણ સૂર્યસ્ય રશ્મિભિર્દિવો
વૃષ્ટિં ચ્યાવયત્યાસ્મિન્નુગ્રા

૯ અચુચ્યવુરિત્યાહ યથાયજુરેવૈતત્કકુહꣳ રૂપં વૃષભસ્ય
રોચતે બૃહદિત્યાહૈતદ્વા અસ્ય કકુહꣳ રૂપં યદ્વૃષ્ટી રૂપેણૈવ
વૃષ્ટિમવ રુંધે યત્તે સોમાદાભ્યં નામ જાગૃવીત્યાહૈષ હ
વૈ હવિષા હવિર્યજતિ યોઽદાભ્યં ગૃહીત્વા સોમાય જુહોતિ પરા વા
એતસ્યાયુઃ પ્રાણ એતિ

૧૦ યોઽꣳશું ગૃહ્ણાત્યા નઃ પ્રાણ એતુ પરાવત ઇત્યાહાયુરેવ
પ્રાણમાત્મન્ધત્તેઽમૃતમસિ પ્રાણાય ત્વેતિ હિરણ્યમભિ વ્યનિત્યમૃતં
વૈ હિરણ્યમાયુઃ પ્રાણોઽમૃતેનૈવાયુરાત્મન્ધત્તે શતમાનં ભવતિ
શતાયુઃ પુરુષઃ શતેંદ્રિય આયુષ્યેવેન્દ્રિયે પ્રતિ તિષ્ઠત્યપ ઉપ
સ્પૃશતિ ભેષજં વા આપો ભેષજમેવ કુરુતે ॥ ૩। ૩। ૪॥ ઉગ્રા એત્યાપસ્ત્રીણિ
ચ ॥ ૩। ૩। ૪॥

૧૧ વાયુરસિ પ્રાણો નામ સવિતુરાધિપત્યેઽપાનમ્ મે દાશ્ચક્ષુરસિ શ્રોત્રં
નામ ધાતુરાધિપત્ય આયુર્મેદા રૂપમસિ વર્ણો નામ બૃહસ્પતેરાધિપત્યે
પ્રજાં મે દા ઋતમસિ સત્યં નામેન્દ્રસ્યાધિપત્યે ક્ષત્રમ્ મે દા ભૂતમસિ
ભવ્યં નામ પિતૃણામાધિપત્યેઽપામોષધીનાં ગર્ભં ધા ઋતસ્ય ત્વા

વ્યોમન ઋતસ્ય

૧૨ ત્વા વિભૂમન ઋતસ્ય ત્વા વિધર્મણ ઋતસ્ય ત્વા સત્યાયર્તસ્ય ત્વા
જ્યોતિષે પ્રજાપતિર્વિરાજમપશ્યત્તયા ભૂતં ચ ભવ્યં ચાસૃજત
તામૃષિભ્યસ્તિરોઽદધાત્તાં જમદગ્નિસ્તપસાપશ્યત્તયા વૈ સ
પૃશ્નીન્કામાનસૃજત તત્પૃશ્નીનાં પૃશ્નિત્વં યત્પૃશ્નયો ગૃહ્યન્તે
પૃશ્નીનેવ તૈઃ કામાન્ યજમાનોઽવ રુંધે વાયુરસિ પ્રાણો

૧૩ નામેત્યાહ પ્રાણાપાનાવેવાવ રુંધે ચક્ષુરસિ શ્રોત્રં નામેત્યાહાયુરેવાવ
રુંધે રૂપમસિ વર્ણો નામેત્યાહ પ્રજામેવાવ રુંધ ઋતમસિ સત્યં
નામેત્યાહ ક્ષત્રમેવાવ રુંધે ભૂતમસિ ભવ્યં નામેત્યાહ પશવો
વા અપામોષધીનાં ગર્ભઃ પશૂનેવા

૧૪ ઽવ રુંધ એતાવદ્વૈ પુરુષં પરિતસ્તદેવાવ રુંધ ઋતસ્ય ત્વા
વ્યોમન ઇત્યાહેયં વા ઋતસ્ય વ્યોમેમામેવાભિ જયત્યૃતસ્ય ત્વા
વિભૂમન ઇત્યાહાન્તરિક્ષં વા ઋતસ્ય વિભૂમાન્તરિક્ષમેવાભિ
જયત્યૃતસ્ય ત્વા વિધર્મણ ઇત્યાહ દ્યૌર્વા ઋતસ્ય વિધર્મ
દિવમેવાભિ જયત્યૃતસ્ય

૧૫ ત્વા સત્યાયેત્યાહ દિશો વા ઋતસ્ય સત્યં દિશ એવાભિ જયત્યૃતસ્ય
ત્વા જ્યોતિષ ઇત્યાહ સુવર્ગો વૈ લોક ઋતસ્ય જ્યોતિઃ સુવર્ગમેવ
લોકમભિ જયત્યેતાવન્તો વૈ દેવલોકાસ્તાનેવાભિ જયતિ દશ
સંપદ્યન્તે દશાક્ષરા વિરાડન્નં વિરાડ્વિરાજ્યેવાન્નાદ્યે પ્રતિ તિષ્ઠતિ
॥ ૩। ૩। ૫॥ વ્યોમન ઋતસ્ય પ્રાણઃ પશૂનેવ વિધર્મ દિવમેવાભિ
જયત્યૃતસ્ય ષટ્ચત્વારિꣳશચ્ચ ॥ ૩। ૩। ૫॥

૧૬ દેવા વૈ યદ્યજ્ઞેન નાવારુંધત તત્પરૈરવારુંધત
તત્પરાણાં પરત્વં યત્પરે ગૃહ્યન્તે યદેવ યજ્ઞેન નાવરુંધે
તસ્યાવરુદ્ધ્યૈ યં પ્રથમં ગૃહ્ણાતીમમેવ તેન લોકમભિ જયતિ
યં દ્વિતીયમન્તરિક્ષં તેન યં તૃતીયમમુમેવ તેન લોકમભિ
જયતિ યદે તે ગૃહ્યન્ત એષાં લોકાનામભિજિત્યા

૧૭ ઉત્તરેષ્વહઃ સ્વમુતોઽર્વાઞ્ચો ગૃહ્યન્તેઽભિજિત્યૈવેમાꣳ

લ્લોકાન્પુનરિમં લોકં પ્રત્યવરોહન્તિ યત્પૂર્વેષ્વહઃ
સ્વિતઃ પરાઞ્ચો ગૃહ્યન્તે તસ્માદિતઃ પરાઞ્ચ ઇમે લોકા
યદુત્તરેષ્વહઃસ્વમુતોઽર્વાઞ્ચો ગૃહ્યન્તે તસ્માદમુતોઽર્વાઞ્ચ
ઇમે લોકાસ્તસ્માદયાતયામ્નો લોકાન્મનુષ્યા ઉપ જીવન્તિ બ્રહ્મવાદિનો વદન્તિ
કસ્માથ્સત્યાદદ્ભ્ય ઓષધયઃ સંભવન્ત્યોષધયો
૧૮ મનુષ્યાણામન્નં પ્રજાપતિં પ્રજા અનુ પ્ર જાયન્ત ઇતિ પરાનન્વિતિ
બ્રૂયાદ્યદ્ગૃહ્ણાત્યદ્ભ્યસ્ત્વૌષધીભ્યો ગૃહ્ણામીતિ તસ્માદદ્ભ્ય ઓષધયઃ
સંભવન્તિ યદ્ગૃહ્ણાત્યોષધીભ્યસ્ત્વા પ્રજાભ્યો ગૃહ્ણામીતિ તસ્માદોષધયો
મનુષ્યાણામન્નં યદ્ગૃહ્ણાતિ પ્રજાભ્યસ્ત્વા પ્રજાપતયે ગૃહ્ણામીતિ
તસ્માત્પ્રજાપતિં પ્રજા અનુ પ્ર જાયન્તે ॥ ૩। ૩। ૬॥ અભિજિત્યૈ
ભવંત્યોષધયોઽષ્ટા ચત્વારિꣳ શચ્ચ ॥ ૩। ૩। ૬॥
૧૯ પ્રજાપતિર્દેવાસુરાનસૃજત તદનુ યજ્ઞોઽસૃજ્યત યજ્ઞં
છન્દાꣳસિ તે વિષ્વઞ્ચો વ્યક્રામન્થ્સોઽસુરાનનુ
યજ્ઞોઽપાક્રામદ્યજ્ઞં છન્દાꣳસિ તે દેવા
અમન્યન્તામી વા ઇદમભૂવન્, યદ્વયꣳ સ્મ ઇતિ તે
પ્રજાપતિમુપાધાવન્થ્સોઽબ્રવીત્પ્રજાપતિશ્છંદસાં વીર્યમાદાય
તદ્વઃ પ્ર દાસ્યામીતિ સ છંદસાં વીર્ય
૨૦ માદાય તદેભ્યઃ પ્રાયચ્છત્તદનુ ચ્છંદાગ્સ્યપાક્રામઙ્છન્દાꣳસિ
યજ્ઞસ્તતો દેવા અભવન્પરાસુરા ય એવં છંદસાં વીર્યં વેદા
શ્રાવયાસ્તુ શ્રૌષડ્યજ યે યજામહે વષટ્કારો ભવત્યાત્મના પરાસ્ય
ભ્રાતૃવ્યો ભવતિ બ્રહ્મવાદિનો વદન્તિ કસ્મૈ કમધ્વર્યુરા શ્રાવયતીતિ
છંદસાં વીર્યાયેતિ બ્રૂયાદેતદ્વૈ
૨૧ છંદસાં વીર્યમા શ્રાવયાસ્તુ શ્રૌષડ્યજ યે યજામહે
વષટ્કારો ય એવં વેદ સવીર્યૈરેવ છન્દોભિરર્ચતિ યત્કિં ચાર્ચતિ
યદિન્દ્રો વૃત્રમહન્નમેધ્યં તદ્યદ્યતીનપાવપદમેધ્યં તદથ
કસ્માદૈન્દ્રો યજ્ઞ આ સરꣳ સ્થાતોરિત્યાહુરિન્દ્રસ્ય વા એષા યજ્ઞિયા
તનૂર્યદ્યજ્ઞસ્તામેવ તદ્યજન્તિ ય એવં વેદોપૈનં યજ્ઞો નમતિ ॥ ૩। ૩। ૭॥

છંદસાં વીર્યં વા એવ તદષ્ટૌ ચ ॥ ૩। ૩। ૭॥

૨૨ આયુર્દા અગ્ને હવિષો જુષાણો ઘૃતપ્રતીકો ઘૃતયોનિરેધિ ।
ઘૃતં પીત્વા મધુ ચારુ ગવ્યં પિતેવ પુત્રમભિ રક્ષતાદિમમ્
॥ આ વૃશ્ચ્યતે વા એતદ્યજમાનોઽગ્નિભ્યાં યદેનયોઃ શ઼ૃતં
કૃત્યાથાન્યત્રાવ ભૃથમવૈત્યાયુર્દા અગ્ને હવિષો જુષાણ
ઇત્યવભૃથમવૈષ્યઞ્જુહુયાદાહુત્યૈવૈનૌ શમયતિ નાર્તિમાર્છતિ
યજમાનો યત્કુસીદ

૨૩ મપ્રતીત્તં મયિ યેન યમસ્ય બલિના ચરામિ । ઇહૈવ
સન્નિરવદયે તદેતત્તદગ્ને અનૃણો ભવામિ । વિશ્વલોપ વિશ્વદાવસ્ય ત્વા
સઞ્જુહોમ્યગ્ધાદેકોઽહુતાદેકઃ સમસનાદેકઃ । તે નઃ કૃણ્વન્તુ ભેષજꣳ
સદઃ સહો વરેણ્યમ્ ॥ અયં નો નભસા પુરઃ સંગ્સ્ફાનો અભિ રક્ષતુ ।
ગૃહાણામસમર્ત્યૈ બહવો નો ગૃહા અસન્ ॥ સ ત્વં નો

૨૪ નભસસ્પત ઊર્જં નો ધેહિ ભદ્રયા । પુનર્નો નષ્ટમા કૃધિ
પુનર્નો રયિમા કૃધિ ॥ દેવ સરꣳસ્ફાન સહસ્રપોષસ્યેશિષે સ નો
રાસ્વાજ્યાનિꣳ રાયસ્પોષꣳસુવીર્યꣳસંવથ્સરીણાંગ્ સ્વસ્તિમ્ ॥
અગ્નિર્વાવ યમ ઇયં યમી કુસીદં વા એતદ્યમસ્ય યજમાન આ દત્તે
યદોષધીભિર્વેદિંગ્ સ્તૃણાતિ યદનુપૌષ્ય પ્રયાયાદ્ ગ્રીવબદ્ધમેન

૨૫ મમુષ્મિꣳલ્લોકે નેનીયેરન્ યત્કુસીદમપ્રતીત્તં મયીત્યુપૌષતીહૈવ
સન્, યમં કુસીદં નિરવદાયાનૃણઃ સુવર્ગં લોકમેતિ યદિ મિશ્રમિવ
ચરેદઞ્જલિના સક્તૂન્પ્રદાવ્યે જુહુયાદેષ વા અગ્નિર્વૈશ્વાનરો
યત્પ્રદાવ્યઃ સ એવૈનંગ્ સ્વદયત્યહ્નાં વિધાન્યામેકાષ્ટકાયામપૂપં
ચતુઃ શરાવં પક્ત્વા પ્રાતરેતેન કક્ષમુપૌષેદ્યદિ

૨૬ દહતિ પુણ્યસમં ભવતિ યદિ ન દહતિ પાપસમમેતેન
હ સ્મ વા ઋષયઃ પુરા વિજ્ઞાનેન દીર્ઘસત્રમુપ યન્તિ
યો વા ઉપદ્રષ્ટારમુપશ્રોતારમનુખ્યાતારં વિદ્વાન્, યજતે
સમમુષ્મિꣳલ્લોક ઇષ્ટાપૂર્તેન ગચ્છતેઽગ્નિર્વા ઉપદ્રષ્ટા વાયુરુપ
શ્રોતાદિત્યોઽનુ ખ્યાતા તાન્, ય એવં વિદ્વાન્, યજતે સમમુષ્મિꣳલ્લોક

ઇષ્ટાપૂર્તેન ગચ્છતેઽયં નો નભસા પુર

૨૭ ઇત્યાહાગ્નિર્વૈ નભસા પુરોઽગ્નિમેવ તદાહૈતન્મે ગોપાયેતિ સ ત્વં નો
નભસસ્પત ઇત્યાહ વાયુર્વૈ નભસસ્પતિર્વાયુમેવ તદાહૈતન્મે ગોપાયેતિ
દેવ સર૱સ્ફાનેત્યાહાસૌ વા આદિત્યો દેવઃ સગ્ગ્સ્ફાન આદિત્યમેવ
તદાહૈતન્મે ગોપાયેતિ ॥ ૩। ૩। ૮॥ કુસીદં ત્વં ન એનમોષેદ્યદિ પુર
આદિત્યમેવ તદાહૈતન્મે ગોપાયેતિ ॥ ૩। ૩। ૮॥

૨૮ એતં યુવાનં પરિ વો દદામિ તેન ક્રીડન્તીશ્ચરત પ્રિયેણ । મા નઃ
શાપ્ત જનુષા સુભાગા રાયસ્પોષેણ સમિષા મદેમ ॥ નમો મહિમ્ન ઉત
ચક્ષુષે તે મરુતાં પિતસ્તદહં ગૃણામિ । અનુ મન્યસ્વ સુયજા યજામ
જુષ્ટં દેવાનામિદમસ્તુ હવ્યમ્ ॥ દેવાનામેષ ઉપનાહ આસીદપાં ગર્ભ
ઓષધીષુ ન્યક્તઃ । સોમસ્ય દ્રપ્સમવૃણીત પૂષા

૨૯ બૃહન્નદ્રિરભવત્તદેષામ્ ॥ પિતા વત્સાનાં પતિરઘ્નિયાનામથો
પિતા મહતાં ગર્ગરાણામ્ । વત્સો જરાયુ પ્રતિધુક્પીયૂષ આમિક્ષામસ્તુ
ઘૃતમસ્ય રેતઃ ॥ ત્વાં ગાવોઽવૃણત રાજ્યાય ત્વા૱હવન્ત મરુતઃ
સ્વર્કાઃ । વર્ષ્મન્ ક્ષત્રસ્ય કકુભિ શિશ્રિયાણસ્તતો ન ઉગ્રો વિ ભજા
વસૂનિ ॥ વ્યૃદ્ધેન વા એષ પશુના યજતે યસ્યૈતાનિ ન ક્રિયન્ત એષ
હત્વૈ સમૃદ્ધેન યજતે યસ્યૈતાનિ ક્રિયન્તે ॥ ૩। ૩। ૯॥ પૂષા ક્રિયંત
એષોઽષ્ટૌ ચ ॥ ૩। ૩। ૯॥

૩૦ સૂર્ॱયો દેવો દિવિષદ્ભ્યો ધાતા ક્ષત્રાય વાયુઃ પ્રજાભ્યઃ ।
બૃહસ્પતિસ્ત્વા પ્રજાપતયે જ્યોતિષ્મતીં જુહોતુ ॥ યસ્યાસ્તે હરિતો
ગર્ભોઽથો યોનિર્હિરણ્યયી । અઙ્ગાન્યહ્રુતા યસ્યૈ તાં દેવૈઃ સમજીગમમ્
॥ આ વર્તન વર્તય નિ નિવર્તન વર્તયેન્દ્ર નર્દબુદ । ભૂમ્યાશ્વતસ્રઃ
પ્રદિશસ્તાભિરા વર્તયા પુનઃ ॥ વિ તે ભિનદ્મિ તકરીં વિ યોનિં વિ
ગવીન્યૌ । વિ

૩૧ માતરં ચ પુત્રં ચ વિ ગર્ભં ચ જરાયુ ચ । બહિસ્તે અસ્તુ
બાલિતિ । ઉરુદ્રપ્સો વિશ્વરૂપ ઇન્દુઃ પવમાનો ધીર આનઞ્જ
ગર્ભમ્ ॥ એકપદી દ્વિપદી ત્રિપદી ચતુષ્પદી પઞ્ચપદી ષટ્પદી

સપ્તપદીષ્ટાપદી ભુવનાનુ પ્રથતાગ્ં સ્વાહા । મહી દ્યૌઃ પૃથિવી
ચ ન ઇમં યજ્ઞં મિમિક્ષતામ્ । પિપૃતાં નો ભરીમભિઃ ॥ ૩। ૩। ૧૦॥
ગવીન્યૌ વિ ચતુશ્ચત્વારિꣳશચ્ચ ॥ ૩। ૩। ૧૦॥

૩૨ ઇદં વામાસ્યે હવિઃ પ્રિયમિન્દ્રાબૃહસ્પતી । ઉક્થં મદશ્ચ શસ્યતે ॥
અયં વાં પરિષિચ્યતે સોમ ઇન્દ્રાબૃહસ્પતી । ચારુર્મદાય પીતયે ॥ અસ્મે
ઇન્દ્રાબૃહસ્પતી રયિં ધત્તꣳ શતગ્વિનમ્ । અશ્વાવન્તꣳ સહસ્રિણમ્ ॥
બૃહસ્પતિર્નઃ પરિ પાતુ પશ્ચાદુતોત્તરસ્માદધરાદઘાયોઃ । ઇન્દ્રઃ
પુરસ્તાદુત મધ્યતો નઃ સખા સખિભ્યો વરિવઃ કૃણોતુ ॥ વિ તે
વિષ્વગ્વાતજૂતાસો અગ્ને ભામાસઃ

૩૩ શુચે શુચયશ્ચરન્તિ । તુવિમ્રક્ષાસો દિવ્યા નવગ્વા વના વનન્તિ
ધૃષતા રુજન્તઃ ॥ ત્વામગ્ને માનુષીરીડતે વિશો હોત્રાવિદં વિવિચિꣳ
રત્નધાતમમ્ । ગુહા સન્તꣳ સુભગ વિશ્વદર્શતં તુવિષ્મણસꣳ
સુયજં ઘૃતશ્રિયમ્ ॥ ધાતા દદાતુ નો રયિમીશાનો જગતસ્પતિઃ ।
સ નઃ પૂર્ણેન વાવનત્ ॥ ધાતા પ્રજાયા ઉત રાય ઈશે ધાતેદં વિશ્વં
ભુવનં જજાન । ધાતા પુત્રં યજમાનાય દાતા

૩૪ તસ્મા ઉ હવ્યં ઘૃતવદ્વિધેમ ॥ ધાતા દદાતુ નો રયિં પ્રાચીં
જીવાતુમક્ષિતામ્ । વયં દેવસ્ય ધીમહિ સુમતિꣳ સત્યરાધસઃ ॥
ધાતા દદાતુ દાશુષે વસૂનિ પ્રજાકામાય મીઢુષે દુરોણે । તસ્મૈ
દેવા અમૃતાઃ સં વ્યયન્તાં વિશ્વે દેવાસો અદિતિઃ સજોષાઃ ॥ અનુ
નોઽદ્યાનુમતિર્યજ્ઞં દેવેષુ મન્યતામ્ । અગ્નિશ્ચ હવ્યવાહનો ભવતાં
દાશુષે મયઃ ॥ અન્વિદનુમતે ત્વં

૩૫ મન્યાસૈ શં ચ નઃ કૃધિ । ક્રત્વે દક્ષાય નો હિનુ પ્રણ આયૂꣳષિ
તારિષઃ ॥ અનુ મન્યતામનુમન્યમાના પ્રજાવન્તꣳ રયિમક્ષીયમાણમ્ ।
તસ્યૈ વયꣳ હેડસિ માપિ ભૂમ સા નો દેવી સુહવા શર્મ યચ્છતુ ॥
યસ્યામિદં પ્રદિશિ યદ્વિરોચતેઽનુમતિં પ્રતિ ભૂષન્ત્યાયવઃ । યસ્યા
ઉપસ્થ ઉર્વન્તરિક્ષꣳ સા નો દેવી સુહવા શર્મ યચ્છતુ ॥

૩૬ રાકામહꣳ સુહવાꣳ સુષ્ટુતી હુવે શૃણોતુ નઃ સુભગા
 બોધતુ ત્મના । સીવ્યત્વપઃ સૂચ્યાચ્છિદ્યમાનયા દદાતુ વીરꣳ
 શતદાયમુક્થ્યમ્ ॥ યાસ્તે રાકે સુમતયઃ સુપેશસો યાભિર્દદાસિ
 દાશુષે વસૂનિ । તાભિર્નો અદ્ય સુમના ઉપાગહિ સહસ્રપોષꣳ
 સુભગે રરાણા ॥ સિનીવાલિ યા સુપાણિઃ ॥ કુહૂમહꣳ સુભગાં
 વિદ્મનાપસમસ્મિન્, યજ્ઞે સુહવાં જોહવીમિ । સા નો દદાતુ શ્રવણં પિતૃણાં
 તસ્યાસ્તે દેવિ હવિષા વિધેમ ॥ કુહૂર્દેવાનામમૃતસ્ય પત્ની હવ્યા નો
 અસ્ય હવિષશ્ચિકેતુ । સં દાશુષે કિરતુ ભૂરિ વામꣳ રાયસ્પોષં
 ચિકિતુષે દધાતુ ॥ ૩। ૩। ૧૧॥ ભામાસો દાતા ત્વમંતરિક્ષꣳ સા નો
 દેવી સુહવા શર્મ યચ્છતુ શ્રવણં ચતુર્વિꣳશતિશ્ચ ॥ ૩। ૩। ૧૧॥

 અગ્ને તેજસ્વિન્વાયુર્વસવસ્ત્વૈતદ્વા અપાં નામધેયં વાયુરસિ પ્રાણો નામ
દેવા વૈ યદ્યજ્ઞેન ન પ્રજાપતિર્દેવાસુરાનાયુર્દા એતં યુવાનꣳ
સૂર્ય્યો દેવ ઇદં વામેકાદશ ॥

 અગ્ને તેજસ્વિન્વાયુરસિ છંદસાં વીર્યં માતરં ચ ષટ્ત્રિꣳશત્ ॥

 અગ્ને તેજસ્વિન્ ચિકિતુષે દધાતુ ॥

## તૃતીયકાણ્ડે ચતુર્થઃ પ્રશ્નઃ ૪

૧ વિ વા એતસ્ય યજ્ઞ ઋધ્યતે યસ્ય હવિરતિરિચ્યતે સૂર્ય્યો
 દેવો દિવિષદ્ભ્ય ઇત્યાહ બૃહસ્પતિના ચૈવાસ્ય પ્રજાપતિના ચ
 યજ્ઞસ્ય વ્યૃદ્ધમપિ વપતિ રક્ષાꣳસિ વા એતત્પશુꣳ સચન્તે
 યદેકદેવત્ય આલબ્ધો ભૂયાન્ભવતિ યસ્યાસ્તે હરિતો ગર્ભ ઇત્યાહ
 દેવત્રૈવૈનાં ગમયતિ રક્ષસામપહત્યા આ વર્તન વર્તયેત્યાહ
૨ બ્રહ્મણૈવૈનમા વર્તયતિ વિ તે ભિનદ્મિ તકરીમિત્યાહ યથા
 યજુરેવૈતદુરુદ્રપ્સો વિશ્વરૂપ ઇન્દુરિત્યાહ પ્રજા વૈ પશવ ઇન્દુઃ
 પ્રજયૈવૈનં પશુભિઃ સમર્ધયતિ દિવં વૈ યજ્ઞસ્ય વ્યૃદ્ધં
 ગચ્છતિ પૃથિવીમતિરિક્તં તદ્યન્ન શમયેદાર્તિમાર્ચ્છેદ્યજમાનો મહી

દ્યૌઃ પૃથિવી ચ  ન  ઇત્યા

૩ ઽહ  દ્યાવાપૃથિવીભ્યામેવ યજ્ઞસ્ય  વ્યૃદ્ધં  ચાતિરિક્તં ચ
શમયતિ  નાર્તિમાર્ચ્છતિ  યજમાનો  ભસ્મનાભિ સમૂહતિ સ્વગાકૃત્યા
અથો  અનયોર્વા એષ ગર્ભોઽનયોરેવૈનં  દધાતિ  યદવદ્યેદતિ
તદ્રેચયેદ્યન્નાવદ્યેત્ પશોરાલબ્ધસ્ય  નાવ  દ્યેત્ પુરસ્તાન્નાભ્યા
અન્યદવદ્યેદુપરિષ્ટાદન્યત્પુરસ્તાદ્વૈ નાભ્યૈ

૪ પ્રાણ ઉપરિષ્ટાદપાનો યાવાનેવ પશુસ્તસ્યાવ  દ્યતિ  વિષ્ણવે
શિપિવિષ્ટાય  જુહોતિ  યદ્વૈ યજ્ઞસ્યાતિરિચ્યતે  યઃ પશોર્ભૂમા યા
પુષ્ટિસ્તદ્વિષ્ણુઃ  શિપિવિષ્ટોઽતિરિક્ત એવાતિરિક્તં દધાત્યતિરિક્તસ્ય  શાન્ત્યા
અષ્ટાપ્રૂડ્ઢિરણ્યં  દક્ષિણાષ્ટાપદી  હ્યેષાત્મા નવમઃ પશોરાપ્ત્યા
અન્તરકોશ ઉષ્ણીષેણાવિષ્ટિતં ભવત્યેવમિવ  હિ પશુરુલ્બમિવ  ચર્મેવ
મા ઁ સમિવાસ્થીવ  યાવાનેવ પશુસ્તમાપ્ત્વાવ  રુંધે  યસ્યૈષા યજ્ઞે
પ્રાયશ્ચિત્તિઃ ક્રિયત  ઇષ્ટ્વા વસીયાન્ભવતિ ॥ ૩। ૪। ૧॥ વર્તયેત્યાહ ન
ઇતિ  વૈ નાભ્યા  ઉલ્બમિવૈકવિ ઁ શતિશ્ચ ॥ ૩। ૪। ૧॥

૫ આ વાયો ભૂષ શુચિપા  ઉપ  નઃ સહસ્રં  તે નિયુતો  વિશ્વવાર । ઉપો  તે
અન્ધો  મદ્યમયામિ  યસ્ય  દેવ દધિષે પૂર્વપેયમ્ ॥ આકૂત્યૈ ત્વા  કામાય
ત્વા સમૃધે  ત્વા કિક્કિટા તે  મનઃ  પ્રજાપતયે  સ્વાહા  કિક્કિટા તે  પ્રાણં
વાયવે  સ્વાહા  કિક્કિટા તે  ચક્ષુઃ  સૂર્યાય  સ્વાહા  કિક્કિટા તે  શ્રોત્રં
દ્યાવાપૃથિવીભ્યાગ્  સ્વાહા  કિક્કિટા તે  વાચ ઁ  સરસ્વત્યૈ  સ્વાહા

૬ ત્વં તુરીયા  વશિની  વશાસિ  સકૃદ્યત્ત્વા  મનસા  ગર્ભ  આશયત્
। વશા ત્વં વશિની  ગચ્છ દેવાન્થ્સત્યાઃ સંતુ  યજમાનસ્ય  કામાઃ  ॥
અજાસિ  રયિષ્ઠા પૃથિવ્યા ઁ  સીદોર્ધ્વાન્તરિક્ષમુપ  તિષ્ઠસ્વ દિવિ
તે  બૃહદ્ભાઃ । તન્તું  તન્વન્રજસો ભાનુમન્વિહિ  જ્યોતિષ્મતઃ પથો
રક્ષ ધિયા કૃતાન્ । અનુલ્બણં વયત  જોગુવામપો  મનુર્ભવ જનયા
દૈવ્યં  જનમ્ ॥ મનસો હવિરસિ પ્રજાપતેર્વર્ણો  ગાત્રાણાં તે ગાત્રભાજો
ભૂયાસ્મ ॥ ૩। ૪। ૨॥ સરસ્વત્યૈ  સ્વાહા  મનુસ્ત્રયોદશ ચ ॥ ૩। ૪। ૨॥

૭ ઇમે વૈ સહાસ્તાં  તે વાયુર્વ્યવાત્તે ગર્ભમદધાતાં

તꣳ સોમઃ પ્રાજનયદગ્નિરગ્રસત સ એતં
પ્રજાપતિરાગ્નેયમષ્ટાકપાલમપશ્યત્તં નિરવપત્તેનૈવૈનામગ્નેરધિ
નિરક્રીણાત્તસ્માદપ્યન્યદેવત્યામાલભમાન આગ્નેયમષ્ટાકપાલં
પુરસ્તાન્નિર્વપેદગ્નેરેવૈનામધિ નિષ્ક્રીયાલભતે યદ્
૮ વાયુર્વ્યવાત્તસ્માદ્વાયવ્યા યદિમે ગર્ભમદધાતાં તસ્માદ્
દ્યાવાપૃથિવ્યા યત્સોમઃ પ્રાજનયદગ્નિરગ્રસત તસ્માદગ્નીષોમીયા
યદનયોર્વિયત્યોર્વાગવદત્તસ્માત્સારસ્વતી યત્પ્રજાપતિરગ્નેરધિ
નિરક્રીણાત્ તસ્માત્ પ્રાજાપત્યા સા વા એષા સર્વદેવત્યા યદજા વશા
વાયવ્યામા લભેત ભૂતિકામો વાયુર્વૈ ક્ષેપિષ્ઠા દેવતા વાયુમેવ સ્વેન
૯ ભાગધેયેનોપ ધાવતિ સ એવૈનં ભૂતિં ગમયતિ દ્યાવાપૃથિવ્યામા
લભેત કૃષમાણઃ પ્રતિષ્ઠાકામો દિવ એવાસ્મૈ પર્જન્યો વર્ષતિ
વ્યસ્યામોષધયો રોહન્તિ સમર્ધુકમસ્ય સસ્યં ભવત્યગ્નીષોમીયામા
લભેત યઃ કામયેતાન્નવાનન્નાદઃ સ્યામિત્યગ્નિનૈવાન્નમવ રુંધે
સોમેનાન્નાદ્યમન્નવાનેવાન્નાદો ભવતિ સારસ્વતીમા લભેત ય
૧૦ ઈશ્વરો વાચો વદિતોઃ સન્વાચં ન વદેદ્વાગ્વૈ સરસ્વતી સરસ્વતીમેવ
સ્વેન ભાગધેયેનોપ ધાવતિ સૈવાસ્મિન્વાચં દધાતિ પ્રાજાપત્યામા
લભેત યઃ કામયેતાનભિજિતમભિ જયેયમિતિ પ્રજાપતિઃ સર્વા
દેવતા દેવતાભિરેવાનભિજિતમભિ જયતિ વાયવ્યયોપાકરોતિ
વાયોરેવૈનામવરુધ્યા લભત આકૂત્યૈ ત્વા કામાય ત્વે
૧૧ ત્યાહ યથાયજુરેવૈતત્ કિક્કિટાકારં જુહોતિ કિક્કિટાકારેણ વૈ ગ્રામ્યાઃ
પશવો રમન્તે પ્રારણ્યાઃ પતન્તિ યત્કિક્કિટાકારં જુહોતિ ગ્રામ્યાણાં
પશૂનાં ધૃત્યૈ પર્યગ્નૌ ક્રિયમાણે જુહોતિ જીવન્તીમેવૈનાꣳ સુવર્ગં
લોકં ગમયતિ ત્વં તુરીયા વશિની વશાસીત્યાહ દેવત્રૈવૈનાં ગમયતિ
સત્યાઃ સન્તુ યજમાનસ્ય કામા ઇત્યાહૈષ વૈ કામો
૧૨ યજમાનસ્ય યદનાર્ત ઉદૃચં ગચ્છતિ તસ્માદેવમાહાજાસિ
રયિષ્ઠેત્યાહૈષ્વેવૈનાં લોકેષુ પ્રતિષ્ઠાપયતિ દિવિ તે બૃહદ્ભા
ઇત્યાહ સુવર્ગ એવાસ્મૈ લોકે જ્યોતિર્દધાતિ તન્તું તન્વન્રજસો

ભાનુમન્વિહીત્યાહેમાનેવાસ્મૈ લોકાઞ્જ્યોતિષ્મતઃ કરોત્યનુલ્બણં વયત
જોગુવામપ ઇત્યા

૧૩ ૬હ યદેવ યજ્ઞ ઉલ્બણં ક્રિયતે તસ્યૈવૈષા શાન્તિર્મનુર્ભવ
જનયા દૈવ્યં જનમિત્યાહ માનવ્યો વૈ પ્રજાસ્તા એવાદ્યાઃ કુરુતે
મનસો હવિરસીત્યાહ સ્વગાકૃત્યૈ ગાત્રાણાં તે ગાત્રભાજો
ભૂયાસ્મેત્યાહાશિષમેવૈતામા શાસ્તે તસ્યૈ વા એતસ્યા
એકમેવાદેવયજનં યદાલબ્ધાયામભ્રો

૧૪ ભવતિ યદાલબ્ધાયામભ્રઃ સ્યાદપ્સુ વા પ્રવેશયેથ્સર્વાં વા
પ્રાશ્નીયાદ્યદપ્સુ પ્રવેશયેદ્યજ્ઞવેશસં કુર્યાથ્સર્વામેવ
પ્રાશ્નીયાદિન્દ્રિયમેવાત્મન્ધત્તે સા વા એષા ત્રયાણામેવાવરુદ્ધા
સંવથ્સરસદઃ સહસ્રયાજિનો ગૃહમેધિનસ્ત એવૈતયા
યજેરન્તેષામેવૈષાપ્તા ॥ ૩। ૪। ૩॥ યથ્સ્વેન સારસ્વતીમા લભેત યઃ કામાય
ત્વા કામોપ ઇત્યભ્ભ્રો દ્વિચત્વારિꣳશચ્ચ ॥ ૩। ૪। ૩॥

૧૫ ચિત્તં ચ ચિત્તિશ્ચાકૂતં ચાકૂતિશ્ચ વિજ્ઞાતં ચ વિજ્ઞાનં ચ
મનશ્ચ શક્વરીશ્ચ દર્શશ્ચ પૂર્ણમાસશ્ચ બૃહચ્ચ રથંતરં
ચ પ્રજાપતિર્જયાનિન્દ્રાય વૃષ્ણે પ્રાયચ્છદુગ્રઃ પૃતનાજ્યેષુ
તસ્મૈ વિશઃ સમનમન્ત સર્વાઃ સ ઉગ્રઃ સ હિ હવ્યો બભૂવ દેવાસુરાઃ
સંયત્તા આસન્થ્સ ઇન્દ્રઃ પ્રજાપતિમુપાધાવત્તસ્મા એતાઞ્જયાન્ પ્રાયચ્છત્
તાનજુહોત્તતો વૈ દેવા અસુરાનજયન્ યદજયન્તજ્જયાનાં જયત્વꣳ
સ્પર્ધમાનેનૈતે હોતવ્યા જયત્યેવ તાં પૃતનામ્ ॥ ૩। ૪। ૪॥ ઉપ પંચ
વિꣳશતિશ્ચ ॥ ૩। ૪। ૪॥

૧૬ અગ્નિર્ભૂતાનામધિપતિઃ સ માવત્વિન્દ્રો જ્યેષ્ઠાનાં યમઃ
પૃથિવ્યા વાયુરન્તરિક્ષસ્ય સૂર્યો દિવશ્ચન્દ્રમા નક્ષત્રાણાં
બૃહસ્પતિર્બ્રહ્મણો મિત્રઃ સત્યાનાં વરુણોઽપાꣳ સમુદ્રઃ
સ્રોત્યાનામન્નꣳ સામ્રાજ્યાનામધિપતિ તન્માવતુ સોમ ઓષધીનાꣳ
સવિતા પ્રસવાનાꣳરુદ્રઃ પશૂનાં ત્વષ્ટા રૂપાણાં વિષ્ણુઃ પર્વતાનાં
મરુતો ગણાનામધિપતયસ્તે માવન્તુ પિતરઃ પિતામહાઃ પરેઽવરે

તતાસ્તતામહા ઇહ માવત । અસ્મિન્ બ્રહ્મન્નસ્મિન્ ક્ષત્રેઽસ્યામાશિષ્યસ્યાં
પુરોધાયામસ્મિન્ કર્મન્નસ્યાં દેવહૂત્યામ્ ॥ ૩। ૪। ૫॥ અવરે સપ્તદશ
ચ ॥ ૩। ૪। ૫॥
૧૭ દેવા વૈ યદ્યજ્ઞેઽકુર્વત તદસુરા અકુર્વત તે દેવા
એતાનભ્યાતાનાનપશ્યન્તાનભ્યાતન્વત યદ્દેવાનાં કર્માસીદાર્ધ્યત
તદ્યદસુરાણાં ન તદાર્ધ્યત યેન કર્મણેર્ત્સેત્તત્ર હોતવ્યા ઋધ્નોત્યેવ
તેન કર્મણા યદ્વિશ્વે દેવાઃ સમભરન્તસ્માદભ્યાતાના વૈશ્વદેવા
યત્પ્રજાપતિર્જયાન્પ્રાયચ્છત્તસ્માજ્જયાઃ પ્રાજાપત્યા
૧૮ યદ્રાષ્ટ્રભૃદ્ભી રાષ્ટ્રમાદદત તદ્રાષ્ટ્રભૃતાઁ
રાષ્ટ્રભૃત્ત્વં તે દેવા અભ્યાતાનૈરસુરાનભ્યાતન્વત જયૈરજયન્
રાષ્ટ્રભૃદ્ભી રાષ્ટ્રમાદદત યદ્દેવા અભ્યાતાનૈરસુરાનભ્યાતન્વત
તદભ્યાતાનાનામભ્યાતાનત્વં યજ્જયૈરજયન્તજ્જયાનાં જયત્વં
યદ્રાષ્ટ્રભૃદ્ભી રાષ્ટ્રમાદદત તદ્રાષ્ટ્રભૃતાઁ
રાષ્ટ્રભૃત્ત્વં તતો દેવા અભવન્પરાસુરા યો ભ્રાતૃવ્યવાન્થ્સ્યાત્સ
એતાઞ્જુહુયાદભ્યાતાનૈરેવ ભ્રાતૃવ્યાનભ્યાતનુતે જયૈર્જયતિ
રાષ્ટ્રભૃદ્ભી રાષ્ટ્રમા દત્તે ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો
ભવતિ ॥ ૩। ૪। ૬॥ પ્રાજાપત્યાસ્સોષ્ટાદશ ચ ॥ ૩। ૪। ૬॥
૧૯ ઋતાષાડૃતધામાગ્નિર્ગન્ધર્વસ્તસ્યૌષધયોઽપ્સરસ ઊર્જો
નામ સ ઇદં બ્રહ્મ ક્ષત્રં પાતુ તા ઇદં બ્રહ્મ ક્ષત્રં પાન્તુ
તસ્મૈ સ્વાહા તાભ્યઃ સ્વાહા સઁહિતો વિશ્વસામા સૂર્યો ગન્ધર્વસ્તસ્ય
મરીચયોઽપ્સરસ આયુવઃ સુષુમ્નઃ સૂર્યરશ્મિશ્ચન્દ્રમા ગન્ધર્વસ્તસ્ય
નક્ષત્રાણ્યપ્સરસો બેકુરયો ભુજ્યુઃ સુપર્ણો યજ્ઞો ગન્ધર્વસ્તસ્ય
દક્ષિણા અપ્સરસઃ સ્તવાઃ પ્રજાપતિર્વિશ્વકર્મા મનો
૨૦ ગન્ધર્વસ્તસ્યર્ક્સામાન્યપ્સરસો વહ્નય ઇષિરો વિશ્વવ્યચા વાતો
ગન્ધર્વસ્તસ્યાપોઽપ્સરસો મુદા ભુવનસ્ય પતે યસ્ય ત ઉપરિ ગૃહા
ઇહ ચ । સ નો રાસ્વાજ્યાનિઁ રાયસ્પોષઁસુવીર્યઁસંવથ્સરીણાઞ્
સ્વસ્તિમ્ ॥ પરમેષ્ઠ્યધિપતિર્મૃત્યુર્ગન્ધર્વસ્તસ્ય વિશ્વમપ્સરસો

ભુવઃ સુક્ષિતિઃ સુભૂતિર્ભદ્રકૃથ્સુવર્વાન્પર્જન્યો ગન્ધર્વસ્તસ્ય
વિદ્યુતોઽપ્સરસો રુચો દૂરેહેતિરમૃડયો
૨૧ મૃત્યુર્ગન્ધર્વસ્તસ્ય પ્રજા અપ્સરસો ભીરુવશ્ચારુઃ કૃપણકાશી
કામો ગન્ધર્વસ્તસ્યાધયોઽપ્સરસઃ શોચયન્તીર્નામ સ ઇદં બ્રહ્મ
ક્ષત્રં પાતુ તા ઇદં બ્રહ્મ ક્ષત્રં પાન્તુ તસ્મૈ સ્વાહા તાભ્યઃ સ્વાહા
સ નો ભુવનસ્ય પતે યસ્ય ત ઉપરિ ગૃહા ઇહ ચ । ઉરુ બ્રહ્મણેઽસ્મૈ
ક્ષત્રાય મહિ શર્મ યચ્છ ॥ ૩। ૪। ૭॥ મનોઽમૃડયષ્ષટ્ચત્વારિꣳશચ્ચ
॥ ૩। ૪। ૭॥
૨૨ રાષ્ટ્રકામાય હોતવ્યા રાષ્ટ્રં વૈ રાષ્ટ્રભૃતો રાષ્ટ્રેણૈવાસ્મૈ
રાષ્ટ્રમવ રુંધે રાષ્ટ્રમેવ ભવત્યાત્મને હોતવ્યા રાષ્ટ્રં વૈ
રાષ્ટ્રભૃતો રાષ્ટ્રં પ્રજા રાષ્ટ્રં પશવો રાષ્ટ્રં યચ્છ્રેષ્ઠો
ભવતિ રાષ્ટ્રેણૈવ રાષ્ટ્રમવ રુંધે વસિષ્ઠઃ સમાનાનાં ભવતિ
ગ્રામકામાય હોતવ્યા રાષ્ટ્રં વૈ રાષ્ટ્રભૃતો રાષ્ટ્રꣳ સજાતા
રાષ્ટ્રેણૈવાસ્મૈ રાષ્ટ્રꣳ સજાતાનવ રુંધે ગ્રા
૨૩ મ્યેવ ભવત્યધિદેવને જુહોત્યધિદેવન એવાસ્મૈ સજાતાનવ રુંધે
ત એનમવરુદ્ધા ઉપ તિષ્ઠન્તે રથમુખ ઓજસ્કામસ્ય હોતવ્યા ઓજો
વૈ રાષ્ટ્રભૃત ઓજો રથ ઓજસૈવાસ્મા ઓજોઽવ રુંધ ઓજસ્વ્યેવ
ભવતિ યો રાષ્ટ્રાદપભૂતઃ સ્યાત્તસ્મૈ હોતવ્યા યાવન્તોઽસ્ય રથાઃ
સ્યુસ્તાન્બ્રૂયાદ્યુઙ્ધ્વમિતિ રાષ્ટ્રમેવાસ્મૈ યુનક્ત્યા
૨૪ ઽહુતયો વા એતસ્યાક્લૃપ્તા યસ્ય રાષ્ટ્રં ન કલ્પતે સ્વરથસ્ય
દક્ષિણં ચક્રં પ્રવૃહ્ય નાડીમભિ જુહુયાદાહુતીરેવાસ્ય કલ્પયતિ
તા અસ્ય કલ્પમાના રાષ્ટ્રમનુ કલ્પતે સંગ્રામે સંયત્તે હોતવ્યા રાષ્ટ્રં
વૈ રાષ્ટ્રભૃતો રાષ્ટ્રે ખલુ વા એતે વ્યાયચ્છન્તે યે સંગ્રામꣳ
સંયન્તિ યસ્ય પૂર્વસ્ય જુહ્વતિ સ એવ ભવતિ જયતિ તꣳ
સંગ્રામં માન્ધુક ઇધ્મો
૨૫ ભવત્યઙ્ગારા એવ પ્રતિવેષ્ટમાના અમિત્રાણામસ્ય સેનાં પ્રતિ
વેષ્ટયન્તિ ય ઉન્માદ્યેત્તસ્મૈ હોતવ્યા ગન્ધર્વાપ્સરસો વા એતમુન્માદયન્તિ

ય ઉન્માદ્યત્યેતે ખલુ વૈ ગન્ધર્વાપ્સરસો યદ્રાષ્ટ્રભૃતસ્તસ્મૈ
સ્વાહા તાભ્યઃ સ્વાહેતિ જુહોતિ તેનૈવૈનાઙ્છમયતિ નૈયગ્રોધ ઔદુંબર
આશ્વત્થઃ પ્લાક્ષ ઇતીધ્મો ભવત્યેતે વૈ ગન્ધર્વાપ્સરસાં ગૃહાઃ સ્વ
એવૈના
૨૬ નાયતને શમયત્યભિચરતા પ્રતિલોમꣳ હોતવ્યાઃ પ્રાણાનેવાસ્ય
પ્રતીચઃ પ્રતિ યૌતિ તં તતો યેન કેન ચ સ્તૃણુતે સ્વકૃત ઇરિણે
જુહોતિ પ્રદરે વૈતદ્વા અસ્યૈ નિરૃતિગૃહીતં નિર્ઋતિગૃહીત એવૈનં
નિર્ઋત્યા ગ્રાહયતિ યદ્વાચઃ ક્રૂરં તેન વષટ્કરોતિ વાચ એવૈનં
ક્રૂરેણ પ્ર વૃશ્ચતિ તાજગાર્તિમાર્ચ્છતિ યસ્ય કામયેતાન્નાદ્ય
૨૭ મા દદીયેતિ તસ્ય સભાયામુત્તાનો નિપદ્ય ભુવનસ્ય
પત ઇતિ તૃણાનિ સં ગૃહ્ણીયાત્પ્રજાપતિર્વૈ ભુવનસ્ય પતિઃ
પ્રજાપતિનૈવાસ્યાન્નાદ્યમા દત્ત ઇદમહમમુષ્યામુષ્યાયણસ્યાન્નાદ્યꣳ
હરામીત્યાહાન્નાદ્યમેવાસ્ય હરતિ ષડ્ભિર્હરતિ ષડ્વા ઋતવઃ
પ્રજાપતિનૈવાસ્યાન્નાદ્યમાદાયર્તવોઽસ્મા અનુ પ્ર યચ્છન્તિ
૨૮ યો જ્યેષ્ઠબન્ધુરપભૂતઃ સ્યાત્તꣳ સ્થલેઽવસાય્ય બ્રહ્મૌદનં
ચતુઃશરાવં પક્ત્વા તસ્મૈ હોતવ્યા વર્ષ્મ વૈ રાષ્ટ્રભૃતો વર્ષ્મ
સ્થલં વર્ષ્મણૈવૈનં વર્ષ્મ સમાનાનાં ગમયતિ ચતુઃશરાવો ભવતિ
દિક્ષ્વેવ પ્રતિ તિષ્ઠતિ ક્ષીરે ભવતિ રુચમેવાસ્મિન્દધાત્યુદ્ધરતિ
શૃતત્વાય સર્પિષ્વાન્ભવતિ મેધ્યત્વાય ચત્વાર આર્ષેયાઃ પ્રાશ્નન્તિ
દિશામેવ જ્યોતિષિ જુહોતિ ॥ ૩। ૪। ૮॥ ગ્રામી યુનક્તીધ્મઃ સ્વ એવૈનાનન્નાદ્યં
યચ્છંત્યેકાન્ન પંચાશચ્ચ ॥ ૩। ૪। ૮॥
૨૯ દેવિકા નિર્વપેત્પ્રજાકામશ્છન્દાꣳસિ વૈ દેવિકાશ્છન્દાꣳસીવ
ખલુ વૈ પ્રજાશ્છન્દોભિરેવાસ્મૈ પ્રજાઃ પ્ર જનયતિ પ્રથમં ધાતારં
કરોતિ મિથુની એવ તેન કરોત્યન્વેવાસ્મા અનુમતિર્મન્યતે રાતે રાકા પ્ર
સિનીવાલી જનયતિ પ્રજાસ્વેવ પ્રજાતાસુ કુહ્વા વાચં દધાત્યેતા એવ
નિર્વપેત્પશુકામશ્છન્દાꣳસિ વૈ દેવિકાશ્છન્દાꣳસી
૩૦ વ ખલુ વૈ પશવશ્છન્દોભિરેવાસ્મૈ પશૂન્ પ્ર જનયતિ પ્રથમં

ધાતારં કરોતિ પ્રૈવ તેન વાપયત્યન્વેવાસ્મા અનુમતિર્મન્યતે રાતે રાકા
પ્ર સિનીવાલી જનયતિ પશૂનેવ પ્રજાતાન્કુહ્વા પ્રતિષ્ઠાપયત્યેતા એવ
નિર્વપેદ્ગ્રામકામશ્છન્દાꣳસિ વૈ દેવિકાશ્છન્દાꣳસીવ ખલુ
વૈ ગ્રામશ્છન્દોભિરેવાસ્મૈ ગ્રામ
૩૧ મવ રુંધે મધ્યતો ધાતારં કરોતિ મધ્યત એવૈનં ગ્રામસ્ય દધાત્યેતા
એવ નિર્વપેજ્જ્યોગામયાવી છન્દાꣳસિ વૈ દેવિકાશ્છન્દાꣳસિ ખલુ
વા એતમભિ મન્યન્તે યસ્ય જ્યોગામયતિ છન્દોભિરેવૈનમગદં કરોતિ
મધ્યતો ધાતારં કરોતિ મધ્યતો વા એતસ્યાઽક્લૃપ્તં યસ્ય જ્યોગામયતિ
મધ્યત એવાસ્ય તેન કલ્પયત્યેતા એવ નિ
૩૨ ર્વપેદ્યં યજ્ઞો નોપનમેચ્છન્દાꣳસિ વૈ દેવિકાશ્છન્દાꣳસિ
ખલુ વા એતં નોપ નમન્તિ યં યજ્ઞો નોપનમતિ પ્રથમં ધાતારં
કરોતિ મુખત એવાસ્મૈ છન્દાꣳસિ દધાત્યુપૈનં યજ્ઞો નમત્યેતા એવ
નિર્વપેદીજાનશ્છન્દાꣳસિ વૈ દેવિકા યાતયામાનીવ ખલુ વા એતસ્ય
છન્દાꣳસિ ય ઈજાન ઉત્તમં ધાતારં કરો
૩૩ ત્યુપરિષ્ટાદેવાસ્મૈ છન્દાગ્સ્યયાતયામાન્યવ રુંધ ઉપૈનમુત્તરો
યજ્ઞો નમત્યેતા એવ નિર્વપેદ્યં મેધા નોપનમેચ્છન્દાꣳસિ વૈ
દેવિકાશ્છન્દાꣳસિ ખલુ વા એતં નોપ નમન્તિ યં મેધા નોપનમતિ
પ્રથમં ધાતારં કરોતિ મુખત એવાસ્મૈ છન્દાꣳસિ દધાત્યુપૈનં
મેધા નમત્યેતા એવ નિર્વપેદ્
૩૪ રુક્કામશ્છન્દાꣳસિ વૈ દેવિકાશ્છન્દાꣳસીવ ખલુ વૈ
રુક્છન્દોભિરેવાસ્મિન્રુચં દધાતિ ક્ષીરે ભવન્તિ રુચમેવાસ્મિન્દધતિ
મધ્યતો ધાતારં કરોતિ મધ્યત એવૈનꣳરુચો દધાતિ
ગાયત્રી વા અનુમતિસ્ત્રિષ્ટુગ્રાકા જગતી સિનીવાલ્યનુષ્ટુપ્કુહૂર્ધાતા
વષટ્કારઃ પૂર્વપક્ષો રાકાપરપક્ષઃ કુહૂરમાવાસ્યા સિનીવાલી
પૌર્ણમાસ્યનુમતિશ્ચન્દ્રમા ધાતાષ્ટૌ
૩૫ વસવોઽષ્ટાક્ષરા ગાયત્ર્યેકાદશ રુદ્રા એકાદશાક્ષરા
ત્રિષ્ટુબ્દ્વાદશાદિત્યા દ્વાદશાક્ષરા જગતી પ્રજાપતિરનુષ્ટુબ્ધાતા

વષટ્કાર એતદ્વૈ દેવિકાઃ સર્વાણિ ચ છન્દાꣳસિ સર્વાશ્ચ દેવતા
વષટ્કારસ્તા યથ્સહ સર્વા નિર્વપેદીશ્વરા એનં પ્રદહો દ્વે પ્રથમે
નિરુપ્ય ધાતુસ્તૃતીયં નિર્વપેત્તથો એવોત્તરે નિર્વપેત્તથૈનં
ન પ્ર દહન્ત્યથો યસ્મૈ કામાય નિરુપ્યન્તે તમેવાભિરુપાપ્નોતિ ॥ ૩। ૪। ૯॥
પશુકામશ્છંદાꣳસિ વૈ દેવિકાશ્છંદાꣳસિ ગ્રામં કલ્પયત્યેતા એવ
નિરુત્તમં ધાતારં કરોતિ મેધા નમત્યેતા એવ નિર્વપેદષ્ટૌ દહંતિ
નવ ચ ॥ ૩। ૪। ૯॥ દેવિકાઃ પ્રજાકામો મિથુની પ્રજાનુ પશુકામઃ પ્રૈવ
ગ્રામકામો જ્યોગામયાવીયં યજ્ઞો ય ઈજાનો યં મેધા રુક્કામોષ્ટૌ ॥ દેવિકા
ભવંતિ દધતિ રાષ્ટ્રકામાય ભવતિ દધાતિ ॥

૩૬ વાસ્તોષ્પતે પ્રતિ જાનીહ્યસ્માન્થ્સ્વાવેશો અનમીવો ભવા નઃ । યત્ત્વેમહે
પ્રતિ તન્નો જુષસ્વ શં ન એધિ દ્વિપદે શં ચતુષ્પદે ॥ વાસ્તોષ્પતે
શગ્મયા સꣳસદા તે સક્ષીમહિ રણ્વયા ગાતુમત્યા । આવઃ,
ક્ષેમ ઉત યોગે વરં નો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ યથ્સાયં
પ્રાતરગ્નિહોત્રં જુહોત્યાહુતીષ્ટકા એવ તા ઉપ ધત્તે

૩૭ યજમાનોઽહોરાત્રાણિ વા એતસ્યેષ્ટકા ય આહિતાગ્નિર્યથ્સાયં
પ્રાતર્જુહોત્યહોરાત્રાણ્યેવાપ્ત્વેષ્ટકાઃ કૃત્વોપ ધત્તે દશ સમાનત્ર
જુહોતિ દશાક્ષરા વિરાડ્વિરાજમેવાપ્ત્વેષ્ટકાં કૃત્વોપ ધત્તેઽથો
વિરાજ્યેવ યજ્ઞમાપ્નોતિ ચિત્યશ્ચિત્યોઽસ્ય ભવતિ તસ્માદ્યત્ર દશોષિત્વા
પ્રયાતિ તદ્યજ્ઞવાસ્ત્વવાસ્ત્વેવ તદ્યત્તતોઽર્વાચીનꣳ

૩૮ રુદ્રઃ ખલુ વૈ વાસ્તોષ્પતિર્યદહુત્વા વાસ્તોષ્પતીયં પ્રયાયાદ્રુદ્ર એનં
ભૂત્વાગ્નિરનૂત્થાય હન્યાદ્વાસ્તોષ્પતીયં જુહોતિ ભાગધેયેનૈવૈનꣳ
શમયતિ નાર્તિમાર્ચ્છતિ યજમાનો યદ્યુક્તે જુહુયાદ્યથા પ્રયાતે
વાસ્તાવાહુતિં જુહોતિ તાદૃગેવ તદ્યદયુક્તે જુહુયાદ્યથા ક્ષેમ આહુતિં
જુહોતિ તાદૃગેવ તદહુતમસ્ય વાસ્તોષ્પતીયꣳ સ્યાદ્

૩૯ દક્ષિણો યુક્તો ભવતિ સવ્યોઽયુક્તોઽથ વાસ્તોષ્પતીયં
જુહોત્યુભયમેવાકરપરિવર્ગમેવૈનꣳ શમયતિ યદેકયા
જુહુયાદ્દર્વિહોમં કુર્યાત્ પુરોઽનુવાક્યામનૂચ્ય યાજ્યયા જુહોતિ સદેવત્વાય

યદ્ધુત આદધ્યાદ્રુદ્રં ગૃહાનન્વારોહયેદ્યદવક્ષાણાન્યસં
પ્રક્ષાપ્ય પ્રયાયાદ્યથા યજ્ઞવેશસં વાદહનં વા તાદૃગેવ તદયંતે
યોનિરૃત્વિય ઇત્યરણ્યોઃ સમારોહય
૪૦ ત્યેષ વા અગ્નેર્‌યોનિઃ સ્વ એવૈનં યોનૌ સમારોહયત્યથો
ખલ્વાહુર્યદરણ્યોઃ સમારૂઢો નશ્યેદુદસ્યાગ્નિઃ સીદેત્પુનરાધેયઃ
સ્યાદિતિ યા તે અગ્ને યજ્ઞિયા તનૂસ્તયેહ્યા રોહેત્યાત્મન્થ્સમારોહયતે
યજમાનો વા અગ્નેર્‌યોનિઃ સ્વાયામેવૈનં યોન્યાꣳસમારોહયતે ॥ ૩। ૪। ૧૦॥
ધત્તેઽર્વાચીનગ્ગ્ સ્યાથ્સમારોહયતિ પંચ ચત્વારિꣳ શચ્ચ ॥ ૩। ૪। ૧૦॥
૪૧ ત્વમગ્ને બૃહદ્વયો દધાસિ દેવ દાશુષે । કવિર્ગૃહપતિર્યુવા
॥ હવ્યવાડગ્નિરજરઃ પિતા નો વિભુર્વિભાવા સુદૃશીકો અસ્મે ।
સુગાર્હપત્યાઃ સમિષો દિદીહ્યસ્મદ્રિયક્સંમિમીહિ શ્રવાꣳસિ ॥
ત્વં ચ સોમ નો વશો જીવાતું ન મરામહે । પ્રિયસ્તોત્રો વનસ્પતિઃ
॥ બ્રહ્મા દેવાનાં પદવીઃ કવીનામૃષિર્વિપ્રાણાં મહિષો મૃગાણામ્ ।
શ્યેનો ગૃધ્રાણાગ્ સ્વધિતિર્વનાનાꣳ સોમઃ
૪૨ પવિત્રમત્યેતિ રેભન્ ॥ આ વિશ્વદેવꣳ સત્પતિꣳ સૂક્તૈરદ્યા
વૃણીમહે । સત્યસવꣳ સવિતારમ્ ॥ આ સત્યેન રજસા વર્તમાનો
નિવેશયન્નમૃતં મર્ત્યં ચ । હિરણ્યયેન સવિતા રથેના દેવો યાતિ
ભુવના વિપશ્યન્ ॥ યથા નો અદિતિઃ કરત્ પશ્વે નૃભ્યો યથા ગવે ।
યથા તોકાય રુદ્રિયમ્ ॥ મા નસ્તોકે તનયે મા ન આયુષિ મા નો ગોષુ મા
૪૩ નો અશ્વેષુ રીરિષઃ । વીરાન્મા નો રુદ્ર ભામિતો વધીર્હવિષ્મન્તો
નમસા વિધેમ તે ॥ ઉદપ્રુતો ન વયો રક્ષમાણા વાવદતો અભ્રિયસ્યેવ
ઘોષાઃ । ગિરિભ્રજો નોર્મયો મદન્તો બૃહસ્પતિમભ્યર્કા અનાવન્ ॥
હꣳસૈરિવ સખિભિર્વાવદદ્ભિરશ્મન્મયાનિ નહના વ્યસ્યન્
। બૃહસ્પતિરભિકનિક્રદદ્ગાઉત પ્રાસ્તૌદુચ્ચ વિદ્વાꣳ અગાયત્ ॥
એન્દ્ર સાનસિꣳ રયિꣳ
૪૪ સજિત્વાનꣳ સદાસહમ્ । વર્ષિષ્ઠમૂતયે ભર ॥ પ્ર સસાહિષે પુરુહૂત

શત્રૂઞ્જ્યેષ્ઠસ્તે શુષ્મ ઇહ રાતિરસ્તુ । ઇન્દ્રા ભર દક્ષિણેના
વસૂનિ પતિઃ સિન્ધૂનામસિ રેવતીનામ્ ॥ ત્વઁ સુતસ્ય પીતયે સદ્યો
વૃદ્ધો અજાયથાઃ । ઇન્દ્ર જ્યૈષ્ઠ્યાય સુક્રતો ॥ ભુવસ્ત્વમિન્દ્ર બ્રહ્મણા
મહાન્ભુવો વિશ્વેષુ સવનેષુ યજ્ઞિયઃ । ભુવો નૄઞ્શ્ચ્યૌત્નો વિશ્વસ્મિન્
ભરે જ્યેષ્ઠશ્ચ મન્ત્રો

૪૫ વિશ્વચર્ષણે ॥ મિત્રસ્ય ચર્ષણીધૃતઃ શ્રવો દેવસ્ય સાનસિમ્ । સત્યં
ચિત્રશ્રવસ્તમમ્ ॥ મિત્રો જનાન્ યાતયતિ પ્રજાનન્મિત્રો દાધાર પૃથિવીમુત
દ્યામ્ । મિત્રઃ કૃષ્ટીરનિમિષાભિ ચષ્ટે સત્યાય હવ્યં ઘૃતવદ્વિધેમ
॥ પ્ર સ મિત્ર મર્તો અસ્તુ પ્રયસ્વાન્ યસ્ત આદિત્ય શિક્ષતિ વ્રતેન
। ન હન્યતે ન જીયતે ત્વોતો નૈનમઁહો અશ્નોત્યન્તિતો ન દૂરાત્ ॥ ય

૪૬ ચ્ચિદ્ધિ તે વિશો યથા પ્ર દેવ વરુણ વ્રતમ્ । મિનીમસિ દ્યવિદ્યવિ
॥ યત્કિં ચેદં વરુણ દૈવ્યે જનેઽભિદ્રોહં મનુષ્યાશ્ચરામસિ
। અચિત્તી યત્તવ ધર્મા યુયોપિમ મા નસ્તસ્માદેનસો દેવ રીરિષઃ ॥

કિતવાસો યદ્રિરિપુર્ન દીવિ યદ્વા ઘા સત્યમુત યન્ન વિદ્મ । સર્વા તા
વિષ્ય શિથિરેવ દેવાથા તે સ્યામ વરુણ પ્રિયાસઃ ॥ ૩। ૪। ૧૧॥ સોમો ગોષુ
મા રયિં મંત્રો યચ્છિથિરા સપ્ત ચ ॥ ૩। ૪। ૧૧॥

વિ વા એતસ્યાઽવાયો ઇમે વૈ ચિત્તં ચાગ્નિર્ભૂતાનાં દેવા વા
અભ્યાતાનાનૃતાષાડ્રાષ્ટ્ર કામાય દેવિકા વાસ્તોષ્પતે ત્વમગ્ને
બૃહદેકાદશ ॥

વિવા એતસ્યેત્યાહ મૃત્યુર્ગંધર્વોવ રુંધે મધ્યતસ્ત્વમગ્ને બૃહત્ષટ્
ચત્વારિઁશત્ ॥

વિવા એતસ્ય પ્રિયાસઃ ॥

## તૃતીયકાણ્ડે પઞ્ચમઃ પ્રશ્નઃ ૫

૧ પૂર્ણા પશ્ચાદુત પૂર્ણા પુરસ્તાદુન્મધ્યતઃ પૌર્ણમાસી જિગાય ।
તસ્યાં દેવા અધિ સંવસન્ત ઉત્તમે નાક ઇહ માદયન્તામ્ ॥ યત્તે દેવા

અદધુર્ભાગધેયમમાવાસ્યે સંવસન્તો મહિત્વા । સા નો યજ્ઞં પિપૃહિ
વિશ્વવારે રયિં નો ધેહિ સુભગે સુવીરમ્ ॥ નિવેશની સઙ્ગમની વસૂનાં
વિશ્વા રૂપાણિ વસૂન્યાવેશયન્તી । સહસ્રપોષꣳ સુભગા રરાણા
સા ન આ ગન્વર્ચસા
૨ સંવિદાના ॥ અગ્નીષોમૌ પ્રથમૌ વીર્યેણ વસૂન્રુદ્રાનાદિત્યાનિહ
જિન્વતમ્ । માધ્યꣳ હિ પૌર્ણમાસં જુષેથાં બ્રહ્મણા વૃદ્ધૌ
સુકૃતેન સાતાવથાસ્મભ્યꣳસહવીરાꣳ રયિં નિ યચ્છતમ્
॥ આદિત્યાશ્ચાંગિરસશ્ચાગ્નીનાદધત તે દર્શપૂર્ણમાસૌ
પ્રૈપ્સન્તેષામંગિરસાં નિરુપ્તꣳ હવિરાસીદથાદિત્યા એતૌ
હોમાવપશ્યન્તાવજુહવુસ્તતો વૈ તે દર્શપૂર્ણમાસૌ
૩ પૂર્વ આલભન્ત દર્શપૂર્ણમાસાવાલભમાન એતૌ હોમૌ
પુરસ્તાજ્જુહુયાત્સાક્ષાદેવ દર્શપૂર્ણમાસાવા લભતે બ્રહ્મવાદિનો વદન્તિ
સ ત્વૈ દર્શપૂર્ણમાસાવા લભેત ય એનયોરનુલોમં ચ પ્રતિલોમં ચ
વિદ્યાદિત્યમાવાસ્યાયા ઊર્ધ્વં તદનુલોમં પૌર્ણમાસ્યૈ પ્રતીચીનં
તત્પ્રતિલોમં યત્પૌર્ણમાસીં પૂર્વામાલભેત પ્રતિલોમમેનાવા
લભેતામુમપક્ષીયમાણમન્વપ
૪ ક્ષીયેત સારસ્વતૌ હોમૌ પુરસ્તાજ્જુહુયાદમાવાસ્યા વૈ
સરસ્વત્યનુલોમમેવૈનાવા લભતેઽમુમાપ્યાયમાનમન્વા પ્યાયત
આગ્નાવૈષ્ણવમેકાદશકપાલં પુરસ્તાન્નિર્વપેત્સરસ્વત્યૈ ચરુꣳ
સરસ્વતે દ્વાદશકપાલં યદાગ્નેયો ભવત્યગ્નિર્વૈ યજ્ઞમુખં
યજ્ઞમુખમેવર્ધિં પુરસ્તાદ્ધત્તે યદ્વૈષ્ણવો ભવતિ યજ્ઞો વૈ
વિષ્ણુર્યજ્ઞમેવારભ્ય પ્ર તનુતે સરસ્વત્યૈ ચરુર્ભવતિ સરસ્વતે
દ્વાદશકપાલોઽમાવાસ્યા વૈ સરસ્વતી પૂર્ણમાસઃ સરસ્વાન્તાવેવ સાક્ષાદા
રભત ઋધ્નોત્યાભ્યાં દ્વાદશકપાલઃ સરસ્વતે ભવતિ મિથુનત્વાય
પ્રજાત્યૈ મિથુનૌ ગાવૌ દક્ષિણા સમૃદ્ધ્યૈ ॥ ૩। ૫। ૧॥ વર્ચસા વૈ તે
દર્શપૂર્ણમાસાવપ તનુતે સરસ્વત્યૈ પંચવિꣳશતિશ્ચ ॥ ૩। ૫। ૧॥
૫ ઋષયો વા ઇન્દ્રં પ્રત્યક્ષં નાપશ્યન્તં વસિષ્ઠઃ પ્રત્યક્ષં

પશ્યથ્સોઽબ્રવીદ્ બ્રાહ્મણં તે વક્ષ્યામિ યથા ત્વત્પુરોહિતાઃ પ્રજાઃ
પ્રજનિષ્યન્તેઽથ મેતરેભ્ય ઋષિભ્યો મા પ્ર વોચ ઇતિ તસ્મા
એતાન્થ્સ્તોમભાગાનબ્રવીત્તતો વસિષ્ઠપુરોહિતાઃ પ્રજાઃ પ્રાજાયન્ત
તસ્માદ્વાસિષ્ઠો બ્રહ્મા કાર્યઃ પ્રૈવ જાયતે રશ્મિરસિ ક્ષયાય ત્વા
ક્ષયં જિન્વે
૬ ત્યાહ દેવા વૈ ક્ષયો દેવેભ્ય એવ યજ્ઞં પ્રાહ પ્રેતિરસિ ધર્માય
ત્વા ધર્મં જિન્વેત્યાહ મનુષ્યા વૈ ધર્મો મનુષ્યેભ્ય એવ યજ્ઞં
પ્રાહાન્વિતિરસિ દિવે ત્વા દિવં જિન્વેત્યાહૈભ્ય એવ લોકેભ્યો યજ્ઞં પ્રાહ
વિષ્ટંભોઽસિ વૃષ્ટ્યૈ ત્વા વૃષ્ટિં જિન્વેત્યાહ વૃષ્ટિમેવાવ
૭ રુંધે પ્રવાસ્યનુવાસીત્યાહ મિથુનત્વાયોશિગસિ વસુભ્યસ્ત્વા
વસૂંજિન્વેત્યાહાષ્ટૌ વસવ એકાદશ રુદ્રા દ્વાદશાદિત્યા એતાવન્તો
વૈ દેવાસ્તેભ્ય એવ યજ્ઞં પ્રાહૌજોઽસિ પિતૃભ્યસ્ત્વા પિતૃંજિન્વેત્યાહ
દેવાનેવ પિતૃનનુ સં તનોતિ તન્તુરસિ પ્રજાભ્યસ્ત્વા પ્રજા જિન્વે
૮ ત્યાહ પિતૃનેવ પ્રજા અનુ સં તનોતિ પૃતનાષાડસિ
પશુભ્યસ્ત્વા પશૂંજિન્વેત્યાહ પ્રજા એવ પશૂનનુ સં તનોતિ
રેવદસ્યોષધીભ્યસ્ત્વૌષધીર્જિન્વેત્યાહૌષધીષ્વેવ પશૂન્પ્રતિ
ષ્ઠાપયત્યભિજિદસિ યુક્તગ્રાવેન્દ્રાય ત્વેન્દ્રં જિન્વેત્યાહાભિજિત્યા
અધિપતિરસિ પ્રાણાય ત્વા પ્રાણં
૯ જિન્વેત્યાહ પ્રજાસ્વેવ પ્રાણાન્દધાતિ ત્રિવૃદસિ પ્રવૃદસીત્યાહ
મિથુનત્વાય સꣳ રોહોઽસિ નીરોહોઽસીત્યાહ પ્રજાત્યૈ વસુકોઽસિ
વેષશ્રિરસિ વસ્યષ્ટિરસીત્યાહ પ્રતિષ્ઠિત્યૈ ॥ ૩। ૫। ૨॥ જિન્વેત્યવ
પ્રજા જિન્વ પ્રાણં ત્રિ ꣳ શચ્ચ ॥ ૩। ૫। ૨॥
૧૦ અગ્નિના દેવેન પૃતના જયામિ ગાયત્રેણ છંદસા ત્રિવૃતા સ્તોમેન
રથન્તરેણ સામ્ના વષટ્કારેણ વજ્રેણ પૂર્વજાન્ ભ્રાતૃવ્યાનધરાન્
પાદયામ્યવૈનાન્ બાધે પ્રત્યેનાન્નુદેઽસ્મિન્ ક્ષયેઽસ્મિન્ ભૂમિલોકે
યોઽસ્માન્દ્વેષ્ટિ યં ચ વયં દ્વિષ્મો વિષ્ણોઃ ક્રમેણાત્યેનાન્ ક્રામામીન્દ્રેણ
દેવેન પૃતના જયામિ ત્રૈષ્ટુભેન છંદસા પઞ્ચદશેન સ્તોમેન

બૃહતા સામ્ના વષટ્કારેણ વજ્રેણ

૧૧ સહજાન્વિશ્વેભિર્દેવેભિઃ પૃતના જયામિ જાગતેન છંદસા સપ્તદશેન
સ્તોમેન વામદેવ્યેન સામ્ના વષટ્કારેણ વજ્રેણાપરજાનિન્દ્રેણ સયુજો
વયꣳ સાસહ્યામ પૃતન્યતઃ । ઘ્નન્તો વૃત્રાણ્યપ્રતિ । યત્તે અગ્ને
તેજસ્તેનાહં તેજસ્વી ભૂયાસં યત્તે અગ્ને વર્ચસ્તેનાહં વર્ચસ્વી
ભૂયાસં યત્તે અગ્ને હરસ્તેનાહꣳ હરસ્વી ભૂયાસમ્ ॥ ૩। ૫। ૩॥ બૃહતા
સામ્ના વષટ્કારેણ વજ્રેણ ષટ્ ચત્વારિꣳશચ્ચ ॥ ૩। ૫। ૩॥

૧૨ યે દેવા યજ્ઞહનો યજ્ઞમુષઃ પૃથિવ્યામધ્યાસતે । અગ્નિર્મા તેભ્યો
રક્ષતુ ગચ્છેમ સુકૃતો વયમ્ ॥ આગન્મ મિત્રાવરુણા વરેણ્યા રાત્રીણાં ભાગો
યુવયોર઼્યો અસ્તિ । નાકં ગૃભ્ણાનાઃ સુકૃતસ્ય લોકે તૃતીયે પૃષ્ઠે
અધિ રોચને દિવઃ ॥ યે દેવા યજ્ઞહનો યજ્ઞમુષોઽન્તરિક્ષેઽધ્યાસતે
। વાયુર્મા તેભ્યો રક્ષતુ ગચ્છેમ સુકૃતો વયમ્ ॥ યાસ્તે રાત્રીઃ સવિત

૧૩ ર્દેવયાનીરન્તરા દ્યાવાપૃથિવી વિયન્તિ । ગૃહૈશ્ચ સર્વૈઃ
પ્રજયાન્વગ્રે સુવો રુહાણાસ્તરતા રજાꣳસિ ॥ યે દેવા યજ્ઞહનો
યજ્ઞમુષો દિવ્યધ્યાસતે । સૂર઼્યો મા તેભ્યો રક્ષતુ ગચ્છેમ સુકૃતો
વયમ્ ॥ યેનેન્દ્રાય સમભરઃ પયાગ્સ્યુત્તમે ન હવિષા જાતવેદઃ ।
તેનાગ્ને ત્વમુત વર્ધયેમꣳ સજાતાનાગ્ શ્રૈષ્ઠ્ય આ ધેહ્યેનમ્ ॥
યજ્ઞહનો વૈ દેવા યજ્ઞમુષઃ

૧૪ સન્તિ ત એષુ લોકેષ્વાસત આદદાના વિમથ્નાના યો દદાતિ યો યજતે
તસ્ય । યે દેવા યજ્ઞહનઃ પૃથિવ્યામધ્યાસતે યે અન્તરિક્ષે યે
દિવીત્યાહેમાનેવ લોકાગ્સ્તીર્ત્વા સગૃહઃ સપશુઃ સુવર્ગં લોકમેત્યપ વૈ
સોમેનેજાનાદ્દેવતાશ્ચ યજ્ઞશ્ચ ક્રામન્ત્યાગ્નેયં પઞ્ચકપાલમુદવસાનીયં
નિર્વપેદગ્નિઃ સર્વા દેવતાઃ

૧૫ પાઙ્ક્તો યજ્ઞો દેવતાશ્ચૈવ યજ્ઞં ચાવ રુંધે ગાયત્રો વા
અગ્નિર્ગાયત્રછન્દાસ્તં છંદસા વ્યર્ધયતિ યત્પઞ્ચકપાલં
કરોત્યષ્ટાકપાલઃ કાર઼્યોઽષ્ટાક્ષરા ગાયત્રી ગાયત્રોઽગ્નિર્ગાયત્ર
છન્દાઃ સ્વેનૈવૈનં છંદસા સમર્ધયતિ પઙ્ક્ત્યૌ યાજ્યાનુવાક્યે ભવતઃ

પાઙ્ક્તો યજ્ઞસ્તેનૈવ યજ્ઞાન્નૈતિ ॥ ૩। ૫। ૪॥ સવિતર્દેવા યજ્ઞમુષઃ
સર્વા દેવતાસ્ત્રિચત્વારિꣳ શચ્ચ ॥ ૩। ૫। ૪॥
૧૬ સૂરꣳ્યો મા દેવો દેવેભ્યઃ પાતુ વાયુરન્તરિક્ષાદ્યજમાનોઽગ્નિર્મા
પાતુ ચક્ષુષઃ । સક્ષ શૂષ સવિતર્વિશ્વચર્ષણ એતેભિઃ
સોમ નામભિર્વિધેમ તે તેભિઃ સોમ નામભિર્વિધેમ તે । અહં
પરસ્તાદહમવસ્તાદહં જ્યોતિષા વિ તમો વવાર । યદન્તરિક્ષં તદુ
મે પિતાભૂદહꣳ સૂર્યમુભયતો દદર્શાહં ભૂયાસમુત્તમઃ સમાનાના
૧૭ મા સમુદ્રાદાન્તરિક્ષાત્ પ્રજાપતિરુદધિં ચ્યાવયાતીન્દ્રઃ પ્ર સ્નૌતુ
મરુતો વર્ષયન્તૂન્નંભય પૃથિવીં ભિન્ધીદં દિવ્યં નભઃ । ઉદ્નો
દિવ્યસ્ય નો દેહીશાનો વિ સૃજા દૃતિમ્ ॥ પશવો વા એતે યદાદિત્ય
એષ રુદ્રો યદગ્નિરોષધીઃ પ્રાસ્યાગ્નાવાદિત્યં જુહોતિ રુદ્રાદેવ
પશૂનન્તર્દધાત્યથો ઓષધીષ્વેવ પશૂન્
૧૮ પ્રતિષ્ઠાપયતિ કવિર્યજ્ઞસ્ય વિ તનોતિ પન્થાં નાકસ્ય પૃષ્ઠે અધિ
રોચને દિવઃ । યેન હવ્યં વહસિ યાસિ દૂત ઇતઃ પ્રચેતા અમુતઃ
સનીયાન્ ॥ યાસ્તે વિશ્વાઃ સમિધઃ સન્ત્યગ્ને યાઃ પૃથિવ્યાં બર્હિષિ
સૂર્યે યાઃ । તાસ્તે ગચ્છન્ત્વાહુતિં ઘૃતસ્ય દેવાયતે યજમાનાય શર્મ
॥ આશાસાનઃ સુવીર્યꣳ રાયસ્પોષગ્ગ્ સ્વશ્વિયમ્ । બૃહસ્પતિના રાયા
સ્વગાકૃતો મહ્યં યજમાનાય તિષ્ઠ ॥ ૩। ૫। ૫॥ સમાનાનામોષધીષ્વેવ
પશૂન્મહ્યં યજમાનાયૈકં ચ ॥ ૩। ૫। ૫॥
૧૯ સં ત્વા નહ્યામિ પયસા ઘૃતેન સં ત્વા નહ્યામ્યપ ઓષધીભિઃ ।
સં ત્વા નહ્યામિ પ્રજયાહમદ્ય સા દીક્ષિતા સનવો વાજમસ્મે ॥
પ્રૈતુ બ્રહ્મણસ્પત્ની વેદિં વર્ણેન સીદતુ । અથાહમનુકામિની સ્વે
લોકે વિશા ઇહ । સુપ્રજસસ્ત્વા વયꣳ સુપત્નીરુપ સેદિમ । અગ્ને
સપત્નદંભનમદબ્ધાસો અદાભ્યમ્ ॥ ઇમં વિષ્યામિ વરુણસ્ય પાશં
૨૦ યમબધ્નીત સવિતા સુકેતઃ । ધાતુશ્ચ યોનૌ સુકૃતસ્ય લોકે
સ્યોનં મે સહ પત્યા કરોમિ ॥ પ્રેહ્યુદેહ્યૃતસ્ય વામીરન્વગ્નિસ્તેઽગ્રં
નયત્વદિતિર્મધ્યં દદતાꣳ રુદ્રાવસૃષ્ટાસિ યુવા નામ મા મા

હિ ૨ઁ સીર્વસુભ્યો રુદ્રેભ્ય આદિત્યેભ્યો વિશ્વેભ્યો વો દેવેભ્યઃ
પન્નેજનીર્ગૃહ્ણામિ યજ્ઞાય વઃ પન્નેજનીઃ સાદયામિ વિશ્વસ્ય તે વિશ્વાવતો
વૃષ્ણિયાવત
૨૧ સ્તવાગ્ને વામીરનુ સંદૃશિ વિશ્વા રેતા ૨ઁસિ ધિષીયાગન્દેવાન્,
યજ્ઞો નિ દેવીર્દેવેભ્યો યજ્ઞમશિષન્નસ્મિન્થ્સુન્વતિ યજમાન આશિષઃ
સ્વાહાકૃતાઃ સમુદ્રેષ્ઠા ગન્ધર્વમા તિષ્ઠતાનુ । વાતસ્ય પત્મન્નિડ
ઈડિતાઃ ॥ ૩। ૫। ૬॥ પાશં વૃષ્ણિયાવતસ્ત્રિ ૨ઁ શચ્ચ ॥ ૩। ૫। ૬॥
૨૨ વષટ્કારો વૈ ગાયત્રિયૈ શિરોઽચ્છિનત્ તસ્યૈ રસઃ પરાપતથ્સ
પૃથિવીં પ્રાવિશથ્સ ખદિરોઽભવદ્યસ્ય ખાદિરઃ સ્રુવો ભવતિ
છંદસામેવ રસેનાવ દ્યતિ સરસા અસ્યાહુતયો ભવન્તિ તૃતીયસ્યામિતો
દિવિ સોમ આસીત્તં ગાયત્ર્યાહરત્તસ્ય પર્ણમચ્છિદ્યત
તત્પર્ણોઽભવત્તત્પર્ણસ્ય પર્ણત્વં યસ્ય પર્ણમયી જુહૂર્
૨૩ ભવતિ સૌમ્યા અસ્યાહુતયો ભવન્તિ જુષન્તેઽસ્ય દેવા આહુતીર્દેવા
વૈ બ્રહ્મન્નવદન્ત તત્પર્ણ ઉપાશૃણોથ્સુશ્રવા વૈ નામ યસ્ય
પર્ણમયી જુહૂર્ભવતિ ન પાપર ૨ઁ શ્લોક ૨ઁશૃણોતિ બ્રહ્મ
વૈ પર્ણો વિણ્મરુતોઽન્નં વિણ્મારુતોઽશ્વત્થો યસ્ય પર્ણમયી
જુહૂર્ભવત્યાશ્વત્થ્યુપભૃદ્બ્રહ્મણૈવાન્નમવ રુંધેઽથો બ્રહ્મૈ
૨૪ વ વિશ્યધ્યૂહતિ રાષ્ટ્રં વૈ પર્ણો વિડશ્વત્થો યત્પર્ણમયી
જુહૂર્ભવત્યાશ્વત્થ્યુપભૃદ્રાષ્ટ્રમેવ વિશ્યધ્યૂહતિ
પ્રજાપતિર્વા અજુહોથ્સા યત્રાહુતિઃ પ્રત્યતિષ્ઠત્તતો વિકઙ્કત
ઉદતિષ્ઠત્તતઃ પ્રજા અસૃજત યસ્ય વૈકઙ્કતી ધ્રુવા ભવતિ
પ્રત્યેવાસ્યાહુતયસ્તિષ્ઠન્ત્યથો પ્રૈવ જાયત એતદ્વૈ સ્રુચા ૨ઁ રૂપં
યસ્યૈવ ૨ઁ રૂપાઃ સ્રુચો ભવન્તિ સર્વાણ્યેવૈન ૨ઁરૂપાણિ
પશૂનામુપ તિષ્ઠન્તે નાસ્યાપરૂપમાત્મઞ્જાયતે ॥ ૩। ૫। ૭॥ જુહૂરધો બ્રહ્મ
સ્રુચા ૨ઁ સપ્તદશ ચ ॥ ૩। ૫। ૭॥
૨૫ ઉપયામગૃહીતોઽસિ પ્રજાપતયે ત્વા જ્યોતિષ્મતે જ્યોતિષ્મન્તં ગૃહ્ણામિ
દક્ષાય દક્ષવૃધે રાતં દેવેભ્યોઽગ્નિજિહ્વેભ્યસ્ત્વર્તાયુભ્ય

ઇન્દ્રજ્યેષ્ઠેભ્યો વરુણરાજભ્યો વાતાપિભ્યઃ પર્જન્યાત્મભ્યો દિવે
ત્વાન્તરિક્ષાય ત્વા પૃથિવ્યૈ ત્વાપેન્દ્ર દ્વિષતો મનોઽપ જિજ્યાસતો જહ્યપ
યો નોઽરાતીયતિ તં જહિ પ્રાણાય ત્વાપાનાય ત્વા વ્યાનાય ત્વા સતે ત્વાસતે
ત્વાદ્ભ્યસ્ત્વૌષધીભ્યો વિશ્વેભ્યસ્ત્વા ભૂતેભ્યો યતઃ પ્રજા અક્ખિદ્રા
અજાયન્ત તસ્મૈ ત્વા પ્રજાપતયે વિભૂદાવ્ને જ્યોતિષ્મતે જ્યોતિષ્મન્તં
જુહોમિ ॥ ૩। ૫। ૮॥ ઓષધીભ્યશ્ચતુર્દશ ચ ॥ ૩। ૫। ૮॥

૨૬ યાં વા અધ્વર્યુશ્ચ યજમાનશ્ચ દેવતામન્તરિતસ્તસ્યા આ વૃશ્ચેતે
પ્રાજાપત્યં દધિગ્રહં ગૃહ્ણીયાત્પ્રજાપતિઃ સર્વા દેવતા દેવતાભ્ય
એવ નિ હ્નુવાતે જ્યેષ્ઠો વા એષ ગ્રહાણાં યસ્યૈષ ગૃહ્યતે જ્યૈષ્ઠ્યમેવ
ગચ્છતિ સર્વાસાં વા એતદ્દેવતાનાꣳ રૂપં યદેષ ગ્રહો યસ્યૈષ
ગૃહ્યતે સર્વાણ્યેવૈનꣳ રૂપાણિ પશૂનામુપ તિષ્ઠન્ત ઉપયામગૃહીતો

૨૭ ઽસિ પ્રજાપતયે ત્વા જ્યોતિષ્મતે જ્યોતિષ્મન્તં ગૃહ્ણામીત્યાહ
જ્યોતિરેવૈનꣳ સમાનાનાં કરોત્યગ્નિજિહ્વેભ્યસ્ત્વર્તાયુભ્ય
ઇત્યાહૈતાવતીર્વૈ દેવતાસ્તાભ્ય એવૈનꣳ સર્વાભ્યો ગૃહ્ણાત્યપેન્દ્ર
દ્વિષતો મન ઇત્યાહ ભ્રાતૃવ્યાપનુત્ત્યૈ પ્રાણાય ત્વાપાનાય ત્વેત્યાહ
પ્રાણાનેવ યજમાને દધાતિ તસ્મૈ ત્વા પ્રજાપતયે વિભૂદાવ્ને જ્યોતિષ્મતે
જ્યોતિષ્મન્તં જુહોમી

૨૮ ત્યાહ પ્રજાપતિઃ સર્વા દેવતાઃ સર્વાભ્ય એવૈનં દેવતાભ્યો
જુહોત્યાજ્યગ્રહં ગૃહ્ણીયાત્તેજસ્કામસ્ય તેજો વા આજ્યં તેજસ્વ્યેવ
ભવતિ સોમગ્રહં ગૃહ્ણીયાદ્ બ્રહ્મવર્ચસકામસ્ય બ્રહ્મવર્ચસં વૈ
સોમો બ્રહ્મવર્ચસ્યેવ ભવતિ દધિગ્રહં ગૃહ્ણીયાત્ પશુકામસ્યોર્ગ્વૈ
દધ્યૂર્ક્પશવ ઊર્જૈવાસ્મા ઊર્જં પશૂનવ રુંધે ॥ ૩। ૫। ૯॥ ઉપયામ
ગૃહીતો જુહોમિ ત્રિ ચત્વારિꣳ શચ્ચ ॥ ૩। ૫। ૯॥

૨૯ ત્વે ક્રતુમપિ વૃઞ્જન્તિ વિશ્વે દ્વિર્યદેતે ત્રિર્ભવન્ત્યૂમાઃ । સ્વાદોઃ
સ્વાદીયઃ સ્વાદુના સૃજા સમત ઊષુ મધુ મધુનાભિ યોધિ ॥
ઉપયામગૃહીતોઽસિ પ્રજાપતયે ત્વા જુષ્ટં ગૃહ્ણામ્યેષ તે યોનિઃ
પ્રજાપતયે ત્વા । પ્રાણગ્રહાન્ ગૃહ્ણાત્યેતાવદ્વા અસ્તિ યાવદેતે ગ્રહાઃ

સ્તોમાશ્છન્દાꣳસિ પૃષ્ઠાનિ દિશો યાવદ્દેવાસ્તિ ત
30 દવ રુંધે જ્યેષ્ઠા વા એતાન્બ્રાહ્મણાઃ પુરા વિદામક્રન્તસ્માત્તેષાꣳ
સર્વા દિશોઽભિજિતા અભૂવન્, યસ્યૈતે ગૃહ્યન્તે જ્યૈષ્ઠ્યમેવ
ગચ્છત્યભિ દિશો જયતિ પઞ્ચ ગૃહ્યન્તે પઞ્ચ દિશઃ સર્વાસ્વેવ
દિક્ષ્વૃધ્નુવન્તિ નવનવ ગૃહ્યન્તે નવ વૈ પુરુષે પ્રાણાઃ પ્રાણાનેવ
યજમાનેષુ દધતિ પ્રાયણીયે ચોદયનીયે ચ ગૃહ્યન્તે પ્રાણા વૈ પ્રાણગ્રહાઃ
31 પ્રાણૈરેવ પ્ર યન્તિ પ્રાણૈરુધન્તિ દશમેઽહન્ ગૃહ્યન્તે પ્રાણા
વૈ પ્રાણગ્રહાઃ પ્રાણેભ્યઃ ખલુ વા એતત્પ્રજા યન્તિ યદ્વામદેવ્યં
યોનેશ્ચ્યવતે દશમેઽહન્વામદેવ્યં યોનેશ્ચ્યવતે યદ્દશમેઽહન્
ગૃહ્યન્તે પ્રાણેભ્ય એવ તત્પ્રજા ન યન્તિ ॥ ૩। ૫। ૧૦॥ તત્પ્રાણ ગ્રહાસ્સપ્ત
ત્રિꣳશચ્ચ ॥ ૩। ૫। ૧૦॥

32 પ્ર દેવં દેવ્યા ધિયા ભરતા જાતવેદસમ્ । હવ્યા નો વક્ષદાનુષક્ ॥
અયમુષ્ય પ્ર દેવયુર્હોતા યજ્ઞાય નીયતે । રથો ન યોરભીવૃતો
ઘૃણીવાઞ્ચેતતિ ત્મના ॥ અયમગ્નિરુરુષ્યત્યમૃતાદિવ જન્મનઃ ।
સહસશ્ચિથ્સહીયાન્દેવો જીવાતવે કૃતઃ ॥ ઇડાયાસ્ત્વા પદે વયં નાભા
પૃથિવ્યા અધિ । જાતવેદો નિ ધીમહ્યગ્ને હવ્યાય વોઢવે ॥
33 અગ્ને વિશ્વેભિઃ સ્વનીક દેવૈરૂર્ણાવન્તં પ્રથમઃ સીદ યોનિમ્ । કુલાયિનં
ઘૃતવન્તꣳ સવિત્રે યજ્ઞં નય યજમાનાય સાધુ ॥ સીદ હોતઃ સ્વ ઉ
લોકે ચિકિત્વાન્થ્સાદયા યજ્ઞꣳ સુકૃતસ્ય યોનૌ । દેવાવીર્દેવાન્
હવિષા યજાસ્યગ્ને બૃહદ્યજમાને વયો ધાઃ ॥ નિ હોતા હોતૃષદને
વિદાનસ્ત્વેષો દીદિવાꣳ અસદથ્સુદક્ષઃ । અદબ્ધવ્રતપ્રમતિર્વસિષ્ઠઃ
સહસ્રં ભરઃ શુચિજિહ્વો અગ્નિઃ ॥ ત્વં દૂતસ્ત્વ
34 મુ નઃ પરસ્પાસ્ત્વં વસ્ય આ વૃષભ પ્રણેતા । અગ્ને તોકસ્ય નસ્તને
તનૂનામપ્રયુચ્છન્દીદ્યદ્બોધિ ગોપાઃ ॥ અભિ ત્વા દેવ સવિતરીશાનં
વાર્યાણામ્ । સદાવન્ભાગમીમહે ॥ મહી દ્યૌઃ પૃથિવી ચ ન ઇમં યજ્ઞં
મિમિક્ષતામ્ । પિપૃતાં નો ભરીમભિઃ ॥ ત્વામગ્ને પુષ્કરાદધ્યથર્વા
નિરમન્થત । મૂર્ધ્નો વિશ્વસ્ય વાઘતઃ ॥ ત મુ

૩૫ ત્વા દધ્યઙ્ઙૃષિઃ પુત્ર ઈધે અથર્વણઃ । વૃત્રહણં પુરંદરમ્ ॥
 તમુ ત્વા પાથ્યો વૃષા સમીધે દસ્યુહન્તમમ્ । ધનંજય૱ રણેરણે
 ॥ ઉત બ્રુવન્તુ જન્તવ ઉદગ્નિર્વૃત્રહાજનિ । ધનંજયો રણેરણે ॥
 આ ય૱ હસ્તે ન ખાદિન૱ શિશું જાતં ન બિભ્રતિ । વિશામગ્નિ૱
 સ્વધ્વરમ્ ॥ પ્ર દેવં દેવવીતયે ભરતા વસુવિત્તમમ્ । આ સ્વે યોનૌ
 નિષીદતુ ॥ આ

૩૬ જાતં જાતવેદસિ પ્રિય૱ શિશીતાતિથિમ્ । સ્યોન આ ગૃહપતિમ્ ॥
 અગ્નિનાગ્નિઃ સમિધ્યતે કવિર્ગૃહપતિર્યુવા । હવ્યવાડ્જુહ્વાસ્યઃ ॥
 ત્વર૱ હ્યગ્ને અગ્નિના વિપ્રો વિપ્રેણ સન્ત્સતા । સખા સખ્યા સમિધ્યસે
 ॥ તં મર્જયન્ત સુક્રતું પુરો યાવાનમાજિષુ । સ્વેષુ ક્ષયેષુ વાજિનમ્
 ॥ યજ્ઞેન યજ્ઞમયજન્ત દેવાસ્તાનિ ધર્માણિ પ્રથમાન્યાસન્ । તે હ
 નાકં મહિમાનઃ સચન્તે યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥ ૩। ૫। ૧૧॥

વોઢવે દૂતસ્ત્વં તમુસીદત્વા યત્ર ચત્વારિ ચ ॥ ૩। ૫। ૧૧॥

પૂર્ણર્ષયોઽગ્નિના યે દેવાસ્સૂર઼્યો મા સં ત્વા નહ્યામિ વષટ્કારસ્સ ખદિર
ઉપયામ ગૃહીતોસિ યાં વૈ ત્વે ક્રતું પ્ર દેવમેકાદશ ॥

પૂર્ણા સહજાન્તવાઽગ્ને પ્રાણૈરેવ ષટ્ત્રિ૱શત્ ॥

પૂર્ણા સંતિ દેવાઃ ॥

ઇતિ તૃતીયં કાણ્ડં સંપૂર્ણમ્ ૩॥

॥ તૈત્તિરીય-સંહિતા ॥

# તૈત્તિરીય-સંહિતા

## ॥ ચતુર્થં કાણ્ડમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

### ચતુર્થકાણ્ડે પ્રથમઃ પ્રશ્નઃ ૧

૧ યુઞ્જાનઃ પ્રથમં મનસ્તત્વાય સવિતા ધિયઃ । અગ્નિં જ્યોતિર્નિચાય્ય
પૃથિવ્યા અધ્યાભરત્ ॥ યુક્ત્વાય મનસા દેવાન્થ્સુવર્યતો ધિયા દિવમ્ ।
બૃહજ્જ્યોતિઃ કરિષ્યતઃ સવિતા પ્ર સુવાતિ તાન્ ॥ યુક્તેન મનસા વયં
દેવસ્ય સવિતુઃ સવે । સુવર્ગેયાય શક્ત્યૈ ॥ યુઞ્જતે મન ઉત
યુઞ્જતે ધિયો વિપ્રા વિપ્રસ્ય બૃહતો વિપશ્ચિતઃ । વિ હોત્રા દધે
વયુનાવિદેક ઇન્

૨ મહી દેવસ્ય સવિતુઃ પરિષ્ટુતિઃ ॥ યુજે વાં બ્રહ્મ પૂર્વ્યં નમોભિર્વિ
શ્લોકા યન્તિ પથ્યેવ સૂરાઃ । શ૰ૃણ્વન્તિ વિશ્વે અમૃતસ્ય પુત્રા આ યે
ધામાનિ દિવ્યાનિ તસ્થુઃ ॥ યસ્ય પ્રયાણમન્વન્ય ઇદ્યયુર્દેવા દેવસ્ય
મહિમાનમર્ચતઃ । યઃ પાર્થિવાનિ વિમમે સ એતશો રજા૰ઁસિ દેવઃ
સવિતા મહિત્વના ॥ દેવ સવિતઃ પ્ર સુવ યજ્ઞં પ્ર સુવ

૩ યજ્ઞપતિં ભગાય દિવ્યો ગન્ધર્વઃ । કેતપૂઃ કેતં નઃ પુનાતુ
વાચસ્પતિર્વાચમદ્ય સ્વદાતિ નઃ ॥ ઇમં નો દેવ સવિતર્યજ્ઞં પ્ર સુવ
દેવાયુવ૰ઁસખિવિદ૰ઁસત્રાજિતં ધનજિત૰ઁસુવર્જિતમ્ ॥
ઋચા સ્તોમ૰ઁ સમર્ધય ગાયત્રેણ રથંતરમ્ । બૃહદ્ગાયત્રવર્તનિ
॥ દેવસ્ય ત્વા સવિતુઃ પ્રસવેઽશ્વિનોર્બાહુભ્યાં પૂષ્ણો હસ્તાભ્યાં
ગાયત્રેણ છંદસાઽદદેઽઙ્ગિરસ્વદભ્રિરસિ નારિ

૪ રસિ પૃથિવ્યાઃ સધસ્થાદગ્નિં પુરીષ્યમઙ્ગિરસ્વદા ભર
ત્રૈષ્ટુભેન ત્વા છંદસાઽઽદદેઽઙ્ગિરસ્વદ્બભ્રિરસિ નારિરસિ ત્વયા
વય઼ઁ સધસ્થ આગ્નિ઼ઁ શકેમ ખનિતું પુરીષ્યં જાગતેન
ત્વા છંદસાઽઽદદેઽઙ્ગિરસ્વદ્ધસ્ત આધાય સવિતા બિભ્રદભ્રિ઼ઁ
હિરણ્યયીમ્ । તયા જ્યોતિરજસ્રમિદગ્નિં ખાત્વીન આ ભરાનુષ્ટુભેન ત્વા
છંદસા દદેઽઙ્ગિરસ્વત્ ॥ ૪। ૧। ૧॥ ઇધ્રજ્ઞાં પ્ર સુવ નારિરાનુષ્ટુભેન
ત્વા છંદસા ત્રીણિ ચ ॥ ૪। ૧। ૧॥
૫ ઇમામગૃભ્ણન્નશનામૃતસ્ય પૂર્વ આયુષિ વિદથેષુ કવ્યા । તયા
દેવાઃ સુતમા બભૂવુરૃતસ્ય સામન્થ્સરમારપન્તી ॥ પ્રતૂર્તં વાજિન્ના
દ્રવ વરિષ્ઠામનુ સંવતમ્ । દિવિ તે જન્મ પરમમન્તરિક્ષે
નાભિઃ પૃથિવ્યામધિ યોનિઃ ॥ યુઞ્જાથા઼ઁ રાસભં યુવમસ્મિન્ યામે
વૃષણ્વસૂ । અગ્નિં ભરન્તમસ્મયુમ્ ॥ યોગેયોગે તવસ્તરં વાજેવાજે હવામહે ।
સખાય ઇન્દ્રમૂતયે ॥ પ્રતૂર્વ
૬ ન્ને હ્યવક્રામન્નશસ્તી રુદ્રસ્ય ગાણપત્યાન્મયોભૂરેહિ ।
ઉર્વન્તરિક્ષમન્વિહિ સ્વસ્તિગવ્યૂતિરભયાનિ કૃણ્વન્ ॥ પૂષ્ણા સયુજા
સહ । પૃથિવ્યાઃ સધસ્થાદગ્નિં પુરીષ્યમઙ્ગિરસ્વદચ્છેહ્યગ્નિં
પુરીષ્યમઙ્ગિરસ્વદચ્છેમોઽગ્નિં પુરીષ્યમઙ્ગિરસ્વદ્ભરિષ્યામોઽગ્નિં
પુરીષ્યમઙ્ગિરસ્વદ્ભરામઃ ॥ અન્વગ્નિરુષસામગ્રમખ્યદન્વહાનિ
પ્રથમો જાતવેદાઃ । અનુ સૂર્યસ્ય
૭ પુરુત્રા ચ રશ્મીનનુ દ્યાવાપૃથિવી આ તતાન ॥ આગત્ય વાજ્યધ્વનઃ
સર્વા મૃધો વિ ધૂનુ તે । અગ્નિ઼ઁ સધસ્થે મહતિ ચક્ષુષા
નિ ચિકીષતે ॥ આક્રમ્ય વાજિન્પૃથિવીમગ્નિમિચ્છ રુચા ત્વમ્ । ભૂમ્યા
વૃત્વાય નો બ્રૂહિ યતઃ ખનામ તં વયમ્ ॥ દ્યૌસ્તે પૃષ્ઠં પૃથિવી
સધસ્થમાત્માન્તરિક્ષ઼ઁ સમુદ્રસ્તે યોનિઃ । વિખ્યાય ચક્ષુષા
ત્વમભિ તિષ્ઠ
૮ પૃતન્યતઃ ॥ ઉત્ક્રામ મહતે સૌભગાયાસ્માદાસ્થાનાદ્ દ્રવિણોદા વાજિન્ ।
વયર઼ઁ સ્યામ સુમતૌ પૃથિવ્યા અગ્નિં ખનિષ્યન્ત ઉપસ્થે અસ્યાઃ

॥ ઉદક્રમીદ્દ્રવિણોદા વાજ્યર્વાકઃ સ લોકꣳ સુકૃતં પૃથિવ્યાઃ । તતઃ
ખનેમ સુપ્રતીકમગ્નિꣳ સુવો રુહાણા અધિ નાક ઉત્તમે ॥ અપો દેવીરુપ
સૃજ મધુમતીરયક્ષ્માય પ્રજાભ્યઃ । તાસાગ્ં સ્થાનાદુજ્જિહતામોષધયઃ
સુપિપ્પલાઃ ॥ જિઘર્મ્ય

૯ ગ્નિં મનસા ઘૃતેન પ્રતિક્ષ્યન્તં ભુવનાનિ વિશ્વા ।
પૃથું તિરશ્ચા વયસા બૃહન્તં વ્યચિષ્ઠમન્નꣳ
રભસં વિદાનમ્ ॥ આ ત્વા જિઘર્મિ વચસા ઘૃતેનારક્ષસા
મનસા તજ્જુષસ્વ । મર્યશ્રીઃ સ્પૃહયદ્વર્ણો અગ્નિર્નાભિમૃશે
તનુવા જર્હૃષાણઃ ॥ પરિ વાજપતિઃ કવિરગ્નિર્હવ્યાન્યક્રમીત્
। દધદ્રત્નાનિ દાશુષે ॥ પરિ ત્વાગ્ને પુરં વયં વિપ્રꣳ
સહસ્ય ધીમહિ । ધૃષદ્વર્ણં દિવેદિવે ભેત્તારં ભઙ્ગુરાવતઃ ॥
ત્વમગ્ને દ્યુભિસ્ત્વમાશુશુક્ષણિસ્ત્વમદ્ભ્યસ્ત્વમશ્મનસ્પરિ । ત્વં
વનેભ્યસ્ત્વમોષધીભ્યસ્ત્વં નૃણાં નૃપતે જાયસે શુચિઃ ॥ ૪। ૧। ૨॥

પ્રતૂર્વન્થ્સૂર્યસ્ય તિષ્ઠ જિઘર્મિ ભેત્તારં વિꣳશતિશ્ચ ॥ ૪। ૧। ૨॥

૧૦ દેવસ્ય ત્વા સવિતુઃ પ્રસવેઽશ્વિનોર્બાહુભ્યાં પૂષ્ણો હસ્તાભ્યાં
પૃથિવ્યાઃ સધસ્થેઽગ્નિં પુરીષ્યમઙ્ગિરસ્વત્ખનામિ ॥ જ્યોતિષ્મન્તં ત્વાગ્ને
સુપ્રતીકમજસ્રેણ ભાનુના દીદ્યાનમ્ । શિવં પ્રજાભ્યોઽહિꣳસન્તં
પૃથિવ્યાઃ સધસ્થેઽગ્નિં પુરીષ્યમઙ્ગિરસ્વત્ખનામિ ॥ અપાં
પૃષ્ઠમસિ સપ્રથા ઉર્વગ્નિં ભરિષ્યદપરાવપિષ્ઠમ્ । વર્ધમાનં
મહ આ ચ પુષ્કરં દિવો માત્રયા વરિણા પ્રથસ્વ ॥ શર્મ ચ સ્થો

૧૧ વર્મ ચ સ્થો અચ્છિદ્રે બહુલે ઉભે । વ્યચસ્વતી સં વસાથાં
ભર્તમગ્નિં પુરીષ્યમ્ ॥ સં વસાથાꣳ સુવર્વિદા સમીચી
ઉરસા ત્મના । અગ્નિમન્તર્ભરિષ્યન્તી જ્યોતિષ્મન્તમજસ્રમિત્ ॥
પુરીષ્યોઽસિ વિશ્વભરાઃ । અથર્વા ત્વા પ્રથમો નિરમન્થદગ્ને ॥ ત્વામગ્ને
પુષ્કરાદધ્યથર્વા નિરમન્થત । મૂર્ધ્નો વિશ્વસ્ય વાઘતઃ ॥ તમુ
ત્વા દધ્યઙ્ઙૃષિઃ પુત્ર ઈધે

૧૨ અથર્વણઃ । વૃત્રહણં પુરંદરમ્ ॥ તમુ ત્વા પાથ્યો વૃષા સમી
ધે દસ્યુહન્તમમ્ । ધનંજય ँ રણેરણે ॥ સીદ હોતઃ સ્વ ઉ લોકે
ચિકિત્વાન્થ્સાદયા યજ્ઞ ँ સુકૃતસ્ય યોનૌ । દેવાવીર્દેવાન્
હવિષા યજાસ્યગ્ને બૃહદ્યજમાને વયો ધાઃ ॥ નિ હોતા હોતૃષદને
વિદાનસ્ત્વેષો દીદિવા ँ અસદથ્સુદક્ષઃ । અદબ્ધવ્રતપ્રમતિર્વસિષ્ઠઃ
સહસ્રં ભરઃ શુચિજિહ્વો અગ્નિઃ ॥ સ ँ સીદસ્વ મહા ँ અસિ શોચસ્વ
૧૩ દેવવીતમઃ । વિ ધૂમમગ્ને અરુષં મિયેધ્ય સૃજ પ્રશસ્ત દર્શતમ્ ॥
જનિષ્વા હિ જેન્યો અગ્રે અહ્ના ँહિતો હિતેષ્વરુષો વનેષુ । દમેદમે
સપ્ત રત્ના દધાનોઽગ્નિર્હોતા નિષસાદા યજીયાન્ ॥ ૪। ૧। ૩॥ સ્થ ઇધે
શોચસ્વ સપ્તવિ ँશતિશ્ચ ॥ ૪। ૧। ૩॥
૧૪ સં તે વાયુર્માતરિશ્વા દધાતૂત્તાનાયૈ હૃદયં યદ્વિલિષ્ટમ્ । દેવાનાં
યશ્ચરતિ પ્રાણથેન તસ્મૈ ચ દેવિ વષડસ્તુ તુભ્યમ્ ॥ સુજાતો
જ્યોતિષા સહ શર્મ વરૂથમાસદઃ સુવઃ । વાસો અગ્ને વિશ્વરૂપ ँ
સં વ્યયસ્વ વિભાવસો ॥ ઉદુ તિષ્ઠ સ્વધ્વરાવા નો દેવ્યા કૃપા । દૃશે ચ
ભાસા બૃહતા સુશુક્વનિરાગ્ને યાહિ સુશસ્તિભિઃ ॥
૧૫ ઊર્ધ્વ ઊ ષુણ ઊતયે તિષ્ઠા દેવો ન સવિતા । ઊર્ધ્વો વાજસ્ય સનિતા
યદઞ્જિભિર્વાઘદ્ભિર્વિહ્વયામહે ॥ સ જાતો ગર્ભો અસિ રોદસ્યોરગ્ને
ચારુર્વિભૃત ઓષધીષુ । ચિત્રઃ શિશુઃ પરિ તમાગ્સ્યક્તઃ પ્ર
માતૃભ્યો અધિ કનિક્રદદ્ગાઃ ॥ સ્થિરો ભવ વીડ્વઙ્ગ આશુર્ભવ
વાજ્યર્વન્ । પૃથુર્ભવ સુષદસ્ત્વમગ્નેઃ પુરીષવાહનઃ ॥ શિવો ભવ
૧૬ પ્રજાભ્યો માનુષીભ્યસ્ત્વમઙ્ગિરઃ । મા દ્યાવાપૃથિવી અભિ શૂશુચો
માન્તરિક્ષં મા વનસ્પતીન્ ॥ પ્રૈતુ વાજી કનિક્રદન્નાનદદ્રાસભઃ
પત્વા । ભરન્નગ્નિં પુરીષ્યં મા પાદ્યાયુષઃ પુરા ॥ રાસભો વાં
કનિક્રદથ્સુયુક્તો વૃષણા રથે । સ વામગ્નિં પુરીષ્યમાશુર્દૂતો
વહાદિતઃ ॥ વૃષાગ્નિં વૃષણં ભરન્નપાં ગર્ભ ँસમુદ્રિયમ્ ।
અગ્ન આ યાહિ
૧૭ વીતય ઋત ँ સત્યમ્ ॥ ઓષધયઃ પ્રતિ ગૃહ્ણીતાગ્નિમેત ँ

શિવમાયન્તમભ્યત્ર યુષ્માન્ । વ્યસ્યન્વિશ્વા અમતીરરાતીર્નિષીદન્નો
અપ દુર્મતિꣳ હનત્ ॥ ઓષધયઃ પ્રતિ મોદધ્વમેનં પુષ્પાવતીઃ
સુપિપ્પલાઃ । અયં વો ગર્ભ ઋત્વિયઃ પ્રત્નꣳ સધસ્થમાસદત્ ॥ ૪। ૧। ૪॥
સુશસ્તિભિઃ શિવો ભવ યાહિ ષટ્ત્રિꣳશચ્ચ ॥ ૪। ૧। ૪॥
૧૮ વિ પાજસા પૃથુના શોશુચાનો બાધસ્વ દ્વિષો રક્ષસો અમીવાઃ ।
સુશર્મણો બૃહતઃ શર્મણિ સ્યામગ્નેરહꣳ સુહવસ્ય પ્રણીતૌ ॥ આપો
હિ ષ્ઠા મયોભુવસ્તા ન ઊર્જે દધાતન । મહે રણાય ચક્ષસે ॥ યો વઃ
શિવતમો રસસ્તસ્ય ભાજયતેઽહ નઃ । ઉશતીરિવ માતરઃ ॥ તસ્મા
અરં ગમામ વો યસ્ય ક્ષયાય જિન્વથ । આપો જનયથા ચ નઃ ॥ મિત્રઃ
૧૯ સꣳ સૃજ્ય પૃથિવીં ભૂમિં ચ જ્યોતિષા સહ । સુજાતં
જાતવેદસમગ્નિં વૈશ્વાનરં વિભુમ્ ॥ અયક્ષ્માય ત્વા સꣳ સૃજામિ
પ્રજાભ્યઃ । વિશ્વે ત્વા દેવા વૈશ્વાનરાઃ સꣳ સૃજન્ત્વાનુષ્ટુભેન
છંદસાઙ્ગિરસ્વત્ ॥ રુદ્રાઃ સંભૃત્ય પૃથિવીં બૃહજ્જ્યોતિઃ સમીધિરે ।
તેષાં ભાનુરજસ્ર ઇચ્છુક્રો દેવેષુ રોચતે ॥ સꣳસૃષ્ટાં વસુભી
રુદ્રૈર્ધીરૈઃ કર્મણ્યાં મૃદમ્ । હસ્તાભ્યાં મૃદ્વીં કૃત્વા સિનીવાલી
કરોતુ
૨૦ તામ્ ॥ સિનીવાલી સુકપર્દા સુકુરીરા સ્વૌપશા । સા તુભ્યમદિતે મહ
ઓખાં દધાતુ હસ્તયોઃ ॥ ઉખાં કરોતુ શક્ત્યા બાહુભ્યામદિતિર્ધિયા । માતા
પુત્રં યથોપસ્થે સાગ્નિં બિભર્તુ ગર્ભ આ ॥ મખસ્ય શિરોઽસિ યજ્ઞસ્ય
પદે સ્થઃ । વસવસ્ત્વા કૃણ્વન્તુ ગાયત્રેણ છંદસાઙ્ગિરસ્વત્ પૃથિવ્યસિ
રુદ્રાસ્ત્વા કૃણ્વન્તુ ત્રૈષ્ટુભેન છંદસાઙ્ગિરસ્વદન્તરિક્ષમસ્યા
૨૧ ઽદિત્યાસ્ત્વા કૃણ્વન્તુ જાગતેન છંદસાઙ્ગિરસ્વદ્દ્યૌરસિ વિશ્વે
ત્વા દેવા વૈશ્વાનરાઃ કૃણ્વન્ત્વાનુષ્ટુભેન છંદસાઙ્ગિરસ્વદ્દિશોઽસિ
ધ્રુવાસિ ધારયા મયિ પ્રજાꣳ રાયસ્પોષં ગૌપત્યꣳ સુવીર્યꣳ
સજાતાન્ યજમાનાયાદિત્યૈ રાસ્નાસ્યદિતિસ્તે બિલં ગૃહ્ણાતુ પાઙ્ક્તેન
છંદસાઙ્ગિરસ્વત્ । કૃત્વાય સા મહીમુખાં મૃન્મયીં યોનિમગ્નયે
। તાં પુત્રેભ્યઃ સંપ્રાયચ્છદદિતિઃ શ્રપયાનિતિ ॥ ૪। ૧। ૫॥ મિત્રઃ

કરોત્વન્તરિક્ષમસિ પ્ર ચત્વારિ ચ ॥ ૪। ૧। ૫॥

૨૨ વસવસ્ત્વા ધૂપયન્તુ ગાયત્રેણ છંદસાઙ્ગિરસ્વદ્રુદ્રાસ્ત્વા ધૂપયન્તુ
ત્રૈષ્ટુભેન છંદસાઙ્ગિરસ્વદાદિત્યાસ્ત્વા ધૂપયન્તુ જાગતેન
છંદસાઙ્ગિરસ્વદ્વિશ્વે ત્વા દેવા વૈશ્વાનરા ધૂપયન્ત્વાનુષ્ટુભેન
છંદસાઙ્ગિરસ્વદિન્દ્રસ્ત્વા ધૂપયત્વઙ્ગિરસ્વદ્વિષ્ણુસ્ત્વા
ધૂપયત્વઙ્ગિરસ્વદ્વરુણસ્ત્વા ધૂપયત્વઙ્ગિરસ્વદદિતિસ્ત્વા દેવી વિશ્વદેવ્યાવતી
પૃથિવ્યાઃ સધસ્થેઽઙ્ગિરસ્વત્ખનત્વવટ દેવાનાં ત્વા પત્ની

૨૩ ર્દેવીર્વિશ્વદેવ્યાવતીઃ પૃથિવ્યાઃ સધસ્થેઽઙ્ગિરસ્વદ્દધતૂખે
ધિષણાસ્ત્વા દેવીર્વિશ્વદેવ્યાવતીઃ પૃથિવ્યાઃ
સધસ્થેઽઙ્ગિરસ્વદભીન્ધતામુખે ગ્નાસ્ત્વા દેવીર્વિશ્વદેવ્યાવતીઃ
પૃથિવ્યાઃ સધસ્થેઽઙ્ગિરસ્વચ્છ્રપયન્તૂખે વરૂત્રયો જનયસ્ત્વા
દેવીર્વિશ્વદેવ્યાવતીઃ પૃથિવ્યાઃ સધસ્થેઽઙ્ગિરસ્વત્પચન્તૂખે ।
મિત્રૈતામુખાં પચૈષા મા ભેદિ । એતાં તે પરિ દદામ્યભિત્ત્યૈ । અભીમાં

૨૪ મહિના દિવં મિત્રો બભૂવ સપ્રથાઃ । ઉત શ્રવસા પૃથિવીમ્
॥ મિત્રસ્ય ચર્ષણીધૃતઃ શ્રવો દેવસ્ય સાનસિમ્ । દ્યુમ્નં
ચિત્રશ્રવસ્તમમ્ ॥ દેવસ્ત્વા સવિતોદ્વપતુ સુપાણિઃ સ્વઙ્ગુરિઃ ।
સુબાહુરુત શક્ત્યા ॥ અપદ્યમાના પૃથિવ્યાશા દિશ આ પૃણ । ઉત્તિષ્ઠ
બૃહતી ભવોર્ધ્વા તિષ્ઠ ધ્રુવા ત્વમ્ ॥ વસવસ્ત્વાચ્છૃન્દન્તુ
ગાયત્રેણ છંદસાઙ્ગિરસ્વદ્રુદ્રાસ્ત્વાચ્છૃન્દન્તુ ત્રૈષ્ટુભેન
છંદસાઙ્ગિરસ્વદાદિત્યાસ્ત્વાચ્છૃન્દન્તુ જાગતેન છંદસાઙ્ગિરસ્વદ્વિશ્વે
ત્વા દેવા વૈશ્વાનરા આ ચ્છૃન્દન્ત્વાનુષ્ટુભેન છંદસાઙ્ગિરસ્વત્ ॥ ૪। ૧। ૬॥

પત્નીરિમાꣳ રુદ્રાસ્ત્વાઽચ્છૃન્દત્વેકાન્ન વિꣳશતિશ્ચ ॥ ૪। ૧। ૬॥

૨૫ સમાસ્ત્વાગ્ન ઋતવો વર્ધયન્તુ સંવથ્સરા ઋષયો યાનિ સત્યા ।
સં દિવ્યેન દીદિહિ રોચનેન વિશ્વા આ ભાહિ પ્રદિશઃ પૃથિવ્યાઃ ॥ સં
ચેધ્યસ્વાગ્ને પ્ર ચ બોધયૈનમુચ્ચ તિષ્ઠ મહતે સૌભગાય । મા ચ
રિષદુપસત્તા તે અગ્ને બ્રહ્માણસ્તે યશસઃ સન્તુ માન્યે ॥ ત્વામગ્ને વૃણતે
બ્રાહ્મણા ઇમે શિવો અગ્ને

૨૬ સં વરણે ભવા નઃ । સપત્નહા નો અભિમાતિ જિચ્ચ સ્વે ગયે
જાગૃહ્યપ્રયુચ્છન્ ॥ ઇહૈવાગ્ને અધિ ધારયા રયિં મા ત્વા નિ ક્રન્પૂર્વચિતો
નિકારિણઃ । ક્ષત્રમગ્ને સુયમમસ્તુ તુભ્યમુપસત્તા વર્ધતાં તે
અનિષ્ટૃતઃ ॥ ક્ષત્રેણાગ્ને સ્વાયુઃ સꣳ રભસ્વ મિત્રેણાગ્ને મિત્રધેયે
યતસ્વ । સજાતાનાં મધ્યમસ્થા એધિ રાજ્ઞામગ્ને વિહવ્યો દીદિહીહ ॥ અતિ

૨૭ નિહો અતિ સ્રિધોઽત્યચિત્તિમત્યરાતિમગ્ને । વિશ્વા હ્યગ્ને દુરિતા
સહસ્વાથાસ્મભ્યꣳસહવીરાꣳ રયિં દાઃ ॥ અનાધૃષ્યો
જાતવેદા અનિષ્ટૃતો વિરાડગ્ને ક્ષત્રભૃદ્દીદિહીહ । વિશ્વા આશાઃ
પ્રમુઞ્ચન્માનુષીર્ભિયઃ શિવાભિરદ્ય પરિ પાહિ નો વૃધે ॥ બૃહસ્પતે
સવિતર્બોધયૈનꣳ સꣳ શિતં ચિથ્સંતરાꣳ સꣳ શિશાધિ ।
વર્ધયૈનં મહતે સૌભગાય

૨૮ વિશ્વ એનમનુ મદન્તુ દેવાઃ ॥ અમુત્રભૂયાદધ યદ્યમસ્ય બૃહસ્પતે
અભિશસ્તેરમુઞ્ચઃ । પ્રત્યૌહતામશ્વિના મૃત્યુમસ્માદ્દેવાનામગ્ને
ભિષજા શચીભિઃ ॥ ઉદ્વયં તમસસ્પરિ પશ્યન્તો જ્યોતિરુત્તરમ્ ।
દેવં દેવત્રા સૂર્યમગન્મ જ્યોતિરુત્તમમ્ ॥ ૪। ૧। ૭॥ ઇમે શિવો અગ્નેઽતિ
સૌભગાય ચતુસ્ત્રિꣳશચ્ચ ॥ ૪। ૧। ૭॥

૨૯ ઊર્ધ્વા અસ્ય સમિધો ભવન્ત્યૂર્ધ્વા શુક્રા શોચીગ્ષ્યગ્નેઃ । દ્યુમત્તમા
સુપ્રતીકસ્ય સૂનોઃ ॥ તનૂનપાદસુરો વિશ્વવેદા દેવો દેવેષુ દેવઃ
। પથ આનક્તિ મધ્વા ઘૃતેન ॥ મધ્વા યજ્ઞં નક્ષસે પ્રીણાનો
નરાશꣳસો અગ્ને । સુકૃદ્દેવઃ સવિતા વિશ્વવારઃ ॥ અચ્છાયમેતિ
શવસા ઘૃતેનેડાનો વહ્નિર્નમસા । અગ્નિરꣳ સ્રુચો અધ્વરેષુ
પ્રયથ્સુ ॥ સ યક્ષદસ્ય મહિમાનમગ્નેઃ સ

૩૦ ઈ મન્દ્રાસુ પ્રયસઃ । વસુશ્ચેતિષ્ઠો વસુધાતમશ્ચ ॥ દ્વારો
દેવીરન્વસ્ય વિશ્વે વ્રતા દદન્તે અગ્નેઃ । ઉરુવ્યચસો ધામ્ના પત્યમાનાઃ
॥ તે અસ્ય યોષણે દિવ્યે ન યોનાવુષાસાનક્તા । ઇમં યજ્ઞમવતામધ્વરં
નઃ ॥ દૈવ્યા હોતારાવૂર્ધ્વમધ્વરં નોઽગ્નેર્જિહ્વામભિ ગૃણીતમ્ ।

કૃણુતં નઃ સ્વિષ્ટિમ્ ॥ તિસ્રો દેવીર્બર્‌હિરેદꣳ સદન્ત્વિડા સરસ્વતી
31 ભારતી । મહી ગૃણાના ॥ તન્નસ્તુરીપમદ્ભુતં પુરુક્ષુ ત્વષ્ટા
સુવીરમ્ । રાયસ્પોષં વિષ્યતુ નાભિમસ્મે ॥ વનસ્પતેઽવ સૃજા
ઽરરાણસ્ત્મના દેવેષુ । અગ્નિર્હવ્યꣳ શમિતા સૂદયાતિ ॥ અગ્ને
સ્વાહા કૃણુહિ જાતવેદ ઇન્દ્રાય હવ્યમ્ । વિશ્વે દેવા હવિરિદં જુષન્તામ્
॥ હિરણ્યગર્ભઃ સમવર્તતાગ્રે ભૂતસ્ય જાતઃ પતિરેક આસીત્ । સ
દાધાર પૃથિવીં દ્યા
32 મુતેમાં કસ્મૈ દેવાય હવિષા વિધેમ ॥ યઃ પ્રાણતો નિમિષતો
મહિત્વૈક ઇદ્રાજા જગતો બભૂવ । ય ઈશે અસ્ય દ્વિપદશ્ચતુષ્પદઃ
કસ્મૈ દેવાય હવિષા વિધેમ ॥ ય આત્મદા બલદા યસ્ય વિશ્વ ઉપાસતે
પ્રશિષં યસ્ય દેવાઃ । યસ્ય છાયામૃતં યસ્ય મૃત્યુઃ કસ્મૈ દેવાય
હવિષા વિધેમ ॥ યસ્યે મે હિમવન્તો મહિત્વા યસ્ય સમુદ્રꣳ રસયા સહા
33 ઽહુઃ । યસ્યેમાઃ પ્રદિશો યસ્ય બાહૂ કસ્મૈ દેવાય હવિષા વિધેમ ॥
યં ક્રન્દસી અવસા તસ્તભાને અભ્યૈક્ષેતાં મનસા રેજમાને । યત્રાધિ
સૂર ઉદિતૌ વ્યેતિ કસ્મૈ દેવાય હવિષા વિધેમ ॥ યેન દ્યૌરુગ્રા
પૃથિવી ચ દૃઢે યેન સુવઃ સ્તભિતં યેન નાકઃ । યો અન્તરિક્ષે
રજસો વિમાનઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥ આપો હ યન્મહતીર્વિશ્વ
34 માયન્દક્ષં દધાના જનયન્તીરગ્નિમ્ । તતો દેવાનાં
નિરવર્તતાસુરેકઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥ યશ્ચિદાપો મહિના
પર્યપશ્યદ્દક્ષં દધાના જનયન્તીરગ્નિમ્ । યો દેવેષ્વધિ દેવ એક
આસીત્ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૪। ૧। ૮॥ અગ્નેસ્સ સરસ્વતી દ્યાꣳ
સહ વિશ્વં ચતુસ્ત્રિꣳ શચ્ચ ॥ ૪। ૧। ૮॥ ઊર્ધ્વા યઃ પ્રાણતો ય આત્મદા
યસ્યેમે યં ક્રંદસી યેન દ્યૌરાપો હ યત્તતો દેવાનાં યશ્ચિદાપો યો
દેવેષુ નવ ॥
35 આકૂતિમગ્નિંપ્રયુજꣳ સ્વાહા મનો મેધામગ્નિં પ્રયુજꣳ સ્વાહા ચિત્તં
વિજ્ઞાતમગ્નિં પ્રયુજꣳ સ્વાહા વાચો વિધૃતિમગ્નિં પ્રયુજꣳ સ્વાહા
પ્રજાપતયે મનવે સ્વાહાગ્નયે વૈશ્વાનરાય સ્વાહા વિશ્વે દેવસ્ય

નેતુર્મર્તો વૃણીત સખ્યં વિશ્વે રાય ઇષુધ્યસિ દ્યુમ્નં વૃણીત પુષ્યસે
સ્વાહા માસુભિત્થા માસુરિષો દૃꣳહસ્વ વીડયસ્વ સુ । અંબ ધૃષ્ણુ
વીરયસ્વા
૩૬ ગ્નિશ્ચેદં કરિષ્યથઃ ॥ દૃꣳહસ્વ દેવિ પૃથિવિ સ્વસ્તય આસુરી
માયા સ્વધયા કૃતાસિ । જુષ્ટં દેવાનામિદમસ્તુ હવ્યમરિષ્ટા
ત્વમુદિહિ યજ્ઞે અસ્મિન્ ॥ મિત્રૈતામુખાં તપૈષા મા ભેદિ । એતાં તે પરિ
દદામ્યભિત્ત્યૈ । દ્રવન્નઃ સર્પિરાસુતિઃ પ્રત્નો હોતા વરેણ્યઃ । સહસસ્પુત્રો
અદ્ભુતઃ ॥ પરસ્યા અધિ સંવતોઽવરાꣳ અભ્યા
૩૭ તર । યત્રાહમસ્મિ તાꣳ અવ ॥ પરમસ્યાઃ પરાવતો રોહિદશ્વ
ઇહાઽગહિ । પુરીષ્યઃ પુરુપ્રિયોઽગ્ને ત્વં તરા મૃધઃ ॥ સીદ
ત્વં માતુરસ્યા ઉપસ્થે વિશ્વાન્યગ્ને વયુનાનિ વિદ્વાન્ । મૈનામર્ચિષા
મા તપસાભિ શૂશુચોઽન્તરસ્યાꣳ શુક્રજ્યોતિર્વિ ભાહિ ॥ અન્તરગ્ને
રુચા ત્વમુખાયૈ સદને સ્વે । તસ્યાસ્ત્વꣳ હરસા તપઞ્જાતવેદઃ શિવો
ભવ ॥ શિવો ભૂત્વા મહ્યમગ્નેઽથો સીદ શિવસ્ત્વમ્ । શિવાઃ કૃત્વા દિશઃ
સર્વાઃ સ્વાં યોનિમિહાસદઃ ॥ ૪। ૧। ૯॥ વીરયસ્વાઽતપન્વિꣳશતિશ્ચ ॥
૪। ૧। ૯॥
૩૮ યદગ્ને યાનિ કાનિ ચાઽતે દારૂણિ દધ્મસિ । તદસ્તુ તુભ્યમિદ્ઘૃતં
તજ્જુષસ્વ યવિષ્ઠ્ય ॥ યદત્ત્યુપજિહ્વિકા યદ્વમ્રો અતિસર્પતિ । સર્વં
તદસ્તુ તે ઘૃતં તજ્જુષસ્વ યવિષ્ઠ્ય ॥ રાત્રિꣳરાત્રિમપ્રયાવં
ભરન્તોઽશ્વાયેવ તિષ્ઠતે ઘાસમસ્મૈ । રાયસ્પોષેણ સમિષા
મદન્તોઽગ્ને મા તે પ્રતિવેશા રિષામ ॥ નાભા
૩૯ પૃથિવ્યાઃ સમિધાનમગ્નિꣳ રાયસ્પોષાય બૃહતે હવામહે ।
ઇરંમદં બૃહદુક્થં યજત્રં જેતારમગ્નિં પૃતનાસુ સાસહિમ્ ॥
યાઃ સેના અભીત્વરીરાવ્યાધિનીરુગણા ઉત । યે સ્તેના યે ચ તસ્કરાસ્તાꣳસ્તે
અગ્નેઽપિ દધામ્યાસ્યે ॥ દꣳષ્ટ્રાભ્યાં મલિમ્લૂઞ્જંભ્યૈસ્તસ્કરાꣳ
ઉત । હનૂભ્યાગ્ સ્તેનાન્ભગવસ્તાꣳસ્ત્વં ખાદ સુખાદિતાન્ ॥ યે જનેષુ
મલિમ્લવઃ સ્તેનાસસ્તસ્કરા વને । યે

૪૦ કક્ષેષ્વઘાયવસ્તાગ્સ્તે દધામિ જંભયોઃ ॥ યો અસ્મભ્યમરાતીયાદ્યશ્ચ
નો દ્વેષ તે જનઃ । નિન્દાદ્યો અસ્માન્દિપ્સાચ્ચ સર્વં તં મસ્મસા કુરુ ॥
સઁ શિતં મે બ્રહ્મ સઁ શિતં વીર્યં બલમ્ । સઁ શિતં ક્ષત્રં
જિષ્ણુ યસ્યાહમસ્મિ પુરોહિતઃ ॥ ઉદેષાં બાહૂ અતિરમુદ્વર્ચ ઉદૂ બલમ્ ।
ક્ષિણોમિ બ્રહ્મણાઽમિત્રાનુન્નયામિ
૪૧ સ્વાઁ અહમ્ । દૃશાનો રુક્મ ઉર્વ્યા વ્યદ્યૌદ્દુર્મર્ષમાયુઃ શ્રિયે
રુચાનઃ । અગ્નિરમૃતો અભવદ્વયોભિર્યદેનં દ્યૌરજનયથ્સુરેતાઃ ॥
વિશ્વા રૂપાણિ પ્રતિ મુઞ્ચતે કવિઃ પ્રાસાવીદ્ભદ્રં દ્વિપદે ચતુષ્પદે ।
વિ નાકમખ્યથ્સવિતા વરેણ્યોઽનુ પ્રયાણમુષસો વિ રાજતિ ॥ નક્તોષાસા
સમનસા વિરૂપે ધાપયેતે શિશુમેકઁ સમીચી । દ્યાવા ક્ષામા રુક્મો
૪૨ અન્તર્વિ ભાતિ દેવા અગ્નિં ધારયન્ દ્રવિણોદાઃ ॥ સુપર્ણોઽસિ ગરુત્માન્
ત્રિવૃત્તે શિરો ગાયત્રં ચક્ષુ સ્તોમ આત્મા સામ તે તનૂર્વામદેવ્યં
બૃહદ્રથન્તરે પક્ષૌ યજ્ઞાયજ્ઞિયં પુચ્છં છન્દાગ્સ્યઙ્ગાનિ
ધિષ્ણિયાઃ શફા યજૂઁષિ નામ । સુપર્ણોઽસિ ગરુત્માન્ દિવં ગચ્છ
સુવઃ પત ॥ ૪। ૧। ૧૦॥ નાભા વને યે નયામિ ક્ષામા રુક્મોષ્ટાત્રિઁશચ્ચ
॥ ૪। ૧। ૧૦॥

૪૩ અગ્ને યં યજ્ઞમધ્વરં વિશ્વતઃ પરિભૂરસિ । સ ઇદ્દેવેષુ ગચ્છતિ
॥ સોમ યાસ્તે મયોભુવ ઊતયઃ સન્તિ દાશુષે । તાભિર્નોઽવિતા ભવ ॥
અગ્નિર્મૂર્ધા ભુવઃ ॥ ત્વં નઃ સોમ યા તે ધામાનિ ॥ તથ્સવિતુર્વરેણ્યં
ભર્ગો દેવસ્ય ધીમહિ । ધિયો યો નઃ પ્રચોદયાત્ ॥ અચિત્તી યચ્ચકૃમા
દૈવ્યે જને દીનૈર્દક્ષૈઃ પ્રભૂતી પૂરુષત્વતા ।
૪૪ દેવેષુ ચ સવિતર્માનુષેષુ ચ ત્વં નો અત્ર સુવતાદનાગસઃ
॥ ચોદયિત્રી સૂનૃતાનાં ચેતન્તી સુમતીનામ્ । યજ્ઞં દધે
સરસ્વતી ॥ પાવીરવી કન્યા ચિત્રાયુઃ સરસ્વતી વીરપત્ની ધિયં ધાત્ ।
ગ્નાભિરચ્છિદ્રઁ શરણઁ સજોષા દુરાધર્ષં ગૃણતે શર્મ
યઁ સત્ ॥ પૂષા ગા અન્વેતુ નઃ પૂષા રક્ષત્વર્વતઃ । પૂષા વાજઁ

સનોતુ નઃ ॥ શુક્રં તે અન્યદ્યજતં તે અન્યદ્
૪૫ વિષુરૂપે અહની દ્યૌરિવાસિ । વિશ્વા હિ માયા અવસિ સ્વધાવો ભદ્રા તે
પૂષન્નિહ રાતિરસ્તુ ॥ તેઽવર્ધન્ત સ્વતવસો મહિત્વનાઽનાકં તસ્થુરુરુ
ચક્રિરે સદઃ । વિષ્ણુર્યદ્ધાવદ્વૃષણં મદચ્યુતં વયો ન સીદન્નધિ
બર્હિષિ પ્રિયે । પ્ર ચિત્રમર્કં ગૃણતે તુરાય મારુતાય સ્વતવસે
ભરધ્વમ્ । યે સહાꣳસિ સહસા સહન્તે
૪૬ રેજતે અગ્ને પૃથિવી મખેભ્યઃ ॥ વિશ્વે દેવા વિશ્વે દેવાઃ ॥ દ્યાવા
નઃ પૃથિવી ઇમꣳ સિધ્રમદ્ય દિવિસ્પૃશમ્ । યજ્ઞં દેવેષુ
યચ્છતામ્ ॥ પ્ર પૂર્વજે પિતરા નવ્યસીભિર્ગીર્ભિઃ કૃણુધ્વꣳ સદને
ઋતસ્ય । આ નો દ્યાવાપૃથિવી દૈવ્યેન જનેન યાતં મહિ વાં વરૂથમ્ ॥
અગ્નિરꣳ સ્તોમેન બોધય સમિધાનો અમર્ત્યમ્ । હવ્યા દેવેષુ નો દધત્ ॥ સ
હવ્યવાડમર્ત્ય ઉશિગ્દૂતશ્ચનોહિતઃ । અગ્નિર્ધિયા સમૃણ્વતિ ॥ શં નો
ભવન્તુ વાજેવાજે ॥ ૪। ૧। ૧૧॥ પૂરુષત્વતા યજતં તે અન્યથ્સહન્તે
ચ નોહિતોઽષ્ટૌ ચ ॥ ૪। ૧। ૧૧॥

યુંજાન ઇમામગૃભ્ણન્દેવસ્ય સં તે વિ પાજસા વસવસ્ત્વા સમાસ્ત્વોર્ધ્વા
અસ્યાકૂતિં યદગ્ને યાન્યગ્ને યં યજ્ઞમેકાદશ ॥

યુંજાનો વર્મ ચ સ્થ આદિત્યાસ્ત્વા ભારતી સ્વાꣳ અહꣳ
ષટ્ચત્વારિꣳશત્ ॥

યુંજાનો વાજેવાજે ॥

## ચતુર્થકાણ્ડે દ્વિતીયઃ પ્રશ્નઃ ૨

૧ વિષ્ણોઃ ક્રમોઽસ્યભિમાતિહા ગાયત્રં છંદ આ રોહ પૃથિવીમનુ
વિ ક્રમસ્વ નિર્ભક્તઃ સ યં દ્વિષ્મો વિષ્ણોઃ ક્રમોઽસ્યભિશસ્તિહા
ત્રૈષ્ટુભં છંદ આ રોહાન્તરિક્ષમનુ વિ ક્રમસ્વ નિર્ભક્તઃ
સ યં દ્વિષ્મો વિષ્ણોઃ ક્રમોઽસ્યરાતીયતો હન્તા જાગતં છંદ આ રોહ
દિવમનુ વિ ક્રમસ્વ નિર્ભક્તઃ સ યં દ્વિષ્મો વિષ્ણોઃ

૨ ક્રમોઽસિ શત્રૂયતો હન્તાનુષ્ટુભં છંદ આ રોહ દિશોઽનુ વિ ક્રમસ્વ
નિર્ભક્તઃ સ યં દ્વિષ્મઃ । અક્રન્દદગ્નિ સ્તનયન્નિવ દ્યૌઃ, ક્ષામા
રેરિહદ્વીરુધઃ સમઞ્જન્ । સદ્યો જજ્ઞાનો વિ હીમિદ્ધો અખ્યદા રોદસી
ભાનુના ભાત્યન્તઃ ॥ અગ્નેઽભ્યાવર્તિન્નભિન આ વર્તસ્વાયુષા વર્ચસા
સન્યા મેધયા પ્રજયા ધનેન ॥ અગ્ને

૩ અઙ્ગિરઃ શતં તે સન્ત્વાવૃતઃ સહસ્રં ત ઉપાવૃતઃ । તાસાં
પોષસ્ય પોષેણ પુનર્નો નષ્ટમા કૃધિ પુનર્નો રયિમા કૃધિ ॥
પુનરૂર્જા નિવર્તસ્વ પુનરગ્ન ઇષાયુષા । પુનર્નઃ પાહિ વિશ્વતઃ ॥
સહ રય્યાનિવર્તસ્વાગ્ને પિન્વસ્વ ધારયા । વિશ્વપ્સ્નિયા વિશ્વતસ્પરિ
॥ ઉદુત્તમં વરુણ પાશમસ્મદવાધમં

૪ વિ મધ્યમરઁ શ્રથાય । અથા વયમાદિત્ય વ્રતે તવાનાગસો અદિતયે
સ્યામ ॥ આ ત્વાહાર્ષમન્તરભૂર્ધ્રુવસ્તિષ્ઠાવિચાચલિઃ । વિશસ્ત્વા
સર્વા વાઞ્છન્ત્વસ્મિન્રાષ્ટ્રમધિ શ્રય ॥ અગ્રે બૃહન્નુષસામૂર્ધ્વો
અસ્થાન્નિર્જગ્મિવાન્તમસો જ્યોતિષાગાત્ । અગ્નિર્ભાનુના રુશતા સ્વઙ્ગ
આ જાતો વિશ્વા સદ્માન્યપ્રાઃ ॥ સીદ ત્વં માતુરસ્યા

૫ ઉપસ્થે વિશ્વાન્યગ્ને વયુનાનિ વિદ્વાન્ । મૈનામર્ચિષા મા તપસાભિ
શૂશુચોઽન્તરસ્યાઁ શુક્રજ્યોતિર્વિ ભાહિ ॥ અન્તરગ્ને રુચા
ત્વમુખાયૈ સદને સ્વે । તસ્યાસ્ત્વઁ હરસા તપઞ્જાતવેદઃ શિવો ભવ
॥ શિવો ભૂત્વા મહ્યમગ્નેઽથો સીદ શિવસ્ત્વમ્ । શિવાઃ કૃત્વા દિશઃ
સર્વાઃ સ્વાં યોનિમિહાસદઃ ॥ હઁસઃ શુચિષદ્વસુરન્તરિક્ષસદ્ધોતા
વેદિષદતિથિર્દુરોણસત્ । નૃષદ્વરસદૃતસદ્વ્યોમસદબ્જા
ગોજા ઋતજા અદ્રિજા ઋતં બૃહત્ ॥ ૪। ૨। ૧॥ દિવમનુ વિ ક્રમસ્વ
નિર્ભક્તસ્સ યન્દ્વિષ્મો વિષ્ણોર્ધનેનાગ્નેઽધમમસ્યાઃ શુચિષથ્ષોઽશ
ચ ॥ ૪। ૨। ૧॥

૬ દિવસ્પરિ પ્રથમં જજ્ઞે અગ્નિરસ્મદ્દ્વિતીયં પરિ જાતવેદાઃ ।
તૃતીયમપ્સુ નૃમણા અજસ્રમિન્ધાન એનં જરતે સ્વાધીઃ ॥ વિદ્મા તે
અગ્ને ત્રેધા ત્રયાણિ વિદ્મા તે સદ્મ વિભૃતં પુરુત્રા । વિદ્મા તે નામ

પરમં ગુહા યદ્વિગ્ના તમુત્સં યત આજગન્થ ॥ સમુદ્રે ત્વા નૃમણા
અપ્સ્વન્તર્નૃચક્ષા ઈધે દિવો અગ્ન ઊધન્ । તૃતીયે ત્વા
૭ રજસિ તસ્થિવાꣳ સમૃતસ્ય યોનૌ મહિષા અહિન્વન્ ॥ અક્રન્દદગ્નિઃ
સ્તનયન્નિવ દ્યૌઃ, ક્ષામા રેરિહદ્વીરુધઃ સમઞ્જન્ । સદ્યો જજ્ઞાનો
વિ હીમિદ્ધો અખ્યદા રોદસી ભાનુના ભાત્યન્તઃ ॥ ઉશિક્પાવકો અરતિઃ
સુમેધા મર્તેષ્વગ્નિરમૃતો નિધાયિ । ઇયર્તિ ધૂમમરુષં
ભરિભ્રદુચ્છુક્રેણ શોચિષા દ્યામિનક્ષત્ ॥ વિશ્વસ્ય કેતુર્ભુવનસ્ય
ગર્ભ આ
૮ રોદસી અપૃણાજ્જાયમાનઃ । વીડું ચિદદ્રિમભિનત્પરાયઞ્જના
યદગ્નિમયજન્ત પઞ્ચ ॥ શ્રીણામુદારો ધરુણો રયીણાં મનીષાણાં
પ્રાર્પણઃ સોમગોપાઃ । વસોઃ સૂનુઃ સહસો અપ્સુ રાજા વિ ભાત્યગ્ર
ઉષસામિધાનઃ ॥ યસ્તે અદ્ય કૃણવદ્ભદ્રશોચેઽપૂપં દેવ
ઘૃતવન્તમગ્ને । પ્ર તં નય પ્રતરં વસ્યો અચ્છાભિ દ્યુમ્નં દેવભક્તં
યવિષ્ઠ ॥ આ
૯ તં ભજ સૌશ્રવસેષ્વગ્ન ઉક્થ ઉક્થ આ ભજ શસ્યમાને ।
પ્રિયઃ સૂર્યે પ્રિયો અગ્ના ભવાત્યુજ્જાતેન ભિનદદુજ્જનિત્વૈઃ ॥
ત્વામગ્ને યજમાના અનુ દ્યૂન્, વિશ્વા વસૂનિ દધિરે વાર્યાણિ । ત્વયા
સહ દ્રવિણમિચ્છમાના વ્રજં ગોમન્તમુશિજો વિવવ્રુઃ ॥ દૃશાનો
રુક્મ ઉર્વ્યા વ્યદ્યૌદ્દુર્મર્ષમાયુઃ શ્રિયે રુચાનઃ । અગ્નિરમૃતો
અભવદ્વયોભિર્યદેનં દ્યૌરજનયથ્સુરેતાઃ ॥ ૪। ૨। ૨॥ તૃતીયે ત્વા
ગર્ભ આ યવિષ્ઠાઽયચ્ચત્વારિ ચ ॥ ૪। ૨। ૨॥
૧૦ અન્નપતેઽન્નસ્ય નો દેહ્યનમીવસ્ય શુષ્મિણઃ । પ્ર પ્રદાતારં તારિષ
ઊર્જં નો ધેહિ દ્વિપદે ચતુષ્પદે ॥ ઉદુ ત્વા વિશ્વે દેવા અગ્ને ભરન્તુ
ચિત્તિભિઃ । સ નો ભવ શિવતમઃ સુપ્રતીકો વિભાવસુઃ ॥ પ્રેદગ્ને
જ્યોતિષ્માન્, યાહિ શિવેભિરર્ચિભિસ્ત્વમ્ । બૃહદ્ભિર્ભાનુભિર્ભાસન્મા
હિꣳસીસ્તનુવા પ્રજાઃ ॥ સમિધાગ્નિં દુવસ્યત ઘૃતૈર્બોધયતાતિથિમ્
। આ

૧૧ ઽસ્મિન્ હવ્યા જુહોતન ॥ પ્રપ્રાયમગ્નિર્ભરતસ્ય શ઼ૃણ્વે વિ
યથ્સૂર્યો ન રોચતે બૃહદ્ભાઃ । અભિ યઃ પૂરું પૃતનાસુ તસ્થૌ દીદાય
દૈવ્યો અતિથિઃ શિવો નઃ ॥ આપો દેવીઃ પ્રતિ ગૃહ્ણીત ભસ્મૈતથ્સ્યોને
કૃણુધ્વꣳ સુરભાવુ લોકે । તસ્મૈ નમન્તાં જનયઃ સુપત્નીર્માતેવ
પુત્રં બિભૃતા સ્વેનમ્ ॥ અપ્સ્વગ્ને સધિષ્ટવ
૧૨ સૌષધીરનુ રુધ્યસે । ગર્ભે સઞ્જાયસે પુનઃ ॥ ગર્ભો અસ્યોષધીનાં
ગર્ભો વનસ્પતીનામ્ । ગર્ભો વિશ્વસ્ય ભૂતસ્યાગ્ને ગર્ભો અપામસિ ॥
પ્રસદ્ય ભસ્મના યોનિમપશ્ચ પૃથિવીમગ્ને । સꣳસૃજ્ય
માતૃભિસ્ત્વં જ્યોતિષ્માન્ પુનરાસદઃ ॥ પુનરાસદ્ય સદનમપશ્ચ
પૃથિવીમગ્ને । શેષે માતુર્યથોપસ્થેઽન્તરસ્યાꣳ શિવતમઃ ॥
પુનરૂર્જા
૧૩ નિવર્તસ્વ પુનરગ્ન ઇષાયુષા । પુનર્નઃ પાહિ વિશ્વતઃ ॥ સહ
રય્યાનિવર્તસ્વાગ્ને પિન્વસ્વ ધારયા । વિશ્વફ્સ્નિયા વિશ્વતસ્પરિ ॥
પુનસ્ત્વાદિત્યા રુદ્રા વસવઃ સમિન્ધતાં પુનર્બ્રહ્માણો વસુનીથ યજ્ઞૈઃ ।
ઘૃતેન ત્વં તનુવો વર્ધયસ્વ સત્યાઃ સન્તુ યજમાનસ્ય કામાઃ ॥ બોધા
નો અસ્ય વચસો યવિષ્ઠ મꣳહિષ્ઠસ્ય પ્રભૃતસ્ય સ્વધાવઃ । પીયતિ
ત્વો અનુ ત્વો ગૃણાતિ વન્દારુસ્તે તનુવં વન્દે અગ્ને ॥ સ બોધિ સૂરિર્મઘવા
વસુદાવા વસુપતિઃ । યુયોધ્યસ્મદ્દ્વેષાꣳસિ ॥ ૪। ૨। ૩॥ આ તવોર્જાઽનુ
ષોડશ ચ ॥ ૪। ૨। ૩॥
૧૪ અપેત વીત વિ ચ સર્પતાતો યેઽત્ર સ્થ પુરાણા યે ચ નૂતનાઃ ।
અદાદિદં યમોઽવસાનં પૃથિવ્યા અક્રન્નિમં પિતરો લોકમસ્મૈ
॥ અગ્નેર્ભસ્માસ્યગ્નેઃ પુરીષમસિ સંજ્ઞાનમસિ કામધરણં મયિ તે
કામધરણં ભૂયાત્ ॥ સં યા વઃ પ્રિયાસ્તનુવઃ સં પ્રિયા હૃદયાનિ વઃ ।
આત્મા વો અસ્તુ
૧૫ સં પ્રિયઃ સં પ્રિયાસ્તનુવો મમ ॥ અયꣳ સો અગ્નિર્યસ્મિન્થ્સોમમિન્દ્રઃ
સુતં દધે જઠરે વાવશાનઃ । સહસ્રિયં વાજમત્યં ન સપ્તિꣳ

સસવાન્થ્સન્થ્સ્તૂયસે જાતવેદઃ ॥ અગ્ને દિવો અર્ણમચ્છા જિગાસ્યચ્છા
દેવાઁ ઊચિષે ધિષ્ણિયા યે । યાઃ પરસ્તાદ્રોચને સૂર્યસ્ય
યાશ્ચાવસ્તાદુપતિષ્ઠન્ત આપઃ ॥ અગ્ને યત્તે દિવિ વર્ચઃ પૃથિવ્યાં
યદોષધીષ્વ

૧૬ પ્સુ વા યજત્ર । યેનાન્તરિક્ષમુર્વાતતન્થ ત્વેષઃ સ ભાનુરર્ણવો
નૃચક્ષાઃ ॥ પુરીષ્યાસો અગ્નયઃ પ્રાવણેભિઃ સજોષસઃ ।
જુષન્તાઁ હવ્યમાહુતમનમીવા ઇષો મહીઃ ॥ ઇડામગ્ને પુરુદઁ સઁ
સનિં ગોઃ શશ્વત્તમઁ હવમાનાય સાધ । સ્યાન્નઃ સૂનુસ્તનયો વિજાવાગ્ને
સા તે સુમતિર્ભૂત્વસ્મે ॥ અયં તે યોનિર્ઋત્વિયો યતો જાતો અરોચથાઃ ।
તં જાન

૧૭ ન્નગ્ન આ રોહાથા નો વર્ધયા રયિમ્ ॥ ચિદસિ તયા
દેવતયાઙ્ગિરવદ્ધ્રુવા સીદ પરિચિદસિ તયા દેવતયાઙ્ગિરસ્વદ્ધ્રુવા
સીદ લોકં પૃણ છિદ્રં પૃણાથો સીદ શિવા ત્વમ્ । ઇન્દ્રાગ્ની ત્વા
બૃહસ્પતિરસ્મિન્, યોનાવસીષદન્ ॥ તા અસ્ય સૂદદોહસઃ સોમઙ્ગ્ શ્રીણન્તિ
પૃશ્નયઃ । જન્મન્દેવાનાં વિશસ્ત્રિષ્વા રોચને દિવઃ ॥ ૪। ૨। ૪॥

અસ્ત્વોષધીષુ જાનન્નષ્ટા ચત્વારિઁ શચ્ચ ॥ ૪। ૨। ૪॥

૧૮ સમિતઁ સં કલ્પેથાઁ સંપ્રિયૌ રોચિષ્ણૂ સુમનસ્યમાનૌ
। ઇષમૂર્જમભિ સંવસાનૌ સં વાં મનાઁસિ સં વ્રતા સમુ
ચિત્તાન્યાકરમ્ ॥ અગ્ને પુરીષ્યાધિપા ભવા ત્વં નઃ । ઇષમૂર્જં યજમાનાય
ધેહિ ॥ પુરીષ્યસ્ત્વમગ્ને રયિમાન્પુષ્ટિમાઁ અસિ । શિવાઃ કૃત્વા દિશઃ
સર્વાઃ સ્વાં યોનિમિહાસદઃ ॥ ભવતં નઃ સમનસૌ સમોકસા

૧૯ વરેપસૌ । મા યજ્ઞઁ હિઁસિષ્ટં મા યજ્ઞપતિં
જાતવેદસૌ શિવૌ ભવતમદ્ય નઃ ॥ માતેવ પુત્રં પૃથિવી
પુરીષ્યમગ્નિઁ સ્વે યોનાવભારુખા । તાં વિશ્વૈર્દેવૈરૃતુભિઃ
સંવિદાનઃ પ્રજાપતિર્વિશ્વકર્મા વિ મુઞ્ચતુ ॥ યદસ્ય પારે રજસઃ
શુક્રં જ્યોતિરજાયત । તન્નઃ પર્ષદતિ દ્વિષોઽગ્ને વૈશ્વાનર સ્વાહા ॥
નમઃ સુ તે નિરૃતે વિશ્વરૂપે

૨૦ ઽયસ્મયં વિ ચૃતા બન્ધમેતમ્ । યમેન ત્વં યમ્યા
સંવિદાનોત્તમં નાકમધિ રોહયેમમ્ ॥ યત્તે દેવી નિરૃતિરાબબન્ધ
દામ ગ્રીવાસ્વવિચર્ત્યમ્ । ઇદં તે તદ્વિષ્યામ્યાયુષો ન મધ્યાદથા
જીવઃ પિતુમદ્ધિ પ્રમુક્તઃ ॥ યસ્યાસ્તે અસ્યાઃ ક્રૂર આસઞ્જુહોમ્યેષાં
બન્ધાનામવસર્જનાય । ભૂમિરિતિ ત્વા જના વિદુર્નિરૃતિ
૨૧ રિતિ ત્વાહં પરિ વેદ વિશ્વતઃ ॥ અસુન્વન્તમયજમાનમિચ્છ સ્તેનસ્યેત્યાં
તસ્કરસ્યાન્વેષિ । અન્યમસ્મદિચ્છ સાત ઇત્યા નમો દેવિ નિરૃતે
તુભ્યમસ્તુ ॥ દેવીમહં નિરૃતિં વન્દમાનઃ પિતેવ પુત્રં દસયે
વચોભિઃ । વિશ્વસ્ય યા જાયમાનસ્ય વેદ શિરઃ શિરઃ પ્રતિ સૂરી વિ
ચષ્ટે ॥ નિવેશનઃ સંગમનો વસૂનાં વિશ્વા રૂપાભિ ચષ્ટે
૨૨ શચીભિઃ । દેવ ઇવ સવિતા સત્યધર્મેન્દ્રો ન તસ્થૌ સમરે પથીનામ્
॥ સં વરત્રા દધાતન નિરાહાવાન્ કૃણોતન । સિઞ્ચામહા અવટમુદ્રિણં
વયં વિશ્વાહાદસ્તમક્ષિતમ્ ॥ નિષ્કૃતાહાવમવટꣳ સુવરત્રꣳ
સુષેચનમ્ । ઉદ્રિણꣳ સિઞ્ચે અક્ષિતમ્ ॥ સીરા યુઞ્જન્તિ કવયો યુગા વિ
તન્વતે પૃથક્ । ધીરા દેવેષુ સુમ્નયા । યુનક્ત સીરા વિ યુગા તનોત
કૃતે યોનૌ વપતેહ
૨૩ બીજમ્ । ગિરા ચ શ્રુષ્ટિઃ સભરા અસન્નો નેદીય ઇથ્સૃણ્યા
પક્વમાયત્ ॥ લાઙ્ગલં પવીરવꣳ સુશેવꣳ સુમતિથ્સરુ ।
ઉદિત્કૃષતિ ગામવિં પ્રફર્વ્યં ચ પીવરીમ્ । પ્રસ્થાવદ્રથવાહનમ્
॥ શુનં નઃ ફાલા વિ તુદન્તુ ભૂમિꣳ શુનં કીનાશા અભિ યન્તુ
વાહાન્ । શુનં પર્જન્યો મધુના પયોભિઃ શુનાસીરા શુનમસ્મા સુ
ધત્તમ્ ॥ કામં કામદુઘે ધુક્ષ્વ મિત્રાય વરુણાય ચ । ઇન્દ્રાયાગ્નયે
પૂષ્ણ ઓષધીભ્યઃ પ્રજાભ્યઃ ॥ ઘૃતેન સીતા મધુના સમક્તા
વિશ્વૈર્દેવૈરનુમતા મરુદ્ભિઃ । ઊર્જસ્વતી પયસા પિન્વમાનાસ્માન્થ્સીતે
પયસાઽભ્યાવવૃથ્સ્વ ॥ ૪। ૨। ૫॥ સમોકસૌ વિશ્વરૂપે વિદુર્નિરૃતિરભિ
ચષ્ટ ઇહ મિત્રાય દ્વાવિꣳશતિશ્ચ ॥ ૪। ૨। ૫॥

૨૪ યા જાતા ઓષધયો દેવેભ્યસ્ત્રિયુગં પુરા । મન્દામિ બભ્રૂણામહ ँ
શતં ધામાનિ સપ્ત ચ ॥ શતં વો અંબ ધામાનિ સહસ્રમુત વો રુહઃ
। અથા શતક્રત્વો યૂયમિમં મે અગદં કૃત ॥ પુષ્પાવતીઃ પ્રસૂવતીઃ
ફલિનીરફલા ઉત । અશ્વા ઇવ સજિત્વરીર્વીરુધઃ પારયિષ્ણવઃ ॥
ઓષધીરિતિ માતરસ્તદ્વો દેવીરુપ બ્રુવે । રપા ँસિ વિઘ્નતીરિત રપ
૨૫ શ્ચાતયમાનાઃ ॥ અશ્વત્થે વો નિષદનં પર્ણે વો વસતિઃ કૃતા ।
ગોભાજ ઇત્કિલાસથ યત્સનવથ પૂરુષમ્ ॥ યદહં વાજયન્નિમા
ઓષધીર્હસ્ત આદધે । આત્મા યક્ષ્મસ્ય નશ્યતિ પુરા જીવગૃભો
યથા ॥ યદોષધયઃ સંગચ્છન્તે રાજાનઃ સમિતાવિવ । વિપ્રઃ સ ઉચ્યતે
ભિષગ્રક્ષોહામીવચાતનઃ ॥ નિષ્કૃતિર્નામ વો માતાથા યૂયર ँ
સ્થ સંકૃતીઃ । સરાઃ પતત્રિણીઃ
૨૬ સ્થન યદામયતિ નિષ્કૃત ॥ અન્યા વો અન્યામવત્વન્યાન્યસ્યા ઉપાવત
। તાઃ સર્વા ઓષધયઃ સંવિદાના ઇદં મે પ્રાવતા વચઃ ॥ ઉચ્છુષ્મા
ઓષધીનાં ગાવો ગોષ્ઠાદિવેરતે । ધન ँસનિષ્યન્તીનામાત્માનં તવ
પૂરુષ ॥ અતિ વિશ્વાઃ પરિષ્ઠા સ્તેન ઇવ વ્રજમક્રમુઃ । ઓષધયઃ
પ્રાચુચ્યવુર્યત્કિં ચ તનુવા ँ રપઃ ॥ યા
૨૭ સ્ત આતસ્થુરાત્માનં યા આવિવિશુઃ પરુઃપરુઃ । તાસ્તે યક્ષ્મં વિ
બાધન્તામુગ્રો મધ્યમશીરિવ ॥ સાકં યક્ષ્મ પ્ર પત શ્યેનેન
કિકિદીવિના । સાકં વાતસ્ય ધ્રાજ્યા સાકં નશ્ય નિહાકયા ॥
અશ્વાવતી ँ સોમવતીમૂર્જયન્તીમુદોજસમ્ । આ વિત્સિ સર્વા
ઓષધીરસ્મા અરિષ્ટતાતયે ॥ યાઃ ફલિનીર્યા અફલા અપુષ્પા યાશ્ચ
પુષ્પિણીઃ । બૃહસ્પતિ પ્રસૂતાસ્તા નો મુઞ્ચન્ત્વ ँહસઃ ॥ યા
૨૮ ઓષધયઃ સોમરાજ્ઞીઃ પ્રવિષ્ટાઃ પૃથિવીમનુ । તાસાં ત્વમસ્યુત્તમા
પ્રણો જીવાતવે સુવ ॥ અવપતન્તીરવદન્દિવ ઓષધયઃ પરિ । યં
જીવમશ્નવામહૈ ન સ રિષ્યાતિ પૂરુષઃ ॥ યાશ્ચેદમુપશૃણ્વન્તિ
યાશ્ચ દૂરં પરાગતાઃ । ઇહ સંગત્ય તાઃ સર્વા અસ્મૈ સંદત્ત ભેષજમ્ ॥

મા વો રિષત્ખનિતા યસ્મૈ ચાઽહં ખનામિ વઃ । દ્વિપચ્ચતુષ્પદસ્માક ꣳ
સર્વમસ્ત્વનાતુરમ્ ॥ ઓષધયઃ સં વદન્તે સોમેન સહ રાજ્ઞા । યસ્મૈ
કરોતિ બ્રાહ્મણસ્ત ꣳ રાજન્ પારયામસિ ॥ ૪। ૨। ૬॥ ૨૫ઃ પતત્રિણીર્યા
અ ꣳ હસો યાઃ ખનામિ વોષ્ટાદશ ચ ॥ ૪। ૨। ૬॥

૨૯ મા નો હિ ꣳ સીજ્જનિતા યઃ પૃથિવ્યા યો વા દિવ ꣳ સત્યધર્મા જજાન
। યશ્ચાપશ્ચન્દ્રા બૃહતીર્જજાન કસ્મૈ દેવાય હવિષા વિધેમ ॥
અભ્યાવર્તસ્વ પૃથિવિ યજ્ઞેન પયસા સહ । વપાં તે અગ્નિરિષિતોઽવ
સર્પતુ ॥ અગ્ને યત્તે શુક્રં યચ્ચન્દ્રં યત્પૂતં યદ્યજ્ઞિયમ્ । તદ્દેવેભ્યો
ભરામસિ ॥ ઇષમૂર્જમહમિત આ

૩૦ દદ ઋતસ્ય ધામ્નો અમૃતસ્ય યોનેઃ । આ નો ગોષુ વિશત્વૌષધીષુ
જહામિ સેદિમનિરામમીવામ્ ॥ અગ્ને તવ શ્રવો વયો મહિ ભ્રાજન્ત્યર્ચયો
વિભાવસો । બૃહદ્ભાનો શવસા વાજમુક્થ્યં દધાસિ દાશુષે કવે ॥
ઇરજ્યન્નગ્ને પ્રથયસ્વ જન્તુભિરસ્મે રાયો અમર્ત્ય । સ દર્શતસ્ય
વપુષો વિ રાજસિ પૃણક્ષિ સાનસિ ꣳ રયિમ્ ॥ ઊર્જો નપાજ્જાતવેદઃ
સુશસ્તિભિર્મન્દસ્વ

૩૧ ધીતિભિર્હિતઃ । ત્વે ઇષઃ સં દધુર્ભૂરિ રેતસશ્ચિત્રોતયો વામજાતાઃ
॥ પાવકવર્ચાઃ શુક્રવર્ચા અનૂનવર્ચા ઉદિયર્ષિ ભાનુના । પુત્રઃ
પિતરા વિચરન્નુપાવસ્યુભે પૃણક્ષિ રોદસી ॥ ઋતાવાનં મહિષં
વિશ્વચર્ષણિમગ્નિ ꣳ સુમ્નાય દધિરે પુરો જનાઃ । શ્રુત્કર્ણ ꣳ
સપ્રથસ્તમં ત્વા ગિરા દૈવ્યં માનુષા યુગા ॥ નિષ્કર્તારમધ્વરસ્ય
પ્રચેતસં ક્ષયન્ત ꣳ રાધસે મહે । રાતિં ભૃગૂણામુશિજં
કવિક્રતું પૃણક્ષિ સાનસિ ꣳ

૩૨ રયિમ્ ॥ ચિતઃ સ્થ પરિચિત ઊર્ધ્વચિતઃ શ્રયધ્વં તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવાઃ સીદત ॥ આ પ્યાયસ્વ સમેતુ તે વિશ્વતઃ સોમ
વૃષ્ણિયમ્ । ભવા વાજસ્ય સંગથે ॥ સં તે પયા ꣳ સિ સમુ યન્તુ વાજાઃ
સં વૃષ્ણિયાન્યભિમાતિષાહઃ । આપ્યાયમાનો અમૃતાય સોમ દિવિ શ્રવાગ્
સ્યુત્તમાનિ ધિષ્વ ॥ ૪। ૨। ૭॥ આ મન્દસ્વ સાનસિમેકાન્ન ચત્વારિ ꣳ શચ્ચ

॥ ૪। ૨। ૭॥

૩૩ અભ્યસ્થાદ્વિશ્વાઃ પૃતના અરાતીસ્તદગ્નિરાહ તદુ સોમ આહ ।
બૃહસ્પતિઃ સવિતા તન્મ આહ પૂષા માધાથ્સુકૃતસ્ય લોકે ॥ યદક્રન્દઃ
પ્રથમં જાયમાન ઉદ્યન્થ્સમુદ્રાદુત વા પુરીષાત્ । શ્યેનસ્ય પક્ષા
હરિણસ્ય બાહૂ ઉપસ્તુતં જનિમ તત્તે અર્વન્ ॥ અપાં પૃષ્ઠમસિ
યોનિરગ્નેઃ સમુદ્રમભિતઃ પિન્વમાનમ્ । વર્ધમાનં મહ

૩૪ આ ચ પુષ્કરં દિવો માત્રયા વરિણા પ્રથસ્વ ॥ બ્રહ્મ જજ્ઞાનં પ્રથમં
પુરસ્તાદ્વિ સીમતઃ સુરુચો વેન આવઃ । સ બુધ્નિયા ઉપમા અસ્ય વિષ્ઠાઃ
સતશ્ચ યોનિમસતશ્ચ વિવઃ ॥ હિરણ્યગર્ભઃ સમવર્તતાગ્રે
ભૂતસ્ય જાતઃ પતિરેક આસીત્ । સ દાધાર પૃથિવીં દ્યામુતેમાં કસ્મૈ
દેવાય હવિષા વિધેમ ॥ દ્રપ્સશ્ચસ્કન્દ પૃથિવીમનુ

૩૫ દ્યામિમં ચ યોનિમનુ યશ્ચ પૂર્વઃ । તૃતીયં યોનિમનુ
સંચરન્તં દ્રપ્સં જુહોમ્યનુ સપ્ત હોત્રાઃ ॥ નમો અસ્તુ સર્પેભ્યો
યે કે ચ પૃથિવીમનુ । યે અન્તરિક્ષે યે દિવિ તેભ્યઃ સર્પેભ્યો
નમઃ ॥ યેઽદો રોચને દિવો યે વા સૂર્યસ્ય રશ્મિષુ । યેષામપ્સુ
સદઃ કૃતં તેભ્યઃ સર્પેભ્યો નમઃ ॥ યા ઇષવો યાતુધાનાનાં યે વા
વનસ્પતીꣳરનુ । યે વા વટેષુ શેરતે તેભ્યઃ સર્પેભ્યો નમઃ
॥ ૪। ૨। ૮॥ મહોઽનુ યાતુધાનાનામેકાદશ ચ ॥ ૪। ૨। ૮॥

૩૬ ધ્રુવાસિ ધરુણાસ્તૃતા વિશ્વકર્મણા સુકૃતા । મા ત્વા સમુદ્ર
ઉદ્વધીન્મા સુપર્ણોઽવ્યથમાના પૃથિવીં દૃꣳહ ॥ પ્રજાપતિસ્ત્વા સાદયતુ
પૃથિવ્યાઃ પૃષ્ઠે વ્યચસ્વતીં પ્રથસ્વતીં પ્રથોઽસિ પૃથિવ્યસિ
ભૂરસિ ભૂમિરસ્યદિતિરસિ વિશ્વધાયા વિશ્વસ્ય ભુવનસ્ય ધર્ત્રી
પૃથિવીં યચ્છ પૃથિવીં દૃꣳહ પૃથિવીં મા હિꣳસીર્વિશ્વસ્મૈ
પ્રાણાયાપાનાય વ્યાનાયોદાનાય પ્રતિષ્ઠાયૈ

૩૭ ચરિત્રાયાગ્નિસ્ત્વાભિ પાતુ મહ્યા સ્વસ્ત્યા છર્દિષા શંતમેન તયા
દેવતયાઙ્ગિરસ્વદ્ધ્રુવા સીદ ॥ કાણ્ડાત્કાણ્ડાત્ પ્રરોહન્તી પરુષઃપરુષઃ
પરિ । એવા નો દૂર્વે પ્ર તનુ સહસ્રેણ શતેન ચ ॥ યા શતેન

પ્રતનોષિ સહસ્રેણ વિરોહસિ । તસ્યાસ્તે દેવીષ્ટકે વિધેમ હવિષા
વયમ્ ॥ અષાઢાસિ સહમાના સહસ્વારાતીઃ સહસ્વારાતીયતઃ સહસ્વ
પૃતનાઃ સહસ્વ પૃતન્યતઃ । સહસ્રવીર્યા
૩૮ ઽસિ સા મા જિન્વ ॥ મધુ વાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવઃ ।
માધ્વીર્નઃ સન્ત્વોષધીઃ ॥ મધુ નક્તમુતોષસિ મધુમત્પાર્થિવ ँ
રજઃ । મધુ દ્યૌરસ્તુ નઃ પિતા ॥ મધુમાન્નો વનસ્પતિર્મધુમા ँ અસ્તુ
સૂર્યઃ । માધ્વીર્ગાવો ભવન્તુ નઃ ॥ મહી દ્યૌઃ પૃથિવી ચ ન ઇમં યજ્ઞં
મિમિક્ષતામ્ । પિપૃતાં નો ભરીમભિઃ ॥ તદ્વિષ્ણોઃ પરમં
૩૯ પદ ँ સદા પશ્યન્તિ સૂરયઃ । દિવીવ ચક્ષુરાતતમ્ ॥ ધ્રુવાસિ
પૃથિવિ સહસ્વ પૃતન્યતઃ । સ્યૂતા દેવેભિરમૃતેનાગાઃ ॥ યાસ્તે
અગ્ને સૂર્યે રુચ ઉદ્યતો દિવમાતન્વન્તિ રશ્મિભિઃ । તાભિઃ સર્વાભી
રુચે જનાય નસ્કૃધિ ॥ યા વો દેવાઃ સૂર્યે રુચો ગોષ્વશ્વેષુ યા રુચઃ
। ઇન્દ્રાગ્ની તાભિઃ સર્વાભી રુચં નો ધત્ત બૃહસ્પતે ॥ વિરાડ્
૪૦ જ્યોતિરધારયત્ સમ્રાડ્ જ્યોતિરધારયત્ સ્વરાડ્ જ્યોતિરધારયત્ ॥ અગ્ને
યુક્ષ્વા હિ યે તવાશ્વાસો દેવ સાધવઃ । અરં વહન્ત્યાશવઃ ॥ યુક્ષ્વા હિ
દેવહૂતમા ँ અશ્વા ँ અગ્ને રથીરિવ । નિ હોતા પૂર્વ્યઃ સદઃ ॥
દ્રપ્સશ્ચસ્કન્દ પૃથિવીમનુ દ્યામિમં ચ યોનિમનુ યશ્ચ પૂર્વઃ ।
તૃતીયં યોનિમનુ સંચરન્તં દ્રપ્સં જુહોમ્યનુ સપ્ત
૪૧ હોત્રાઃ ॥ અભૂદિદં વિશ્વસ્ય ભુવનસ્ય વાજિનમગ્નેર્વૈશ્વાનરસ્ય
ચ । અગ્નિર્જ્યોતિષા જ્યોતિષ્માન્ રુક્મો વર્ચસા વર્ચસ્વાન્ ॥ ઋચે ત્વા
રુચે ત્વા સમિથ્સ્રવન્તિ સરિતો ન ધેનાઃ । અન્તર્હૃદા મનસા પૂયમાનાઃ
॥ ઘૃતસ્ય ધારા અભિ ચાકશીમિ । હિરણ્યયો વેતસો મધ્ય આસામ્ ॥
તસ્મિન્થ્સુપર્ણો મધુકૃત્કુલાયી ભજન્નાસ્તે મધુ દેવતાભ્યઃ ।
તસ્યાસતે હરયઃ સપ્ત તીરે સ્વધાં દુહાના અમૃતસ્ય ધારામ્ ॥ ૪। ૨। ૯॥
પ્રતિષ્ઠાયૈ સહસ્રવીર્યા પરમં વિરાટ્થ્સપ્ત તીરે ચત્વારિ ચ ॥
૪। ૨। ૯॥

૪૨ આદિત્યં ગર્ભં પયસા સમઙ્ગ્જન્થ્સહસ્રસ્ય પ્રતિમાં વિશ્વરૂપમ્ ।
પરિ વૃઙ્ગ્ધિ હરસા માભિ મૃક્ષઃ શતાયુષં કૃણુહિ ચીયમાનઃ ॥
ઇમં મા હિꣳસીર્દ્વિપાદં પશૂનાꣳ સહસ્રાક્ષ મેધ આ ચીયમાનઃ ।
મયુમારણ્યમનુ તે દિશામિ તેન ચિન્વાનસ્તનુવો નિ ષીદ ॥ વાતસ્ય
ધ્રાજિં વરુણસ્ય નાભિમશ્વં જજ્ઞાનꣳ સરિરસ્ય મધ્યે । શિશું
નદીનાꣳ હરિમદ્રિબુદ્ધમગ્ને મા હિꣳસીઃ
૪૩ પરમે વ્યોમન્ ॥ ઇમં મા હિꣳસીરેકશફં પશૂનાં કનિક્રદં વાજિનં
વાજિનેષુ । ગૌરમારણ્યમનુ તે દિશામિ તેન ચિન્વાનસ્તનુવો નિ ષીદ
॥ અજસ્રમિન્દુમરુષં ભુરણ્યુમગ્નિમીડે પૂર્વચિત્તૌ નમોભિઃ । સ
પર્વભિરૃતુશઃ કલ્પમાનો ગાં મા હિꣳસીરદિતિં વિરાજમ્ ॥ ઇમꣳ
સમુદ્રꣳ શતધારમુત્સં વ્યચ્યમાનં ભુવનસ્ય મધ્યે ।
ઘૃતં દુહાનામદિતિં જનાયાગ્ને મા
૪૪ હિꣳસીઃ પરમે વ્યોમન્ । ગવયમારણ્યમનુ તે દિશામિ તેન
ચિન્વાનસ્તનુવો નિ ષીદ ॥ વરૂત્રિં ત્વષ્ટુર્વરુણસ્ય નાભિમવિં
જજ્ઞાનꣳ રજસઃ પરસ્માત્ । મહીꣳ સાહસ્રીમસુરસ્ય માયામગ્ને મા
હિꣳસીઃ પરમે વ્યોમન્ ॥ ઇમામૂર્ણાયું વરુણસ્ય માયાં ત્વચં પશૂનાં
દ્વિપદાં ચતુષ્પદામ્ । ત્વષ્ટુઃ પ્રજાનાં પ્રથમં જનિત્રમગ્ને મા
હિꣳસીઃ પરમે વ્યોમન્ । ઉષ્ટ્રમારણ્યમનુ
૪૫ તે દિશામિ તેન ચિન્વાનસ્તનુવો નિ ષીદ ॥ યો અગ્નિરગ્નેસ્તપસોઽધિ
જાતઃ શોચાત્પૃથિવ્યા ઉત વા દિવસ્પરિ । યેન પ્રજા વિશ્વકર્મા
વ્યાનટ્તમગ્ને હેડઃ પરિ તે વૃણક્તુ ॥ અજા હ્યગ્નેરજનિષ્ટ ગર્ભાથ્સા
વા અપશ્યજ્જનિતારમગ્ને । તયા રોહમાયન્નુપ મેધ્યાસસ્તયા દેવા
દેવતામગ્ર આયન્ । શરભમારણ્યમનુ તે દિશામિ તેન ચિન્વાનસ્તનુવો
નિ ષીદ ॥ ૪। ૨। ૧૦॥ અગ્ને મા હિꣳસીરગ્ને મોષ્ટ્રમારણ્યમનુ શરભન્નવ
ચ ॥ ૪। ૨। ૧૦॥
૪૬ ઇન્દ્રાગ્ની રોચના દિવઃ પરિ વાજેષુ ભૂષથઃ । તદ્વાં ચેતિ પ્ર વીર્યમ્
॥ શ્નથદ્વૃત્રમુત સનોતિ વાજમિન્દ્રા યો અગ્ની સહુરી સપર્યાત્ ।

ઇરજ્યન્તા વસવ્યસ્ય ભૂરેઃ સહસ્તમા સહસા વાજયન્તા ॥ પ્ર
ચર્ષણિભ્યઃ પૃતના હવેષુ પ્ર પૃથિવ્યા રિરિચાથે દિવશ્ચ ।
પ્ર સિન્ધુભ્યઃ પ્ર ગિરિભ્યો મહિત્વા પ્રેન્દ્રાગ્ની વિશ્વા ભુવનાત્યન્યા ॥
મરુતો યસ્ય હિ

૪૭ ક્ષયે પાથા દિવો વિમહસઃ । સ સુગોપાતમો જનઃ ॥ યજ્ઞૈર્વા
યજ્ઞવાહસો વિપ્રસ્ય વા મતીનામ્ । મરુતઃ શ઼ૃણુતા હવમ્ ॥ શ્રિયસે
કં ભાનુભિઃ સં મિમિક્ષિરે તે રશ્મિભિસ્ત ઋક્વભિઃ સુખાદયઃ । તે
વાશીમન્ત ઇષ્મિણો અભીરવો વિદ્રે પ્રિયસ્ય મારુતસ્ય ધામ્નઃ ॥ અવ તે
હેડ઼ ઉદુત્તમમ્ । કયા નશ્ચિત્ર આ ભુવદૂતી સદાવૃધઃ સખા । કયા
શચિષ્ઠયા વૃતા ॥

૪૮ કો અદ્ય યુઙ્ક્તે ધુરિગા ઋતસ્ય શિમીવતો ભામિનો દુર્હૃણાયૂન્ ।
આસન્નિષૂન્, હૃથ્સ્વસો મયોભૂન્, ય એષાં ભૃત્યામૃણધથ્સ જીવાત્ ॥
અગ્ને નયાદેવાના ꣳ શં નો ભવન્તુ વાજેવાજે । અપ્સ્વગ્ને સધિષ્ટવ
સૌષધીરનુ રુધ્યસે । ગર્ભે સઞ્જાયસે પુનઃ ॥ વૃષા સોમ દ્યુમા ꣳ
અસિ વૃષા દેવ વૃષવ્રતઃ । વૃષા ધર્માણિ દધિષે ॥ ઇમં મે
વરુણ તત્ત્વા યામિ ત્વં નો અગ્ને સ ત્વં નો અગ્ને ॥ ૪। ૨। ૧૧॥ હિ વૃતા મ
એકાદશ ચ ॥ ૪। ૨। ૧૧॥

વિષ્ણોઃ ક્રમોસિ દિવસ્પર્યન્નપતેઽપેત સમિતં યા જાતા મા નો
હિ ꣳ સીદભ્યસ્થાદ્ધ્રુવાસિ ધરુણાદિત્યં ગર્ભમિંદ્રાગ્ની રોચનૈકાદશ ॥
વિષ્ણોરસ્મિન્ હવ્યેતિ ત્વાહં ધીતિભિર્ હોત્રા અષ્ટાચત્વારિ ꣳ શત્ ॥
વિષ્ણોઃ ક્રમોસિ ત્વન્નો અગ્ને સ ત્વન્નો અગ્ને ॥

## ચતુર્થકાણ્ડે તૃતીયઃ પ્રશ્નઃ ૩

૧ અપાં ત્વેમન્થ્સાદયામ્યપાં ત્વોદ્મન્થ્સાદયામ્યપાં ત્વા ભસ્મન્થ્સાદયામ્યપાં
ત્વા જ્યોતિષિ સાદયામ્યપાં ત્વાયને સાદયામ્યર્ણવે સદને સીદ સમુદ્રે સદને
સીદ સલિલે સદને સીદાપાં ક્ષયે સીદાપા ꣳ સધિષિ સીદાપાં ત્વા સદને

સાદયામ્યપાં ત્વા સધસ્થે સાદયામ્યપાં ત્વા પુરીષે સાદયામ્યપાં ત્વા યોનૌ સાદયામ્યપાં ત્વા પાથસિ સાદયામિ ગાયત્રી છંદસ્ત્રિષ્ટુપ્છન્દો જગતી છન્દોઽનુષ્ટુપ્છંદઃ પઙ્ક્તિશ્છંદઃ ॥ ૪। ૩। ૧॥ યોનૌ પંચદશ ચ ॥

૪। ૩। ૧॥

૨ અયં પુરો ભુવસ્તસ્ય પ્રાણો ભૌવાયનો વસન્તઃ પ્રાણાયનો ગાયત્રી વાસન્તી ગાયત્રિયૈ ગાયત્રં ગાયત્રા દુપા ँ શુરુપા ँ શોસ્ત્રિવૃત્ ત્રિવૃતો રથંતર ँ રથંતરાદ્વસિષ્ઠ ઋષિઃ પ્રજાપતિગૃહીતયા ત્વયા પ્રાણં ગૃહ્ણામિ પ્રજાભ્યોઽયં દક્ષિણા વિશ્વકર્મા તસ્ય મનો વૈશ્વકર્મણં ગ્રીષ્મો માનસસ્ત્રિષ્ટુગ્ગ્રૈષ્મી ત્રિષ્ટુભ ઐડમૈડાદન્તર્યામોઽન્તર્યામાત્પઞ્ચદશઃ પઞ્ચદશાદ્બૃહદ્બૃહતો ભરદ્વાજ ઋષિઃ પ્રજાપતિગૃહીતયા ત્વયા મનો

૩ ગૃહ્ણામિ પ્રજાભ્યોયં પશ્ચાદ્વિશ્વવ્યચાસ્તસ્ય ચક્ષુર્વૈશ્વવ્યચસં વર્ષાણિ ચાક્ષુષાણિ જગતી વાર્ષી જગત્યા ઋક્ષમમૃક્ષમાચ્છુક્રઃ શુક્રાથ્સપ્તદશઃ સપ્તદશાદ્વૈરૂપં વૈરૂપાદ્વિશ્વામિત્ર ઋષિઃ પ્રજાપતિગૃહીતયા ત્વયા ચક્ષુર્ગૃહ્ણામિ પ્રજાભ્ય ઇદમુત્તરાથ્સુવસ્તસ્ય શ્રોત્ર ँ સૌવ ँ શરચ્છ્રૌત્ર્યનુષ્ટુપ્છારદ્યનુષ્ટુભઃ સ્વારર ँ સ્વારાન્મન્થી મન્થિન એકવિ ँ શ એકવિ ँ શાદ્વૈરાજં વૈરાજાજ્જમદગ્નિર્ઋષિઃ પ્રજાપતિગૃહીતયા

૪ ત્વયા શ્રોત્રં ગૃહ્ણામિ પ્રજાભ્ય ઇયમુપરિ મતિસ્તસ્યૈ વાઙ્માતી હેમન્તો વાચ્યાયનઃ પઙ્ક્તિર્હૈમન્તી પઙ્ક્ત્યૈ નિધનવન્નિધનવત આગ્રયણ આગ્રયણાત્ત્રિણવત્રયસ્ત્રિ ँ શૌ ત્રિણવત્રયસ્ત્રિ ँ શાભ્યા ँ શાક્વરરૈવતે શાક્વરરૈવતાભ્યાં વિશ્વકર્મર્ષિઃ પ્રજાપતિગૃહીતયા ત્વયા વાચં ગૃહ્ણામિ પ્રજાભ્યઃ ॥ ૪। ૩। ૨॥ ત્વયા મનો જમદગ્નિર્ ઋષિઃ પ્રજાપતિગૃહીતયા ત્રિ ँ શચ્ચ ॥ ૪। ૩। ૨॥

૫ પ્રાચી દિશાં વસન્ત ઋતૂનામગ્નિર્દેવતા બ્રહ્મ

દ્રવિણં ત્રિવૃથ્સ્તોમઃ સ ઉ પઞ્ચદશવર્તનિસ્ત્ર્યવિર્વયઃ
કૃતમયાનાં પુરોવાતો વાતઃ સાનગ ઋષિર્દક્ષિણા દિશાં ગ્રીષ્મ
ઋતૂનામિન્દ્રો દેવતા ક્ષત્રં દ્રવિણં પઞ્ચદશઃ સ્તોમઃ સ ઉ
સપ્તદશવર્તનિર્દિત્યવાડ્વયસ્ત્રેતાયાનાં દક્ષિણાદ્વાતો વાતઃ સનાતન
ઋષિઃ પ્રતીચી દિશાં વર્ષા ઋતૂનાં વિશ્વે દેવા દેવતા વિડ્
૬ દ્રવિણꣳ સપ્તદશઃ સ્તોમઃ સ ઉ એકવિꣳશવર્તનિસ્ત્રિવથ્સો
વયો દ્વાપરોઽયાનાં પશ્ચાદ્વાતો વાતોઽહભૂન ઋષિરુદીચી દિશાꣳ
શરદૃતૂનાં મિત્રાવરુણૌ દેવતા પુષ્ટં દ્રવિણમેકવિꣳશઃ સ્તોમઃ
સ ઉ ત્રિણવવર્તનિસ્તુર્યવાડ્વય આસ્કન્દોઽયાનામુત્તરાદ્વાતો વાતઃ પ્રત્ન
ઋષિરૂર્ધ્વા દિશાꣳ હેમન્તશિશિરાવૃતૂનાં બૃહસ્પતિર્દેવતા
વર્ચો દ્રવિણં ત્રિણવઃ સ્તોમઃ સ ઉ ત્રયસ્ત્રિꣳશવર્તનિઃ
પષ્ઠવાદ્વયોઽભિભૂરયાનાં વિષ્વગ્વાતો વાતઃ સુપર્ણ ઋષિઃ પિતરઃ
પિતામહાઃ પરેઽવરે તે નઃ પાન્તુ તે નોઽવન્ત્વસ્મિન્ બ્રહ્મન્નસ્મિન્
ક્ષત્રેઽસ્યામાશિષ્યસ્યાં પુરોધાયામસ્મિન્કર્મન્નસ્યાં દેવહૂત્યામ્ ॥
૪। ૩। ૩॥ વિટ્પષ્ઠવાદ્વયોઽષ્ટા વિꣳશતિશ્ચ ॥ ૪। ૩। ૩॥
૭ ધ્રુવક્ષિતિર્ધ્રુવયોનિર્ધ્રુવાસિ ધ્રુવાં યોનિમા સીદ સાધ્યા । ઉખ્યસ્ય
કેતું પ્રથમં પુરસ્તાદશ્વિનાધ્વર્યૂ સાદયતામિહ ત્વા ॥ સ્વે દક્ષે
દક્ષપિતેહ સીદ દેવત્રા પૃથિવી બૃહતી રરાણા । સ્વાસસ્થા તનુવા
સં વિશસ્વ પિતેવૈધિ સૂનવ આસુશેવાશ્વિનાધ્વર્યૂ સાદયતામિહ ત્વા
॥ કુલાયિની વસુમતી વયોધા રયિં નો વર્ધ બહુલꣳ સુવીરમ્ ।
૮ અપામતિં દુર્મતિં બાધમાના રાયસ્પોષે યજ્ઞપતિમાભજન્તી સુવર્ધેહિ
યજમાનાય પોષમશ્વિનાધ્વર્યૂ સાદયતામિહ ત્વા ॥ અગ્નેઃ પુરીષમસિ
દેવયાની તાં ત્વા વિશ્વે અભિ ગૃણન્તુ દેવાઃ । સ્તોમપૃષ્ઠા ઘૃતવતીહ
સીદ પ્રજાવદસ્મે દ્રવિણાયજસ્વાશ્વિનાધ્વર્યૂ સાદયતામિહ ત્વા ॥
દિવો મૂર્ધાસિ પૃથિવ્યા નાભિર્વિષ્ટંભની દિશામધિપત્ની ભુવનાનામ્ ॥
૯ ઊર્મિર્દ્રપ્સો અપામસિ વિશ્વકર્મા ત ઋષિરશ્વિનાધ્વર્યૂ
સાદયતામિહ ત્વા ॥ સજૂરૃતુભિઃ સજૂર્વિધાભિઃ સજૂર્વસુભિઃ

સજૂ રુદ્રૈઃ સજૂરાદિત્યૈઃ સજૂર્વિશ્વૈર્દેવૈઃ સજૂર્દેવૈઃ
સજૂર્દેવૈર્વયોનાધૈરગ્નયે ત્વા વૈશ્વાનરાયાશ્વિનાધ્વર્યૂ સાદયતામિહ
ત્વા ॥ પ્રાણં મે પાહ્યપાનં મે પાહિ વ્યાનં મે પાહિ ચક્ષુર્મ ઉર્વ્યા વિ
ભાહિ શ્રોત્રં મે શ્લોકયાપસ્પિન્વૌષધીર્જિન્વ દ્વિપાત્પાહિ ચતુષ્પાદવ
દિવો વૃષ્ટિમેરય ॥ ૪। ૩। ૪॥ સુવીરં ભુવનામુર્વ્યા સપ્તદશ ચ ॥ ૪। ૩। ૪॥
૧૦ ત્ર્યવિર્વયસ્ત્રિષ્ટુપ્છન્દો દિત્યવાડ્વયો વિરાટ્છંદઃ પઞ્ચાવિર્વયો
ગાયત્રી છંદસ્ત્રિવત્સો વય ઉષ્ણિહા છંદસ્તુર્યવાડ્વયોઽનુષ્ટુપ્છંદઃ
પષ્ઠવાડ્વયો બૃહતી છંદ ઉક્ષા વયઃ સતો બૃહતી છંદ
ઋષભો વયઃ કકુચ્છન્દો ધેનુર્વયો જગતી છન્દોઽનડ્વાન્, વયઃ
પઙ્ક્તિશ્છન્દો બસ્તો વયો વિવલં છન્દો વૃષ્ણિર્વયો વિશાલં છંદઃ
પુરુષો વયસ્તન્દ્રં છન્દો વ્યાઘ્રો વયોઽનાધૃષ્ટં છંદઃ સિꣳહો
વયશ્છદિશ્છન્દો વિષ્ટંભો વયોઽધિપતિશ્છંદઃ, ક્ષત્રં વયો
મયન્દં છન્દો વિશ્વકર્મા વયઃ પરમેષ્ઠી છન્દો મૂર્ધા વયઃ
પ્રજાપતિશ્છંદઃ ॥ ૪। ૩। ૫॥ પુરુષો વયષ્ષડ્વિꣳશતિશ્ચ ॥ ૪। ૩। ૫॥
૧૧ ઇન્દ્રાગ્ની અવ્યથમાનામિષ્ટકાં દૃꣳહતં યુવમ્ । પૃષ્ઠેન
દ્યાવાપૃથિવી અન્તરિક્ષં ચ વિ બાધતામ્ ॥ વિશ્વકર્મા ત્વા
સાદયત્વન્તરિક્ષસ્ય પૃષ્ઠે વ્યચસ્વતીં પ્રથસ્વતીં ભાસ્વતીꣳ
સૂરિમતીમા યા દ્યાં ભાસ્યા પૃથિવીમોર્વન્તરિક્ષમન્તરિક્ષં
યચ્છાન્તરિક્ષં દૃꣳહાન્તરિક્ષં મા હિꣳસીર્વિશ્વસ્મૈ
પ્રાણાયાપાનાય વ્યાનાયોદાનાય પ્રતિષ્ઠાયૈ ચરિત્રાય વાયુસ્ત્વાભિ
પાતુ મહ્યા સ્વસ્ત્યા છર્દિષા
૧૨ શન્તમેન તયા દેવતયાઙ્ગિરસ્વદ્ધ્રુવા સીદ । રાજ્ઞ્યસિ પ્રાચી
દિગ્વિરાડસિ દક્ષિણા દિક્સમ્રાડસિ પ્રતીચી દિક્સ્વરાડસ્યુદીચી
દિગધિપત્ન્યસિ બૃહતી દિગાયુર્મે પાહિ પ્રાણં મે પાહ્યપાનં મે પાહિ વ્યાનં મે
પાહિ ચક્ષુર્મે પાહિ શ્રોત્રં મે પાહિ મનો મે જિન્વ વાચં મે પિન્વાત્માનં
મે પાહિ જ્યોતિર્મે યચ્છ ॥ ૪। ૩। ૬॥ છર્દિષા પિન્વ ષટ્ચ ॥ ૪। ૩। ૬॥
૧૩ મા છંદઃ પ્રમા છંદઃ પ્રતિમા છન્દોઽસ્રીવિશ્છંદઃ પઙ્ક્તિશ્છંદ

ઉષ્ણિહા છન્દો બૃહતી છન્દોઽનુષ્ટુપ્છન્દો વિરાટ્છન્દો ગાયત્રી
છંદસ્ત્રિષ્ટુપ્છન્દો જગતી છંદઃ પૃથિવી છન્દોઽન્તરિક્ષં છન્દો
દ્યૌશ્છંદઃ સમાશ્છન્દો નક્ષત્રાણિ છન્દો મનશ્છન્દો વાક્છંદઃ
કૃષિશ્છન્દો હિરણ્યં છન્દો ગૌશ્છન્દોઽજા છન્દોઽશ્વશ્છંદઃ ॥

અગ્નિર્દેવતા

૧૪ વાતો દેવતા સૂર્યો દેવતા ચન્દ્રમા દેવતા વસવો દેવતા
રુદ્રા દેવતાદિત્યા દેવતા વિશ્વે દેવા દેવતા મરુતો દેવતા
બૃહસ્પતિર્દેવતેન્દ્રો દેવતા વરુણો દેવતા મૂર્ધાસિ રાડ્ધ્રુવાસિ
ધરુણા યન્ત્ર્યસિ યમિત્રીષે ત્વોર્જે ત્વા કૃષ્યૈ ત્વા ક્ષેમાય ત્વા
યન્ત્રી રાડ્ધ્રુવાસિ ધરણી ધર્ત્ર્યસિ ધરિત્ર્યાયુષે ત્વા વર્ચસે
ત્વૌજસે ત્વા બલાય ત્વા ॥ ૪। ૩। ૭॥ દેવતાઽયુષે ત્વા ષટ્ચ ॥ ૪। ૩। ૭॥

૧૫ આશુસ્ત્રિવૃદ્ભાન્તઃ પઞ્ચદશો વ્યોમ સપ્તદશઃ
પ્રતૂર્તિરષ્ટાદશસ્તપો નવદશોઽભિવર્તઃ સવિँશો ધરુણ
એકવિँશો વર્ચો દ્વાવિँશઃ સંભરણસ્ત્રયોવિँશો
યોનિશ્ચતુર્વિँશો ગર્ભાઃ પઞ્ચવિँશ ઓજસ્ત્રિણવઃ
ક્રતુરેકત્રિँશઃ પ્રતિષ્ઠા ત્રયસ્ત્રિँશો બ્રધ્નસ્ય વિષ્ટપં
ચતુસ્ત્રિँશો નાકઃ ષટ્ત્રિँશો વિવર્તોઽષ્ટાચત્વારિँશો
ધર્ત્રશ્ચતુષ્ટોમઃ ॥ ૪। ૩। ૮॥ આશુસ્સપ્ત ત્રિँશત્ ॥ ૪। ૩। ૮॥

૧૬ અગ્નેર્ભાગોઽસિ દીક્ષાયા આધિપત્યં બ્રહ્મ સ્પૃતં ત્રિવૃથ્સ્તોમ
ઇન્દ્રસ્ય ભાગોઽસિ વિષ્ણોરાધિપત્યં ક્ષત્રँ સ્પૃતં પઞ્ચદશઃ
સ્તોમો નૃચક્ષસાં ભાગોઽસિ ધાતુરાધિપત્યં જનિત્રગ્ગ્ સ્પૃતँ
સપ્તદશઃ સ્તોમો મિત્રસ્ય ભાગોઽસિ વરુણસ્યાધિપત્યં દિવો
વૃષ્ટિર્વાતાઃ સ્પૃતા એકવિँશઃ સ્તોમોઽદિત્યૈ ભાગોઽસિ પૂષ્ણ
આધિપત્યમોજઃ સ્પૃતં ત્રિણવઃ સ્તોમો વસૂનાં ભાગોઽસિ

૧૭ રુદ્રાણામાધિપત્યં ચતુષ્પાથ્સ્પૃતં ચતુર્વિँશઃ
સ્તોમ આદિત્યાનાં ભાગોઽસિ મરુતામાધિપત્યં ગર્ભાઃ
સ્પૃતાઃ પઞ્ચવિँશઃ સ્તોમો દેવસ્ય સવિતુર્ભાગોઽસિ

બૃહસ્પતેરાધિપત્યꣳ સમીચીર્દિશઃ સ્પૃતાશ્ચતુષ્ટોમઃ સ્તોમો
યાવાનાં ભાગોઽસ્યયાવાનામાધિપત્યં પ્રજાઃ સ્પૃતાશ્ચતુશ્ચત્વારિꣳ શઃ
સ્તોમ ઋભૂણાં ભાગોઽસિ વિશ્વેષાં દેવાનામાધિપત્યં ભૂતં નિશાન્તરꣳ
સ્પૃતં ત્રયસ્ત્રિꣳ શઃ સ્તોમઃ ॥ ૪। ૩। ૯॥ વસૂનાં ભાગોસિ
ષટ્ચત્વારિꣳ શચ્ચ ॥ ૪। ૩। ૯॥

૧૮ એકયાસ્તુવત પ્રજા અધીયન્ત પ્રજાપતિરધિપતિરાસીત્તિસૃભિરસ્તુવત
બ્રહ્માસૃજ્યત બ્રહ્મણસ્પતિરધિ પતિરાસીત્
પઞ્ચભિરસ્તુવત ભૂતાન્યસૃજ્યન્ત ભૂતાનાં
પતિરધિપતિરાસીત્સપ્તભિરસ્તુવત સપ્તર્ષયોઽસૃજ્યન્ત
ધાતાધિપતિરાસીન્નવભિરસ્તુવત પિતરોઽસૃજ્યન્તાદિતિરધિ
પત્ન્યાસીદેકાદશભિરસ્તુવતર્તવોઽસૃજ્યન્તાર્તવોઽધિપતિરાસીત્ત્રયોદશભિરસ્તુવત
માસા અસૃજ્યન્ત સંવત્સરોઽધિપતિ

૧૯ રાસીત્પઞ્ચદશભિરસ્તુવત
ક્ષત્રમસૃજ્યતેન્દ્રોઽધિપતિરાસીત્સપ્તદશભિરસ્તુવત પશવોઽસૃજ્યન્ત
બૃહસ્પતિરધિપતિરાસીન્નવદશભિરસ્તુવત શૂદ્રાર્યાવસૃજ્યેતામહોરાત્રે
અધિપત્ની આસ્તામેકવિꣳ શત્યાસ્તુવતૈકશફાઃ પશવોઽસૃજ્યન્ત
વરુણોઽધિપતિરાસીત્ત્રયોવિꣳ શત્યાસ્તુવત ક્ષુદ્રાઃ પશવોઽસૃજ્યન્ત
પૂષાધિ પતિરાસીત્ પઞ્ચવિꣳ શત્યાસ્તુવતારણ્યાઃ પશવોઽસૃજ્યન્ત
વાયુરધિપતિરાસીત્સપ્તવિꣳશત્યાસ્તુવત દ્યાવાપૃથિવી વ્યૈ

૨૦ તાં વસવો રુદ્રા આદિત્યા અનુ
વ્યાયન્તેષામાધિપત્યમાસીન્નવવિꣳ શત્યાસ્તુવત વનસ્પતયોઽસૃજ્યન્ત
સોમોઽધિપતિરાસીદેકત્રિꣳ શતાસ્તુવત પ્રજા અસૃજ્યન્ત યાવાનાં
ચાયાવાનાં ચાધિપત્યમાસીત્ત્રયસ્ત્રિꣳ શતાસ્તુવત ભૂતાન્યશામ્યન્
પ્રજાપતિઃ પરમેષ્ઠ્યધિપતિરાસીત્ ॥ ૪। ૩। ૧૦॥ સંવત્સરોઽધિપતિર્વિ
પંચત્રિꣳ શચ્ચ ॥ ૪। ૩। ૧૦॥

૨૧ ઇયમેવ સા યા પ્રથમા વ્યૌચ્છદન્તરસ્યાં ચરતિ પ્રવિષ્ટા ।
વધૂર્જજાન નવગજ્જનિત્રી ત્રય એનાં મહિમાનઃ સચન્તે ॥ છંદસ્વતી

ઉષસા પેપિશાને સમાનં યોનિમનુ સંચરન્તી । સૂર્યપત્ની વિ ચરતઃ
પ્રજાનતી કેતું કૃણ્વાને અજરે ભૂરિરેતસા ॥ ઋતસ્ય પન્થામનુ
તિસ્ર આગુસ્ત્રયો ઘર્માસો અનુ જ્યોતિષાગુઃ । પ્રજામેકા રક્ષત્યૂર્જમેકા
૨૨ વ્રતમેકા રક્ષતિ દેવયૂનામ્ ॥ ચતુષ્ટોમો અભવદ્યા તુરીયા યજ્ઞસ્ય
પક્ષાવૃષયો ભવન્તી । ગાયત્રીં ત્રિષ્ટુભં જગતીમનુષ્ટુભં
બૃહદર્કં યુઞ્જાનાઃ સુવરાભરન્નિદમ્ ॥ પઞ્ચભિર્ધાતા વિ દધાવિદં
યત્તાસાગ્ં સ્વસૃરજનયત્પઞ્ચપઞ્ચ । તાસામુ યન્તિ પ્રયવેણ પઞ્ચ નાના
રૂપાણિ ક્રતવો વસાનાઃ ॥ ત્રિꣳશથ્સ્વસાર ઉપ યન્તિ નિષ્કૃતꣳ
સમાનં કેતું પ્રતિમુઞ્ચમાનાઃ ।
૨૩ ઋતૂગ્ં સ્તન્વતે કવયઃ પ્રજાનતીર્મધ્યે છંદસઃ પરિ યન્તિ ભાસ્વતીઃ
॥ જ્યોતિષ્મતી પ્રતિ મુઞ્ચતે નભો રાત્રી દેવી સૂર્યસ્ય વ્રતાનિ । વિ
પશ્યન્તિ પશવો જાયમાના નાનારૂપા માતુરસ્યા ઉપસ્થે ॥ એકાષ્ટકા
તપસા તપ્યમાના જજાન ગર્ભં મહિમાનમિન્દ્રમ્ । તેન દસ્યૂન્વ્યસહન્ત
દેવા હન્તાસુરાણામભવચ્છચીભિઃ ॥ અનાનુજામનુજાં મામકર્ત સત્યં
વદન્ત્યન્વિચ્છ એતત્ । ભૂયાસ
૨૪ મસ્ય સુમતૌ યથા યૂયમન્યા વો અન્યામતિ મા પ્ર યુક્ત ॥ અભૂન્મમ
સુમતૌ વિશ્વવેદા આષ્ટ પ્રતિષ્ઠામવિદદ્ધિ ગાધમ્ । ભૂયાસમસ્ય
સુમતૌ યથા યૂયમન્યા વો અન્યામતિ મા પ્ર યુક્ત ॥ પઞ્ચ વ્યુષ્ટીરનુ
પઞ્ચ દોહા ગાં પઞ્ચનામ્નીમૃતવોઽનુ પઞ્ચ । પઞ્ચ દિશઃ
પઞ્ચદશેન ક્લૃપ્તાઃ સમાનમૂર્ધ્નીરભિ લોકમેકમ્ ॥
૨૫ ઋતસ્ય ગર્ભઃ પ્રથમા વ્યૂષુષ્યપામેકા મહિમાનં બિભર્તિ
। સૂર્યસ્યૈકા ચરતિ નિષ્કૃતેષુ ઘર્મસ્યૈકા સવિતૈકાં
નિયચ્છતિ ॥ યા પ્રથમા વ્યૌચ્છથ્સા ધેનુરભવદ્યમે । સા નઃ
પયસ્વતી ધુક્ષ્વોત્તરામુત્તરાꣳ સમામ્ ॥ શુક્રર્ષભા નભસા
જ્યોતિષાગાદ્વિશ્વરૂપા શબલીરગ્નિકેતુઃ । સમાનમર્થગ્ં સ્વપસ્યમાના
બિભ્રતી જરામજર ઉષ આગાઃ ॥ ઋતૂનાં પત્ની પ્રથમેયમાગાદહ્નાં
નેત્રી જનિત્રી પ્રજાનામ્ । એકા સતી બહુધોષો વ્યુચ્છસ્યજીર્ણા ત્વં

જરયસિ સર્વમન્યત્ ॥ ૪। ૩। ૧૧॥ ઊર્જમેકા પ્રતિમુંચમાના ભૂયાસમેકં

પત્યેકાન્ન વિ શતિશ્ચ ॥ ૪। ૩। ૧૧॥

૨૬ અગ્ને જાતાન્ પ્રણુદા નઃ સપત્નાન્ પ્રત્યજાતાઞ્જાતવેદોનુદસ્વ । અસ્મે દીદિહિ

સુમના અહેડન્તવ સ્યા ૢ શર્મન્ ત્રિવરૂથ ઉદ્ભિત્ ॥ સહસા જાતાન્

પ્રણુદા નઃ સપત્નાન્ પ્રત્યજાતાઞ્જાતવેદોનુદસ્વ । અધિ નો બ્રૂહિ સુમનસ્યમાનો

વયર ૢ સ્યામ પ્રણુદા નઃ સપત્નાન્ ॥ ચતુશ્ચત્વારિ ૢ શઃ સ્તોમો

વર્ચો દ્રવિણ ૢ ષોડશઃ સ્તોમ ઓજો દ્રવિણં પૃથિવ્યાઃ પુરીષમસ્ય

૨૭ પ્સો નામ । એવશ્છન્દો વરિવશ્છંદઃ શંભૂશ્છંદઃ પરિભૂશ્છંદ

આચ્છચ્છન્દો મનશ્છન્દો વ્યચશ્છંદઃ સિન્ધુશ્છંદઃ સમુદ્રં છંદઃ

સલિલં છંદઃ સંયચ્છન્દો વિયચ્છન્દો બૃહચ્છન્દો રથંતરં

છન્દો નિકાયશ્છન્દો વિવધશ્છન્દો ગિરશ્છન્દો ભ્રજશ્છંદઃ

સષ્ટુપ્છન્દોઽનુષ્ટુપ્છંદઃ કકુચ્છંદસ્ત્રિકકુચ્છંદઃ કાવ્યં

છન્દોઽઙ્કુપં છંદઃ

૨૮ પદપઙ્ક્તિશ્છન્દોઽક્ષરપઙ્ક્તિશ્છન્દો વિષ્ટારપઙ્ક્તિશ્છંદઃ,

ક્ષુરો ભૃજ્વાઙ્છંદઃ પ્રચ્છચ્છંદઃ પક્ષશ્છંદ એવશ્છન્દો

વરિવશ્છન્દો વયશ્છન્દો વયસ્કૃચ્છન્દો વિશાલં છન્દો

વિષ્પર્ધાશ્છંદશ્છદિશ્છન્દો દૂરોહણં છંદસ્તન્દ્રં છન્દોઽઙ્કાઙ્કં

છંદઃ ॥ ૪। ૩। ૧૨॥ અસ્યંકુપં છંદસ્ત્રયસ્ત્રિ ૢ શચ્ચ ॥ ૪। ૩। ૧૨॥

૨૯ અગ્નિર્વૃત્રાણિ જઙ્ઘનદ્દ્રવિણસ્યુર્વિપન્યયા । સમિદ્ધઃ શુક્ર આહુતઃ

॥ ત્વ ૢ સોમાસિ સત્પતિસ્ત્વ ૢ રાજોત વૃત્રહા । ત્વં ભદ્રો અસિ

ક્રતુઃ ॥ ભદ્રા તે અગ્ને સ્વનીક સંદૃગ્ઘોરસ્ય સતો વિષુણસ્ય ચારુઃ

। ન યત્તે શોચિસ્તમસા વરન્ત ન ધ્વસ્માનસ્તનુ વિ રેપ આધુઃ ॥

ભદ્રં તે અગ્ને સહસિન્નનીકમુપાક આ રોચતે સૂર્યસ્ય ।

૩૦ રુશદ્દૃશે દદૃશે નક્તયા ચિદરૂક્ષિતં દૃશ આ રૂપે અન્નમ્ ॥

સૈનાનીકેન સુવિદત્રો અસ્મે યષ્ટા દેવા ૢ આયજિષ્ઠઃ સ્વસ્તિ । અદબ્ધો

ગોપા ઉત નઃ પરસ્પા અગ્ને દ્યુમદુત રેવદ્દિદીહિ ॥ સ્વસ્તિ નો દિવો અગ્ને

પૃથિવ્યા વિશ્વાયુર્ધેહિ યજથાય દેવ । યથ્સીમહિ દિવિજાત પ્રશસ્તં
તદસ્માસુ દ્રવિણં ધેહિ ચિત્રમ્ ॥ યથા હોતર્મનુષો

૩૧ દેવતા તા યજ્ઞેભિઃ સૂનો સહસો યજાસિ । એવા નો અદ્ય સમના
સમાનાનુશન્નગ્ન ઉશતો યક્ષિ દેવાન્ ॥ અગ્નિમીડે પુરોહિતં યજ્ઞસ્ય
દેવમૃત્વિજમ્ । હોતારꣳ રત્નધાતમમ્ ॥ વૃષા સોમ દ્યુમાꣳ અસિ
વૃષા દેવ વૃષવ્રતઃ । વૃષા ધર્માણિ દધિષે ॥ સાંતપના ઇદꣳ
હવિર્મરુતસ્તજ્જુજુષ્ટન । યુષ્માકોતી રિશાદસઃ ॥ યો નો મર્તો વસવો
દુર્હૃણાયુસ્તિરઃ સત્યાનિ મરુતો

૩૨ જિઘાꣳસાત્ । દ્રુહઃ પાશં પ્રતિ સ મુચીષ્ટ તપિષ્ઠેન તપસા હન્તના
તમ્ ॥ સંવથ્સરીણા મરુતઃ સ્વર્કા ઉરુક્ષયાઃ સગણા માનુષેષુ ।
તેઽસ્મત્પાશાન્ પ્ર મુઞ્ચન્ત્વꣳહસઃ સાંતપના મદિરા માદયિષ્ણવઃ ॥
પિપ્રીહિ દેવાꣳ ઉશતો યવિષ્ઠ વિદ્વાꣳ ઋતૂꣳ ઋતુપતે યજેહ
। યે દૈવ્યા ઋત્વિજસ્તેભિરગ્ને ત્વꣳ હોતૃણામસ્યાયજિષ્ઠઃ ॥ અગ્ને
યદદ્ય વિશો અધ્વરસ્ય હોતઃ પાવક

૩૩ શોચે વેષ્ટ્વꣳ હિ યજ્વા । ઋતા યજાસિ મહિના વિ યદ્ભૂર્હવ્યા વહ
યવિષ્ઠ યા તે અદ્ય ॥ અગ્નિના રયિમશ્નવત્પોષમેવ દિવેદિવે ।
યશસં વીરવત્તમમ્ ॥ ગયસ્ફાનો અમીવહા વસુવિત્પુષ્ટિવર્ધનઃ
। સુમિત્રઃ સોમ નો ભવ ॥ ગૃહમેધાસ આ ગત મરુતો મા પ ભૂતન ।
પ્રમુઞ્ચન્તો નો અꣳહસઃ ॥ પૂર્વીભિર્હિ દદાશિમ શરદ્ભિર્મરુતો
વયમ્ । મહોભિ

૩૪ શ્ચર્ષણીનામ્ ॥ પ્ર બુધ્નિયા ઈરતે વો મહાꣳસિ પ્રણામાનિ
પ્રયજ્યવસ્તિરધ્વમ્ । સહસ્રિયં દમ્યં ભાગમેતં ગૃહમેધીયં મરુતો
જુષધ્વમ્ ॥ ઉપ યમેતિ યુવતિઃ સુદક્ષં દોષા વસ્તોર્ હવિષ્મતી
ઘૃતાચી । ઉપ સ્વૈનમરમતિર્વસૂયુઃ ॥ ઇમો અગ્ને વીતતમાનિ
હવ્યાજસ્રો વક્ષિ દેવતાતિમચ્છ । પ્રતિ ન ઈꣳ સુરભીણિ વિયન્તુ ।
ક્રીડં વઃ શર્ધો મારુતમનર્વાણꣳરથેશુભમ્ ।

૩૫ કણ્વા અભિ પ્ર ગાયત ॥ અત્યાસો ન યે મરુતઃ સ્વઞ્ચો યક્ષદૃશો

ન શુભયન્ત મર્યાઃ । તે હર્મ્યેષ્ઠાઃ શિશવો ન શુભ્રા વત્સાસો ન
પ્રક્રીડિનઃ પયોધાઃ ॥ પ્રૈષામજ્મેષુ વિથુરેવ રેજતે ભૂમિર્યામેષુ
યદ્ધ યુઞ્જતે શુભે । તે ક્રીડયો ધુનયો ભ્રાજદૃષ્ટયઃ સ્વયં
મહિત્વં પનયન્ત ધૂતયઃ ॥ ઉપહ્વરેષુ યદચિધ્વં યયિં વય
ઇવ મરુતઃ કેન
૩૬ ચિત્પથા । શ્ચોતન્તિ કોશા ઉપ વો રથેષ્વા ઘૃતમુક્ષતા
મધુવર્ણમર્ચતે ॥ અગ્નિમગ્નિꣳ હવીમભિઃ સદા હવન્ત વિશ્પતિમ્
। હવ્યવાહં પુરુપ્રિયમ્ ॥ તꣳ હિ શશ્વન્ત ઈડતે સ્રુચા દેવં
ઘૃતશ્ચુતા । અગ્નિꣳ હવ્યાય વોઢવે ॥ ઇન્દ્રાગ્ની રોચના દિવઃ
શ્નથદ્વૃત્રમિન્દ્રં વો વિશ્વતસ્પરીન્દ્રં નરો વિશ્વકર્મન્ હવિષા
વાવૃધાનો વિશ્વકર્મન્ હવિષા વર્ધનેન ॥ ૪। ૩। ૧૩॥ સૂર્યસ્ય મનુષો
મરુતઃ પાવક મહોભી રથે શુભં કેન ષટ્ચત્વારિꣳશચ્ચ ॥ ૪। ૩। ૧૩॥
અપાંત્વેમન્નયં પુરઃ પ્રાચી ધ્રુવક્ષિતિસ્ત્ર્યવિરિંદ્રાગ્ની મા છંદ
આશુસ્ત્રિવૃદગ્નેર્ભાગોસ્યેકયેયમેવ સા યાગ્ને જાતાનગ્નિર્વૃત્રાણિ
ત્રયોદશ ॥

અપાં ત્વેંદ્રાગ્ની ઇયમેવ સા દેવતાતા ષટ્ત્રિꣳશત્ ॥

અપાં ત્વેમન્ હવિષા વર્ધનેન ॥

## ચતુર્થકાણ્ડે ચતુર્થઃ પ્રશ્નઃ ૪

૧ રશ્મિરસિ ક્ષયાય ત્વા ક્ષયં જિન્વ પ્રેતિરસિ ધર્માય ત્વા ધર્મં
જિન્વાન્વિતિરસિ દિવે ત્વા દિવં જિન્વ સંધિરસ્યન્તરિક્ષાય ત્વાન્તરિક્ષં
જિન્વ પ્રતિધિરસિ પૃથિવ્યૈ ત્વા પૃથિવીં જિન્વ વિષ્ટંભોઽસિ
વૃષ્ટ્યૈ ત્વા વૃષ્ટિં જિન્વ પ્રવાસ્યહ્ને ત્વાહર્જિન્વાનુવાસિ રાત્રિયૈ ત્વા
રાત્રિં જિન્વોશિગસિ
૨ વસુભ્યસ્ત્વા વસૂઞ્જિન્વ પ્રકેતોઽસિ રુદ્રેભ્યસ્ત્વા રુદ્રાઞ્જિન્વ
સુદીતિરસ્યાદિત્યેભ્યસ્ત્વાદિત્યાંજિન્વૌજોઽસિ પિતૃભ્યસ્ત્વા પિતૃઞ્જિન્વ

તન્તુરસિ પ્રજાભ્યસ્ત્વા પ્રજા જિન્વ પૃતનાષાડસિ પશુભ્યસ્ત્વા
પશૂઞ્જિન્વ રેવદસ્યોષધીભ્યસ્ત્વૌષધીર્જિન્વાભિજિદસિ
યુક્તગ્રાવેન્દ્રાય ત્વેન્દ્રં જિન્વાધિપતિરસિ પ્રાણાય
૩ ત્વા પ્રાણં જિન્વ યન્તાસ્યપાનાય ત્વાપાનં જિન્વ સ ँ સર્પોઽસિ
ચક્ષુષે ત્વા ચક્ષુર્જિન્વ વયોધા અસિ શ્રોત્રાય ત્વા શ્રોત્રં જિન્વ
ત્રિવૃદસિ પ્રવૃદસિ સંવૃદસિ વિવૃદસિ સ ँ રોહોઽસિ નીરોહોઽસિ
પ્રરોહોઽસ્યનુરોહોઽસિ વસુકોઽસિ વેષશ્રિરસિ વસ્યષ્ટિરસિ ॥ ૪। ૪। ૧॥ ઉશિગસિ પ્રાણાય ત્રિ
ચત્વારિ ँ શચ્ચ ॥ ૪। ૪। ૧॥
૪ રાજ્ઞ્યસિ પ્રાચી દિગ્વસવસ્તે દેવા અધિપતયોઽગ્નિર્હેતીનાં પ્રતિધર્તા
ત્રિવૃત્ત્વા સ્તોમઃ પૃથિવ્યાગ્ શ્રયત્વાજ્યમુક્થમવ્યથયથ્સ્તભ્નાતુ
રથંતર ँ સામ પ્રતિષ્ઠિત્યૈ વિરાડસિ દક્ષિણા દિગ્રુદ્રાસ્તે દેવા
અધિપતય ઇન્દ્રો હેતીનાં પ્રતિધર્તા પઞ્ચદશસ્ત્વા સ્તોમઃ પૃથિવ્યાગ્
શ્રયતુ પ્રૌગમુક્થમવ્યથયથ્સ્તભ્નાતુ બૃહથ્સામ પ્રતિષ્ઠિત્યૈ
સમ્રાડસિ પ્રતીચી દિ
૫ ગાદિત્યાસ્તે દેવા અધિપતયઃ સોમો હેતીનાં પ્રતિધર્તા સપ્તદશસ્ત્વા
સ્તોમઃ પૃથિવ્યાગ્ શ્રયતુ મરુત્વતીયમુક્થમવ્યથયથ્સ્તભ્નાતુ વૈરૂપ ँ
સામ પ્રતિષ્ઠિત્યૈ સ્વરાડસ્યુદીચી દિગ્વિશ્વે તે દેવા અધિપતયો વરુણો
હેતીનાં પ્રતિધર્તૈકવિ ँ શસ્ત્વા સ્તોમઃ પૃથિવ્યાગ્ શ્રયતુ
નિષ્કેવલ્યમુક્થમવ્યથયથ્સ્તભ્નાતુ વૈરાજ ँ સામ પ્રતિષ્ઠિત્યા
અધિપત્ન્યસિ બૃહતી દિઙ્મરુતસ્તે દેવા અધિપતયો
૬ બૃહસ્પતિર્હેતીનાં પ્રતિધર્તા ત્રિણવત્રયસ્ત્રિ ँ શૌ ત્વા સ્તોમૌ
પૃથિવ્યાગ્ શ્રયતાં વૈશ્વદેવાગ્નિમારુતે ઉક્થે અવ્યથયન્તી સ્તભ્નીતા ँ
શાક્વરરૈવતે સામની પ્રતિષ્ઠિત્યા અન્તરિક્ષાયર્ષયસ્ત્વા પ્રથમજા
દેવેષુ દિવો માત્રયા વરિણા પ્રથન્તુ વિધર્તા ચાયમધિપતિશ્ચ તે ત્વા
સર્વે સંવિદાના નાકસ્ય પૃષ્ઠે સુવર્ગે લોકે યજમાનં ચ સાદયન્તુ ॥ ૪। ૪। ૨॥
પ્રતીચી દિઙ્મરુતસ્તે દેવા અધિપતયશ્ચત્વારિ ँ શચ્ચ ॥ ૪। ૪। ૨॥
૭ અયં પુરો હરિકેશઃ સૂર્યરશ્મિસ્તસ્ય રથગૃથ્સશ્ચ રથૌજાશ્ચ

સેનાનિગ્રામણ્યૌ પુઞ્જિકસ્થલા ચ કૃતસ્થલા ચાપ્સરસૌ યાતુધાના
હેતી રક્ષાꣳસિ પ્રહેતિરયં દક્ષિણા વિશ્વકર્મા તસ્ય
રથસ્વનશ્ચ રથેચિત્રશ્ચ સેનાનિગ્રામણ્યૌ મેનકા ચ સહજન્યા
ચાપ્સરસૌ દઽક્ષ્ણવઃ પશવો હેતિઃ પૌરુષેયો વધઃ પ્રહેતિરયં
પશ્ચાદ્વિશ્વવ્યચાસ્તસ્ય રથ પ્રોતશ્ચાસમરથશ્ચ સેનાનિ ગ્રામણ્યૌ
પ્રમ્લોચન્તી ચા

૮ ऽનુમ્લોચન્તી ચાપ્સરસૌ સર્પા હેતિર્વ્યાઘ્રાઃ પ્રહેતિરયમુત્તરાથ્સં
યદ્વસુસ્તસ્ય સેનજિચ્ચ સુષેણશ્ચ સેનાનિગ્રામણ્યૌ વિશ્વાચી ચ
ઘૃતાચી ચાપ્સરસાવાપો હેતિર્વાતઃ પ્રહેતિરયમુપર્યર્વાગ્વસુસ્તસ્ય
તાર્ક્ષ્યશ્ચારિષ્ટનેમિશ્ચ સેનાનિગ્રામણ્યાવુર્વશી ચ
પૂર્વચિત્તિશ્ચાપ્સરસૌ વિદ્યુદ્ધેતિરવસ્ફૂર્જન્પ્ર હેતિસ્તેભ્યો
નમસ્તે નો મૃડયન્તુ તે યં

૯ દ્વિષ્મો યશ્ચ નો દ્વેષ્ટિ તં વો જંભે દધામ્યાયોસ્ત્વા સદને
સાદયામ્યવતશ્છાયાયાં નમઃ સમુદ્રાય નમઃ સમુદ્રસ્ય ચક્ષસે
પરમેષ્ઠી ત્વા સાદયતુ દિવઃ પૃષ્ઠે વ્યચસ્વતીં પ્રથસ્વતીં વિભૂમતીં
પ્રભૂમતીં પરિભૂમતીં દિવં યચ્છ દિવં દૃꣳહ દિવં મા
હિꣳસીર્વિશ્વસ્મૈ પ્રાણાયાપાનાય વ્યાનાયોદાનાય પ્રતિષ્ઠાયૈ
ચરિત્રાય સૂર્યસ્ત્વાભિ પાતુ મહ્યા સ્વસ્ત્યા છર્દિષા શં તમેન
તયા દેવતયાઙ્ગિરસ્વદ્ધ્રુવા સીદ । પ્રોથદશ્વો ન યવસે અવિષ્યન્,
યદા મહઃ સં વરણાદ્વ્યસ્થાત્ । આદસ્ય વાતો અનુ વાતિ શોચિરધ
સ્મ તે વ્રજનં કૃષ્ણમસ્તિ ॥ ૪। ૪। ૩॥ પ્રમ્લોચન્તી ચ યગ્ગ્ સ્વસ્ત્યાऽષ્ટા
વિꣳશતિશ્ચ ॥ ૪। ૪। ૩॥

૧૦ અગ્નિર્મૂર્ધા દિવઃ કકુત્પતિઃ પૃથિવ્યા અયમ્ । અપાꣳ રેતાꣳસિ જિન્વતિ
॥ ત્વામગ્ને પુષ્કરાદધ્યથર્વા નિરમન્થત । મૂર્ધ્નો વિશ્વસ્ય વાઘતઃ
॥ અયમગ્નિઃ સહસ્રિણો વાજસ્ય શતિનસ્પતિઃ । મૂર્ધા કવી રયીણામ્
॥ ભુવો યજ્ઞસ્ય રજસશ્ચ નેતા યત્રા નિયુદ્ભિઃ સચસે શિવાભિઃ
। દિવિ મૂર્ધાનં દધિષે સુવર્ષાં જિહ્વામગ્ને ચકૃષે હવ્યવાહમ્ ॥

અબોધ્યગ્નિઃ સમિધા જનાનાં
૧૧ પ્રતિ ધેનુમિવાયતીમુષાસમ્ । યહ્વા ઇવ પ્ર વયામુજ્જિહાનાઃ
પ્ર ભાનવઃ સિસ્રતે નાકમચ્છ ॥ અવોચામ કવયે મેધ્યાય વચો
વન્દારુ વૃષભાય વૃષ્ણે । ગવિષ્ઠિરો નમસા સ્તોમમગ્નૌ દિવીવ
રુક્મમુર્વ્યઞ્ચમશ્રેત્ ॥ જનસ્ય ગોપા અજનિષ્ટ જાગૃવિરગ્નિઃ સુદક્ષઃ
સુવિતાય નવ્યસે । ઘૃતપ્રતીકો બૃહતા દિવિ સ્પૃશા દ્યુમદ્વિ ભાતિ
ભરતેભ્યઃ શુચિઃ ॥ ત્વામગ્ને અંગિરસો
૧૨ ગુહા હિતમન્વવિન્દઙ્છિશ્રિયાણં વનેવને । સ જાયસે મથ્યમાનઃ
સહો મહત્ત્વામાહુઃ સહસસ્પુત્રમઙ્ગિરઃ ॥ યજ્ઞસ્ય કેતું પ્રથમં
પુરોહિતમગ્નિં નરસ્ત્રિષધસ્થે સમિન્ધતે । ઇન્દ્રેણ દેવૈઃ સરથ ઁ
સ બર્હિષિ સીદન્નિ હોતા યજથાય સુક્રતુઃ ॥ ત્વાં ચિત્રશ્રવસ્તમ
હવન્તે વિક્ષુ જન્તવઃ । શોચિષ્કેશં પુરુપ્રિયાગ્ને હવ્યાય વોઢવે ॥
સખાયઃ સં વઃ સમ્યઞ્ચમિષગ્ગ્
૧૩ સ્તોમં ચાગ્નયે । વર્ષિષ્ઠાય ક્ષિતીનામૂર્જો નપ્ત્રે સહસ્વ તે ॥
સ ઁ સમિદ્યુવસે વૃષન્નગ્ને વિશ્વાન્યર્ય આ । ઇડસ્પદે સમિધ્યસે
સ નો વસૂન્યા ભર ॥ એના વો અગ્નિં નમસોર્જો નપાતમા હુવે । પ્રિયં
ચેતિષ્ઠમરતિર ઁ સ્વધ્વરં વિશ્વસ્ય દૂતમમૃતમ્ ॥ સ યોજતે
અરુષો વિશ્વભોજસા સ દુદ્રવથ્સ્વાહુતઃ । સુબ્રહ્મા યજ્ઞઃ સુશમી
૧૪ વસૂનાં દેવ ઁ રાધો જનાનામ્ ॥ ઉદસ્ય શોચિરસ્થાદાજુહ્વાનસ્ય
મીઢુષઃ । ઉદ્ધૂમાસો અરુષાસો દિવિસ્પૃશઃ સમગ્નિમિન્ધતે નરઃ
॥ અગ્ને વાજસ્ય ગોમત ઈશાનઃ સહસો યહો । અસ્મે ધેહિ જાતવેદો મહિ
શ્રવઃ ॥ સ ઇધાનો વસુષ્કવિરગ્નિરીડેન્યો ગિરા । રેવદસ્મભ્યં
પુર્વણીક દીદિહિ ॥ ક્ષપો રાજન્નુત ત્મનાગ્ને વસ્તોરુતોષસઃ । સ તિગ્મજંભ
૧૫ રક્ષસો દહ પ્રતિ ॥ આ તે અગ્ન ઇધીમહિ દ્યુમન્તં દેવાજરમ્ । યદ્ધ
સ્યા તે પનીયસી સમિદ્દીદયતિ દ્યવીષગ્ગ્ સ્તોતૃભ્ય આ ભર ॥ આ તે
અગ્ન ઋચા હવિઃ શુક્રસ્ય જ્યોતિષસ્પતે । સુશ્ચન્દ્ર દસ્મ વિશ્પતે

હવ્યવાટ્તુભ્યꣳ હૂયત ઇષગ્ગ્ સ્તોતૃભ્ય આ ભર ॥ ઉ ભે સુશ્ચન્દ્ર
સર્પિષો દર્વી શ્રીણીષ આસનિ । ઉતોન ઉત્પુપૂર્યા
૧૬ ઉક્થેષુ શવસસ્પત ઇષગ્ગ્ સ્તોતૃભ્ય આ ભર ॥ અગ્ને તમદ્યાશ્વં
ન સ્તોમૈઃ ક્રતું ન ભદ્રꣳ હૃદિસ્પૃશમ્ । ઋધ્યામા ત ઓહૈઃ ॥
અધા હ્યગ્ને ક્રતોર્ભદ્રસ્ય દક્ષસ્ય સાધોઃ । રથીરૃતસ્ય બૃહતો
બભૂથ ॥ આભિ ષ્ટે અદ્ય ગીર્ભિર્ગૃણન્તોઽગ્ને દાશેમ । પ્ર તે દિવો
ન સ્તનયન્તિ શુષ્માઃ ॥ એભિર્નો અર્કૈર્ભવા નો અર્વાઙ્
૧૭ સુવર્ન જ્યોતિઃ । અગ્ને વિશ્વેભિઃ સુમના અનીકૈઃ ॥ અગ્નિꣳ હોતારં મન્યે
દાસ્વન્તં વસોઃ સૂનુꣳ સહસો જાતવેદસમ્ । વિપ્રં ન જાતવેદસમ્ ॥
ય ઊર્ધ્વયા સ્વધ્વરો દેવો દેવાચ્યા કૃપા । ઘૃતસ્ય વિભ્રાષ્ટિમનુ
શુક્રશોચિષ આજુહ્વાનસ્ય સર્પિષઃ ॥ અગ્ને ત્વમ્નો અન્તમઃ । ઉત ત્રાતા
શિવો ભવ વરૂથ્યઃ ॥ તં ત્વા શોચિષ્ઠ દીદિવઃ । સુમ્નાય નૂનમીમહે
સખિભ્યઃ ॥ વસુરગ્નિર્વસુશ્રવાઃ । અચ્છા નક્ષિ દ્યુમત્તમો રયિં દાઃ
॥ ૪। ૪। ૪॥ જનાનામંગિરસ ઇષꣳ સુશમી તિગ્મજંભ પુપૂર્યા અર્વાઙ્
વસુશ્રવાઃ પંચ ચ ॥ ૪। ૪। ૪॥
૧૮ ઇન્દ્રાગ્નિભ્યાં ત્વા સયુજા યુજા યુનજ્મ્યાઘારાભ્યાં
તેજસા વર્ચસોક્થેભિઃ સ્તોમેભિશ્છન્દોભી રય્યૈ પોષાય
સજાતાનાં મધ્યમસ્થેયાય મયા ત્વા સયુજા યુજા યુનજ્મ્યંબા
દુલાનિતત્નિરભ્રયન્તી મેઘયન્તી વર્ષયન્તી ચુપુણીકા નામાસિ
પ્રજાપતિના ત્વા વિશ્વાભિર્ધીભિરુપ દધામિ પૃથિવ્યુદપુરમન્નેન
વિષ્ટા મનુષ્યાસ્તે ગોપ્તારોઽગ્નિર્વિયત્તોઽસ્યાં તામહં પ્ર પદ્યે સા
૧૯ મે શર્મ ચ વર્મ ચાસ્ત્વધિદ્યૌરન્તરિક્ષં બ્રહ્મણા વિષ્ટા
મરુતસ્તે ગોપ્તારો વાયુર્વિયત્તોઽસ્યાં તામહં પ્ર પદ્યે સા મે શર્મ
ચ વર્મ ચાસ્તુ દ્યૌરપરાજિતામૃતેન વિષ્ટાદિત્યાસ્તે ગોપ્તારઃ સૂર્યો
વિયત્તોઽસ્યાં તામહં પ્ર પદ્યે સા મે શર્મ ચ વર્મ ચાસ્તુ ॥ ૪। ૪। ૫॥
સાષ્ટા ચત્વારિꣳ શચ્ચ ॥ ૪। ૪। ૫॥

૨૦ બૃહસ્પતિસ્ત્વા સાદયતુ પૃથિવ્યાઃ પૃષ્ઠે જ્યોતિષ્મતીં વિશ્વસ્મૈ
પ્રાણાયાપાનાય વિશ્વં જ્યોતિર્યચ્છાગ્નિસ્તેઽધિપતિર્વિશ્વકર્મા ત્વા
સાદયત્વન્તરિક્ષસ્ય પૃષ્ઠે જ્યોતિષ્મતીં વિશ્વસ્મૈ પ્રાણાયાપાનાય
વિશ્વં જ્યોતિર્યચ્છ વાયુસ્તેઽધિપતિઃ પ્રજાપતિસ્ત્વા સાદયતુ દિવઃ પૃષ્ઠે
જ્યોતિષ્મતીં વિશ્વસ્મૈ પ્રાણાયાપાનાય વિશ્વં જ્યોતિર્યચ્છ પરમેષ્ઠી
તેઽધિપતિઃ પુરોવાત સનિરસ્યભ્રસનિરસિ વિદ્યુથ્સનિ
૨૧ રસિ સ્તનયિત્નુસનિરસિ વૃષ્ટિસનિરસ્યગ્નેર્યાન્યસિ દેવાનામગ્નેયાન્યસિ
વાયોર્યાન્યસિ દેવાનાં વાયોયાન્યસ્યન્તરિક્ષસ્ય યાન્યસિ
દેવાનામન્તરિક્ષયાન્યસ્યન્તરિક્ષમસ્યન્તરિક્ષાય ત્વા સલિલાય ત્વા
સર્ણીકાય ત્વા સતીકાય ત્વા કેતાય ત્વા પ્રચેતસે ત્વા વિવસ્વતે ત્વા દિવસ્ત્વા
જ્યોતિષ આદિત્યેભ્યસ્ત્વર્ચે ત્વા રુચે ત્વા દ્યુતે ત્વા ભાસે ત્વા જ્યોતિષે
ત્વા યશોદાં ત્વા યશસિ તેજોદાં ત્વા તેજસિ પયોદાં ત્વા પયસિ વર્ચોદાં
ત્વા વર્ચસિ દ્રવિણોદાં ત્વા દ્રવિણે સાદયામિ તેનર્ષિણા તેન બ્રહ્મણા
તયા દેવતયાઙ્ગિરસ્વદ્ ધ્રુવા સીદ ॥ ૪। ૪। ૬॥ વિદ્યુથ્સનિર્દ્યુતે ત્વૈકાન્ન
ત્રિꣳશચ્ચ ॥ ૪। ૪। ૬॥
૨૨ ભૂયસ્કૃદસિ વરિવસ્કૃદસિ
પ્રાચ્યસ્યૂર્ધ્વાસ્યન્તરિક્ષસદસ્યન્તરિક્ષે સીદાપ્સુષદસિ શ્યેનસદસિ
ગૃધ્રસદસિ સુપર્ણસદસિ નાકસદસિ પૃથિવ્યાસ્ત્વા દ્રવિણે
સાદયામ્યન્તરિક્ષસ્ય ત્વા દ્રવિણે સાદયામિ દિવસ્ત્વા દ્રવિણે સાદયામિ દિશાં
ત્વા દ્રવિણે સાદયામિ દ્રવિણોદાં ત્વા દ્રવિણે સાદયામિ પ્રાણં મે પાહ્યપાનં મે
પાહિ વ્યાનં મે
૨૩ પાહ્યાયુર્મે પાહિ વિશ્વાયુર્મે પાહિ સર્વાયુર્મે પાહ્યગ્ને યત્તે પરꣳ
હૃન્નામ તાવેહિ સꣳ રભાવહૈ પાઞ્ચજન્યેષ્વપ્યેધ્યગ્ને યાવા અયાવા
એવા ઊમાઃ સબ્દઃ સગરઃ સુમેકઃ ॥ ૪। ૪। ૭॥ વ્યાનં મે દ્વાત્રિꣳશચ્ચ ॥
૪। ૪। ૭॥
૨૪ અગ્નિના વિશ્વાષાટ્ સૂર્યેણ સ્વરાટ્ક્રત્વા શચીપતિરૃષભેણ ત્વષ્ટા
યજ્ઞેન મઘવાન્દક્ષિણયા સુવર્ગો મન્યુના વૃત્રહા સૌહાર્દ્યેન તનૂધા

અન્નેન ગયઃ પૃથિવ્યાસનોદૃગ્ભિરન્નાદો વષટ્કારેણર્દ્ધઃ સામ્ના
તનૂપા વિરાજા જ્યોતિષ્માન્બ્રહ્મણા સોમપા ગોભિર્યજ્ઞં દાધાર ક્ષત્રેણ
મનુષ્યાનશ્વેન ચ રથેન ચ વજ્ર્યતુભિઃ પ્રભુઃ સંવથ્સરેણ
પરિભૂસ્તપસાનાધૃષ્ટઃ સૂર્યઃ સન્તનૂભિઃ ॥ ૪। ૪। ૮॥ અગ્નિનૈકાન્ન
પંચાશત્ ॥ ૪। ૪। ૮॥

૨૫ પ્રજાપતિર્મનસાન્ધોઽચ્છેતો ધાતા દીક્ષાયાꣳસવિતા ભૃત્યાં
પૂષા સોમક્રયણ્યાં વરુણ ઉપનદ્ધોઽસુરઃ ક્રીયમાણો મિત્રઃ
ક્રીતઃ શિપિવિષ્ટ આસાદિતો નરં ધિષઃ પ્રોહ્યમાણોઽધિપતિરાગતઃ
પ્રજાપતિઃ પ્રણીયમાનોઽગ્નિરાગ્નીધ્રે બૃહસ્પતિરાગ્નીધ્રાત્પ્રણીયમાન
ઇન્દ્રો હવિર્ધાનેઽદિતિરાસાદિતો વિષ્ણુરુપાવહ્રિયમાણોઽથર્વોપોત્તો
યમોઽભિષુતોઽપૂતપા આધૂયમાનો વાયુઃ પૂયમાનો મિત્રઃ,
ક્ષીરશ્રીર્મન્થી સક્તુશ્રીર્વૈશ્વદેવ ઉન્નીતો રુદ્ર આહુતો વાયુરાવૃત્તો
નૃચક્ષાઃ પ્રતિખ્યાતો ભક્ષ આગતઃ પિતૃણાં નારાશꣳસોઽસુરાત્તઃ
સિન્ધુરવભૃથમવપ્રયન્થ્સમુદ્રોઽવગતઃ સલિલઃ પ્રપ્લુતઃ
સુવરુદૃચં ગતઃ ॥ ૪। ૪। ૯॥ રુદ્ર એકવિꣳશતિશ્ચ ॥ ૪। ૪। ૯॥

૨૬ કૃત્તિકા નક્ષત્રમગ્નિર્દેવતાગ્ને રુચઃ સ્થ પ્રજાપતેર્ધાતુઃ
સોમસ્યર્ચે ત્વા રુચે ત્વા દ્યુતે ત્વા ભાસે ત્વા જ્યોતિષે ત્વા રોહિણી
નક્ષત્રં પ્રજાપતિર્દેવતા મૃગશીર્ષં નક્ષત્રꣳ સોમો દેવતાર્દ્રા
નક્ષત્રꣳ રુદ્રો દેવતા પુનર્વસૂ નક્ષત્રમદિતિર્દેવતા તિષ્યો
નક્ષત્રં બૃહસ્પતિર્દેવતાશ્રેષા નક્ષત્રꣳ સર્પા દેવતા મઘા
નક્ષત્રં પિતરો દેવતા ફલ્ગુની નક્ષત્ર

૨૭ મર્યમા દેવતા ફલ્ગુની નક્ષત્રં ભગો દેવતા હસ્તો નક્ષત્રꣳ
સવિતા દેવતા ચિત્રા નક્ષત્રમિન્દ્રો દેવતા સ્વાતી નક્ષત્રં
વાયુર્દેવતા વિશાખે નક્ષત્રમિન્દ્રાગ્ની દેવતાનૂરાધા નક્ષત્રં મિત્રો
દેવતા રોહિણી નક્ષત્રમિન્દ્રો દેવતા વિચૃતૌ નક્ષત્રં પિતરો
દેવતાષાઢા નક્ષત્રમાપો દેવતાષાઢા નક્ષત્રં વિશ્વે દેવા
દેવતા શ્રોણા નક્ષત્રં વિષ્ણુર્દેવતા શ્રવિષ્ઠા નક્ષત્રં વસવો

૨૮ દેવતા શતભિષઙ્નક્ષત્રમિન્દ્રો દેવતા પ્રોષ્ઠપદા નક્ષત્રમજ
એકપાદ્દેવતા પ્રોષ્ઠપદા નક્ષત્રમહિર્બુધ્નિયો દેવતા રેવતી
નક્ષત્રં પૂષા દેવતાશ્વયુજૌ નક્ષત્રમશ્વિનૌ દેવતાપ
ભરણીર્નક્ષત્રં યમો દેવતા પૂર્ણા પશ્ચાદ્યત્તે દેવા અદધુઃ ॥ ૪। ૪। ૧૦॥

ફલ્ગુની નક્ષત્રં વસવસ્ત્રયસ્ત્રિꣳશચ્ચ ॥ ૪। ૪। ૧૦॥

૨૯ મધુશ્ચ માધવશ્ચ વાસન્તિકાવૃતૂ શુક્રશ્ચ શુચિશ્ચ
ગ્રૈષ્માવૃતૂ નભશ્ચ નભસ્યશ્ચ વાર્ષિકાવૃતૂ ઇષશ્ચોર્જશ્ચ
શારદાવૃતૂ સહશ્ચ સહસ્યશ્ચ હૈમન્તિકાવૃતૂ તપશ્ચ તપસ્યશ્ચ
શૈશિરાવૃતૂ અગ્નેરન્તઃ શ્લેષોઽસિ કલ્પેતાં દ્યાવાપૃથિવી
કલ્પન્તામાપ ઓષધીઃ કલ્પન્તામગ્નયઃ પૃથઙ્મમ જ્યૈષ્ઠ્યાય
સવ્રતા

૩૦ યેઽગ્નયઃ સમનસોઽન્તરા દ્યાવાપૃથિવી શૈશિરાવૃતૂ અભિ
કલ્પમાના ઇન્દ્રમિવ દેવા અભિ સં વિશન્તુ સં યચ્ચ પ્રચેતાશ્ચાગ્નેઃ
સોમસ્ય સૂર્યસ્યોગ્રા ચ ભીમા ચ પિતૄણાં યમસ્યેન્દ્રસ્ય ધ્રુવા ચ
પૃથિવી ચ દેવસ્ય સવિતુર્મરુતાં વરુણસ્ય ધર્ત્રી ચ ધરિત્રી ચ
મિત્રાવરુણયોર્મિત્રસ્ય ધાતુઃ પ્રાચી ચ પ્રતીચી ચ વસૂનાꣳ રુદ્રાણા

૩૧ માદિત્યાનાં તે તેઽધિપતયસ્તેભ્યો નમસ્તે નો મૃડયન્તુ તે યં દ્વિષ્મો
યશ્ચ નો દ્વેષ્ટિ તં વો જંભે દધામિ સહસ્રસ્ય પ્રમા અસિ સહસ્રસ્ય
પ્રતિમા અસિ સહસ્રસ્ય વિમા અસિ સહસ્રસ્યોન્મા અસિ સાહસ્રોઽસિ
સહસ્રાય ત્વેમા મે અગ્ન ઇષ્ટકા ધેનવઃ સન્ત્વેકા ચ શતં ચ
સહસ્રં ચાયુતં ચ

૩૨ નિયુતં ચ પ્રયુતં ચાર્બુદં ચ ન્યર્બુદં ચ સમુદ્રશ્ચ મધ્યં
ચાન્તશ્ચ પરાર્ધશ્ચેમા મે અગ્ન ઇષ્ટકા ધેનવઃ સન્તુ ષષ્ઠિઃ
સહસ્રમયુતમક્ષીયમાણા ઋતસ્થાઃ સ્થર્તાવૃધો ઘૃતશ્ચુતો
મધુશ્ચુત ઊર્જસ્વતીઃ સ્વધાવિનીસ્તા મે અગ્ન ઇષ્ટકા ધેનવઃ સન્તુ
વિરાજો નામ કામદુઘા અમુત્રામુષ્મિꣳલ્લોકે ॥ ૪। ૪। ૧૧॥ સવ્રતા
રુદ્રાણામયુતં ચ પંચ ચત્વારિꣳશચ્ચ ॥ ૪। ૪। ૧૧॥

૩૩ સમિદ્દિશામાશયા નઃ સુવર્વિન્મધોરતો માધવઃ પાત્વસ્માન્ ।
અગ્નિર્દેવો દુષ્ટરીતુરદાભ્ય ઇદં ક્ષત્રꣳ રક્ષતુ પાત્વસ્માન્
॥ રથંતરꣳ સામભિઃ પાત્વસ્માન્ગાયત્રી છંદસાં વિશ્વરૂપા ।
ત્રિવૃન્નો વિષ્ઠયા સ્તોમો અહ્નાꣳસમુદ્રો વાત ઇદમોજઃ પિપર્તુ ॥
ઉગ્રા દિશામભિભૂતિર્વયોધાઃ શુચિઃ શુક્રે અહન્યોજસીના । ઇન્દ્રાધિપતિઃ
પિપૃતાદતો નો મહિ
૩૪ ક્ષત્રં વિશ્વતો ધારયેદમ્ ॥ બૃહથ્સામ ક્ષત્રભૃદ્વૃદ્ધવૃષ્ણિયં
ત્રિષ્ટુભૌજઃ શુભિતમુગ્રવીરમ્ । ઇન્દ્ર સ્તોમેન પઞ્ચદશેન
મધ્યમિદં વાતેન સગરેણ રક્ષ ॥ પ્રાચી દિશાꣳ સહયશા
યશસ્વતી વિશ્વે દેવાઃ પ્રાવૃષાહ્નાꣳ સુવર્વતી । ઇદં ક્ષત્રં
દુષ્ટરમસ્ત્વોજોઽનાધૃષ્ટꣳ સહસ્રિયꣳ સહસ્વત્ ॥ વૈરૂપે
સામન્નિહ તચ્છકેમ જગત્યૈનં વિક્ષ્વા વેશયામઃ । વિશ્વે દેવાઃ
સપ્તદશેન
૩૫ વર્ચ ઇદં ક્ષત્રꣳ સલિલવાતમુગ્રમ્ ॥ ધર્ત્રી દિશાં
ક્ષત્રમિદં દાધારોપસ્થાશાનાં મિત્રવદસ્ત્વોજઃ । મિત્રાવરુણા
શરદાહ્નાં ચિકિત્નૂ અસ્મૈ રાષ્ટ્રાય મહિ શર્મ યચ્છતમ્ ॥ વૈરાજે
સામન્નધિ મે મનીષાનુષ્ટુભા સં ભૃતં વીર્યꣳસહઃ । ઇદં ક્ષત્રં
મિત્રવદાર્દ્રદાનુ મિત્રાવરુણા રક્ષતમાધિપત્યૈઃ ॥ સમ્રાડ્દિશાꣳ
સહસામ્ની સહસ્વત્યૃતુર્હેમન્તો વિષ્ઠયા નઃ પિપર્તુ । અવસ્યુવાતા
૩૬ બૃહતીર્નુ શક્વરીરિમં યજ્ઞમવન્તુ નો ઘૃતાચીઃ ॥ સુવર્વતી
સુદુઘાનઃ પયસ્વતી દિશાં દેવ્યવતુ નો ઘૃતાચી । ત્વં ગોપાઃ પુર
એતોત પશ્ચાદ્બૃહસ્પતે યામ્યાં યુઙ્ગ્ધિ વાચમ્ ॥ ઊર્ધ્વા દિશાꣳ
રન્તિરાશૌષધીનાꣳ સંવથ્સરેણ સવિતા નો અહ્નામ્ । રેવથ્સામાતિચ્છન્દા
ઉ છન્દોજાતશત્રુઃ સ્યોના નો અસ્તુ ॥ સ્તોમત્રયસ્ત્રિꣳશે ભુવનસ્ય પત્નિ
વિવસ્વદ્વાતે અભિ નો
૩૭ ગૃણાહિ । ઘૃતવતી સવિતરાધિપત્યૈઃ પયસ્વતી રન્તિરાશા નો

અસ્તુ ॥ ધ્રુવા દિશાં વિષ્ણુપત્ન્યઘોરાસ્યેશાના સહસો યા મનોતા ।
બૃહસ્પતિર્માતરિશ્વોત વાયુઃ સં ધુવાના વાતા અભિ નો ગૃણન્તુ ॥
વિષ્ટંભો દિવો ધરુણઃ પૃથિવ્યા અસ્યેશાના જગતો વિષ્ણુપત્ની
। વિશ્વવ્યચા ઇષયન્તી સુભૂતિઃ શિવા નો અસ્ત્વદિતિરુપસ્થે ॥
વૈશ્વાનરો ન ઊત્યા પૃષ્ટો દિવ્યનુનોઽદ્યાનુ મતિરન્વિદનુમતે
ત્વં કયા નશ્ચિત્ર આ ભુવત્કો અદ્ય યુઙ્ક્તે ॥ ૪। ૪। ૧૨॥ મહિ
સપ્તદશેનાઽવસ્યુવાતા અભિ નોનુ નશ્ચતુર્દશ ચ ॥ ૪। ૪। ૧૨॥
રશ્મિરસિ રાજ્ઞ્યસ્યયં પુરોહરિકેશોઽગ્નિર્મૂર્ધેન્દ્રાગ્નિભ્યાં
બૃહસ્પતિર્ભૂયસ્કૃદસ્યગ્નિના વિશ્વાષાટ્ પ્રજાપતિર્મનસા કૃત્તિકા
મધુઃ સમિદ્દિશાં દ્વાદશ ॥
રશ્મિરસિ પ્રતિધેનુમસિ સ્તનયિત્નુ સનિરસ્યાદિત્યાનાꣳ
સપ્તત્રિꣳશત્ ॥
રશ્મિરસિ કો અદ્યયુઙ્ક્તે ॥

## ચતુર્થકાણ્ડે પઞ્ચમઃ પ્રશ્નઃ ૫

૧ નમસ્તે રુદ્ર મન્યવ ઉતોત ઇષવે નમઃ । નમસ્તે અસ્તુ ધન્વને
બાહુભ્યામુત તે નમઃ ॥ યાત ઇષુઃ શિવતમા શિવં બભૂવ
તે ધનુઃ । શિવા શરવ્યા યા તવ તયા નો રુદ્ર મૃડય ॥ યા તે રુદ્ર
શિવા તનૂરઘોરાપાપકાશિની । તયા નસ્તનુવા શંતમયા ગિરિશન્તાભિ
ચાકશીહિ ॥ યામિષું ગિરિશન્ત હસ્તે
૨ બિભર્ષ્યસ્તવે । શિવાં ગિરિત્ર તાં કુરુ મા હિꣳસીઃ પુરુષં
જગત્ ॥ શિવેન વચસા ત્વા ગિરિશાચ્છા વદામસિ । યથા નઃ
સર્વમિજ્જગદયક્ષ્મꣳ સુમના અસત્ ॥ અધ્યવોચદધિવક્તા પ્રથમો
દૈવ્યો ભિષક્ । અહીꣳશ્ચ સર્વાઞ્જંભયન્ત્સર્વાશ્ચ યાતુધાન્યઃ
॥ અસૌ યસ્તામ્રો અરુણ ઉત બભ્રુઃ સુમઙ્ગલઃ । યે ચેમાꣳ રુદ્રા
અભિતો દિક્ષુ

૩ શ્રિતાઃ સહસ્રશોઽવૈષાઁ હેડ ઈમહે ॥ અસૌ યોઽવસર્પતિ
નીલગ્રીવો વિલોહિતઃ । ઉતૈનં ગોપા અદૃશન્નદૃશન્નુદહાર્યઃ ।
ઉતૈનં વિશ્વા ભૂતાનિ સ દૃષ્ટો મૃડયાતિ નઃ ॥ નમો અસ્તુ નીલગ્રીવાય
સહસ્રાક્ષાય મીઢુષે । અથો યે અસ્ય સત્વાનોઽહં તેભ્યોઽકરં
નમઃ ॥ પ્ર મુઞ્ચ ધન્વનસ્ત્વમુભયોરાર્ત્નિયોર્જ્યામ્ । યાશ્ચ તે
હસ્ત ઇષવઃ

૪ પરા તા ભગવો વપ ॥ અવતત્ય ધનુસ્ત્વઁ સહસ્રાક્ષ
શતેષુધે । નિશીર્ય શલ્યાનાં મુખા શિવો નઃ સુમના ભવ ॥
વિજ્યં ધનુઃ કપર્દિનો વિશલ્યો બાણવાઁ ઉત । અનેશન્નસ્યેષવ
આભુરસ્ય નિષઙ્ગથિઃ ॥ યા તે હેતિર્મીઢુષ્ટમ હસ્તે બભૂવ
તે ધનુઃ । તયાસ્માન્, વિશ્વતસ્ત્વમયક્ષ્મયા પરિ બ્ભુજ ॥ નમસ્તે
અસ્ત્વાયુધાયાનાતતાય ધૃષ્ણવે । ઉભાભ્યામુત તે નમો બાહુભ્યાં
તવ ધન્વને ॥ પરિ તે ધન્વનો હેતિરસ્માન્વૃણક્તુ વિશ્વતઃ । અથો ય
ઇષુધિસ્તવારે અસ્મન્નિ ધેહિ તમ્ ॥ ૪। ૫। ૧॥ હસ્તે દિક્ષ્વિષવ ઉભાભ્યાં
દ્વા વિઁશતિશ્ચ ॥ ૪। ૫। ૧॥

૫ નમો હિરણ્યબાહવે સેનાન્યે દિશાં ચ પતયે નમો નમો વૃક્ષેભ્યો
હરિકેશેભ્યઃ પશૂનાં પતયે નમો નમઃ સસ્પિઞ્જરાય ત્વિષીમતે
પથીનાં પતયે નમો નમો બભ્લુશાય વિવ્યાધિનેઽન્નાનાં પતયે નમો
નમો હરિકેશાયોપવીતિને પુષ્ટાનાં પતયે નમો નમો ભવસ્ય હેત્યૈ
જગતાં પતયે નમો નમો રુદ્રાયાતતાવિને ક્ષેત્રાણાં પતયે નમો
નમઃ સૂતાયાહન્ત્યાય વનાનાં પતયે નમો નમો

૬ રોહિતાય સ્થપતયે વૃક્ષાણાં પતયે નમો નમો મન્ત્રિણે વાણિજાય
કક્ષાણાં પતયે નમો નમો ભુવન્તયે વારિવસ્કૃતાયૌષધીનાં
પતયે નમો નમ ઉચ્ચૈર્ઘોષાયાક્રન્દયતે પત્તીનાં પતયે નમો
નમઃ કૃત્સ્નવીતાય ધાવતે સત્વનાં પતયે નમઃ ॥ ૪। ૫। ૨॥ વનાનાં
પતયે નમો નમ એકાન્ન ત્રિઁશચ્ચ ॥ ૪। ૫। ૨॥

૭ નમઃ સહમાનાય નિવ્યાધિન આવ્યાધિનીનાં પતયે નમો નમઃ કકુભાય

નિષઙ્ગિણે સ્તેનાનાં પતયે નમો નમો નિષઙ્ગિણ ઇષુધિમતે
તસ્કરાણાં પતયે નમો નમો વઞ્ચતે પરિવઞ્ચતે સ્તાયૂનાં પતયે
નમો નમો નિચેરવે પરિચરાયારણ્યાનાં પતયે નમો નમઃ સૃકાવિભ્યો
જિઘાँસદ્ભ્યો મુષ્ણતાં પતયે નમો નમોઽસિમદ્ભ્યો નક્તં ચરદ્ભ્યઃ
પ્રકૃન્તાનાં પતયે નમો નમ ઉષ્ણીષિણે ગિરિચરાય કુલુઞ્ચાનાં
પતયે નમો નમ

૮ ઇષુમદ્ભ્યો ધન્વાવિભ્યશ્ચ વો નમો નમ આતન્વાનેભ્યઃ
પ્રતિદધાનેભ્યશ્ચ વો નમો નમ આયચ્છદ્ભ્યો વિસૃજદ્ભ્યશ્ચ વો નમો
નમોઽસ્યદ્ભ્યો વિધ્યદ્ભ્યશ્ચ વો નમો નમ આસીનેભ્યઃ શયાનેભ્યશ્ચ
વો નમો નમઃ સ્વપદ્ભ્યો જાગ્રદ્ભ્યશ્ચ વો નમો નમસ્તિષ્ઠદ્ભ્યો
ધાવદ્ભ્યશ્ચ વો નમો નમઃ સભાભ્યઃ સભાપતિભ્યશ્ચ વો નમો નમો
અશ્વેભ્યોઽશ્વપતિભ્યશ્ચ વો નમઃ ॥ ૪। ૫। ૩॥ કુલુઞ્ચાનાં પતયે નમો
નમોશ્વપતિભ્યસ્ત્રીણિ ચ ॥ ૪। ૫। ૩॥

૯ નમ આવ્યાધિનીભ્યો વિવિધ્યન્તીભ્યશ્ચ વો નમો નમ
ઉગણાભ્યસ્તૃँહતીભ્યશ્ચ વો નમો નમો ગૃત્સેભ્યો
ગૃત્સપતિભ્યશ્ચ વો નમો નમો વ્રાતેભ્યો વ્રાતપતિભ્યશ્ચ
વો નમો નમો ગણેભ્યો ગણપતિભ્યશ્ચ વો નમો નમો વિરૂપેભ્યો
વિશ્વરૂપેભ્યશ્ચ વો નમો નમો મહદ્ભ્યઃ, ક્ષુલ્લકેભ્યશ્ચ વો નમો
નમો રથિભ્યોઽરથેભ્યશ્ચ વો નમો નમો રથેભ્યો

૧૦ રથપતિભ્યશ્ચ વો નમો નમઃ સેનાભ્યઃ સેનાનિભ્યશ્ચ વો નમો
નમઃ, ક્ષત્તૃભ્યઃ સંગ્રહીતૃભ્યશ્ચ વો નમો નમસ્તક્ષભ્યો
રથકારેભ્યશ્ચ વો નમો નમઃ કુલાલેભ્યઃ કર્મારેભ્યશ્ચ વો નમો
નમઃ પુઞ્જિષ્ટેભ્યો નિષાદેભ્યશ્ચ વો નમો નમ ઇષુકૃદ્ભ્યો
ધન્વકૃદ્ભ્યશ્ચ વો નમો નમો મૃગયુભ્યઃ શ્વનિભ્યશ્ચ વો
નમો નમઃ શ્વભ્યઃ શ્વપતિભ્યશ્ચ વો નમઃ ॥ ૪। ૫। ૪॥ રથેભ્યઃ
શ્વપતિભ્યશ્ચ દ્વે ચ ॥ ૪। ૫। ૪॥

૧૧ નમો ભવાય ચ રુદ્રાય ચ નમઃ શર્વાય ચ પશુપતયે ચ નમો

નીલગ્રીવાય ચ શિતિકણ્ઠાય ચ નમઃ કપર્દિને ચ વ્યુપ્તકેશાય ચ
નમઃ સહસ્રાક્ષાય ચ શતધન્વને ચ નમો ગિરિશાય ચ શિપિવિષ્ટાય
ચ નમો મીઢુષ્ટમાય ચેષુમતે ચ નમો હ્રસ્વાય ચ વામનાય ચ
નમો બૃહતે ચ વર્ષીયસે ચ નમો વૃદ્ધાય ચ સંવૃધ્વને ચ
૧૨ નમો અગ્રિયાય ચ પ્રથમાય ચ નમ આશવે ચાજિરાય ચ
નમઃ શીઘ્રિયાય ચ શીભ્યાય ચ નમ ઊર્મ્યાય ચાવસ્વન્યાય ચ
નમઃ સ્રોતસ્યાય ચ દ્વીપ્યાય ચ ॥ ૪। ૫। ૫॥ સંવૃદ્ધ્વને ચ પઞ્ચ
વિꣳશતિશ્ચ ॥ ૪। ૫। ૫॥
૧૩ નમો જ્યેષ્ઠાય ચ કનિષ્ઠાય ચ નમઃ પૂર્વજાય ચાપરજાય ચ
નમો મધ્યમાય ચાપગલ્ભાય ચ નમો જઘન્યાય ચ બુધ્નિયાય ચ
નમઃ સોભ્યાય ચ પ્રતિસર્યાય ચ નમો યામ્યાય ચ ક્ષેમ્યાય ચ
નમ ઉર્વર્યાય ચ ખલ્યાય ચ નમઃ શ્લોક્યાય ચાવસાન્યાય ચ નમો
વન્યાય ચ કક્ષ્યાય ચ નમઃ શ્રવાય ચ પ્રતિશ્રવાય ચ
૧૪ નમ આશુષેણાય ચાશુરથાય ચ નમઃ શૂરાય ચાવભિન્દતે ચ
નમો વર્મિણે ચ વરૂથિને ચ નમો બિલ્મિને ચ કવચિને ચ નમઃ
શ્રુતાય ચ શ્રુતસેનાય ચ ॥ ૪। ૫। ૬॥ પ્રતિશ્રવાય ચ પઞ્ચ
વિꣳશતિશ્ચ ॥ ૪। ૫। ૬॥
૧૫ નમો દુન્દુભ્યાય ચાહનન્યાય ચ નમો ધૃષ્ણવે ચ પ્રમૃશાય
ચ નમો દૂતાય ચ પ્રહિતાય ચ નમો નિષઙ્ગિણે ચેષુધિમતે ચ
નમસ્તીક્ષ્ણેષવે ચાયુધિને ચ નમઃ સ્વાયુધાય ચ સુધન્વને ચ
નમઃ સ્રુત્યાય ચ પથ્યાય ચ નમઃ કાટ્યાય ચ નીપ્યાય ચ નમઃ
સૂદ્યાય ચ સરસ્યાય ચ નમો નાદ્યાય ચ વૈશન્તાય ચ
૧૬ નમઃ કૂપ્યાય ચાવટ્યાય ચ નમો વર્ષ્યાય ચાવર્ષ્યાય ચ નમો
મેઘ્યાય ચ વિદ્યુત્યાય ચ નમ ઈધ્રિયાય ચાતપ્યાય ચ નમો
વાત્યાય ચ રેષ્મિયાય ચ નમો વાસ્તવ્યાય ચ વાસ્તુપાય ચ ॥ ૪। ૫। ૭॥
વૈશન્તાય ચ ત્રિꣳશચ્ચ ॥ ૪। ૫। ૭॥
૧૭ નમઃ સોમાય ચ રુદ્રાય ચ નમસ્તામ્રાય ચારુણાય ચ નમઃ

શઙ્ગાય ચ પશુપતયે ચ નમ ઉગ્રાય ચ ભીમાય ચ નમો
અગ્રેવધાય ચ દૂરેવધાય ચ નમો હન્ત્રે ચ હનીયસે ચ નમો
વૃક્ષેભ્યો હરિકેશેભ્યો નમસ્તારાય નમઃ શંભવે ચ મયોભવે ચ
નમઃ શઙ્કરાય ચ મયસ્કરાય ચ નમઃ શિવાય ચ શિવતરાય ચ
૧૮ નમસ્તીર્થ્યાય ચ કૂલ્યાય ચ નમઃ પાર્યાય ચાવાર્યાય ચ નમઃ
પ્રતરણાય ચોત્તરણાય ચ નમ આતાર્યાય ચાલાદ્યાય ચ નમઃ
શષ્પ્યાય ચ ફેન્યાય ચ નમઃ સિકત્યાય ચ પ્રવાહ્યાય ચ ॥ ૪। ૫। ૮॥

શિવતરાય ચ ત્રિ ઁશચ્ચ ॥ ૪। ૫। ૮॥

૧૯ નમ ઇરિણ્યાય ચ પ્રપથ્યાય ચ નમઃ કિ ઁશિલાય ચ ક્ષયણાય
ચ નમઃ કપર્દિને ચ પુલસ્તયે ચ નમો ગોષ્ઠ્યાય ચ ગૃહ્યાય ચ
નમસ્તલ્પ્યાય ચ ગેહ્યાય ચ નમઃ કાટ્યાય ચ ગહ્વરેષ્ઠાય ચ નમો
હ્રદય્યાય ચ નિવેષ્પ્યાય ચ નમઃ પા ઁસવ્યાય ચ રજસ્યાય ચ
નમઃ શુષ્ક્યાય ચ હરિત્યાય ચ નમો લોપ્યાય ચોલપ્યાય ચ
૨૦ નમ ઊર્વ્યાય ચ સૂર્મ્યાય ચ નમઃ પર્ણ્યાય ચ પર્ણશદ્યાય ચ
નમોઽપગુરમાણાય ચાભિઘ્નતે ચ નમ આક્ખિદતે ચ પ્રક્ખિદતે ચ
નમો વઃ કિરિકેભ્યો દેવાના ઁ હૃદયેભ્યો નમો વિક્ષીણકેભ્યો નમો
વિચિન્વત્કેભ્યો નમ આનિર્હતેભ્યો નમ આમીવત્કેભ્યઃ ॥ ૪। ૫। ૯॥ ઉલપ્યાય
ચ ત્રયસ્ત્રિ ઁશચ્ચ ॥ ૪। ૫। ૯॥

૨૧ દ્રાપે અન્ધસસ્પતે દરિદ્રન્નીલલોહિત । એષાં પુરુષાણામેષાં
પશૂનાં મા ભેર્મારો મો એષાં કિં ચનામમત્ ॥ યા તે રુદ્ર શિવા તનૂઃ
શિવા વિશ્વાહભેષજી । શિવા રુદ્રસ્ય ભેષજી તયા નો મૃડ જીવસે ॥
ઇમા ઁ રુદ્રાય તવસે કપર્દિને ક્ષયદ્વીરાય પ્ર ભરામહે મતિમ્ ।
યથા નઃ શમસદ્દ્વિપદે ચતુષ્પદે વિશ્વં પુષ્ટં ગ્રામે અસ્મિ
૨૨ ન્નનાતુરમ્ ॥ મૃડા નો રુદ્રોત નો મયસ્કૃધિ ક્ષયદ્વીરાય નમસા
વિધેમ તે । યચ્છં ચ યોશ્ચ મનુરાયજે પિતા તદશ્યામ તવ રુદ્ર
પ્રણીતૌ ॥ મા નો મહાન્તમુત મા નો અર્ભકં મા ન ઉક્ષન્તમુત મા ન

ઉક્ષિતમ્ । મા નો વધીઃ પિતરં મોત માતરં પ્રિયા મા નસ્તનુવો
૨૩ રુદ્ર રીરિષઃ ॥ મા નસ્તોકે તનયે મા ન આયુષિ મા નો ગોષુ મા નો
અશ્વેષુ રીરિષઃ । વીરાન્મા નો રુદ્ર ભામિતો વધીર્હવિષ્મન્તો નમસા વિધેમ તે
॥ આરાત્તે ગોઘ્ન ઉત પૂરુષઘ્ને ક્ષયદ્વીરાય સુમ્નમસ્મે તે અસ્તુ । રક્ષા
ચ નો અધિ ચ દેવ બ્રૂહ્યધા ચ નઃ શર્મ યચ્છ દ્વિબર્હાઃ ॥ સ્તુહિ
૨૪ શ્રુતં ગર્તસદં યુવાનં મૃગં ન ભીમમુપહત્નુમુગ્રમ્ ।
મૃડા જરિત્રે રુદ્ર સ્તવાનો અન્યં તે અસ્મન્નિ વપન્તુ સેનાઃ ॥
પરિણો રુદ્રસ્ય હેતિર્વૃણક્તુ પરિ ત્વેષસ્ય દુર્મતિરઘાયોઃ । અવ
સ્થિરા મઘવદ્ભ્યસ્તનુષ્વ મીઢ્વસ્તોકાય તનયાય મૃડય ॥ મીઢુષ્ટમ
શિવતમ શિવો નઃ સુમના ભવ । પરમે વૃક્ષ આયુધં નિધાય
કૃત્તિં વસાન આ ચર પિનાકં
૨૫ બિભ્રદા ગહિ ॥ વિકિરિદ વિલોહિત નમસ્તે અસ્તુ ભગવઃ । યાસ્તે
સહસ્રꣳહેતયોઽન્યમસ્મન્નિ વપન્તુ તાઃ ॥ સહસ્રાણિ સહસ્રધા
બાહુવોસ્તવ હેતયઃ । તાસામીશાનો ભગવઃ પરાચીના મુખા કૃધિ ॥ ૪। ૫। ૧૦॥
અસ્મિગ્ગ્ સ્તનુવઃ સ્તુહિ પિનાકમેકાન્ન ત્રિꣳશચ્ચ ॥ ૪। ૫। ૧૦॥
૨૬ સહસ્રાણિ સહસ્રશો યે રુદ્રા અધિ ભૂમ્યામ્ । તેષાꣳસહસ્રયોજનેઽવ
ધન્વાનિ તન્મસિ ॥ અસ્મિન્મહત્યર્ણવેઽન્તરિક્ષે ભવા અધિ । નીલગ્રીવાઃ
શિતિકણ્ઠાઃ શર્વા અધઃ, ક્ષમાચરાઃ ॥ નીલગ્રીવાઃ શિતિકણ્ઠા દિવꣳ
રુદ્રા ઉપશ્રિતાઃ । યે વૃક્ષેષુ સસ્પિઞ્જરા નીલગ્રીવા વિલોહિતાઃ ।
યે ભૂતાનામધિપતયો વિશિખાસઃ કપર્દિનઃ । યે અન્નેષુ વિવિધ્યન્તિ
પાત્રેષુ પિબતો જનાન્ । યે પથાં પથિરક્ષય ઐલબૃદા યવ્યુધઃ
। યે તીર્થાનિ
૨૭ પ્રચરન્તિ સૃકાવન્તો નિષઙ્ગિણઃ । ય એતાવન્તશ્ચ
ભૂયાꣳસશ્ચ દિશો રુદ્રા વિતસ્થિરે । તેષાꣳસહસ્રયોજનેઽવ
ધન્વાનિ તન્મસિ ॥ નમો રુદ્રેભ્યો યે પૃથિવ્યાં યેઽન્તરિક્ષે યે દિવિ
યેષામન્નં વાતો વર્ષમિષવસ્તેભ્યો દશ પ્રાચીર્દશ દક્ષિણા

દશ પ્રતીચીર્દશોદીચીર્દશોર્ધ્વાસ્તેભ્યો નમસ્તે નો મૃડયન્તુ તે
યં દ્વિષ્મો યશ્ચ નો દ્વેષ્ટિ તં વો જમ્ભે દધામિ ॥ ૪। ૫। ૧૧॥ તીર્થાનિ
યશ્ચ ષટ્ચ ॥ ૪। ૫। ૧૧॥

નમસ્તે રુદ્ર નમો હિરણ્યબાહવે નમઃ સહમાનાય નમ આવ્યાધિનીભ્યો
નમો ભવાય નમો જ્યેષ્ઠાય નમો દુન્દુભ્યાય નમઃ સોમાય નમ
ઇરિણ્યાય દ્રાપે સહસ્રાણ્યેકાદશ ॥

નમસ્તે રુદ્ર નમો ભવાય દ્રાપે સપ્તવિꣳશતિઃ ॥

નમસ્તે રુદ્ર તં વો જંભે દધામિ ॥

## ચતુર્થકાણ્ડે ષષ્ઠઃ પ્રશ્નઃ ૬

૧ અશ્મન્નૂર્જં પર્વતે શિશ્રિયાણાં વાતે પર્જન્યે વરુણસ્ય શુષ્મે ।
અદ્ભ્ય ઓષધીભ્યો વનસ્પતિભ્યોઽધિ સંભૃતાં તાં ન ઇષમૂર્જં
ધત્ત મરુતઃ સꣳ રરાણાઃ ॥ અશ્મꣳસ્તે ક્ષુદમું તે શુગૃચ્છતુ
યં દ્વિષ્મઃ ॥ સમુદ્રસ્ય ત્વાઽવાકયાગ્ને પરિ વ્યયામસિ । પાવકો
અસ્મભ્યꣳશિવો ભવ ॥ હિમસ્ય ત્વા જરાયુણાગ્ને પરિ વ્યયામસિ ।
પાવકો અસ્મભ્યꣳશિવો ભવ ॥ ઉપ

૨ જ્મન્નુપ વેતસેઽવત્તરં નદીષ્વા । અગ્ને પિત્તમપામસિ ॥ મણ્ડૂકિ
તાભિરા ગહિ સેમં નો યજ્ઞમ્ । પાવકવર્ણꣳ શિવં કૃધિ ॥
પાવક આ ચિતયન્ત્યા કૃપા । ક્ષામન્રુરુચ ઉષસો ન ભાનુના ॥
તૂર્વન્ન યામન્નેતશસ્ય નૂ રણ આ યો ઘૃણે । ન તતૃષાણો અજરઃ
॥ અગ્ને પાવક રોચિષા મન્દ્રયા દેવ જિહ્વયા । આ દેવાન્

૩ વક્ષિ યક્ષિ ચ ॥ સ નઃ પાવક દીદિવોઽગ્ને દેવાꣳ ઇહાઽવહ । ઉપ
યજ્ઞꣳ હવિશ્ચ નઃ ॥ અપામિદં ન્યયનꣳ સમુદ્રસ્ય નિવેશનમ્
। અન્યં તે અસ્મત્તપન્તુ હેતયઃ પાવકો અસ્મભ્યꣳશિવો ભવ ॥
નમસ્તે હરસે શોચિષે નમસ્તે અસ્ત્વર્ચિષે । અન્યં તે અસ્મત્તપન્તુ
હેતયઃ પાવકો અસ્મભ્યꣳશિવો ભવ ॥ નૃષદે વડ

૪ પ્સુષદે વટ્વનસદે વડ્બર્હિષદે વટ્સુવર્વિદે વટ્ ॥ યે દેવા
દેવાનાં યજ્ઞિયા યજ્ઞિયાનાꣳ સંવથ્સરીણમુપ ભાગમાસતે ।
અહુતાદો હવિષો યજ્ઞે અસ્મિન્થ્સ્વયં જુહુધ્વં મધુનો ઘૃતસ્ય
॥ યે દેવા દેવેષ્વધિ દેવત્વમાયન્ યે બ્રહ્મણઃ પુર એતારો અસ્ય ।
યેભ્યો નર્તે પવતે ધામ કિં ચન ન તે દિવો ન પૃથિવ્યા અધિ સ્નુષુ
॥ પ્રાણદા

૫ અપાનદા વ્યાનદાશ્ચક્ષુર્દા વર્ચોદા વરિવોદાઃ । અન્યં તે
અસ્મત્તપન્તુ હેતયઃ પાવકો અસ્મભ્યꣳ શિવો ભવ ॥ અગ્નિસ્તિગ્મેન
શોચિષા યꣳ સદ્વિશ્વં ન્યત્રિણમ્ । અગ્નિર્નો વꣳસતે રયિમ્ ॥
સૈનાનીકેન સુવિદત્રો અસ્મે યષ્ટા દેવાꣳ આયજિષ્ઠઃ સ્વસ્તિ । અદબ્ધો
ગોપા ઉત નઃ પરસ્પા અગ્ને દ્યુમદુત રેવદ્દિદીહિ ॥ ૪। ૬। ૧॥ ઉપ દેવાન્,
વટ્પ્રાણદાશ્ચતુશ્ચત્વારિꣳશચ્ચ ॥ ૪। ૬। ૧॥

૬ ય ઇમા વિશ્વા ભુવનાનિ જુહ્વદૃષિર્હોતા નિષસાદા પિતા નઃ । સ
આશિષા દ્રવિણમિચ્છમાનઃ પરમચ્છદો વર આ વિવેશ ॥ વિશ્વકર્મા
મનસા યદ્વિહાયા ધાતા વિધાતા પરમોત સન્દૃક્ । તેષામિષ્ટાનિ
સમિષા મદન્તિ યત્ર સપ્તર્ષીન્પર એકમાહુઃ ॥ યો નઃ પિતા જનિતા
યો વિધાતા યો નઃ સતો અભ્યા સજ્જજાન ।

૭ યો દેવાનાં નામધા એક એવ તꣳ સં પ્રશ્નં ભુવના યન્ત્યન્યા ॥ ત
આયજન્ત દ્રવિણꣳ સમસ્મા ઋષયઃ પૂર્વે જરિતારો ન ભૂના ।
અસૂર્તા સૂર્તા રજસો વિમાને યે ભૂતાનિ સમકૃણ્વન્નિમાનિ ॥ ન તં
વિદાથ ય ઇદં જજાનાન્યદ્યુષ્માકમન્તરં ભવાતિ । નીહારેણ પ્રાવૃતા
જલ્પ્યા ચાસુતૃપ ઉક્થશાસશ્ચરન્તિ ॥ પરો દિવા પર એના

૮ પૃથિવ્યા પરો દેવેભિરસુરૈર્ગુહા યત્ । કꣳ સ્વિદ્ગર્ભં
પ્રથમં દધ્ર આપો યત્ર દેવાઃ સમગચ્છન્ત વિશ્વે ॥ તમિદ્ગર્ભં
પ્રથમં દધ્ર આપો યત્ર દેવાઃ સમગચ્છન્ત વિશ્વે । અજસ્ય
નાભાવધ્યેકમર્પિતં યસ્મિન્નિદં વિશ્વં ભુવનમધિ શ્રિતમ્ ॥

વિશ્વકર્મા હ્યજનિષ્ટ દેવ આદિદ્ગન્ધર્વો અભવદ્દ્વિતીયઃ । તૃતીયઃ
પિતા જનિતૌષધીના
૯ મપાં ગર્ભં વ્યદધાત્પુરુત્રા ॥ ચક્ષુષઃ પિતા મનસા
હિ ધીરો ઘૃતમેને અજનન્નન્નમાને । યદેદન્તા અદદૃꣳ
હન્ત પૂર્વ આદિદ્દ્યાવાપૃથિવી અપ્રથેતામ્ ॥ વિશ્વતશ્ચક્ષુરુત
વિશ્વતોમુખો વિશ્વતોહસ્ત ઉત વિશ્વતસ્પાત્ । સં બાહુભ્યાં
નમતિ સં પતત્રૈર્દ્યાવાપૃથિવી જનયન્દેવ એકઃ ॥ કિꣳ
સ્વિદાસીદધિષ્ઠાનમારંભણં કતમથ્સ્વિત્કિમાસીત્ । યદી ભૂમિં જનય
૧૦ ન્વિશ્વકર્મા વિ દ્યામૌર્ણોન્મહિના વિશ્વચક્ષાઃ ॥ કિꣳ સ્વિદ્વનં
ક ઉ સ વૃક્ષ આસીદ્યતો દ્યાવાપૃથિવી નિષ્ટતક્ષુઃ । મનીષિણો
મનસા પૃચ્છતેદુ તદ્યદધ્યતિષ્ઠદ્ભુવનાનિ ધારયન્ ॥ યા તે ધામાનિ
પરમાણિ યાવમા યા મધ્યમા વિશ્વકર્મન્નુતેમા । શિક્ષા સખિભ્યો હવિષિ
સ્વધાવઃ સ્વયં યજસ્વ તનુવં જુષાણઃ ॥ વાચસ્પતિં વિશ્વકર્માણમૂતયે
૧૧ મનોયુજં વાજે અદ્યા હુવેમ । સ નો નેદિષ્ઠા હવનાનિ જોષતે
વિશ્વશંભૂરવસે સાધુકર્મા ॥ વિશ્વકર્મન્ હવિષા વાવૃધાનઃ
સ્વયં યજસ્વ તનુવં જુષાણઃ । મુહ્યન્ત્વન્યે અભિતઃ સપત્ના
ઇહાસ્માકં મઘવા સૂરિરસ્તુ ॥ વિશ્વકર્મન્ હવિષા વર્ધનેન
ત્રાતારમિન્દ્રમકૃણોરવધ્યમ્ । તસ્મૈ વિશઃ સમનમન્ત પૂર્વીરયમુગ્રો
વિહવ્યો યથાસત્ ॥ સમુદ્રાય વયુનાય સિન્ધૂનાં પતયે નમઃ
ꣳઅદીનાꣳ સર્વાસાં પિત્રે જુહુતા વિશ્વકર્મણે વિશ્વાહામર્ત્યꣳ
હવિઃ ॥ ૪। ૬। ૨॥ જજ્ઞાનૈનૌષધીનાં ભૂમિં જનયન્નૂતયે નમો નવ
ચ ॥ ૪। ૬। ૨॥
૧૨ ઉદેનમુત્તરાં નયાગ્ને ઘૃતેનાહુત । રાયસ્પોષેણ સꣳ સૃજ પ્રજયા
ચ ધનેન ચ ॥ ઇન્દ્રેમં પ્રતરાં કૃધિ સજાતાનામસદ્વશી । સમેનં
વર્ચસા સૃજ દેવેભ્યો ભાગધા અસત્ ॥ યસ્ય કુર્મો હવિર્ગૃહે તમગ્ને
વર્ધયા ત્વમ્ । તસ્મૈ દેવા અધિ બ્રવન્નયં ચ બ્રહ્મણસ્પતિઃ ॥ ઉદુ
ત્વા વિશ્વે દેવા

૧૩ અગ્ને ભરન્તુ ચિત્તિભિઃ । સ નો ભવ શિવતમઃ સુપ્રતીકો
વિભાવસુઃ ॥ પઞ્ચ દિશો દૈવીર્યજ્ઞમવન્તુ દેવીરપામતિં દુર્મતિં
બાધમાનાઃ । રાયસ્પોષે યજ્ઞપતિમાભજન્તીઃ ॥ રાયસ્પોષે અધિ યજ્ઞો
અસ્થાથ્સમિદ્ધે અગ્નાવધિ મામહાનઃ । ઉક્થપત્ર ઈડ્યો ગૃભીતસ્તપ્તં
ઘર્મં પરિગૃહ્યાયજન્ત ॥ ઊર્જા યદ્યજ્ઞમશમન્ત દેવા દૈવ્યાય ધર્ત્રે
જોષ્ટ્રે । દેવશ્રીઃ શ્રીમણાઃ શતપયાઃ
૧૪ પરિગૃહ્ય દેવા યજ્ઞમાયન્ ॥ સૂર્યરશ્મિર્હરિકેશઃ પુરસ્તાથ્સવિતા
જ્યોતિરુદયા ँ અજસ્રમ્ । તસ્ય પૂષા પ્રસવં યાતિ દેવઃ સં
પશ્યન્વિશ્વા ભુવનાનિ ગોપાઃ ॥ દેવા દેવેભ્યો અધ્વર્યન્તો અસ્થુર્વીત ँ
શમિત્રે શમિતા યજધ્યૈ । તુરીયો યજ્ઞો યત્ર હવ્યમેતિ તતઃ
પાવકા આશિષો નો જુષન્તામ્ ॥ વિમાન એષ દિવો મધ્ય આસ્ત આપપ્રિવાન્રોદસી
અન્તરિક્ષમ્ । સ વિશ્વાચીરભિ
૧૫ ચષ્ટે ઘૃતાચીરન્તરા પૂર્વમપરં ચ કેતુમ્ ॥ ઉક્ષા સમુદ્રો
અરુણઃ સુપર્ણઃ પૂર્વસ્ય યોનિં પિતુરા વિવેશ । મધ્યે દિવો
નિહિતઃ પૃશ્નિરશ્મા વિ ચક્રમે રજસઃ પાત્યન્તૌ ॥ ઇન્દ્રં વિશ્વા
અવીવૃધન્થ્સમુદ્રવ્યચસં ગિરઃ । રથીતમ ँ રથીનાં વાજાના ँ
સત્પતિં પતિમ્ ॥ સુમ્નહૂર્યજ્ઞો દેવા ँ આ ચ વક્ષદ્યક્ષદગ્નિર્દેવો
દેવા ँ આ ચ વક્ષત્ । વાજસ્ય મા પ્રસવેનોદ્ ગ્રાભેણોદગ્રભીત્ । અથા
સપત્ના ँ ઇન્દ્રો મે નિગ્રાભેણાધરા ँ અકઃ ॥ ઉદ્ગ્રાભં ચ નિગ્રાભં
ચ બ્રહ્મ દેવા અવીવૃધન્ । અથા સપત્નાનિન્દ્રાગ્ની મે વિષૂચીનાન્
વ્યસ્યતામ્ ॥ ૪। ૬। ૩॥ વિશ્વેદેવાઃ શતપયા અભિ વાજસ્ય ષડ્વિ ँશતિશ્ચ
॥ ૪। ૬। ૩॥
૧૬ આશુઃ શિશાનો વૃષભો ન યુધ્મો ઘનાઘનઃ, ક્ષોભણશ્ચર્ષણીનામ્
। સંક્રન્દનોઽનિમિષ એકવીરઃ શત ँ સેના અજયથ્સાકમિન્દ્રઃ ॥
સંક્રન્દનેનાનિમિષેણ જિષ્ણુના યુત્કારેણ દુશ્ચ્યવનેન ધૃષ્ણુના
। તદિન્દ્રેણ જયત તથ્સહધ્વં યુધો નર ઇષુહસ્તેન વૃષ્ણા ॥ સ
ઇષુહસ્તૈઃ સ નિષઙ્ગિભિર્વશી સર ँ સ્રષ્ટા સ યુધ ઇન્દ્રો ગણેન

। સ ઁ સૃષ્ટજિત્સોમપા બાહુશર્ધ્યૂર્ધ્વધન્વા પ્રતિહિતાભિરસ્તા
॥ બૃહસ્પતે પરિ દીયા
૧૭ રથેન રક્ષોહામિત્રા ઁ અપબાધમાનઃ । પ્રભઞ્જન્થ્સેનાઃ પ્રમૃણો
યુધા જયન્નસ્માકમેધ્યવિતા રથાનામ્ ॥ ગોત્રભિદં ગોવિદં
વજ્રબાહું જયન્તમજ્મ પ્રમૃણન્તમોજસા । ઇમ ઁ સજાતા અનુ
વીરયધ્વમિન્દ્ર ઁ સખાયોઽનુ સ ઁ રભધ્વમ્ ॥ બલવિજ્ઞાયઃ
સ્થવિરઃ પ્રવીરઃ સહસ્વાન્ વાજી સહમાન ઉગ્રઃ । અભિવીરો અભિસત્વા
સહોજા જૈત્રમિન્દ્ર રથમા તિષ્ઠ ગોવિત્ ॥ અભિ ગોત્રાણિ સહસા
ગાહમાનોઽદાયો
૧૮ વીરઃ શતમન્યુરિન્દ્રઃ । દુશ્ચ્યવનઃ
પૃતનાષાડયુધ્યોઽસ્માક ઁ સેના અવતુ પ્ર યુત્સુ ॥ ઇન્દ્ર આસાં
નેતા બૃહસ્પતિર્દક્ષિણા યજ્ઞઃ પુર એતુ સોમઃ । દેવસેનાનામભિ
ભઞ્જતીનાં જયન્તીનાં મરુતો યન્ત્વગ્રે ॥ ઇન્દ્રસ્ય વૃષ્ણો
વરુણસ્ય રાજ્ઞ આદિત્યાનાં મરુતા ઁ શર્ધ ઉગ્રમ્ । મહામનસાં
ભુવનચ્યવાનાં ઘોષો દેવાનાં જયતામુદસ્થાત્ ॥ અસ્માકમિન્દ્રઃ
સમૃતેષુ ધ્વજેષ્વસ્માકં યા ઇષવસ્તા જયન્તુ ।
૧૯ અસ્માકં વીરા ઉત્તરે ભવન્ત્વસ્માનુ દેવા અવતા હવેષુ ॥ ઉદ્ધર્ષય
મઘવન્નાયુધાન્યુથ્સત્વનાં મામકાનાં મહા ઁસિ । ઉદ્વૃત્રહન્વાજિનાં
વાજિનાન્યુદ્રથાનાં જયતામેતુ ઘોષઃ ॥ ઉપ પ્રેત જયતા નરઃ સ્થિરા
વઃ સન્તુ બાહવઃ । ઇન્દ્રો વઃ શર્મ યચ્છત્વનાધૃષ્યા યથાસથ ॥
અવસૃષ્ટા પરા પત શરવ્યે બ્રહ્મ સ ઁ શિતા । ગચ્છામિત્રાન્ પ્ર
૨૦ વિશ મૈષાં કં ચનોચ્છિષઃ ॥ મર્માણિ તે વર્મભિશ્છાદયામિ
સોમસ્ત્વા રાજામૃતેનાભિઽવસ્તામ્ । ઉરોર્વરીયો વરિવસ્તે અસ્તુ જયન્તં
ત્વામનુ મદન્તુ દેવાઃ ॥ યત્ર બાણાઃ સંપતન્તિ કુમારા વિશિખા ઇવ ।
ઇન્દ્રો નસ્તત્ર વૃત્રહા વિશ્વાહા શર્મ યચ્છતુ ॥ ૪। ૬। ૪॥ દીયાદાયો
જયન્ત્વમિત્રાન્પ્ર ચત્વારિ ઁ શચ્ચ ॥ ૪। ૬। ૪॥
૨૧ પ્રાચીમનુ પ્રદિશં પ્રેહિ વિદ્વાનગ્નેરગ્ને પુરો અગ્નિર્ભવેહ ।

વિશ્વા આશા દીધાનો વિ ભાહ્યૂર્જં નો ધેહિ દ્વિપદે ચતુષ્પદે ॥
ક્રમધ્વમગ્નિના નાકમુખ્યꣳ હસ્તેષુ બિભ્રતઃ । દિવઃ
પૃષ્ઠꣳ સુવર્ગત્વા મિશ્રા દેવેભિરાધ્વમ્ ॥ પૃથિવ્યા
અહમુદન્તરિક્ષમારુહમન્તરિક્ષાદ્દિવમારુહમ્ । દિવો નાકસ્ય
પૃષ્ઠાથ્સુવર્જ્યોતિરગા
૨૨ મહમ્ ॥ સુવર્યન્તો નાપેક્ષન્ત આ દ્યાꣳ રોહન્તિ રોદસી । યજ્ઞં યે
વિશ્વતોધારꣳ સુવિદ્વાꣳસો વિતેનિરે ॥ અગ્ને પ્રેહિ પ્રથમો દેવયતાં
ચક્ષુર્દેવાનામુત મર્ત્યાનામ્ । ઇયક્ષમાણા ભૃગુભિઃ સજોષાઃ સુવર્યન્તુ
યજમાનાઃ સ્વસ્તિ ॥ નક્તોષાસા સમનસા વિરૂપે ધાપયેતે શિશુમેકꣳ
સમીચી । દ્યાવા ક્ષામા રુક્મો અન્તર્વિ ભાતિ દેવા અગ્નિં ધારયન્દ્રવિણોદાઃ ॥
અગ્ને સહસ્રાક્ષ
૨૩ શતમૂર્ધઞ્છતં તે પ્રાણાઃ સહસ્રમપાનાઃ । ત્વꣳ સાહસ્રસ્ય
રાય ઈશિષે તસ્મૈ તે વિધેમ વાજાય સ્વાહા ॥ સુપર્ણોઽસિ
ગરુત્માન્પૃથિવ્યાꣳ સીદ પૃષ્ઠે પૃથિવ્યાઃ સીદ ભાસાન્તરિક્ષમા
પૃણ જ્યોતિષા દિવમુત્તભાન તેજસા દિશ ઉદ્દૃꣳહ ॥ આજુહ્વાનઃ
સુપ્રતીકઃ પુરસ્તાદગ્ને સ્વાં યોનિમા સીદ સાધ્યા । અસ્મિન્થ્સધસ્થે
અધ્યુત્તરસ્મિન્વિશ્વે દેવા
૨૪ યજમાનશ્ચ સીદત ॥ પ્રેદ્ધો અગ્ને દીદિહિ પુરો નોઽજસ્રયા સૂર્મ્યાયવિષ્ઠ
। ત્વાꣳ શશ્વન્ત ઉપ યન્તિ વાજાઃ ॥ વિધેમ તે પરમે જન્મન્નગ્ને
વિધેમ સ્તોમૈરવરે સધસ્થે । યસ્માદ્યોનેરુદારિથા યજે તં પ્ર ત્વે
હવીꣳષિ જુહુરે સમિદ્ધે ॥ તાꣳ સવિતુર્વરેણ્યસ્ય ચિત્રામાહં વૃણે
સુમતિં વિશ્વજન્યામ્ । યામસ્ય કણ્વો અદુહત્પ્રપીનાꣳ સહસ્રધારાં
૨૫ પયસા મહીં ગામ્ ॥ સપ્ત તે અગ્ને સમિધઃ સપ્ત જિહ્વાઃ સપ્તર્ષયઃ
સપ્ત ધામ પ્રિયાણિ । સપ્ત હોત્રાઃ સપ્તધા ત્વા યજન્તિ સપ્ત યોનીરા
પૃણસ્વા ઘૃતેન ॥ ઈદૃઙ્ચાન્યાદૃઙ્ચૈતાદૃઙ્ચ પ્રતિદૃઙ્ચ
મિતશ્ચ સંમિતશ્ચ સભરાઃ । શુક્રજ્યોતિશ્ચ ચિત્રજ્યોતિશ્ચ
સત્યજ્યોતિશ્ચ જ્યોતિષ્માગ્શ્ચ સત્યશ્ચર્તપાશ્ચાત્યꣳહાઃ ॥

૨૬ ઋતજિચ્ચ સત્યજિચ્ચ સેનજિચ્ચ સુષેણશ્ચાન્ત્યમિત્રશ્ચ
દૂરે અમિત્રશ્ચ ગણઃ । ઋતશ્ચ સત્યશ્ચ ધ્રુવશ્ચ ધરુણશ્ચ
ધર્તા ચ વિધર્તા ચ વિધારયઃ । ઈદૃક્ષાસ એતાદૃક્ષાસ ઊ ષુણઃ
સદૃક્ષાસઃ પ્રતિસદૃક્ષાસ એતન । મિતાસશ્ચ સંમિતાસશ્ચ ન
ઊતયે સભરસો મરુતો યજ્ઞે અસ્મિન્નિંદ્રં દૈવીર્વિશો મરુતોઽનુવર્ત્માનો
યથેંદ્રં દૈવીર્વિશો મરુતોઽનુવર્ત્માન એવમિમં યજમાનં દૈવીશ્ચ
વિશો માનુષીશ્ચાનુવર્ત્માનો ભવન્તુ ॥ ૪। ૬। ૫॥ અગા૨ઁ સહસ્રાક્ષ
દેવાઃ સહસ્રધારામત્ય૨ઁહા અનુવર્ત્માનઃ ષોડશ ચ ॥ ૪। ૬। ૫॥
૨૭ જીમૂતસ્યેવ ભવતિ પ્રતીકં યદ્વર્મી યાતિ સમદામુપસ્થે ।
અનાવિદ્ધયા તનુવા જય ત્વ૨ઁ સ ત્વા વર્મણો મહિમા પિપર્તુ ॥ ધન્વના ગા
ધન્વનાજિં જયેમ ધન્વના તીવ્રાઃ સમદો જયેમ । ધનુઃ શત્રોરપકામં
કૃણોતિ ધન્વના સર્વાઃ પ્રદિશો જયેમ ॥ વક્ષ્યન્તીવેદા ગનીગન્તિ
કર્ણં પ્રિય૨ઁ સખાયં પરિષસ્વજાના । યોષેવ શિઙ્ક્તે વિતતાધિ ધન્વન્
૨૮ જ્યા ઇય૨ઁ સમને પારયન્તી ॥ તે આચરન્તી સમનેવ યોષા માતેવ
પુત્રં બિભૃતામુપસ્થે । અપ શત્રૂન્, વિધ્યતા૨ઁ સંવિદાને આર્ત્ની
ઇમે વિષ્ફુરન્તી અમિત્રાન્ ॥ બહ્વીનાં પિતા બહુરસ્ય પુત્રશ્ચિશ્ચા
કૃણોતિ સમનાવગત્ય । ઇષુધિઃ સઙ્કાઃ પૃતનાશ્ચ સર્વાઃ પૃષ્ઠે
નિનદ્ધો જયતિ પ્રસૂતઃ ॥ રથે તિષ્ઠન્નયતિ વાજિનઃ પુરો યત્રયત્ર
કામયતે સુષારથિઃ । અભીશૂનાં મહિમાનં
૨૯ પનાયત મનઃ પશ્ચાદનુ યચ્છન્તિ રશ્મયઃ ॥ તીવ્રાન્ ઘોષાન્
કૃણ્વતે વૃષપાણયોઽશ્વા રથેભિઃ સહ વાજયન્તઃ । અવક્રામન્તઃ
પ્રપદૈરમિત્રાન્ ક્ષિણન્તિ શત્રૂ૨ઁ રનપવ્યયન્તઃ ॥ રથવાહન૨ઁ
હવિરસ્ય નામ યત્રાયુધં નિહિતમસ્ય વર્મ । તત્રા રથમુપ
શગ્મ૨ઁ સદેમ વિશ્વાહા વય૨ઁ સુમનસ્યમાનાઃ ॥ સ્વાદુષ૨ઁ
સદઃ પિતરો વયોધાઃ કૃચ્છ્રેશ્રિતઃ શક્તીવન્તો ગભીરાઃ । ચિત્રસેના
ઇષુબલા અમૃધ્રાઃ સતોવીરા ઉરવો વ્રાતસાહાઃ ॥ બ્રાહ્મણાસઃ

૩૦ પિતરઃ સોમ્યાસઃ શિવે નો દ્યાવાપૃથિવી અનેહસા । પૂષા નઃ પાતુ
દુરિતાદૃતાવૃધો રક્ષા માકિર્નો અઘશꣳસ ઈશત ॥ સુપર્ણં વસ્તે
મૃગો અસ્યા દન્તો ગોભિઃ સન્નદ્ધા પતતિ પ્રસૂતા । યત્રા નરઃ સં ચ
વિ ચ દ્રવન્તિ તત્રાસ્મભ્યમિષવઃ શર્મ યꣳસન્ ॥ ઋજીતે પરિ
વૃઙ્ગ્ધિ નોઽશ્મા ભવતુ નસ્તનૂઃ । સોમો અધિ બ્રવીતુ નોઽદિતિઃ
૩૧ શર્મ યચ્છતુ ॥ આ જઙ્ઘન્તિ સાન્વેષાં જઘનાꣳ ઉપ જિઘ્નતે ।
અશ્વાજનિ પ્રચેતસોઽશ્વાન્થ્સમથ્સુ ચોદય ॥ અહિરિવ ભોગૈઃ પર્યેતિ
બાહું જ્યાયા હેતિં પરિબાધમાનઃ । હસ્તઘ્નો વિશ્વા વયુનાનિ વિદ્વાન્
પુમાન્ પુમાꣳસં પરિ પાતુ વિશ્વતઃ ॥ વનસ્પતે વીડ્વઙ્ગો હિ ભૂયા
અસ્મથ્સખા પ્રતરણઃ સુવીરઃ । ગોભિઃ સન્નદ્ધો અસિ વીડયસ્વાસ્થાતા તે
જયતુ જેત્વાનિ ॥ દિવઃ પૃથિવ્યાઃ પર્યો
૩૨ જ ઉદ્ભૃતં વનસ્પતિભ્યઃ પર્યાભૃતꣳ સહઃ । અપામોજ્માનં
પરિ ગોભિરાવૃતમિન્દ્રસ્ય વજ્રꣳહવિષા રથં યજ ॥ ઇન્દ્રસ્ય
વજ્રો મરુતામનીકં મિત્રસ્ય ગર્ભો વરુણસ્ય નાભિઃ । સેમાં નો
હવ્યદાતિં જુષાણો દેવ રથ પ્રતિ હવ્યા ગૃભાય ॥ ઉપ શ્વાસય
પૃથિવીમુત દ્યાં પુરુત્રા તે મનુતાં વિષ્ઠિતં જગત્ । સ દુન્દુભે
સજૂરિન્દ્રેણ દેવૈર્દૂરાદ્
૩૩ દવીયો અપ સેધ શત્રૂન્ ॥ આ ક્રન્દય બલમોજો ન આ ધા નિષ્ટનિહિ
દુરિતા બાધમાનઃ । અપ પ્રોથ દુન્દુભે દુચ્છુનાꣳઇત ઇન્દ્રસ્ય મુષ્ટિરસિ
વીડયસ્વ ॥ આમૂરજ પ્રત્યાવર્તયેઽમાઃ કેતુમદ્દુન્દુભિર્વાવદીતિ
। સમશ્વપર્ણાશ્ચરન્તિ નો નરોઽસ્માકમિન્દ્ર રથિનો જયન્તુ ॥ ૪। ૬। ૬॥ ધન્વન્મહિમાનં બ્રાહ્મણાસોદિતિઃ
પૃથિવ્યાઃ પરિ દૂરાદેક
ચત્વારિꣳશચ્ચ ॥ ૪। ૬। ૬॥
૩૪ યદક્રન્દઃ પ્રથમં જાયમાન ઉદ્યન્થ્સમુદ્રાદુત વા પુરીષાત્ । શ્યેનસ્ય
પક્ષા હરિણસ્ય બાહૂ ઉપસ્તુત્યં મહિ જાતં તે અર્વન્ ॥ યમેન
દત્તં ત્રિત એનમાયુનગિન્દ્ર એણં પ્રથમો અધ્યતિષ્ઠત્ । ગન્ધર્વો અસ્ય
રશનામગૃભ્ણાથ્સૂરાદશ્વં વસવો નિરતષ્ટ ॥ અસિ યમો અસ્યાદિત્યો

અર્વન્નસિ ત્રિતો ગુહ્યેન વ્રતેન । અસિ સોમેન સમયા વિપૃક્ત
૩૫ આહુસ્તે ત્રીણિ દિવિ બન્ધનાનિ ॥ ત્રીણિ ત આહુર્દિવિ બન્ધનાનિ
ત્રીણ્યપ્સુ ત્રીણ્યન્તઃ સમુદ્રે । ઉતેવ મે વરુણશ્છન્ત્સ્યર્વન્ યત્રા
ત આહુઃ પરમં જનિત્રમ્ ॥ ઇમા તે વાજિન્નવમાર્જનાનીમા શફાના ँ
સનિતુર્નિધાના । અત્રા તે ભદ્રા રશના અપશ્યમૃતસ્યયા અભિરક્ષન્તિ
ગોપાઃ ॥ આત્માનં તે મનસારાદજાનામવો દિવા
૩૬ પતયન્તં પતઙ્ગમ્ । શિરો અપશ્યં પથિભિઃ
સુગેભિરરેણુભિર્જેહમાનં પતત્રિ ॥ અત્રા તે રૂપમુત્તમમપશ્યં
જિગીષમાણમિષ આ પદે ગોઃ । યદા તે મર્તો અનુ ભોગમાનડાદિદ્ગ્રસિષ્ઠ
ઓષધીરજીગઃ ॥ અનુ ત્વા રથો અનુ મર્યો અર્વન્નનુ ગાવોઽનુ ભગઃ
કનીનામ્ । અનુ વ્રાતાસસ્તવ સખ્યમીયુરનુ દેવા મમિરે વીર્યં
૩૭ તે ॥ હિરણ્યશૃઙ્ગોઽયો અસ્ય પાદા મનોજવા અવર ઇન્દ્ર આસીત્ । દેવા
ઇદસ્ય હવિરદ્યમાયન્, યો અર્વન્તં પ્રથમો અધ્યતિષ્ઠત્ ॥ ઈર્માન્તાસઃ
સિલિકમધ્યમાસઃ સ ँ શૂરણાસો દિવ્યાસો અત્યાઃ । હ ँ સા ઇવ શ્રેણિશો
યતન્તે યદાક્ષિષુર્દિવ્યમજ્મમશ્વાઃ ॥ તવ શરીરં પતયિષ્ણ્વર્વન્તવ
ચિત્તં વાત ઇવ ધ્રજીમાન્ । તવ શૃઙ્ગાણિ વિષ્ઠિતા પુરુત્રારણ્યેષુ
જર્ભુરાણા ચરન્તિ ॥ ઉપ
૩૮ પ્રાગાચ્છસનં વાજ્યર્વા દેવદ્રીચા મનસા દીધ્યાનઃ । અજઃ
પુરો નીયતે નાભિરસ્યાનુ પશ્ચાત્કવયો યન્તિ રેભાઃ ॥ ઉપ
પ્રાગાત્પરમં યત્સધસ્થમર્વા ँ અચ્છા પિતરં માતરં ચ ।
અદ્યા દેવાઞ્જુષ્ટતમો હિ ગમ્યા અથાશાસ્તે દાશુષે વાર્યાણિ ॥ ૪। ૬। ૭॥
વિપૃક્તો દિવા વીર્યમુપૈકાન્ન ચત્વારિ ँ શચ્ચ ॥ ૪। ૬। ૭॥
૩૯ મા નો મિત્રો વરુણો અર્યમાયુરિન્દ્ર ઋભુક્ષા મરુતઃ પરિ ખ્યન્ ।
યદ્વાજિનો દેવજાતસ્ય સપ્તેઃ પ્રવક્ષ્યામો વિદથે વીર્યાણિ ॥
યન્નિર્ણિજા રેક્ણસા પ્રાવૃતસ્ય રાતિં ગૃભીતાં મુખતો નયન્તિ
। સુપ્રાઙજો મેમ્યદ્વિશ્વરૂપ ઇન્દ્રાપૂષ્ણોઃ પ્રિયમપ્યેતિ પાથઃ ॥

એષ ચ્છાગઃ પુરો અશ્વેન વાજિના પૂષ્ણો ભાગો નીયતે વિશ્વદેવ્યઃ ।
અભિપ્રિયં યત્પુરોડાશમર્વતા ત્વષ્ટે
૪૦ દેનꣳ સૌશ્રવસાય જિન્વતિ ॥ યદ્ધવિષ્યમૃતુશો દેવયાનં
ત્રિર્માનુષાઃ પર્યશ્વં નયન્તિ । અત્રા પૂષ્ણઃ પ્રથમો ભાગ એતિ યજ્ઞં
દેવેભ્યઃ પ્રતિવેદયન્નજઃ ॥ હોતાધ્વર્યુરાવયા અગ્નિમિન્ધો ગ્રાવગ્રાભ
ઉત શꣳસ્તા સુવિપ્રઃ । તેન યજ્ઞેન સ્વરં કૃતેન સ્વિષ્ટેન
વક્ષણા આ પૃણધ્વમ્ ॥ યૂપવ્રસ્કા ઉત યે યૂપવાહાશ્ચષાલં યે
અશ્વયૂપાય તક્ષતિ । યે ચાર્વતે પચનꣳ સં ભરન્ત્યુતો
૪૧ તેષામભિગૂર્તિર્ન ઇન્વતુ ॥ ઉપ પ્રાગાથ્સુમન્મેઽધાયિ મન્મ
દેવાનામાશા ઉપ વીતપૃષ્ઠઃ । અન્વેનં વિપ્રા ઋષયો મદન્તિ દેવાનાં
પુષ્ટે ચકૃમા સુબન્ધુમ્ ॥ યદ્વાજિનો દામ સં દાનમર્વતો યા
શીર્ષણ્યા રશના રજ્જુરસ્ય । યદ્વા ઘાસ્ય પ્રભૃતમાસ્યે તૃણꣳ
સર્વા તા તે અપિ દેવેષ્વસ્તુ ॥ યદશ્વસ્ય ક્રવિષો
૪૨ મક્ષિકાશ યદ્વા સ્વરૌ સ્વધિતૌ રિપ્તમસ્તિ ।
યદ્ધસ્તયોઃ શમિતુર્યન્નખેષુ સર્વા તા તે અપિ દેવેષ્વસ્તુ ॥
યદૂવધ્યમુદરસ્યાપવાતિ ય આમસ્ય ક્રવિષો ગન્ધો અસ્તિ । સુકૃતા
તચ્છમિતારઃ કૃણ્વન્તૂત મેધꣳ શ◌ૃતપાકં પચન્તુ ॥ યત્તે
ગાત્રાદગ્નિના પચ્યમાનાદભિ શૂલં નિહતસ્યાવધાવતિ । મા તદ્ભૂમ્યામા
શ્રિષન્મા તૃણેષુ દેવેભ્યસ્તદુશદ્ભ્યો રાતમસ્તુ ॥ ૪। ૬। ૮॥ ઇદુતો
ક્રવિષઃ શ્રિષથ્સપ્ત ચ ॥ ૪। ૬। ૮॥
૪૩ યે વાજિનં પરિપશ્યન્તિ પક્વં ય ઈમાહુઃ સુરભિર્નિર્હરેતિ । યે
ચાર્વતો માꣳસ ભિક્ષામુપાસત ઉતો તેષામભિગૂર્તિર્ન ઇન્વતુ ॥ યન્નીક્ષણં
માગ્સ્પચન્યા ઉખાયા યા પાત્રાણિ યૂષ્ણ આસેચનાનિ । ઊષ્મણ્યાપિધાના
ચરૂણામઙ્કાઃ સૂનાઃ પરિ ભૂષન્ત્યશ્વમ્ ॥ નિક્રમણં નિષદનં
વિવર્તનં યચ્ચ પડ્બીશમર્વતઃ । યચ્ચ પપૌ યચ્ચ ઘાસિં
૪૪ જઘાસ સર્વા તા તે અપિ દેવેષ્વસ્તુ ॥ મા
ત્વાગ્નિર્ધ્વનયિદ્ધૂમગન્ધિર્મોખા ભ્રાજન્ત્યભિ વિક્ત જઘ્રિઃ । ઇષ્ટં

વીતમભિગૂર્તં વષટ્કૃતં તં દેવાસઃ પ્રતિ ગૃભ્ણન્ત્યશ્વમ્ ॥
યદશ્વાય વાસ ઉપસ્તૃણન્ત્યધીવાસં યા હિરણ્યાન્યસ્મૈ । સન્દાનમર્વન્તં
પડ્બીશં પ્રિયા દેવેષ્વા યામયન્તિ ॥ યત્તે સાદે મહસા શૂકૃતસ્ય
પાર્ષ્ણિયા વા કશયા
૪૫ વા તુતોદ । સ્રુચેવ તા હવિષો અધ્વરેષુ સર્વા તા તે બ્રહ્મણા
સૂદયામિ ॥ ચતુસ્ત્રિꣳશદ્વાજિનો દેવબન્ધોર્વઙ્ક્રીરશ્વસ્ય સ્વધિતિઃ
સમેતિ । અચ્છિદ્રા ગાત્રા વયુના કૃણોત પરુષ્પરુરનુઘુષ્યા વિ શસ્ત
॥ એકસ્ત્વષ્ટુરશ્વસ્યા વિશસ્તા દ્વા યન્તારા ભવતસ્તથર્તુઃ । યા તે
ગાત્રાણામૃતુથા કૃણોમિ તાતા પિણ્ડાનાં પ્ર જુહોમ્યગ્નૌ ॥ મા ત્વા તપત્
૪૬ પ્રિય આત્માઽપિયન્તં મા સ્વધિતિસ્તનુવ આ તિષ્ઠિપત્તે । મા તે
ગૃધ્નુરવિશસ્તાતિહાય છિદ્રા ગાત્રાણ્યસિના મિથૂ કઃ ॥ ન વા
ઉવેતન્મ્રિયસે ન રિષ્યસિ દેવાꣳ ઇદેષિ પથિભિઃ સુગેભિઃ । હરી
તે યુઞ્જા પૃષતી અભૂતામુપાસ્થાદ્વાજી ધુરિ રાસભસ્ય ॥ સુગવ્યં
નો વાજી સ્વશ્વિયં પુꣳસઃ પુત્રાꣳ ઉત વિશ્વાપુષꣳરયિમ્ ।
અનાગાસ્ત્વં નો અદિતિઃ કૃણોતુ ક્ષત્રં નો અશ્વો વનતાꣳ હવિષ્માન્ ॥
૪। ૬। ૯॥ ધાસિં કશયા તપદ્રયિં નવ ચ ॥ ૪। ૬। ૯॥
અશ્મન્ ય ઇમોદેનમાશુઃ પ્રાચીં જીમૂતસ્ય યદક્રંદો મા નો મિત્રો યે
વાજિનં નવ ॥
અશ્મન્ મનોયુજં પ્રાચીમનુ શર્મ યચ્છતુ તેષામભિગૂર્તિઃ
ષટ્ચત્વારિꣳશત્ ॥
અશ્મન્ હવિશ્માન્ ॥

## ચતુર્થકાણ્ડે સપ્તમઃ પ્રશ્નઃ ૭

૧ અગ્નાવિષ્ણૂ સજોષસેમા વર્ધન્તુ વાં ગિરઃ । દ્યુમ્નૈર્વાજેભિરા ગતમ્ ॥
વાજશ્ચ મે પ્રસવશ્ચ મે પ્રયતિશ્ચ મે પ્રસિતિશ્ચ મે ધીતિશ્ચ મે
ક્રતુશ્ચ મે સ્વરશ્ચ મે શ્લોકશ્ચ મે શ્રાવશ્ચ મે શ્રુતિશ્ચ મે

જ્યોતિશ્ચ મે સુવશ્ચ મે પ્રાણશ્ચ મેઽપાન

૨ શ્ચ મે વ્યાનશ્ચ મેઽસુશ્ચ મે ચિત્તં ચ મ આધીતં ચ મે વાક્ચ

મે મનશ્ચ મે ચક્ષુશ્ચ મે શ્રોત્રં ચ મે દક્ષશ્ચ મે બલં ચ મ

ઓજશ્ચ મે સહશ્ચ મ આયુશ્ચ મે જરા ચ મ આત્મા ચ મે તનૂશ્ચ

મે શર્મ ચ મે વર્મ ચ મેઽઙ્ગાનિ ચ મેઽસ્થાનિ ચ મે પરૂꣳષિ ચ

મે શરીરાણિ ચ મે ॥ ૪। ૭। ૧॥ અપાનસ્તનૂશ્ચ મેઽષ્ટાદશ ચ ॥ ૪। ૭। ૧॥

૩ જ્યૈષ્ઠ્યં ચ મ આધિપત્યં ચ મે મન્યુશ્ચ મે ભામશ્ચ મેઽમશ્ચ

મેઽંભશ્ચ મે જેમા ચ મે મહિમા ચ મે વરિમા ચ મે પ્રથિમા ચ મે

વર્ષ્મા ચ મે દ્રાઘુયા ચ મે વૃદ્ધં ચ મે વૃદ્ધિશ્ચ મે સત્યં ચ

મે શ્રદ્ધા ચ મે જગચ્ચ

૪ મે ધનં ચ મે વશશ્ચ મે ત્વિષિશ્ચ મે ક્રીડા ચ મે મોદશ્ચ મે

જાતં ચ મે જનિષ્યમાણં ચ મે સૂક્તં ચ મે સુકૃતં ચ મે વિત્તં ચ

મે વેદ્યં ચ મે ભૂતં ચ મે ભવિષ્યચ્ચ મે સુગં ચ મે સુપથં

ચ મ ઋદ્ધં ચ મ ઋદ્ધિશ્ચ મે ક્લૃપ્તં ચ મે ક્લૃપ્તિશ્ચ મે

મતિશ્ચ મે સુમતિશ્ચ મે ॥ ૪। ૭। ૨॥ જગચ્ચર્દ્ધિશ્ચતુર્દશ ચ ॥ ૪। ૭। ૨॥

૫ શં ચ મે મયશ્ચ મે પ્રિયં ચ મેઽનુકામશ્ચ મે કામશ્ચ મે

સૌમનસશ્ચ મે ભદ્રં ચ મે શ્રેયશ્ચ મે વસ્યશ્ચ મે યશશ્ચ

મે ભગશ્ચ મે દ્રવિણં ચ મે યન્તા ચ મે ધર્તા ચ મે ક્ષેમશ્ચ મે

ધૃતિશ્ચ મે વિશ્વં ચ

૬ મે મહશ્ચ મે સંવિચ્ચ મે જ્ઞાત્રં ચ મે સૂશ્ચ મે પ્રસૂશ્ચ

મે સીરં ચ મે લયશ્ચ મ ઋતં ચ મેઽમૃતં ચ મેઽયક્ષ્મં ચ

મેઽનામયચ્ચ મે જીવાતુશ્ચ મે દીર્ઘાયુત્વં ચ મેઽનમિત્રં ચ મેઽભયં

ચ મે સુગં ચ મે શયનં ચ મે સૂષા ચ મે સુદિનં ચ મે ॥ ૪। ૭। ૩॥

વિશ્વં ચ શયનમષ્ટૌ ચ ॥ ૪। ૭। ૩॥

૭ ઊર્ક્ચ મે સૂનૃતા ચ મે પયશ્ચ મે રસશ્ચ મે ઘૃતં ચ મે

મધુ ચ મે સગ્ધિશ્ચ મે સપીતિશ્ચ મે કૃષિશ્ચ મે વૃષ્ટિશ્ચ મે

જૈત્રં ચ મ ઔદ્ભિદ્યં ચ મે રયિશ્ચ મે રાયશ્ચ મે પુષ્ટં ચ મે
પુષ્ટિશ્ચ મે વિભુ ચ
૮ મે પ્રભુ ચ મે બહુ ચ મે ભૂયશ્ચ મે પૂર્ણં ચ મે પૂર્ણતરં ચ
મેઽક્ષિતિશ્ચ મે કૂયવાશ્ચ મેઽન્નં ચ મેઽક્ષુચ્ચ મે વ્રીહયશ્ચ
મે યવાશ્ચ મે માષાશ્ચ મે તિલાશ્ચ મે મુદ્ગાશ્ચ મે ખલ્વાશ્ચ મે
ગોધૂમાશ્ચ મે મસુરાશ્ચ મે પ્રિયઙ્ગવશ્ચ મેઽણવશ્ચ મે શ્યામાકાશ્ચ
મે નીવારાશ્ચ મે ॥ ૪। ૭। ૪॥ વિભુ ચ મસુરાશ્ચતુર્દશ ચ ॥ ૪। ૭। ૪॥
૯ અશ્મા ચ મે મૃત્તિકા ચ મે ગિરયશ્ચ મે પર્વતાશ્ચ મે સિકતાશ્ચ
મે વનસ્પતયશ્ચ મે હિરણ્યં ચ મેઽયશ્ચ મે સીસં ચ મે ત્રપુશ્ચ
મે શ્યામં ચ મે લોહં ચ મેઽગ્નિશ્ચ મ આપશ્ચ મે વીરુધશ્ચ મ
ઓષધયશ્ચ મે કૃષ્ટપચ્યં ચ
૧૦ મેઽકૃષ્ટપચ્યં ચ મે ગ્રામ્યાશ્ચ મે પશવ આરણ્યાશ્ચ યજ્ઞેન
કલ્પન્તાં વિત્તં ચ મે વિત્તિશ્ચ મે ભૂતં ચ મે ભૂતિશ્ચ મે
વસુ ચ મે વસતિશ્ચ મે કર્મ ચ મે શક્તિશ્ચ મેઽર્થશ્ચ મ
એમશ્ચ મ ઇતિશ્ચ મે ગતિશ્ચ મે ॥ ૪। ૭। ૫॥ કૃષ્ટપચ્યઞ્ચાઽષ્ટા
ચત્વારિꣳશચ્ચ ॥ ૪। ૭। ૫॥
૧૧ અગ્નિશ્ચ મ ઇન્દ્રશ્ચ મે સોમશ્ચ મ ઇન્દ્રશ્ચ મે સવિતા ચ મ
ઇન્દ્રશ્ચ મે સરસ્વતી ચ મ ઇન્દ્રશ્ચ મે પૂષા ચ મ ઇન્દ્રશ્ચ મે
બૃહસ્પતિશ્ચ મ ઇન્દ્રશ્ચ મે મિત્રશ્ચ મ ઇન્દ્રશ્ચ મે વરુણશ્ચ
મ ઇન્દ્રશ્ચ મે ત્વષ્ટા ચ
૧૨ મ ઇન્દ્રશ્ચ મે ધાતા ચ મ ઇન્દ્રશ્ચ મે વિષ્ણુશ્ચ મ ઇન્દ્રશ્ચ
મેઽશ્વિનૌ ચ મ ઇન્દ્રશ્ચ મે મરુતશ્ચ મ ઇન્દ્રશ્ચ મે વિશ્વે
ચ મે દેવા ઇન્દ્રશ્ચ મે પૃથિવી ચ મ ઇન્દ્રશ્ચ મેઽન્તરિક્ષં ચ મ
ઇન્દ્રશ્ચ મે દ્યૌશ્ચ મ ઇન્દ્રશ્ચ મે દિશશ્ચ મ ઇન્દ્રશ્ચ મે મૂર્ધા
ચ મ ઇન્દ્રશ્ચ મે પ્રજાપતિશ્ચ મ ઇન્દ્રશ્ચ મે ॥ ૪। ૭। ૬॥ ત્વષ્ટા
ચ દ્યૌશ્ચ મ એક વિꣳશતિશ્ચ ॥ ૪। ૭। ૬॥
૧૩ અꣳશુશ્ચ મે રશ્મિશ્ચ મેઽદાભ્યશ્ચ મેઽધિપતિશ્ચ મ

ઉપાꣳશુશ્ચ મેઽન્તર્યામશ્ચ મ ઐન્દ્રવાયવશ્ચ મે મૈત્રાવરુણશ્ચ
મ આશ્વિનશ્ચ મે પ્રતિપ્રસ્થાનશ્ચ મે શુક્રશ્ચ મે મન્થી ચ મ
આગ્રયણશ્ચ મે વૈશ્વદેવશ્ચ મે ધ્રુવશ્ચ મે વૈશ્વાનરશ્ચ મ
ઋતુગ્રહાશ્ચ

૧૪ મેઽતિગ્રાહ્યાશ્ચ મ ઐન્દ્રાગ્નશ્ચ મે વૈશ્વદેવશ્ચ મે મરુત્વતીયાશ્ચ મે
માહેન્દ્રશ્ચ મ આદિત્યશ્ચ મે સાવિત્રશ્ચ મે સારસ્વતશ્ચ મે પૌષ્ણશ્ચ
મે પાત્નીવતશ્ચ મે હારિયોજનશ્ચ મે ॥ ૪। ૭। ૭॥ ઋતુગ્રહાશ્ચ
ચતુસ્ત્રિꣳશચ્ચ ॥ ૪। ૭। ૭॥

૧૫ ઇધ્મશ્ચ મે બર્હિશ્ચ મે વેદિશ્ચ મે ધિષ્ણિયાશ્ચ મે
સ્રુચશ્ચ મે ચમસાશ્ચ મે ગ્રાવાણશ્ચ મે સ્વરવશ્ચ મ ઉપરવાશ્ચ
મેઽધિષવણે ચ મે દ્રોણકલશશ્ચ મે વાયવ્યાનિ ચ મે પૂતભૃચ્ચ
મ આધવનીયશ્ચ મ આગ્નીધ્રં ચ મે હવિર્ધાનં ચ મે ગૃહાશ્ચ
મે સદશ્ચ મે પુરોડાશાશ્ચ મે પચતાશ્ચ મેઽવભૃથશ્ચ મે
સ્વગાકારશ્ચ મે ॥ ૪। ૭। ૮॥ ગૃહાશ્ચ ષોડશ ચ ॥ ૪। ૭। ૮॥

૧૬ અગ્નિશ્ચ મે ઘર્મશ્ચ મેઽર્કશ્ચ મે સૂર્યશ્ચ મે પ્રાણશ્ચ
મેઽશ્વમેધશ્ચ મે પૃથિવી ચ મેઽદિતિશ્ચ મે દિતિશ્ચ મે દ્યૌશ્ચ
મે શક્વરીરઙ્ગુલયો દિશશ્ચ મે યજ્ઞેન કલ્પન્તામૃક્ચ મે સામ
ચ મે સ્તોમશ્ચ મે યજુશ્ચ મે દીક્ષા ચ મે તપશ્ચ મ ઋતુશ્ચ
મે વ્રતં ચ મેઽહોરાત્રયોર્વૃષ્ટ્યા બૃહદ્રથન્તરે ચ મે યજ્ઞેન
કલ્પેતામ્ ॥ ૪। ૭। ૯॥ દીક્ષાઽષ્ટાદશ ચ ॥ ૪। ૭। ૯॥

૧૭ ગર્ભાશ્ચ મે વત્સાશ્ચ મે ત્ર્યવિશ્ચ મે ત્ર્યવી ચ મે દિત્યવાટ્ ચ મે
દિત્યૌહી ચ મે પઞ્ચાવિશ્ચ મે પઞ્ચાવી ચ મે ત્રિવત્સશ્ચ મે ત્રિવત્સા
ચ મે તુર્યવાટ્ ચ મે તુર્યૌહી ચ મે પષ્ઠવાટ્ ચ મે પષ્ઠૌહી ચ
મ ઉક્ષા ચ મે વશા ચ મ ઋષભશ્ચ

૧૮ મે વેહચ્ચ મેઽનડ્વાઞ્ચ મે ધેનુશ્ચ મ આયુર્યજ્ઞેન કલ્પતાં
પ્રાણો યજ્ઞેન કલ્પતામપાનો યજ્ઞેન કલ્પતાં વ્યાનો યજ્ઞેન કલ્પતાં
ચક્ષુર્યજ્ઞેન કલ્પતાગ્ શ્રોત્રં યજ્ઞેન કલ્પતાં મનો યજ્ઞેન

કલ્પતાં વાગ્યજ્ઞેન કલ્પતામાત્મા યજ્ઞેન કલ્પતાં યજ્ઞો યજ્ઞેન કલ્પતામ્
॥ ૪। ૭। ૧૦॥ ઋષભશ્ચ ચત્વારિꣳશચ્ચ ॥ ૪। ૭। ૧૦॥

૧૯ એકા ચ મે તિસ્રશ્ચ મે પઞ્ચ ચ મે સપ્ત ચ મે નવ ચ મ એકાદશ
ચ મે ત્રયોદશ ચ મે પઞ્ચદશ ચ મે સપ્તદશ ચ મે નવદશ ચ
મ એકવિꣳશતિશ્ચ મે ત્રયોવિꣳશતિશ્ચ મે પઞ્ચવિꣳશતિશ્ચ
મે સપ્તવિꣳશતિશ્ચ મે નવવિꣳશતિશ્ચ મ એકત્રિꣳશચ્ચ મે
ત્રયસ્ત્રિꣳશચ્ચ

૨૦ મે ચતસ્રશ્ચ મેઽષ્ટૌ ચ મે દ્વાદશ ચ મે ષોડશ ચ મે
વિꣳશતિશ્ચ મે ચતુર્વિꣳશતિશ્ચ મેઽષ્ટાવિꣳશતિશ્ચ મે
દ્વાત્રિꣳશચ્ચ મે ષટ્ત્રિꣳશચ્ચ મે ચત્વારિꣳશચ્ચ
મે ચતુશ્ચત્વારિꣳશચ્ચ મેઽષ્ટાચત્વારિꣳશચ્ચ મે
વાજશ્ચ પ્રસવશ્ચાપિજશ્ચ ક્રતુશ્ચ સુવશ્ચ મૂર્ધા ચ
વ્યશ્નિયશ્ચાન્ત્યાયનશ્ચાન્ત્યશ્ચ ભૌવનશ્ચ ભુવનશ્ચાધિપતિશ્ચ ॥
૪। ૭। ૧૧॥ ત્રયસ્ત્રિꣳશચ્ચ વ્યશ્નિય એકાદશ ચ ॥ ૪। ૭। ૧૧॥

૨૧ વાજો નઃ સપ્ત પ્રદિશશ્ચતસ્રો વા પરાવતઃ । વાજો નો
વિશ્વૈર્દેવૈર્ધનસાતાવિહાવતુ ॥ વિશ્વે અદ્ય મરુતો વિશ્વ ઊતી વિશ્વે
ભવન્ત્વગ્નયઃ સમિદ્ધાઃ । વિશ્વે નો દેવા અવસાગમન્તુ વિશ્વમસ્તુ
દ્રવિણં વાજો અસ્મે ॥ વાજસ્ય પ્રસવં દેવા રથૈર્યાતા હિરણ્યયૈઃ ।
અગ્નિરિન્દ્રો બૃહસ્પતિર્મરુતઃ સોમપીતયે ॥ વાજેવાજેઽવત વાજિનો નો ધનેષુ

૨૨ વિપ્રા અમૃતા ઋતજ્ઞાઃ । અસ્ય મધ્વઃ પિબત માદયધ્વં તૃપ્તા
યાત પથિભિર્દેવયાનૈઃ ॥ વાજઃ પુરસ્તાદુત મધ્યતો નો વાજો
દેવાꣳ ઋતુભિઃ કલ્પયાતિ । વાજસ્ય હિ પ્રસવો નન્નમીતિ વિશ્વા આશા
વાજપતિર્ભવેયમ્ ॥ પયઃ પૃથિવ્યાં પય ઓષધીષુ પયો દિવ્યન્તરિક્ષે
પયો ધામ્ । પયસ્વતીઃ પ્રદિશઃ સન્તુ મહ્યમ્ ॥ સંમા સૃજામિ પયસા
ઘૃતેન સં મા સૃજામ્યપ

૨૩ ઓષધીભિઃ । સોઽહં વાજꣳસનેયમગ્ને ॥ નક્તોષાસા સમનસા
વિરૂપે ધાપયેતે શિશુમેકꣳસમીચી । દ્યાવા ક્ષામા રુક્મો

અન્તર્વિ ભાતિ દેવા અગ્નિં ધારયન્દ્રવિણોદાઃ ॥ સમુદ્રોઽસિ
નભસ્વાનાર્દ્રદાનુઃ શંભૂર્મયોભૂરભિ મા વાહિ સ્વાહા મારુતોસિ
મરુતાં ગણઃ શંભૂર્મયોભૂરભિ મા વાહિ સ્વાહાવસ્યુરસિ
દુવસ્વાઙ્છંભૂર્મયોભૂરભિ મા વાહિ સ્વાહા ॥ ૪। ૭। ૧૨॥ ધનેષ્વપો
દુવશ્વાઙ્છંભૂર્મયોભૂરભિ મા દ્વે ચ ॥ ૪। ૭। ૧૨॥

૨૪ અગ્નિં યુનજ્મિ શવસા ઘૃતેન દિવ્યઁ સુપર્ણં વયસા
બૃહન્તમ્ । તેન વયં પતેમ બ્રધ્નસ્ય વિષ્પઁ સુવો રુહાણા
અધિ નાક ઉત્તમે ॥ ઇમૌ તે પક્ષાવજરૌ પતત્રિણો યાભ્યાઁ
રક્ષાગ્ંસ્યપહરઁ સ્યગ્ને । તાભ્યાં પતેમ સુકૃતામુ લોકં યત્રર્ષયઃ
પ્રથમજા યે પુરાણાઃ ॥ ચિદસિ સમુદ્રયોનિરિન્દુર્દક્ષઃ શ્યેન ઋતાવા
। હિરણ્યપક્ષઃ શકુનો ભુરણ્યુર્મહાન્થ્સધસ્થે ધ્રુવ

૨૫ આ નિષત્તઃ ॥ નમસ્તે અસ્તુ મા મા હિઁ સીર્વિશ્વસ્ય મૂર્ધન્નધિ તિષ્ઠસિ
શ્રિતઃ । સમુદ્રે તે હૃદયમન્તરાયુર્દ્યાવાપૃથિવી ભુવનેષ્વર્પિતે
॥ ઉદ્નો દત્તોદધિં ભિન્ત દિવઃ પર્જન્યાદન્તરિક્ષાત્ પૃથિવ્યાસ્તતો નો
વૃષ્ટ્યાવત । દિવો મૂર્ધાસિ પૃથિવ્યા નાભિરૂર્ગપામોષધીનામ્ । વિશ્વાયુઃ
શર્મ સપ્રથા નમસ્પથે ॥ યેનર્ષયસ્તપસા સત્ર

૨૬ માસતેન્ધાના અગ્નિઁ સુવરાભરન્તઃ । તસ્મિન્નહં નિ દધે
નાકે અગ્નિમેતં યમાહુર્મનવઃ સ્તીર્ણબર્હિષમ્ ॥ તં પત્નીભિરનુ
ગચ્છેમ દેવાઃ પુત્રૈર્ભ્રાતૃભિરુત વા હિરણ્યૈઃ । નાકં ગૃહ્ણાનાઃ
સુકૃતસ્ય લોકે તૃતીયે પૃષ્ઠે અધિ રોચને દિવઃ ॥ આ વાચો
મધ્યમરુહદ્ભુરણ્યુરયમગ્નિઃ સત્પતિશ્ચેકિતાનઃ । પૃષ્ઠે પૃથિવ્યા
નિહિતો દવિદ્યુતદધસ્પદં કૃણુતે

૨૭ યે પૃતન્યવઃ ॥ અયમગ્નિર્વીરતમો વયોધાઃ સહસ્રિયો
દીપ્યતામપ્રયુચ્છન્ । વિભ્રાજમાનઃ સરિરસ્ય મધ્ય ઉપ પ્ર યાત દિવ્યાનિ
ધામ ॥ સં પ્ર ચ્યવધ્વમનુ સં પ્ર યાતાગ્ને પથો દેવયાનાન્ કૃણુધ્વમ્
। અસ્મિન્થ્સધસ્થે અધ્યુત્તરસ્મિન્વિશ્વે દેવા યજમાનશ્ચ સીદત ॥ યેના
સહસ્રં વહસિ યેનાગ્ને સર્વવેદસમ્ । તેનેમં યજ્ઞં નો વહ દેવયાનો ય

२८ ઉત્તમઃ ॥ ઉદ્બુધ્યસ્વાગ્ને પ્રતિ જાગૃહ્યેનમિષ્ટાપૂર્તે સꣳ સૃજેથામયં
ચ । પુનઃ કૃણ્વꣳસ્ત્વા પિતરં યુવાનમન્વાતाꣳસીત્ત્વયિ
તન્તુમેતમ્ ॥ અયં તે યોનિરૃત્વિયો યતો જાતો અરોચથાઃ । તં
જાનન્નગ્ન આ રોહાથા નો વર્ધયા રયિમ્ ॥ ૪। ૭। ૧૩॥ ધ્રુવસ્સત્રં કૃણુતે
યસ્સપ્તત્રિꣳશચ્ચ ॥ ૪। ૭। ૧૩॥
२९ મમાગ્ને વર્ચો વિહવેષ્વસ્તુ વયં ત્વેન્ધાનાસ્તનુવં પુષેમ । મહ્યં
નમન્તાં પ્રદિશશ્ચતસ્રસ્ત્વયાધ્યક્ષેણ પૃતના જયેમ ॥ મમ દેવા
વિહવે સન્તુ સર્વ ઇન્દ્રાવન્તો મરુતો વિષ્ણુરગ્નિઃ । મમાન્તરિક્ષમુરુ
ગોપમસ્તુ મહ્યં વાતઃ પવતાં કામે અસ્મિન્ ॥ મયિ દેવા દ્રવિણમા
યજન્તાં મય્યાશીરસ્તુ મયિ દેવહૂતિઃ । દૈવ્યા હોતારા વનિષન્ત
३० પૂર્વેરિષ્ટાઃ સ્યામ તનુવા સુવીરાઃ ॥ મહ્યં યજન્તુ મમ યાનિ હવ્યાકૂતિઃ
સત્યા મનસો મે અસ્તુ । એનો મા નિ ગાં કતમચ્ચનાઽહં વિશ્વે દેવાસો અધિ
વોચતા મે ॥ દેવીઃ ષડુર્વીરુરુણઃ કૃણોત વિશ્વે દેવાસ ઇહ વીરયધ્વમ્ । મા
હાસ્મહિ પ્રજયા મા તનૂભિર્મા રધામ દ્વિષતે સોમ રાજન્ ॥ અગ્નિર્મન્યું
પ્રતિનુદન્પુરસ્તા
३१ દદબ્ધો ગોપાઃ પરિ પાહિનસ્ત્વમ્ । પ્રત્યઞ્ચો યન્તુ નિગુતઃ
પુનસ્તેઽમૈષાં ચિત્તં પ્રબુધા વિ નેશત્ ॥ ધાતા ધાતૃણાં ભુવનસ્ય
યસ્પતિર્દેવꣳ સવિતારમભિમાતિષાહમ્ । ઇમં યજ્ઞમશ્વિનોભા
બૃહસ્પતિર્દેવાઃ પાન્તુ યજમાનં ન્યર્થાત્ ॥ ઉરુવ્યચા નો મહિષઃ
શર્મ યꣳસદસ્મિન્ હવે પુરુહૂતઃ પુરુક્ષુ । સ નઃ પ્રજાયૈ હર્યશ્વ
મૃડયેન્દ્ર મા
३२ નો રીરિષો મા પરાદાઃ ॥ યે નઃ સપત્ના અપ તે ભવન્ત્વિન્દ્રાગ્નિભ્યામવ
બાધામહે તાન્ । વસવો રુદ્રા આદિત્યા ઉપરિસ્પૃશં મોગ્રં
ચેત્તારમધિરાજમક્રન્ ॥ અર્વાઞ્ચમિન્દ્રમમુતો હવામહે યો
ગોજિદ્ધનજિદશ્વજિદ્યઃ । ઇમં નો યજ્ઞં વિહવે જુષસ્વાસ્ય કુર્મો
હરિવો મે દિનં ત્વા ॥ ૪। ૭। ૧૪॥ વનિષન્ત પુરસ્તાન્મા ત્રિચત્વારિꣳશચ્ચ
॥ ૪। ૭। ૧૪॥

૩૩ અગ્નેર્મન્વે પ્રથમસ્ય પ્રચેતસો યં પાઞ્ચજન્યં બહવઃ સમિન્ધતે
। વિશ્વસ્યાં વિશિ પ્રવિવિશિવાꣳસમીમહે સ નો મુઞ્ચત્વꣳહસઃ ॥
યસ્યેદં પ્રાણન્નિમિષદ્યદેજતિ યસ્ય જાતં જનમાનં ચ કેવલમ્ ।
સ્તૌમ્યગ્નિં નાથિતો જોહવીમિ સ નો મુઞ્ચત્વꣳહસઃ ॥ ઇન્દ્રસ્ય મન્યે
પ્રથમસ્ય પ્રચેતસો વૃત્રઘ્નઃ સ્તોમા ઉપ મામુપાગુઃ । યો દાશુષઃ
સુકૃતો હવમુપ ગન્તા
૩૪ સ નો મુઞ્ચત્વꣳહસઃ ॥ યઃ સંગ્રામં નયતિ સં વશી યુધે
યઃ પુષ્ટાનિ સꣳસૃજતિ ત્રયાણિ । સ્તૌમીન્દ્રં નાથિતો જોહવીમિ
સ નો મુઞ્ચત્વꣳહસઃ ॥ મન્વે વાં મિત્રાવરુણા તસ્ય વિત્તꣳ
સત્યૌજસા દૃꣳહણા યં નુદેથે । યા રાજાનꣳસરથં યાથ ઉગ્રા
તા નો મુઞ્ચતમાગસઃ ॥ યો વાꣳરથ ઋજુરશ્મિઃ સત્યધર્મા
મિથુશ્ચરન્તમુપયાતિ દૂષયન્ । સ્તૌમિ
૩૫ મિત્રાવરુણા નાથિતો જોહવીમિ તૌ નો મુઞ્ચતમાગસઃ ॥ વાયોઃ
સવિતુર્વિદથાનિ મન્મહે યાવાત્મન્વદ્બિભૃતો યૌ ચ રક્ષતઃ । યૌ
વિશ્વસ્ય પરિ ભૂ બભૂવતુસ્તૌ નો મુઞ્ચતમાગસઃ ॥ ઉપ શ્રેષ્ઠા
ન આશિષો દેવયોર્ધર્મે અસ્થિરન્ । સ્તૌમિ વાયુꣳસવિતારં નાથિતો
જોહવીમિ તૌ નો મુઞ્ચતમાગસઃ ॥ રથીતમૌ રથીનામહ્વ ઊતયે
શુભં ગમિષ્ઠૌ સુયમેભિરશ્વૈઃ । યયો
૩૬ ર્વાં દેવૌ દેવેષ્વનિશિતમોજસ્તૌ નો મુઞ્ચતમાગસઃ ॥ યદયાતં
વહતુꣳસૂર્યાયાસ્ત્રિચક્રેણ સꣳસદમિચ્છમાનૌ । સ્તૌમિ
દેવાવશ્વિનૌ નાથિતો જોહવીમિ તૌ નો મુઞ્ચતમાગસઃ ॥ મરુતાં
મન્વે અધિ નો બ્રુવન્તુ પ્રેમાં વાચં વિશ્વામવન્તુ વિશ્વે । આશૂન્ હુવે
સુયમાનૂતયે તે નો મુઞ્ચન્ત્વેનસઃ ॥ તિગ્મમાયુધં વીડિતꣳ
સહસ્વદ્દિવ્યꣳશર્ધઃ
૩૭ પૃતનાસુ જિષ્ણુ । સ્તૌમિ દેવાન્મરુતો નાથિતો જોહવીમિ તે નો
મુઞ્ચન્ત્વેનસઃ ॥ દેવાનાં મન્વે અધિ નો બ્રુવન્તુ પ્રેમાં વાચં વિશ્વામવન્તુ
વિશ્વે । આશૂન્ હુવે સુયમાનૂતયે તે નો મુઞ્ચન્ત્વેનસઃ ॥ યદિદં

માભિશોચતિ પૌરુષેયેણ દૈવ્યેન । સ્તૌમિ વિશ્વાન્દેવાન્નાથિતો
જોહવીમિ તે નો મુઞ્ચન્ત્વેનસઃ ॥ અનુ નોઽદ્યાનુમતિર
૩૮ ન્વિદનુમતે ત્વં વૈશ્વાનરો ન ઊત્યા પૃષ્ટો દિવિ । યે
અપ્રથેતામમિતેભિરોજોભિર્યે પ્રતિષ્ઠે અભવતાં વસૂનામ્ । સ્તૌમિ
દ્યાવાપૃથિવી નાથિતો જોહવીમિ તે નો મુઞ્ચતમ ꣳ હસઃ ॥ ઉર્વીરોદસી
વરિવઃ કૃણોતં ક્ષેત્રસ્ય પત્ની અધિ નો બ્રૂયાતમ્ । સ્તૌમિ દ્યાવાપૃથિવી
નાથિતો જોહવીમિ તે નો મુઞ્ચતમ ꣳ હસઃ ॥ યત્તે વયં પુરુષત્રા
યવિષ્ઠાવિદ્ધા ꣳ સશ્ચકૃમા કચ્ચના
૩૯ ઽગઃ । કૃધી સ્વસ્મા ꣳ અદિતેરનાગાવ્યેના ꣳસિ શિશ્રથો
વિષ્વગગ્ને ॥ યથાહ તદ્વસવો ગૌર્યં ચિત્પદિ ષિતામમુઞ્ચતા
યજત્રાઃ । એવા ત્વમસ્મત્ પ્ર મુઞ્ચા વ્ય ꣳ હઃ પ્રાતાર્યગ્ને પ્રતરાંન
આયુઃ ॥ ૪। ૭। ૧૫॥ ગન્તા દૂષયન્ત્સ્તૌમિ યયોઃ શર્ધોઽનુમતિરનુ
ચન ચતુસ્ત્રિ ꣳ શચ્ચ ॥ ૪। ૭। ૧૫॥ અગ્નેર્મન્વે યસ્યેદમિંદ્રસ્ય
યસ્સંગ્રામ ꣳ સનો મુંચત્વ ꣳ હસઃ । મન્વે વાં તા નો મુંચતમાગસઃ
॥ યો વાં વાયોરુપ રથીતમૌ યદયાતમશ્વિનૌ તૌ નો મુંચતમાગસઃ ।
મરુતાં તિગ્મં મરુતો દેવાનાં યદિદં વિશ્વાન્તે નો મુંચન્ત્વેનસઃ । અનુ
ન ઉર્વી દ્યાવાપૃથિવી તે નો મુંચતમ ꣳ હસો યત્તે ॥ ચતુર ꣳ હસઃ
ષડાગસશ્ચતુરેનસો દ્વિર ꣳ હસઃ ॥

અગ્નાવિષ્ણૂ જ્યૈષ્ઠ્ય ꣳ શં ચોર્ક્યાઽશ્મા
ચાગ્નિશ્ચાઽ ꣳ શુશ્ચેધ્મશ્ચાગ્નિશ્ચ ગર્ભાશ્ચૈકા ચ વાજો નોગ્નિં
યુનજ્મિ મમાગ્નેઽગ્નેર્મન્વે પંચદશ ॥

અગ્નાવિષ્ણૂ અગ્નિશ્ચ વાજો નો અદબ્ધો ગોપા નવત્રિ ꣳ શત્ ॥

અગ્નાવિષ્ણૂ પ્રતરાં ન આયુઃ ॥

ઇતિ ચતુર્થં કાણ્ડં સંપૂર્ણમ્ ૪॥

॥ તૈત્તિરીય-સંહિતા ॥

# તૈત્તિરીય-સંહિતા

## ॥ પંચમં કાણ્ડમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

### પઞ્ચમકાણ્ડે પ્રથમઃ પ્રશ્નઃ ૧

૧ સાવિત્રાણિ જુહોતિ પ્રસૂત્યૈ ચતુર્ગૃહીતેન જુહોતિ ચતુષ્પાદઃ
પશવઃ પશૂનેવાવ રુંધે ચતસ્રો દિશો દિક્ષ્વેવ પ્રતિ તિષ્ઠતિ
છન્દાꣳસિ દેવેભ્યોઽપાક્રામન્ન વોઽભાગાનિ હવ્યં વક્ષ્યામ ઇતિ
તેભ્ય એતચ્ચતુર્ગૃહીતમધારયન્ પુરોઽનુવાક્યાયૈ યાજ્યાયૈ દેવતાયૈ
વષટ્કારાય યચ્ચતુર્ગૃહીતં જુહોતિ છન્દાગ્સ્યેવ તત્પ્રીણાતિ તાન્યસ્ય
પ્રીતાનિ દેવેભ્યો હવ્યં વહન્તિ યં કામયેત
૨ પાપીયાન્થ્સ્યાદિત્યેકૈકં તસ્ય જુહુયાદાહુતીભિરેવૈનમપ
ગૃહ્ણાતિ પાપીયાન્ભવતિ યં કામયેત વસીયાન્થ્સ્યાદિતિ સર્વાણિ
તસ્યાનુદ્રુત્ય જુહુયાદાહુત્યૈવૈનમભિ ક્રમયતિ વસીયાન્ભવત્યથો
યજ્ઞસ્યૈવૈષાભિક્રાન્તિરેતિ વા એષ યજ્ઞમુખાદૃદ્ધ્યા
યોઽગ્નેર્દેવતાયા એત્યષ્ટાવેતાનિ સાવિત્રાણિ ભવન્ત્યષ્ટાક્ષરા ગાયત્રી
ગાયત્રો
૩ ઽગ્નિસ્તેનૈવ યજ્ઞમુખાદૃદ્ધ્યા અગ્નેર્દેવતાયૈ નૈત્યષ્ટૌ સાવિત્રાણિ
ભવન્ત્યાહુતિર્નવમી ત્રિવૃતમેવ યજ્ઞમુખે વિ યાતયતિ યદિ
કામયેત છન્દાꣳસિ યજ્ઞયશસેનાર્પયેયમિત્યૃચમન્તમાં
કુર્યાચ્છન્દાગ્સ્યેવ યજ્ઞયશસેનાર્પયતિ યદિ કામયેત
યજમાનં યજ્ઞયશસેનાર્પયેયમિતિ યજુરન્તમં કુર્યાદ્યજમાનમેવ
યજ્ઞયશસેનાર્પયત્યૃચા સ્તોમꣳ સમર્ધયેત્યા

૪ ઽહ સમૃદ્ધ્યૈ ચતુર્ભિરભ્રિમા દત્તે ચત્વારિ છન્દાꣳસિ
છન્દોભિરેવ દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇત્યાહ પ્રસૂત્યા
અગ્નિર્દેવેભ્યો નિલાયત સ વેણું પ્રાવિશથ્સ એતામૂતિમનુ
સમચરદ્ધેણોઃ સુષિરꣳ સુષિરાભ્રિર્ભવતિ સયોનિત્વાય સ
યત્રયત્રાવસત્તત્કૃષ્ણમભવત્કલ્માષી ભવતિ રૂપસમૃદ્ધ્યા
ઉભયતઃ, ક્ષ્ણૂર્ભવતીતશ્ચામુતશ્ચાર્કસ્યાવરુદ્ધ્યૈ વ્યામમાત્રી
ભવત્યેતાવદ્વૈ પુરુષે વીર્યં વીર્યસંમિતાઽપરિમિતા
ભવત્યપરિમિતસ્યાવરુદ્ધ્યૈ યો વનસ્પતીનાં ફલગ્રહિઃ સ એષાં
વીર્યાવાન્ફલગ્રહિર્વેણુર્વૈણવી ભવતિ વીર્યસ્યાવરુદ્ધ્યૈ ॥ ૫। ૧। ૧॥
કામયેત ગાયત્રોર્ધ્વયેતિ ચ સપ્તવિꣳશતિશ્ચ ॥ ૫। ૧। ૧॥
૫ વ્યૃદ્ધં વા એતદ્યજ્ઞસ્ય યદયજુષ્કેણ ક્રિયત
ઇમામગૃભ્ણન્ રશનામૃતસ્યેત્યશ્વાભિ ધાનીમા દત્તે યજુષ્કૃત્યૈ
યજ્ઞસ્ય સમૃદ્ધ્યૈ પ્રતૂર્તં વાજિન્ના દ્રવેત્યશ્વમભિ
દધાતિ રૂપમેવાસ્યૈતન્મહિમાનં વ્યાચષ્ટે યુઞ્જાથાꣳ
રાસભં યુવમિતિ ગર્દભમસત્યેવ ગર્દભં પ્રતિ ષ્ઠાપયતિ
તસ્માદશ્વાદ્ગર્દભોઽસત્તરો યોગેયોગે તવસ્તરમિત્યાહ
૬ યોગેયોગ એવૈનં યુઙ્ક્તે વાજેવાજે હવામહ ઇત્યાહાન્નં વૈ વાજોઽન્નમેવાવ
રુંધે સખાય ઇન્દ્રમૂતય ઇત્યાહેન્દ્રિયમેવાવ રુંધેઽગ્નિર્દેવેભ્યો
નિલાયત તં પ્રજાપતિરન્વવિન્દત્પ્રાજાપત્યોઽશ્વોઽશ્વેન
સંભરત્યનુવિત્ત્યૈ પાપવસ્ય સં વા એતત્ક્રિયતે યચ્છ્રેયસા ચ પાપીયસા
ચ સમાનં કર્મ કુર્વન્તિ પાપીયાન્
૭ હ્યશ્વાદ્ગર્દભોઽશ્વં પૂર્વં નયન્તિ પાપવસ્યસસ્ય વ્યાવૃત્ત્યૈ
તસ્માચ્છ્રેયાꣳસં પાપીયાન્પશ્ચાદન્વેતિ બહુર્વૈ ભવતો
ભ્રાતૃવ્યો ભવતીવ ખલુ વા એષ યોઽગ્નિં ચિનુતે વજ્ર્યશ્વઃ
પ્રતૂર્વન્નેહ્યવક્રામન્નશસ્તીરિત્યાહ વજ્રેણૈવ પાપ્માનં
ભ્રાતૃવ્યમવ ક્રામતિ રુદ્રસ્ય ગાણપત્યાદિત્યાહ રૌદ્રા વૈ પશવો

રુદ્રાદેવ

૮ પશૂન્નિર્યાચ્યાત્મને કર્મ કુરુતે પૂષ્ણા સયુજા સહેત્યાહ પૂષા વા
અધ્વનાઁ સન્નેતા સમષ્ટ્યૈ પુરીષાયતનો વા એષ યદગ્નિરંગિરસો
વા એતમગ્રે દેવતાનાઁ સમભરન્પૃથિવ્યાઃ સધસ્થાદગ્નિં
પુરીષ્યમઙ્ગિરસ્વદચ્છેહીત્યાહ સાયતનમેવૈનં દેવતાભિઃ
સંભરત્યગ્નિં પુરીષ્યમઙ્ગિરસ્વદચ્છેમ ઇત્યાહ યેન

૯ સઙ્ગચ્છતે વાજમેવાસ્ય વૃઙ્ક્તે પ્રજાપતયે પ્રતિપ્રોચ્યાગ્નિઃ
સંભૃત્ય ઇત્યાહુરિયં વૈ પ્રજાપતિસ્તસ્યા એતચ્છ્રોત્રં
યદ્વલ્મીકોઽગ્નિં પુરીષ્યમઙ્ગિરસ્વદ્ભરિષ્યામ ઇતિ વલ્મીકવપામુપ
તિષ્ઠતે સાક્ષાદેવ પ્રજાપતયે પ્રતિપ્રોચ્યાગ્નિઁ સં ભરત્યગ્નિં
પુરીષ્યમઙ્ગિરસ્વદ્ભરામ ઇત્યાહ યેન સઙ્ગચ્છતે વાજમેવાસ્ય
વૃઙ્ક્તેઽન્વગ્નિરુષસામગ્ર

૧૦ મખ્યદિત્યાહાનુખ્યાત્યા આગત્ય વાજ્યધ્વન આક્રમ્ય
વાજિન્પૃથિવીમિત્યાહેચ્છત્યેવૈનં પૂર્વયા વિન્દત્યુત્તરયા દ્વાભ્યામા
ક્રમયતિ પ્રતિષ્ઠિત્યા અનુરૂપાભ્યાં તસ્માદનુરૂપાઃ પશવઃ પ્ર જાયન્તે
દ્યૌસ્તે પૃષ્ઠં પૃથિવી સધસ્થમિત્યાહૈભ્યો વા એતં લોકેભ્યઃ
પ્રજાપતિઃ સમૈરયદ્રૂપમેવાસ્યૈતન્મહિમાનં વ્યાચષ્ટે વજ્રીવા
એષ યદશ્વો દદ્ભિરન્યતોદદ્ભ્યો ભૂયાઁ લ્લોમભિરુભયાદદ્ભ્યો
યં દ્વિષ્યાત્તમધસ્પદં ધ્યાયેદ્વજ્રેણૈવૈનગ્ગ્ સ્તૃણુતે ॥ ૫। ૧। ૨॥ આહ
પાપીયાન્રુદ્રાદેવ યેનાઽગ્રં વજ્રી વૈ સપ્તદશ ચ ॥ ૫। ૧। ૨॥

૧૧ ઉત્ક્રામોદક્રમીદિતિ દ્વાભ્યામુત્ક્રમયતિ પ્રતિષ્ઠિત્યા અનુરૂપાભ્યાં
તસ્માદનુરૂપાઃ પશવઃ પ્ર જાયન્તેઽપ ઉપ સૃજતિ યત્ર વા આપ
ઉપ ગચ્છન્તિ તદોષધયઃ પ્રતિ તિષ્ઠન્ત્યોષધીઃ પ્રતિ તિષ્ઠન્તીઃ
પશવોઽનુ પ્રતિ તિષ્ઠન્તિ પશૂન્, યજ્ઞો યજ્ઞં યજમાનો યજમાનં
પ્રજાસ્તસ્માદપ ઉપ સૃજતિ પ્રતિષ્ઠિત્યૈ યદધ્વર્યુરનગ્નાવાહુતિં
જુહુયાદન્ધોઽધ્વર્યુઃ

૧૨ સ્યાદ્રક્ષાઁસિ યજ્ઞઁ હન્યુર્હિરણ્યમુપાસ્ય જુહોત્યગ્નિવત્યેવ

જુહોતિ નાન્ધોઽધ્વર્યુર્ભવતિ ન યજ્ઞꣳ રક્ષાꣳસિ ઘ્નન્તિ
જિઘર્મ્યગ્નિં મનસા ઘૃતેનેત્યાહ મનસા હિ પુરુષો યજ્ઞમભિ
ગચ્છતિ પ્રતિક્ષ્યન્તં ભુવનાનિ વિશ્વેત્યાહ સર્વꣳ હ્યેષ
પ્રત્યઙ્ઙેતિ પૃથું તિરશ્ચા વયસા બૃહન્તમિત્યાહાલ્પો હ્યેષ
જાતો મહાન્
૧૩ ભવતિ વ્યચિષ્ઠમન્નꣳરભસં વિદાનમિત્યાહાન્નમેવાસ્મૈ
સ્વદયતિ સર્વમસ્મૈ સ્વદતે ય એવં વેદાત્વા જિઘર્મિ વચસા ઘૃતેનેત્યાહ
તસ્માદ્યત્પુરુષો મનસાભિ ગચ્છતિ તદ્વાચા વદત્યરક્ષસેત્યાહ
રક્ષસામપહત્યૈ મર્યશ્રીઃ સ્પૃહયદ્વર્ણો અગ્નિરિત્યાહાપ ચિતિમેવાસ્મિન્
દધાત્યપ ચિતિમાન્ભવતિ ય એવં
૧૪ વેદ મનસા ત્વૈ તામાપ્નુમર્હતિ યામધ્વર્યુરનગ્ના વાહુતિં જુહોતિ
મનસ્વતીભ્યાં જુહોત્યાહુત્યોરાપ્ત્યૈ દ્વાભ્યાં પ્રતિષ્ઠિત્યૈ યજ્ઞમુખે
યજ્ઞમુખે વૈ ક્રિયમાણે યજ્ઞꣳ રક્ષાꣳસિ જિઘાꣳસન્ત્યેતર્હિ ખલુ
વા એતદ્યજ્ઞમુખં યર્હ્યેનદાહુતિરશ્નુતે પરિ લિખતિ રક્ષસામપહત્યૈ
તિસૃભિઃ પરિ લિખતિ ત્રિવૃદ્ધા અગ્નિર્યાવાનેવાગ્નિસ્તસ્માદ્રક્ષાꣳસ્યપ હન્તિ
૧૫ ગાયત્રિયા પરિ લિખતિ તેજો વૈ ગાયત્રી તેજસૈવૈનં પરિ ગૃહ્ણાતિ
ત્રિષ્ટુભા પરિ લિખતીંદ્રિયં વૈ ત્રિષ્ટુગિન્દ્રિયેણૈવૈનં પરિ
ગૃહ્ણાત્યનુષ્ટુભા પરિ લિખત્યનુષ્ટુપ્સર્વાણિ છન્દાꣳસિ પરિભૂઃ
પર્યાપ્ત્યૈ મધ્યતોઽનુષ્ટુભા વાગ્વા અનુષ્ટુપ્તસ્માન્મધ્યતો વાચા વદામો
ગાયત્રિયા પ્રથમયા પરિ લિખત્યથાનુષ્ટુભાથ ત્રિષ્ટુભા તેજો
વૈ ગાયત્રી યજ્ઞોઽનુષ્ટુગિંદ્રિયં ત્રિષ્ટુપ્તેજસા ચૈવેન્દ્રિયેણ
ચોભયતો યજ્ઞં પરિ ગૃહ્ણાતિ ॥ ૫। ૧। ૩॥ અન્ધોઽધ્વર્યુર્મહાન્ભવતિ
ય એવꣳ હન્તિ ત્રિષ્ટુભા તેજો વૈ ગાયત્રી ત્રયોદશ ચ ॥ ૫। ૧। ૩॥
૧૬ દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇતિ ખનતિ પ્રસૂત્યા અથો ધૂમમેવૈતેન
જનયતિ જ્યોતિષ્મન્તં ત્વાગ્ને સુપ્રતીકમિત્યાહ જ્યોતિરેવૈતેન જનયતિ
સોઽગ્નિર્જાતઃ પ્રજાઃ શુચાર્પયત્તં દેવા અર્ધર્ચેનાશમયઞ્છિવં
પ્રજાભ્યોઽહિꣳસન્તમિત્યાહ પ્રજાભ્ય એવૈનꣳશમયતિ દ્વાભ્યાં

ખનતિ પ્રતિષ્ઠિત્યા અપાં પૃષ્ઠમસીતિ પુષ્કરપર્ણમા
૧૭ હરત્યપાં વા એતત્પૃષ્ઠં યત્પુષ્કરપર્ણꣳ રૂપેણૈવૈનદા હરતિ
પુષ્કરપર્ણેન સંભરતિ યોનિર્વા અગ્નેઃ પુષ્કરપર્ણꣳ સયોનિમેવાગ્નિꣳ
સંભરતિ કૃષ્ણાજિનેન સંભરતિ યજ્ઞો વૈ કૃષ્ણાજિનં યજ્ઞેનૈવ
યજ્ઞꣳ સંભરતિ યદ્ગ્રામ્યાણાં પશૂનાં ચર્મણા સંભરેદ્ ગ્રામ્યાન્
પશૂઞ્છુચાર્પયેત્કૃષ્ણાજિનેન સંભરત્યારણ્યાનેવ પશૂન્
૧૮ છુચાર્પયતિ તસ્માથ્સમાવત્પશૂનાં પ્રજાયમાનાનામારણ્યાઃ પશવઃ
કનીયાꣳસઃ શુચા હ્યૃતા લોમતઃ સંભરત્યતો હ્યસ્ય મેધ્યં
કૃષ્ણાજિનં ચ પુષ્કરપર્ણં ચ સરꣳ સ્તૃણાતીયં વૈ કૃષ્ણાજિનમસૌ
પુષ્કરપર્ણમાભ્યામેવૈનમુભયતઃ પરિ ગૃહ્ણાત્યગ્નિર્દેવેભ્યો
નિલાયત તમથર્વાન્વપશ્યદથર્વા ત્વા પ્રથમો નિરમન્થદગ્ન ઇત્યા
૧૯ ઽહ ય એવૈનમન્વપશ્યત્તેનૈવૈનꣳ સંભરતિ ત્વામગ્ને
પુષ્કરાદધીત્યાહ પુષ્કરપર્ણે હ્યેનમુપશ્રિતમવિન્દત્તમુ
ત્વા દધ્યઙ્ઙૃષિરિત્યાહ દધ્યઙ્ વા આથર્વણસ્તેજસ્વ્યાસીત્ તેજ
એવાસ્મિન્દધાતિ તમુ ત્વા પાથ્યો વૃષેત્યાહ પૂર્વમેવોદિતમુત્તરેણાભિ
ગૃણાતિ
૨૦ ચતસૃભિઃ સંભરતિ ચત્વારિ છન્દાꣳસિ છન્દોભિરેવ
ગાયત્રીભિર્બ્રાહ્મણસ્ય ગાયત્રો હિ બ્રાહ્મણસ્ત્રિષ્ટુગ્ભી રાજન્યસ્ય
ત્રૈષ્ટુભો હિ રાજન્યો યં કામયેત વસીયાન્થ્સ્યાદિત્યુભયીભિસ્તસ્ય
સંભરેત્તેજશ્ચૈવાસ્મા ઇંદ્રિયં ચ સમીચી દધાત્યષ્ટાભિઃ
સંભરત્યષ્ટાક્ષરા ગાયત્રી ગાયત્રોઽગ્નિર્યાવાનેવાગ્નિસ્તꣳ
સંભરતિ સીદ હોતરિત્યાહ દેવતા એવાસ્મૈ સꣳ સાદયતિ નિ હોતેતિ
મનુષ્યાન્થ્સꣳ સીદસ્વેતિ વયાꣳસિ જનિષ્વા હિ જેન્યો અગ્રે
અહ્નામિત્યાહ દેવમનુષ્યાનેવાસ્મૈ સꣳ સન્નાન્ પ્ર જનયતિ ॥ ૫। ૧। ૪॥
ઐવ પશૂનિતિ ગૃણાતિ હોતરિતિ સપ્તવિꣳશતિશ્ચ ॥ ૫। ૧। ૪॥
૨૧ ક્રૂરમિવ વા અસ્યા એતત્કરોતિ યત્ખનત્યપ ઉપ સૃજત્યાપો વૈ
શાન્તાઃ શાન્તાભિરેવાસ્યૈ શુચꣳ શમયતિ સં તે વાયુર્માતરિશ્વા

દધાત્વિત્યાહ પ્રાણો વૈ વાયુઃ પ્રાણેનૈવાસ્મૈ પ્રાણꣳ સં દધાતિ સં
તે વાયુરિત્યાહ તસ્માદ્વાયુપ્રચ્યુતા દિવો વૃષ્ટિરીર્તે તસ્મૈ ચ દેવિ
વષડસ્તુ
૨૨ તુભ્યમિત્યાહ ષડ્વા ઋતવ ઋતુષ્વેવ વૃષ્ટિં દધાતિ
તસ્માથ્સર્વાનૃતૂન્, વર્ષતિ યદ્વષટ્ કુર્યાદ્યાતયામાસ્ય વષટ્કારઃ
સ્યાદ્યન્ન વષટ્ કુર્યાદ્રક્ષાꣳસિ યજ્ઞꣳ હન્યુર્વડિત્યાહ
પરોઽક્ષમેવ વષટ્કરોતિ નાસ્ય યાતયામા વષટ્કારો ભવતિ ન
યજ્ઞꣳ રક્ષાꣳસિ ઘ્નન્તિ સુજાતો જ્યોતિષા સહેત્યનુષ્ટુભોપ
નહ્યત્યનુષ્ટુપ્
૨૩ સર્વાણિ છન્દાꣳસિ છન્દાꣳસિ ખલુ વા અગ્નેઃ પ્રિયા તનૂઃ
પ્રિયયૈવૈનં તનુવા પરિ દધાતિ વેદુકો વાસો ભવતિ ય એવં વેદ
વારુણો વા અગ્નિરુપનદ્ધ ઉદુ તિષ્ઠ સ્વધ્વરોર્ધ્વ ઊષુણ ઊતય ઇતિ
સાવિત્રીભ્યામુત્તિષ્ઠતિ સવિતૃપ્રસૂત એવાસ્યોર્ધ્વાં વરુણમેનિમુથ્સૃજતિ
દ્વાભ્યાં પ્રતિષ્ઠિત્યૈ સ જાતો ગર્ભો અસિ
૨૪ રોદસ્યોરિત્યાહેમે વૈ રોદસી તયોરેષ ગર્ભો
યદગ્નિસ્તસ્માદેવમાહાગ્ને ચારુર્વિભૃત ઓષધીષ્વિત્યાહ યદા હ્યેતં
વિભરન્ત્યથ ચારુતરો ભવતિ પ્ર માતૃભ્યો અધિ કનિક્રદદ્ગા
ઇત્યાહૌષધયો વા અસ્ય માતરસ્તાભ્ય એવૈનં પ્ર ચ્યાવયતિ સ્થિરો
ભવ વીડ્વઙ્ગ ઇતિ ગર્દભ આ સાદયતિ
૨૫ સં નહ્યત્યેવૈનમેતયા સ્થેમ્ને ગર્દભેન સં ભરતિ
તસ્માદ્ગર્દભઃ પશૂનાં ભારભારિતમો ગર્દભેન સં ભરતિ
તસ્માદ્ગર્દભોઽપ્યનાલેશેઽત્યન્યાન્પશૂન્મેદ્યત્યન્નગ્ગ્ હ્યેનેનાર્કꣳ
સં ભરન્તિ ગર્દભેન સં ભરતિ તસ્માદ્ગર્દભો દ્વિરેતાઃ સન્કનિષ્ઠં
પશૂનાં પ્ર જાયતેઽગ્નિર્હ્યસ્ય યોનિં નિર્દહતિ પ્રજાસુ વા એષ
એતર્હ્યારૂઢઃ
૨૬ સ ઈશ્વરઃ પ્રજાઃ શુચા પ્રદહઃ શિવો ભવ પ્રજાભ્ય ઇત્યાહ
પ્રજાભ્ય એવૈનꣳશમયતિ માનુષીભ્યસ્ત્વમઙ્ગિર ઇત્યાહ

માનવ્યો હિ પ્રજા મા દ્યાવાપૃથિવી અભિ શૂશુચો માન્તરિક્ષં
મા વનસ્પતીનિત્યાહૈભ્ય એવૈનં લોકેભ્યઃ શમયતિ પ્રૈતુ વાજી
કનિક્રદદિત્યાહ વાજી હ્યેષ નાનદદ્રાસભઃ પત્વેત્યા

૨૭ ડહ રાસભ ઇતિ હ્યેતમૃષયોઽવદન્ ભરન્નગ્નિં
પુરીષ્યમિત્યાહાગ્નિરઁ હ્યેષ ભરતિ મા પાદ્યાયુષઃ
પુરેત્યાહાયુરેવાસ્મિન્દધાતિ તસ્માદ્ગર્દભઃ સર્વમાયુરેતિ તસ્માદ્ગર્દભે
પુરાયુષઃ પ્રમીતે બિભ્યતિ વૃષાગ્નિં વૃષણં ભરન્નિત્યાહ વૃષા
હ્યેષ વૃષાગ્નિરપાં ગર્ભઁ

૨૮ સમુદ્રિયમિત્યાહાપાગ્ હ્યેષ ગર્ભો યદગ્નિરગ્ન આ યાહિ વીતય ઇતિ વા
ઇમૌ લોકૌ વ્યૈતામગ્ન આ યાહિ વીતય ઇતિ યદાહાનયોર્લોકયોર્વીત્યૈ
પ્રચ્યુતો વા એષ આયતનાદગતઃ પ્રતિષ્ઠાઁ સ એતર્હ્યધ્વર્યું ચ
યજમાનં ચ ધ્યાયત્યૃતઁ સત્યમિત્યાહેયં વા ઋતમસૌ

૨૯ સત્યમનયોરેવૈનં પ્રતિ ષ્ઠાપયતિ નાર્તિમાર્છત્યધ્વર્યુર્ન
યજમાનો વરુણો વા એષ યજમાનમભ્યૈતિ યદગ્નિરુપનદ્ધ
ઓષધયઃ પ્રતિ ગૃહ્ણીતાગ્નિમેતમિત્યાહ શાન્ત્યૈ વ્યસ્યન્વિશ્વા
અમતીરરાતીરિત્યાહ રક્ષસામપ હત્યૈ નિષીદન્નો અપ દુર્મતિઁ
હનદિત્યાહ પ્રતિષ્ઠિત્યા ઓષધયઃ પ્રતિ મોદધ્વ

૩૦ મેનમિત્યાહૌષધયો વા અગ્નેર્ભાગધેયં તાભિરેવૈન ઁ
સમર્ધયતિ પુષ્પાવતીઃ સુપિપ્પલા ઇત્યાહ તસ્માદોષધયઃ ફલં
ગૃહ્ણન્ત્યયં વો ગર્ભ ઋત્વિયઃ પ્રત્નઁ સધસ્થમાસદદિત્યાહ
યાભ્ય એવૈનં પ્રચ્યાવયતિ તાસ્વેવૈનં પ્રતિ ષ્ઠાપયતિ દ્વાભ્યામુપાવ
હરતિ પ્રતિષ્ઠિત્યૈ ॥ ૫। ૧। ૫॥ અસ્ત્વનુષ્ટુબસિ સાદયત્યારૂઢઃ પત્વેતિ
ગર્ભમસૌ મોદધ્વં દ્વિચત્વારિઁશચ્ચ॥ ૫। ૧। ૫॥

૩૧ વારુણો વા અગ્નિરુપનદ્ધો વિ પાજસેતિ વિ સ્રઁસયતિ સવિતૃપ્રસૂત
એવાસ્ય વિષૂચીં વરુણમેનિં વિ સૃજત્યપ ઉપ સૃજત્યાપો વૈ શાન્તાઃ
શાન્તાભિરેવાસ્ય શુચઁશમયતિ તિસૃભિરુપ સૃજતિ ત્રિવૃદ્ધા
અગ્નિર્યાવાનેવાગ્નિસ્તસ્ય શુચઁશમયતિ મિત્રઃ સ ઁ સૃજ્ય

પૃથિવીમિત્યાહ મિત્રો વૈ શિવો દેવાનાં  તેનૈવૈ
૩૨ ન ꣳ  સꣳ સૃજતિ  શાન્ત્યૈ  યદ્ગ્રામ્યાણાં  પાત્રાણાં કપાલૈઃ
સꣳ સૃજેદ્ગ્રામ્યાણિ  પાત્રાણિ શુચાર્પયેદર્મકપાલૈઃ સꣳ સૃજત્યેતાનિ
વા અનુપજીવનીયાનિ  તાન્યેવ શુચાર્પયતિ  શર્કરાભિઃ  સꣳ સૃજતિ
ધૃત્યા  અથો  શન્ત્વાયાજલોમૈઃ સꣳ સૃજત્યેષા વા અગ્નેઃ પ્રિયા
તનૂર્યદજા પ્રિયયૈવૈનં  તનુવા  સꣳ સૃજત્યથો  તેજસા
કૃષ્ણાજિનસ્ય  લોમભિઃ  સꣳ
૩૩ સૃજતિ યજ્ઞો વૈ કૃષ્ણાજિનં યજ્ઞેનૈવ યજ્ઞꣳ સꣳ
સૃજતિ રુદ્રાઃ સંભૃત્ય  પૃથિવીમિત્યાહૈતા વા એતં દેવતા  અગ્રે
સમભરન્તાભિરેવૈન ꣳ  સં ભરતિ મખસ્ય  શિરોઽસીત્યાહ યજ્ઞો
વૈ મખસ્તસ્યૈતચ્છિરો  યદુખા તસ્માદેવમાહ યજ્ઞસ્ય  પદે સ્થ
ઇત્યાહ યજ્ઞસ્ય  હ્યેતે
૩૪ પદે અથો  પ્રતિષ્ઠિત્યૈ  પ્રાન્યાભિર્યચ્છત્યન્વન્યૈર્મન્ત્રયતે
મિથુનત્વાય  ત્ર્યુદ્ધિં કરોતિ  ત્રય  ઇમે લોકા એષાં લોકાનામાપ્ત્યૈ
છન્દોભિઃ કરોતિ વીર્યં  વૈ છન્દાꣳસિ વીર્યેણૈવૈનાં  કરોતિ  યજુષા
બિલં  કરોતિ  વ્યાવૃત્ત્યા  ઇયતીં કરોતિ પ્રજાપતિના યજ્ઞમુખેન  સંમિતાં
દ્વિસ્તનાં કરોતિ  દ્યાવાપૃથિવ્યોર્દોહાય  ચતુઃસ્તનાં કરોતિ પશૂનાં
દોહાયાષ્ટાસ્તનાં કરોતિ  છંદસાં  દોહાય  નવાશ્રિમભિ  ચરતઃ
કુર્યાત્રિવૃતમેવ વજ્રꣳસંભૃત્ય  ભ્રાતૃવ્યાય  પ્ર હરતિ
સ્તૃત્યૈ  કૃત્વાય  સા મહીમુખામિતિ  નિ દધાતિ દેવતાસ્વેવૈનાં  પ્રતિ
ષ્ઠાપયતિ ॥ ૫। ૧। ૬॥ તેનૈવ લોમભિસ્સમેતે અભિચરત  એકવિꣳશતિશ્ચ
॥ ૫। ૧। ૬॥
૩૫ સપ્તભિર્ધૂપયતિ સપ્ત વૈ શીર્ષણ્યાઃ  પ્રાણાઃ શિર
એતદ્યજ્ઞસ્ય  યદુખા શીર્ષન્નેવ યજ્ઞસ્ય  પ્રાણાન્દધાતિ
તસ્માત્સપ્ત શીર્ષન્પ્રાણા અશ્વ શકેન  ધૂપયતિ પ્રાજાપત્યો વા અશ્વઃ
સયોનિત્વાયાદિતિસ્ત્વેત્યાહેયં વા અદિતિરદિત્યૈવાદિત્યાં ખનત્યસ્યા
અક્રૂરઙ્કારાય  ન હિ સ્વઃ સ્વꣳ હિનસ્તિ  દેવાનાં  ત્વા  પત્નીરિત્યાહ દેવાનાં

૩૬ વા એતાં પત્નયોઽગ્રેઽકુર્વન્તાભિરેવૈનાં દધાતિ ધિષણાસ્ત્વેત્યાહ વિદ્યા
વૈ ધિષણા વિદ્યાભિરેવૈનામભીન્દ્ધે ગ્નાસ્ત્વેત્યાહ છન્દાꣳસિ વૈ
ગ્નાશ્છન્દોભિરેવૈનાગ્ શ્રપયતિ વરૂત્રયસ્ત્વેત્યાહ હોત્રા વૈ વરૂત્રયો
હોત્રાભિરેવૈનાં પચતિ જનયસ્ત્વેત્યાહ દેવાનાં વૈ પત્ની
૩૭ ર્જનયસ્તાભિરેવૈનાં પચતિ ષડ્ભિઃ પચતિ ષડ્વા ઋતવ
ઋતુભિરેવૈનાં પચતિ દ્વિઃ પચન્ત્વિત્યાહ તસ્માદ્દ્વિઃ
સંવથ્સરસ્ય સસ્યં પચ્યતે વારુણ્યુખાભીદ્ધા મૈત્રિયોપૈતિ
શાન્ત્યૈ દેવસ્ત્વા સવિતોદ્વપત્વિત્યાહ સવિતૃપ્રસૂત એવૈનાં બ્રહ્મણા
દેવતાભિરુદ્વપત્યપદ્યમાના પૃથિવ્યાશા દિશ આ પૃણે
૩૮ ત્યાહ તસ્માદગ્નિઃ સર્વા દિશોઽનુ વિ ભાત્યુત્તિષ્ઠ બૃહતી ભવોર્ધ્વા
તિષ્ઠ ધ્રુવા ત્વમિત્યાહ પ્રતિષ્ઠિત્યા અસુર્યં પાત્રમનાચ્છૃણ્ણમા
ચ્છૃણત્તિ દેવત્રાકરજ ક્ષીરેણાઽઽચ્છૃણત્તિ પરમં વા એતત્પયો
યદજક્ષીરં પરમેણૈવૈનાં પયસાઽઽચ્છૃણત્તિ યજુષા વ્યાવૃત્ત્યૈ
છન્દોભિરા ચ્છૃણત્તિ છન્દોભિર્વા એષા ક્રિયતે છન્દોભિરેવ
છન્દાગ્સ્યા ચ્છૃણત્તિ ॥ ૫। ૧। ૭॥ આહ દેવાનાં વૈ પત્નીઃ પૃણૈષા
ષટ્ચ ॥ ૫। ૧। ૭॥
૩૯ એકવિꣳશત્યા માષૈઃ પુરુષશીર્ષમચ્છૈત્યમેધ્યા વૈ માષા
અમેધ્યં પુરુષશીર્ષમમેધ્યૈરેવાસ્યામેધ્યં નિરવદાય
મેધ્યં કૃત્વાહરત્યેકવિꣳશતિર્ભવન્ત્યેકવિꣳશો વૈ પુરુષઃ
પુરુષસ્યાપ્ત્યૈ વ્યૃદ્ધં વા એતત્પ્રાણૈરમેધ્યં યત્પુરુષશીર્ષꣳ
સપ્તધા વિતૃણ્ણાં વલ્મીકવપાં પ્રતિ નિ દધાતિ સપ્ત વૈ શીર્ષણ્યાઃ
પ્રાણાઃ પ્રાણૈરેવૈનથ્સમર્ધયતિ મેધ્યત્વાય યાવન્તો
૪૦ વૈ મૃત્યુબન્ધવસ્તેષાં યમ આધિપત્યં પરીયાય યમગાથાભિઃ
પરિ ગાયતિ યમાદેવૈનદ્વૃઙ્ક્તે તિસૃભિઃ પરિ ગાયતિ ત્રય ઇમે
લોકા એભ્ય એવૈનલ્લોકેભ્યો વૃઙ્ક્તે તસ્માદ્ગાયતે ન દેયં ગાથા
હિ તદ્વૃઙ્ક્તેઽગ્નિભ્યઃ પશૂના લભતે કામા વા અગ્નયઃ કામાનેવાવ
રુંધે યત્ પશૂન્નાલભેતાનવરુદ્ધા અસ્ય

૪૧ પશવઃ સ્યુર્યત્ પર્યગ્નિકૃતાનુત્સૃજેદ્યજ્ઞવેશસં કુર્યાદ્યથ્સગ્ગ્
સ્થાપયેદ્યાતયામાનિ શીર્ષાણિ સ્યુર્યત્પશૂનાલભતે તેનૈવ
પશૂનવ રુંધે યત્પર્યગ્નિકૃતાનુત્સૃજતિ શીર્ષ્ણામયાતયામત્વાય
પ્રાજાપત્યેન સરꣳ સ્થાપયતિ યજ્ઞો વૈ પ્રજાપતિર્યજ્ઞ એવ યજ્ઞં
પ્રતિ ષ્ઠાપયતિ પ્રજાપતિઃ પ્રજા અસૃજત સ રિરિચાનોઽમન્યત સ
એતા આપ્રીરપશ્યત્તાભિર્વૈ સ મુખત

૪૨ આત્માનમાપ્રીણીત યદેતા આપ્રિયો ભવન્તિ યજ્ઞો વૈ
પ્રજાપતિર્યજ્ઞમેવૈતાભિર્મુખત આ પ્રીણાત્યપરિમિતછંદસો
ભવન્ત્યપરિમિતઃ પ્રજાપતિઃ પ્રજાપતેરાપ્ત્યા ઊનાતિરિક્તા મિથુનાઃ
પ્રજાત્યૈ લોમશં વૈ નામૈતચ્છંદઃ પ્રજાપતેઃ પશવો લોમશાઃ
પશૂનેવાવ રુંધે સર્વાણિ વા એતા રૂપાણિ સર્વાણિ રૂપાણ્યગ્નૌ ચિત્યે
ક્રિયન્તે તસ્માદેતા અગ્નેશ્ચિત્યસ્ય

૪૩ ભવન્ત્યેકવિꣳશતિꣳ સામિધેનીરન્વાહ રુગ્વા
એકવિꣳશો રુચમેવ ગચ્છત્યથો પ્રતિષ્ઠામેવ પ્રતિષ્ઠા
હ્યેકવિꣳશશ્ચતુર્વિꣳશતિમન્વાહ ચતુર્વિꣳશતિરર્ધમાસાઃ
સંવથ્સરઃ સંવથ્સરોઽગ્નિર્વૈશ્વાનરઃ સાક્ષાદેવ વૈશ્વાનરમવ
રુંધે પરાચીરન્વાહ પરાઙિવ હિ સુવર્ગો લોકઃ સમાસ્ત્વાગ્ન ઋતવો
વર્ધયન્ત્વિત્યાહ સમાભિરેવાગ્નિં વર્ધય

૪૪ ત્યૃતુભિઃ સંવથ્સરં વિશ્વા આ ભાહિ પ્રદિશઃ પૃથિવ્યા
ઇત્યાહ તસ્માદગ્નિઃ સર્વા દિશોઽનુ વિ ભાતિ પ્રત્યૌહતામશ્વિના
મૃત્યુમસ્માદિત્યાહ મૃત્યુમેવાસ્માદ પનુદત્યુદ્વયં
તમસસ્પરીત્યાહ પાપ્મા વૈ તમઃ પાપ્માનમેવાસ્માદપ હન્ત્યગન્મ
જ્યોતિરુત્તમમિત્યાહાસૌ વા આદિત્યો જ્યોતિરુત્તમમાદિત્યસ્યૈવ સાયુજ્યં
ગચ્છતિ ન સંવથ્સરસ્તિષ્ઠતિ નાસ્ય શ્રીસ્તિષ્ઠતિ યસ્યૈતાઃ
ક્રિયન્તે જ્યોતિષ્મતીમુત્તમામન્વાહ જ્યોતિરેવાસ્મા ઉપરિષ્ટાદ્દધાતિ
સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યૈ ॥ ૫। ૧। ૮॥ યાવન્તોસ્ય મુખતશ્ચિત્યસ્ય
વર્ધયત્યાદિત્યોષ્ટાવિꣳશતિશ્ચ ॥ ૫। ૧। ૮॥

૪૫ ષડ્ભિર્દીક્ષયતિ ષડ્વા ઋતવ ઋતુભિરેવૈનં દીક્ષયતિ
સપ્તભિર્દીક્ષયતિ સપ્ત છન્દાꣳસિ છન્દોભિરેવૈનં દીક્ષયતિ વિશ્વે
દેવસ્ય નેતુરિત્યનુષ્ટુભોત્તમયા જુહોતિ વાગ્વા અનુષ્ટુપ્તસ્માત્પ્રાણાનાં
વાગુત્તમૈકસ્માદક્ષરાદનાપ્તં પ્રથમં પદં તસ્માદ્યદ્વાચોઽનાપ્તં
તન્મનુષ્યા ઉપ જીવન્તિ પૂર્ણયા જુહોતિ પૂર્ણ ઇવ હિ પ્રજાપતિઃ
૪૬ પ્રજાપતેરાપ્ત્યૈ ન્યૂનયા જુહોતિ ન્યૂનાદ્ધિ પ્રજાપતિઃ પ્રજા
અસૃજત પ્રજાનાꣳ સૃષ્ટ્યૈ યદર્ચિષિ પ્રવૃઞ્જ્યાદ્ભૂતમવ
રુંધીત યદઙ્ગારેષુ ભવિષ્યદઙ્ગારેષુ પ્ર વૃણક્તિ ભવિષ્યદેવાવ
રુંધે ભવિષ્યદ્ધિ ભૂયો ભૂતાદ્દ્વાભ્યાં પ્ર વૃણક્તિ દ્વિપાદ્યજમાનઃ
પ્રતિષ્ઠિત્યૈ બ્રહ્મણા વા એષા યજુષા સંભૃતા યદુખા સા
યદ્ભિદ્યેતાર્તિમાર્છે
૪૭ દ્યજમાનો હન્યેતાસ્ય યજ્ઞો મિત્રૈતામુખાં તપેત્યાહ બ્રહ્મ વૈ મિત્રો
બ્રહ્મન્નેવૈનાં પ્રતિષ્ઠાપયતિ નાર્તિમાર્છતિ યજમાનો નાસ્ય યજ્ઞો
હન્યતે યદિ ભિદ્યેત તૈરેવ કપાલૈઃ સꣳ સૃજેત્સૈવ તતઃ
પ્રાયશ્ચિત્તિર્યો ગતશ્રીઃ સ્યાન્મથિત્વા તસ્યાવ દધ્યાદ્ભૂતો વા એષ સ સ્વાં
૪૮ દેવતામુપૈતિ યો ભૂતિકામઃ સ્યાદ્ય ઉખાયૈ સંભવેત્સ એવ
તસ્ય સ્યાદતો હ્યેષ સંભવત્યેષ વૈ સ્વયંભૂર્નામ ભવત્યેવ
યં કામયેત ભ્રાતૃવ્યમસ્મૈ જનયેયમિત્યન્યતસ્તસ્યાહૃત્યાવ
દધ્યાત્સાક્ષાદેવાસ્મૈ ભ્રાતૃવ્યં જનયત્યંબરીષાદન્નકામસ્યાવ
દધ્યાદંબરીષે વા અન્નં ભ્રિયતે સયોન્યેવાન્ન
૪૯ મવ રુંધે મુઞ્જાનવ દધાત્યૂર્ગ્વૈ મુઞ્જા ઊર્જમેવાસ્મા અપિ
દધાત્યગ્નિર્દેવેભ્યો નિલાયત સ ક્રુમુકં પ્રાવિશત્ક્રુમુકમવ દધાતિ
યદેવાસ્ય તત્ર ન્યક્તં તદેવાવ રુંધ આજ્યેન સં યૌત્યેતદ્વા અગ્નેઃ
પ્રિયં ધામ યદાજ્યં પ્રિયેણૈવૈનં ધામ્ના સમર્ધયત્યથો તેજસા
૫૦ વૈકઙ્કતીમા દધાતિ ભા એવાવ રુંધે શમીમયીમા દધાતિ શાન્ત્યૈ
સીદ ત્વં માતુરસ્યા ઉપસ્થ ઇતિ તિસૃભિર્જાતમુપ તિષ્ઠતે ત્રય

ઇમે લોકા એષ્વેવ લોકેષ્વાવિદં ગચ્છત્યથો પ્રાણાનેવાત્મન્ધત્તે ॥ ૫। ૧। ૯॥ પ્રજાપતિર્ ઋચ્છેથ્સ્વામેવાન્નં
તેજસા ચતુસ્ત્રિँ શચ્ચ ॥ ૫। ૧। ૯॥

૫૧ ન હ સ્મ વૈ પુરાગ્નિરપરશુવૃક્ણં દહતિ તદસ્મૈ
પ્રયોગ એવર્ષિરસ્વદયદ્યદગ્ને યાનિ કાનિ ચેતિ સમિધમા
દધાત્યપરશુવૃક્ણમેવાસ્મૈ સ્વદયતિ સર્વમસ્મૈ સ્વદતે ય એવં
વેદૌદુંબરીમા દધાત્યૂર્ગ્વા ઉદુંબર ઊર્જમેવાસ્મા અપિ દધાતિ
પ્રજાપતિરગ્નિમસૃજત તँ સૃષ્ટँ રક્ષાગ્ સ્ય

૫૨ જિઘાँ સન્થ્સ એતદ્રાક્ષોઘ્નમપશ્યત્તેન વૈ સ રક્ષાગ્ સ્યપાહત
યદ્રાક્ષોઘ્નં ભવત્યગ્નેરેવ તેન જાતાદ્રક્ષાગ્ સ્યપ હન્ત્યાશ્વત્થીમા
દધાત્યશ્વત્થો વૈ વનસ્પતીનાँ સપત્નસાહો વિજિત્યૈ વૈકઙ્કતીમા
દધાતિ ભા એવાવ રુંધે શમીમયીમા દધાતિ શાન્ત્યૈ સँ શિતં મે
બ્રહ્મોદેષાં બાહૂ અતિરમિત્યુત્તમે ઔદુંબરી

૫૩ વાચયતિ બ્રહ્મણૈવ ક્ષત્રँ સરँ શ્યતિ ક્ષત્રેણ બ્રહ્મ
તસ્માદ્બ્રાહ્મણો રાજન્યવાનત્યન્યં બ્રાહ્મણં તસ્માદ્રાજન્યો
બ્રાહ્મણવાનત્યન્યँ રાજન્યં મૃત્યુર્વા એષ યદગ્નિરમૃતँ
હિરણ્યँ રુક્મમન્તરં પ્રતિ મુઞ્ચતેઽમૃતમેવ મૃત્યોરન્તર્ધત્ત
એકવિँ શતિનિર્બાધો ભવત્યેકવિँ શતિર્વૈ દેવલોકા દ્વાદશ માસાઃ
પઞ્ચર્તવસ્ત્રય ઇમે લોકા અસાવાદિત્ય

૫૪ એકવિँ શ એતાવન્તો વૈ દેવલોકાસ્તેભ્ય એવ ભ્રાતૃવ્યમન્તરેતિ
નિર્બાધૈર્વૈ દેવા અસુરાન્નિર્બાધેઽકુર્વત તન્નિર્બાધાનાં નિર્બાધત્વં
નિર્બાધી ભવતિ ભ્રાતૃવ્યાનેવ નિર્બાધે કુરુતે સાવિત્રિયા પ્રતિ
મુઞ્ચતે પ્રસૂત્યૈ નક્તોષાસેત્યુત્તરયાહોરાત્રાભ્યામેવૈનમુદ્યચ્છતે
દેવા અગ્નિં ધારયન્દ્રવિણોદા ઇત્યાહ પ્રાણા વૈ દેવા દ્રવિણોદા
અહોરાત્રાભ્યામેવૈનમુદ્યત્ય

૫૫ પ્રાણૈર્દાધારાસીનઃ પ્રતિ મુઞ્ચતે તસ્માદાસીનાઃ પ્રજાઃ પ્ર જાયન્તે
કૃષ્ણાજિનમુત્તરં તેજો વૈ હિરણ્યં બ્રહ્મ કૃષ્ણાજિનં તેજસા
ચૈવૈનં બ્રહ્મણા ચોભયતઃ પરિ ગૃહ્ણાતિ ષડુદ્યામँ શિક્યં

ભવતિ ષડ્વા ઋતવ ઋતુભિરેવૈનમુદ્યચ્છતે યદ્દ્વાદશોદ્યામ૱

સંવથ્સરેણૈવ મૌઞ્જં ભવત્યૂર્ગ્વૈ મુઞ્જા ઊર્જૈવૈન૱ સમર્ધયતિ

સુપર્ણોઽસિ ગરુત્માનિત્યવેક્ષતે રૂપમેવાસ્યૈતન્મહિમાનં વ્યાચષ્ટે

દિવં ગચ્છ સુવઃ પતેત્યાહ સુવર્ગમેવૈનં લોકં ગમયતિ ॥ ૫। ૧। ૧૦॥

રક્ષાગ્સ્યૌદુંબરી આદિત્ય ઉદ્યત્ય સં ચતુર્વિ૱ શતિશ્ચ ॥ ૫। ૧। ૧૦॥

૫૬ સમિદ્ધો અઞ્જન્કૃદરં મતીનાં ઘૃતમગ્ને મધુમત્પિન્વમાનઃ । વાજી

વહન્વાજિનં જાતવેદો દેવાનાં વક્ષિ પ્રિયમા સધસ્થમ્ ॥ ઘૃતેનાઞ્જન્થ્સં

પથો દેવયાનાન્ પ્રજાનન્વાજ્યપ્યેતુ દેવાન્ । અનુ ત્વા સપ્તે પ્રદિશઃ સચન્તાગ્

સ્વધામસ્મૈ યજમાનાય ધેહિ ॥ ઈડ્યશ્ચાસિ વન્દ્યશ્ચ વાજિન્નાશુશ્ચાસિ

મેધ્યશ્ચ સપ્તે । અગ્નિષ્ટ્વા

૫૭ દેવૈર્વસુભિઃ સજોષાઃ પ્રીતં વહ્નિં વહતુ જાતવેદાઃ ॥ સ્તીર્ણં બર્‌હિઃ

સુષ્ટરીમા જુષાણોરુ પૃથુ પ્રથમાનં પૃથિવ્યામ્ । દેવેભિર્યુક્તમદિતિઃ

સજોષાઃ સ્યોનં કૃણ્વાના સુવિતે દધાતુ ॥ એતા ઉ વઃ સુભગા

વિશ્વરૂપા વિ પક્ષોભિઃ શ્રયમાણા ઉદાતૈઃ । ઋષ્વાઃ સતીઃ કવષઃ

શુંભમાના દ્વારો દેવીઃ સુપ્રાયણા ભવન્તુ ॥ અન્તરા મિત્રાવરુણા

ચરન્તી મુખં યજ્ઞાનામભિ સંવિદાને । ઉષાસા વા૱

૫૮ સુહિરણ્યે સુશિલ્પે ઋતસ્ય યોનાવિહ સાદયામિ ॥ પ્રથમા વા૱

સરથિના સુવર્ણા દેવૌ પશ્યન્તૌ ભુવનાનિ વિશ્વા । અપિપ્રયં

ચોદના વાં મિમાના હોતારા જ્યોતિઃ પ્રદિશા દિશન્તા ॥ આદિત્યૈર્નો

ભારતી વષ્ટુ યજ્ઞ૱ સરસ્વતી સહ રુદ્રૈર્ન આવીત્ । ઇડોપહૂતા વસુભિઃ

સજોષા યજ્ઞં નો દેવીરમૃતેષુ ધત્ત ॥ ત્વષ્ટા વીરં દેવકામં જજાન

ત્વષ્ટુરર્વા જાયત આશુરશ્વઃ ।

૫૯ ત્વષ્ટેદં વિશ્વં ભુવનં જજાન બહોઃ કર્તારમિહ યક્ષિ હોતઃ ॥

અશ્વો ઘૃતેન ત્મન્યા સમક્ત ઉપ દેવા૱ ઋતુશઃ પાથ એતુ ।

વનસ્પતિર્દેવલોકં પ્રજાનન્નગ્નિના હવ્યા સ્વદિતાનિ વક્ષત્ ॥

પ્રજાપતેસ્તપસા વાવૃધાનઃ સદ્યો જાતો દધિષે યજ્ઞમગ્ને ।

સ્વાહાકૃતેન હવિષા પુરોગા યાહિ સાધ્યા હવિરદન્તુ દેવાઃ ॥ ૫। ૧। ૧૧॥

અગ્નિષ્ટ્વા વામશ્વો દ્વિ ચત્વારિꣳશચ્ચ ॥ ૫। ૧। ૧૧॥

સાવિત્રાણિ વ્યૃદ્ધમુત્ક્રામ દેવસ્ય ખનતિ ક્રૂરં વારુણઃ
સપ્તભિરેકવિꣳશત્યા ષડ્ભિર્ન હ સ્મ સમિદ્ધો અઞ્જન્નેકાદશ ॥

સાવિત્રાણ્યુત્ક્રામ ક્રૂરં વારુણઃ પશવઃ સ્યુર્ન હ સ્મ નવ
પંચાશત્ ॥

સાવિત્રાણિ હવિરદન્તુ દેવાઃ ॥

## પઞ્ચમકાણ્ડે દ્વિતીયઃ પ્રશ્નઃ ૨

૧ વિષ્ણુમુખા વૈ દેવાશ્છન્દોભિરિમાꣳલ્લોકાનનપ
જય્યમભ્યજયન્ યદ્વિષ્ણુક્રમાન્ક્રમતે વિષ્ણુરેવ ભૂત્વા
યજમાનશ્છન્દોભિરિમાꣳલ્લોકાનનપજય્યમભિ જયતિ વિષ્ણોઃ
ક્રમોઽસ્યભિમાતિહેત્યાહ ગાયત્રી વૈ પૃથિવી ત્રૈષ્ટુભમન્તરિક્ષં
જાગતી દ્યૌરાનુષ્ટુભીર્દિશશ્છન્દોભિરેવેમાꣳલ્લોકાન્, યથાપૂર્વમભિ
જયતિ પ્રજાપતિરગ્નિમસૃજત સોઽસ્માથ્સૃષ્ટઃ
૨ પરાઙૈત્તમેતયાન્વૈદક્રન્દદિતિ તયા વૈ સોઽગ્નેઃ પ્રિયં ધામાવારુંધ
યદેતામન્વાહાગ્નેરેવૈતયા પ્રિયં ધામાવ રુંધ ઈશ્વરો વા એષ
પરાઙ્પ્રદઘો યો વિષ્ણુક્રમાન્ક્રમતે ચતસૃભિરા વર્તતે ચત્વારિ
છન્દાꣳસિ છન્દાꣳસિ ખલુ વા અગ્નેઃ પ્રિયા તનૂઃ પ્રિયામેવાસ્ય
તનુવમભિ
૩ પર્યાવર્તતે દક્ષિણા પર્યાવર્તતે સ્વમેવ વીર્યમનુ
પર્યાવર્તતે તસ્માદ્દક્ષિણોઽર્ધ આત્મનો વીર્યાવત્તરોઽથો
આદિત્યસ્યૈવાવૃતમનુ પર્યાવર્તતે શુનઃશેપમાજીગર્તિં
વરુણોઽગૃહ્ણાથ્સ એતાં વારુણીમપશ્યત્તયા વૈ સ આત્માનં
વરુણપાશાદમુઞ્ચદ્વરુણો વા એતં ગૃહ્ણાતિ ય ઉખાં પ્રતિમુઞ્ચત
ઉદુત્તમં વરુણપાશમસ્મદિત્યાહાત્માનમેવૈતયા

૪ વરુણપાશાન્મુઞ્ચત્યા ત્વાહાર્ષમિત્યાહાઢ્યેન ૅ હરતિ
ધ્રુવસ્તિષ્ઠાવિચાચલિરિત્યાહ પ્રતિષ્ઠિત્યૈ વિશસ્ત્વા
સર્વાવાઙ્છન્ત્વિત્યાહ વિશૈવૈન ૅ સમર્ધયત્યસ્મિન્રાષ્ટ્રમધિ
શ્રયેત્યાહ રાષ્ટ્રમેવાસ્મિન્ધ્રુવમકર્યં કામયેત રાષ્ટ્રર ૅ
સ્યાદિતિ તં મનસા ધ્યાયેદ્રાષ્ટ્રમેવ ભવ
૫ ત્યગ્રે બૃહન્નુષસામૂર્ધ્વો અસ્થાદિત્યાહાગ્રમેવૈન ૅ
સમાનાનાં કરોતિ નિર્જગ્મિવાન્તમસ ઇત્યાહ તમ એવાસ્માદપ હન્તિ
જ્યોતિષાગાદિત્યાહ જ્યોતિરેવાસ્મિન્દધાતિ ચતસૃભિઃ સાદયતિ ચત્વારિ
છન્દા ૅસિ છન્દોભિરેવાતિચ્છંદસોત્તમયા વર્ષ્મ વા એષા છંદસાં
યદતિચ્છન્દા વર્ષ્મૈવૈન ૅસમાનાનાં કરોતિ સદ્ભતી
૬ ભવતિ સત્ત્વમેવૈનં ગમયતિ વાથ્સપ્રેણોપ તિષ્ઠત એતેન વૈ
વથ્સપ્રીર્ભાલન્દનોઽગ્નેઃ પ્રિયં ધામાવારુંધાગ્નેરેવૈતેન પ્રિયં
ધામાવ રુંધ એકાદશં ભવત્યેકધૈવ યજમાને વીર્યં દધાતિ સ્તોમેન
વૈ દેવા અસ્મિઉ ૅ લ્લોક આર્ધ્રુવઙ્છન્દોભિરમુષ્મિન્થ્સ્તોમસ્યેવ ખલુ
વા એતદ્રૂપં યદ્વાથ્સપ્રં યદ્વાથ્સપ્રેણોપ તિષ્ઠત
૭ ઇમમેવ તેન લોકમભિ જયતિ યદ્વિષ્ણુક્રમાન્ક્રમતેઽમુમેવ
તૈર્લોકમભિ જયતિ પૂર્વેદ્યુઃ પ્ર ક્રામત્યુત્તરેદ્યુરુપ તિષ્ઠતે
તસ્માદ્યોગેઽન્યાસાં પ્રજાનાં મનઃ, ક્ષેમેઽન્યાસાં તસ્માદ્યાયાવરઃ,
ક્ષેમ્યસ્યેશે તસ્માદ્યાયાવરઃ, ક્ષેમ્યમધ્યવસ્યતિ મુષ્ટી કરોતિ
વાચં યચ્છતિ યજ્ઞસ્ય ધૃત્યૈ ॥ ૫। ૨। ૧॥ સૃષ્ટો(૧)ભ્યેતયા
ભવતિ સદ્ભત્યુપ તિષ્ઠતે દ્વિચત્વારિ ૅ શચ્ચ ॥ ૫। ૨। ૧॥
૮ અન્નપતેઽન્નસ્ય નો દેહીત્યાહાગ્નિર્વા અન્નપતિઃ સ એવાસ્મા અન્નં
પ્રયચ્છત્યનમીવસ્ય શુષ્મિણ ઇત્યાહાયક્ષ્મસ્યેતિ વાવૈતદાહ
પ્ર પ્રદાતારં તારિષ ઊર્જં નો ધેહિ દ્વિપદે ચતુષ્પદ
ઇત્યાહાશિષમેવૈતામા શાસ્ત ઉદુ ત્વા વિશ્વે દેવા ઇત્યાહ પ્રાણા વૈ
વિશ્વે દેવાઃ
૯ પ્રાણૈરેવૈનમુદ્યચ્છતેઽગ્ને ભરન્તુ ચિત્તિભિરિત્યાહ યસ્મા

એવૈનં ચિત્તાયોધચ્છતે તેનૈવૈન ઁ સમર્ધયતિ ચતસૃભિરા
સાદયતિ ચત્વારિ છન્દા ઁસિ છન્દોભિરેવાતિચ્છંદસોત્તમયા વર્ષ્મ
વા એષા છંદસાં યદતિચ્છન્દા વર્ષ્મૈવૈન ઁસમાનાનાં કરોતિ
સદ્વતી ભવતિ સત્ત્વમેવૈનં ગમયતિ પ્રેદગ્ને જ્યોતિષ્માન્
૧૦ યાહીત્યાહ જ્યોતિરેવાસ્મિન્દધાતિ તનુવા વા એષ હિનસ્તિ
ય ઁ હિનસ્તિ મા હિ ઁસીસ્તનુવા પ્રજા ઇત્યાહ પ્રજાભ્ય
એવૈન ઁશમયતિ રક્ષા ઁસિ વા એતદ્યજ્ઞ ઁ સચન્તે
યદન ઉથ્સર્જત્યક્રન્દદિત્યન્વાહ રક્ષસામપહત્યા
અનસા વહન્ત્યપચિતિમેવાસ્મિન્દધાતિ તસ્માદનસ્વી ચ રથી
ચાતિથીનામપચિતતમા
૧૧ વપચિતિમાન્ભવતિ ય એવં વેદ સમિધાગ્નિં દુવસ્યતેતિ
ઘૃતાનુષિક્તામવસિતે સમિધમા દધાતિ યથાતિથય આગતાય
સર્પિષ્વદાતિથ્યં ક્રિયતે તાદૃગેવ તદ્ગાયત્રિયા બ્રાહ્મણસ્ય ગાયત્રો
હિ બ્રાહ્મણસ્ત્રિષ્ટુભા રાજન્યસ્ય ત્રૈષ્ટુભો હિ રાજન્યોઽપ્સુ ભસ્મ
પ્ર વેશયત્યપ્સુયોનિર્વા અગ્નિઃ સ્વામેવૈનં યોનિં ગમયતિ તિસૃભિઃ
પ્ર વેશયતિ ત્રિવૃદ્વા
૧૨ અગ્નિર્યાવાનેવાગ્નિસ્તં પ્રતિષ્ઠાં ગમયતિ પરા વા એષોઽગ્નિં
વપતિ યોઽપ્સુ ભસ્મ પ્રવેશયતિ જ્યોતિષ્મતીભ્યામવ દધાતિ
જ્યોતિરેવાસ્મિન્દધાતિ દ્વાભ્યાં પ્રતિષ્ઠિત્યૈ પરા વા એષ પ્રજાં
પશૂન્, વપતિ યોઽપ્સુ ભસ્મ પ્રવેશયતિ પુનરૂર્જા સહ રય્યેતિ
પુનરુદૈતિ પ્રજામેવ પશૂનાત્મન્ધત્તે પુનસ્ત્વાદિત્યા
૧૩ રુદ્રા વસવઃ સમિન્ધતામિત્યાહૈતા વા એતં દેવતા અગ્રે
સમૈન્ધત તાભિરેવૈન ઁ સમિન્ધે બોધા સ બોધીત્યુપ તિષ્ઠતે
બોધયત્યેવૈનં તસ્માથ્સુપ્ત્વા પ્રજાઃ પ્ર બુધ્યન્તે યથાસ્થાનમુપ
તિષ્ઠતે તસ્માદ્યથાસ્થાનં પશવઃ પુનરેત્યોપ તિષ્ઠન્તે ॥ ૫। ૨। ૨॥ વૈ
વિશ્વે દેવા જ્યોતિષ્માનપચિતતમૌ ત્રિવૃદ્વા આદિત્યા દ્વિચત્વારિ ઁ શચ્ચ
॥ ૫। ૨। ૨॥

૧૪ યાવતી  વૈ પૃથિવી તસ્યૈ  યમ આધિપત્યં  પરીયાય  યો વૈ
યમં દેવયજનમસ્યા અનિર્યાચ્યાગ્નિં ચિનુતે યમાયૈન ઁ
સ ચિનુતેઽપેતેત્યધ્યવસાયયતિ યમમેવ દેવયજનમસ્યૈ
નિર્યાચ્યાત્મનેઽગ્નિં ચિનુત ઇષ્વગ્રેણ  વા અસ્યા અનામૃતમિચ્છન્તો
નાવિન્દન્તે દેવા એતદ્યજુરપશ્યન્નપેતેતિ  યદેતેનાધ્યવસાયયત્ય

૧૫ નામૃત એવાગ્નિં ચિનુત  ઉદ્ધન્તિ  યદેવાસ્યા  અમેધ્યં તદપ
હન્ત્યપોઽવોક્ષતિ  શાન્ત્યૈ  સિકતાનિ વપત્યેતદ્વા અગ્નેર્વૈશ્વાનરસ્ય
રૂપ ઁ રૂપેણૈવ વૈશ્વાનરમવ  રુંધ  ઊષાન્નિ વપતિ  પુષ્ટિર્વા
એષા પ્રજનનં  યદૂષાઃ  પુષ્ટ્યામેવ પ્રજનનેઽગ્નિં ચિનુતેઽથો
સંજ્ઞાન  એવ સંજ્ઞાનગ્ગ્  હ્યેતત્

૧૬ પશૂનાં યદૂષા  દ્યાવાપૃથિવી સહાસ્તાં  તે વિયતી અબ્રૂતામસ્ત્વેવ
નૌ  સહ યજ્ઞિયમિતિ  યદમુષ્યા  યજ્ઞિયમાસીત્તદસ્યામદધાત્ત ઊષા
અભવન્  યદસ્યા યજ્ઞિયમાસીત્તદમુષ્યામદધાત્તદદશ્ચન્દ્રમસિ
કૃષ્ણમૂષાન્નિવપન્નદો ધ્યાયેદ્દ્યાવાપૃથિવ્યોરેવ યજ્ઞિયેઽગ્નિં
ચિનુતેઽય ઁ સો અગ્નિરિતિ  વિશ્વામિત્રસ્ય

૧૭ સૂક્તં ભવત્યેતેન  વૈ વિશ્વામિત્રોઽગ્નેઃ પ્રિયં
ધામાવારુંધાગ્નેરેવૈતેન  પ્રિયં ધામાવ  રુંધે  છન્દોભિર્વૈ દેવાઃ
સુવર્ગઁ લોકમાયઞ્ચતસ્રઃ  પ્રાચીરુપ  દધાતિ ચત્વારિ
છન્દા ઁસિ  છન્દોભિરેવ તદ્યજમાનઃ સુવર્ગઁ લોકમેતિ  તેષા ઁ
સુવર્ગઁ લોકં યતાં દિશઃ  સમવ્લીયન્ત  તે દ્વે પુરસ્તાત્સમીચી
ઉપાદધત

૧૮ દ્વે પશ્ચાત્સમીચી  તાભિર્વૈ તે દિશોઽદૃ ઁહન્  યદ્વે
પુરસ્તાત્સમીચી  ઉપદધાતિ  દ્વે પશ્ચાત્સમીચી  દિશાં વિધૃત્યા
અથો  પશવો  વૈ છન્દા ઁસિ પશૂનેવાસ્મૈ  સમીચો  દધાત્યષ્ટાવુપ
દધાત્યષ્ટાક્ષરા ગાયત્રી ગાયત્રોઽગ્નિર્યાવાનેવાગ્નિસ્તં ચિનુતેઽષ્ટાવુપ
દધાત્યષ્ટાક્ષરા ગાયત્રી ગાયત્રી સુવર્ગઁ લોકમઞ્જસા વેદ સુવર્ગસ્ય
લોકસ્ય

૧૯ પ્રજ્ઞાત્યૈ ત્રયોદશ લોકં પૃણા ઉપ દધાત્યેકવિ ँ શતિઃ સં પદ્યન્તે
પ્રતિષ્ઠા વા એકવિ ँ શઃ પ્રતિષ્ઠા ગાર્હપત્ય એકવિ ँ શસ્યૈવ
પ્રતિષ્ઠાં ગાર્હપત્યમનુ પ્રતિ તિષ્ઠતિ પ્રત્યગ્નિં ચિક્યાનસ્તિષ્ઠતિ
ય એવં વેદ પઞ્ચ ચિતીકં ચિન્વીત પ્રથમં ચિન્વાનઃ પાઙ્ક્તો યજ્ઞઃ
પાઙ્ક્તાઃ પશવો યજ્ઞમેવ પશૂનવ રુંધે ત્રિ ચિતીકં ચિન્વીત દ્વિતીયં
ચિન્વાનસ્ત્રય ઇમે લોકા એષ્વેવ લોકેષુ
૨૦ પ્રતિ તિષ્ઠત્યેક ચિતીકં ચિન્વીત તૃતીયં ચિન્વાન એકધા વૈ
સુવર્ગો લોક એકવૃતૈવ સુવર્ગ૩ ँ લોકમેતિ પુરીષેણાભ્યૂહતિ
તસ્માન્મા ँ સેનાસ્થિ છન્નં ન દુશ્ચર્મા ભવતિ ય એવં વેદ પઞ્ચ
ચિતયો ભવન્તિ પઞ્ચભિઃ પુરીષૈરભ્યૂહતિ દશ સં પદ્યન્તે
દશાક્ષરા વિરાડન્નં વિરાડ્વિરાજ્યેવાન્નાદ્યે પ્રતિ તિષ્ઠતિ ॥ ૫। ૨। ૩॥
અધ્યવસાયયતિ હ્યેતદ્વિશ્વામિત્રસ્યાડદધત દ્વે લોકસ્ય લોકેષુ
સપ્તચત્વારિ ँ શચ્ચ ॥ ૫। ૨। ૩॥
૨૧ વિ વા એતૌ દ્વિષાતે યશ્ચ પુરાગ્નિર્યશ્ચોખાયા ँ સમિતમિતિ
ચતસૃભિઃ સં નિ વપતિ ચત્વારિ છન્દા ँ સિ છન્દા ँ સિ ખલુ વા
અગ્નેઃ પ્રિયા તનૂઃ પ્રિયયૈવૈનૌ તનુવા સ ँ શાસ્તિ સમિતમિત્યાહ
તસ્માદ્બ્રહ્મણા ક્ષત્ર ँ સમેતિ યથ્સં ન્યુપ્ય વિ હરતિ તસ્માદ્બ્રહ્મણા
ક્ષત્રં વ્યેત્યૃતુભિ
૨૨ ર્વા એતં દીક્ષયન્તિ સ ઋતુભિરેવ વિમુચ્યો માતેવ પુત્રં પૃથિવી
પુરીષ્યમિત્યાહર્તુભિરેવૈનં દીક્ષયિત્વર્તુભિર્વિ મુઞ્ચતિ વૈશ્વાનર્યા
શિક્યમા દત્તે સ્વદયત્યેવૈનન્નૈરૃતીઃ કૃષ્ણાસ્તિસ્રસ્તુષપક્વા
ભવન્તિ નિરૃત્યૈ વા એતદ્ભાગધેયં યત્તુષા નિરૃત્યૈ રૂપં
કૃષ્ણ ँ રૂપેણૈવ નિરૃતિં નિરવદયત ઇમાં દિશં યન્ત્યેષા
૨૩ વૈ નિરૃત્યૈ દિક્સ્વાયામેવ દિશિ નિરૃતિં નિરવદયતે સ્વકૃત
ઇરિણ ઉપ દધાતિ પ્રદરે વૈતદ્વૈ નિરૃત્યા આયતનઙ્ગ્ સ્વ એવાયતને
નિરૃતિં નિરવદયતે શિક્યમભ્યુપ દધાતિ નૈરૃતો વૈ પાશઃ
સાક્ષાદેવૈનં નિરૃતિપાશાન્મુઞ્ચતિ તિસ્ર ઉપ દધાતિ ત્રેધાવિહિતો વૈ

પુરુષો યાવાનેવ પુરુષસ્તસ્માન્નિરૃતિમવ યજતે પરાચીરુપ
૨૪ દધાતિ પરાચીમેવાસ્માન્નિરૃતિં પ્ર ણુદતેઽપ્રતીક્ષમા યન્તિ
નિરૃત્યા અન્તર્હિત્યૈ માર્જયિત્વોપ તિષ્ઠન્તે મેધ્યત્વાય ગાર્હપત્યમુપ
તિષ્ઠન્તે નિરૃતિલોક એવ ચરિત્વા પૂતા દેવલોકમુપાવર્તન્ત એકયોપ
તિષ્ઠન્ત એકધૈવ યજમાને વીર્યં દધતિ નિવેશનઃ સઙ્ગમનો
વસૂનામિત્યાહ પ્રજા વૈ પશવો વસુ પ્રજયૈવૈનં પશુભિઃ
સમર્ધયન્તિ ॥ ૫। ૨। ૪॥ ઋતુભિરેષા પરાચીરુપાઽષ્ટા ચત્વારિꣳ શચ્ચ
॥ ૫। ૨। ૪॥

૨૫ પુરુષમાત્રેણ વિ મિમીતે યજ્ઞેન વૈ પુરુષઃ
સંમિતો યજ્ઞપરુષૈવૈનં વિ મિમીતે યાવાન્પુરુષ
ઊર્ધ્વબાહુસ્તાવાન્ભવત્યેતાવદ્વૈ પુરુષે વીર્યં વીર્યેણૈવૈનં
વિ મિમીતે પક્ષી ભવતિ ન હ્યપક્ષઃ પતિતુમર્હત્યરત્નિના પક્ષૌ
દ્રાઘીયાꣳસૌ ભવતસ્તસ્માત્પક્ષપ્રવયાꣳસિ વયાꣳસિ વ્યામમાત્રૌ
પક્ષૌ ચ પુચ્છં ચ ભવત્યેતાવદ્વૈ પુરુષે વીર્યં
૨૬ વીર્યસંમિતો વેણુના વિ મિમીત આગ્નેયો વૈ વેણુઃ સયોનિત્વાય યજુષા
યુનક્તિ યજુષા કૃષતિ વ્યાવૃત્ત્યૈ ષડ્ગવેન કૃષતિ ષડ્વા ઋતવ
ઋતુભિરેવૈનં કૃષતિ યદ્દ્વાદશ ગવેન સંવત્સરેણૈવેયં વા
અગ્નેરતિ દાહાદબિભેત્સૈતદ્ દ્વિગુણમપશ્યત્ કૃષ્ટં ચાકૃષ્ટં ચ
તતો વા ઇમાં નાત્યદહદ્યત્કૃષ્ટં ચાકૃષ્ટં ચ
૨૭ ભવત્યસ્યા અનતિદાહાય દ્વિગુણં ત્વા અગ્નિમુદ્યન્તુમર્હતીત્યાહુર્યત્કૃષ્ટં
ચાકૃષ્ટં ચ ભવત્યગ્નેરુદ્યત્યા એતાવન્તો વૈ પશવો દ્વિપાદશ્ચ
ચતુષ્પાદશ્ચ તાન્, યત્પ્રાચ ઉત્સૃજેદ્રુદ્રાયાપિ દધ્યાદ્યદ્દક્ષિણા
પિતૃભ્યો નિ ધુવેદ્યત્પ્રતીચો રક્ષાꣳસિ હન્યુરુદીચ ઉત્સૃજત્યેષા
વૈ દેવમનુષ્યાણાꣳશાન્તા દિક્
૨૮ તામેવૈનાનનૂત્સૃજત્યથો ખલ્વિમાં દિશમુત્સૃજત્યસૌ વા
આદિત્યઃ પ્રાણઃ પ્રાણમેવૈનાનનૂત્સૃજતિ દક્ષિણા પર્યાવર્તન્તે
સ્વમેવ વીર્યમનુ પર્યાવર્તન્તે તસ્માદ્દક્ષિણોઽર્ધ આત્મનો

વીર્યાવત્તરોઽથો આદિત્યસ્યૈવાવૃતમનુ પર્યાવર્તન્તે તસ્માત્પરાઞ્ચઃ
પશવો વિ તિષ્ઠન્તે પ્રત્યઞ્ચ આ વર્તન્તે તિસ્રસ્તિસ્રઃ સીતાઃ
૨૯ કૃષતિ ત્રિવૃતમેવ યજ્ઞમુખે વિ યાતયત્યોષધીર્વપતિ
બ્રહ્મણાન્નમવ રુંધેઽર્કેઽર્કશ્ચીયતે ચતુર્દશભિર્વપતિ સપ્ત
ગ્રામ્યા ઓષધયઃ સપ્તારણ્યા ઉભયીષામવરુદ્ધ્યા અન્નસ્યાન્નસ્ય
વપત્યન્નસ્યાન્નસ્યાવરુદ્ધ્યૈ કૃષ્ટે વપતિ કૃષ્ટે હ્યોષધયઃ પ્રતિ
તિષ્ઠન્ત્યનુ સીતં વપતિ પ્રજાત્યૈ દ્વાદશસુ સીતાસુ વપતિ દ્વાદશ
માસાઃ સંવથ્સરઃ સંવથ્સરેણૈવાસ્મા અન્નં પચતિ યદગ્નિચિ
૩૦ દનવરુદ્ધસ્યાશ્નીયાદવરુદ્ધેન વ્યૃધ્યેત યે વનસ્પતીનાં
ફલગ્રહયસ્તાનિધ્મેઽપિ પ્રોક્ષેદનવરુદ્ધસ્યાવરુદ્ધ્યૈ દિગ્ભ્યો
લોષ્ટાન્થ્સમસ્યતિ દિશામેવ વીર્યમવરુધ્ય દિશાં વીર્યેઽગ્નિં ચિનુતે
યં દ્વિષ્યાદ્યત્ર સ સ્યાત્તસ્યૈ દિશો લોષ્ટમા હરેદિષમૂર્જમહમિત આ
દદ ઇતીષમેવોર્જં તસ્યૈ દિશોઽવ રુંધે ક્ષોધુકો ભવતિ યસ્તસ્યાં
દિશિ ભવત્યુત્તરવેદિમુપ વપત્યુત્તરવેદ્યાગ્ હ્યગ્નિશ્ચીયતેઽથો પશવો
વા ઉત્તરવેદિઃ પશૂનેવાવ રુંધેઽથો યજ્ઞપરુષોઽનન્તરિત્યૈ ॥ ૫। ૨। ૫॥ ચ ભવત્યેતાવદ્વૈ પુરુષે વીર્યં યત્કૃષ્ટ
ચાઽકૃષ્ટં ચ
દિખ્સીતા અગ્નિ ચિદ્વ પંચ વિꣳશતિશ્ચ ॥ ૫। ૨। ૫॥
૩૧ અગ્ને તવ શ્રવો વય ઇતિ સિકતા નિ વપત્યેતદ્વા અગ્નેર્વૈશ્વાનરસ્ય
સૂક્તꣳ સૂક્તેનૈવ વૈશ્વાનરમવ રુંધે ષડ્ભિર્નિ વપતિ
ષડ્વા ઋતવઃ સંવથ્સરઃ સંવથ્સરોઽગ્નિર્વૈશ્વાનરઃ સાક્ષાદેવ
વૈશ્વાનરમવ રુંધે સમુદ્રં વૈ નામૈતચ્છંદઃ સમુદ્રમનુ પ્રજાઃ પ્ર
જાયન્તે યદેતેન સિકતાનિ વપતિ પ્રજાનાં પ્રજનનાયેન્દ્રો
૩૨ વૃત્રાય વજ્રં પ્રાહરથ્સ ત્રેધા વ્યભવત્ સ્ફ્યસ્તૃતીયꣳ
રથસ્તૃતીયં યૂપસ્તૃતીયં યેઽન્તઃ શરા અશીર્યન્ત
તાઃ શર્કરા અભવન્તચ્છર્કરાણાꣳ શર્કરત્વં વજ્રો વૈ શર્કરાઃ
પશુરગ્નિર્યચ્છર્કરાભિરગ્નિં પરિ મિનોતિ વજ્રેણૈવાસ્મૈ પશૂન્પરિ
ગૃહ્ણાતિ તસ્માદ્વજ્રેણ પશવઃ પરિ ગૃહીતાસ્તસ્માત્ સ્થેયાનસ્થેયસો

નોપ હરતે ત્રિ સપ્તાભિઃ પશુકામસ્ય

૩૩ પરિ મિનુયાથ્સપ્ત વૈ શીર્ષણ્યાઃ પ્રાણાઃ પ્રાણાઃ પશવઃ
પ્રાણૈરેવાસ્મૈ પશૂનવ રુંધે ત્રિણવાભિર્ભ્રાતૃવ્યવતસ્ત્રિવૃતમેવ
વજ ઁસંભૃત્ય ભ્રાતૃવ્યાય પ્ર હરતિ સ્તૃત્યા અપરિમિતાભિઃ
પરિ મિનુયાદપરિમિતસ્યાવરુદ્ધ્યૈ યં કામયેતાપશુઃ સ્યાદિત્યપરિમિત્ય
તસ્ય શર્કરાઃ સિકતા વ્યૂહેદપરિગૃહીત એવાસ્ય વિષૂચીન ઁ
રેતઃ પરા સિઞ્ચત્યપશુરેવ ભવતિ

૩૪ યં કામયેત પશુમાન્થ્સ્યાદિતિ પરિમિત્ય તસ્ય શર્કરાઃ સિકતા
વ્યૂહેત્પરિગૃહીત એવાસ્મૈ સમીચીન ઁ રેતઃ સિઞ્ચતિ પશુમાનેવ
ભવતિ સૌમ્યા વ્યૂહતિ સોમો વૈ રેતોધા રેત એવ તદ્ધાતિ ગાયત્રિયા
બ્રાહ્મણસ્ય ગાયત્રો હિ બ્રાહ્મણસ્ત્રિષ્ટુભા રાજન્યસ્ય ત્રૈષ્ટુભો
હિ રાજન્યઃ શંયું બાર્હસ્પત્યં મેધો નોપાનમથ્સોઽગ્નિં પ્રાવિશ

૩૫ થ્સોઽગ્નેઃ કૃષ્ણો રૂપં કૃત્વોદાયત સોઽશ્વં પ્રાવિશત્
સોઽશ્વસ્યાવાન્તરશફોઽભવદ્યદશ્વમાક્રમયતિ ય એવ
મેધોઽશ્વં પ્રાવિશત્તમેવાવ રુંધે પ્રજાપતિનાગ્નિશ્ચેતવ્ય
ઇત્યાહુઃ પ્રાજાપત્યોઽશ્વો યદશ્વમાક્રમયતિ પ્રજાપતિનૈવાગ્નિં
ચિનુતે પુષ્કરપર્ણમુપ દધાતિ યોનિર્વા અગ્નેઃ પુષ્કરપર્ણ ઁ
સયોનિમેવાગ્નિં ચિનુતેઽપાં પૃષ્ઠમસીત્યુપ દધાત્યપાં વા એતત્પૃષ્ઠં
યત્પુષ્કરપર્ણ ઁ રૂપેણૈવૈનદુપ દધાતિ ॥ ૫। ૨। ૬॥ ઇંદ્રઃ પશુકામસ્ય
ભવત્યવિશથ્સયોનિં વિ ઁ શતિશ્ચ ॥ ૫। ૨। ૬॥

૩૬ બ્રહ્મ જજ્ઞાનમિતિ રુક્મમુપ દધાતિ બ્રહ્મમુખા વૈ પ્રજાપતિઃ પ્રજા
અસૃજત બ્રહ્મમુખા એવ તત્પ્રજા યજમાનઃ સૃજતે બ્રહ્મ જજ્ઞાનમિત્યાહ
તસ્માદ્બ્રાહ્મણો મુખ્યો મુખ્યો ભવતિ ય એવં વેદ બ્રહ્મવાદિનો વદન્તિ
ન પૃથિવ્યાં નાંતરિક્ષે ન દિવ્યગ્નિશ્ચેતવ્ય ઇતિ યત્પૃથિવ્યાં
ચિન્વીત પૃથિવી ઁ શુચાર્પયેન્નૌષધયો ન વનસ્પતયઃ

૩૭ પ્ર જાયેરન્ યદન્તરિક્ષે ચિન્વીતાન્તરિક્ષ ઁ શુચાર્પયેન્ન
વયા ઁસિ પ્ર જાયેરન્ યદ્દિવિ ચિન્વીત દિવ ઁશુચાર્પયેન્ન

પર્જન્યો વર્ષેદ્રુક્મમુપ દધાત્યમૃતં વૈ હિરણ્યમમૃત એવાગ્નિં
ચિનુતે પ્રજાત્યૈ હિરણ્મયં પુરુષમુપ દધાતિ યજમાનલોકસ્ય
વિધૃત્યૈ યદિષ્ટકાયા આતૃણ્ણમનૂપદધ્યાત્પશૂનાં ચ યજમાનસ્ય
ચ પ્રાણમપિ દધ્યાદ્દક્ષિણતઃ

૩૮ પ્રાઞ્ચમુપ દધાતિ દાધાર યજમાનલોકં ન પશૂનાં ચ યજમાનસ્ય
ચ પ્રાણમપિ દધાત્યથો ખલ્વિષ્ટકાયા આતૃણ્ણમનૂપ દધાતિ
પ્રાણાનામુત્સૃષ્ટ્યૈ દ્રપ્સશ્ચસ્કન્દેત્યભિ મૃશતિ હોત્રાસ્વેવૈનં
પ્રતિષ્ઠાપયતિ સ્રુચાવુપ દધાત્યાજ્યસ્ય પૂર્ણાં કાર્ષ્મર્યમયીં દધ્નઃ
પૂર્ણામૌદુંબરીમિયં વૈ કાર્ષ્મર્યમય્યસાવૌદુંબરીમે એવોપ ધત્તે

૩૯ તૂષ્ણીમુપ દધાતિ ન હી મે યજુષાપ્તુમર્હતિ દક્ષિણાં
કાર્ષ્મર્યમયીમુત્તરામૌદુંબરીં તસ્માદસ્યા અસાવુત્તરાજ્યસ્ય પૂર્ણાં
કાર્ષ્મર્યમયીં વજ્રો વા આજ્યં વજ્રઃ કાર્ષ્મર્ ્યો વજ્રેણૈવ યજ્ઞસ્ય
દક્ષિણતો રક્ષાગ્ંસ્યપ હન્તિ દધ્નઃ પૂર્ણામૌદુંબરીં પશવો વૈ
દધ્યૂર્ગુદુંબરઃ પશુષ્વેવોર્જં દધાતિ પૂર્ણે ઉપ દધાતિ પૂર્ણે એવૈન

૪૦ મમુષ્મિઉँ લ્લોક ઉપ તિષ્ઠતે વિરાજ્યગ્નિશ્ચેતવ્ય ઇત્યાહુઃ સ્રુગ્વૈ
વિરાડ્યથ્સ્રુચાવુપ દધાતિ વિરાજ્યેવાગ્નિં ચિનુતે યજ્ઞમુખે યજ્ઞમુખે વૈ
ક્રિયમાણે યજ્ઞँ રક્ષાँસિ જિઘાँસન્તિ યજ્ઞમુખँ રુક્મો યદ્રુક્મં
વ્યાઘારયતિ યજ્ઞમુખાદેવ રક્ષાગ્ંસ્યપ હન્તિ પઞ્ચભિર્વ્યાઘારયતિ
પાઙ્ક્તો યજ્ઞો યાવાનેવ યજ્ઞસ્તસ્માદ્રક્ષાગ્ંસ્યપ હન્ત્યક્ષ્ણયા
વ્યાઘારયતિ તસ્માદક્ષ્ણયા પશવોઽઙ્ગાનિ પ્ર હરન્તિ પ્રતિષ્ઠિત્યૈ ॥ ૫। ૨। ૭॥ વનસ્પતયો દક્ષિણતો ધત્ત
એનં તસ્માદક્ષ્ણયા પંચ ચ ॥ ૫। ૨। ૭॥

૪૧ સ્વયમાતૃણ્ણામુપ દધાતીયં વૈ સ્વયમાતૃણ્ણેમામેવોપ
ધત્તેઽશ્વમુપ ઘ્રાપયતિ પ્રાણમેવાસ્યાં દધાત્યથો પ્રાજાપત્યો વા
અશ્વઃ પ્રજાપતિનૈવાગ્નિં ચિનુતે પ્રથમેષ્ટકોપધીયમાના પશૂનાં ચ
યજમાનસ્ય ચ પ્રાણમપિ દધાતિ સ્વયમાતૃણ્ણા ભવતિ પ્રાણાનામુત્સૃષ્ટ્યા
અથો સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યા અગ્નાવગ્નિશ્ચેતવ્ય ઇત્યાહુરેષ વા

૪૨ અગ્નિર્વૈશ્વાનરો યદ્બ્રાહ્મણસ્તસ્મૈ પ્રથમામિષ્ટકાં યજુષ્કૃતાં

પ્ર યચ્છેત્તાં બ્રાહ્મણશ્ચોપ દધ્યાતામગ્રાવેવ તદગ્નિં ચિનુત ઈશ્વરો
વા એષ આર્તિમાર્તોર્યોઽવિદ્વાનિષ્ટકામુપ દધાતિ ત્રીન્, વરાન્દદ્યાત્ત્રયો
વૈ પ્રાણાઃ પ્રાણાનાગ્ં સ્તૃત્યૈ દ્વાવેવ દેયૌ દ્વૌ હિ પ્રાણાવેક એવ દેય
એકો હિ પ્રાણઃ પશુ

૪૩ ર્વા એષ યદગ્નિર્ન ખલુ વૈ પશવ આયવસે રમન્તે દૂર્વેષ્ટકામુપ દધાતિ
પશૂનાં ધૃત્યૈ દ્વાભ્યાં પ્રતિષ્ઠિત્યૈ કાણ્ડાત્કાણ્ડાત્પ્રરોહન્તીત્યાહ
કાણ્ડેન કાણ્ડેન હ્યેષા પ્રતિતિષ્ઠત્યેવા નો દૂર્વે પ્રતનુ સહસ્રેણ
શતેન ચેત્યાહ સાહસ્રઃ પ્રજાપતિઃ પ્રજાપતેરાપ્ત્યૈ દેવલક્ષ્મં વૈ
ત્ર્યાલિખિતા તામુત્તરલક્ષ્માણં દેવા ઉપાદધતાધરલક્ષ્માણમસુરા યં

૪૪ કામયેત વસીયાન્થ્સ્યાદિત્યુત્તરલક્ષ્માણં તસ્યોપ દધ્યાદ્વસીયાનેવ
ભવતિ યં કામયેત પાપીયાન્થ્સ્યાદિત્યધરલક્ષ્માણં
તસ્યોપ દધ્યાદસુરયોનિમેવૈનમનુ પરા ભાવયતિ પાપીયાન્ભવતિ
ત્ર્યાલિખિતા ભવતીમે વૈ લોકાસ્ત્ર્યાલિખિતૈભ્ય એવ લોકેભ્યો
ભ્રાતૃવ્યમન્તરેત્યંગિરસઃ સુવર્ગꣳ લોકં યતઃ પુરોડાશઃ કૂર્મો
ભૂત્વાનુ પ્રાસર્પ

૪૫ દ્યત્કૂર્મમુપદધાતિ યથા ક્ષેત્રવિદઞ્જસા નયત્યેવમેવૈનં
કૂર્મઃ સુવર્ગં લોકમઞ્જસા નયતિ મેધો વા એષ પશૂનાં યત્કૂર્મો
યત્કૂર્મમુપદધાતિ સ્વમેવ મેધં પશ્યન્તઃ પશવ ઉપ તિષ્ઠન્તે
શ્મશાનં વા એતત્ક્રિયતે યન્મૃતાનાં પશૂનાꣳ શીર્ષાણ્યુપધીયન્તે
યજ્જીવન્તં કૂર્મમુપદધાતિ તેનાશ્મશાનચિદ્વાસ્તવ્યો વા એષ યત્

૪૬ કૂર્મો મધુ વાતા ઋતાયત ઇતિ દધ્નામધુમિશ્રેણાભ્યનક્તિ
સ્વદયત્યેવૈનં ગ્રામ્યં વા એતદન્નં યદ્દધ્યારણ્યં મધુ યદ્દધ્ના
મધુમિશ્રેણાભ્યનક્ત્યુભયસ્યાવરુદ્ધ્યૈ મહી દ્યૌઃ પૃથિવી ચ
ન ઇત્યાહાભ્યામેવૈનમુભયતઃ પરિ ગૃહ્ણાતિ પ્રાઞ્ચમુપ દધાતિ
સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ પુરસ્તાત્પ્રત્યઞ્ચમુપ દધાતિ તસ્માત્

૪૭ પુરસ્તાત્પ્રત્યઞ્ચઃ પશવો મેધમુપ તિષ્ઠન્તે યો
વા અપનાભિમગ્નિં ચિનુતે યજમાનસ્ય નાભિમનુ પ્ર વિશતિ સ

એનમીશ્વરો હિ ૅ સિતોરુલૂખલમુપ દધાત્યેષા વા અગ્નેર્નાભિઃ
સનાભિમેવાગ્નિં ચિનુતે હિ ૅ સાયા ઔદુંબરં ભવત્યૂર્ગ્વા ઉદુંબર
ઊર્જમેવાવ રુંધે મધ્યત ઉપ દધાતિ મધ્યત એવાસ્મા ઊર્જં દધાતિ
તસ્માન્મધ્યત ઊર્જા ભુઞ્જત ઇયદ્ભવતિ પ્રજાપતિના યજ્ઞમુખેન
સંમિતમવ હન્ત્યન્નમેવાકર્વૈષ્ણવ્યર્ચોપ દધાતિ વિષ્ણુર્વૈ યજ્ઞો
વૈષ્ણવા વનસ્પતયો યજ્ઞ એવ યજ્ઞં પ્રતિષ્ઠાપયતિ ॥ ૫। ૨। ૮॥ એષ
વૈ પશુર્યમસર્પદેષ યત્તસ્માત્તસ્માથ્સમવિ ૅ શતિશ્ચ ॥ ૫। ૨। ૮॥

૪૮ એષાં વા એતલ્લોકાનાં જ્યોતિઃ સંભૃતં યદુખા
યદુખામુપદધાત્યેભ્ય એવ લોકેભ્યો જ્યોતિરવ રુંધે મધ્યત ઉપ દધાતિ
મધ્યત એવાસ્મૈ જ્યોતિર્દધાતિ તસ્માન્મધ્યતો જ્યોતિરુપાસ્મહે સિકતાભિઃ
પૂરયત્યેતદ્વા અગ્નેર્વૈશ્વાનરસ્ય રૂપ ૅ રૂપેણૈવ વૈશ્વાનરમવ
રુંધે યં કામયેત ક્ષોધુકઃ સ્યાદિત્યૂનાં તસ્યોપ

૪૯ દધ્યાત્ક્ષોધુક એવ ભવતિ યં કામયેતાનુપદસ્યદન્નમદ્યાદિતિ
પૂર્ણાં તસ્યોપ દધ્યાદનુપદસ્યદેવાન્નમત્તિ સહસ્રં વૈ પ્રતિ પુરુષઃ
પશૂનાં યચ્છતિ સહસ્રમન્યે પશવો મધ્યે પુરુષશીર્ષમુપ દધાતિ
સવીર્યત્વાયોખાયામપિ દધાતિ પ્રતિષ્ઠામેવૈનદ્ગમયતિ વ્યૃદ્ધં વા
એતત્પ્રાણૈરમેધ્યં યત્પુરુષશીર્ષમમૃતં ખલુ વૈ પ્રાણા

૫૦ અમૃત ૅ હિરણ્યં પ્રાણેષુ હિરણ્યશલ્કાન્પ્રત્યસ્યતિ
પ્રતિષ્ઠામેવૈનદ્ગમયિત્વા પ્રાણૈઃ સમર્ધયતિ દધ્ના મધુમિશ્રેણ
પૂરયતિ મધવ્યોઽસાનીતિ શ૱તાતઙ્ક્યેન મેધ્યત્વાય ગ્રામ્યં વા એતદન્નં
યદ્ધ્યારણ્યં મધુ યદ્દધ્ના મધુમિશ્રેણ પૂરયત્યુભયસ્યાવરુદ્ધ્યૈ
પશુશીર્ષાણ્યુપ દધાતિ પશવો વૈ પશુશીર્ષાણિ પશૂનેવાવ
રુંધે યં કામયેતાપશુઃ સ્યાદિતિ

૫૧ વિષૂચીનાનિ તસ્યોપ દધ્યાદ્વિષૂચ એવાસ્માત્પશૂન્દધાત્યપશુરેવ
ભવતિ યં કામયેત પશુમાન્થ્સ્યાદિતિ સમીચીનાનિ તસ્યોપ
દધ્યાથ્સમીચ એવાસ્મૈ પશૂન્દધાતિ પશુમાનેવ ભવતિ
પુરસ્તાત્પ્રતીચીનમશ્વસ્યોપ દધાતિ પશ્ચાત્પ્રાચીનમૃષભસ્યાપશવો

વા અન્યે ગો અશ્વેભ્યઃ પશવો ગો અશ્વાનેવાસ્મૈ સમીચો દધાત્યેતાવન્તો
વૈ પશવો

૫૨ દ્વિપાદશ્ચ ચતુષ્પાદશ્ચ તાન્, વા એતદગ્નૌ પ્ર દધાતિ
યત્પશુશીર્ષાણ્યુપદધાત્યમુમારણ્યમનુ તે દિશામીત્યાહ ગ્રામ્યેભ્ય
એવ પશુભ્ય આરણ્યાન્પશૂઞ્છુચમનૂત્સૃજતિ તસ્માત્સમાવત્પશૂનાં
પ્રજાયમાનાનામારણ્યાઃ પશવઃ કનીયાꣳसः શુચા હ્યૃતાઃ
સર્પશીર્ષમુપ દધાતિ યૈવ સર્પે ત્વિષિસ્તામેવાવ રુંધે

૫૩ યત્સમીચીનં પશુશીર્ષૈરુપ દધ્યાદ્ગ્રામ્યાન્પશૂન્દꣳ શુકાઃ
સ્યુર્યદ્વિષૂચીનમારણ્યાન્, યજુરેવ વદેદવ તાન્ત્વિષિꣳરુંધે
યા સર્પે ન ગ્રામ્યાન્પશૂન્ હિનસ્તિ નારણ્યાનથો ખલૂપધેયમેવ
યદુપદધાતિ તેન તાં ત્વિષિમવ રુંધે યા સર્પે યદ્યજુર્વદતિ
તેન શાન્તમ્ ॥ ૫। ૨। ૯॥ ઊનાન્તસ્યોપ પ્રાણાઃ સ્યાદિતિ વૈ પશવો રુંધે
ચતુશ્ચત્વારિꣳશચ્ચ ॥ ૫। ૨। ૯॥

૫૪ પશુર્વા એષ યદગ્નિરꣳ્યોનિઃ ખલુ વા એષા પશોર્વિ ક્રિયતે
યત્પ્રાચીનમૈષ્ટકાદ્યજુઃ ક્રિયતે રેતોઽપસ્યા અપસ્યા ઉપ દધાતિ
યોનાવેવ રેતો દધાતિ પઞ્ચોપ દધાતિ પાઙ્ક્તાઃ પશવઃ પશૂનેવાસ્મૈ
પ્ર જનયતિ પઞ્ચ દક્ષિણતો વજ્રો વા અપસ્યા વજ્રેણૈવ યજ્ઞસ્ય
દક્ષિણતો રક્ષાગ્ꣳસ્યપ હન્તિ પઞ્ચ પશ્ચાત્

૫૫ પ્રાચીરુપ દધાતિ પશ્ચાદ્વૈ પ્રાચીનꣳ રેતો ધીયતે પશ્ચાદેવાસ્મૈ
પ્રાચીનꣳ રેતો દધાતિ પઞ્ચ પુરસ્તાત્પ્રતીચીરુપ દધાતિ
પઞ્ચ પશ્ચાત્પ્રાચીસ્તસ્માત્પ્રાચીનꣳ રેતો ધીયતે પ્રતીચીઃ પ્રજા
જાયન્તે પઞ્ચોત્તરતશ્છંદસ્યાઃ પશવો વૈ છંદસ્યાઃ પશૂનેવ
પ્રજાતાન્ત્સ્વમાયતનમભિ પર્યૂહત ઇયં વા અગ્નેરતિદાહાદબિભેત્સૈતા

૫૬ અપસ્યા અપશ્યત્તા ઉપાધત્ત તતો વા ઇમાં નાત્યદહદ્યદપસ્યા
ઉપદધાત્યસ્યા અનતિદાહાયોવાચ હેયમદદિત્સ બ્રહ્મણાન્નં યસ્યૈતા
ઉપધીયાન્તૈ ય ઉ ચૈના એવં વેદદિતિ પ્રાણભૃત ઉપ દધાતિ
રેતસ્યેવ પ્રાણાન્દધાતિ તસ્માદ્વદન્ પ્રાણન્ પશ્યઞ્છૃણ્વન્

પશુર્જાયતેઽયં પુરો

૫૭ ભુવ ઇતિ પુરસ્તાદુપ દધાતિ પ્રાણમેવૈતાભિર્દાધારાયં
દક્ષિણા વિશ્વકર્મેતિ દક્ષિણતો મન એવૈતાભિર્દાધારાયં
પશ્ચાદ્વિશ્વવ્યચા ઇતિ પશ્ચાચ્ચક્ષુરેવૈતાભિર્દાધારેદમુત્તરાથ્
સુવરિત્યુત્તરતઃ શ્રોત્રમેવૈતાભિર્દાધારેયમુપરિ
મતિરિત્યુપરિષ્ટાદ્વાચમેવૈતાભિર્દાધાર દશ દશોપ દધાતિ
સવીર્યત્વાયાક્ષ્ણયો

૫૮ ઽપ દધાતિ તસ્માદક્ષ્ણયા પશવોઽઙ્ગાનિ પ્ર હરન્તિ પ્રતિષ્ઠિત્યૈ
યાઃ પ્રાચીસ્તાભિર્વસિષ્ઠ આર્ધ્નોદ્યા દક્ષિણા તાભિર્ભરદ્વાજો
યાઃ પ્રતીચીસ્તાભિર્વિશ્વામિત્રો યા ઉદીચીસ્તાભિર્જમદગ્નિર્યા
ઊર્ધ્વાસ્તાભિર્વિશ્વકર્મા ય એવમેતાસામૃદ્ધિં વેદર્ધ્નોત્યેવ ય
આસામેવં બન્ધુતાં વેદ બન્ધુમાન્ભવતિ ય આસામેવં ક્લૃપ્તં વેદ
કલ્પતે

૫૯ ઽસ્મૈ ય આસામેવમાયતનં વેદાયતનવાન્ભવતિ ય આસામેવં
પ્રતિષ્ઠાં વેદ પ્રત્યેવ તિષ્ઠતિ પ્રાણભૃત ઉપધાય સંયત ઉપ
દધાતિ પ્રાણાનેવાસ્મિન્ધિત્વા સંયદ્ભિઃ સં યચ્છતિ તથ્સંયતાꣳ
સંયત્ત્વમથો પ્રાણ એવાપાનં દધાતિ તસ્માત્પ્રાણાપાનૌ સં ચરતો
વિષૂચીરુપ દધાતિ તસ્માદ્વિષ્વઞ્ચૌ પ્રાણાપાનૌ યદ્વા અગ્નેરસંયત

૬૦ મસુવર્ગ્યમસ્ય તથ્સુવર્ગ્યોઽગ્નિર્યથ્સંયત ઉપ દધાતિ
સમેવૈનં યચ્છતિ સુવર્ગ્યમેવાકસ્ત્ર્યવિર્વયઃ કૃતમયાનામિત્યાહ
વયોભિરેવાયાનવ રુન્ધેઽયૈર્વયાꣳસિ સર્વતો વાયુમતીર્ભવન્તિ
તસ્માદયꣳ સર્વતઃ પવતે ॥ ૫। ૨। ૧૦॥ પશ્ચાદેતાઃ પુરોઽક્ષ્ણયા
કલ્પતેઽસંયતં પંચ ત્રિꣳશચ્ચ ॥ ૫। ૨। ૧૦॥

૬૧ ગાયત્રી ત્રિષ્ટુબ્જગત્યનુષ્ટુક્પઙ્ક્ત્યા સહ । બૃહત્યુષ્ણિહા
કકુથ્સૂચીભિઃ શિમ્યન્તુ ત્વા ॥ દ્વિપદા યા ચતુષ્પદા ત્રિપદા યા ચ
ષટ્પદા । સછન્દા યા ચ વિચ્છન્દાઃ સૂચીભિઃ શિમ્યન્તુ ત્વા ॥ મહાનામ્ની
રેવતયો વિશ્વા આશાઃ પ્રસૂવરીઃ । મેઘ્યા વિદ્યુતો વાચઃ સૂચીભિઃ

શિમ્યન્તુ ત્વા ॥ રજતા હરિણીઃ સીસા યુજો યુજ્યન્તે કર્મભિઃ । અશ્વસ્ય
વાજિનસ્ત્વચિ સૂચીભિઃ શિમ્યન્તુ ત્વા ॥ નારી
૬૨ સ્તે પત્નયો લોમ વિ ચિન્વન્તુ મનીષયા । દેવાનાં પત્નીર્દિશઃ
સૂચીભિઃ શિમ્યન્તુ ત્વા ॥ કુવિદઙ્ગ યવમન્તો યવં ચિદ્યથા
દાન્ત્યનુપૂર્વં વિયૂય । ઇહેહૈષાં કૃણુત ભોજનાનિ યે બર્હિષો
નમોવૃક્તિં ન જગ્મુઃ ॥ ૫। ૨। ૧૧॥ નારીસ્ત્રિꣳશચ્ચ ॥ ૫। ૨। ૧૧॥
૬૩ કસ્ત્વા છ્યતિ કસ્ત્વા વિ શાસ્તિ કસ્તે ગાત્રાણિ શિમ્યતિ । ક ઉ તે શમિતા
કવિઃ ॥ ઋતવસ્ત ઋતુધા પરુઃ શમિતારો વિ શાસતુ । સંવથ્સરસ્ય
ધાયસા શિમીભિઃ શિમ્યન્તુ ત્વા ॥ દૈવ્યા અધ્વર્યવસ્ત્વા છ્યન્તુ વિ ચ
શાસતુ । ગાત્રાણિ પર્વશસ્તે શિમાઃ કૃણ્વન્તુ શિમ્યન્તઃ ॥ અર્ધમાસાઃ
પરૂꣳષિ તે માસાશ્છ્યન્તુ શિમ્યન્તઃ । અહોરાત્રાણિ મરુતો વિલિષ્ટꣳ
૬૪ સૂદયન્તુ તે ॥ પૃથિવી તેઽન્તરિક્ષેણ વાયુશ્છિદ્રં ભિષજ્યતુ । દ્યૌસ્તે
નક્ષત્રૈઃ સહ રૂપં કૃણોતુ સાધુયા ॥ શં તે પરેભ્યો ગાત્રેભ્યઃ
શમસ્ત્વવરેભ્યઃ । શમસ્થભ્યો મજ્જભ્યઃ શમુ તે તનુવે ભુવત્ ॥ ૫। ૨। ૧૨॥ વિલિષ્ટં ત્રિꣳશચ્ચ ॥
૫। ૨। ૧૨॥

વિષ્ણુમુખા અન્નપતે યાવતી વિ વૈ પુરુષમાત્રેણાગ્ને તવ શ્રવો વયો
બ્રહ્મ જજ્ઞાનગ્ં સ્વયમાતૃણ્ણામેષાં વૈ પશુર્ગાયત્રી કસ્ત્વા દ્વાદશ ॥
વિષ્ણુમુખા અપચિતિમાન્વિ વા એતાવગ્ને તવ સ્વયમાતૃણ્ણાં વિષૂચીનાનિ
ગાયત્રી ચતુષ્ષષ્ટિઃ ॥
વિષ્ણુમુખાસ્તનુવે ભુવત્ ॥

## પઞ્ચમકાણ્ડે તૃતીયઃ પ્રશ્નઃ 3

૧ ઉથ્સન્નયજ્ઞો વા એષ યદગ્નિઃ કિં વાહૈતસ્ય ક્રિયતે કિં વા ન યદ્વૈ
યજ્ઞસ્ય ક્રિયમાણસ્યાન્તર્યન્તિ પૂયતિ વા અસ્ય તદાશ્વિનીરુપ
દધાત્યશ્વિનૌ વૈ દેવાનાં ભિષજૌ તાભ્યામેવાસ્મૈ ભેષજં કરોતિ
પઞ્ચોપ દધાતિ પાઙ્ક્તો યજ્ઞો યાવાનેવ યજ્ઞસ્તસ્મૈ ભેષજં

કરોત્યૃતવ્યા ઉપ દધાત્યૃતૂનાં ક્લૃપ્ત્યૈ
૨ પઞ્ચોપ દધાતિ પઞ્ચ વા ઋતવો યાવન્ત એવર્તવસ્તાન્કલ્પયતિ
સમાનપ્રભૃતયો ભવન્તિ સમાનોદર્કાસ્તસ્માથ્સમાના ઋતવ એકેન
પદેન વ્યાવર્તન્તે તસ્માદૃતવો વ્યાવર્તન્તે પ્રાણભૃત ઉપ
દધાત્યૃતુષ્વેવ પ્રાણાન્દધાતિ તસ્માથ્સમાનાઃ સન્ત ઋતવો ન
જીર્યન્ત્યથો પ્ર જનયત્યેવૈનાનેષ વૈ વાયુર્યત્પ્રાણો યદૃતવ્યા
ઉપધાય પ્રાણભૃત
૩ ઉપદધાતિ તસ્માથ્સર્વાનૃતૂનનુ વાયુરા વરીવર્તિ વૃષ્ટિસનીરુપ
દધાતિ વૃષ્ટિમેવાવ રુંધે યદેકધોપદધ્યાદેકમૃતું
વર્ષેદનુપરિહાર ँ સાદયતિ તસ્માથ્સર્વાનૃતૂન્, વર્ષતિ
યત્પ્રાણભૃત ઉપધાય વૃષ્ટિસનીરુપદધાતિ તસ્માદ્વાયુપ્રચ્યુતા
દિવો વૃષ્ટિરીર્તે પશવો વૈ વયસ્યા નાનામનસઃ ખલુ વૈ પશવો
નાના વ્રતાસ્તેઽપ એવાભિ સમનસો
૪ યં કામયેતાપશુઃ સ્યાદિતિ વયસ્યાસ્તસ્યોપધાયાપસ્યા ઉપ
દધ્યાદસંજ્ઞાનમેવાસ્મૈ પશુભિઃ કરોત્યપશુરેવ ભવતિ યં
કામયેત પશુમાન્થ્સ્યાદિત્યપસ્યાસ્તસ્યોપધાય વયસ્યા ઉપ
દધ્યાથ્સં જ્ઞાનમેવાસ્મૈ પશુભિઃ કરોતિ પશુમાનેવ ભવતિ
ચતસ્રઃ પુરસ્તાદુપ દધાતિ તસ્માચ્ચત્વારિ ચક્ષુષો રૂપાણિ દ્વે
શુક્લે દ્વે કૃષ્ણે
૫ મૂર્ધન્વતીર્ભવન્તિ તસ્માત્પુરસ્તાન્મૂર્ધા પઞ્ચ દક્ષિણાયાગ્
શ્રોણ્યામુપ દધાતિ પઞ્ચોત્તરસ્યાં તસ્માત્પશ્ચાદ્વર્ષીયાન્પુરસ્તાત્પ્રવણઃ
પશુર્બસ્તો વય ઇતિ દક્ષિણેઽ ँ સ ઉપ દધાતિ વૃષ્ણિર્વય
ઇત્યુત્તરેઽ ँ સાવેવ પ્રતિ દધાતિ વ્યાઘ્રો વય ઇતિ દક્ષિણે પક્ષ ઉપ
દધાતિ સિ ँ હો વય ઇત્યુત્તરે પક્ષયોરેવ વીર્યં દધાતિ પુરુષો
વય ઇતિ મધ્યે તસ્માત્પુરુષઃ પશૂનામધિપતિઃ ॥ ૫। ૩। ૧॥ ક્લૃપ્ત્યા
ઉપધાય પ્રાણભૃતઃ સમનસઃ કૃષ્ણે પુરુષો વય ઇતિ પંચ ચ ॥
૫। ૩। ૧॥

૬ ઇન્દ્રાગ્ની અવ્યથમાનામિતિ સ્વયમાતૃણ્ણામુપ દધાતીન્દ્રાગ્નિભ્યાં વા
ઇમૌ લોકૌ વિધૃતાવનયોર્લોકયોર્વિધૃત્યા અધૃતેવ વા એષા
યન્મધ્યમા ચિતિરન્તરિક્ષમિવ વા એષેન્દ્રાગ્ની ઇત્યાહેન્દ્રાગ્ની
વૈ દેવાનામોજોભૃતાવોજસૈવૈનામન્તરિક્ષે ચિનુતે ધૃત્યૈ
સ્વયમાતૃણ્ણામુપ દધાત્યન્તરિક્ષં વૈ સ્વયમાતૃણ્ણાન્તરિક્ષમેવોપ
ધત્તેઽશ્વમુપ
૭ ઘ્રાપયતિ પ્રાણમેવાસ્યાં દધાત્યથો પ્રાજાપત્યો વા અશ્વઃ પ્રજાપતિનૈવાગ્નિં
ચિનુતે સ્વયમાતૃણ્ણા ભવતિ પ્રાણાનામુત્સૃષ્ટ્યા અથો સુવર્ગસ્ય
લોકસ્યાનુખ્યાત્યૈ દેવાનાં વૈ સુવર્ગં લોકં યતાં દિશઃ સમવ્લીયન્ત ત
એતા દિશ્યા અપશ્યન્તા ઉપાદધત તાભિર્વૈ તે દિશોઽદૃꣳહન્ યદ્દિશ્યા
ઉપદધાતિ દિશાં વિધૃત્યૈ દશ પ્રાણભૃતઃ પુરસ્તાદુપ
૮ દધાતિ નવ વૈ પુરુષે પ્રાણા નાભિર્દશમી પ્રાણાનેવ પુરસ્તાદ્ધત્તે
તસ્માત્પુરસ્તાત્પ્રાણા જ્યોતિષ્મતીમુત્તમામુપ દધાતિ તસ્માત્પ્રાણાનાં
વાગ્જ્યોતિરુત્તમા દશોપ દધાતિ દશાક્ષરા વિરાડ્વિરાટ્છંદસાં
જ્યોતિર્જ્યોતિરેવ પુરસ્તાદ્ધત્તે તસ્માત્પુરસ્તાજ્જ્યોતિરુપાસ્મહે
છન્દાꣳસિ પશુષ્વાજિમયુસ્તાન્ બૃહત્યુદજયત્ તસ્માદ્બાર્હતાઃ
૯ પશવ ઉચ્યન્તે મા છંદ ઇતિ દક્ષિણત ઉપ દધાતિ
તસ્માદ્દક્ષિણાવૃતો માસાઃ પૃથિવી છંદ ઇતિ પશ્ચાત્પ્રતિષ્ઠિત્યા
અગ્નિર્દેવતેત્યુત્તરત ઓજો વા અગ્નિરોજ એવોત્તરતો ધત્તે
તસ્માદુત્તરતોઽભિપ્રયાયી જયતિ ષટ્ત્રિꣳશત્સં પદ્યન્તે
ષટ્ત્રિꣳશદક્ષરા બૃહતી બાર્હતાઃ પશવો બૃહત્યૈવાસ્મૈ પશૂનવ
રુંધે બૃહતી છંદસાગ્ સ્વારાજ્યં પરીયાય યસ્યૈતા
૧૦ ઉપધીયન્તે ગચ્છતિ સ્વારાજ્યꣳ સપ્ત વાલખિલ્યાઃ પુરસ્તાદુપ દધાતિ
સપ્ત પશ્ચાત્સપ્ત વૈ શીર્ષણ્યાઃ પ્રાણા દ્વાવવાઞ્ચૌ પ્રાણાનાꣳ
સવીર્યત્વાય મૂર્ધાસિ રાડિતિ પુરસ્તાદુપ દધાતિ યન્ત્રી રાડિતિ
પશ્ચાત્પ્રાણાનેવાસ્મૈ સમીચો દધાતિ ॥ ૫। ૩। ૨॥ અશ્વમુપ પુરસ્તાદુપ
બાર્હતા એતાશ્ચતુસ્ત્રિꣳશચ્ચ ॥ ૫। ૩। ૨॥

૧૧ દેવા વૈ યદ્યજ્ઞેઽકુર્વત તદસુરા અકુર્વત તે દેવા એતા અક્ષણયાસ્તોમીયા
અપશ્યન્તા અન્યથાનૂચ્યાન્યથોપાદધત તદસુરા નાન્વવાયન્તતો દેવા
અભવન્પરાસુરા યદક્ષણયાસ્તોમીયા અન્યથાનૂચ્યાન્યથોપદધાતિ
ભ્રાતૃવ્યાભિભૂત્યૈ ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો
ભવત્યાશુસ્ત્રિવૃદિતિ પુરસ્તાદુપ દધાતિ યજ્ઞમુખં વૈ ત્રિવૃ
૧૨ દ્યજ્ઞમુખમેવ પુરસ્તાદ્વિ યાતયતિ વ્યોમ સપ્તદશ ઇતિ
દક્ષિણતોઽન્નં વૈ વ્યોમાન્ન ꣳ સપ્તદશોઽન્નમેવ દક્ષિણતો ધત્તે
તસ્માદ્દક્ષિણેનાન્નમદ્યતે ધરુણ એકવિ ꣳ શ ઇતિ પશ્ચાત્પ્રતિષ્ઠા
વા એકવિ ꣳ શઃ પ્રતિષ્ઠિત્યૈ ભાન્તઃ પઞ્ચદશ ઇત્યુત્તરત ઓજો વૈ
ભાન્ત ઓજઃ પઞ્ચદશ ઓજ એવોત્તરતો ધત્તે તસ્માદુત્તરતોઽભિપ્રયાયી
જયતિ પ્રતૂર્તિરષ્ટાદશ ઇતિ પુરસ્તા
૧૩ દુપ દધાતિ દ્વૌ ત્રિવૃતાવભિપૂર્વં યજ્ઞમુખે વિ યાતયત્યભિવર્તઃ
સવિ ꣳ શ ઇતિ દક્ષિણતોઽન્નં વા અભિવર્તોઽન્ન ꣳ
સવિ ꣳ શોઽન્નમેવ દક્ષિણતો ધત્તે તસ્માદ્દક્ષિણેનાન્નમદ્યતે
વર્ચો દ્વાવિ ꣳ શ ઇતિ પશ્ચાદ્યદ્વિ ꣳ શતિર્દ્વે તેન વિરાજૌ યદ્વે
પ્રતિષ્ઠા તેન વિરાજોરેવાભિપૂર્વમન્નાદ્યે પ્રતિ તિષ્ઠતિ તપો
નવદશ ઇત્યુત્તરતસ્તસ્માત્સવ્યો
૧૪ હસ્તયોસ્તપસ્વિતરો યોનિશ્ચતુર્વિ ꣳ શ ઇતિ પુરસ્તાદુપ
દધાતિ ચતુર્વિ ꣳ શત્યક્ષરા ગાયત્રી ગાયત્રી યજ્ઞમુખં
યજ્ઞમુખમેવ પુરસ્તાદ્વિ યાતયતિ ગર્ભાઃ પઞ્ચવિ ꣳ શ ઇતિ
દક્ષિણતોઽન્નં વૈ ગર્ભા અન્નં પઞ્ચવિ ꣳ શોન્નમેવ દક્ષિણતો
ધત્તે તસ્માદ્દક્ષિણેનાન્નમદ્યત ઓજસ્ત્રિણવ ઇતિ પશ્ચાદિમે વૈ
લોકાસ્ત્રિણવ એષ્વેવ લોકેષુ પ્રતિ તિષ્ઠતિ સં ભરણસ્ત્રયોવિ ꣳ શ ઇ
૧૫ ત્યુત્તરતસ્તસ્માત્સવ્યો હસ્તયોઃ સં ભાર્યતરઃ ક્રતુરેકત્રિ ꣳ શ
ઇતિ પુરસ્તાદુપ દધાતિ વાગ્વૈ ક્રતુર્યજ્ઞમુખં વાગ્યજ્ઞમુખમેવ
પુરસ્તાદ્વિ યાતયતિ બ્રધ્નસ્ય વિષ્ટપં ચતુસ્ત્રિ ꣳ શ ઇતિ
દક્ષિણતોઽસૌ વા આદિત્યો બ્રધ્નસ્ય વિષ્ટપં બ્રહ્મવર્ચસમેવ

દક્ષિણતો ધત્તે તસ્માદ્દક્ષિણોઽર્ધો બ્રહ્મવર્ચસિતરઃ પ્રતિષ્ઠા
ત્રયસ્ત્રિ ꣳ શ ઇતિ પશ્ચાત્પ્રતિષ્ઠિત્યૈ નાકઃ ષટ્ત્રિ ꣳ શ
ઇત્યુત્તરતઃ સુવર્ગો વૈ લોકો નાકઃ સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ॥ ૫। ૩। ૩॥ વૈ ત્રિવૃદિતિ
પુરસ્તાથ્સવ્યસ્ત્રયોવિ ꣳ શ ઇતિ સુવર્ગો વૈ પંચ
ચ ॥ ૫। ૩। ૩॥ આશુર્વ્યોમ ધરુણો ભાન્તઃ પ્રતૂર્તિરભિવર્તો વર્ચસ્તપો
યોનિર્ગર્ભા ઓજસ્સંભરણઃ ક્રતુર્બ્રધ્નસ્ય પ્રતિષ્ઠા નાકષ્ષોઽડશ ॥
૧૬ અગ્નેર્ભાગોઽસીતિ પુરસ્તાદુપ દધાતિ યજ્ઞમુખં વા અગ્નિર્યજ્ઞમુખં
દીક્ષા યજ્ઞમુખં બ્રહ્મ યજ્ઞમુખં ત્રિવૃદ્યજ્ઞમુખમેવ પુરસ્તાદ્વિ
યાતયતિ નૃચક્ષસાં ભાગોઽસીતિ દક્ષિણતઃ શુશ્રુવા ꣳ સો
વૈ નૃચક્ષસોઽન્નં ધાતા જાતાયૈવાસ્મા અન્નમપિ દધાતિ
તસ્માજ્જાતોઽન્નમત્તિ જનિત્રગ્ગ્ સ્પૃત ꣳ સપ્તદશઃ સ્તોમ ઇત્યાહાન્નં
વૈ જનિત્ર
૧૭ મન્ન ꣳ સપ્તદશોઽન્નમેવ દક્ષિણતો ધત્તે
તસ્માદ્દક્ષિણેનાન્નમદ્યતે મિત્રસ્ય ભાગોઽસીતિ પશ્ચાત્પ્રાણો વૈ
મિત્રોઽપાનો વરુણઃ પ્રાણાપાનાવેવાસ્મિન્દધાતિ દિવો વૃષ્ટિર્વાતાઃ સ્પૃતા
એકવિ ꣳ શઃ સ્તોમ ઇત્યાહ પ્રતિષ્ઠા વા એકવિ ꣳ શઃ પ્રતિષ્ઠિત્યા
ઇન્દ્રસ્ય ભાગોઽસીત્યુત્તરત ઓજો વા ઇન્દ્ર ઓજો વિષ્ણુરોજઃ, ક્ષત્રમોજઃ
પઞ્ચદશ
૧૮ ઓજ એવોત્તરતો ધત્તે તસ્માદુત્તરતોઽભિપ્રયાયી જયતિ વસૂનાં
ભાગોઽસીતિ પુરસ્તાદુપ દધાતિ યજ્ઞમુખં વૈ વસવો યજ્ઞમુખ ꣳ
રુદ્રા યજ્ઞમુખં ચતુર્વિ ꣳ શો યજ્ઞમુખમેવ પુરસ્તાદ્વિ
યાતયત્યાદિત્યાનાં ભાગોઽસીતિ દક્ષિણતોઽન્નં વા આદિત્યા અન્નં
મરુતોઽન્નં ગર્ભા અન્નં પઞ્ચવિ ꣳ શોઽન્નમેવ દક્ષિણતો ધત્તે
તસ્માદ્દક્ષિણેનાન્નમદ્યતેઽદિત્યૈ ભાગો
૧૯ ઽસીતિ પશ્ચાત્પ્રતિષ્ઠા વા અદિતિઃ પ્રતિષ્ઠા પૂષા પ્રતિષ્ઠા ત્રિણવઃ
પ્રતિષ્ઠિત્યૈ દેવસ્ય સવિતુર્ભાગોઽસીત્યુત્તરતો બ્રહ્મ વૈ દેવઃ સવિતા
બ્રહ્મ બૃહસ્પતિર્બ્રહ્મ ચતુષ્ટોમો બ્રહ્મવર્ચસમેવોત્તરતો ધત્તે

તસ્માદુત્તરોઽર્ધો બ્રહ્મવર્ચસિતરઃ સાવિત્રવતી ભવતિ પ્રસૂત્યૈ
તસ્માદ્બ્રાહ્મણાનામુદીચી સનિઃ પ્રસૂતા ધર્ત્રશ્ચતુષ્ટોમ ઇતિ
પુરસ્તાદુપ દધાતિ યજ્ઞમુખં વૈ ધર્ત્રો
૨૦ યજ્ઞમુખં ચતુષ્ટોમો યજ્ઞમુખમેવ પુરસ્તાદ્વિ
યાતયતિ યાવાનાં ભાગોઽસીતિ દક્ષિણતો માસા વૈ યાવા અર્ધમાસા
અયાવાસ્તસ્માદ્દક્ષિણાવૃતો માસા અન્નં વૈ યાવા અન્નં પ્રજા
અન્નમેવ દક્ષિણતો ધત્તે તસ્માદ્દક્ષિણેનાન્નમદ્યત ઋભૂણાં
ભાગોઽસીતિ પશ્ચાત્પ્રતિષ્ઠિત્યૈ વિવર્તોઽષ્ટાચત્વારિ ँ શ
ઇત્યુત્તરતોઽનયોર્લોકયોઃ સવીર્યત્વાય તસ્માદિમૌ લોકૌ સમાવદ્વીર્યૌ
૨૧ યસ્ય મુખ્યવતીઃ પુરસ્તાદુપધીયન્તે મુખ્ય એવ ભવત્યાસ્ય
મુખ્યો જાયતે યસ્યાન્નવતીર્દક્ષિણતોઽત્ત્યન્નમાસ્યાન્નાદો જાયતે
યસ્ય પ્રતિષ્ઠાવતીઃ પશ્ચાત્પ્રત્યેવ તિષ્ઠતિ યસ્યૌજસ્વતીરુત્તરત
ઓજસ્વ્યેવ ભવત્યાસ્યૌજસ્વી જાયતેઽર્કો વા એષ યદગ્નિસ્તસ્યૈતદેવ
સ્તોત્રમેતચ્છસ્ત્રં યદેષા વિધા
૨૨ વિધીયતેઽર્ક એવ તદર્ક્યમનુ વિ ધીયતેઽત્યન્નમાસ્યાન્નાદો
જાયતે યસ્યૈષા વિધા વિધીયતે ય ઉ ચૈનામેવં વેદ સૃષ્ટીરુપ
દધાતિ યથાસૃષ્ટમેવાવ રુંધે ન વા ઇદં દિવા ન નક્તમાસીદવ્યાવૃત્તં
તે દેવા એતા વ્યુષ્ટીરપશ્યન્તા ઉપાદધત તતો વા ઇદં વ્યૌચ્છદ્યસ્યૈતા
ઉપધીયન્તે વ્યેવાસ્મા ઉચ્છત્યથો તમ એવાપ હતે ॥ ૫। ૩। ૪॥
વૈ જનિત્રં પંચદશોદિત્યૈ ભાગો વૈ ધર્ત્રઃ સમાવદ્વીર્યૌ વિધા
તતો વા ઇદં ચતુર્દશ ચ ॥ ૫। ૩। ૪॥ અગ્નેર્નૃચક્ષસાં જનિત્રં
મિત્રસ્યેંદ્રસ્ય વસૂનામાદિત્યાનામદિત્યૈ દેવસ્ય સવિતુઃ સાવિત્રવતી
ધર્ત્રો યાવાનામૃભૂણાં વિવર્તશ્ચતુર્દશ ॥
૨૩ અગ્ને જાતાન્ પ્રણુદા નઃ સપત્નાનિતિ પુરસ્તાદુપ દધાતિ જાતાનેવ
ભ્રાતૃવ્યાન્ પ્ર ણુદતે સહસા જાતાનિતિ પશ્ચાજ્જનિષ્યમાણાનેવ
પ્રતિ નુદતે ચતુશ્ચત્વારિ ँ શઃ સ્તોમ ઇતિ દક્ષિણતો બ્રહ્મવર્ચસં
વૈ ચતુશ્ચત્વારિ ँ શો બ્રહ્મવર્ચસમેવ દક્ષિણતો ધત્તે

તસ્માદ્દક્ષિણોઽર્ધો બ્રહ્મવર્ચસિતરઃ ષોડશ સ્તોમ ઇત્યુત્તરત ઓજો
વૈ ષોડશ ઓજ એવોત્તરતો ધત્તે તસ્મા

૨૪ દુત્તરતોઽભિપ્રયાયી જયતિ વજ્રો વૈ ચતુશ્ચત્વારિꣳશો વજ્રઃ
ષોડશો યદેતે ઇષ્ટકે ઉપ દધાતિ જાતાꣳશ્ચૈવ જનિષ્યમાણાꣳશ્ચ
ભ્રાતૃવ્યાન્પ્રણુદ્ય વજ્રમનુ પ્ર હરતિ સ્તૃત્યૈ પુરીષવતીં મધ્ય
ઉપ દધાતિ પુરીષં વૈ મધ્યમાત્મનઃ સાત્માનમેવાગ્નિં ચિનુતે
સાત્મામુષ્મિꣳલ્લોકે ભવતિ ય એવં વેદૈતા વા અસપત્ના નામેષ્ટકા
યસ્યૈતા ઉપધીયન્તે

૨૫ નાસ્ય સપત્નો ભવતિ પશુર્વા એષ યદગ્નિર્વિરાજ ઉત્તમાયાં ચિત્યામુપ
દધાતિ વિરાજમેવોત્તમાં પશુષુ દધાતિ તસ્માત્પશુમાનુત્તમાં વાચં
વદતિ દશદશોપ દધાતિ સવીર્યત્વાયાક્ષ્ણયોપ દધાતિ તસ્માદક્ષ્ણયા
પશવોઽઙ્ગાનિ પ્ર હરન્તિ પ્રતિષ્ઠિત્યૈ યાનિ વૈ છન્દાꣳસિ
સુવર્ગ્યાણ્યાસન્તૈર્દેવાઃ સુવર્ગં લોકમાયન્તેનર્ષયો

૨૬ ઽશ્રામ્યન્તે તપોઽતપ્યન્ત તાનિ તપસાપશ્યન્તેભ્ય એતા ઇષ્ટકા
નિરમિમતેવશ્છન્દો વરિવશ્છંદ ઇતિ તા ઉપાદધત તાભિર્વૈ તે
સુવર્ગં લોકમાયન્ યદેતા ઇષ્ટકા ઉપદધાતિ યાન્યેવ છન્દાꣳસિ
સુવર્ગ્યાણિ તૈરેવ યજમાનઃ સુવર્ગં લોકમેતિ યજ્ઞેન વૈ પ્રજાપતિઃ
પ્રજા અસૃજત તાઃ સ્તોમભાગૈરેવાસૃજત યથ્

૨૭ સ્તોમભાગા ઉપદધાતિ પ્રજા એવ તદ્યજમાનઃ સૃજતે બૃહસ્પતિર્વા
એતદ્યજ્ઞસ્ય તેજઃ સમભરદ્યથ્સ્તોમભાગા યથ્સ્તોમભાગા
ઉપદધાતિ સતેજસમેવાગ્નિં ચિનુતે બૃહસ્પતિર્વા એતાં યજ્ઞસ્ય
પ્રતિષ્ઠામપશ્યદ્યથ્સ્તોમભાગા યથ્સ્તોમભાગા ઉપદધાતિ યજ્ઞસ્ય
પ્રતિષ્ઠિત્યૈ સપ્તસપ્તોપ દધાતિ સવીર્યત્વાય તિસ્રો મધ્યે પ્રતિષ્ઠિત્યૈ
॥ ૫। ૩। ૫॥ ઉત્તરતો ધત્તે તસ્માદુપધીયન્ત ઋષયોઽસૃજત
યત્રિચત્વારિꣳશચ્ચ ॥ ૫। ૩। ૫॥

૨૮ રશ્મિરિત્યેવાદિત્યમસૃજત પ્રેતિરિતિ ધર્મમન્વિતિરિતિ
દિવꣳસન્ધિરિત્યન્તરિક્ષં પ્રતિધિરિતિ પૃથિવીં વિષ્ટંભ

ઇતિ વૃષ્ટિં પ્રવેત્યહરનુવેતિ રાત્રિમુશિગિતિ વસૂન્પ્રકેત
ઇતિ રુદ્રાન્થ્સુદીતિરિત્યાદિત્યાનોજ ઇતિ પિતૃગ્ સ્તન્તુરિતિ પ્રજાઃ
પૃતનાષાડિતિ પશૂન્રેવદિત્યોષધીરભિજિદસિ યુક્તગ્રાવે
૨૯ ન્દ્રાય ત્વેન્દ્રં જિન્વેત્યેવ દક્ષિણતો વજ્રં
પર્યૌહદભિજિત્યૈ તાઃ પ્રજા અપપ્રાણા અસૃજત તાસ્વધિપતિરસીત્યેવ
પ્રાણમદધાદ્યન્તેત્યપાનꣳ સꣳ સર્પ ઇતિ ચક્ષુર્વયોધા ઇતિ
શ્રોત્રં તાઃ પ્રજાઃ પ્રાણતીરપાનતીઃ પશ્યન્તીઃ શ઼ૃણ્વતીર્ન મિથુની
અભવન્તાસુ ત્રિવૃદસીત્યેવ મિથુનમદધાત્તાઃ પ્રજા મિથુની
૩૦ ભવન્તીર્ન પ્રાજાયન્ત તાઃ સꣳરોહોઽસિ ની રોહોઽસીત્યેવ
પ્રાજનયત્તાઃ પ્રજાઃ પ્રજાતા ન પ્રત્યતિષ્ઠન્તા વસુકોઽસિ
વેષશ્રિરસિ વસ્યષ્ટિરસીત્યેવૈષુ લોકેષુ પ્રત્યસ્થાપયદ્યદાહ
વસુકોઽસિ વેષશ્રિરસિ વસ્યષ્ટિરસીતિ પ્રજા એવ
પ્રજાતા એષુ લોકેષુ પ્રતિ ષ્ઠાપયતિ સાત્માન્તરિક્ષꣳ રોહતિ
સપ્રાણોઽમુષ્મિꣳલ્લોકે પ્રતિ તિષ્ઠત્યવ્યર્ધુકઃ પ્રાણાપાનાભ્યાં ભવતિ
ય એવં વેદ ॥ ૫। ૩। ૬॥ યુક્તગ્રાવા પ્રજા મિથુન્યંતરિક્ષં દ્વાદશ
ચ ॥ ૫। ૩। ૬॥

૩૧ નાકસદ્ભિર્વૈ દેવાઃ સુવર્ગં લોકમાયન્તન્નાકસદાં નાકસત્ત્વં
યન્નાકસદ ઉપદધાતિ નાકસદ્ભિરેવ તદ્યજમાનઃ સુવર્ગં લોકમેતિ
સુવર્ગો વૈ લોકો નાકો યસ્યૈતા ઉપધીયન્તે નાસ્મા અકં ભવતિ યજમાનાયતનં
વૈ નાકસદો યન્નાકસદ ઉપદધાત્યાયતનમેવ તદ્યજમાનઃ કુરુતે
પૃષ્ઠાનાં વા એતત્તેજઃ સંભૃતં યન્નાકસદો યન્નાકસદ
૩૨ ઉપદધાતિ પૃષ્ઠાનામેવ તેજોઽવ રુંધે પઞ્ચચોડા ઉપ
દધાત્યપ્સરસ એવૈનમેતા ભૂતા અમુષ્મિꣳલ્લોક ઉપ શેરેઽથો
તનૂપાનીરેવૈતા યજમાનસ્ય યં દ્વિષ્યાત્તમુપદધદ્ધ્યાયેદેતાભ્ય
એવૈનં દેવતાભ્ય આ વૃશ્ચતિ તાજગાર્તિમાર્ચ્છત્યુત્તરા નાકસદ્ભ્ય
ઉપ દધાતિ યથા જાયામાનીય ગૃહેષુ નિષાદયતિ તાદૃગેવ તત્
૩૩ પશ્ચાત્પ્રાચીમુત્તમામુપ દધાતિ તસ્માત્પશ્ચાત્પ્રાચી

પત્ન્યન્વાસ્તે સ્વયમાતૃણ્ણાં ચ વિકર્ણીં ચોત્તમે ઉપ દધાતિ પ્રાણો વૈ
સ્વયમાતૃણ્ણાયુર્વિકર્ણી પ્રાણં ચૈવાયુશ્ચ પ્રાણાનામુત્તમૌ ધત્તે
તસ્માત્પ્રાણશ્ચાયુશ્ચ પ્રાણાનામુત્તમૌ નાન્યામુત્તરામિષ્ટકામુપ
દધ્યાદ્યદન્યામુત્તરામિષ્ટકામુપદધ્યાત્પશૂનાં
૩૪ ચ યજમાનસ્ય ચ પ્રાણં ચાયુશ્ચાપિ
દધ્યાત્તસ્માન્નાન્યોત્તરેષ્ટકોપધેયા સ્વયમાતૃણ્ણામુપ દધાત્યસૌ
વૈ સ્વયમાતૃણ્ણામૂમેવોપ ધત્તેઽશ્વમુપ ઘ્રાપયતિ પ્રાણમેવાસ્યાં
દધાત્યથો પ્રાજાપત્યો વા અશ્વઃ પ્રજાપતિનૈવાગ્નિં ચિનુતે સ્વયમાતૃણ્ણા
ભવતિ પ્રાણાનામુત્સૃષ્ટ્યા અથો સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યા એષા વૈ
દેવાનાં વિક્રાન્તિર્યદ્વિકર્ણી યદ્વિકર્ણીમુપદધાતિ દેવાનામેવ
વિક્રાન્તિમનુ વિ ક્રમત ઉત્તરત ઉપ દધાતિ તસ્માદુત્તરત
ઉપચારોઽગ્નિર્વાયુમતી ભવતિ સમિદ્ધ્યૈ ॥ ૫। ૩। ૭॥ સંભૃતં
યન્નાકસદો યન્નાકસદસ્તત્પશૂનામેષા વૈ દ્વા વિ ँશતિશ્ચ ॥ ૫। ૩। ૭॥
૩૫ છન્દાગ્સ્યુપ દધાતિ પશવો વૈ છન્દા ँસિ પશૂનેવાવ રુંધે
છન્દા ँસિ વૈ દેવાનાં વામં પશવો વામમેવ પશૂનવ રુંધ
એતા ँ હ વૈ યજ્ઞસેનશ્ચૈત્રિયાયણશ્ચિતિં વિદાં ચકાર તયા
વૈ સ પશૂનવારુંધ યદેતામુપદધાતિ પશૂનેવાવ રુંધે ગાયત્રીઃ
પુરસ્તાદુપ દધાતિ તેજો વૈ ગાયત્રી તેજ એવ
૩૬ મુખતો ધત્તે મૂર્ધન્વતીર્ભવન્તિ મૂર્ધાનમેવૈન ँસમાનાનાં કરોતિ
ત્રિષ્ટુભ ઉપ દધાતીંદ્રિયં વૈ ત્રિષ્ટુગિન્દ્રિયમેવ મધ્યતો ધત્તે
જગતીરુપ દધાતિ જાગતા વૈ પશવઃ પશૂનેવાવ રુંધેઽનુષ્ટુભ
ઉપ દધાતિ પ્રાણા વા અનુષ્ટુપ્પ્રાણાનામુત્સૃષ્ટ્યૈ બૃહતીરુષ્ણિહાઃ
પંક્તીરક્ષરપંક્તીરિતિ વિષુરૂપાણિ છન્દાગ્સ્યુપ દધાતિ વિષુરૂપા
વૈ પશવઃ પશવ
૩૭ શ્છન્દા ँસિ વિષુરૂપાનેવ પશૂનવ રુંધે વિષુરૂપમસ્ય ગૃહે
દૃશ્યતે યસ્યૈતા ઉપધીયન્તે ય ઉ ચૈના એવં વેદાતિચ્છંદસમુપ
દધાત્યતિચ્છન્દા વૈ સર્વાણિ છન્દા ँસિ સર્વૈભિરેવૈનં

છન્દોભિશ્ચિનુતે વર્ષ્મ વા એષા છંદસાં યદતિચ્છન્દા
યદતિચ્છંદસમુપદધાતિ વર્ષ્મૈવૈન ँ સમાનાનાં કરોતિ દ્વિપદા
ઉપ દધાતિ દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યૈ ॥ ૫। ૩। ૮॥ તેજ એવ પશવઃ
પશવો યજમાન એકં ચ ॥ ૫। ૩। ૮॥
૩૮ સર્વાભ્યો વૈ દેવતાભ્યોઽગ્નિશ્ચીયતે યથ્સયુજો નોપદધ્યાદ્દેવતા
અસ્યાગ્નિં વૃઞ્જીરન્ યથ્સયુજ ઉપદધાત્યાત્મનૈવૈન ँ સયુજં
ચિનુતે નાગ્નિના વ્યૃધ્યતેઽથો યથા પુરુષઃ સ્નાવભિઃ સન્તત
એવમેવૈતાભિરગ્નિઃ સન્તતોઽગ્નિના વૈ દેવાઃ સુવર્ગં લોકમાયન્તા
અમૂઃ કૃત્તિકા અભવન્ યસ્યૈતા ઉપધીયન્તે સુવર્ગમેવ
૩૯ લોકમેતિ ગચ્છતિ પ્રકાશં ચિત્રમેવ ભવતિ મણ્ડલેષ્ટકા ઉપ
દધાતીમે વૈ લોકા મણ્ડલેષ્ટકા ઇમે ખલુ વૈ લોકા દેવપુરા દેવપુરા
એવ પ્ર વિશતિ નાર્તિમાર્ચ્છત્યગ્નિં ચિક્યાનો વિશ્વજ્યોતિષ ઉપ
દધાતીમાનેવૈતાભિર્લોકાઞ્જ્યોતિષ્મતઃ કુરુતેઽથો પ્રાણાનેવૈતા યજમાનસ્ય
દાધ્રત્યેતા વૈ દેવતાઃ સુવર્ગ્યાસ્તા એવાન્વારભ્ય સુવર્ગં લોકમેતિ ॥
૫। ૩। ૯॥ સુવર્ગમેવ તા એવ ચત્વારિ ચ ॥ ૫। ૩। ૯॥
૪૦ વૃષ્ટિસનીરુપ દધાતિ વૃષ્ટિમેવાવ રુંધે
યદેકધોપદધ્યાદેકમૃતું વર્ષેદનુપરિહાર ँ સાદયતિ
તસ્માથ્સર્વાનૃતૂન્ વર્ષતિ પુરોવાત સનિરસીત્યાહૈતદ્વૈ
વૃષ્ટ્યૈ રૂપ ँ રૂપેણૈવ વૃષ્ટિમવ રુંધે સંયાનીભિર્વૈ દેવા
ઇમાઉ ँ લ્લોકાન્થ્સમયુસ્તથ્સંયાનીના ँ સંયાનિત્વં યથ્સંયાનીરુપ
દધાતિ યથાપ્સુ નાવા સંયાત્યેવ
૪૧ મેવૈતાભિર્યજમાન ઇમાઉ ँ લ્લોકાન્થ્સં યાતિ પ્લવો વા
એષોઽગ્નેર્યથ્સંયાનીર્યથ્સંયાનીરુપ દધાતિ પ્લવમેવૈતમગ્નય
ઉપ દધાત્યુત યસ્યૈતાસૂપહિતાસ્વાપોઽગ્નિ ँ હરન્ત્યહૃત
એવાસ્યાગ્નિરાદિત્યેષ્ટકા ઉપ દધાત્યાદિત્યા વા એતં ભૂત્યૈ પ્રતિ નુદન્તે
યોઽલં ભૂત્યૈ સન્ભૂતિં ન પ્રાપ્નોત્યાદિત્યા
૪૨ એવૈનં ભૂતિં ગમયન્ત્યસૌ વા એતસ્યાદિત્યો રુચમા દત્તે યોઽગ્નિં

ચિત્વા ન રોચતે યદાદિત્યેષ્ટકા ઉપદધાત્યસાવેવાસ્મિન્નાદિત્યો રુચં
દધાતિ યથાસૌ દેવાના ઁ રોચત એવમેવૈષ મનુષ્યાણા ઁ રોચતે
ઘૃતેષ્ટકા ઉપ દધાત્યેતદ્વા અગ્નેઃ પ્રિયં ધામ યદ્ઘૃતં પ્રિયેણૈવૈનં
ધામ્ના સમર્ધય

૪૩ ત્યથો તેજસાઽનુપરિહાર ઁસાદયત્યપરિવર્ગમેવાસ્મિન્તેજો દધાતિ
પ્રજાપતિરગ્નિમચિનુત સ યશસા વ્યાર્ધ્યત સ એતા યશોદા
અપશ્યત્તા ઉપાધત્ત તાભિર્વૈ સ યશ આત્મન્નધત્ત યદ્યશોદા
ઉપ દધાતિ યશ એવ તાભિર્યજમાન આત્મન્ધત્તે પઞ્ચોપ દધાતિ
પાઙ્ક્તઃ પુરુષો યાવાનેવ પુરુષસ્તસ્મિન્ યશો દધાતિ ॥ ૫। ૩। ૧૦॥

એવં પ્રાપ્નોત્યાદિત્યા અર્ધયત્યેકાન્ન પંચાશચ્ચ ॥ ૫। ૩। ૧૦॥

૪૪ દેવાસુરાઃ સંયત્તા આસન્કનીયા ઁ સો દેવા આસન્ભૂયા ઁ સોઽસુરાસ્તે
દેવા એતા ઇષ્ટકા અપશ્યન્તા ઉપાદધત ભૂયસ્કૃદસીત્યેવ ભૂયા ઁસોઽ
ભવન્વનસ્પતિભિ રોષધીભિર્વરિવ સ્કૃદસીતીમામજયન્ પ્રાચ્યસીતિ
પ્રાચીં દિશમજયન્નૂર્ધ્વાસીત્ય મૂમજયન્નન્તરિક્ષ સદસ્યન્તરિક્ષે
સીદેત્યન્તરિક્ષમજયન્તતો દેવા અભવન્

૪૫ પરાસુરા યસ્યૈતા ઉપધીયન્તે ભૂયાનેવ
ભવત્યભીમાઉ ઁ લ્લોકાઞ્જયતિ ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો
ભવત્યપ્સુષદસિ શ્યેનસદસીત્યાહૈતદ્વા અગ્ને રૂપ ઁ રૂપેણૈવાગ્નિમવ
રુંધે પૃથિવ્યાસ્ત્વા દ્રવિણે સાદયામીત્યાહેમાનેવૈતાભિર્લોકાન્ દ્રવિણાવતઃ
કુરુત આયુષ્યા ઉપ દધાત્યાયુરેવા

૪૬ ઽસ્મિન્દધાત્યગ્ને યત્તે પર ઁ હૃન્નામેત્યાહૈતદ્વા અગ્નેઃ પ્રિયં ધામ
પ્રિયમેવાસ્ય ધામોપાપ્નોતિ તાવેહિ સ ઁ રભાવહા ઇત્યાહ વ્યેવૈનેન
પરિ ધત્તે પાઞ્ચજન્યેષ્વપ્યેધ્યગ્ન ઇત્યાહૈષ વા અગ્નિઃ પાઞ્ચજન્યો
યઃ પઞ્ચચિતીકસ્તસ્માદેવમાહર્તવ્યા ઉપ દધાત્યેતદ્વા ઋતૂનાં
પ્રિયં ધામ યદૃતવ્યા ઋતૂનામેવ પ્રિયં ધામાવ રુંધે સુમેક
ઇત્યાહ સંવથ્સરો વૈ સુમેકઃ સંવથ્સરસ્યૈવ પ્રિયં ધામોપાપ્નોતિ ॥ ૫। ૩। ૧૧॥ અભવન્નાયુરેવર્તવ્યા ઉપ
ષડ્વિ ઁશતિશ્ચ ॥ ૫। ૩। ૧૧॥

૪૭ પ્રજાપતેરક્ષ્યશ્વયત્ તત્ પરાપતત્ તદશ્વોઽભવદ્યદશ્વયત્
તદશ્વસ્યાશ્વત્વં તદ્દેવા અશ્વમેધેનૈવ પ્રત્યદધુરેષ વૈ
પ્રજાપતિꣳ સર્વં કરોતિ યોઽશ્વમેધેન યજતે સર્વ એવ
ભવતિ સર્વસ્ય વા એષા પ્રાયશ્ચિત્તિઃ સર્વસ્ય ભેષજꣳ સર્વં વા
એતેન પાપ્માનં દેવા અતરન્નપિ વા એતેન બ્રહ્મહત્યામતરન્થ્સર્વં
પાપ્માનં

૪૮ તરતિ તરતિ બ્રહ્મહત્યાં યોઽશ્વમેધેન યજતે ય ઉ ચૈનમેવં
વેદોત્તરં વૈ તત્ પ્રજાપતેરક્ષ્યશ્વયત્ તસ્માદશ્વસ્યોત્તરતોઽવ
દ્યન્તિ દક્ષિણતોઽન્યેષાં પશૂનાં વૈતસઃ કટો ભવત્યપ્સુયોનિર્વા
અશ્વોઽપ્સુજો વેતસઃ સ્વ એવૈનં યોનૌ પ્રતિષ્ઠાપયતિ ચતુષ્ટોમઃ સ્તોમો
ભવતિ સરડ્ઢ વા અશ્વસ્ય સક્થ્યાવૃહત્તદ્દેવાશ્ચતુષ્ટોમેનૈવ
પ્રત્યદધુર્યચ્ચતુષ્ટોમઃ સ્તોમો ભવત્યશ્વસ્ય સર્વત્વાય ॥ ૫। ૩। ૧૨॥

સર્વં પાપ્માનમવૃહદ્દ્વાદશ ચ ॥ ૫। ૩। ૧૨॥

ઉત્સન્ન યજ્ઞ ઇંદ્રાગ્ની દેવા વા અક્ષણયા સ્તોમીયા અગ્નેર્ભાગોઽસ્યગ્ને
જાતાન્ રશ્મિરિતિ નાકસદ્ભિશ્છંદાꣳસિ સર્વાભ્યો વૃષ્ટિસનીર્દેવાસુરાઃ
કનીયાꣳ સઃ પ્રજાપતેરક્ષિ દ્વાદશ ॥

ઉત્સન્ન યજ્ઞો દેવા વૈ યસ્ય મુખ્યવતીર્નાક સદ્ભિરેવૈતાભિરષ્ટા
ચત્વારિꣳશત્ ॥

ઉત્સન્ન યજ્ઞઃ સર્વત્વાય ॥

## પઞ્ચમકાણ્ડે ચતુર્થઃ પ્રશ્નઃ ૪

૧ દેવાસુરાઃ સંયત્તા આસન્તેન વ્યજયન્ત સ એતા ઇન્દ્રસ્તનૂરપશ્યત્તા
ઉપાધત્ત તાભિર્વૈ સ તનુવમિંદ્રિયં વીર્યમાત્મન્નધત્ત તતો દેવા
અભવન્પરાસુરા યદિન્દ્રતનૂરુપદધાતિ તનુવમેવ તાભિરિંદ્રિયં
વીર્યં યજમાન આત્મન્ધત્તેઽથો સેન્દ્રમેવાગ્નિꣳ સતનું ચિનુતે
ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો

૨ ભવતિ યજ્ઞો દેવેભ્યોઽપાક્રામત્તમવરુધં નાશક્નુવન્ત એતા
યજ્ઞતનૂરપશ્યન્તા ઉપાદધત તાભિર્વૈ તે યજ્ઞમવારુંધત
યદ્યજ્ઞતનૂરુપદધાતિ યજ્ઞમેવ તાભિર્યજમાનોઽવ રુંધે
ત્રયસ્ત્રિઁ શતમુપ દધાતિ ત્રયસ્ત્રિઁ શદ્વૈ દેવતા દેવતા
એવાવ રુંધેઽથો સાત્માનમેવાગ્નિઁ સતનું ચિનુતે સાત્મામુષ્મિઉઁ
લ્લોકે

૩ ભવતિ ય એવં વેદ જ્યોતિષ્મતીરુપ દધાતિ
જ્યોતિરેવાસ્મિન્દધાત્યેતાભિર્વા અગ્નિશ્ચિતો જ્વલતિ તાભિરેવૈનઁ
સમિન્ધ ઉભયોરસ્મૈ લોકયોર્જ્યોતિર્ભવતિ નક્ષત્રેષ્ટકા ઉપ દધાત્યેતાનિ
વૈ દિવો જ્યોતીઁષિ તાન્યેવાવ રુંધે સુકૃતાં વા એતાનિ જ્યોતીઁષિ
યન્નક્ષત્રાણિ તાન્યેવાપ્નોત્યથો અનૂકાશમેવૈતાનિ

૪ જ્યોતીઁષિ કુરુતે સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યૈ યથ્સરઁ સ્પૃષ્ટા
ઉપદધ્યાદ્વૃષ્ટ્યૈ લોકમપિ દધ્યાદવર્ષુકઃ પર્જન્યઃ સ્યાદસગ્ગ્
સ્પૃષ્ટા ઉપ દધાતિ વૃષ્ટ્યા એવ લોકં કરોતિ વર્ષુકઃ પર્જન્યો ભવતિ
પુરસ્તાદન્યાઃ પ્રતીચીરુપ દધાતિ પશ્ચાદન્યાઃ પ્રાચીસ્તસ્માત્પ્રાચીનાનિ
ચ પ્રતીચીનાનિ ચ નક્ષત્રાણ્યા વર્તન્તે ॥ ૫। ૪। ૧॥ ભ્રાતૃવ્યો લોક
એવૈતાન્યેક ચત્વારિઁ શચ્ચ ॥ ૫। ૪। ૧॥

૫ ઋતવ્યા ઉપ દધાત્યૃતૂનાં ક્લૃપ્ત્યૈ દ્વન્દ્વમુપ દધાતિ
તસ્માદ્દ્વન્દ્વમૃતવોઽધૃતેવ વા એષા યન્મધ્યમા ચિતિરન્તરિક્ષમિવ
વા એષા દ્વન્દ્વમન્યાસુ ચિતીષૂપ દધાતિ ચતસ્રો મધ્યે ધૃત્યા અન્તઃ
શ્લેષણં વા એતાશ્ચિતીનાં યદૃતવ્યા યદૃતવ્યા ઉપ દધાતિ
ચિતીનાં વિધૃત્યા અવકામનૂપ દધાત્યેષા વા અગ્નેર◌્યોનિઃ સયોનિ

૬ મેવાગ્નિં ચિનુત ઉવાચ હ વિશ્વામિત્રોઽદદિથ્સ બ્રહ્મણાન્નં
યસ્યૈતા ઉપધીયાન્તૈ ય ઉ ચૈના એવં વેદદિતિ સંવથ્સરો વા એતં
પ્રતિષ્ઠાયૈ નુદતે યોઽગ્નિં ચિત્વા ન પ્રતિતિષ્ઠતિ પઞ્ચ
પૂર્વાશ્ચિતયો ભવન્ત્યથષષ્ઠીં ચિતિં ચિનુતે ષડ્વા ઋતવઃ
સંવથ્સર ઋતુષ્વેવ સંવથ્સરે પ્રતિ તિષ્ઠત્યેતા વા

૭ અધિપત્નીર્નામેષ્ટકા યસ્યૈતા ઉપધીયન્તેઽધિપતિરેવ
સમાનાનાં ભવતિ યં દ્વિષ્યાત્તમુપદધદ્ધ્યાયેદેતાભ્ય
એવૈનં દેવતાભ્ય આ વૃશ્ચતિ તાજગાર્તિમાર્ચ્છત્યંગિરસઃ
સુવર્ગં લોકં યન્તો યા યજ્ઞસ્ય નિષ્કૃતિરાસીત્તામૃષિભ્યઃ
પ્રત્યૌહન્તદ્ધિરણ્યમભવદ્યદ્ધિરણ્યશલ્કૈઃ પ્રોક્ષતિ યજ્ઞસ્ય
નિષ્કૃત્યા અથો ભેષજમેવાસ્મૈ કરો
૮ ઽત્યથો રૂપેણૈવૈન ँ સમર્ધયત્યથો હિરણ્યજ્યોતિષૈવ સુવર્ગં
લોકમેતિ સાહસ્રવતા પ્રોક્ષતિ સાહસ્રઃ પ્રજાપતિઃ પ્રજાપતેરાપ્ત્યા
ઇમા મે અગ્ન ઇષ્ટકા ધેનવઃ સન્ત્વિત્યાહ ધેનૂરેવૈનાઃ કુરુતે તા એનં
કામદુઘા અમુત્રામુષ્મિઉँ લ્લોક ઉપ તિષ્ઠન્તે ॥ ૫। ૪। ૨॥ સયોનિમેતા
વૈ કરોત્યેકાન્ન ચત્વારિ ँ શચ્ચ ॥ ૫। ૪। ૨॥
૯ રુદ્રો વા એષ યદગ્નિઃ સ એતર્હિ જાતો યર્હિ સર્વશ્ચિતઃ સ યથા
વત્સો જાતઃ સ્તનં પ્રેપ્સત્યેવં વા એષ એતર્હિ ભાગધેયં પ્રેપ્સતિ
તસ્મૈ યદાહુતિં ન જુહુયાદધ્વર્યું ચ યજમાનં ચ ધ્યાયેચ્છતરુદ્રીયં
જુહોતિ ભાગધેયેનૈવૈન ँશમયતિ નાર્તિમાર્ચ્છત્યધ્વર્યુર્ન યજમાનો
યદ્ગ્રામ્યાણાં પશૂનાં
૧૦ પયસા જુહુયાદ્ ગ્રામ્યાન્ પશૂઞ્છુચાર્પયેદ્યદારણ્યાનામારણ્યાઞ્જર્તિ
લયવાગ્વા વા જુહુયાદ્ગવીધુકયવાગ્વા વા ન ગ્રામ્યાન્પશૂન્
હિનસ્તિ નારણ્યાનથો ખલ્વાહુરનાહુતિર્વૈ જર્તિલાશ્ચ
ગવીધુકાશ્ચેત્યજક્ષીરેણ જુહોત્યાગ્નેયી વા એષા યદજાઽહુત્યૈવ જુહોતિ
ન ગ્રામ્યાન્પશૂન્ હિનસ્તિ નારણ્યાનંગિરસઃ સુવર્ગં લોકં યન્તો
૧૧ ઽજાયાં ઘર્મં પ્રાસિઞ્ચન્ત્સા શોચન્તી પર્ણં પરાજિહીત
સોરઽર્કોઽભવત્તદર્કસ્યાર્કત્વમર્કપર્ણેન જુહોતિ
સયોનિત્વાયોદઙ્તિષ્ઠઞ્જુહોત્યેષા વૈ રુદ્રસ્ય દિક્સ્વાયામેવ દિશિ
રુદ્રં નિરવદયતે ચરમાયામિષ્ટકાયાં જુહોત્યન્તત એવ રુદ્રં
નિરવદયતે ત્રેધાવિભક્તં જુહોતિ ત્રય ઇમે લોકા ઇમાનેવ
લોકાન્ત્સમાવદ્વીર્યાન્કરોતીયત્યગ્રે જુહો

૧૨ ઽત્યથેયત્યથેયતિ ત્રય ઇમે લોકા એભ્ય એવૈનં
લોકેભ્યઃ શમયતિ તિસ્ર ઉત્તરા આહુતીર્જુહોતિ ષટ્થ્સં પદ્યન્તે
ષડ્વા ઋતવ ઋતુભિરેવૈન~ꣳશમયતિ યદનુપરિક્રામં
જુહુયાદન્તરવચારિણ~ꣳરુદ્રં કુર્યાદથો ખલ્વાહુઃ કસ્યાં વાહ
દિશિ રુદ્રઃ કસ્યાં વેત્યનુપરિક્રામમેવ હોતવ્યમપરિવર્ગમેવૈન~ꣳ
શમય
૧૩ ત્યેતા વૈ દેવતાઃ સુવર્ગ્યા યા ઉત્તમાસ્તા યજમાનં વાચયતિ
તાભિરેવૈન~ꣳસુવર્ગં લોકં ગમયતિ યં દ્વિષ્યાત્તસ્ય સઞ્ચરે
પશૂનાં ન્યસ્યેદ્યઃ પ્રથમઃ પશુરભિતિષ્ઠતિ સ આર્તિમાર્ચ્છતિ
॥ ૫। ૪। ૩॥ પશૂનાં યન્તોઽગ્રે જુહોત્યપરિવર્ગમેવૈન~ꣳશમયતિ
ત્રિ~ꣳશચ્ચ ॥ ૫। ૪। ૩॥
૧૪ અશ્મન્નૂર્જમિતિ પરિ ષિઞ્ચતિ માર્જયત્યેવૈનમથો તર્પયત્યેવ
સ એનં તૃપ્તોઽક્ષુધ્યન્નશોચન્નમુષ્મિꣳલ્લોક ઉપ તિષ્ઠતે
તૃપ્યતિ પ્રજયા પશુભિર્ય એવં વેદ તાં ન ઇષમૂર્જં ધત્ત મરુતઃ
સ~ꣳરરાણા ઇત્યાહાન્નં વા ઊર્ગન્નં મરુતોઽન્નમેવાવ રુંધેઽશ્મગ્ગ્સ્તે
ક્ષુદમું તે શુ
૧૫ ગૃચ્છતુ યં દ્વિષ્મ ઇત્યાહ યમેવ દ્વેષ્ટિ તમસ્ય ક્ષુધા ચ શુચા
ચાર્પયતિ ત્રિઃ પરિષિઞ્ચન્પર્યેતિ ત્રિવૃદ્વા અગ્નિર્યાવાનેવાગ્નિસ્તસ્ય
શુચ~ꣳશમયતિ ત્રિઃ પુનઃ પર્યેતિ ષટ્થ્સં પદ્યન્તે ષડ્વા ઋતવ
ઋતુભિરેવાસ્ય શુચ~ꣳશમયત્યપાં વા એતત્પુષ્પં યદ્વેતસોઽપા~ꣳ
૧૬ શરોઽવકા વેતસશાખયા ચાવકાભિશ્ચ વિ કર્ષત્યાપો વૈ શાન્તાઃ
શાન્તાભિરેવાસ્ય શુચ~ꣳશમયતિ યો વા અગ્નિં ચિતં પ્રથમઃ
પશુરધિક્રામતીશ્વરો વૈ ત~ꣳ શુચા પ્રદહો મણ્ડૂકેન વિ
કર્ષત્યેષ વૈ પશૂનામનુપજીવનીયો ન વા એષ ગ્રામ્યેષુ પશુષુ
હિતો નારણ્યેષુ તમેવ શુચાર્પયત્યષ્ટાભિર્વિ કર્ષ
૧૭ ત્યષ્ટાક્ષરા ગાયત્રી ગાયત્રોઽગ્નિર્યાવાનેવાગ્નિસ્તસ્ય
શુચ~ꣳશમયતિ પાવકવતીભિરન્નં વૈ પાવકોઽન્નેનૈવાસ્ય

શુચ ँશમયતિ મૃત્યુર્વા એષ યદગ્નિર્બ્રહ્મણ એતદ્રૂપં
યત્કૃષ્ણાજિનં કાર્ષ્ણી ઉપાનહાવુપ મુઞ્ચતે બ્રહ્મણૈવ
મૃત્યોરન્તર્ધત્તેઽન્તર્મૃત્યોર્ધત્તેઽન્તરન્નાદ્યાદિત્યાહુરન્યામુપમુઞ્ચતેઽન્યાન્નાન્ત
૧૮ રેવ મૃત્યોર્ધત્તેઽવાન્નાદ્ય ँરુંધે નમસ્તે હરસે શોચિષ
ઇત્યાહ નમસ્કૃત્ય હિ વસીયા ँ સમુપચરન્ત્યન્યં તે અસ્મત્તપન્તુ
હેતય ઇત્યાહ યમેવ દ્વેષ્ટિ તમસ્ય શુચાર્પયતિ પાવકો
અસ્મભ્ય ँશિવો ભવેત્યાહાન્નં વૈ પાવકોઽન્નમેવાવ રુંધે
દ્વાભ્યામધિ ક્રામતિ પ્રતિષ્ઠિત્યા અપસ્યવતીભ્યા ँ શાન્ત્યૈ ॥ ૫। ૪। ૪॥
શુગ્વેતસોઽપામષ્ટાભિર્વિ કર્ષતિ નાન્તરેકાન્ન પંચાશચ્ચ ॥ ૫। ૪। ૪॥
૧૯ નૃષદે વડિતિ વ્યાઘારયતિ પઙ્ક્ત્યાહુત્યા યજ્ઞમુખમા રભતેઽક્ષ્ણયા
વ્યાઘારયતિ તસ્માદક્ષ્ણયા પશવોઽઙ્ગાનિ પ્ર હરન્તિ પ્રતિષ્ઠિત્યૈ
યદ્વષટ્કુર્યાદ્યાતયામાસ્ય વષટ્કારઃ સ્યાદ્યન્ન વષટ્કુર્યાદ્રક્ષા ँસિ
યજ્ઞ ँ હન્યુર્વડિત્યાહ પરોઽક્ષમેવ વષટ્ કરોતિ નાસ્ય યાતયામા
વષટ્કારો ભવતિ ન યજ્ઞ ँ રક્ષા ँસિ ઘ્નન્તિ હુતાદો વા અન્યે દેવા
૨૦ અહુતાદોઽન્યે તાનગ્નિચિદેવોભયાન્પ્રીણાતિ યે દેવા દેવાનામિતિ
દધ્ના મધુમિશ્રેણાવોક્ષતિ હુતાદશ્ચૈવ દેવાનહુતાદશ્ચ
યજમાનઃ પ્રીણાતિ તે યજમાનં પ્રીણન્તિ દધ્નૈવ હુતાદઃ પ્રીણાતિ
મધુષાઽહુતાદો ગ્રામ્યં વા એતદન્નં યદ્દધ્યારણ્યં મધુ યદ્દધ્ના
મધુમિશ્રેણાવોક્ષત્યુભયસ્યાવરુદ્ધ્યૈ ગ્રુમુષ્ટિનાવોક્ષતિ પ્રાજાપત્યો
૨૧ વૈ ગ્રુમુષ્ટિઃ સયોનિત્વાય દ્વાભ્યાં પ્રતિષ્ઠિત્યા
અનુપરિચારમવોક્ષત્યપરિવર્ગમેવૈનાન્પ્રીણાતિ વિ વા એષ પ્રાણૈઃ પ્રજયા
પશુભિરૃધ્યતે યોઽગ્નિં ચિન્વન્નધિ ક્રામતિ પ્રાણદા અપાનદા ઇત્યાહ
પ્રાણાનેવાત્મન્ધત્તે વર્ચોદા વરિવોદા ઇત્યાહ પ્રજા વૈ વર્ચઃ પશવો
વરિવઃ પ્રજામેવ પશૂનાત્મન્ધત્ત ઇન્દ્રો વૃત્રમહન્તં વૃત્રો
૨૨ હતઃ ષોડશભિર્ભોગૈરસિનાત્સ એતામગ્નયેઽનીકવત
આહુતિમપશ્યત્તામજુહોત્તસ્યાગ્નિરનીકવાન્સ્વેન ભાગધેયેન
પ્રીતઃ ષોડશધા વૃત્રસ્ય ભોગાનપ્યદહદ્વૈશ્વકર્મણેન પાપ્મનો

નિરમુચ્યત યદગ્નયેઽનીકવત આહુતિં જુહોત્યગ્નિરેવાસ્યાનીકવાન્થ્સ્વેન
ભાગધેયેન પ્રીતઃ પાપ્માનમપિ દહતિ વૈશ્વકર્મણેન પાપ્મનો
નિર્મુચ્યતે યં કામયેત ચિરં પાપ્મનો

૨૩ નિર્મુચ્યેતેત્યેકૈકં તસ્ય જુહુયાચ્ચિરમેવ પાપ્મનો નિર્મુચ્યતે
યં કામયેત તાજક્પાપ્મનો નિર્મુચ્યેતેતિ સર્વાણિ તસ્યાનુદ્રુત્ય
જુહુયાત્તાજગેવ પાપ્મનો નિર્મુચ્યતેઽથો ખલુ નાનૈવ સૂક્તાભ્યાં
જુહોતિ નાનૈવ સૂક્તયોર્વીર્યં દધાત્યથો પ્રતિષ્ઠિત્યૈ ॥ ૫। ૪। ૫॥
દેવાઃ પ્રાજાપત્યો વૃત્રશ્ચિરં પાપ્મનશ્ચત્વારિ ꣳ શચ્ચ ॥ ૫। ૪। ૫॥

૨૪ ઉદેનમુત્તરાં નયેતિ સમિધ આ દધાતિ યથા જનં યતેઽવ સં
કરોતિ તાદૃગેવ તત્તિસ્ર આ દધાતિ ત્રિવૃદ્વા અગ્નિર્યાવાનેવાગ્નિસ્તસ્મૈ
ભાગધેયં કરોત્યૌદુંબરીર્ભવન્ત્યૂર્ગ્વા ઉદુંબર ઊર્જમેવાસ્મા અપિ
દધાત્યુદુ ત્વા વિશ્વે દેવા ઇત્યાહ પ્રાણા વૈ વિશ્વે દેવાઃ પ્રાણૈ

૨૫ રેવૈનમુદ્યચ્છતેઽગ્ને ભરન્તુ ચિત્તિભિરિત્યાહ યસ્મા
એવૈનં ચિત્તાયોદ્યચ્છતે તેનૈવૈન ꣳ સમર્ધયતિ
પઞ્ચ દિશો દૈવીર્યજ્ઞમવન્તુ દેવીરિત્યાહ દિશો હ્યેષોઽનુ
પ્રચ્યવતેઽપામતિં દુર્મતિં બાધમાના ઇત્યાહ રક્ષસામપહત્યૈ
રાયસ્પોષે યજ્ઞપતિમાભજન્તીરિત્યાહ પશવો વૈ રાયસ્પોષઃ

૨૬ પશૂનેવાવ રુંધે ષડ્ભિર્હરતિ ષડ્વા ઋતવ ઋતુભિરેવૈન ꣳ
હરતિ દ્વે પરિગૃહ્યવતી ભવતો રક્ષસામપહત્યૈ
સૂર્યરશ્મિર્હરિકેશઃ પુરસ્તાદિત્યાહ પ્રસૂત્યૈ તતઃ પાવકા આશિષો
નો જુષન્તામિત્યાહાન્નં વૈ પાવકોઽન્નમેવાવ રુંધે દેવાસુરાઃ સંયત્તા
આસન્તે દેવા એતદપ્રતિરથમપશ્યન્તેન વૈ તે પ્રત્ય

૨૭ સુરાનજયન્તદપ્રતિરથસ્યાપ્રતિરથત્વં યદપ્રતિરથં દ્વિતીયો
હોતાન્વાહાપ્રત્યેવ તેન યજમાનો ભ્રાતૃવ્યાઞ્જયત્યથો
અનભિજિતમેવાભિ જયતિ દશર્ચં ભવતિ દશાક્ષરા વિરાડ્વિરાજેમૌ
લોકૌ વિધૃતાવનયોર્લોકયોર્વિધૃત્યા અથો દશાક્ષરા
વિરાડન્નં વિરાડ્વિરાજ્યેવાન્નાદ્યે પ્રતિ તિષ્ઠત્યસદિવ વા

અન્તરિક્ષમન્તરિક્ષમિવાગ્નીધ્રમાગ્નીધ્રે
૨૮ ઽશ્માનં નિ દધાતિ સત્ત્વાય દ્વાભ્યાં પ્રતિષ્ઠિત્યૈ વિમાન એષ
દિવો મધ્ય આસ્ત ઇત્યાહ વ્યેવૈતયા મિમીતે મધ્યે દિવો નિહિતઃ
પૃશ્નિરશ્મેત્યાહાન્નં વૈ પૃશ્ન્યન્નમેવાવ રુંધે ચતસૃભિરા પુચ્છાદેતિ
ચત્વારિ છન્દાꣳસિ છન્દોભિરેવેન્દ્રં વિશ્વા અવીવૃધન્નિત્યાહ
વૃદ્ધિમેવોપાવર્તતે વાજાનાꣳ સત્પતિં પતિ
૨૯ મિત્યાહાન્નં વૈ વાજોઽન્નમેવાવ રુંધે સુમ્નહૂર્યજ્ઞો દેવાꣳ આ ચ
વક્ષદિત્યાહ પ્રજા વૈ પશવઃ સુમ્નં પ્રજામેવ પશૂનાત્મન્ધત્તે
યક્ષદગ્નિર્દેવો દેવાꣳ આ ચ વક્ષદિત્યાહ સ્વગાકૃત્યૈ વાજસ્ય મા
પ્રસવેનોદ્ગ્રાભેણોદગ્રભીદિત્યાહાસૌ વા આદિત્ય ઉદ્યન્નુદ્ગ્રાભ એષ
નિમ્રોચન્નિગ્રાભો બ્રહ્મણૈવાત્માનમુદ્ગૃહ્ણાતિ બ્રહ્મણા ભ્રાતૃવ્યં
નિ ગૃહ્ણાતિ ॥ ૫। ૪। ૬॥ પ્રાણૈઃ પોષોઽપ્રત્યાગ્નીદ્ધ્રે પતિમેષ દશ
ચ ॥ ૫। ૪। ૬॥
૩૦ પ્રાચીમનુ પ્રદિશં પ્રેહિ વિદ્વાનિત્યાહ દેવલોકમેવૈતયોપાવર્તતે
ક્રમધ્વમગ્નિના નાકમિત્યાહેમાનેવૈતયા લોકાન્ક્રમતે પૃથિવ્યા
અહમુદન્તરિક્ષમારુહમિત્યાહેમાનેવૈતયા લોકાન્થ્સમારોહતિ
સુવર્યન્તો નાપેક્ષન્ત ઇત્યાહ સુવર્ગમેવૈતયા લોકમેત્યગ્ને પ્રેહિ
૩૧ પ્રથમો દેવયતામિત્યાહોભયેષ્વેવૈતયા દેવમનુષ્યેષુ ચક્ષુર્દધાતિ
પઞ્ચભિરધિ ક્રામતિ પાઙ્ક્તો યજ્ઞો યાવાનેવ યજ્ઞસ્તેન સહ
સુવર્ગં લોકમેતિ નક્તોષાસેતિ પુરોઽનુવાક્યામન્વાહ પ્રત્ત્યા અગ્ને
સહસ્રાક્ષેત્યાહ સાહસ્રઃ પ્રજાપતિઃ પ્રજાપતેરાપ્ત્યૈ તસ્મૈ તે વિધેમ
વાજાય સ્વાહેત્યાહાન્નં વૈ વાજોઽન્નમેવાવ
૩૨ રુંધે દધ્નઃ પૂર્ણામૌદુંબરીગ્ સ્વયમાતૃણ્ણાયાં જુહોત્યૂર્ગ્વૈ
દધ્યૂર્ગુદુંબરોઽસૌ સ્વયમાતૃણ્ણામુષ્યામેવોર્જં દધાતિ
તસ્માદમુતોઽર્વાચીમૂર્જમુપ જીવામસ્તિસૃભિઃ સાદયતિ ત્રિવૃદ્વા
અગ્નિર્યાવાનેવાગ્નિસ્તં પ્રતિષ્ઠાં ગમયતિ પ્રેદ્ધો અગ્ને દીદિહિ પુરો ન
ઇત્યૌદુંબરીમા દધાત્યેષા વૈ સૂર્મી કર્ણકાવત્યેતયા હ સ્મ

૩૩ વૈ દેવા અસુરાણાꣳ શતતર્હાꣳસ્તૃꣳહન્તિ યદેતયા
સમિધમાદધાતિ વજ્રમેવૈતચ્છતઘ્નીં યજમાનો ભ્રાતૃવ્યાય
પ્ર હરતિ સ્તૃત્યા અછંબટ્કારં વિધેમ તે પરમે જન્મન્નગ્ન ઇતિ
વૈકઙ્કતીમા દધાતિ ભા એવાવ રુંધે તાꣳ સવિતુર્વરેણ્યસ્ય
ચિત્રામિતિ શમીમયીꣳ શાન્ત્યા અગ્નિર્વા હ વા અગ્નિચિતં
દુહેઽગ્નિચિદ્વાગ્નિં દુહે તાꣳ
૩૪ સવિતુર્વરેણ્યસ્ય ચિત્રામિત્યાહૈષ વા અગ્નેર્દોહસ્તમસ્ય કણ્વ
એવ શ્રાયસોઽવેત્તેન હ સ્મૈનꣳ સ દુહે યદેતયા સમિધમા
દધાત્યગ્નિચિદેવ તદગ્નિં દુહે સપ્ત તે અગ્ને સમિધઃ સપ્ત જિહ્વા
ઇત્યાહ સપ્તૈવાસ્ય સાપ્તાનિ પ્રીણાતિ પૂર્ણયા જુહોતિ પૂર્ણ ઇવ હિ પ્રજાપતિઃ
પ્રજાપતે
૩૫ રાપ્ત્યૈ ન્યૂનયા જુહોતિ ન્યૂનાદ્ધિ પ્રજાપતિઃ પ્રજા અસૃજત
પ્રજાનાꣳ સૃષ્ટ્યા અગ્નિર્દેવેભ્યો નિલાયત સ દિશોઽનુ
પ્રાવિશજ્જુહ્વન્મનસા દિશો ધ્યાયેદ્દિગ્ભ્ય એવૈનમવ રુંધે દધ્ના
પુરસ્તાજ્જુહોત્યાજ્યેનોપરિષ્ટાત્તેજશ્ચૈવાસ્મા ઇંદ્રિયં ચ સમીચી
દધાતિ દ્વાદશકપાલો વૈશ્વાનરો ભવતિ દ્વાદશ માસાઃ સંવથ્સરઃ
સંવથ્સરોઽગ્નિર્વૈશ્વાનરઃ સાક્ષા
૩૬ દેવ વૈશ્વાનરમવ રુંધે યત્પ્રયાજાનૂયાજાન્કુર્યાદ્વિકસ્તિઃ સા
યજ્ઞસ્ય દર્વિહોમં કરોતિ યજ્ઞસ્ય પ્રતિષ્ઠિત્યૈ રાષ્ટ્રં વૈ વૈશ્વાનરો
વિણ્મરુતો વૈશ્વાનરꣳ હુત્વા મારુતાઞ્જુહોતિ રાષ્ટ્ર એવ વિશમનુ
બધ્નાત્યુચ્ચૈર્વૈશ્વાનરસ્યા શ્રાવયત્યુપાꣳશુ મારુતાઞ્જુહોતિ
તસ્માદ્રાષ્ટ્રં વિશમતિ વદતિ મારુતા ભવન્તિ મરુતો વૈ દેવાનાં વિશો
દેવવિશેનૈવાસ્મૈ મનુષ્યવિશમવ રુંધે સપ્ત ભવન્તિ સપ્તગણા વૈ
મરુતો ગણશ એવ વિશમવ રુંધે ગણેન ગણમનુદ્રુત્ય જુહોતિ
વિશમેવાસ્મા અનુવર્ત્માનં કરોતિ ॥ ૫। ૪। ૭॥ અગ્ને પ્રેહ્યવ સ્મ દુહે તાં
પ્રજાપતેઃ સાક્ષાન્મનુષ્યવિશમેક વિꣳશતિશ્ચ ॥ ૫। ૪। ૭॥
૩૭ વસોર્ધારાં જુહોતિ વસોર્મે ધારાસદિતિ વા એષા હૂયતે ઘૃતસ્ય

વા એનમેષા ધારામુષ્મિઁલ્લોકે પિન્વમાનોપ તિષ્ઠત આજ્યેન જુહોતિ
તેજો વા આજ્યં તેજો વસોર્ધારા તેજસૈવાસ્મૈ તેજોઽવ રુંધેઽથો કામા
વૈ વસોર્ધારા કામાનેવાવ રુંધે યં કામયેત પ્રાણાનસ્યાન્નાદ્યં વિ
૩૮ ચ્છિન્દ્યામિતિ વિગ્રાહં તસ્ય જુહુયાત્પ્રાણાનેવાસ્યાન્નાદ્યં વિ ચ્છિનત્તિ
યં કામયેત પ્રાણાનસ્યાન્નાદ્યઁ સં તનુયામિતિ સંતતાં તસ્ય
જુહુયાત્પ્રાણાનેવાસ્યાન્નાદ્યઁ સં તનોતિ દ્વાદશ દ્વાદશાનિ જુહોતિ
દ્વાદશ માસાઃ સંવથ્સરઃ સંવથ્સરેણૈવાસ્મા અન્નમવ રુંધેઽન્નં
ચ મેઽક્ષુચ્ચ મ ઇત્યાહૈતદ્વા
૩૯ અન્નસ્ય રૂપઁ રૂપેણૈવાન્નમવ રુંધેઽગ્નિશ્ચ મ આપશ્ચ મ
ઇત્યાહૈષા વા અન્નસ્ય યોનિઃ સયોન્યેવાન્નમવ રુંધેઽર્ધેન્દ્રાણિ
જુહોતિ દેવતા એવાવ રુંધે યથ્સર્વેષામર્ધમિન્દ્રઃ
પ્રતિ તસ્માદિન્દ્રો દેવતાનાં ભૂયિષ્ઠભાક્તમ
ઇંદ્રમુત્તરમાહેન્દ્રિયમેવાસ્મિન્નુપરિષ્ટાદ્ધાતિ યજ્ઞાયુધાનિ જુહોતિ યજ્ઞો
૪૦ વૈ યજ્ઞાયુધાનિ યજ્ઞમેવાવ રુંધેઽથો એતદ્વૈ યજ્ઞસ્ય રૂપઁ
રૂપેણૈવ યજ્ઞમવ રુંધેઽવભૃથશ્ચ મે સ્વગાકારશ્ચ મ ઇત્યાહ
સ્વગાકૃત્યા અગ્નિશ્ચ મે ઘર્મશ્ચ મ ઇત્યાહૈતદ્વૈ બ્રહ્મવર્ચસસ્ય
રૂપઁ રૂપેણૈવ બ્રહ્મવર્ચસમવ રુંધ ઋક્ચ મે સામ ચ મ
ઇત્યાહૈ
૪૧ તદ્વૈ છંદસાઁ રૂપઁ રૂપેણૈવ છન્દાગ્સ્યવ રુંધે ગર્ભાશ્ચ
મે વથ્સાશ્ચ મ ઇત્યાહૈતદ્વૈ પશૂનાઁ રૂપઁ રૂપેણૈવ
પશૂનવ રુંધે કલ્પાઞ્જુહોત્યક્લૃપ્તસ્ય ક્લૃપ્ત્યૈ યુગ્મદયુજે જુહોતિ
મિથુનત્વાયોત્તરાવતી ભવતોઽભિક્રાન્ત્યા એકા ચ મે તિસ્રશ્ચ મ
ઇત્યાહ દેવછંદસં વા એકા ચ તિસ્રશ્ચ
૪૨ મનુષ્યછંદસં ચતસ્રશ્ચાષ્ટૌ ચ દેવછંદસં ચૈવ મનુષ્યછંદસં
ચાવ રુંધ આ ત્રયસ્ત્રિઁશતો જુહોતિ ત્રયસ્ત્રિઁશદ્વૈ દેવતા દેવતા
એવાવ રુંધ આષ્ટાચત્વારિઁશતો જુહોત્યષ્ટાચત્વારિઁશદક્ષરા જગતી
જાગતાઃ પશવો જગત્યૈવાસ્મૈ પશૂનવ રુંધે વાજશ્ચ પ્રસવશ્ચેતિ

દ્વાદશં જુહોતિ દ્વાદશ માસાઃ સંવથ્સરઃ સંવથ્સર એવ પ્રતિ
તિષ્ઠતિ ॥ ૫। ૪। ૮॥ વિ વૈ યજ્ઞઃ સામ ચ મ ઇત્યાહ ચ તિસ્રશ્ચૈકાન્ન
પંચાશચ્ચ ॥ ૫। ૪। ૮॥

૪૩ અગ્નિર્દેવેભ્યોઽપાક્રામદ્ભાગધેયમિચ્છમાનસ્તં દેવા અબ્રુવન્નુપ
ન આ વર્તસ્વ હવ્યં નો વહેતિ સોઽબ્રવીદ્વરં વૃણૈ મહ્યમેવ
વાજપ્રસવીયં જુહવન્નિતિ તસ્માદગ્નયે વાજપ્રસવીયં જુહ્વતિ
યદ્વાજપ્રસવીયં જુહોત્યગ્નિમેવ તદ્ભાગધેયેન સમર્ધયત્યથો
અભિષેક એવાસ્ય સ ચતુર્દશભિર્જુહોતિ સપ્ત ગ્રામ્યા ઓષધયઃ સપ્તા
૪૪ ઽરણ્યા ઉભયીષામવરુદ્ધ્યા અન્નસ્યાન્નસ્ય જુહોત્યન્નસ્યાન્નસ્યાવરુદ્ધ્યા
ઔદુંબરેણ સ્રુવેણ જુહોત્યૂર્ગ્વા ઉદુંબર ઊર્ગન્નમૂર્જૈવાસ્મા
ઊર્જમન્નમવ રુંધેઽગ્નિર્વૈ દેવાનામભિષિક્તોઽગ્નિચિન્મનુષ્યાણાં
તસ્માદગ્નિચિદ્વર્ષતિ ન ધાવેદવરુદ્ધગ્ગ્ હ્યસ્યાન્નમન્નમિવ
ખલુ વૈ વર્ષં યદ્ધાવેદન્નાદ્ધાવેદુપાવર્તેતાન્નાદ્યમેવાભ્યુ
૪૫ પાવર્તતે નક્તોષાસેતિ કૃષ્ણાયૈ શ્વેતવથ્સાયૈ પયસા
જુહોત્યહ્નૈવાસ્મૈ રાત્રિં પ્ર દાપયતિ રાત્રિયાહરહોરાત્રે એવાસ્મૈ
પ્રત્તે કામમન્નાદ્યં દુહાતે રાષ્ટ્રભૃતો જુહોતિ રાષ્ટ્રમેવાવ રુંધે
ષડ્ભિર્જુહોતિ ષડ્વા ઋતવ ઋતુષ્વેવ પ્રતિ તિષ્ઠતિ ભુવનસ્ય પત
ઇતિ રથમુખે પઞ્ચાહુતીર્જુહોતિ વજ્રો વૈ રથો વજ્રેણૈવ દિશો
૪૬ ઽભિ જયત્યગ્નિચિતઁહ વા અમુષ્મિઁલ્લોકે વાતોઽભિ પવતે
વાતનામાનિ જુહોત્યભ્યેવૈનમમુષ્મિઁલ્લોકે વાતઃ પવતે ત્રીણિ જુહોતિ
ત્રય ઇમે લોકા એભ્ય એવ લોકેભ્યો વાતમવ રુંધે સમુદ્રોઽસિ
નભસ્વાનિત્યાહૈતદ્વૈ વાતસ્ય રૂપઁ રૂપેણૈવ વાતમવ
રુંધેઽઞ્જલિના જુહોતિ ન હ્યેતેષામન્યથાહુતિરવકલ્પતે ॥ ૫। ૪। ૯॥
ઓષધયઃ સપ્તાભિ દિશોઽન્યથા દ્વે ચ ॥ ૫। ૪। ૯॥

૪૭ સુવર્ગાય વૈ લોકાય દેવરથો યુજ્યતે યત્રાકૂતાય મનુષ્યરથ
એષ ખલુ વૈ દેવરથો યદગ્નિરગ્નિં યુનજ્મિ શવસા ઘૃતેનેત્યાહ
યુનક્ત્યેવૈનઁ સ એનં યુક્તઃ સુવર્ગં લોકમભિ વહતિ

યથ્સર્વાભિઃ પઞ્ચભિર્યુઞ્જ્યાદ્યુક્તોઽસ્યાગ્નિઃ પ્રચ્યુતઃ સ્યાદપ્રતિષ્ઠિતા
આહુતયઃ સ્યુરપ્રતિષ્ઠિતાઃ સ્તોમા અપ્રતિષ્ઠિતાન્યુક્થાનિ તિસૃભિઃ
પ્રાતઃસવનેઽભિ મૃશતિ ત્રિવૃ

૪૮ દ્વા અગ્નિર્યાવાનેવાગ્નિસ્તં યુનક્તિ યથાનસિ યુક્ત આધીયત એવમેવ
તત્પ્રત્યાહુતયસ્તિષ્ઠન્તિ પ્રતિ સ્તોમાઃ પ્રત્યુક્થાનિ યજ્ઞાયજ્ઞિયસ્ય
સ્તોત્રે દ્વાભ્યામભિ મૃશત્યેતાવાન્, વૈ યજ્ઞો યાવાનગ્નિષ્ટોમો ભૂમા
ત્વા અસ્યાત ઊર્ધ્વઃ ક્રિયતે યાવાનેવ યજ્ઞસ્તમંતતોઽન્વારોહતિ
દ્વાભ્યાં પ્રતિષ્ઠિત્યા એકયાઽપ્રસ્તુતં ભવત્યથા

૪૯ ઽભિ મૃશત્યુપૈનમુત્તરો યજ્ઞો નમત્યથો સંતત્યૈ પ્ર વા
એષોઽસ્માउँ લ્લોકાચ્ચ્યવતે યોઽગ્નિં ચિનુતે ન વા એતસ્યાનિષ્ટક
આહુતિરવ કલ્પતે યાં વા એષોઽનિષ્ટક આહુતિં જુહોતિ સ્રવતિ વૈ
સા તાગ્ સ્રવન્તીં યજ્ઞોઽનુ પરા ભવતિ યજ્ઞં યજમાનો યત્પુનશ્ચિતિં
ચિનુત આહુતીનાં પ્રતિષ્ઠિત્યૈ પ્રત્યાહુતયસ્તિષ્ઠન્તિ

૫૦ ન યજ્ઞઃ પરાભવતિ ન યજમાનોઽષ્ટાવુપ દધાત્યષ્ટાક્ષરા ગાયત્રી
ગાયત્રેણૈવૈનં છંદસા ચિનુતે યદેકાદશ ત્રૈષ્ટુભેન યદ્દ્વાદશ
જાગતેન છન્દોભિરેવૈનં ચિનુતે નપાત્કો વૈ નામૈષોઽગ્નિર્યત્પુનશ્ચિતિર્ય
એવં વિદ્વાન્પુનશ્ચિતિં ચિનુત આ તૃતીયાત્પુરુષાદન્નમત્તિ યથા
વૈ પુનરાધેય એવં પુનશ્ચિતિર્યોઽગ્ન્યાધેયેન ન

૫૧ ર્ધ્નોતિ સ પુનરાધેયમા ધત્તે યોઽગ્નિં ચિત્વા નર્ધ્નોતિ સ
પુનશ્ચિતિં ચિનુતે યત્પુનશ્ચિતિં ચિનુત ઋદ્ધ્યા અથો ખલ્વાહુર્ન
ચેતવ્યેતિ રુદ્રો વા એષ યદગ્નિર્યથા વ્યાઘ્રँ સુપ્તં બોધયતિ
તાદૃગેવ તદથો ખલ્વાહુશ્ચેતવ્યેતિ યથા વસીયાँ સં ભાગધેયેન
બોધયતિ તાદૃગેવ તન્મનુરગ્નિમચિનુત તેન નાર્ધ્નોથ્સ એતાં
પુનશ્ચિતિમપશ્યત્તામચિનુત તયા વૈ સ આર્ધ્નોદ્યત્પુનશ્ચિતિં
ચિનુત ઋદ્ધ્યૈ ॥ ૫। ૪। ૧૦॥ ત્રિવૃદથ તિષ્ઠન્ત્યગ્ન્યાધેયેન
નાઽચિનુત સપ્તદશ ચ ॥ ૫। ૪। ૧૦॥

૫૨ છંદશ્ચિતં ચિન્વીત પશુકામઃ પશવો વૈ છન્દાँસિ પશુમાનેવ

ભવતિ શ્યેનચિતં ચિન્વીત સુવર્ગકામઃ શ્યેનો વૈ વયસાં પતિષ્ઠઃ
શ્યેન એવ ભૂત્વા સુવર્ગં લોકં પતતિ કઙ્કચિતં ચિન્વીત યઃ કામયેત
શીર્ષણ્વાનમુષ્મિꣳ લ્લોકે સ્યામિતિ શીર્ષણ્વાનેવામુષ્મિꣳ લ્લોકે
ભવત્યલજચિતં ચિન્વીત ચતુઃ સીતં પ્રતિષ્ઠાકામશ્ચતસ્રો દિશો
દિક્ષ્વેવ પ્રતિ તિષ્ઠતિ પ્ર ઉગચિતં ચિન્વીત ભ્રાતૃવ્યવાન્પ્રૈ
૫૩ વ ભ્રાતૃવ્યાન્નુદત ઉભયતઃ પ્રૌગં ચિન્વીત યઃ કામયેત
પ્રજાતાન્ભ્રાતૃવ્યાન્નુદેય પ્રતિ જનિષ્યમાણાનિતિ પ્રૈવ
જાતાન્ભ્રાતૃવ્યાન્નુદતે પ્રતિ જનિષ્યમાણાન્રથચક્રચિતં ચિન્વીત
ભ્રાતૃવ્યવાન્ વજ્રો વૈ રથો વજ્રમેવ ભ્રાતૃવ્યેભ્યઃ પ્ર હરતિ
દ્રોણચિતં ચિન્વીતાન્નકામો દ્રોણે વા અન્નં ભ્રિયતે સયોન્યેવાન્નમવ
રુંધે સમૂહ્યં ચિન્વીત પશુકામઃ પશુમાનેવ ભવતિ
૫૪ પરિચાય્યં ચિન્વીત ગ્રામકામો ગ્રામ્યેવ ભવતિ શ્મશાનચિતં
ચિન્વીત યઃ કામયેત પિતૃલોક ઋધ્નુયામિતિ પિતૃલોક એવર્ધ્નોતિ
વિશ્વામિત્રજમદગ્ની વસિષ્ઠેનાસ્પર્ધેતાꣳ સ એતા જમદગ્નિર્વિહવ્યા
અપશ્યત્તા ઉપાધત્ત તાભિર્વૈ સ વસિષ્ઠસ્યેન્દ્રિયં વીર્યમવૃઙ્ક્ત
યદ્વિહવ્યા ઉપ દધાતીન્દ્રિયમેવ તાભિર્વીર્યં યજમાનો ભ્રાતૃવ્યસ્ય
વૃઙ્ક્તે હોતુર્ધિષ્ણિય ઉપ દધાતિ યજમાનાયતનં વૈ
૫૫ હોતા સ્વ એવાસ્મા આયતન ઇંદ્રિયં વીર્યમવ રુંધે દ્વાદશોપ
દધાતિ દ્વાદશાક્ષરા જગતી જાગતાઃ પશવો જગત્યૈવાસ્મૈ પશૂનવ
રુંધેઽષ્ટાવષ્ટાવન્યેષુ ધિષ્ણિયેષૂપ દધાત્યષ્ટાશફાઃ પશવઃ
પશૂનેવાવ રુંધે ષણ્માર્જાલીયે ષડ્વા ઋતવ ઋતવઃ ખલુ
વૈ દેવાઃ પિતર ઋતૂનેવ દેવાન્પિતૄન્પ્રીણાતિ ॥ ૫। ૪। ૧૧॥ પ્ર ભવતિ
યજમાનાયતનં વા અષ્ટા ચત્વારિꣳ શચ્ચ ॥ ૫। ૪। ૧૧॥
૫૬ પવસ્વ વાજસાતય ઇત્યનુષ્ટુક્પ્રતિપદ્ભવતિ
તિસ્રોઽનુષ્ટુભશ્ચતસ્રો ગાયત્રિયો યત્ તિસ્રોઽનુષ્ટુભ
સ્તસ્માદશ્વસ્ત્રિભિ સ્તિષ્ઠગ્ગ્સ્તિષ્ઠતિ યચ્ચતસ્રો
ગાયત્રિયસ્તસ્માત્સર્વાગ્શ્ચતુરઃ પદઃ પ્રતિદધત્પલાયતે

પરમા વા એષા છંદસાં યદનુષ્ટુક્પરમશ્ચતુષ્ટોમઃ સ્તોમાનાં
પરમસ્ત્રિરાત્રો યજ્ઞાનાં પરમોઽશ્વઃ પશૂનાં પરમેણૈવૈનં
પરમતાં ગમયત્યેકવિ ँ શમહર્ભવતિ

૫૭ યસ્મિન્નશ્વ આલભ્યતે દ્વાદશ માસાઃ પઞ્ચર્તવસ્ત્રય ઇમે લોકા
અસાવાદિત્ય એકવિ ँ શ એષ પ્રજાપતિઃ પ્રાજાપત્યોઽશ્વસ્તમેવ
સાક્ષાદૃધ્નોતિ શક્વરયઃ પૃષ્ઠં ભવન્ત્યન્યદન્યચ્છન્દોઽન્યેન્યે
વા એતે પશવ આ લભ્યન્ત ઉતેવ ગ્રામ્યા ઉતેવારણ્યા યચ્છક્વરયઃ
પૃષ્ઠં ભવન્ત્યશ્વસ્ય સર્વત્વાય પાર્થુરશ્મં બ્રહ્મસામં ભવતિ
રશ્મિના વા અશ્વો

૫૮ યત ઈશ્વરો વા અશ્વોઽયતોઽપ્રતિષ્ઠિતઃ પરાં પરાવતં
ગન્તોર્યત્પાર્થુરશ્મં બ્રહ્મસામં ભવત્યશ્વસ્ય યત્યૈ
ધૃત્યૈ સંકૃત્યચ્છાવાકસામં ભવત્યુત્સન્નયજ્ઞો વા એષ
યદશ્વમેધઃ કસ્તદ્વેદેત્યાહુર્યદિ સર્વો વા ક્રિયતે ન વા સર્વ ઇતિ
યત્સંકૃત્યચ્છાવાકસામં ભવત્યશ્વસ્ય સર્વત્વાય પર્યાપ્ત્યા અનન્તરાયાય
સર્વસ્તોમોઽતિરાત્ર ઉત્તમમહર્ભવતિ સર્વસ્યાપ્ત્યૈ સર્વસ્ય જિત્યૈ
સર્વમેવ તેનાપ્નોતિ સર્વં જયતિ ॥ ૫। ૪। ૧૨॥ અહર્ભવતિ વા અશ્વોઽહર્ભવતિ
દશ ચ ॥ ૫। ૪। ૧૨॥

દેવાસુરાસ્તેનર્તવ્યા રુદ્રોઽશ્મન્નૃષદે વડુદેનં પ્રાચીમિતિ
વસોર્ધારામગ્નિર્દેવેભ્યઃ સુવર્ગાય યત્રાકૂતાય છંદશ્ચિતં પવસ્વ
દ્વાદશ ॥

દેવાસુરા અજાયાં ઘર્મં વૈ ગ્રમુષ્ટિઃ પ્રથમો દેવયતામેતદ્વૈ
છન્દસામૃધ્નોત્યષ્ટૌ પંચાશત્ ॥

દેવાસુરાઃ સર્વં જયતિ ॥

## પઞ્ચમકાણ્ડે પઞ્ચમઃ પ્રશ્નઃ ૫

૧ યદેકેન સર ँ સ્થાપયતિ યજ્ઞસ્ય સંતત્યા અવિચ્છેદાયૈન્દ્રાઃ પશવો

ये મુષ્કરા યદૈન્દ્રાઃ સન્તોઽગ્નિભ્ય આ લભ્યન્તે દેવતાભ્યઃ સમદં
દધાત્યાગ્નેયીસ્ત્રિષ્ટુભો યાજ્યાનુવાક્યાઃ કુર્યાદ્યદાગ્નેયીસ્તેનાગ્નેયા
યત્રિષ્ટુભસ્તેનૈન્દ્રાઃ સમૃદ્ધ્યૈ ન દેવતાભ્યઃ સમદં દધાતિ
વાયવે નિયુત્વતે તૂપરમા લભતે તેજોઽગ્નેર્વાયુસ્તેજસ એષ આ
લભ્યતે તસ્માદ્યદ્રિયઙ્ વાયુ
૨ ર્વાતિ તદ્રિયઙ્ઙગ્નિર્દહતિ સ્વમેવ તત્તેજોઽન્વેતિ યન્ન નિયુત્વતે
સ્યાદુન્માદ્યેદ્યજમાનો નિયુત્વતે ભવતિ યજમાનસ્યાનુન્માદાય
વાયુમતી શ્વેતવતી યાજ્યાનુવાક્યે ભવતઃ સતેજસ્ત્વાય હિરણ્યગર્ભઃ
સમવર્તતાગ્ર ઇત્યાઘારમા ઘારયતિ પ્રજાપતિર્વૈ હિરણ્યગર્ભઃ
પ્રજાપતેરનુરૂપત્વાય સર્વાણિ વા એષ રૂપાણિ પશૂનાં પ્રત્યા લભ્યતે
યચ્છ્મશ્રુણસ્તત્
૩ પુરુષાણા ँ રૂપં યત્તૂપરસ્તદશ્વાનાં યદન્યતોદન્તદ્ગવાં
યદવ્યા ઇવ શફાસ્તદવીનાં યદજસ્તદજાનાં વાયુર્વૈ પશૂનાં પ્રિયં
ધામ યદ્વાયવ્યો ભવત્યેતમેવૈનમભિ સંજાનાનાઃ પશવ
ઉપ તિષ્ઠન્તે વાયવ્યઃ કાર્યા(૩)ઃ પ્રાજાપત્યા(૩) ઇત્યાહુર્યદ્વાયવ્યં
કુર્યાત્પ્રજાપતેરિયાદ્યત્પ્રાજાપત્યં કુર્યાદ્વાયો
૪ રિયાદ્યદ્વાયવ્યઃ પશુર્ભવતિ તેન વાયોર્નૈતિ
યત્પ્રાજાપત્યઃ પુરોડાશો ભવતિ તેન પ્રજાપતેર્નૈતિ
યદ્દ્વાદશકપાલસ્તેન વૈશ્વાનરાન્નૈત્યાગ્નાવૈષ્ણવમેકાદશકપાલં
નિર્વપતિ દીક્ષિષ્યમાણોઽગ્નિઃ સર્વા દેવતા વિષ્ણુર્યજ્ઞો
દેવતાશ્ચૈવ યજ્ઞં ચાઽઽરભતેઽગ્નિરવમો દેવતાનાં વિષ્ણુઃ
પરમો યદાગ્નાવૈષ્ણવમેકાદશકપાલં નિર્વપતિ દેવતા
૫ એવોભયતઃ પરિગૃહ્ય યજમાનોઽવ રુંધે પુરોડાશેન વૈ દેવા
અમુષ્મિ ँ લ્લોક આર્ધ્નુવઞ્ચરુણાસ્મિન્, યઃ કામયેતામુષ્મિ ँ લ્લોક
ઋધ્નુયામિતિ સ પુરોડાશં કુર્વીતામુષ્મિન્નેવ લોક ઋધ્નોતિ
યદષ્ટાકપાલસ્તેનાગ્નેયો યત્રિકપાલસ્તેન વૈષ્ણવઃ સમૃદ્ધ્યૈ
યઃ કામયેતાસ્મિ ँ લ્લોક ઋધ્નુયામિતિ સ ચરું કુર્વીતાગ્નેર્ઘૃતં

વિષ્ણોસ્તણ્ડુલાસ્તસ્મા

૬ અરુઃ કાર્યોસ્મિન્નેવ લોક ઋધ્નોત્યાદિત્યો ભવતીયં વા અદિતિરસ્યામેવ
પ્રતિ તિષ્ઠત્યથો અસ્યામેવાધિ યજ્ઞં તનુતે યો વૈ સંવત્સર
મુખ્યમભૃત્વાગ્નિં ચિનુતે યથા સામિ ગર્ભોઽવ પદ્યતે તાદૃગેવ
તદાર્તિમાર્ચ્છેદ્વૈશ્વાનરં દ્વાદશકપાલં પુરસ્તાન્નિર્વપેત્સંવત્સરો
વા અગ્નિર્વૈશ્વાનરો યથા સંવત્સરમાપ્ત્વા

૭ કાલ આગતે વિજાયત એવમેવ સંવત્સરમાપ્ત્વા કાલ આગતેઽગ્નિં
ચિનુતે નાર્તિમાર્ચ્છત્યેષા વા અગ્નેઃ પ્રિયા તનૂર્યદ્વૈશ્વાનરઃ
પ્રિયામેવાસ્ય તનુવમવ રુંધે ત્રીણ્યેતાનિ હવીꣳષિ ભવન્તિ
ત્રય ઇમે લોકા એષાં લોકાનાꣳ રોહાય ॥ ૫। ૫। ૧॥ યદ્રિયઙ્
વાયુર્યચ્છ્મશ્રુણસ્તદ્વાયોર્નિર્વપતિ દેવતાસ્તસ્માદાપ્ત્વાષ્ટા
ત્રિꣳશચ્ચ ॥ ૫। ૫। ૧॥

૮ પ્રજાપતિઃ પ્રજાઃ સૃષ્ટ્વા પ્રેણાનુ પ્રાવિશત્તાભ્યઃ પુનઃ સંભવિતું
નાશક્નોત્સોઽબ્રવીદૃધ્નવદિત્સ યો મેઽતઃ પુનઃ સંચિનવદિતિ તં
દેવાઃ સમચિન્વન્તતો વૈ ત આર્ધ્નુવન્ યત્સમચિન્વન્તચ્ચિત્યસ્ય
ચિત્યત્વં ય એવં વિદ્વાનગ્નિં ચિનુત ઋધ્નોત્યેવ કસ્મૈ
કમગ્નિશ્ચીયત ઇત્યાહુરગ્નિવા

૯ નસાનીતિ વા અગ્નિશ્ચીયતેઽગ્નિવાનેવ ભવતિ કસ્મૈ કમગ્નિશ્ચીયત
ઇત્યાહુર્દેવા મા વેદન્નિતિ વા અગ્નિશ્ચીયતે વિદુરેનં દેવાઃ કસ્મૈ
કમગ્નિશ્ચીયત ઇત્યાહુર્ગૃહ્યસાનીતિ વા અગ્નિશ્ચીયતે ગૃહ્યેવ
ભવતિ કસ્મૈ કમગ્નિશ્ચીયત ઇત્યાહુઃ પશુમાનસાનીતિ વા અગ્નિ

૧૦ શ્ચીયતે પશુમાનેવ ભવતિ કસ્મૈ કમગ્નિશ્ચીયત ઇત્યાહુઃ સપ્ત
મા પુરુષા ઉપ જીવાનિતિ વા અગ્નિશ્ચીયતે ત્રયઃ પ્રાઞ્ચસ્ત્રયઃ
પ્રત્યઞ્ચ આત્મા સપ્તમ એતાવન્ત એવૈનમમુષ્મિꣳલ્લોક ઉપ
જીવન્તિ પ્રજાપતિરગ્નિમચિકીષત તં પૃથિવ્યબ્રવીન્ન મય્યગ્નિં
ચેષ્યસેતિ મા ધક્ષ્યતિ સા ત્વાતિ દહ્યમાના વિ ધવિષ્યે

૧૧ સ પાપીયાન્ભવિષ્યસીતિ સોઽબ્રવીત્તથા વા અહં કરિષ્યામિ યથા

ત્વા નાતિધક્ષ્યતીતિ સ ઇમામભ્યમૃશત્પ્રજાપતિસ્ત્વા સાદયતુ તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદેતીમામેવેષ્ટકાં કૃત્વોપાધત્તાનતિદાહાય
યત્પ્રત્યગ્નિં ચિન્વીત તદભિ મૃશેત્પ્રજાપતિસ્ત્વા સાદયતુ તયા
દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવાસીદે

૧૨ તીમામેવેષ્ટકાં કૃત્વોપ ધત્તેઽનતિદાહાય પ્રજાપતિરકામયત પ્ર
જાયેયેતિ સ એતમુખ્યમપશ્યત્ત ँ સંવથ્સરમબિભસ્તતો વૈ સ
પ્રાજાયત તસ્માથ્સંવથ્સરં ભાર્યઃ પ્રૈવ જાયતે તં વસવોઽબ્રુવન્
પ્ર ત્વમજનિષ્ઠા વયં પ્ર જાયામહા ઇતિ તં વસુભ્યઃ પ્રાયચ્છત્તં
ત્રીણ્યહાન્યબિભરુસ્તેન

૧૩ ત્રીણિ ચ શતાન્યસૃજન્ત ત્રયસ્ત્રિ ँ શતં ચ તસ્માત્ત્ર્યહં ભાર્યઃ
પ્રૈવ જાયતે તાન્રુદ્રા અબ્રુવન્ પ્ર યૂયમજનિઢ્વં વયં પ્ર જાયામહા
ઇતિ ત ँ રુદ્રેભ્યઃ પ્રાયચ્છન્ત ँ ષડહાન્યબિભરુસ્તેન ત્રીણિ ચ
શતાન્યસૃજન્ત ત્રયસ્ત્રિ ँ શતં ચ તસ્માત્ષડહં ભાર્યઃ પ્રૈવ
જાયતે તાનાદિત્યા અબ્રુવન્ પ્ર યૂયમજનિઢ્વં વયં

૧૪ પ્ર જાયામહા ઇતિ તમાદિત્યેભ્યઃ પ્રાયચ્છન્તં
દ્વાદશાહાન્યબિભરુસ્તેન ત્રીણિ ચ શતાન્યસૃજન્ત ત્રયસ્ત્રિ ँ શતં ચ
તસ્માદ્દ્વાદશાહં ભાર્યઃ પ્રૈવ જાયતે તેન વૈ તે સહસ્રમસૃજન્તોખા ँ
સહસ્રતમીં ય એવમુખ્ય ँ સાહસ્રં વેદ પ્ર સહસ્રં પશૂનાપ્નોતિ ॥

૫। ૫। ૨॥ અગ્નિવાન્પશુમાનસાનીતિ વા અગ્નિર્ધિષ્ણ્યે મૃશેત્પ્રજાપતિસ્ત્વા
સાદયતુ તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદ તાનાદિત્યા અબ્રુવન્પ્ર
યૂયમજનિઢ્વં વયં ચત્વારિ ँ શચ્ચ ॥ ૫। ૫। ૨॥

૧૫ યજુષા વા એષા ક્રિયતે યજુષા પચ્યતે યજુષા વિ મુચ્યતે યદુખા
સા વા એષૈતર્હિ યાતયામ્ની સા ન પુનઃ પ્રયુજ્યેત્યાહુરગ્ને યુક્ષ્વા હિ
યે તવ યુક્ષ્વા હિ દેવહૂતમા ँ ઇત્યુખાયાં જુહોતિ તેનૈવૈનાં
પુનઃ પ્ર યુઙ્ક્તે તેનાયાતયામ્ની યો વા અગ્નિં યોગ આગતે યુનક્તિ યુઙ્ક્તે
યુઞ્જાનેષ્વગ્ને

૧૬ યુક્ષ્વા હિ યે તવ યુક્ષ્વા હિ દેવહૂતમા ँ ઇત્યાહૈષ વા

અગ્નેર્યોગસ્તેનૈવૈનં યુનક્તિ યુઙ્ક્તે યુઞ્જાનેષુ બ્રહ્મવાદિનો
વદન્તિ ન્યઙ્ઙગ્નિશ્ચેતવ્યા(3) ઉત્તાના(3) ઇતિ વયસાં વા
એષ પ્રતિમયા ચીયતે યદગ્નિર્યન્ન્યઞ્ચં ચિનુયાત્પૃષ્ટિત
એનમાહુતય ઋચ્છેયુર્યદુત્તાનં ન પતિતુꣳ શક્નુયાદસુવર્ગ્યોઽસ્ય
સ્યાત્પ્રાચીનમુત્તાનં

૧૭ પુરુષશીર્ષમુપ દધાતિ મુખત એવૈનમાહુતય ઋચ્છન્તિ નોત્તાનં
ચિનુતે સુવર્ગ્યોઽસ્ય ભવતિ સૌર્યા જુહોતિ ચક્ષુરેવાસ્મિન્પ્રતિ
દધાતિ દ્વિર્જુહોતિ દ્વે હિ ચક્ષુષી સમાન્યા જુહોતિ સમાનꣳ હિ ચક્ષુઃ
સમૃદ્ધ્યૈ દેવાસુરાઃ સંયત્તા આસન્તે વામં વસુ સં ન્યદધત તદ્દેવા
વામભૃતાવૃઞ્જત તદ્વામભૃતો વામભૃત્ત્વં યદ્વામભૃતમુપ
દધાતિ વામમેવ તયા વસુ યજમાનો ભ્રાતૃવ્યસ્ય વૃઙ્ક્તે હિરણ્યમૂર્ધ્ની
ભવતિ જ્યોતિર્વૈ હિરણ્યં જ્યોતિર્વામં જ્યોતિષૈવાસ્ય જ્યોતિર્વામં
વૃઙ્ક્તે દ્વિયજુર્ભવતિ પ્રતિષ્ઠિત્યૈ ॥ ૫। ૫। ૩॥ યુઞ્જાનેષ્વગ્ને
પ્રાચીનમુત્તાનં વામભૃતઞ્ચતુર્વિꣳશતિશ્ચ ॥ ૫। ૫। ૩॥

૧૮ આપો વરુણસ્ય પત્નય આસન્તા અગ્નિરભ્યધ્યાયત્તાઃ સમભવત્તસ્ય રેતઃ
પરાપતત્તદિયમભવદ્યદ્વિતીયં પરાપતત્તદસાવભવદિયં વૈ
વિરાડસૌ સ્વરાડ્યદ્વિરાજાવુપદધાતીમે એવોપ ધત્તે યદ્વા અસૌ રેતઃ
સિઞ્ચતિ તદસ્યાં પ્રતિ તિષ્ઠતિ તત્પ્ર જાયતે તા ઓષધયો

૧૯ વીરુધો ભવન્તિ તા અગ્નિરત્તિ ય એવં વેદ પ્રૈવ જાયતેઽન્નાદો
ભવતિ યો રેતસ્વી સ્યાત્પ્રથમાયાં તસ્ય ચિત્યામુભે ઉપ દધ્યાદિમે
એવાસ્મૈ સમીચી રેતઃ સિઞ્ચતો યઃ સિક્તરેતાઃ સ્યાત્પ્રથમાયાં
તસ્ય ચિત્યામન્યામુપ દધ્યાદુત્તમાયામન્યાꣳ રેત એવાસ્ય
સિક્તમાભ્યામુભયતઃ પરિ ગૃહ્ણાતિ સંવથ્સરં ન ક

૨૦ ઞ્ચન પ્રત્યવરોહેન્ન હીમે કં ચન પ્રત્યવરોહતસ્તદેનયોર્વ્રતં
યો વા અપશીર્ષાણમગ્નિં ચિનુતેઽપશીર્ષામુષ્મિꣳલ્લોકે ભવતિ
યઃ સશીર્ષાણં ચિનુતે સશીર્ષામુષ્મિꣳલ્લોકે ભવતિ ચિત્તિં જુહોમિ
મનસા ઘૃતેન યથા દેવા ઇહાગમન્વીતિહોત્રા ઋતાવૃધઃ સમુદ્રસ્ય

વયુનસ્ય પત્મઞ્જુહોમિ વિશ્વકર્મણે વિશ્વાહામર્ત્યꣳ હવિરિતિ
સ્વયમાતૃણ્ણામુપધાય જુહોત્યે

૨૧ તદ્વા અગ્નેઃ શિરઃ સશીર્ષાણમેવાગ્નિં ચિનુતે સશીર્ષામુષ્મિꣳ લ્લોકે
ભવતિ ય એવં વેદ સુવર્ગાય વા એષ લોકાય ચીયતે યદગ્નિસ્તસ્ય
યદયથાપૂર્વં ક્રિયતેઽસુવર્ગ્યમસ્ય તથ્સુવર્ગ્યોઽગ્નિશ્ચિતિમુપધાયાભિ
મૃશેચ્ચિત્તિમચિત્તિં ચિનવદ્વિ વિદ્વાન્પૃષ્ઠેવ વીતા વૃજિના
ચ મર્તાન્રાયે ચ નઃ સ્વપત્યાય દેવ દિતિં ચ રાસ્વાદિતિમુરુષ્યેતિ
યથાપૂર્વમેવૈનામુપ ધત્તે પ્રાઞ્ચમેનં ચિનુતે સુવર્ગ્યોઽસ્ય ભવતિ ॥

૫। ૫। ૪॥ ઓષધયઃ કઞ્જુહોતિ સ્વપત્યાયાઽષ્ટાદશ ચ ॥ ૫। ૫। ૪॥

૨૨ વિશ્વકર્મા દિશાં પતિઃ સ નઃ પશૂન્પાતુ સોઽસ્માન્પાતુ
તસ્મૈ નમઃ પ્રજાપતી રુદ્રો વરુણોઽગ્નિર્દિશાં પતિઃ સ
નઃ પશૂન્પાતુ સોઽસ્માન્પાતુ તસ્મૈ નમ એતા વૈ દેવતા
એતેષાં પશૂનામધિપતયસ્તાભ્યો વા એષ આ વૃશ્ચ્યતે યઃ
પશુશીર્ષાણ્યુપદધાતિ હિરણ્યેષ્ટકા ઉપ દધાત્યેતાભ્ય એવ
દેવતાભ્યો નમસ્કરોતિ બ્રહ્મવાદિનો

૨૩ વદન્ત્યગ્નૌ ગ્રામ્યાન્પશૂન્ પ્ર દધાતિ શુચારણ્યાનર્પયતિ કિં
તત ઉચ્છિꣳષતીતિ યદ્ધિરણ્યેષ્ટકા ઉપદધાત્યમૃતં વૈ
હિરણ્યમમૃતેનૈવ ગ્રામ્યેભ્યઃ પશુભ્યો ભેષજં કરોતિ નૈનાન્
હિનસ્તિ પ્રાણો વૈ પ્રથમા સ્વયમાતૃણ્ણા વ્યાનો દ્વિતીયાપાનસ્તૃતીયાનુ
પ્રાણ્યાત્પ્રથમાગ્ સ્વયમાતૃણ્ણામુપધાય પ્રાણેનૈવ પ્રાણꣳ
સમર્ધયતિ વ્યન્યાદ્

૨૪ દ્વિતીયામુપધાય વ્યાનેનૈવ વ્યાનꣳ સમર્ધયત્યપાન્યાત્
તૃતીયામુપધાયાપાનેનૈવાપાનꣳ સમર્ધયત્યથો
પ્રાણૈરેવૈનꣳ સમિન્દ્ધે ભૂર્ભુવઃ સુવરિતિ સ્વયમાતૃણ્ણા ઉપ
દધાતીમે વૈ લોકાઃ સ્વયમાતૃણ્ણા એતાભિઃ ખલુ વૈ વ્યાહૃતીભિઃ
પ્રજાપતિઃ પ્રાજાયત યદેતાભિર્વ્યાહૃતીભિઃ સ્વયમાતૃણ્ણા
ઉપદધાતીમાનેવ લોકાનુપધાયૈષુ

૨૫ લોકેષ્વધિ પ્ર જાયતે પ્રાણાય વ્યાનાયાપાનાય વાચે ત્વા ચક્ષુષે
ત્વા તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદાગ્નિના વૈ દેવાઃ સુવર્ગં
લોકમજિગાꣳ સન્તેન પતિતું નાશક્નુવન્ત એતાશ્ચતસ્રઃ સ્વયમાતૃણ્ણા
અપશ્યન્તા દિક્ષૂપાદધત તેન સર્વતશ્ચક્ષુષા સુવર્ગં લોકમાયન્
યચ્ચતસ્રઃ સ્વયમાતૃણ્ણા દિક્ષૂપદધાતિ સર્વતશ્ચક્ષુષૈવ
તદગ્નિના યજમાનઃ સુવર્ગં લોકમેતિ ॥ ૫। ૫। ૫॥ બ્રહ્મવાદિનો
વ્યન્યાદેષુ યજમાનસ્ત્રીણિ ચ ॥ ૫। ૫। ૫॥

૨૬ અગ્ન આ યાહિ વીતય ઇત્યાહાહ્વતૈવૈનમગ્નિં દૂતં વૃણીમહ
ઇત્યાહ હુત્વૈવૈનં વૃણીતેઽગ્નિનાગ્નિઃ સમિધ્યત ઇત્યાહ સમિન્ધ
એવૈનમગ્નિર્વૃત્રાણિ જઙ્ઘનદિત્યાહ સમિદ્ધ એવાસ્મિન્નિંદ્રિયં
દધાત્યગ્નેઃ સ્તોમં મનામહ ઇત્યાહ મનુત એવૈનમેતાનિ વા અહ્નાꣳ
રૂપાણ્ય

૨૭ ન્વહમેવૈનં ચિનુતેઽવાહ્નાꣳરૂપાણિ રુંધે બ્રહ્મવાદિનો
વદન્તિ કસ્માત્સત્યાદ્યાતયામ્નીરન્યા ઇષ્ટકા અયાતયામ્ની લોકં
પૃણેત્યૈન્દ્રાગ્ની હિ બાર્હસ્પત્યેતિ બ્રૂયાદિન્દ્રાગ્ની ચ હિ દેવાનાં
બૃહસ્પતિશ્ચાયાતયામાનોઽનુચરવતી ભવત્યજામિત્વાયાનુષ્ટુભાનુ
ચરત્યાત્મા વૈ લોકં પૃણા પ્રાણોઽનુષ્ટુપ્તસ્માત્પ્રાણઃ સર્વાણ્યઙ્ગાન્યનુ
ચરતિ તા અસ્ય સૂદદોહસ

૨૮ ઇત્યાહ તસ્માત્પરુષિપરુષિ રસઃ સોમઙ્ગ્ શ્રીણન્તિ પૃશ્નય
ઇત્યાહાન્નં વૈ પૃશ્ન્યન્નમેવાવ રુંધેઽર્કો વા અગ્નિરર્કોઽન્નમન્નમેવાવ
રુંધે જન્મન્દેવાનાં વિશસ્ત્રિષ્વા રોચને દિવ ઇત્યાહેમાનેવાસ્મૈ
લોકાઞ્જ્યોતિષ્મતઃ કરોતિ યો વા ઇષ્ટકાનાં પ્રતિષ્ઠાં વેદ પ્રત્યેવ તિષ્ઠતિ
તયા દેવતયાઽઙ્ગિરસ્વદ્ધ્રુવા સીદેત્યાહૈષા વા ઇષ્ટકાનાં પ્રતિષ્ઠા ય
એવં વેદ પ્રત્યેવ તિષ્ઠતિ ॥ ૫। ૫। ૬॥ રૂપાણિ સૂદદોહસસ્તયા ષોડશ
ચ ॥ ૫। ૫। ૬॥

૨૯ સુવર્ગાય વા એષ લોકાય ચીયતે યદગ્નિર્વજ્ર એકાદશિની

યદગ્નાવેકાદશિનીં મિનુયાદ્વજ્રેણૈનઁ સુવર્ગાલ્લોકાદન્તર્દધ્યાદ્યન્ન
મિનુયાથ્સ્વરુભિઃ પશૂન્વ્યર્ધયેદેકયૂપં મિનોતિ નૈનં વજ્રેણ
સુવર્ગાલ્લોકાદન્તર્દધાતિ ન સ્વરુભિઃ પશૂન્વ્યર્ધયતિ વિ વા એષ
ઇન્દ્રિયેણ વીર્યેણર્ધ્યતે યોઽગ્નિં ચિન્વન્નધિ ક્રામત્યૈન્દ્રિય

30 ર્ચા ક્રમણં પ્રતીષ્ટકામુપ દધ્યાન્નેન્દ્રિયેણ વીર્યેણ
વ્યૃધ્યતે રુદ્રો વા એષ યદગ્નિસ્તસ્ય તિસ્રઃ શરવ્યાઃ પ્રતીચી
તિરશ્ચ્યનૂચી તાભ્યો વા એષ આ વૃશ્ચ્યતે યોઽગ્નિં ચિનુતેઽગ્નિં
ચિત્વા તિસૃધન્વમયાચિતં બ્રાહ્મણાય દદ્યાત્તાભ્ય એવ નમસ્કરોત્યથો
તાભ્ય એવાત્માનં નિષ્ક્રીણીતે યત્તે રુદ્ર પુરો

31 ધનુસ્તદ્વાતો અનુ વાતુ તે તસ્મૈ તે રુદ્ર સંવથ્સરેણ નમસ્કરોમિ યત્તે
રુદ્ર દક્ષિણા ધનુસ્તદ્વાતો અનુ વાતુ તે તસ્મૈ તે રુદ્ર પરિવથ્સરેણ
નમસ્કરોમિ યત્તે રુદ્ર પશ્ચાદ્ધનુસ્તદ્વાતો અનુ વાતુ તે તસ્મૈ તે
રુદ્રેદાવથ્સરેણ નમસ્કરોમિ યત્તે રુદ્રોત્તરાદ્ધનુસ્તદ્

32 વાતો અનુ વાતુ તે તસ્મૈ તે રુદ્રેદુવથ્સરેણ નમસ્કરોમિ યત્તે રુદ્રોપરિ
ધનુસ્તદ્વાતો અનુ વાતુ તે તસ્મૈ તે રુદ્ર વથ્સરેણ નમસ્કરોમિ રુદ્રો
વા એષ યદગ્નિઃ સ યથા વ્યાઘ્રઃ ક્રુદ્ધસ્તિષ્ઠત્યેવં વા એષ એતર્હિ
સંચિતમેતૈરુપ તિષ્ઠતે નમસ્કારૈરેવૈનઁ શમયતિ યેઽગ્નયઃ

33 પુરીષ્યાઃ પ્રવિષ્ટાઃ પૃથિવીમનુ । તેષાં ત્વમસ્યુત્તમઃ
પ્રણો જીવાતવે સુવ ॥ આપં ત્વાગ્ને મનસાપં ત્વાગ્ને તપસાપં
ત્વાગ્ને દીક્ષયાપં ત્વાગ્ન ઉપસદ્ભિરાપં ત્વાગ્ને સુત્યયાપં ત્વાગ્ને
દક્ષિણાભિરાપં ત્વાગ્નેઽવભૃથેનાપં ત્વાગ્ને વશયાપં ત્વાગ્ને
સ્વગાકારેણેત્યાહૈષા વા અગ્નેરાપ્તિસ્તયૈવૈનમાપ્નોતિ ॥ ૫। ૫। ૭॥ ઐન્દ્રિયા
પુર ઉત્તરાદ્ધનુસ્તદગ્નય આહાષ્ટૌ ચ ॥ ૫। ૫। ૭॥

34 ગાયત્રેણ પુરસ્તાદુપ તિષ્ઠતે પ્રાણમેવાસ્મિન્દધાતિ
બૃહદ્રથંતરાભ્યાં પક્ષાવોજ એવાસ્મિન્દધાત્યૃતુસ્થા યજ્ઞાયજ્ઞિયેન
પુચ્છમૃતુષ્વેવ પ્રતિ તિષ્ઠતિ પૃષ્ઠૈરુપ તિષ્ઠતે તેજો
વૈ પૃષ્ઠાનિ તેજ એવાસ્મિન્દધાતિ પ્રજાપતિરગ્નિમસૃજત

સોઽસ્માથ્સૃષ્ટઃ પરાઙૈત્તં વારવન્તીયેનાવારયત તદ્વારવન્તીયસ્ય
વારવન્તીયત્વર ꣳ શ્યૈતેન શ્યેતી અકુરુત તચ્છ્યૈતસ્ય શ્યૈતત્વં
૩૫ યદ્વારવન્તીયેનોપતિષ્ઠતે વારયત એવૈનગ્ગ્ શ્યૈતેન શ્યેતી
કુરુતે પ્રજાપતેર્ હૃદયેનાપિ પક્ષં પ્રત્યુપ તિષ્ઠતે પ્રેમાણમેવાસ્ય
ગચ્છતિ પ્રાચ્યા ત્વા દિશા સાદયામિ ગાયત્રેણ છંદસાગ્નિના દેવતયાગ્નેઃ
શીર્ષ્ણાગ્નેઃ શિર ઉપ દધામિ દક્ષિણયા ત્વા દિશા સાદયામિ ત્રૈષ્ટુભેન
છંદસેન્દ્રેણ દેવતયાગ્નેઃ પક્ષેણાગ્નેઃ પક્ષમુપ દધામિ પ્રતીચ્યા
ત્વા દિશા સાદયામિ
૩૬ જાગતેન ચ્છંદસા સવિત્રા દેવતયાગ્નેઃ પુચ્છેનાગ્નેઃ પુચ્છમુપ
દધામ્યુદીચ્યા ત્વા દિશા સાદયામ્યાનુષ્ટુભેન છંદસા મિત્રાવરુણાભ્યાં
દેવતયાગ્નેઃ પક્ષેણાગ્નેઃ પક્ષમુપ દધામ્યૂર્ધ્વયા ત્વા દિશા
સાદયામિ પાઙ્ક્તેન છંદસા બૃહસ્પતિના દેવતયાગ્નેઃ પૃષ્ઠેનાગ્નેઃ
પૃષ્ઠમુપ દધામિ યો વા અપાત્માનમગ્નિં ચિનુતેઽપાત્માઽમુષ્મિꣳ લ્લોકે
ભવતિ યઃ સાત્માનં ચિનુતે સાત્મામુષ્મિꣳ લ્લોકે ભવત્યાત્મેષ્ટકા ઉપ
દધાત્યેષ વા અગ્નેરાત્મા સાત્માનમેવાગ્નિં ચિનુતે સાત્મામુષ્મિꣳ લ્લોકે
ભવતિ ય એવં વેદ ॥ ૫। ૫। ૮॥ શ્યૈતત્વં પ્રતીચ્યા ત્વા દિશા સાદયામિ
યસ્સાત્માનઞ્ચિનુતે દ્વાવિꣳશતિશ્ચ ॥ ૫। ૫। ૮॥
૩૭ અગ્ન ઉદધે યાત ઇષુર્યુવા નામ તયા નો મૃડ તસ્યાસ્તે નમસ્તસ્યાસ્ત
ઉપ જીવન્તો ભૂયાસ્માગ્ને દુધ્ર ગહ્ય કિꣳશિલ વન્ય યાત ઇષુર્યુવા નામ
તયા નો મૃડ તસ્યાસ્તે નમસ્તસ્યાસ્ત ઉપ જીવન્તો ભૂયાસ્મ પઞ્ચ
વા એતેઽગ્નયો યચ્ચિતય ઉદધિરેવ નામ પ્રથમો દુધ્રો
૩૮ દ્વિતીયો ગહ્યસ્તૃતીયઃ કિꣳશિલશ્ચતુર્થો વન્યઃ પઞ્ચમસ્તેભ્યો
યદાહુતીર્ન જુહુયાદધ્વર્યું ચ યજમાનં ચ પ્ર દહેયુર્યદેતા
આહુતીર્જુહોતિ ભાગધેયેનૈવૈનાઞ્છમયતિ નાર્તિમાર્ચ્છત્યધ્વર્યુર્ન
યજમાનો વાઙ્મ આસન્નસોઃ પ્રાણોઽક્ષ્યોશ્ચક્ષુઃ કર્ણયોઃ શ્રોત્રં
બાહુવોર્બલમૂરુવોરોજોઽરિષ્ટા વિશ્વાન્યઙ્ગાનિ તનૂ
૩૯ સ્તનુવા મે સહ નમસ્તે અસ્તુ મા મા હિꣳસીરપ વા એતસ્માત્પ્રાણાઃ

ક્રામન્તિ યોઽગ્નિં ચિન્વન્નધિક્રામતિ વાઙ્મ આસન્નસોઃ પ્રાણ ઇત્યાહ
પ્રાણાનેવાત્મન્ધત્તે યો રુદ્રો અગ્નૌ યો અપ્સુ ય ઓષધીષુ યો રુદ્રો વિશ્વા
ભુવનાવિવેશ તસ્મૈ રુદ્રાય નમો અસ્ત્વાહુતિભાગા વા અન્યે રુદ્રા
હવિર્ભાગા

૪૦ અન્યે શતરુદ્રીયꣳ હુત્વા ગાવીધુકં ચરુમેતેન યજુષા
ચરમાયામિષ્ટકાયાં નિ દધ્યાદ્ભાગધેયેનૈવૈનꣳ શમયતિ તસ્ય ત્વૈ
શતરુદ્રીયꣳ હુતમિત્યાહુર્યસ્યૈતદગ્નૌ ક્રિયત ઇતિ વસવસ્ત્વા
રુદ્રૈઃ પુરસ્તાત્પાન્તુ પિતરસ્ત્વા યમરાજાનઃ પિતૃભિર્દક્ષિણતઃ
પાન્ત્વાદિત્યાસ્ત્વા વિશ્વૈર્દેવૈઃ પશ્ચાત્પાન્તુ દ્યુતાનસ્ત્વા મારુતો
મરુદ્ભિરુત્તરતઃ પાતુ

૪૧ દેવાસ્ત્વેન્દ્રજ્યેષ્ઠા વરુણરાજાનોઽધસ્તાચ્ચોપરિષ્ટાચ્ચ પાન્તુ ન વા
એતેન પૂતો ન મેધ્યો ન પ્રોક્ષિતો યદેનમતઃ પ્રાચીનં પ્રોક્ષતિ
યથ્સંચિતમાજ્યેન પ્રોક્ષતિ તેન પૂતસ્તેન મેધ્યસ્તેન પ્રોક્ષિતઃ ॥

૫। ૫। ૯॥ દુધ્રસ્તનૂર્ હવિર્ભાગાઃ પાતુ દ્વાત્રિꣳશચ્ચ ॥ ૫। ૫। ૯॥

૪૨ સમીચી નામાસિ પ્રાચી દિક્તસ્યાસ્તેઽગ્નિરધિપતિરસિતો રક્ષિતા
યશ્ચાધિપતિર્યશ્ચ ગોપ્તા તાભ્યાં નમસ્તૌ નો મૃડયતાં તે યં
દ્વિષ્મો યશ્ચ નો દ્વેષ્ટિ તં વાં જમ્ભે દધામ્યોજસ્વિની નામાસિ દક્ષિણા
દિક્તસ્યાસ્ત ઇન્દ્રોઽધિપતિઃ પૃદાકુઃ પ્રાચી નામાસિ પ્રતીચી દિક્તસ્યાસ્તે

૪૩ સોમોઽધિપતિઃ સ્વજોઽવસ્થાવા નામાસ્યુદીચી દિક્તસ્યાસ્તે
વરુણોઽધિપતિસ્તિરશ્ચરાજિરધિપત્ની નામાસિ બૃહતી દિક્તસ્યાસ્તે
બૃહસ્પતિરધિપતિઃ શ્વિત્રો વશિની નામાસીયં દિક્તસ્યાસ્તે યમોઽધિપતિઃ
કલ્માષગ્રીવો રક્ષિતા યશ્ચાધિપતિર્યશ્ચ ગોપ્તા તાભ્યાં નમસ્તૌ નો
મૃડયતાં તે યં દ્વિષ્મો યશ્ચ

૪૪ નો દ્વેષ્ટિ તં વાં જમ્ભે દધામ્યેતા વૈ દેવતા અગ્નિં ચિતꣳ
રક્ષન્તિ તાભ્યો યદાહુતીર્ન જુહુયાદધ્વર્યું ચ યજમાનં
ચ ધ્યાયેયુર્યદેતા આહુતીર્જુહોતિ ભાગધેયેનૈવૈનાઙ્છમયતિ
નાર્તિમાર્ચ્છત્યધ્વર્યુર્ન યજમાનો હેતયો નામ સ્થ તેષાં વઃ પુરો

ગૃહા અગ્નિર્વ ઇષવઃ સલિલો નિલિંપા નામ
૪૫ સ્થ તેષાં વો દક્ષિણા ગૃહાઃ પિતરો વ ઇષવઃ સગરો વજ્રિણો નામ
સ્થ તેષાં વઃ પશ્ચાદ્ગૃહાઃ સ્વપ્નો વ ઇષવો ગહ્વરોઽવસ્થાવાનો
નામ સ્થ તેષાં વ ઉત્તરાદ્ગૃહા આપો વ ઇષવઃ સમુદ્રોઽધિપતયો નામ
સ્થ તેષાં વ ઉપરિ ગૃહા વર્ષં વ ઇષવોઽવસ્વાન્ક્ષ્વ્યા નામ સ્થ
પાર્થિવાસ્તેષાં વ ઇહ ગૃહા
૪૬ અન્નં વ ઇષવોઽનિમિષો વાતનામં તેભ્યો વો નમસ્તે નો મૃડયત
તે યં દ્વિષ્મો યશ્ચ નો દ્વેષ્ટિ તં વો જમ્ભે દધામિ હુતાદો વા અન્યે
દેવા અહુતાદોઽન્યે તાનગ્નિચિદ્દેવોભયાન્પ્રીણાતિ દધ્ના મધુમિશ્રેણૈતા
આહુતીર્જુહોતિ ભાગધેયેનૈવૈનાન્પ્રીણાત્યથો ખલ્વાહુરિષ્ટકા વૈ દેવા
અહુતાદ ઇત્ય
૪૭ નુપરિક્રામં જુહોત્યપરિવર્ગમેવૈનાન્પ્રીણાતીમરૅં સ્તનમૂર્જસ્વન્તં
ધયાપાં પ્રપ્યાતમગ્ને સરિરસ્ય મધ્યે । ઉત્સં જુષસ્વ મધુમન્તમૂર્વ
સમુદ્રિય ૅં સદનમા વિશસ્વ ॥ યો વા અગ્નિં પ્રયુજ્ય ન વિમુઞ્ચતિ
યથાશ્વો યુક્તોઽવિમુચ્યમાનઃ, ક્ષુધ્યન્પરાભવત્યેવમસ્યાગ્નિઃ પરા
ભવતિ તં પરાભવન્તં યજમાનોઽનુ પરા ભવતિ સોઽગ્નિં ચિત્વા
લૂક્ષો
૪૮ ભવતીમરૅં સ્તનમૂર્જસ્વન્તં ધયાપામિત્યાજ્યસ્ય પૂર્ણાગ્
સ્રુચં જુહોત્યેષ વા અગ્નેર્વિમોકો વિમુચ્યૈવાસ્મા અન્નમપિ દધાતિ
તસ્માદાહુર્યશ્ચૈવં વેદ યશ્ચ ન સુધાયૅંહ વૈ વાજી સુહિતો
દધાતીત્યગ્નિર્વાવ વાજી તમેવ તત્પ્રીણાતિ સ એનં પ્રીતઃ પ્રીણાતિ
વસીયાન્ભવતિ ॥ ૫। ૫। ૧૦॥ પ્રતીચી દિક્તસ્યાસ્તે દ્વિષ્મો યશ્ચ નિલિંપા નામેહ
ગૃહા ઇતિ લૂક્ષો વસીયાન્ભવતિ ॥ ૫। ૫। ૧૦॥
૪૯ ઇન્દ્રાય રાજ્ઞે સૂકરો વરુણાય રાજ્ઞે કૃષ્ણો યમાય રાજ્ઞ ઋશ્ય
ઋષભાય રાજ્ઞે ગવયઃ શાર્દૂલાય રાજ્ઞે ગૌરઃ પુરુષરાજાય
મર્કટઃ, ક્ષિપ્રશ્યેનસ્ય વર્તિકા નીલઙ્ગોઃ ક્રિમિઃ સોમસ્ય રાજ્ઞઃ
કુલુઙ્ગઃ સિન્ધોઃ શિૅંશુમારો હિમવતો હસ્તી ॥ ૫। ૫। ૧૧॥ ઇંદ્રાય

રાઙ્કોઽષ્ટા વિꣳશતિઃ ॥ ૫। ૫। ૧૧॥

૫૦ મયુઃ પ્રાજાપત્ય ઊલો હલીક્ષ્ણો વૃષદꣳશસ્તે ધાતુઃ સરસ્વત્યૈ
શારિઃ શ્યેતા પુરુષવાક્સરસ્વતે શુકઃ શ્યેતઃ પુરુષવાગારણ્યોઽજો
નકુલઃ શકા તે પૌષ્ણા વાચે ક્રૌઞ્ચઃ ॥ ૫। ૫। ૧૨॥ મયુસ્ત્રયોવિꣳશતિઃ
॥ ૫। ૫। ૧૨॥

૫૧ અપાં નપ્ત્રે જષો નાક્રો મકરઃ કુલીકયસ્તેઽકૂપારસ્ય વાચે પૈઙ્ગરાજો
ભગાય કુષીતક આતીવાહસો દર્વિદાતે વાયવ્યા દિગ્ભ્યશ્ચક્રવાકઃ
॥ ૫। ૫। ૧૩॥ અપામેકાન્ન વિꣳશતિઃ ॥ ૫। ૫। ૧૩॥

૫૨ બલાયાજગર આખુઃ સૃજયા શયણ્ડકસ્તે મૈત્રા મૃત્યવેઽસિતો
મન્યવે સ્વજઃ કુંભીનસઃ પુષ્કરસાદો લોહિતાહિસ્તે ત્વાષ્ટ્રાઃ
પ્રતિશ્રુત્કાયૈ વાહસઃ ॥ ૫। ૫। ૧૪॥

૫૩ પુરુષમૃગશ્ચન્દ્રમસે ગોધા કાલકા દાર્વાઘાટસ્તે
વનસ્પતીનામેણ્યહ્ને કૃષ્ણો રાત્રિયૈ પિકઃ, ક્ષ્વિઙ્કા નીલશીર્ષ્ણી
તેઽર્યમ્ણે ધાતુઃ કત્કટઃ ॥ ૫। ૫। ૧૫॥

૫૪ સૌરી બલાકર્શ્યો મયૂરઃ શ્યેનસ્તે ગન્ધર્વાણાં વસૂનાં કપિઞ્જલો
રુદ્રાણાં તિત્તિરી રોહિત્કુણ્ડૃણાચી ગોલત્તિકા તા અપ્સરસામરણ્યાય
સૃમરઃ ॥ ૫। ૫। ૧૬॥

૫૫ પૃષતો વૈશ્વદેવઃ પિત્વો ન્યઙ્કુઃ કશસ્તેઽનુમત્યા
અન્યવાપોઽર્ધમાસાનાં માસાં કશ્યપઃ ક્વયિઃ કુટરુર્દાત્યૌહસ્તે
સિનીવાલ્યૈ બૃહસ્પતયે શિત્પુટઃ ॥ ૫। ૫। ૧૭॥

૫૬ શકા ભૌમી પાન્ત્રઃ કશો માન્થીલવસ્તે પિતૃણામૃતૂનાં
જહકા સંવથ્સરાય લોપા કપોત ઉલૂકઃ શશસ્તે નૈરૃતાઃ
કૃકવાકુઃ સાવિત્રઃ ॥ ૫। ૫। ૧૮॥ બલાય પુરુષમૃગઃ સૌરી પૃષતઃ
શકાષ્ટાદશાષ્ટાદશ ॥ ૫। ૫। ૧૮॥

૫૭ રુરૂ રૌદ્રઃ કૃકલાસઃ શકુનિઃ પિપ્પકા તે શરવ્યાયૈ હરિણો
મારુતો બ્રહ્મણે શાર્ગસ્તરક્ષુઃ કૃષ્ણઃ શ્વા ચતુરક્ષો ગર્દભસ્ત
ઇતર જનાનામગ્નયે ધૂઙ્ક્ષ્ણા ॥ ૫। ૫। ૧૯॥ રુરુર્વિꣳશતિઃ ॥ ૫। ૫। ૧૯॥

૫૮ અલજ આન્તરિક્ષ ઉદ્રો મદ્ગુઃ પ્લવસ્તેઽપામદિત્યૈ
હꣳસસાચિરિન્દ્રાણ્યૈ કીર્શા ગૃધ્રઃ શિતિકક્ષી વાર્ધ્રાણસસ્તે દિવ્યા
દ્યાવાપૃથિવ્યા શ્વાવિત્ ॥ ૫। ૫। ૨૦॥

૫૯ સુપર્ણઃ પાર્જન્યો હꣳસો વૃકો વૃષદꣳશસ્ત ઐન્દ્રા
અપામુદ્રોઽર્યમ્ણે લોપાશઃ સિꣳહો નકુલો વ્યાઘ્રસ્તે મહેન્દ્રાય
કામાય પરસ્વાન્ ॥ ૫। ૫। ૨૧॥ અલજઃ સુપર્ણોઽષ્ટાદશાષ્ટાદશ ॥
૫। ૫। ૨૧॥

૬૦ આગ્નેયઃ કૃષ્ણગ્રીવઃ સારસ્વતી મેષી બભ્રુઃ સૌમ્યઃ પૌષ્ણઃ શ્યામઃ
શિતિપૃષ્ઠો બાર્હસ્પત્યઃ શિલ્પો વૈશ્વદેવ ઐન્દ્રોઽરુણો મારુતઃ
કલ્માષ ઐન્દ્રાગ્નઃ સꣳહિતોઽધોરામઃ સાવિત્રો વારુણઃ પેત્વઃ ॥ ૫। ૫। ૨૨॥ આગ્નેયો દ્વાવિꣳશતિઃ ॥ ૫। ૫। ૨૨॥

૬૧ અશ્વસ્તૂપરો ગોમૃગસ્તે પ્રાજાપત્યા આગ્નેયૌ કૃષ્ણગ્રીવૌ ત્વાષ્ટ્રૌ
લોમશસક્થૌ શિતિપૃષ્ઠૌ બાર્હસ્પત્યૌ ધાત્રે પૃષોદરઃ સૌર્યો
બલક્ષઃ પેત્વઃ ॥ ૫। ૫। ૨૩॥ અશ્વષ્ષોઽડશ ॥ ૫। ૫। ૨૩॥

૬૨ અગ્નયેઽનીકવતે રોહિતાઞ્જિરનડ્વાનધોરામૌ સાવિત્રૌ પૌષ્ણૌ
રજતનાભી વૈશ્વદેવૌ પિશઙ્ગૌ તૂપરૌ મારુતઃ કલ્માષ આગ્નેયઃ
કૃષ્ણોઽજઃ સારસ્વતી મેષી વારુણઃ કૃષ્ણ એકશિતિપાત્પેત્વઃ ॥ ૫। ૫। ૨૪॥ અગ્નયેઽનીકવતે દ્વાવિꣳશતિઃ ॥ ૫। ૫। ૨૪॥

યદેકેન પ્રજાપતિઃ પ્રેણાઽનુ યજુષાઽપો વિશ્વકર્માઽગ્ન આ
યાહિ સુવર્ગાય વજ્રો ગાયત્રેણાઽગ્ન ઉદધે સમીચીંદ્રાય મયુરપાં
બલાય પુરુષમૃગઃ સૌરી પૃષતઃ શકા રુરુરલજઃ સુપર્ણ
આગ્નેયોઽશ્વોઽગ્નયેઽનીકવતે ચતુર્વિꣳશતિઃ ॥

યદેકેન સ પાપીયાનેતદ્વા અગ્નેર્ધનુસ્તદ્દેવાસ્ત્વેંદ્રજ્યેષ્ઠા
અપાન્નપ્ત્રેઽશ્વસ્તૂપરો દ્વિષષ્ટિઃ ॥

યદેકેનૈકશિતિપાત્પેત્વઃ ॥

## પઞ્ચમકાણ્ડે ષષ્ઠઃ પ્રશ્નઃ ૬

૧ હિરણ્યવર્ણાઃ શુચયઃ પાવકા યાસુ જાતઃ કશ્યપો યાસ્વિન્દ્રઃ ।
અગ્નિં યા ગર્ભં દધિરે વિરૂપાસ્તાન આપઃ શꣳ સ્યોના ભવન્તુ ॥
યાસાꣳ રાજા વરુણો યાતિ મધ્યે સત્યાનૃતે અવપશ્યઞ્જનાનામ્ ।
મધુશ્ચુતઃ શુચયો યાઃ પાવકાસ્તાન આપઃ શꣳ સ્યોના ભવન્તુ
॥ યાસાં દેવા દિવિ કૃણ્વન્તિ ભક્ષં યા અન્તરિક્ષે બહુધા ભવન્તિ ।
યાઃ પૃથિવીં પયસોઽન્દન્તિ

૨ શુક્રાસ્તા ન આપઃ શꣳ સ્યોના ભવન્તુ ॥ શિવેન મા ચક્ષુષા
પશ્યતાપઃ શિવયા તનુવોઽપ સ્પૃશત ત્વચમ્ મે । સર્વાꣳ
અગ્નીꣳ રપ્સુષદો હુવે વો મયિ વર્ચો બલમોજો નિ ધત્ત ॥ યદદઃ
સં પ્રયતીરહાવનદતાહ તે । તસ્માદા નદ્યો નામ સ્થ તા વો નામાનિ
સિન્ધવઃ ॥ યત્પ્રેષિતા વરુણેન તાઃ શીભꣳસમવલ્ગત ।

૩ તદાપ્નોદિન્દ્રો વો યતીસ્તસ્માદાપો અનુ સ્થન ॥ અપકામꣳ સ્યન્દમાના
અવીવરત વો હિકમ્ । ઇન્દ્રો વઃ શક્તિભિર્દેવીસ્તસ્માદ્વાર્ણામ વો હિતમ્
॥ એકો દેવો અપ્યતિષ્ઠથ્સ્યન્દમાના યથાવશમ્ । ઉદાનિષુર્મહીરિતિ
તસ્માદુદકમુચ્યતે ॥ આપો ભદ્રા ઘૃતમિદાપ આસુરગ્નીષોમૌ બિભ્રત્યાપ
ઇત્તાઃ । તીવ્રો રસો મધુપૃચા

૪ મરંગમ આ મા પ્રાણેન સહ વર્ચસાગન્ ॥ આદિત્પશ્યામ્યુત વા
શૃણોમ્યા મા ઘોષો ગચ્છતિ વાઙ્ન આસામ્ । મન્યે ભેજાનો અમૃતસ્ય
તર્હિ હિરણ્યવર્ણા અતૃપં યદા વઃ ॥ આપો હિષ્ઠા મયોભુવસ્તા ન
ઊર્જે દધાતન । મહે રણાય ચક્ષસે ॥ યો વઃ શિવતમો રસસ્તસ્ય
ભાજયતેહ નઃ । ઉશતીરિવ માતરઃ ॥ તસ્મા અરં ગમામ વો યસ્ય
ક્ષયાય જિન્વથ । આપો જનયથા ચ નઃ ॥ દિવિ શ્રયસ્વાન્તરિક્ષે
યતસ્વ પૃથિવ્યા સંભવ બ્રહ્મવર્ચસમસિ બ્રહ્મવર્ચસાય ત્વા ॥ ૫। ૬। ૧॥
ઉન્દન્તિ સમવલ્ગત મધુપૃચાં માતરો દ્વાવિꣳશતિશ્ચ ॥ ૫। ૬। ૧॥

૫ અપાં ગ્રહાન્ગૃહ્ણાત્યેતદ્વાવ રાજસૂયં યદેતે ગ્રહાઃ

સર્વોઽગ્નિર્વરુણસવો રાજસૂયમગ્નિસવશ્ચિત્યસ્તાભ્યામેવ સૂયતેઽથો
ઉભાવેવ લોકાવભિ જયતિ યશ્ચ રાજસૂયેનેજાનસ્ય યશ્ચાગ્નિચિત
આપો ભવન્ત્યાપો વા અગ્નેર્ભ્રાતૃવ્યા યદપોઽગ્નેરધસ્તાદુપદધાતિ
ભ્રાતૃવ્યાભિભૂત્યૈ ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો ભવત્યમૃતં
૬ વા આપસ્તસ્માદદ્ભિરવતાન્તમભિ ષિઞ્ચન્તિ નાર્તિમાર્ચ્છતિ
સર્વમાયુરેતિ યસ્યૈતા ઉપધીયન્તે ય ઉ ચૈના એવં વેદાન્નં વા
આપઃ પશવ આપોઽન્નં પશવોઽન્નાદઃ પશુમાન્ભવતિ યસ્યૈતા
ઉપધીયન્તે ય ઉ ચૈના એવં વેદ દ્વાદશ ભવન્તિ દ્વાદશ માસાઃ
સંવથ્સરઃ સંવથ્સરેણૈવાસ્મા
૭ અન્નમવ રુંધે પાત્રાણિ ભવન્તિ પાત્રે વા અન્નમદ્યતે સયોન્યેવાન્નમવ
રુંધ આ દ્વાદશાત્પુરુષાદન્નમત્ત્યથો પાત્રાન્ન છિદ્યતે યસ્યૈતા
ઉપધીયન્તે ય ઉ ચૈના એવં વેદ કુંભાશ્ચ કુંભીશ્ચ મિથુનાનિ
ભવન્તિ મિથુનસ્ય પ્રજાત્યૈ પ્ર પ્રજયા પશુભિર્મિથુનૈર્જાયતે
યસ્યૈતા ઉપધીયન્તે ય ઉ
૮ ચૈના એવં વેદ શુગ્વા અગ્નિઃ સોઽધ્વર્યું યજમાનં પ્રજાઃ શુચાર્પયતિ
યદપ ઉપદધાતિ શુચમેવાસ્ય શમયતિ નાર્તિમાર્ચ્છત્યધ્વર્યુર્ન
યજમાનઃ શામ્યન્તિ પ્રજા યત્રૈતા ઉપધીયન્તેઽપાં વા એતાનિ હૃદયાનિ
યદેતા આપો યદેતા અપ ઉપદધાતિ દિવ્યાભિરેવૈનાઃ સꣳ સૃજતિ
વર્ષુકઃ પર્જન્યો
૯ ભવતિ યો વા એતાસામાયતનં ક્લૃપ્તિં વેદાયતનવાન્ભવતિ
કલ્પતેઽસ્મા અનુસીતમુપ દધાત્યેતદ્વા આસામાયતનમેષા ક્લૃપ્તિર્ય એવં
વેદાયતનવાન્ભવતિ કલ્પતેઽસ્મૈ દ્વંદ્વમન્યા ઉપ દધાતિ ચતસ્રો મધ્યે
ધૃત્યા અન્નં વા ઇષ્ટકા એતત્ખલુ વૈ સાક્ષાદન્નં યદેષ ચરુર્યદેતં
ચરુમુપદધાતિ સાક્ષા
૧૦ દેવાસ્મા અન્નમવ રુંધે મધ્યત ઉપ દધાતિ મધ્યત એવાસ્મા
અન્નં દધાતિ તસ્માન્મધ્યતોઽન્નમદ્યતે બાર્હસ્પત્યો ભવતિ બ્રહ્મ વૈ
દેવાનાં બૃહસ્પતિર્બ્રહ્મણૈવાસ્મા અન્નમવ રુંધે બ્રહ્મવર્ચસમસિ

બ્રહ્મવર્ચસાય ત્વેત્યાહ તેજસ્વી બ્રહ્મવર્ચસી ભવતિ યસ્યૈષ
ઉપધીયતે ય ઉ ચૈનમેવં વેદ ॥ ૫। ૬। ૨॥ અમૃતમસ્મૈ જાયતે યસ્યૈતા
ઉપધીયન્તે ય ઉ પર્જન્ય ઉપદધાતિ સાક્ષાથ્સમ ચત્વારિ ँ શચ્ચ
॥ ૫। ૬। ૨॥

૧૧ ભૂતેષ્ટકા ઉપ દધાત્યત્રાત્ર વૈ મૃત્યુર્જાયતે યત્રયત્રૈવ
મૃત્યુર્જાયતે તત એવૈનમવ યજતે તસ્માદગ્નિચિથ્સર્વમાયુરેતિ
સર્વે હ્યસ્ય મૃત્યવોઽવેષ્ટાસ્તસ્માદગ્નિચિન્નાભિચરિત વૈ
પ્રત્યગેનમભિચારઃ સ્તૃણુતે સૂયતે વા એષ યોઽગ્નિં ચિનુતે
દેવસુવામેતાનિ હવી ँ ષિ ભવન્ત્યેતાવન્તો વૈ દેવાના ँ સવાસ્ત એવા

૧૨ ઽસ્મૈ સવાન્ પ્ર યચ્છન્તિ ત એન ँ સુવન્તે સવોઽગ્નિર્વરુણસવો
રાજસૂયં બ્રહ્મસવશ્ચિત્યો દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇત્યાહ
સવિતૃપ્રસૂત એવૈનં બ્રહ્મણા દેવતાભિરભિ ષિઞ્ચત્યન્નસ્યાન્નસ્યાભિ
ષિઞ્ચત્યન્નસ્યાન્નસ્યાવરુદ્ધ્યૈ પુરસ્તાત્પ્રત્યઞ્ચમભિ ષિઞ્ચતિ
પુરસ્તાદ્ધિ પ્રતીચીનમન્નમદ્યતે શીર્ષતોઽભિ ષિઞ્ચતિ શીર્ષતો
હ્યન્નમદ્યત આ મુખાદન્વવસ્રાવયતિ

૧૩ મુખત એવાસ્મા અન્નાદ્યં દધાત્યગ્નેસ્ત્વા
સામ્રાજ્યેનાભિષિઞ્ચામીત્યાહૈષ વા અગ્નેઃ સવસ્તેનૈવૈનમભિ
ષિઞ્ચતિ બૃહસ્પતેસ્ત્વા સામ્રાજ્યેનાભિષિઞ્ચામીત્યાહ બ્રહ્મ
વૈ દેવાનાં બૃહસ્પતિર્બ્રહ્મણૈવૈનમભિ ષિઞ્ચતીન્દ્રસ્ય ત્વા
સામ્રાજ્યેનાભિ ષિઞ્ચામીત્યાહેન્દ્રિયમેવાસ્મિન્નુપરિષ્ટાદ્દધાત્યેત

૧૪ દ્વૈ રાજસૂયસ્ય રૂપં ય એવં વિદ્વાનગ્નિં ચિનુત ઉભાવેવ લોકાવભિ
જયતિ યશ્ચ રાજસૂયેનેજાનસ્ય યશ્ચાગ્નિચિત ઇન્દ્રસ્ય સુષુવાણસ્ય
દશધેંદ્રિયં વીર્યં પરાપતત્તદ્દેવાઃ સૌત્રામણ્યા સમભરન્થ્સૂયતે
વા એષ યોઽગ્નિં ચિનુતેઽગ્નિં ચિત્વા સૌત્રામણ્યા યજેતેન્દ્રિયમેવ
વીર્ય ँ સંભૃત્યાત્મન્ધત્તે ॥ ૫। ૬। ૩॥ ત એવાઽન્વવસ્રાવયત્યેતદષ્ટા
ચત્વારિ ँ શચ્ચ ॥ ૫। ૬। ૩॥

૧૫ સજૂરબ્દોઽયાવભિઃ સજૂરુષા અરુણીભિઃ સજૂઃ સૂર્ય એતશેન

સજોષાવશ્વિના દꣳ સોભિઃ સજૂરગ્નિર્વૈશ્વાનર ઇડાભિર્ઘૃતેન
સ્વાહા સંવથ્સરો વા અબ્દો માસા અયાવા ઉષા અરુણીઃ સૂર્ય એતશ ઇમે
અશ્વિના સંવથ્સરોઽગ્નિર્વૈશ્વાનરઃ પશવ ઇડા પશવો ઘૃતꣳ
સંવથ્સરં પશવોઽનુ પ્ર જાયન્તે સંવથ્સરેણૈવાસ્મૈ પશૂન્ પ્ર જનયતિ
દર્ભસ્તમ્બે જુહોતિ યદ્
૧૬ વા અસ્યા અમૃતં યદ્વીર્યં તદ્દર્ભાસ્તસ્મિઞ્જુહોતિ પ્રૈવ જાયતેઽન્નાદો
ભવતિ યસ્યૈવં જુહ્વત્યેતા વૈ દેવતા અગ્નેઃ પુરસ્તાદ્ભાગાસ્તા એવ
પ્રીણાત્યથો ચક્ષુરેવાગ્નેઃ પુરસ્તાત્પ્રતિ દધાત્યનન્ધો ભવતિ ય
એવં વેદાપો વા ઇદમગ્રે સલિલમાસીથ્સ પ્રજાપતિઃ પુષ્કરપર્ણે વાતો
ભૂતોઽલેલાયથ્સઃ
૧૭ પ્રતિષ્ઠાં નાવિન્દત સ એતદપાં
કુલાયમપશ્યત્તસ્મિન્નગ્નિમચિનુત તદિયમભવત્તતો વૈ સ
પ્રત્યતિષ્ઠદ્યાં પુરસ્તાદુપાદધાત્તચ્છિરોઽભવથ્સા પ્રાચી
દિગ્યાં દક્ષિણત ઉપાદધાથ્સ દક્ષિણઃ પક્ષોઽભવથ્સા દક્ષિણા
દિગ્યાં પશ્ચાદુપાદધાત્તત્પુચ્છમભવથ્સા પ્રતીચી દિગ્યામુત્તરત
ઉપાદધાથ્
૧૮ સ ઉત્તરઃ પક્ષોઽભવથ્સોદીચી દિગ્યામુપરિષ્ટાદુપાદધાત્ તત્
પૃષ્ઠમભવથ્ સોર્ધ્વા દિગિયં વા અગ્નિઃ પઞ્ચેષ્ટકસ્તસ્માદ્યદસ્યાં
ખનન્ત્યભીષ્ટકાં તૃન્દન્ત્યભિ શર્કરાꣳ સર્વા વા ઇયં વયોભ્યો
નક્તં દૃશે દીપ્યતે તસ્માદિમાં વયાꣳસિ નક્તં નાધ્યાસતે ય એવં
વિદ્વાનગ્નિં ચિનુતે પ્રત્યેવ
૧૯ તિષ્ઠત્યભિ દિશો જયત્યાગ્નેયો વૈ બ્રાહ્મણસ્તસ્માદ્બ્રાહ્મણાય
સર્વાસુ દિક્ષ્વર્ધુકꣳ સ્વામેવ તદ્દિશમન્વેત્યપાં વા અગ્નિઃ કુલાયં
તસ્માદાપોઽગ્નિꣳ હારુકાઃ સ્વામેવ તદ્યોનિં પ્ર વિશન્તિ ॥ ૫। ૬। ૪॥
યદલેલાયથ્સ ઉત્તરત ઉપાદધાદેવ દ્વા ત્રિꣳશચ્ચ ॥ ૫। ૬। ૪॥
૨૦ સંવથ્સરમુખ્યં ભૃત્વા દ્વિતીયે સંવથ્સર આગ્નેયમષ્ટાકપાલં
નિર્વપેદૈન્દ્રમેકાદશકપાલં વૈશ્વદેવં દ્વાદશકપાલં બાર્હસ્પત્યં

ચરું વૈષ્ણવં ત્રિકપાલં તૃતીયે સંવથ્સરેઽભિજિતા
યજેત યદષ્ટાકપાલો ભવત્યષ્ટાક્ષરા ગાયત્ર્યાગ્નેયં ગાયત્રં
પ્રાતઃસવનં પ્રાતઃસવનમેવ તેન દાધાર ગાયત્રીં છન્દો યદેકાદશકપાલો
ભવત્યેકાદશાક્ષરા ત્રિષ્ટુગૈન્દ્રં ત્રૈષ્ટુભં માધ્યંદિનꣳ સવનં
માધ્યંદિનમેવ સવનં તેન દાધાર ત્રિષ્ટુભં
૨૧ છન્દો યદ્દ્વાદશકપાલો ભવતિ દ્વાદશાક્ષરા જગતી વૈશ્વદેવં
જાગતં તૃતીયસવનં તૃતીયસવનમેવ તેન દાધાર જગતીં છન્દો
યદ્બાર્હસ્પત્યશ્ચરુર્ભવતિ બ્રહ્મ વૈ દેવાનાં બૃહસ્પતિર્બ્રહ્મૈવ
તેન દાધાર યદ્વૈષ્ણવસ્ત્રિકપાલો ભવતિ યજ્ઞો વૈ વિષ્ણુર્યજ્ઞમેવ
તેન દાધાર યત્તૃતીયે સંવથ્સરેઽભિજિતા યજતેઽભિજિત્યૈ
યથ્સંવથ્સરમુખ્યં બિભર્તીમમેવ
૨૨ તેન લોકરꣳ સ્પૃણોતિ યદ્દ્વિતીયે સંવથ્સરેઽગ્નિં
ચિનુતેઽન્તરિક્ષમેવ તેન સ્પૃણોતિ યત્તૃતીયે સંવથ્સરે
યજતેઽમુમેવ તેન લોકરꣳ સ્પૃણોત્યેતં વૈ પર આટ્ણારઃ કક્ષીવાꣳ
ઔશિજો વીતહવ્યઃ શ્રાયસસ્ત્રસદસ્યુઃ પૌરુકુથ્સ્યઃ પ્રજાકામા અચિન્વત
તતો વૈ તે સહસ્રꣳસહસ્રં પુત્રાનવિન્દન્ત પ્રથતે પ્રજયા
પશુભિસ્તાં માત્રામાપ્નોતિ યાં તેઽગચ્છન્, ય એવં વિદ્વાનેતમગ્નિં
ચિનુતે ॥ ૫। ૬। ૫॥ દાધાર ત્રિષ્ટુભમિમમેવૈવં ચત્વારિ ચ ॥ ૫। ૬। ૫॥
૨૩ પ્રજાપતિરગ્નિમચિનુત સ ક્ષુરપવિર્ભૂત્વાતિષ્ઠત્તં દેવા બિભ્યતો
નોપાયન્ત છન્દોભિરાત્માનં છાદયિત્વોપાયન્તચ્છંદસાં છંદસ્ત્વં બ્રહ્મ
વૈ છન્દાꣳસિ બ્રહ્મણ એતદ્રૂપં યત્કૃષ્ણાજિનં કાર્ષ્ણી ઉપાનહાવુપ
મુઞ્ચતે છન્દોભિરેવાત્માનં છાદયિત્વાગ્નિમુપ ચરત્યાત્મનોઽહિꣳસાયૈ
દેવનિધિર્વા એષ નિ ધીયતે યદગ્નિ
૨૪ રન્યે વા વૈ નિધિમગુપ્તં વિન્દન્તિ ન વા પ્રતિ પ્ર જાનાત્યુખામા
ક્રામત્યાત્માનમેવાધિપાં કુરુતે ગુપ્ત્યા અથો ખલ્વાહુર્નાક્રમ્યેતિ
નૈરૃત્યુખા યદાક્રામેન્નિરૃત્યા આત્માનમપિ દધ્યાત્તસ્માન્નાક્રમ્યા
પુરુષશીર્ષમુપ દધાતિ ગુપ્ત્યા અથો યથા બ્રૂયાદેતન્મે ગોપાયેતિ

તાદૃગેવ તત્
૨૫ પ્રજાપતિર્વા અથર્વાગ્નિરેવ દધ્યઙ્ઙાથર્વણસ્તસ્યેષ્ટકા
અસ્થાન્યેતꣳ હ વાવ તદૃષિરભ્યનૂવાચેન્દ્રો દધીચો અસ્થભિરિતિ
યદિષ્ટકાભિરગ્નિં ચિનોતિ સાત્માનમેવાગ્નિં ચિનુતે સાત્મામુષ્મિꣳલ્લોકે
ભવતિ ય એવં વેદ શરીરં વા એતદગ્નેર્યચ્ચિત્ય આત્મા વૈશ્વાનરો
યચ્ચિતે વૈશ્વાનરં જુહોતિ શરીરમેવ સꣳસ્કૃત્યા
૨૬ ઽભ્યારોહતિ શરીરં વા એતદ્યજમાનઃ સꣳસ્કુરુતે યદગ્નિં ચિનુતે
યચ્ચિતે વૈશ્વાનરં જુહોતિ શરીરમેવ સꣳસ્કૃત્યાત્મનાભ્યારોહતિ
તસ્માત્તસ્ય નાવ દ્યન્તિ જીવન્નેવ દેવાનપ્યેતિ વૈશ્વાનર્યર્ચા પુરીષમુપ
દધાતીયં વા અગ્નિર્વૈશ્વાનરસ્તસ્યૈષા ચિતિર્યત્પુરીષમગ્નિમેવ
વૈશ્વાનરં ચિનુત એષા વા અગ્નેઃ પ્રિયા તનૂર્યદ્વૈશ્વાનરઃ પ્રિયામેવાસ્ય
તનુવમવ રુન્ધે ॥ ૫। ૬। ૬॥ અગ્નિસ્તથ્સꣳસ્કૃત્યાઽગ્નેર્દશ ચ ॥ ૫। ૬। ૬॥
૨૭ અગ્નેર્વૈ દીક્ષયા દેવા વિરાજમાપ્નુવન્તિસ્રો રાત્રીર્દીક્ષિતઃ સ્યાત્ત્રિપદા
વિરાડ્વિરાજમાપ્નોતિ ષડ્રાત્રીર્દીક્ષિતઃ સ્યાત્ ષડ્વા ઋતવઃ સંવથ્સરઃ
સંવથ્સરો વિરાડ્વિરાજમાપ્નોતિ દશ રાત્રીર્દીક્ષિતઃ સ્યાદ્દશાક્ષરા
વિરાડ્વિરાજમાપ્નોતિ દ્વાદશ રાત્રીર્દીક્ષિતઃ સ્યાદ્દ્વાદશ માસાઃ
સંવથ્સરઃ સંવથ્સરો વિરાડ્વિરાજમાપ્નોતિ ત્રયોદશ રાત્રીર્દીક્ષિતઃ
સ્યાત્ત્રયોદશ
૨૮ માસાઃ સંવથ્સરઃ સંવથ્સરો વિરાડ્વિરાજમાપ્નોતિ પઞ્ચદશ
રાત્રીર્દીક્ષિતઃ સ્યાત્પઞ્ચદશ વા અર્ધમાસસ્ય રાત્રયોઽર્ધમાસશઃ
સંવથ્સર આપ્યતે સંવથ્સરો વિરાડ્વિરાજમાપ્નોતિ સપ્તદશ
રાત્રીર્દીક્ષિતઃ સ્યાદ્દ્વાદશ માસાઃ પઞ્ચર્તવઃ સ સંવથ્સરઃ
સંવથ્સરો વિરાડ્વિરાજમાપ્નોતિ ચતુર્વિꣳશતિꣳ રાત્રીર્દીક્ષિતઃ
સ્યાચ્ચતુર્વિꣳશતિરર્ધમાસાઃ સંવથ્સરઃ સંવથ્સરો વિરાડ્વિરાજમાપ્નોતિ
ત્રિꣳશતꣳ રાત્રીર્દીક્ષિતઃ સ્યાત્
૨૯ ત્રિꣳશદક્ષરા વિરાડ્વિરાજમાપ્નોતિ માસં દીક્ષિતઃ સ્યાદ્યો માસઃ
સ સંવથ્સરઃ સંવથ્સરો વિરાડ્વિરાજમાપ્નોતિ ચતુરો માસો દીક્ષિતઃ

સ્યાચ્ચતુરો વા એતં માસો વસવોઽભિભરુસ્તે પૃથિવીમાજયન્ગાયત્રીં
છન્દોઽષ્ટૌ રુદ્રાસ્તેઽન્તરિક્ષમાજયન્ત્રિષ્ટુભં છન્દો દ્વાદશાદિત્યાસ્તે
દિવમાજયઞ્જગતીં છંદસ્તતો વૈ તે વ્યાવૃતમગચ્છઞ્છ્રૈષ્ઠ્યં
દેવાનાં તસ્માદ્દ્વાદશ માસો ભૃત્વાગ્નિં ચિન્વીત દ્વાદશ માસાઃ
સંવથ્સરઃ સંવથ્સરોઽગ્નિશ્ચિત્યસ્તસ્યાહોરાત્રાણીષ્ટકા આપ્તેષ્ટકમેનં
ચિનુતેઽથો વ્યાવૃતમેવ ગચ્છતિ શ્રૈષ્ઠ્યꣳ સમાનાનામ્ ॥
૫। ૬। ૭॥ સ્યાત્રયોદશ ત્રિꣳ શતꣳ રાત્રીર્દીક્ષિતઃ સ્યાદ્વૈ
તેઽષ્ટાવિꣳશતિશ્ચ ॥ ૫। ૬। ૭॥

30 સુવર્ગાય વા એષ લોકાય ચીયતે યદગ્નિસ્તં
યન્નાન્વારોહેથ્સુવર્ગાલ્લોકાદ્યજમાનો હીયેત પૃથિવીમાક્રમિષં પ્રાણો મા
મા હાસીદન્તરિક્ષમાક્રમિષં પ્રજા મા મા હાસીદ્દિવમાક્રમિષꣳ
સુવરગન્મેત્યાહૈષ વા અગ્નેરન્વારોહસ્તેનૈવૈનમન્વારોહતિ સુવર્ગસ્ય
લોકસ્ય સમષ્ટ્યૈ યત્પક્ષસંમિતાં મિનુયાત્

31 કનીયાꣳ સં યજ્ઞક્રતુમુપેયાત્પાપીયસ્યસ્યાત્મનઃ પ્રજા સ્યાદ્વેદિસંમિતાં
મિનોતિ જ્યાયાꣳસમેવ યજ્ઞક્રતુમુપૈતિ નાસ્યાત્મનઃ પાપીયસી પ્રજા
ભવતિ સાહસ્રં ચિન્વીત પ્રથમં ચિન્વાનઃ સહસ્રસંમિતો વા અયં
લોક ઇમમેવ લોકમભિ જયતિ દ્વિષાહસ્રં ચિન્વીત દ્વિતીયં ચિન્વાનો
દ્વિષાહસ્રં વા અન્તરિક્ષમન્તરિક્ષમેવાભિ જયતિ ત્રિષાહસ્રં ચિન્વીત
તૃતીયં ચિન્વાન

32 સ્ત્રિષાહસ્રો વા અસૌ લોકોઽમુમેવ લોકમભિ જયતિ જાનુદઘ્નં
ચિન્વીત પ્રથમં ચિન્વાનો ગાયત્રિયૈવેમં લોકમભ્યારોહતિ નાભિદઘ્નં
ચિન્વીત દ્વિતીયં ચિન્વાનસ્ત્રિષ્ટુભૈવાન્તરિક્ષમભ્યારોહતિ ગ્રીવદઘ્નં
ચિન્વીત તૃતીયં ચિન્વાનો જગત્યૈવામું લોકમભ્યારોહતિ નાગ્નિં ચિત્વા
રામામુપેયાદયોનૌ રેતો ધાસ્યામીતિ ન દ્વિતીયં ચિત્વાન્યસ્ય સ્ત્રિય

33 મુપેયાન્ન તૃતીયં ચિત્વા કાં ચ નોપેયાદ્રેતો વા એતન્નિ ધત્તે
યદગ્નિં ચિનુતે યદુપેયાદ્રેતસા વ્યૃધ્યેતાથો ખલ્વાહુરપ્રજસ્યં
તદ્યન્નોપેયાદિતિ યદ્રેતઃસિચાવુપ દધાતિ તે એવ યજમાનસ્ય રેતો

બિભૃતસ્તસ્માદુપેયાદ્રેતસોઽસ્કન્દાય ત્રીણિ વાવ રેતાઁસિ પિતા પુત્રઃ
પૌત્રો

૩૪ યદ્દ્વે રેતઃસિચાવુપદધ્યાદ્રેતોઽસ્ય વિ ચ્છિન્દ્યાત્તિસ્ર ઉપ દધાતિ
રેતસઃ સંતત્યા ઇયં વાવ પ્રથમા રેતઃસિગ્વાગ્વા ઇયં તસ્માત્પશ્યન્તીમાં
પશ્યન્તિ વાચં વદન્તીમન્તરિક્ષં દ્વિતીયા પ્રાણો વા અન્તરિક્ષં
તસ્માન્નાન્તરિક્ષં પશ્યન્તિ ન પ્રાણમસૌ તૃતીયા ચક્ષુર્વા અસૌ
તસ્માત્પશ્યન્ત્યમૂં પશ્યન્તિ ચક્ષુર્યજુષેમાં ચા

૩૫ ઽમૂં ચોપ દધાતિ મનસા મધ્યમામેષાં લોકાનાં ક્લૃપ્ત્યા અથો
પ્રાણાનામિષ્ટો યજ્ઞો ભૃગુભિરાશીર્દા વસુભિસ્તસ્ય ત ઇષ્ટસ્ય
વીતસ્ય દ્રવિણેહ ભક્ષીયેત્યાહ સ્તુતશસ્ત્રે એવૈતેન દુહે પિતા
માતરિશ્વાચ્છિદ્રા પદા ધા અચ્છિદ્રા ઉશિજઃ પદાનુ તક્ષુઃ સોમો
વિશ્વવિન્નેતા નેષદ્બૃહસ્પતિરુક્થામદાનિ શઁસિષદિત્યાહૈતદ્વા
અગ્નેરુક્થં તેનૈવૈનમનુ શઁસતિ ॥ ૫। ૬। ૮॥ મિનુયાત્તૃતીયં
ચિન્વાનસ્ત્રિયં પૌત્રશ્ચ વૈ સપ્ત ચ ॥ ૫। ૬। ૮॥

૩૬ સૂયતે વા એષોઽગ્નીનાં ય ઉખાયાં ભ્રિયતે યદધઃ સાદયેદ્ગર્ભાઃ
પ્રપાદુકાઃ સ્યુરથો યથા સવાત્પ્રત્યવરોહતિ તાદૃગેવ તદાસન્દી
સાદયતિ ગર્ભાણાં ધૃત્યા અપ્રપાદાયાથો સવમેવૈનં કરોતિ ગર્ભો
વા એષ યદુખ્યો યોનિઃ શિક્યં યચ્છિક્યાદુખાં નિરૂહેદ્યોનેર્ગર્ભં
નિર્હણ્યાત્ષડુદ્યામઁ શિક્યં ભવતિ ષોઢાવિહિતો વૈ

૩૭ પુરુષ આત્મા ચ શિરશ્ચ ચત્વાર્યઙ્ગાન્યાત્મન્નેવૈનં બિભર્તિ
પ્રજાપતિર્વા એષ યદગ્નિસ્તસ્યોખા ચોલૂખલં ચ સ્તનૌ તાવસ્ય
પ્રજા ઉપ જીવન્તિ યદુખાં ચોલૂખલં ચોપદધાતિ તાભ્યામેવ
યજમાનોઽમુષ્મિઁલ્લોકેઽગ્નિં દુહે સંવત્સરો વા એષ યદગ્નિસ્તસ્ય
ત્રેધાવિહિતા ઇષ્ટકાઃ પ્રાજાપત્યા વૈષ્ણવી

૩૮ વૈશ્વકર્મણીરહોરાત્રાણ્યેવાસ્ય પ્રાજાપત્યા યદુખ્યં બિભર્તિ
પ્રાજાપત્યા એવ તદુપ ધત્તે યત્સમિધ આદધાતિ વૈષ્ણવા વૈ વનસ્પતયો
વૈષ્ણવીરેવ તદુપ ધત્તે યદિષ્ટકાભિરગ્નિં ચિનોતીયં વૈ વિશ્વકર્મા

વૈશ્વકર્મણીરેવ તદુપ ધત્તે તસ્માદાહુસ્ત્રિવૃદગ્નિરિતિ તં વા એતં
યજમાન એવ ચિન્વીત યદસ્યાન્યશ્ચિનુયાદ્યત્તં દક્ષિણાભિર્ન
રાધયેદગ્નિમસ્ય વૃઞ્જીત યોઽસ્યાગ્નિં ચિનુયાત્તં દક્ષિણાભી
રાધયેદગ્નિમેવ તથ્સ્પૃણોતિ ॥ ૫। ૬। ૯॥ ષોઢાવિહિતો વૈ વૈષ્ણવીરન્યો
વિ ꣳશતિશ્ચ ॥ ૫। ૬। ૯॥

૩૯ પ્રજાપતિરગ્નિમચિનુતર્તુભિઃ સંવથ્સરં વસન્તેનૈવાસ્ય
પૂર્વાર્ધમચિનુત ગ્રીષ્મેણ દક્ષિણં પક્ષં વર્ષાભિઃ પુચ્છ ꣳ
શરદોત્તરં પક્ષ ꣳ હેમન્તેન મધ્યં બ્રહ્મણા વા અસ્ય
તત્પૂર્વાર્ધમચિનુત ક્ષત્રેણ દક્ષિણં પક્ષં પશુભિઃ પુચ્છં
વિશોત્તરં પક્ષમાશયા મધ્યં ય એવં વિદ્વાનગ્નિં ચિનુત
ઋતુભિરેવૈનં ચિનુતેઽથો એતદેવ સર્વમવ

૪૦ રુંધે શ ृણ્વન્ત્યેનમગ્નિં ચિક્યાનમત્ત્યન્ન ꣳ રોચત ઇયં વાવ
પ્રથમા ચિતિરોષધયો વનસ્પતયઃ પુરીષમન્તરિક્ષં દ્વિતીયા
વયા ꣳસિ પુરીષમસૌ તૃતીયા નક્ષત્રાણિ પુરીષં યજ્ઞશ્ચતુર્થી
દક્ષિણા પુરીષં યજમાનઃ પઞ્ચમી પ્રજા પુરીષં યત્રિચિતીકં ચિન્વીત
યજ્ઞં દક્ષિણામાત્માનં પ્રજામન્તરિયાત્તસ્માત્પઞ્ચ ચિતીકશ્ચેતવ્ય
એતદેવ સર્વઞ્ગ્ સ્પૃણોતિ યત્તિસ્રશ્ચિતય

૪૧ સ્ત્રિવૃદ્ધ્યગ્નિર્યદ્ દ્વે દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યૈ પઞ્ચ ચિતયો
ભવન્તિ પાઙ્ક્તઃ પુરુષ આત્માનમેવ સ્પૃણોતિ પઞ્ચ ચિતયો ભવન્તિ
પઞ્ચભિઃ પુરીષૈરભ્યૂહતિ દશ સં પદ્યન્તે દશાક્ષરો વૈ
પુરુષો યાવાનેવ પુરુષસ્તર ꣳ સ્પૃણોત્યથો દશાક્ષરા વિરાડન્નં
વિરાડ્વિરાજ્યેવાન્નાદ્યે પ્રતિ તિષ્ઠતિ સંવથ્સરો વૈ ષષ્ઠી ચિતિરૃતવઃ
પુરીષ ꣳ ષટ્ચિતયો ભવન્તિ ષટ્પુરીષાણિ દ્વાદશ સં પદ્યન્તે
દ્વાદશ માસાઃ સંવથ્સરઃ સંવથ્સર એવ પ્રતિ તિષ્ઠતિ ॥ ૫। ૬। ૧૦॥
અવ ચિતયઃ પુરીષં પઞ્ચદશ ચ ॥ ૫। ૬। ૧૦॥

૪૨ રોહિતો ધૂમ્રરોહિતઃ કર્કન્ધુરોહિતસ્તે પ્રાજાપત્યા
બભ્રુરરુણબભ્રુઃ શુકબભ્રુસ્તે રૌદ્રાઃ શ્યેતઃ શ્યેતાક્ષઃ

શ્યેતગ્રીવસ્તે પિતૃદેવત્યાસ્તિસ્રઃ કૃષ્ણા વશા વારુણ્યસ્તિસ્રઃ
શ્વેતા વશાઃ સૌર્યો મૈત્રાબાર્હસ્પત્યા ધૂમ્રલલામાસ્તૂપરાઃ ॥ ૫। ૬। ૧૧॥
રોહિતઃ ષડ્વિꣳશતિઃ ॥ ૫। ૬। ૧૧॥

૪૩ પૃશ્નિસ્તિરશ્ચીનપૃશ્નિરૂર્ધ્વપૃશ્નિસ્તે મારુતાઃ ફલ્ગૂર્લોહિતોર્ણી
બલક્ષી તાઃ સારસ્વત્યઃ પૃષતી સ્થૂલપૃષતી ક્ષુદ્રપૃષતી
તા વૈશ્વદેવ્યસ્તિસ્રઃ શ્યામા વશાઃ પૌષ્ણિયસ્તિસ્રો રોહિણીર્વશા
મૈત્રિય ઐન્દ્રાબાર્હસ્પત્યા અરુણલલામાસ્તૂપરાઃ ॥ ૫। ૬। ૧૨॥ પૃશ્નિઃ
ષડ્વિꣳશતિઃ ॥ ૫। ૬। ૧૨॥

૪૪ શિતિબાહુરન્યતઃ શિતિબાહુઃ સમન્તશિતિબાહુસ્ત ઐન્દ્રવાયવાઃ
શિતિરન્ધ્રોઽન્યતઃ શિતિરન્ધ્રઃ સમન્તશિતિરન્ધ્રસ્તે મૈત્રાવરુણાઃ
શુદ્ધવાલઃ સર્વશુદ્ધવાલો મણિવાલસ્ત આશ્વિનાસ્તિસ્રઃ શિલ્પા વશા
વૈશ્વદેવ્યસ્તિસ્રઃ શ્યેનીઃ પરમેષ્ઠિને સોમાપૌષ્ણાઃ શ્યામલલામાસ્તૂપરાઃ
॥ ૫। ૬। ૧૩॥

૪૫ ઉન્નત ઋષભો વામનસ્ત ઐન્દ્રાવરુણાઃ શિતિકકુચ્છિતિપૃષ્ઠઃ
શિતિભસત્ત ઐન્દ્રાબાર્હસ્પત્યાઃ શિતિપાચ્છિત્યોષ્ઠઃ શિતિભ્રુસ્ત
ઐન્દ્રાવૈષ્ણવાસ્તિસ્રઃ સિધ્મા વશા વૈશ્વકર્મણ્યસ્તિસ્રો
ધાત્રે પૃષોદરા ઐન્દ્રાપૌષ્ણાઃ શ્યેતલલામાસ્તૂપરાઃ ॥ ૫। ૬। ૧૪॥
શિતિબાહુરુન્નતઃ પઞ્ચવિꣳશતિઃ પઞ્ચવિꣳશતિઃ ॥ ૫। ૬। ૧૪॥

૪૬ કર્ણાસ્ત્રયો યામાઃ સૌમ્યાસ્ત્રયઃ શ્વિતિઙ્ગા અગ્નયે યવિષ્ઠાય ત્રયો
નકુલાસ્તિસ્રો રોહિણીસ્ત્ર્યવ્યસ્તા વસૂનાં તિસ્રોઽરુણા દિત્યૌહ્યસ્તા
રુદ્રાણાꣳસોમૈન્દ્રા બભ્રુલલામાસ્તૂપરાઃ ॥ ૫। ૬। ૧૫॥ કર્ણાસ્ત્રયોવિꣳશતિઃ
॥ ૫। ૬। ૧૫॥

૪૭ શુણ્ઠાસ્ત્રયો વૈષ્ણવા અધીલોધકર્ણાસ્ત્રયો વિષ્ણવ ઉરુક્રમાય
લપ્સુદિનસ્ત્રયો વિષ્ણવ ઉરુગાયાય પઞ્ચાવીસ્તિસ્ર આદિત્યાનાં
ત્રિવથ્સાસ્તિસ્રોઽઙ્ગિરસામૈન્દ્રાવૈષ્ણવા ગૌરલલામાસ્તૂપરાઃ ॥ ૫। ૬। ૧૬॥
શુણ્ઠા વિꣳશતિઃ ॥ ૫। ૬। ૧૬॥

૪૮ ઇન્દ્રાય રાજ્ઞે ત્રયઃ શિતિપૃષ્ઠા ઇન્દ્રાયાધિરાજાય ત્રયઃ શિતિકકુદ

ઇન્દ્રાય સ્વરાજ્ઞે ત્રયઃ શિતિભસદસ્તિસ્રસ્તુર્યૌહ્યઃ સાધ્યાનાં તિસ્રઃ
પષ્ઠૌહ્યો વિશ્વેષાં દેવાનામાગ્નેન્દ્રાઃ કૃષ્ણલલામાસ્તૂપરાઃ ॥ ૫। ૬। ૧૭॥ ઇન્દ્રાય રાજ્ઞે દ્વાવિꣳશતિઃ ॥ ૫। ૬। ૧૭॥

૪૯ અદિત્યૈ ત્રયો રોહિતૈતા ઇન્દ્રાણ્યૈ ત્રયઃ કૃષ્ણૈતાઃ કુહ્વૈ
ત્રયોઽરુણૈતાસ્તિસ્રો ધેનવો રાકાયૈ ત્રયોઽનડ્વાહઃ સિનીવાલ્યા
આગ્નાવૈષ્ણવા રોહિતલલામાસ્તૂપરાઃ ॥ ૫। ૬। ૧૮॥ અદિત્યા અષ્ટાદશ ॥ ૫। ૬। ૧૮॥

૫૦ સૌમ્યાસ્ત્રયઃ પિશંગાઃ સોમાય રાજ્ઞે ત્રયઃ સારઙ્ગાઃ
પાર્જન્યા નભોરૂપાસ્તિસ્રોઽજા મલ્હા ઇન્દ્રાણ્યૈ તિસ્રો મેષ્ય આદિત્યા
દ્યાવાપૃથિવ્યા માલઙ્ગાસ્તૂપરાઃ ॥ ૫। ૬। ૧૯॥ સૌમ્યા એકાન્ન વિꣳશતિઃ ॥
૫। ૬। ૧૯॥

૫૧ વારુણાસ્ત્રયઃ કૃષ્ણલલામા વરુણાય રાજ્ઞે ત્રયો રોહિતલલામા
વરુણાય રિશાદસે ત્રયોઽરુણલલામાઃ શિલ્પાસ્ત્રયો વૈશ્વદેવાસ્ત્રયઃ
પૃશ્નયઃ સર્વદેવત્યા ઐન્દ્રાસૂરાઃ શ્યેતલલામાસ્તૂપરાઃ ॥ ૫। ૬। ૨૦॥ વારુણા
વિꣳશતિઃ ॥ ૫। ૬। ૨૦॥

૫૨ સોમાય સ્વરાજ્ઞેઽનોવાહાવનડ્વાહાવિન્દ્રાગ્નિભ્યામોજો
દાભ્યામુષ્ટારાવિન્દ્રાગ્નિભ્યાં બલદાભ્યાꣳસીરવાહાવવી દ્વે ધેનૂ ભૌમી
દિગ્ભ્યો વડબે દ્વે ધેનૂ ભૌમી વૈરાજી પુરુષી દ્વે ધેનૂ ભૌમી વાયવ
આરોહણવાહાવનડ્વાહૌ વારુણી કૃષ્ણે વશે અરાડ્યૌ દિવ્યાવૃષભૌ
પરિમરૌ ॥ ૫। ૬। ૨૧॥ સોમાય સ્વરાજ્ઞે ચતુસ્ત્રિꣳશત્ ॥ ૫। ૬। ૨૧॥

૫૩ એકાદશ પ્રાતર્ગવ્યાઃ પશવ આ લભ્યન્તે છગલઃ કલ્માષઃ
કિકિદીવિર્વિદીગયસ્તે ત્વાષ્ટ્રાઃ સૌરીર્નવ શ્વેતા વશા અનૂબન્ધ્યા
ભવન્ત્યાગ્નેય ઐન્દ્રાગ્ન આશ્વિનસ્તે વિશાલયૂપ આ લભ્યન્તે ॥ ૫। ૬। ૨૨॥
એકાદશ પ્રાતઃ પંચ વિꣳશતિઃ ॥ ૫। ૬। ૨૨॥

૫૪ પિશઙ્ગાસ્ત્રયો વાસન્તાઃ સારઙ્ગાસ્ત્રયો ગ્રૈષ્માઃ પૃષન્તસ્ત્રયો
વાર્ષિકાઃ પૃશ્નયસ્ત્રયઃ શારદાઃ પૃશ્નિસક્થાસ્ત્રયો હૈમન્તિકા
અવલિપ્તાસ્ત્રયઃ શૈશિરાઃ સંવથ્સરાય નિવક્ષસઃ ॥ ૫। ૬। ૨૩॥ પિશઙ્ગા
વિꣳશતિઃ ॥ ૫। ૬। ૨૩॥

રોહિતઃ કૃષ્ણા ધૂમ્રલલામાઃ  પૃશ્ઞિઃ  શ્યામા અરુણલલામાઃ શિતિબાહુઃ
શિલ્પાઃ શ્યેનીઃ  શ્યામલલામા ઉન્નતઃ સિધ્મા ધાત્રે પૌષ્ણાઃ શ્યેતલલામાઃ
કર્ણા બભ્રુલલામાઃ શુણ્ઠા ગૌરલલામા  ઇંદ્રાય કૃષ્ણલલામા  અદિત્યૈ
રોહિતલલામાઃ સૌમ્યા માલઙ્ગા  વારુણાઃ સૂરાઃ શ્યેતલલામા  દશ  ॥

હિરણ્યવર્ણા અપાં ગ્રહાન્ભૂતેષ્ટકાઃ સજૂઃ સંવથ્સરં પ્રજાપતિઃ
સ ક્ષુરપવિરગ્નેર્વૈ દીક્ષયા  સુવર્ગાય  તં યન્વસૂયતે  પ્રજાપતિર્
ઋતુભી  રોહિતઃ  પૃશ્ઞિઃ  શિતિબાહુરુન્નતઃ કર્ણાઃ શુણ્ઠા ઇંદ્રાયાદિત્યૈ
સૌમ્યાવારુણાઃ સોમાયૈકાદશ પિશઙ્ગાસ્ત્રયોવિꣳશતિઃ ॥

હિરણ્યવર્ણા ભૂતેષ્ટકાશ્છંદો  યત્કનીયાꣳસં
ત્રિવૃદ્ધ્યગ્નિર્વારુણાશ્ચતુઃ  પંચાશત્ ॥

હિરણ્યવર્ણા  નિ વક્ષસઃ ॥

## પઞ્ચમકાણ્ડે સપ્તમઃ પ્રશ્નઃ ૭

૧ યો વા અયથાદેવતમગ્નિં ચિનુત આ દેવતાભ્યો વૃશ્ચ્યતે  પાપીયાન્ભવતિ
યો યથાદેવતં ન દેવતાભ્ય  આ વૃશ્ચ્યતે  વસીયાન્ભવત્યાગ્નેય્યા
ગાયત્રિયા પ્રથમાં ચિતિમભિ મૃશેત્ત્રિષ્ટુભા  દ્વિતીયાં  જગત્યા
તૃતીયામનુષ્ટુભા  ચતુર્થીં પઙ્ક્ત્યા પઞ્ચમીં યથાદેવતમેવાગ્નિં
ચિનુતે  ન દેવતાભ્ય  આ વૃશ્ચ્યતે  વસીયાન્ભવતીડાયૈ  વા એષા
વિભક્તિઃ પશવ  ઇડા  પશુભિરેનં

૨ ચિનુતે  યો વૈ પ્રજાપતયે પ્રતિપ્રોચ્યાગ્નિં ચિનોતિ
નાર્તિમાર્ચ્છત્યશ્વાવભિતસ્તિષ્ઠેતાં કૃષ્ણ ઉત્તરતઃ શ્વેતો
દક્ષિણસ્તાવાલભ્યેષ્ટકા  ઉપ  દધ્યાદેતદ્વૈ પ્રજાપતે રૂપં
પ્રાજાપત્યોઽશ્વઃ  સાક્ષાદેવ પ્રજાપતયે પ્રતિપ્રોચ્યાગ્નિં ચિનોતિ
નાર્તિમાર્ચ્છત્યેતદ્વા અહ્નો  રૂપં યચ્છ્વેતોઽશ્વો  રાત્રિયૈ કૃષ્ણ
એતદહ્નો

૩ રૂપં યદિષ્ટકા રાત્રિયૈ પુરીષમિષ્ટકા ઉપધાસ્યઙ્છ્વેતમશ્વમભિ
 મૃશેત્ પુરીષમુપધાસ્યન્ કૃષ્ણમહોરાત્રાભ્યામેવૈનં
 ચિનુતે હિરણ્યપાત્રં મધોઃ પૂર્ણં દદાતિ મધવ્યોઽસાનીતિ સૌર્યા
 ચિત્રવત્યાવેક્ષતે ચિત્રમેવ ભવતિ મધ્યંદિનેઽશ્વમવ ઘ્રાપયત્યસૌ
 વા આદિત્ય ઇન્દ્ર એષ પ્રજાપતિઃ પ્રાજાપત્યોઽશ્વસ્તમેવ સાક્ષાદૃધ્નોતિ
 ॥ ૫। ૭। ૧॥ એનમેતદહ્નોઽષ્ટા ચત્વારિ ँ શચ્ચ ॥ ૫। ૭। ૧॥
૪ ત્વામગ્ને વૃષભં ચેકિતાનં પુનર્યુવાનં જનયન્નુપાગામ્ ।
 અસ્થૂરિણો ગાર્હપત્યાનિ સન્તુ તિગ્મેન નો બ્રહ્મણા સ ँ શિશાધિ
 ॥ પશવો વા એતે યદિષ્ટકાશ્ચિત્યાં ચિત્યામૃષભમુપ દધાતિ
 મિથુનમેવાસ્ય તદ્યજ્ઞે કરોતિ પ્રજનનાય તસ્માદ્યૂથેયૂથ ઋષભઃ
 ॥ સંવથ્સરસ્ય પ્રતિમાં યાં ત્વા રાત્ર્યુપાસતે । પ્રજા ँ સુવીરાં
 કૃત્વા વિશ્વમાયુર્વ્યશ્નવત્ ॥ પ્રાજાપત્યા
૫ મેતામુપ દધાતીયં વાવૈષૈકાષ્ટકા યદેવૈકાષ્ટકાયામન્નં
 ક્રિયતે તદેવૈતયાવ રુંધ એષા વૈ પ્રજાપતેઃ કામદુઘા તયૈવ
 યજમાનોઽમુષ્મિઉ ँ લ્લોકેઽગ્નિં દુહે યેન દેવા જ્યોતિષોર્ધ્વા ઉદાયન્
 યેનાદિત્યા વસવો યેન રુદ્રાઃ । યેનાંગિરસો મહિમાનમાનશુસ્તેનૈતુ
 યજમાનઃ સ્વસ્તિ ॥ સુવર્ગાય વા એષ લોકાય
૬ ચીયતે યદગ્નિર્યેન દેવા જ્યોતિષોર્ધ્વા ઉદાયન્નિત્યુખ્ય ँ સમિન્ધ
 ઇષ્ટકા એવૈતા ઉપ ધત્તે વાનસ્પત્યાઃ સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ
 શતાયુધાય શતવીર્યાય શતોતયેઽભિમાતિષાહે । શતં યો નઃ શરદો
 અજીતાનિન્દ્રો નેષદતિ દુરિતાનિ વિશ્વા ॥ યે ચત્વારઃ પથયો દેવયાના
 અન્તરા દ્યાવાપૃથિવી વિયન્તિ । તેષાં યો અજ્યાનિમજીતિમાવહાત્તસ્મૈ
 નો દેવાઃ
૭ પરિ દત્તેહ સર્વે ॥ ગ્રીષ્મો હેમન્ત ઉત નો વસન્તઃ શરદ્વર્ષાઃ
 સુવિતં નો અસ્તુ । તેષામૃતૂના ँ શતશારદાનાં નિવાત એષામભયે
 સ્યામ ॥ ઇદુવથ્સરાય પરિવથ્સરાય સંવથ્સરાય કૃણુતા બૃહન્નમઃ ।
 તેષાં વય ँ સુમતૌ યજ્ઞિયાનાં જ્યોગજીતા અહતાઃ સ્યામ ॥ ભદ્રાન્નઃ

શ્રેયઃ સમનૈષ્ટ દેવાસ્ત્વયાવસેન સમશીમહિ ત્વા । સ નો મયોભૂઃ પિતો
૮ આ વિશસ્વ શં તોકાય તનુવે સ્યોનઃ ॥ અજ્યાનીરેતા ઉપ દધાત્યેતા
વૈ દેવતા અપરાજિતાસ્તા એવ પ્ર વિશતિ નૈવ જીયતે બ્રહ્મવાદિનો
વદન્તિ યદર્ધમાસા માસા ઋતવઃ સંવથ્સર ઓષધીઃ પચન્ત્યથ
કસ્માદન્યાભ્યો દેવતાભ્ય આગ્રયણં નિરુપ્યત ઇત્યેતા હિ તદ્દેવતા
ઉદજયન્ યદૃતુભ્યો નિર્વપેદ્દેવતાભ્યઃ સમદં દધ્યાદાગ્રયણં
નિરુપ્યૈતા આહુતીર્જુહોત્યર્ધમાસાનેવ માસાનૃતૂન્થ્સંવથ્સરં પ્રીણાતિ
ન દેવતાભ્યઃ સમદં દધાતિ ભદ્રાન્નઃ શ્રેયઃ સમનૈષ્ટ દેવા ઇત્યાહ
હુતાદ્યાય યજમાનસ્યાપરાભાવાય ॥ ૫। ૭। ૨॥ પ્રાજાપત્યાં લોકાય દેવાઃ
પિતો દધ્યાદાગ્રયણં પઞ્ચ વિꣳશતિશ્ચ ॥ ૫। ૭। ૨॥
૯ ઇન્દ્રસ્ય વજ્રોઽસિ વાર્ત્રઘ્નસ્તનૂપા નઃ પ્રતિસ્પશઃ । યો નઃ
પુરસ્તાદ્દક્ષિણતઃ પશ્ચાદુત્તરતોઽઘાયુરભિદાસત્યેતꣳ
સોઽશ્માનમૃચ્છતુ ॥ દેવાસુરાઃ સંયત્તા આસન્તેઽસુરા દિગ્ભ્ય આબાધન્ત
તાન્દેવા ઇષ્વા ચ વજ્રેણ ચાપાનુદન્ત યદ્વજ્રિણીરુપદધાતીષ્વા
ચૈવ તદ્વજ્રેણ ચ યજમાનો ભ્રાતૃવ્યાનપ નુદતે દિક્ષૂપ
૧૦ દધાતિ દેવપુરા એવૈતાસ્તનૂપાનીઃ પર્યૂહતેઽગ્નાવિષ્ણૂ સજોષસેમા
વર્ધન્તુ વાં ગિરઃ । દ્યુમ્નૈર્વાજેભિરા ગતમ્ ॥ બ્રહ્મવાદિનો વદન્તિ
યન્ન દેવતાયૈ જુહ્વત્યથ કિંદેવત્યા વસોર્ધારેત્યગ્નિર્વસુસ્તસ્યૈષા
ધારા વિષ્ણુર્વસુસ્તસ્યૈષા ધારાગ્નાવૈષ્ણવ્યર્ચા વસોર્ધારાં જુહોતિ
ભાગધેયેનૈવૈનૌ સમર્ધયત્યથો એતા
૧૧ મેવાહુતિમાયતનવતીં કરોતિ યત્કામ એનાં જુહોતિ તદેવાવ રુંધે રુદ્રો
વા એષ યદગ્નિસ્તસ્યૈતે તનુવૌ ઘોરાન્યા શિવાન્યા યચ્છતરુદ્રીયં
જુહોતિ યૈવાસ્ય ઘોરા તનૂસ્તાં તેન શમયતિ યદ્વસોર્ધારાં જુહોતિ
યૈવાસ્ય શિવા તનૂસ્તાન્તેન પ્રીણાતિ યો વૈ વસોર્ધારાયૈ
૧૨ પ્રતિષ્ઠાં વેદ પ્રત્યેવ તિષ્ઠતિ યદાજ્યમુચ્છિષ્યેત
તસ્મિન્બ્રહ્મૌદનં પચેત્તં બ્રાહ્મણાશ્ચત્વારઃ પ્રાશ્નીયુરેષ
વા અગ્નિર્વૈશ્વાનરો યદ્બ્રાહ્મણ એષા ખલુ વા અગ્નેઃ પ્રિયા

તનૂર્વૈશ્વાનરઃ પ્રિયાયામેવૈનાં તનુવાં પ્રતિ ષ્ઠાપયતિ ચતસ્રો
ધેનૂર્દદ્યાત્તાભિરેવ યજમાનોઽમુષ્મિꣳલ્લોકેઽગ્નિં દુહે ॥ ૫। ૭। ૩॥ ઉપૈતાં ધારાયૈ ષટ્ચત્વારિꣳશચ્ચ ॥
૫। ૭। ૩॥

૧૩ ચિત્તિં જુહોમિ મનસા ઘૃતેનેત્યાહાદાભ્યા વૈ નામૈષાહુતિર્વૈશ્વકર્મણી
નૈનં ચિક્યાનં ભ્રાતૃવ્યો દભ્નોત્યથો દેવતા એવાવ
રુંધેઽગ્ને તમદ્યેતિ પઙ્ક્ત્યા જુહોતિ પઙ્ક્ત્યાહુત્યા યજ્ઞમુખમા
રભતે સપ્ત તે અગ્ને સમિધઃ સપ્ત જિહ્વા ઇત્યાહ હોત્રા એવાવ
રુંધેઽગ્નિર્દેવેભ્યોઽપાક્રામદ્ભાગધેય

૧૪ મિચ્છમાનસ્તસ્મા એતદ્ભાગધેયં પ્રાયચ્છન્નેતદ્વા
અગ્નેરગ્નિહોત્રમેતર્હિ ખલુ વા એષ જાતો યર્હિ સર્વશ્ચિતો
જાતાયૈવાસ્મા અન્નમપિ દધાતિ સ એનં પ્રીતઃ પ્રીણાતિ વસીયાન્ભવતિ
બ્રહ્મવાદિનો વદન્તિ યદેષ ગાર્હપત્યશ્ચીયતેઽથ ક્વાસ્યાહવનીય
ઇત્યસાવાદિત્ય ઇતિ બ્રૂયાદેતસ્મિન્ હિ સર્વાભ્યો દેવતાભ્યો જુહ્વતિ

૧૫ ય એવં વિદ્વાનગ્નિં ચિનુતે સાક્ષાદેવ દેવતા ઋધ્નોત્યગ્ને
યશસ્વિન્ યશસેમમર્પયેન્દ્રાવતીમપચિતીમિહા વહ । અયં મૂર્ધા
પરમેષ્ઠી સુવર્ચાઃ સમાનાનામુત્તમશ્લોકો અસ્તુ ॥ ભદ્રં પશ્યન્ત ઉપ
સેદુરગ્રે તપો દીક્ષામૃષયઃ સુવર્વિદઃ । તતઃ, ક્ષત્રં બલમોજશ્ચ
જાતન્તદસ્મૈ દેવા અભિ સં નમન્તુ ॥ ધાતા વિધાતા પરમો

૧૬ ત સંદૃક્પ્રજાપતિઃ પરમેષ્ઠી વિરાજા । સ્તોમાશ્છન્દાꣳસિ નિવિદો
મ આહુરેતસ્મૈ રાષ્ટ્રમભિ સં નમામ ॥ અભ્યાવર્તધ્વમુપમેત
સાકમયꣳ શાસ્તાધિપતિર્વો અસ્તુ । અસ્ય વિજ્ઞાનમનુ સꣳ રભધ્વમિમં
પશ્ચાદનુ જીવાથ સર્વે ॥ રાષ્ટ્રભૃત એતા ઉપ દધાત્યેષા વા
અગ્નેશ્ચિતી રાષ્ટ્રભૃત્તયૈવાસ્મિન્રાષ્ટ્રં દધાતિ રાષ્ટ્રમેવ ભવતિ
નાસ્માદ્રાષ્ટ્રં ભ્રꣳશતે ॥ ૫। ૭। ૪॥ ભાગધેયં જુહ્વતિ પરમા રાષ્ટ્રં
દધાતિ સપ્ત ચ ॥ ૫। ૭। ૪॥

૧૭ યથા વૈ પુત્રો જાતો મ્રિયત એવં વા એષ મ્રિયતે યસ્યાગ્નિરુખ્ય
ઉદ્વાયતિ યન્નિર્મન્થ્યં કુર્યાદ્વિ ચ્છિન્દ્યાદ્ભ્રાતૃવ્યમસ્મૈ જનયેત્સ

એવ પુનઃ પરીધ્યઃ સ્વાદેવૈનં યોનેર્જનયતિ નાસ્મૈ ભ્રાતૃવ્યં જનયતિ
તમો વા એતં ગૃહ્ણાતિ યસ્યાગ્નિરુખ્ય ઉદ્વાયતિ મૃત્યુસ્તમઃ કૃષ્ણં
વાસઃ કૃષ્ણા ધેનુર્દક્ષિણા તમસૈ
૧૮ વ તમો મૃત્યુમપ હતે હિરણ્યં દદાતિ જ્યોતિર્વૈ હિરણ્યં જ્યોતિષૈવ
તમોઽપ હતેઽથો તેજો વૈ હિરણ્યં તેજ એવાત્મન્ધત્તે સુવર્ન ઘર્મઃ
સ્વાહા સુવર્નાર્કઃ સ્વાહા સુવર્ન શુક્રઃ સ્વાહા સુવર્ન જ્યોતિઃ સ્વાહા સુવર્ન
સૂર્યઃ સ્વાહાર્કો વા એષ યદગ્નિરસાવાદિત્યો
૧૯ ઽશ્વમેધો યદેતા આહુતીર્જુહોત્યર્કાશ્વમેધયોરેવ જ્યોતીँષિ સં
દધાત્યેષ હ ત્વા અર્કાશ્વમેધી યસ્યૈતદગ્નૌ ક્રિયત આપો વા ઇદમગ્રે
સલિલમાસીથ્સ એતાં પ્રજાપતિઃ પ્રથમાં ચિતિમપશ્યત્તામુપાધત્ત
તદિયમભવત્તં વિશ્વકર્માબ્રવીદુપ ત્વાયાનીતિ નેહ લોકોઽસ્તીત્ય
૨૦ બ્રવીથ્સ એતાં દ્વિતીયાં ચિતિમપશ્યત્તામુપાધત્ત
તદન્તરિક્ષમભવથ્સ યજ્ઞઃ પ્રજાપતિમબ્રવીદુપ ત્વાયાનીતિ
નેહ લોકોઽસ્તીત્યબ્રવીથ્સ વિશ્વકર્માણમબ્રવીદુપ ત્વાયાનીતિ કેન
મોપૈષ્યસીતિ દિશ્યાભિરિત્યબ્રવીત્તં દિશ્યાભિરુપૈત્તા ઉપાધત્ત તા દિશો
૨૧ ઽભવન્થ્સ પરમેષ્ઠી પ્રજાપતિમબ્રવીદુપ ત્વાયાનીતિ નેહ
લોકોઽસ્તીત્યબ્રવીથ્સ વિશ્વકર્માણં ચ યજ્ઞં ચાબ્રવીદુપ વામાયાનીતિ
નેહ લોકોઽસ્તીત્યબ્રૂતાँ સ એતાં તૃતીયાં ચિતિમપશ્યત્તામુપાધત્ત
તદસાવભવથ્સ આદિત્યઃ પ્રજાપતિમબ્રવીદુપ ત્વા
૨૨ ઽયાનીતિ નેહ લોકોઽસ્તીત્યબ્રવીથ્સ વિશ્વકર્માણં ચ યજ્ઞં
ચાબ્રવીદુપ વામાયાનીતિ નેહ લોકોઽસ્તીત્યબ્રૂતાँ સ
પરમેષ્ઠિનમબ્રવીદુપ ત્વાયાનીતિ કેન મોપૈષ્યસીતિ લોકં
પૃણયેત્યબ્રવીત્તં લોકં પૃણયોપૈત્તસ્માદયાતયામ્ની લોકં
પૃણાઽયાતયામા હ્યસા
૨૩ વાદિત્યસ્તાનૃષયોઽબ્રુવન્નુપ વ આયામેતિ કેન ન ઉપૈષ્યથેતિ
ભૂમ્નેત્યબ્રુવન્તાન્દ્વાભ્યાં ચિતીભ્યામુપાયન્થ્સ પઞ્ચચિતીકઃ સમપદ્યત
ય એવં વિદ્વાનગ્નિં ચિનુતે ભૂયાનેવ ભવત્યભીમાઉँલ્લોકાઞ્જયતિ

વિદુરેનં દેવા અથો એતાસામેવ દેવતાના ँ સાયુજ્યં ગચ્છતિ ॥ ૫। ૭। ૫॥ તમસાઽદિત્યોઽસ્તીતિ દિશ આદિત્યઃ પ્રજાપતિમબ્રવીદુપ ત્વાસૌ
પઞ્ચ ચત્વારિ ँ શચ્ચ ॥ ૫। ૭। ૫॥

૨૪ વયો વા અગ્નિર્યદગ્નિચિત્ પક્ષિણોઽશ્નીયાત્
તમેવાગ્નિમદ્યાદાર્તિમાર્ચ્છેત્સંવત્સરં વ્રતં ચરેત્સંવત્સર ँ
હિ વ્રતં નાતિ પશુર્વા એષ યદગ્નિર્હિનસ્તિ ખલુ વૈ તં પશુર્ય
એનં પુરસ્તાત્પ્રત્યઞ્ચમુપ ચરતિ તસ્માત્પશ્ચાત્પ્રાઙુપચર્ય
આત્મનોઽહિ ँ સાયૈ તેજોઽસિ તેજો મે યચ્છ પૃથિવીં યચ્છ

૨૫ પૃથિવ્યૈ મા પાહિ જ્યોતિરસિ જ્યોતિર્મે યચ્છાન્તરિક્ષં
યચ્છાન્તરિક્ષાન્મા પાહિ સુવરસિ સુવર્મે યચ્છ દિવં યચ્છ દિવો
મા પાહીત્યાહૈતાભિર્વા ઇમે લોકા વિધૃતા યદેતા ઉપદધાત્યેષાં
લોકાનાં વિધૃત્યૈ સ્વયમાતૃણ્ણા ઉપધાય હિરણ્યેષ્ટકા ઉપ દધાતીમે
વૈ લોકાઃ સ્વયમાતૃણ્ણા જ્યોતિર્હિરણ્યં યત્સ્વયમાતૃણ્ણા ઉપધાય

૨૬ હિરણ્યેષ્ટકા ઉપદધાતીમાનેવૈતાભિર્લોકાઞ્જ્યોતિષ્મતઃ કુરુતેઽથો
એતાભિરેવાસ્મા ઇમે લોકાઃ પ્ર ભાન્તિ યાસ્તે અગ્ને સૂર્યે રુચ ઉદ્યતો
દિવમાતન્વન્તિ રશ્મિભિઃ । તાભિઃ સર્વાભી રુચે જનાય નસ્કૃધિ ॥ યા
વો દેવાઃ સૂર્યે રુચો ગોષ્વશ્વેષુ યા રુચઃ । ઇન્દ્રાગ્ની તાભિઃ સર્વાભી
રુચં નો ધત્ત બૃહસ્પતે ॥ રુચં નો ધેહિ

૨૭ બ્રાહ્મણેષુ રુચ ँ રાજસુ નસ્કૃધિ । રુચં વિશ્યેષુ શૂદ્રેષુ
મયિ ધેહિ રુચા રુચમ્ ॥ દ્વેધા વા અગ્નિં ચિક્યાનસ્ય યશ ઇંદ્રિયં
ગચ્છત્યગ્નિં વા ચિતમીજાનં વા યદેતા આહુતીર્જુહોત્યાત્મન્નેવ યશ
ઇંદ્રિયં ધત્ત ઈશ્વરો વા એષ આર્તિમાર્તોર્ યોઽગ્નિં ચિન્વન્નધિ ક્રામતિ
તત્ત્વા યામિ બ્રહ્મણા વન્દમાન ઇતિ વારુણ્યર્ચા

૨૮ જુહુયાચ્છાન્તિરેવૈષાગ્નેર્ગુપ્તિરાત્મનો હવિષ્કૃતો
વા એષ યોઽગ્નિં ચિનુતે યથા વૈ હવિઃ સ્કન્દત્યેવં વા એષ
સ્કન્દતિ યોઽગ્નિં ચિત્વા સ્ત્રિયમુપૈતિ મૈત્રાવરુણ્યામિક્ષયા યજેત
મૈત્રાવરુણતામેવોપૈત્યાત્મનોઽસ્કન્દાય યો વા અગ્નિમૃતુસ્થાં

વેદર્તુરૃતુરસ્મૈ કલ્પમાન એતિ પ્રત્યેવ તિષ્ઠતિ સંવથ્સરો વા અગ્નિર્
૨૯ ઋતુસ્થાસ્તસ્ય વસન્તઃ શિરો ગ્રીષ્મો દક્ષિણઃ પક્ષો
વર્ષાઃ પુચ્છꣳશરદુત્તરઃ પક્ષો હેમન્તો મધ્યં
પૂર્વપક્ષાશ્ચિતયોઽપરપક્ષાઃ પુરીષમહોરાત્રાણીષ્ટકા એષ વા
અગ્નિરૃતુસ્થા ય એવં વેદર્તુરૃતુરસ્મૈ કલ્પમાન એતિ પ્રત્યેવ
તિષ્ઠતિ પ્રજાપતિર્વા એતં જ્યૈષ્ઠ્યકામો ન્યધત્ત તતો વૈ
સ જ્યૈષ્ઠ્યમગચ્છદ્ય એવં વિદ્વાનગ્નિં ચિનુતે જ્યૈષ્ઠ્યમેવ
ગચ્છતિ ॥ ૫। ૭। ૬॥ પૃથિવીં યચ્છ યથ્સ્વયમાતૃણ્ણા ઉપધાય
ઘેહ્યૃચાઽગ્નિશ્ચિનુતે ત્રીણિ ચ ॥ ૫। ૭। ૬॥
૩૦ યદાકૂતાથ્સમસુસ્રોદ્ધૃદો વા મનસો વા સંભૃતં ચક્ષુષો વા ।
તમનુ પ્રેહિ સુકૃતસ્ય લોકં યત્રર્ષયઃ પ્રથમજા યે પુરાણાઃ ॥ એતꣳ
સધસ્થ પરિ તે દદામિ યમાવહાચ્છેવધિં જાતવેદાઃ । અન્વાગન્તા
યજ્ઞપતિર્વો અત્ર તરꣳ સ્મ જાનીત પરમે વ્યોમન્ ॥ જાનીતાદેનં પરમે
વ્યોમન્દેવાઃ સધસ્થા વિદ રૂપમસ્ય । યદાગચ્છાત્
૩૧ પથિભિર્દેવયાનૈરિષ્ટાપૂર્તે કૃણુતાદાવિરસ્મૈ ॥ સં પ્ર
ચ્યવધ્વમનુ સં પ્ર યાતાગ્ને પથો દેવયાનાન્ કૃણુધ્વમ્ ।
અસ્મિન્થ્સધસ્થે અધ્યુત્તરસ્મિન્વિશ્વે દેવા યજમાનશ્ચ સીદત ॥
પ્રસ્તરેણ પરિધિના સ્રુચા વેદ્યા ચ બર્હિષા । ઋચેમં યજ્ઞં નો
વહ સુવર્દેવેષુ ગન્તવે ॥ યદિષ્ટં યત્પરાદાનં યદ્દત્તં યા ચ
દક્ષિણા । ત
૩૨ દગ્નિર્વૈશ્વકર્મણઃ સુવર્દેવેષુ નો દધત્ ॥ યેના સહસ્રં વહસિ
યેનાગ્ને સર્વવેદસમ્ । તેનેમં યજ્ઞં નો વહ સુવર્દેવેષુ ગન્તવે ॥
યેનાગ્ને દક્ષિણા યુક્તા યજ્ઞં વહન્ત્યૃત્વિજઃ । તેનેમં યજ્ઞં નો વહ
સુવર્દેવેષુ ગન્તવે ॥ યેનાગ્ને સુકૃતઃ પથા મધોર્ધારા વ્યાનશુઃ ।
તેનેમં યજ્ઞં નો વહ સુવર્દેવેષુ ગન્તવે ॥ યત્ર ધારા અનપેતા
મધોર્ઘૃતસ્ય ચ યાઃ । તદગ્નિર્વૈશ્વકર્મણઃ સુવર્દેવેષુ નો દધત્
॥ ૫। ૭। ૭॥ આગચ્છાત્તદ્વ્યાનશુસ્તેનેમં યજ્ઞં નો વહ સુવર્દેવેષુ

ગન્તવે ચતુર્દશ ચ ॥ ૫। ૭। ૭॥

૩૩ યાસ્તે અગ્ને સમિધો યાનિ ધામ યા જિહ્વા જાતવેદો યો અર્ચિઃ
। યે તે અગ્ને મેડયો ય ઇન્દવસ્તેભિરાત્માનં ચિનુહિ પ્રજાનન્ ॥
ઉત્સન્નયજ્ઞો વા એષ યદગ્નિઃ કિં વાહૈતસ્ય ક્રિયતે કિં વા ન યદ્વા
અધ્વર્યુરગ્નેશ્ચિન્વન્નન્તરેત્યાત્મનો વૈ તદન્તરેતિ યાસ્તે અગ્ને
સમિધો યાનિ

૩૪ ધામેત્યાહૈષા વા અગ્નેઃ સ્વયં ચિતિરગ્નિરેવ તદગ્નિં ચિનોતિ
નાધ્વર્યુરાત્મનોઽન્તરેતિ ચતસ્ર આશાઃ પ્ર ચરન્ત્વગ્નય ઇમં
નો યજ્ઞં નયતુ પ્રજાનન્ । ઘૃતં પિન્વન્નજર ँ સુવીરં
બ્રહ્મ સમિદ્ભવત્યાહુતીનામ્ ॥ સુવર્ગાય વા એષ લોકાયોપ ધીયતે
યત્કૂર્મશ્ચતસ્ર આશાઃ પ્ર ચરન્ત્વગ્નય ઇત્યાહ

૩૫ દિશ એવૈતેન પ્ર જાનાતીમં નો યજ્ઞં નયતુ પ્રજાનન્નિત્યાહ
સુવર્ગસ્ય લોકસ્યાભિનીત્યૈ બ્રહ્મ સમિદ્ભવત્યાહુતીનામિત્યાહ
બ્રહ્મણા વૈ દેવાઃ સુવર્ગં લોકમાયન્ યદ્બ્રહ્મણ્વત્યોપદધાતિ
બ્રહ્મણૈવ તદ્યજમાનઃ સુવર્ગં લોકમેતિ પ્રજાપતિર્વા એષ યદગ્નિસ્તસ્ય
પ્રજાઃ પશવશ્છન્દા ँસિ રૂપ ँ સર્વાન્ વર્ણાનિષ્ટકાનાં
કુર્યાદ્રૂપેણૈવ પ્રજાં પશૂઞ્છન્દાગ્ંસ્યવ રુંધેઽથો પ્રજાભ્ય
એવૈનં પશુભ્યશ્છન્દોભ્યોઽવરુદ્ધ્ય ચિનુતે ॥ ૫। ૭। ૮॥ યાન્યગ્નય
ઇત્યાહેષ્ટકાના ँ ષોડશ ચ ॥ ૫। ૭। ૮॥

૩૬ મયિ ગૃહ્ણામ્યગ્ને અગ્નિ ँ રાયસ્પોષાય સુપ્રજાસ્ત્વાય સુવીર્યાય
। મયિ પ્રજાં મયિ વર્ચો દધામ્યરિષ્ટાઃ સ્યામ તનુવા સુવીરાઃ ॥
યો નો અગ્નિઃ પિતરો હૃત્સ્વન્તરમર્ત્યો મર્ત્યા ँ આ વિવેશ ।
તમાત્મન્પરિ ગૃહ્ણીમહે વયં મા સો અસ્મા ँ અવહાય પરા ગાત્ ॥
યદધ્વર્યુરાત્મન્નગ્નિમગૃહીત્વાગ્નિં ચિનુયાદ્યોઽસ્ય સ્વોઽગ્નિસ્તમપિ

૩૭ યજમાનાય ચિનુયાદગ્નિં ખલુ વૈ પશવોઽનૂપ તિષ્ઠન્તેઽપક્રામુકા
અસ્માત્પશવઃ સ્યુર્મયિ ગૃહ્ણામ્યગ્ને અગ્નિમિત્યાહાત્મન્નેવ

સ્વમગ્નિં દાધાર  નાસ્માત્પશવોઽપ  ક્રામન્તિ બ્રહ્મવાદિનો  વદન્તિ
યન્મૃચ્ચાપશ્ચાગ્નેરનાદ્યમથ  કસ્માન્મૃદા ચાદ્ભિશ્ચાગ્નિશ્ચીયત
ઇતિ  યદદ્ભિઃ સંયૌ
૩૮ ત્યાપો  વૈ સર્વા  દેવતા  દેવતાભિરેવૈન ँ  સ ँ સૃજતિ  યન્મૃદા
ચિનોતીયં વા અગ્નિર્વૈશ્વાનરોઽગ્નિનૈવ તદગ્નિં ચિનોતિ બ્રહ્મવાદિનો
વદન્તિ  યન્મૃદા ચાદ્ભિશ્ચાગ્નિશ્ચીયતેથ  કસ્માદગ્નિરુચ્યત  ઇતિ
યચ્છન્દોભિશ્ચિનોત્યગ્નયો  વૈ છન્દા ँસિ  તસ્માદગ્નિરુચ્યતેઽથો
ઇયં વા અગ્નિર્વૈશ્વાનરો યન્
૩૯ મૃદા ચિનોતિ  તસ્માદગ્નિરુચ્યતે હિરણ્યેષ્ટકા ઉપ  દધાતિ  જ્યોતિર્વૈ
હિરણ્યં  જ્યોતિરેવાસ્મિન્દધાત્યથો  તેજો  વૈ હિરણ્યં  તેજ  એવાત્મન્ધત્તે
યો વા અગ્નિ ँ સર્વતોમુખં ચિનુતે સર્વા  સુ પ્રજાસ્વન્નમત્તિ  સર્વા
દિશોઽભિ જયતિ ગાયત્રીં પુરસ્તાદુપ  દધાતિ ત્રિષ્ટુભં  દક્ષિણતો
જગતીં પશ્ચાદનુષ્ટુભમુત્તરતઃ પઙ્ક્તિં મધ્ય  એષ વા અગ્નિઃ
સર્વતોમુખસ્તં ય એવં વિદ્વાગ્શ્ચિનુતે સર્વાસુ પ્રજાસ્વન્નમત્તિ  સર્વા
દિશોઽભિ જયત્યથો  દિશ્યેવ દિશં  પ્ર વયતિ  તસ્માદ્દિશિ દિક્પ્રોતા  ॥
૫। ૭। ૯॥ અપિ  સંયૌતિ  વૈશ્વાનરો યદ્દેષ વૈ પઞ્ચવિ ँ શતિશ્ચ ॥ ૫। ૭। ૯॥
૪૦ પ્રજાપતિરગ્નિમસૃજત  સોઽસ્માથ્સૃષ્ટઃ પ્રાઙ્પ્રાદ્રવત્તસ્મા
અશ્વં  પ્રત્યાસ્યથ્સ દક્ષિણાવર્તત  તસ્મૈ  વૃષ્ણિં પ્રત્યાસ્યથ્સ
પ્રત્યઙ્ઙાવર્તત  તસ્મા  ઋષભં પ્રત્યાસ્યથ્સ ઉદઙ્ઙાવર્તત
તસ્મૈ  બસ્તં પ્રત્યાસ્યથ્સ ઊર્ધ્વોઽદ્રવત્તસ્મૈ  પુરુષં
પ્રત્યાસ્યદ્યત્પશુશીર્ષાણ્યુપદધાતિ સર્વત  એવૈન
૪૧ મવરુધ્ય  ચિનુત એતા વૈ પ્રાણભૃતશ્ચક્ષુષ્મતીરિષ્ટકા
યત્પશુશીર્ષાણિ  યત્પશુશીર્ષાણ્યુપદધાતિ  તાભિરેવ
યજમાનોઽમુષ્મિઉ ँ લ્લોકે પ્રાણિત્યથો  તાભિરેવાસ્મા  ઇમે લોકાઃ પ્ર ભાન્તિ
મૃદાભિલિપ્યોપ  દધાતિ મેધ્યત્વાય  પશુર્વા એષ યદગ્નિરન્નં  પશવ
એષ ખલુ  વા અગ્નિર્યત્પશુશીર્ષાણિ  યં કામયેત  કનીયોઽસ્યાન્નગ્ગ્
૪૨ સ્યાદિતિ  સંતરાં તસ્ય  પશુશીર્ષાણ્યુપ  દધ્યાત્કનીય એવાસ્યાન્નં

ભવતિ યં કામયેત સમાવદસ્યાન્નગ્ં સ્યાદિતિ મધ્યતસ્તસ્યોપ
દધ્યાથ્સમાવદેવાસ્યાન્નં ભવતિ યં કામયેત ભૂયોઽસ્યાન્નગ્ં
સ્યાદિત્યન્તેષુ તસ્ય વ્યુદૂહ્યોપ દધ્યાદન્તત એવાસ્મા અન્નમવ રુંધે
ભૂયોઽસ્યાન્નં ભવતિ ॥ ૫। ૭। ૧૦॥ એવમસ્યાઽન્નં ભૂયોઽસ્યાઽન્નં ભવતિ ॥
૫। ૭। ૧૦॥

૪૩ સ્તેગાન્દꣳષ્ટ્રાભ્યાં મણ્ડૂકાઞ્જંભ્યેભિરાદકાં
ખાદેનોર્જꣳસꣳસૂદેનારણ્યં જાંબીલેન મૃદં બર્સ્વેભિઃ
શર્કરાભિરવકામવકાભિઃ શર્કરામુથ્સાદેન જિહ્વામવક્રન્દેન
તાલુꣳ સરસ્વતીં જિહ્વાગ્રેણ ॥ ૫। ૭। ૧૧॥ સ્તેગાન્દ્વાવિꣳશતિઃ ॥ ૫। ૭। ૧૧॥

૪૪ વાજꣳ હનૂભ્યામપ આસ્યેનાદિત્યાં
છ્મશ્રુભિરુપયામમધરેણોષ્ઠેન સદુત્તરેણાન્તરેણાનૂકાશં
પ્રકાશેન બાહ્યગ્ં સ્તનયિત્નું નિર્બાધેન સૂર્યાગ્ની ચક્ષુર્ભ્યાં વિદ્યુતૌ
કનીનકાભ્યામશનિં મસ્તિષ્કેણ બલં મજ્જભિઃ ॥ ૫। ૭। ૧૨॥ વાજં
પઞ્ચવિꣳશતિઃ ॥ ૫। ૭। ૧૨॥

૪૫ કૂર્માઞ્છફૈરચ્છલાભિઃ કપિઞ્જલાન્થ્સામ કુષ્ઠિકાભિર્જવં
જઙ્ઘાભિરગદં જાનુભ્યાં વીર્યં કુહાભ્યાં ભયં પ્રચાલાભ્યાં
ગુહોપપક્ષાભ્યામશ્વિનાવꣳસાભ્યામદિતિꣳ શીર્ષ્ણા નિરૃતિં
નિર્જાલ્મકેન શીર્ષ્ણા ॥ ૫। ૭। ૧૩॥ કૂર્માન્ત્રયોવિꣳશતિઃ ॥ ૫। ૭। ૧૩॥

૪૬ યોક્ત્રં ગૃધ્રાભિર્યુગમાનતેન ચિત્તં મન્યાભિઃ સંક્રોશાન્પ્રાણૈઃ
પ્રકાશેન ત્વચં પરાકાશેનાન્તરાં મશકાન્કેશૈરિન્દ્રગ્ં સ્વપસા
વહેન બૃહસ્પતિꣳશકુનિસાદેન રથમુષ્ણિહાભિઃ ॥ ૫। ૭। ૧૪॥
યોક્ત્રમેકવિꣳશતિઃ ॥ ૫। ૭। ૧૪॥

૪૭ મિત્રાવરુણૌ શ્રોણીભ્યામિન્દ્રાગ્ની શિખણ્ડાભ્યામિન્દ્રાબૃહસ્પતી
ઊરુભ્યામિન્દ્રાવિષ્ણૂ અષ્ઠીવદ્ભ્યાꣳસવિતારં પુચ્છેન
ગન્ધર્વાઞ્છેપેનાપ્સરસો મુષ્કાભ્યાં પવમાનં પાયુના પવિત્રં
પોત્રાભ્યામાક્રમણꣳ સ્થૂરાભ્યાં પ્રતિક્રમણં કુષ્ઠાભ્યામ્ ॥ ૫। ૭। ૧૫॥

૪૮ ઇન્દ્રસ્ય ક્રોડોઽદિત્યૈ પાજસ્યં દિશાં જત્રવો

જીમૂતાન્હૃદયૌપશાભ્યામન્તરિક્ષં પુરિતતા નભ ઉદર્યેણેન્દ્રાણીં

પ્લીહ્ના વલ્મીકાન્ક્લોમ્ના ગિરીન્પ્લાશિભિઃ સમુદ્રમુદરેણ વૈશ્વાનરં

ભસ્મના ॥ ૫। ૭। ૧૬॥ મિત્રાવરુણાવિંદ્રસ્ય દ્વાવિँશતિર્દ્વાવિँશતિઃ

॥ ૫। ૭। ૧૬॥

૪૯ પૂષ્ણો વનિષ્ઠુરન્ધાહેસ્સ્થૂરગુદા સર્પાન્ગુદાભિર્ ઋતૂન્

પૃષ્ટીભિર્દિવં પૃષ્ઠેન વસૂનાં પ્રથમા કીકસા રુદ્રાણાં

દ્વિતીયાદિત્યાનાં તૃતીયાંગિરસાં ચતુર્થી સાધ્યાનાં પઞ્ચમી વિશ્વેષાં

દેવાનાँ ષષ્ઠી ॥ ૫। ૭। ૧૭॥ પૂષ્ણશ્ચતુર્વિँશતિઃ ॥ ૫। ૭। ૧૭॥

૫૦ ઓજો ગ્રીવાભિર્નિરૃતિમસ્થભિરિન્દ્રગ્ગ્ સ્વપસા વહેન રુદ્રસ્ય

વિચલઃ સ્કન્ધોઽહોરાત્રયોર્દ્વિતીયોઽર્ધમાસાનાં તૃતીયો માસાં

ચતુર્થ ઋતૂનાં પઞ્ચમઃ સંવથ્સરસ્ય ષષ્ઠઃ ॥ ૫। ૭। ૧૮॥

ઓજોવિँશતિઃ ॥ ૫। ૭। ૧૮॥

૫૧ આનન્દં નન્દથુના કામં પ્રત્યાસાભ્યાં ભયँ શિતીમભ્યાં

પ્રશિષં પ્રશાસાભ્યાँ સૂર્યાચન્દ્રમસૌ વૃક્યાભ્યાગ્ શ્યામશબલૌ

મતસ્નાભ્યાં વ્યુષ્ટિँ રૂપેણ નિમ્રુક્તિમરૂપેણ ॥ ૫। ૭। ૧૯॥ આનન્દँ

ષોડશ ॥ ૫। ૭। ૧૯॥

૫૨ અહર્માँ સેન રાત્રિં પીવસાપો યૂષેણ ઘૃતँ રસેન

શ્યાં વસયા દૂષીકાભિર્હ્રાદુનિમશ્રુભિઃ પૃષ્વાં દિવँ રૂપેણ

નક્ષત્રાણિ પ્રતિરૂપેણ પૃથિવીં ચર્મણા છવીં છવ્યોપાકૃતાય

સ્વાહાલબ્ધાય સ્વાહા હુતાય સ્વાહા ॥ ૫। ૭। ૨૦॥ અહરષ્ટા વિँશતિઃ ॥

૫। ૭। ૨૦॥

૫૩ અગ્નેઃ પક્ષતિઃ સરસ્વત્યૈ નિપક્ષતિઃ સોમસ્ય તૃતીયાપાં

ચતુર્થ્યોષધીનાં પઞ્ચમી સંવથ્સરસ્ય ષષ્ઠી મરુતાँ સપ્તમી

બૃહસ્પતેરષ્ટમી મિત્રસ્ય નવમી વરુણસ્ય દશમીન્દ્રસ્યૈકાદશી

વિશ્વેષાં દેવાનાં દ્વાદશી દ્યાવાપૃથિવ્યોઃ પાર્શ્વં યમસ્ય પાટૂરઃ ॥

૫। ૭। ૨૧॥ અગ્નેરેકાન્ન ત્રિꣳશત્ ॥ ૫। ૭। ૨૧॥

૫૪ વાયોઃ પક્ષતિઃ સરસ્વતો નિપક્ષતિશ્ચન્દ્રમસસ્તૃતીયા
નક્ષત્રાણાં ચતુર્થી સવિતુઃ પઞ્ચમી રુદ્રસ્ય ષષ્ઠી સર્પાણાꣳ
સપ્તમ્યર્યમ્ણોઽષ્ટમી ત્વષ્ટુર્નવમી ધાતુર્દશમીન્દ્રાણ્યા
એકાદશ્યદિત્યૈ દ્વાદશી દ્યાવાપૃથિવ્યોઃ પાર્શ્વં યમ્યૈ પાટૂરઃ ॥ ૫। ૭। ૨૨॥ વાયોરષ્ટા વિꣳશતિઃ ॥ ૫। ૭।
૨૨ ॥

૫૫ પન્થામનૂવૃગ્ભ્યાꣳ સંતતિꣳ સ્નાવન્યાભ્યાꣳ શુકાન્પિત્તેન
હરિમાણં યક્ના હલીક્ષ્ણાન્પાપવાતેન કૂશ્માઙ્છકભિઃ શવર્તાનૂવધ્યેન
શુનો વિશસનેન સર્પાꣳલ્લોહિતગન્ધેન વયાꣳસિ પક્વગન્ધેન
પિપીલિકાઃ પ્રશાદેન ॥ ૫। ૭। ૨૩॥ પન્થાં દ્વાવિꣳશતિઃ ॥ ૫। ૭। ૨૩॥

૫૬ ક્રમૈરત્યક્રમીદ્વાજી વિશ્વૈર્દેવૈર્યજ્ઞિયૈઃ સંવિદાનઃ । સ નો
નય સુકૃતસ્ય લોકં તસ્ય તે વયꣳ સ્વધયા મદેમ ॥ ૫। ૭। ૨૪॥
ક્રમૈરષ્ટાદશ ॥ ૫। ૭। ૨૪॥

૫૭ દ્યૌસ્તે પૃષ્ઠં પૃથિવી સધસ્થમાત્માન્તરિક્ષꣳ સમુદ્રો યોનિઃ
સૂર્યસ્તે ચક્ષુર્વાતઃ પ્રાણશ્ચન્દ્રમાઃ શ્રોત્રં માસાશ્ચાર્ધમાસાશ્ચ
પર્વાણ્યૃતવોઽઙ્ગાનિ સંવત્સરો મહિમા ॥ ૫। ૭। ૨૫॥ દ્યૌઃ પઞ્ચ વિꣳશતિઃ
॥ ૫। ૭। ૨૫॥

૫૮ અગ્નિઃ પશુરાસીત્તેનાયજન્ત સ એતં લોકમજયદ્યસ્મિન્નગ્નિઃ
સ તે લોકસ્તં જેષ્યસ્યથાવ જિઘ્ર વાયુઃ પશુરાસીત્તેનાઽયજન્ત
સ એતં લોકમજયદ્યસ્મિન્વાયુઃ સ તે લોકસ્તસ્માત્ત્વાન્તરેષ્યામિ
યદિ નાવજિઘ્રસ્યાદિત્યઃ પશુરાસીત્તેનાયજન્ત સ એતં
લોકમજયદ્યસ્મિન્નાદિત્યઃ સ તે લોકસ્તં જેષ્યસિ યદ્યવજિઘ્રસિ ॥
૫। ૭। ૨૬॥ યસ્મિન્નષ્ટૌ ચ ॥ ૫। ૭। ૨૬॥

યો વા અયથા દેવતં ત્વામગ્ને ઇન્દ્રસ્ય ચિત્તિં યથા વૈ વયો વૈ
યદાકૂતાદ્યાસ્તે અગ્ને મયિ ગૃહ્ણામિ પ્રજાપતિઃ સોઽસ્માથ્ સ્તેગાન્, વાજં
કૂર્માન્, યોક્ત્રં મિત્રાવરુણાવિન્દ્રસ્ય પૂષ્ણ ઓજ આનન્દમહરગ્રેર્વાયોઃ
પન્થાં ક્રમૈર્દ્યૌસ્તેઽગ્નિઃ પશુરાસીથ્ષડ્વિꣳશતિઃ ॥

યો વા એવાહુતિમભવન્પથિભિરવરુદ્ધ્યાનન્દમષ્ટૌ પઞ્ચાશત્ ॥

યો વા અયથા દેવતં યદ્યેવ જિહ્વસિ ॥

ઇતિ પઞ્ચમં કાણ્ડં સંપૂર્ણમ્ ૫ ॥

॥ તૈત્તિરીય-સંહિતા ॥

# તૈત્તિરીય-સંહિતા

## ॥ ષષ્ઠં કાણ્ડમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

### ષષ્ઠકાણ્ડે પ્રથમઃ પ્રશ્નઃ ૧

૧ પ્રાચીનવꣳશં કરોતિ દેવમનુષ્યા દિશો વ્યભજન્ત પ્રાચીં દેવા
દક્ષિણા પિતરઃ પ્રતીચીં મનુષ્યા ઉદીચીꣳ રુદ્રા યત્પ્રાચીનવꣳ
શં કરોતિ દેવલોકમેવ તદ્યજમાન ઉપાવર્તતે પરિ શ્રયત્યન્તર્હિતો
હિ દેવલોકો મનુષ્યલોકાન્નાસ્માલ્લોકાથ્સ્વેતવ્યમિવેત્યાહુઃ કો હિ તદ્વેદ
યદ્યમુષ્મિꣳલ્લોકેઽસ્તિ વા ન વેતિ દિક્ષ્વતીકાશાન્કરો
૨ ત્યુભયોર્લોકયોરભિજિત્યૈ કેશશ્મશ્રુ વપતે નખાનિ નિ
કૃન્તતે મૃતા વા એષા ત્વગમેધ્યા યત્કેશશ્મશ્રુ મૃતામેવ
ત્વચમમેધ્યામપહત્ય યજ્ઞિયો ભૂત્વા મેધમુપૈત્યંગિરસઃ
સુવર્ગં લોકં યન્તોઽપ્સુ દીક્ષાતપસી પ્રાવેશયન્નપ્સુ સ્નાતિ સાક્ષાદેવ
દીક્ષાતપસી અવ રુંધે તીર્થે સ્નાતિ તીર્થે હિ તે તાં પ્રાવેશયન્તીર્થે
સ્નાતિ
૩ તીર્થમેવ સમાનાનાં ભવત્યપોઽશ્નાત્યન્તરત એવ મેધ્યો
ભવતિ વાસસા દીક્ષયતિ સૌમ્યં વૈ ક્ષૌમં દેવતયા સોમમેષ
દેવતામુપૈતિ યો દીક્ષતે સોમસ્ય તનૂરસિ તનુવં મે પાહીત્યાહ
સ્વામેવ દેવતામુપૈત્યથો આશિષમેવૈતામા શાસ્તેઽગ્નેસ્તૂષાધાનં
વાયોર્વાતપાનં પિતૃણાં નીવિરોષધીનાં પ્રઘાત
૪ આદિત્યાનાં પ્રાચીનતાનો વિશ્વેષાં દેવાનામોતુર્નક્ષત્રાણામતીકાશાસ્તદ્વા

એતથ્સર્વદેવત્યં યદ્વાસો યદ્વાસસા દીક્ષયતિ સર્વાભિરેવૈનં
દેવતાભિર્દીક્ષયતિ બહિઃપ્રાણો વૈ મનુષ્યસ્તસ્યાશનં પ્રાણોઽશ્નાતિ
સપ્રાણ એવ દીક્ષત આશિતો ભવતિ યાવાનેવાસ્ય પ્રાણસ્તેન સહ
મેધમુપૈતિ ઘૃતં દેવાનાં મસ્તુ પિતૃણાં નિષ્પક્વં મનુષ્યાણાં તદ્વા
૫ એતથ્સર્વદેવત્યં યન્નવનીતં યન્નવનીતેનાભ્યઙ્ક્તે સર્વા એવ
દેવતાઃ પ્રીણાતિ પ્રચ્યુતો વા એષોઽસ્માલ્લોકાદગતો દેવલોકં યો
દીક્ષિતોઽન્તરેવ નવનીતં તસ્માન્નવનીતેનાભ્યઙ્ક્તેઽનુલોમં
યજુષા વ્યાવૃત્ત્યા ઇન્દ્રો વૃત્રમહન્તસ્ય કનીનિકા
પરાઽપતત્તદાઞ્જનમભવદ્યદાઙ્ક્તે ચક્ષુરેવ ભ્રાતૃવ્યસ્ય વૃઙ્ક્તે
દક્ષિણં પૂર્વમાઽઙ્ક્તે
૬ સવ્યꣳ હિ પૂર્વં મનુષ્યા આઞ્જતે ન નિ ધાવતે નીવ હિ મનુષ્યા
ધાવન્તે પઞ્ચ કૃત્વ આઽઙ્ક્તે પઞ્ચાક્ષરા પઙ્ક્તિઃ પાઙ્ક્તો યજ્ઞો
યજ્ઞમેવાવ રુંધે પરિમિતમાઽઙ્ક્તેઽપરિમિતꣳ હિ મનુષ્યા
આઞ્જતે સતૂલયાઽઽઙ્ક્તેઽપતૂલયા હિ મનુષ્યા આઞ્જતે વ્યાવૃત્ત્યૈ
યદપતૂલયાંજીત વજ્ર ઇવ સ્યાથ્સતૂલયાઙ્ક્તે મિત્રત્વાયે
૭ ન્દ્રો વૃત્રમહન્થ્સોઽરપોઽરભ્યમ્રિયત તાસાં યન્મેધ્યં
યજ્ઞિયꣳ સદેવમાસીત્તદપોદક્રામત્તે દર્ભા અભવન્ યદ્દર્ભ
પુંજીલૈઃ પવયતિ યા એવ મેધ્યા યજ્ઞિયાઃ સદેવા આપસ્તાભિરેવૈનં
પવયતિ દ્વાભ્યાં પવયત્યહોરાત્રાભ્યામેવૈનં પવયતિ ત્રિભિઃ પવયતિ
ત્રય ઇમે લોકા એભિરેવૈનં લોકૈઃ પવયતિ પઞ્ચભિઃ
૮ પવયતિ પઞ્ચાક્ષરા પઙ્ક્તિઃ પાઙ્ક્તો યજ્ઞો યજ્ઞાયૈવૈનં પવયતિ
ષડ્ભિઃ પવયતિ ષડ્વા ઋતવ ઋતુભિરેવૈનં પવયતિ સપ્તભિઃ
પવયતિ સપ્ત છન્દાꣳસિ છન્દોભિરેવૈનં પવયતિ નવભિઃ પવયતિ
નવ વૈ પુરુષે પ્રાણાઃ સપ્રાણમેવૈનં પવયત્યેકવિꣳશત્યા પવયતિ
દશ હસ્ત્યા અઙ્ગુલયો દશ પદ્યા આત્મૈકવિꣳશો યાવાનેવ
પુરુષસ્તમપરિવર્ગં
૯ પવયતિ ચિત્પતિસ્ત્વા પુનાત્વિત્યાહ મનો વૈ ચિત્પતિર્મનસૈવૈનં

પવયતિ વાક્પતિસ્ત્વા પુનાત્વિત્યાહ વાચૈવૈનં પવયતિ દેવસ્ત્વા સવિતા
પુનાત્વિત્યાહ સવિતૃપ્રસૂત એવૈનં પવયતિ તસ્ય તે પવિત્રપતે
પવિત્રેણ યસ્મૈ કં પુને તચ્છકેયમિત્યાહાશિષમેવૈતામા શાસ્તે ॥
૬। ૧। ૧॥ અતીકાશાન્ કરોત્યવેશયન્તીર્થે સ્નાતિ પ્રઘાતો મનુષ્યાણાં
તદ્વા આઙ્ક્તે મિત્રત્વાય પંચભિરપરિવર્ગમષ્ટા ચત્વારિ૨ઁ શચ્ચ ॥
૬। ૧। ૧॥
૧૦ યાવન્તો વૈ દેવા યજ્ઞાયાપુનત ત એવાભવન્ ય એવં વિદ્વાન્,
યજ્ઞાય પુનીતે ભવત્યેવ બહિઃ પવયિત્વાન્તઃ પ્ર પાદયતિ મનુષ્યલોક
એવૈનં પવયિત્વા પૂતં દેવલોકં પ્રણયત્યદીક્ષિત એકયાહુત્યેત્યાહુઃ
સ્રુવેણ ચતસ્રો જુહોતિ દીક્ષિતત્વાય સ્રુચા પઞ્ચમીં પઞ્ચાક્ષરા
પઙ્ક્તિઃ પાઙ્ક્તો યજ્ઞો યજ્ઞમેવાવ રુંધ આકૂત્યૈ પ્રયુજેઽગ્નયે
૧૧ સ્વાહેત્યાહાકૂત્યા હિ પુરુષો યજ્ઞમભિ પ્રયુઙ્ક્તે યજેયેતિ
મેધાયૈ મનસેઽગ્નયે સ્વાહેત્યાહ મેધયા હિ મનસા પુરુષો
યજ્ઞમભિગચ્છતિ સરસ્વત્યૈ પૂષ્ણેઽગ્નયે સ્વાહેત્યાહ વાગ્વૈ
સરસ્વતી પૃથિવી પૂષા વાચૈવ પૃથિવ્યા યજ્ઞં પ્ર યુઙ્ક્ત આપો
દેવીર્બૃહતીર્વિશ્વશંભુવ ઇત્યાહ યા વૈ વર્ષ્યાસ્તા
૧૨ આપો દેવીર્બૃહતીર્વિશ્વશંભુવો યદેતદ્યજુર્ન બ્રૂયાદ્દિવ્યા
આપોઽશાન્તા ઇમં લોકમા ગચ્છેયુરાપો દેવીર્બૃહતીર્વિશ્વશંભુવ
ઇત્યાહાસ્મા એવૈના લોકાય શમયતિ તસ્માચ્છાન્તા ઇમં લોકમા
ગચ્છન્તિ દ્યાવાપૃથિવી ઇત્યાહ દ્યાવાપૃથિવ્યોર્હિ યજ્ઞ
ઉર્વન્તરિક્ષમિત્યાહાન્તરિક્ષે હિ યજ્ઞો બૃહસ્પતિર્નો હવિષા
વૃધા
૧૩ ત્વિત્યાહ બ્રહ્મ વૈ દેવાનાં બૃહસ્પતિર્બ્રહ્મણૈવાસ્મૈ યજ્ઞમવ
રુંધે યદ્બ્રૂયાદ્વિધેરિતિ યજ્ઞસ્થાણુમૃચ્છેદ્વૃધાત્વિત્યાહ
યજ્ઞસ્થાણુમેવ પરિ વૃણક્તિ પ્રજાપતિર્યજ્ઞમસૃજત સોઽસ્માત્સૃષ્ટઃ
પરાઙૈત્સ પ્ર યજુરવ્લીનાત્પ્ર સામ તમૃગુદયચ્છદ્યદૃગુદયચ્છત્
તદૌદ્ ગ્રહણસ્યૌદ્ ગ્રહણત્વમૃચા

૧૪ જુહોતિ યજ્ઞસ્યોધૃત્યા
અનુષ્ટુપ્છંદસામુદયચ્છદિત્યાહુસ્તસ્માદનુષ્ટુભા
જુહોતિ યજ્ઞસ્યોધૃત્યૈ દ્વાદશ
વાત્સબન્ધાન્યુદયચ્છન્નિત્યાહુસ્તસ્માદ્વાદશભિર્વાત્સબન્ધવિદો
દીક્ષયન્તિ સા વા એષર્ગનુષ્ટુગ્વાગનુષ્ટુગ્યદેતયર્ચા દીક્ષયતિ
વાચૈવૈન ꣳ સર્વયા દીક્ષયતિ વિશ્વે દેવસ્ય નેતુરિત્યાહ
સાવિત્ર્યેતેન મર્તો વૃણીત સખ્ય
૧૫ મિત્યાહ પિતૃદેવત્યૈતેન વિશ્વે રાય ઇષુધ્યસીત્યાહ વૈશ્વદેવ્યેતેન
દ્યુમ્નં વૃણીત પુષ્યસ ઇત્યાહ પૌષ્ણ્યેતેન સા વા એષર્ક્સર્વદેવત્યા
યદેતયર્ચા દીક્ષયતિ સર્વાભિરેવૈનં દેવતાભિર્દીક્ષયતિ સપ્તાક્ષરં
પ્રથમં પદમષ્ટાક્ષરાણિ ત્રીણિ યાનિ ત્રીણિ તાન્યષ્ટાવુપયન્તિ યાનિ
ચત્વારિ તાન્યષ્ટૌ યદષ્ટાક્ષરા તેન
૧૬ ગાયત્રી યદેકાદશાક્ષરા તેન ત્રિષ્ટુગ્યદ્દ્વાદશાક્ષરા તેન જગતી સા વા
એષર્ક્સર્વાણિ છન્દા ꣳ સિ યદેતયર્ચા દીક્ષયતિ સર્વેભિરેવૈનં
છન્દોભિર્દીક્ષયતિ સપ્તાક્ષરં પ્રથમં પદ ꣳ સપ્તપદા શક્વરી
પશવઃ શક્વરી પશૂનેવાવ રુંધ એકસ્માદક્ષરાદનાપ્તં પ્રથમં
પદં તસ્માદ્યદ્વાચોઽનાપ્તં તન્મનુષ્યા ઉપ જીવન્તિ પૂર્ણયા જુહોતિ
પૂર્ણ ઇવ હિ પ્રજાપતિઃ પ્રજાપતેરાપ્ત્યૈ ન્યૂનયા જુહોતિ ન્યૂનાદ્ધિ
પ્રજાપતિઃ પ્રજા અસૃજત પ્રજાના ꣳ સૃષ્ટ્યૈ ॥ ૬। ૧। ૨॥ અગ્ગ્નયે
તા વૃધાત્વૃચા સખ્યન્તેન જુહોતિ પઞ્ચદશ ચ ॥ ૬। ૧। ૨॥
૧૭ ઋક્સામે વૈ દેવેભ્યો યજ્ઞાયાતિષ્ઠમાને કૃષ્ણો રૂપં
કૃત્વાપક્રમ્યાતિષ્ઠતાં તેઽમન્યન્ત યં વા ઇમે ઉપાવર્ત્સ્યતઃ સ ઇદં
ભવિષ્યતીતિ તે ઉપામન્ત્રયન્ત તે અહોરાત્રયોર્મહિમાનમપનિધાય
દેવાનુપાવર્તેતામેષ વા ઋચો વર્ણો યચ્છુક્લં કૃષ્ણાજિનસ્યૈષ સામ્નો
યત્કૃષ્ણમૃક્સામયોઃ શિલ્પે સ્થ ઇત્યાહર્ક્સામે એવાવ રુંધ એષ
૧૮ વા અહ્નો વર્ણો યચ્છુક્લં કૃષ્ણાજિનસ્યૈષ રાત્રિયા યત્કૃષ્ણં

યદેવૈનયોસ્તત્ર ન્યક્તં તદેવાવ રુંધે કૃષ્ણાજિનેન દીક્ષયતિ
બ્રહ્મણો વા એતદ્રૂપં યત્કૃષ્ણાજિનં બ્રહ્મણૈવૈનં દીક્ષયતીમાં
ધિય ઁ શિક્ષમાણસ્ય દેવેત્યાહ યથાયજુરેવૈતદ્ગર્ભો વા એષ
યદ્દીક્ષિત ઉલ્બં વાસઃ પ્રોર્ણુતે તસ્માદ્
૧૯ ગર્ભાઃ પ્રાવૃતા જાયન્તે ન પુરા સોમસ્ય ક્રયાદપોર્ણ્વીત યત્પુરા સોમસ્ય
ક્રયાદપોર્ણ્વીત ગર્ભાઃ પ્રજાનાં પરાપાતુકાઃ સ્યુઃ ક્રીતે સોમેઽપોર્ણુતે
જાયત એવ તદથો યથા વસીયા ઁ સં પ્રત્યપોર્ણુતે તાદૃગેવ તદંગિરસઃ
સુવર્ગં લોકં યન્ત ઊર્જં વ્યભજન્ત તતો યદત્યશિષ્યત તે શરા
અભવન્નૂર્ગ્વૈ શરા યચ્છરમયી
૨૦ મેખલા ભવત્યૂર્જમેવાવ રુંધે મધ્યતઃ સં નહ્યતિ મધ્યત એવાસ્મા
ઊર્જં દધાતિ તસ્માન્મધ્યત ઊર્જા ભુઞ્જત ઊર્ધ્વં વૈ પુરુષસ્ય
નાભ્યૈ મેધ્યમવાચીનમમેધ્યં યન્મધ્યતઃ સંનહ્યતિ મેધ્યં
ચૈવાસ્યામેધ્યં ચ વ્યાવર્તયતીન્દ્રો વૃત્રાય વજ્રં પ્રાહરથ્સ
ત્રેધા વ્યભવથ્સ્ફ્યસ્તૃતીય ઁ રથસ્તૃતીયં યૂપસ્તૃતીયં
૨૧ યેઽન્તઃશરા અશીર્યન્ત તે શરા અભવન્તચ્છરાણા ઁ શરત્વં
વજ્રો વૈ શરાઃ, ક્ષુત્ખલુ વૈ મનુષ્યસ્ય ભ્રાતૃવ્યો યચ્છરમયી
મેખલા ભવતિ વજ્રેણૈવ સાક્ષાત્ક્ષુધં ભ્રાતૃવ્યં મધ્યતોઽપ
હતે ત્રિવૃદ્ભવતિ ત્રિવૃદ્વૈ પ્રાણસ્ત્રિવૃતમેવ પ્રાણં મધ્યતો
યજમાને દધાતિ પૃથ્વી ભવતિ રજ્જૂનાં વ્યાવૃત્ત્યૈ મેખલયા યજમાનં
દીક્ષયતિ યોક્ત્રેણ પત્નીં મિથુનત્વાય
૨૨ યજ્ઞો દક્ષિણામભ્યધ્યાયત્તા ઁ
સમભવત્તદિન્દ્રોઽચાયથ્સોઽમન્યત યો વા ઇતો જનિષ્યતે સ ઇદં
ભવિષ્યતીતિ તાં પ્રાવિશત્તસ્યા ઇન્દ્ર એવાજાયત સોઽમન્યત યો
વૈ મદિતોઽપરો જનિષ્યતે સ ઇદં ભવિષ્યતીતિ તસ્યા અનુમૃશ્ય
યોનિમાચ્છિનથ્સા સૂતવશાભવત્તથ્સૂતવશાયૈ જન્મ
૨૩ તા ઁ હસ્તે ન્યવેષ્ટયત તાં મૃગેષુ ન્યદધાથ્સા
કૃષ્ણવિષાણાભવદિન્દ્રસ્ય યોનિરસિ મા મા હિ ઁ સીરિતિ

કૃષ્ણવિષાણાં પ્ર યચ્છતિ સયોનિમેવ યજ્ઞં કરોતિ સયોનિં
દક્ષિણાꣳ સયોનિમિન્દ્રꣳસયોનિત્વાય કૃષ્યૈ ત્વા સુસસ્યાયા
ઇત્યાહ તસ્માદકૃષ્ટપચ્યા ઓષધયઃ પચ્યન્તે સુપિપ્પલાભ્યસ્ત્વૌષધીભ્ય
ઇત્યાહ તસ્માદોષધયઃ ફલં ગૃહ્ણન્તિ યદ્ધસ્તેન

૨૪ કણ્ડૂયેત પામનં ભાવુકાઃ પ્રજાઃ સ્યુર્યથ્સ્મયેત નગ્નં ભાવુકાઃ
કૃષ્ણવિષાણયા કણ્ડૂયતેઽપિગૃહ્ય સ્મયતે પ્રજાનાં ગોપીથાય ન પુરા
દક્ષિણાભ્યો નેતોઃ કૃષ્ણવિષાણામવ ચૃતેદ્યત્પુરા દક્ષિણાભ્યો
નેતોઃ કૃષ્ણવિષાણામવચૃતેદ્યોનિઃ પ્રજાનાં પરાપાતુકા સ્યાન્નીતાસુ
દક્ષિણાસુ ચાત્વાલે કૃષ્ણવિષાણાં પ્રાસ્યતિ યોનિર્વૈ યજ્ઞસ્ય ચાત્વાલં
યોનિઃ કૃષ્ણવિષાણા યોનાવેવ યોનિં દધાતિ યજ્ઞસ્ય સયોનિત્વાય ॥ ૬। ૧। ૩॥ રુન્ધ એષ તસ્માચ્છરમયી
યૂપસ્તૃતીયં મિથુનત્વાય જન્મ
હસ્તેનાઽષ્ટા ચત્વારિꣳ શચ્ચ ॥ ૬। ૧। ૩॥

૨૫ વાગ્વૈ દેવેભ્યોઽપાક્રામદ્યજ્ઞાયાતિષ્ઠમાના સા વનસ્પતીન્પ્રાવિશથ્સૈષા
વાગ્વનસ્પતિષુ વદતિ યા દુન્દુભૌ યા તૂણવે યા વીણાયાં યદ્દીક્ષિતદણ્ડં
પ્રયચ્છતિ વાચમેવાવ રુંધ ઔદુંબરો ભવત્યૂર્ગ્વા ઉદુંબર
ઊર્જમેવાવ રુંધે મુખેન સં મિતો ભવતિ મુખત એવાસ્મા ઊર્જં દધાતિ
તસ્માન્મુખત ઊર્જા ભુઞ્જતે

૨૬ ક્રીતે સોમે મૈત્રાવરુણાય દણ્ડં પ્ર યચ્છતિ મૈત્રાવરુણો હિ
પુરસ્તાદૃત્વિગ્ભ્યો વાચં વિભજતિ તામૃત્વિજો યજમાને
પ્રતિ ષ્ઠાપયન્તિ સ્વાહા યજ્ઞં મનસેત્યાહ મનસા હિ પુરુષો
યજ્ઞમભિગચ્છતિ સ્વાહા દ્યાવાપૃથિવીભ્યામિત્યાહ દ્યાવાપૃથિવ્યોર્હિ
યજ્ઞઃ સ્વાહોરોરન્તરિક્ષાદિત્યાહાન્તરિક્ષે હિ યજ્ઞઃ સ્વાહા યજ્ઞં
વાતાદારભ ઇત્યાહાયં

૨૭ વાવ યઃ પવતે સ યજ્ઞસ્તમેવ સાક્ષાદા રભતે મુષ્ટી કરોતિ વાચં
યચ્છતિ યજ્ઞસ્ય ધૃત્યા અદીક્ષિષ્ટાયં બ્રાહ્મણ ઇતિ ત્રિરુપાગ્શ્વાહ
દેવેભ્ય એવૈનં પ્રાહ ત્રિરુચ્ચૈરુભયેભ્ય એવૈનં દેવમનુષ્યેભ્યઃ
પ્રાહ ન પુરા નક્ષત્રેભ્યો વાચં વિ સૃજેદ્યત્પુરા નક્ષત્રેભ્યો વાચં

વિસૃજેદ્યજ્ઞં વિચ્છિન્દ્યા

૨૮ દુદિતેષુ નક્ષત્રેષુ વ્રતં કૃણુતેતિ વાચં વિ સૃજતિ

યજ્ઞવ્રતો વૈ દીક્ષિતો યજ્ઞમેવાભિ વાચં વિ સૃજતિ યદિ

વિસૃજેદ્વૈષ્ણવીમૃચમનુ બ્રૂયાદ્યજ્ઞો વૈ વિષ્ણુર્યજ્ઞેનૈવ યજ્ઞꣳ

સં તનોતિ દૈવીં ધિયં મનામહ ઇત્યાહ યજ્ઞમેવ તન્મ્રદયતિ સુપારા નો

અસદ્વશ ઇત્યાહ વ્યુષ્ટિમેવાવ રુંધે

૨૯ બ્રહ્મવાદિનો વદન્તિ હોતવ્યં દીક્ષિતસ્ય ગૃહા૩ ઇન હોતવ્યા૩મિતિ

હવિર્વૈ દીક્ષિતો યજ્જુહુયાદ્યજમાનસ્યાવદાય જુહુયાદ્યન્ન

જુહુયાદ્યજ્ઞપરુરન્તરિયાદ્યે દેવા મનોજાતા મનોયુજ ઇત્યાહ પ્રાણા

વૈ દેવા મનોજાતા મનોયુજસ્તેષ્વેવ પરોઽક્ષં જુહોતિ તન્નેવ હુતં

નેવાહુતગ્ગ્ સ્વપન્તં વૈ દીક્ષિતꣳ રક્ષાꣳસિ જિઘાꣳસન્ત્યગ્નિઃ

૩૦ ખલુ વૈ રક્ષોહાગ્ને ત્વꣳ સુ જાગૃહિ વયꣳ સુ

મન્દિષીમહીત્યાહાગ્નિમેવાધિપાં કૃત્વા સ્વપિતિ રક્ષસામપહત્યા

અવ્રત્યમિવ વા એષ કરોતિ યો દીક્ષિતઃ સ્વપિતિ ત્વમગ્ને વ્રતપા

અસીત્યાહાગ્નિર્વૈ દેવાનાં વ્રતપતિઃ સ એવૈનં વ્રતમા લંભયતિ દેવ

આ મર્ત્યેષ્વેત્યાહ દેવો

૩૧ હ્યેષ સન્મર્ત્યેષુ ત્વં યજ્ઞેષ્વીડ્ય ઇત્યાહૈતꣳ હિ યજ્ઞેષ્વીડતેઽપ

વૈ દીક્ષિતાથ્સુષુપુષ ઇંદ્રિયં દેવતાઃ ક્રામન્તિ વિશ્વે દેવા

અભિ મામાઽવવૃત્રન્નિત્યાહેન્દ્રિયેણૈવૈનં દેવતાભિઃ સં નયતિ

યદેતદ્યજુર્ન બ્રૂયાદ્યાવત એવ પશૂનભિ દીક્ષેત તાવન્તોઽસ્ય પશવઃ

સ્યૂ રાસ્વેયથ્

૩૨ સોમા ભૂયો ભરેત્યાહાપરિમિતાનેવ પશૂનવ રુંધે ચન્દ્રમસિ

મમ ભોગાય ભવેત્યાહ યથાદેવતમેવૈનાઃ પ્રતિ ગૃહ્ણાતિ વાયવે ત્વા

વરુણાય ત્વેતિ યદેવમેતા નાનુદિશેદયથાદેવતં દક્ષિણા ગમયેદા

દેવતાભ્યો વૃશ્ચેત યદેવમેતા અનુદિશતિ યથાદેવતમેવ દક્ષિણા

ગમયતિ ન દેવતાભ્ય આ

૩૩ વૃશ્ચતે દેવીરાપો અપાં નપાદિત્યાહ યદ્વો મેધ્યં યજ્ઞિયꣳ

સદેવં તદ્વો માવ ક્રમિષમિતિ વાવૈતદાહાચ્છિન્નં તન્તું પૃથિવ્યા
અનુ ગેષમિત્યાહ સેતુમેવ કૃત્વાત્યેતિ ॥ ૬। ૧। ૪॥ ભુઞ્જતેઽયં
છિન્ધાદ્રુંધેઽગ્નિરાહ દેવ ઇયદ્દેવતાભ્ય આ ત્રયસ્ત્રિꣳશચ્ચ ॥ ૬। ૧। ૪॥
૩૪ દેવા વૈ દેવયજનમધ્યવસાય દિશો ન
પ્રાજાનન્તેઽન્યોઽન્યમુપાધાવન્ત્વયા પ્ર જાનામ ત્વયેતિ તેઽદિત્યાꣳ
સમધ્રિયન્ત ત્વયા પ્ર જાનામેતિ સાઽબ્રવીદ્વરં વૃણૈ મત્પ્રાયણા એવ
વો યજ્ઞા મદુદયના અસન્નિતિ તસ્માદાદિત્યઃ પ્રાયણીયો યજ્ઞાનામાદિત્ય
ઉદયનીયઃ પઞ્ચ દેવતા યજતિ પઞ્ચ દિશો દિશાં પ્રજ્ઞાત્યા
૩૫ અથો પઞ્ચાક્ષરા પઙ્ક્તિઃ પાઙ્ક્તો યજ્ઞો યજ્ઞમેવાવ રુંધે
પથ્યાગ્ સ્વસ્તિમયજન્પ્રાચીમેવ તયા દિશં પ્રાજાનન્નગ્નિના દક્ષિણા
સોમેન પ્રતીચીꣳસવિત્રોદીચીમદિત્યોર્ધ્વાં પથ્યાગ્ સ્વસ્તિં યજતિ
પ્રાચીમેવ તયા દિશં પ્રજાનાતિ પથ્યાગ્ સ્વસ્તિમિષ્ટ્વાગ્નીષોમૌ યજતિ
ચક્ષુષી વા એતે યજ્ઞસ્ય યદગ્નીષોમૌ તાભ્યામેવાનુ પશ્ય
૩૬ ત્યગ્નીષોમાવિષ્ટ્વા સવિતારં યજતિ સવિતૃપ્રસૂત એવાનુ પશ્યતિ
સવિતારમિષ્ટ્વાદિતિં યજતીયં વા અદિતિરસ્યામેવ પ્રતિષ્ઠાયાનુ
પશ્યત્યદિતિમિષ્ટ્વા મારુતીમૃચમન્વાહ મરુતો વૈ દેવાનાં
વિશો દેવવિશં ખલુ વૈ કલ્પમાનં મનુષ્યવિશમનુ કલ્પતે
યન્મારુતીમૃચમન્વાહ વિશાં ક્લૃપ્ત્યૈ બ્રહ્મવાદિનો વદન્તિ
પ્રયાજવદનનૂયાજં પ્રાયણીયં કાર્યમનૂયાજવ
૩૭ દપ્રયાજમુદયનીયમિતીમે વૈ પ્રયાજા અમી અનૂયાજાઃ સૈવ સા
યજ્ઞસ્ય સન્તતિસ્તત્તથા ન કાર્યમાત્મા વૈ પ્રયાજાઃ પ્રજાનૂયાજા
યત્પ્રયાજાનન્તરિયાદાત્માનમન્તરિયાદ્યદનૂયાજાનન્તરિયાત્પ્રજામન્તરિયાદ્યતઃ
ખલુ વૈ યજ્ઞસ્ય વિતતસ્ય ન ક્રિયતે તદનુ યજ્ઞઃ પરા ભવતિ
યજ્ઞં પરાભવન્તં યજમાનોઽનુ
૩૮ પરા ભવતિ પ્રયાજવદેવાનૂયાજવત્પ્રાયણીયં કાર્યં
પ્રયાજવદનૂયાજવદુદયનીયં નાત્માનમન્તરેતિ ન પ્રજાં ન યજ્ઞઃ
પરાભવતિ ન યજમાનઃ પ્રાયણીયસ્ય નિષ્કાસ ઉદયનીયમભિ

નિર્વપતિ સૈવ સા યજ્ઞસ્ય સન્તતિર્યાઃ પ્રાયણીયસ્ય યાજ્યા યત્તા
ઉદયનીયસ્ય યાજ્યાઃ કુર્યાત્પરાઙ્મું લોકમા રોહેત્પ્રમાયુકઃ સ્યાદ્યાઃ
પ્રાયણીયસ્ય પુરોઽનુવાક્યાસ્તા ઉદયનીયસ્ય યાજ્યાઃ કરોત્યસ્મિન્નેવ
લોકે પ્રતિ તિષ્ઠતિ ॥ ૬। ૧। ૫॥ પ્રજ્ઞાત્યૈ પશ્યત્યનૂયાજવદ્યજમાનોઽનુ
પુરોનુવાક્યાસ્તા અષ્ટૌ ચ ॥ ૬। ૧। ૫॥

૩૯ કદ્રૂશ્ચ વૈ સુપર્ણી ચાત્મરૂપયોરસ્પર્ધેતાꣳ સા કદ્રૂઃ
સુપર્ણીમજયથ્સાબ્રવીત્તૃતીયસ્યામિતો દિવિ સોમસ્તમાહર
તેનાત્માનં નિષ્ક્રીણીષ્વેતીયં વૈ કદ્રૂરસૌ સુપર્ણી છન્દાꣳસિ
સૌપર્ણેયાઃ સાબ્રવીદસ્મૈ વૈ પિતરૌ પુત્રાન્બિભૃતસ્તૃતીયસ્યામિતો
દિવિ સોમસ્તમાહર તેનાત્માનં નિષ્ક્રીણીષ્વે

૪૦ તિ મા કદ્રૂરવોચદિતિ જગત્યુદપતચ્ચતુર્દશાક્ષરા સતી સાપ્રાપ્ય
ન્યવર્તત તસ્યૈ દ્વે અક્ષરે અમીયેતાꣳ સા પશુભિશ્ચ દીક્ષયા
ચાગચ્છત્તસ્માજ્જગતી છંદસાં પશવ્યતમા તસ્માત્પશુમન્તં
દીક્ષોપ નમતિ ત્રિષ્ટુગુદપતત્ત્રયોદશાક્ષરા સતી સાપ્રાપ્ય ન્યવર્તત
તસ્યૈ દ્વે અક્ષરે અમીયેતાꣳ સા દક્ષિણાભિશ્ચ

૪૧ તપસા ચાગચ્છત્તસ્માત્ત્રિષ્ટુભો લોકે માધ્યન્દિને
સવને દક્ષિણા નીયન્ત એતત્ખલુ વાવ તપ ઇત્યાહુર્યઃ સ્વં દદાતીતિ
ગાયત્ર્યુદપતચ્ચતુરક્ષરા સત્યજયા જ્યોતિષા તમસ્યા અજાભ્યરુંધ
તદજાયા અજત્વꣳ સા સોમં ચાહરચ્ચત્વારિ ચાક્ષરાણિ સાષ્ટાક્ષરા
સમપદ્યત બ્રહ્મવાદિનો વદન્તિ

૪૨ કસ્માથ્સત્યાદ્ગાયત્રી કનિષ્ઠા છંદસાꣳ સતી
યજ્ઞમુખં પરીયાયેતિ યદેવાદઃ સોમમાહરત્તસ્માદ્યજ્ઞમુખં
પર્યૈત્તસ્માત્તેજસ્વિનીતમા પદ્ભ્યાં દ્વે સવને સમગૃહ્ણાન્મુખેનૈકં
યન્મુખેન સમગૃહ્ણાત્તદધયત્તસ્માદ્ દ્વે સવને શુક્રવતી
પ્રાતઃસવનં ચ માધ્યન્દિનં ચ તસ્માત્તૃતીયસવન ઋજીષમભિ
ષુણ્વન્તિ ધીતમિવ હિ મન્યન્ત

૪૩ આશિરમવ નયતિ સશુક્રત્વાયાથો સં ભરત્યેવૈનત્તꣳ

સોમમાહ્રિયમાણં ગન્ધર્વો વિશ્વાવસુઃ પર્યમુષ્ણાથ્સ તિસ્રો રાત્રીઃ
પરિમુષિતોઽવસત્તસ્માત્તિસ્રો રાત્રીઃ ક્રીતઃ સોમો વસતિ તે દેવા
અબ્રુવન્સ્ત્રીકામા વૈ ગન્ધર્વાઃ સ્ત્રિયા નિષ્ક્રીણામેતિ તે વાચગ્ગ્
સ્ત્રિયમેકહાયનીં કૃત્વા તયા નિરક્રીણન્થ્સા રોહિદ્રૂપં કૃત્વા
ગન્ધર્વેભ્યો

૪૪ ઽપક્રમ્યાતિષ્ઠત્તદ્રોહિતો જન્મ તે દેવા અબ્રુવન્નપ
યુષ્મદક્રમીન્નાસ્માનુપાવર્તતે વિ હ્વયામહા ઇતિ બ્રહ્મ ગન્ધર્વા
અવદન્નગાયન્દેવાઃ સા દેવાન્ગાયત ઉપાવર્તત તસ્માદ્ગાયન્તગ્ગ્ સ્ત્રિયઃ
કામયન્તે કામુકા એનગ્ગ્ સ્ત્રિયો ભવન્તિ ય એવં વેદાથો ય એવં વિદ્વાનપિ
જન્યેષુ ભવતિ તેભ્ય એવ દદત્યુત યદ્બહુતયા

૪૫ ભવન્ત્યેકહાયન્યા ક્રીણાતિ વાચૈવૈનઁ સર્વયા ક્રીણાતિ
તસ્માદેકહાયના મનુષ્યા વાચં વદન્ત્યકૂટયા ઽકર્ણ્યા ઽકાણયા
ઽશ્લોણયા ઽસપ્તશફયા ક્રીણાતિ સર્વયૈવૈનં ક્રીણાતિ યચ્છ્વેતયા
ક્રીણીયાદ્દુશ્ચર્મા યજમાનઃ સ્યાદ્યત્કૃષ્ણયાનુસ્તરણી સ્યાત્પ્રમાયુકો
યજમાનઃ સ્યાદ્યદ્દ્વિરૂપયા વાર્ત્રઘ્ની સ્યાથ્સ વાન્યં જિનીયાત્તં વાન્યો
જિનીયાદરુણયા પિઙ્ગાક્ષ્યા ક્રીણાત્યેતદ્વૈ સોમસ્ય રૂપગ્ગ્ સ્વયૈવૈનં
દેવતયા ક્રીણાતિ ॥ ૬। ૧। ૬॥ નિષ્ક્રીણીષ્વ દક્ષિણાભિશ્ચ વદન્તિ મન્યન્તે
ગન્ધર્વેભ્યો બહુતયાઃ પિંગાક્ષ્યા દશ ચ ॥ ૬। ૧। ૬॥

૪૬ તદ્ધિરણ્યમભવત્તસ્માદદ્ભ્યો હિરણ્યં પુનન્તિ બ્રહ્મવાદિનો વદન્તિ
કસ્માથ્સત્યાદનસ્થિકેન પ્રજાઃ પ્રવીયન્તેઽસ્થન્વતીર્જાયન્ત ઇતિ
યદ્ધિરણ્યં ઘૃતેઽવધાય જુહોતિ તસ્માદનસ્થિકેન પ્રજાઃ પ્ર
વીયન્તેઽસ્થન્વતીર્જાયન્ત એતદ્વા અગ્નેઃ પ્રિયં ધામ યદ્ઘૃતં તેજો
હિરણ્યમિયં તે શુક્ર તનૂરિદં વર્ચ ઇત્યાહ સતેજસમેવૈનઁ
સતનું

૪૭ કરોત્યથો સં ભરત્યેવૈનં યદબદ્ધમવદધ્યાદ્ગર્ભાઃ પ્રજાનાં
પરાપાતુકાઃ સ્યુર્બદ્ધમવ દધાતિ ગર્ભાણાં ધૃત્યૈ નિષ્ટર્ક્યં બધ્નાતિ
પ્રજાનાં પ્રજનનાય વાગ્વા એષા યથ્સોમક્રયણી જૂરસીત્યાહ યદ્ધિ

મનસા જવતે તદ્વાચા વદતિ ધૃતા મનસેત્યાહ મનસા હિ વાગ્ધૃતા
જુષ્ટા વિષ્ણવ ઇત્યાહ
૪૮ યજ્ઞો વૈ વિષ્ણુર્યજ્ઞાયૈવૈનાં જુષ્ટાં કરોતિ તસ્યાસ્તે સત્યસવસઃ
પ્રસવ ઇત્યાહ સવિતૃપ્રસૂતામેવ વાચમવ રુંધે કાણ્ડેકાણ્ડે વૈ
ક્રિયમાણે યજ્ઞꣳ રક્ષાꣳસિ જિઘાꣳસન્ત્યેષ ખલુ વા અરક્ષોહતઃ
પન્થા યોઽગ્નેશ્ચ સૂર્યસ્ય ચ સૂર્યસ્ય ચક્ષુરારુહમગ્નેરક્ષ્ણઃ
કનીનિકામિત્યાહ ય એવારક્ષોહતઃ પન્થાસ્તꣳ સમારોહતિ
૪૯ વાગ્વા એષા યથ્સોમક્રયણી ચિદસિ મનાસીત્યાહ
શાસ્ત્યેવૈનામેતત્તસ્માચ્છિષ્ટાઃ પ્રજા જાયન્તે ચિદસીત્યાહ યદ્ધિ
મનસા ચેતયતે તદ્વાચા વદતિ મનાસીત્યાહ યદ્ધિ મનસાભિગચ્છતિ
તત્કરોતિ ધીરસીત્યાહ યદ્ધિ મનસા ધ્યાયતિ તદ્વાચા
૫૦ વદતિ દક્ષિણાસીત્યાહ દક્ષિણા હ્યેષા યજ્ઞિયાસીત્યાહ
યજ્ઞિયામેવૈનાં કરોતિ ક્ષત્રિયાસીત્યાહ ક્ષત્રિયા હ્યેષા
ઽદિતિરસ્યુભયતઃ શીર્ષ્ણીત્યાહ યદેવાદિત્યઃ પ્રાયણીયો
યજ્ઞાનામાદિત્ય ઉદયનીયસ્તસ્માદેવમાહ યદબદ્ધા સ્યાદયતા
સ્યાદ્યત્પદિબદ્ધાનુસ્તરણી સ્યાત્પ્રમાયુકો યજમાનઃ સ્યાદ્
૫૧ યત્કર્ણગૃહીતા વાર્ત્રઘ્ની સ્યાથ્સ વાન્યં જિનીયાત્તં વાન્યો
જિનીયાન્મિત્રસ્ત્વા પદિ બધ્નાત્વિત્યાહ મિત્રો વૈ શિવો દેવાનાં તેનૈવૈનાં
પદિ બધ્નાતિ પૂષાધ્વનઃ પાત્વિત્યાહેયં વૈ પૂષેમામેવાસ્યા અધિપામકઃ
સમષ્ટ્યા ઇન્દ્રાયાધ્યક્ષાયેત્યાહેન્દ્રમેવાસ્યા અધ્યક્ષં કરો
૫૨ ત્યનુ ત્વા માતા મન્યતામનુ પિતેત્યાહાનુમતયૈવૈનયા ક્રીણાતિ સા દેવિ
દેવમચ્છેહીત્યાહ દેવી હ્યેષા દેવઃ સોમ ઇન્દ્રાય સોમમિત્યાહેન્દ્રાય હિ
સોમ આહ્રિયતે યદેતદ્યજુર્ન બ્રૂયાત્પરાચ્યેવ સોમક્રયણીયાદ્રુદ્રસ્ત્વાઽ
વર્તયત્વિત્યાહ રુદ્રો વૈ ક્રૂરો
૫૩ દેવાનાં તમેવાસ્યૈ પરસ્તાદ્દધાત્યાવૃત્ત્યૈ ક્રૂરમિવ વા
એતત્કરોતિ યદ્રુદ્રસ્ય કીર્તયતિ મિત્રસ્ય પથેત્યાહ શાન્ત્યૈ
વાચા વા એષ વિ ક્રીણીતે યઃ સોમક્રયણ્યા સ્વસ્તિ સોમસખા પુનરેહિ

સહ રથ્યેત્યાહ વાચૈવ વિક્રીય પુનરાત્મન્વાચં ધત્તેઽનુપદાસુકાસ્ય

વાગ્ભવતિ ય એવં વેદ ॥ ૬। ૧। ૭॥

સતનું વિષ્ણવ ઇત્યાહ સમારોહતિ ધ્યાયતિ તદ્ધાચા યજમાનઃ સ્યાત્કરોતિ

ક્રૂરો વેદ ॥ ૬। ૧। ૭॥

૫૪ ષટ્પદાન્યનુ નિ ક્રામતિ ષડહં વાઙ્નાતિ વદત્યુત સંવથ્સરસ્યાયને

યાવત્યેવ વાક્તામવ રુંધે સપ્તમે પદે જુહોતિ સપ્તપદા શક્વરી

પશવઃ શક્વરી પશૂનેવાવ રુંધે સપ્ત ગ્રામ્યાઃ પશવઃ સપ્તારણ્યાઃ

સપ્ત છન્દાગ્સ્યુભયસ્યાવરુદ્ધ્યૈ વસ્વ્યસિ રુદ્રાસીત્યાહ રૂપમેવાસ્યા

એતન્મહિમાનં

૫૫ વ્યાચષ્ટે બૃહસ્પતિસ્ત્વા સુમ્ને રણ્વત્વિત્યાહ બ્રહ્મ વૈ દેવાનાં

બૃહસ્પતિર્બ્રહ્મણૈવાસ્મૈ પશૂનવ રુંધે રુદ્રો વસુભિરા

ચિકેત્વિત્યાહાવૃત્ત્યૈ પૃથિવ્યાસ્ત્વા મૂર્ધન્ના જિઘર્મિ દેવયજન

ઇત્યાહ પૃથિવ્યા હ્યેષ મૂર્ધા યદ્દેવયજનમિડાયાઃ પદ ઇત્યાહેડાયૈ

હ્યેતત્પદં યથ્સોમક્રયણ્યૈ ઘૃતવતિ સ્વાહે

૫૬ ત્યાહ યદેવાસ્યૈ પદાદ્ઘૃતમપીડ્યત તસ્માદેવમાહ

યદધ્વર્યુરનગ્નાવાહુતિં જુહુયાદન્ધોઽધ્વર્યુઃ સ્યાદ્રક્ષાꣳસિ

યજ્ઞꣳ હન્યુર્હિરણ્યમુપાસ્ય જુહોત્યગ્નિવત્યેવ જુહોતિ

નાન્ધોઽધ્વર્યુર્ભવતિ ન યજ્ઞꣳ રક્ષાꣳસિ ઘ્નન્તિ કાણ્ડેકાણ્ડે

વૈ ક્રિયમાણે યજ્ઞꣳ રક્ષાꣳસિ જિઘાꣳસન્તિ પરિલિખિતꣳ

રક્ષઃ પરિલિખિતા અરાતય ઇત્યાહ રક્ષસામપહત્યા

૫૭ ઇદમહꣳ રક્ષસો ગ્રીવા અપિ કૃન્તામિ યોઽસ્માન્દ્વેષ્ટિ યં ચ

વયં દ્વિષ્મ ઇત્યાહ દ્વૌ વાવ પુરુષૌ યં ચૈવ દ્વેષ્ટિ યશ્ચૈનં

દ્વેષ્ટિ તયોરેવાનન્તરાયં ગ્રીવાઃ કૃન્તતિ પશવો વૈ સોમક્રયણ્યૈ

પદં યાવત્ત્મૂતꣳ સં વપતિ પશૂનેવાવ રુંધેઽસ્મે રાય ઇતિ સં

વપત્યાત્માનમેવાધ્વર્યુઃ

૫૮ પશુભ્યો નાન્તરેતિ ત્વે રાય ઇતિ યજમાનાય પ્ર યચ્છતિ યજમાન

એવ રયિં દધાતિ તોતે રાય ઇતિ પત્નિયા અર્ધો વા એષ આત્મનો યત્પત્ની

યથા ગૃહેષુ નિધત્તે તાદૃગેવ તત્ત્વષ્ટીમતી તે સપેયેત્યાહ ત્વષ્ટા
વૈ પશૂનાં મિથુનાનાꣳરૂપકૃદ્રૂપમેવ પશુષુ દધાત્યસ્મૈ
વૈ લોકાય ગાર્હપત્ય આ ધીયતેઽમુષ્મા આહવનીયો યદ્ગાર્હપત્ય
ઉપવપેદસ્મિꣳલ્લોકે પશુમાન્થ્સ્યાદ્યદાહવનીયેઽમુષ્મિꣳ
લ્લોકે પશુમાન્થ્સ્યાદુભયોરુપ વપત્યુભયોરેવૈનં લોકયોઃ
પશુમન્તં કરોતિ ॥ ૬। ૧। ૮॥ મહિમાનગ્ગ્ સ્વાહાઽપહત્યા અધ્વર્યુર્ધીયતે
ચતુર્વિꣳશતિશ્ચ ॥ ૬। ૧। ૮॥

૫૯ બ્રહ્મવાદિનો વદન્તિ વિચિત્યઃ સોમા૩ ન વિચિત્યા૩ ઇતિ સોમો
વા ઓષધીનાꣳ રાજા તસ્મિન્, યદાપન્નં ગ્રસિતમેવાસ્ય
તદ્યદ્વિચિનુયાદ્યથાસ્યાદ્ ગ્રસિતં નિષ્ખિદતિ તાદૃગેવ તદ્યન્ન
વિચિનુયાદ્યથાક્ષન્નાપન્નં વિધાવતિ તાદૃગેવ તત્ક્ષોધુકોઽધ્વર્યુઃ
સ્યાત્ક્ષોધુકો યજમાનઃ સોમવિક્રયિન્થ્સોમꣳશોધયેત્યેવ
બ્રૂયાદ્યદીતરં

૬૦ યદીતરમુભયેનૈવ સોમવિક્રયિણમર્પયતિ તસ્માથ્સોમવિક્રયી
ક્ષોધુકોઽરુણો હ સ્માહૌપવેશિઃ સોમક્રયણ એવાહં તૃતીયસવનમવ
રુંધ ઇતિ પશૂનાં ચર્મન્મિમીતે પશૂનેવાવ રુંધે પશવો હિ
તૃતીયꣳ સવનં યં કામયેતાપશુઃ સ્યાદિત્યૃક્ષતસ્તસ્ય
મિમીતર્ક્ષં વા અપશવ્યમપશુરેવ ભવતિ યં કામયેત પશુમાન્થ્સ્યા

૬૧ દિતિ લોમતસ્તસ્ય મિમીતૈતદ્વૈ પશૂનાꣳ રૂપꣳ રૂપેણૈવાસ્મૈ
પશૂનવ રુંધે પશુમાનેવ ભવત્યપામન્તે ક્રીણાતિ સરસમેવૈનં
ક્રીણાત્યમાત્યોઽસીત્યાહામૈવૈનં કુરુતે શુક્રસ્તે ગ્રહ ઇત્યાહ શુક્રો
હ્યસ્ય ગ્રહોઽનસાચ્છ યાતિ મહિમાનમેવાસ્યાચ્છ યાત્યનસા

૬૨ ઽચ્છ યાતિ તસ્માદનોવાહ્યꣳસમે જીવનં યત્ર ખલુ વા
એતꣳ શીર્ષ્ણા હરન્તિ તસ્માચ્છીર્ષહાર્યં ગિરૌ જીવનમભિત્યં
દેવꣳ સવિતારમિત્યતિચ્છંદસર્ચા મિમીતેઽતિચ્છન્દા વૈ સર્વાણિ
છન્દાꣳસિ સર્વેભિરેવૈનં છન્દોભિર્મિમીતે વર્ષ્મ વા એષા છંદસાં
યદતિચ્છન્દા યદતિચ્છંદસર્ચા મિમીતે વર્ષ્મૈવૈનꣳસમાનાનાં

કરોત્યકયૈકયોત્સર્ગં

૬૩ મિમીતેઽયાતયામ્નિયાયાતયામ્નિયૈવૈનં મિમીતે તસ્માન્નાનાવીર્યા
અઙ્ગુલયઃ સર્વાસ્વઙ્ગુષ્ઠમુપ નિ ગૃહ્ણાતિ
તસ્માથ્સમાવદ્વીર્ય઼ોઽન્યાભિરઙ્ગુલિભિસ્તસ્માથ્સર્વા અનુ
સં ચરતિ યથ્સહ સર્વાભિર્મિમીત સંશ્લિષ્ટા અઙ્ગુલયો
જાયેરન્નેકયૈકયોત્સર્ગં મિમીતે તસ્માદ્વિભક્તા જાયન્તે પઞ્ચ કૃત્વો
યજુષા મિમીતે પઞ્ચાક્ષરા પઙ્ક્તિઃ પાઙ્ક્તો યજ્ઞો યજ્ઞમેવાવ રુંધે
પઞ્ચ કૃત્વસ્તૂષ્ણીં

૬૪ દશ સં પદ્યન્તે દશાક્ષરા વિરાડન્નં વિરાડ્વિરાજૈવાન્નાદ્યમવ
રુંધે યદ્યજુષા મિમીતે ભૂતમેવાવ રુંધે યત્તૂષ્ણીં ભવિષ્યદ્યદ્વૈ
તાવાનેવ સોમઃ સ્યાદ્યાવન્તં મિમીતે યજમાનસ્યૈવ સ્યાન્નાપિ સદસ્યાનાં
પ્રજાભ્યસ્ત્વેત્યુપ સમૂહતિ સદસ્યાનેવાન્વાભજતિ વાસસોપ નહ્યતિ
સર્વદેવત્યં વૈ

૬૫ વાસઃ સર્વાભિરેવૈનં દેવતાભિઃ સમર્ધયતિ પશવો વૈ સોમઃ
પ્રાણાય ત્વેત્યુપ નહ્યતિ પ્રાણમેવ પશુષુ દધાતિ વ્યાનાય ત્વેત્યનુ
શૃન્થતિ વ્યાનમેવ પશુષુ દધાતિ તસ્માથ્સ્વપન્તં પ્રાણા ન જહતિ ॥
૬। ૧। ૯॥ ઇતરં પશુમાન્થ્સ્યાદ્યાત્યનસોત્સર્ગં તૂષ્ણીꣳ સર્વદેવત્યં
વૈ ત્રયસ્ત્રિꣳશચ્ચ ॥ ૬। ૧। ૯॥

૬૬ યત્કલયા તે શફેન તે ક્રીણાનીતિ પણેતાગો અર્ઘꣳ સોમં
કુર્યાદગો અર્ઘં યજમાનમગો અર્ઘમધ્વર્યું ગોસ્તુ મહિમાનં નાવ
તિરેદ્ગવા તે ક્રીણાનીત્યેવ બ્રૂયાદ્ગો અર્ઘમેવ સોમં કરોતિ ગો અર્ઘં
યજમાનં ગો અર્ઘમધ્વર્યું ન ગોર્મહિમાનમવ તિરત્યજયા ક્રીણાતિ
સતપસમેવૈનં ક્રીણાતિ હિરણ્યેન ક્રીણાતિ સશુક્રમેવૈ

૬૭ નં ક્રીણાતિ ધેન્વા ક્રીણાતિ સાશિરમેવૈનં ક્રીણાત્યૃષભેણ ક્રીણાતિ
સેન્દ્રમેવૈનં ક્રીણાત્યનડુહા ક્રીણાતિ વહ્નિર્વા અનડ્વાન્, વહ્નિનૈવ વહ્નિ
યજ્ઞસ્ય ક્રીણાતિ મિથુનાભ્યાં ક્રીણાતિ મિથુનસ્યાવરુદ્ધ્યૈ વાસસા ક્રીણાતિ
સર્વદેવત્યં વૈ વાસઃ સર્વાભ્ય એવૈનં દેવતાભ્યઃ ક્રીણાતિ દશ સં

પદ્યન્તે દશાક્ષરા વિરાડન્નં વિરાડ્વિરાજૈવાન્નાદ્યમવ રુંધે
૬૮ તપસસ્તનૂરસિ પ્રજાપતેર્વર્ણ ઇત્યાહ પશુભ્ય એવ
તદધ્વર્યુર્નિહ્નુત આત્મનોઽનાવ્રસ્કાય ગચ્છતિ શ્રિયં પ્ર પશૂનાપ્નોતિ
ય એવં વેદ શુક્રં તે શુક્રેણ ક્રીણામીત્યાહ યથાયજુરેવૈતદ્દેવા વૈ
યેન હિરણ્યેન સોમમક્રીણન્તદભીષહા પુનરાદદત કો હિ તેજસા
વિ ક્રેષ્યત ઇતિ યેન હિરણ્યેન
૬૯ સોમં ક્રીણીયાત્તદભીષહા પુનરા દદીત તેજ એવાત્મન્ધત્તેઽસ્મે
જ્યોતિઃ સોમવિક્રયિણિ તમ ઇત્યાહ જ્યોતિરેવ યજમાને દધાતિ
તમસા સોમવિક્રયિણમર્પયતિ યદનુપગ્રથ્ય હન્યાદ્દન્દશૂકાસ્તાꣳ
સમાꣳસર્પાઃ સ્યુરિદમહꣳ સર્પાણાં દન્દશૂકાનાં ગ્રીવા ઉપ
ગ્રથ્નામીત્યાહાદન્દશૂકાસ્તાꣳ સમાꣳસર્પા ભવન્તિ તમસા
સોમવિક્રયિણં વિધ્યતિ સ્વાન
૭૦ ભ્રાજેત્યાહૈતે વા અમુષ્મિꣳલ્લોકે સોમમરક્ષન્તેભ્યોઽધિ
સોમમાહરન્ યદેતેભ્યઃ સોમક્રયણાન્નાનુદિશેદક્રીતોઽસ્ય
સોમઃ સ્યાન્નાસ્યૈતેઽમુષ્મિꣳલ્લોકે સોમꣳરક્ષેયુર્યદેતેભ્યઃ
સોમક્રયણાનનુદિશતિ ક્રીતોઽસ્ય સોમો ભવત્યેતેઽસ્યામુષ્મિꣳલ્લોકે
સોમꣳરક્ષન્તિ ॥ ૬। ૧। ૧૦॥ સશુક્રમેવ રુંધ ઇતિ યેન હિરણ્યેન
સ્વાન ચતુશ્ચત્વારિꣳશચ્ચ ॥ ૬। ૧। ૧૦॥
૭૧ વારુણો વૈ ક્રીતઃ સોમ ઉપનદ્ધો મિત્રો ન એહિ સુમિત્રધા
ઇત્યાહ શાન્ત્યા ઇન્દ્રસ્યોરુમા વિશ દક્ષિણમિત્યાહ દેવા વૈ યꣳ
સોમમક્રીણન્તમિન્દ્રસ્યોરૌ દક્ષિણ આસાદયન્નેષ ખલુ વા એતર્હીન્દ્રો
યો યજતે તસ્માદેવમાહોદાયુષા સ્વાયુષેત્યાહ દેવતા એવાન્વારભ્યોત્
૭૨ તિષ્ઠત્યુર્વન્તરિક્ષમન્વિહીત્યાહાન્તરિક્ષદેવત્યો ૨ હ્યેતર્હિ
સોમોઽદિત્યાઃ સદોઽસ્યદિત્યાઃ સદ આ સીદેત્યાહ યથાયજુરેવૈતદ્વિ વા
એનમેતદર્ધયતિ યદ્વારુણꣳ સન્તં મૈત્રં કરોતિ વારુણ્યર્ચા
સાદયતિ સ્વયૈવૈનં દેવતયા સમર્ધયતિ વાસસા પર્યાનહ્યતિ
સર્વદેવત્યં વૈ વાસઃ સર્વાભિરેવૈ

૭૩ નં દેવતાભિઃ સમર્ધયત્યથો રક્ષસામપહત્યૈ વનેષુ
વ્યન્તરિક્ષં તતાનેત્યાહ વનેષુ હિ વ્યન્તરિક્ષં તતાન
વાજમર્વથ્સ્વિત્યાહ વાજગ્ગ્ હ્યર્વથ્સુ પયો અઘ્નિયાસ્વિત્યાહ
પયો હ્યઘ્નિયાસુ હૃથ્સુ ક્રતુમિત્યાહ હૃથ્સુ હિ ક્રતું વરુણો
વિક્ષ્વગ્નિમિત્યાહ વરુણો હિ વિક્ષ્વગ્નિં દિવિ સૂર્ય

૭૪ મિત્યાહ દિવિ હિ સૂર્યઁ સોમમદ્રાવિત્યાહ ગ્રાવાણો વા અદ્રયસ્તેષુ
વા એષ સોમં દધાતિ યો યજતે તસ્માદેવમાહોદુત્યં જાતવેદસમિતિ
સૌર્યર્ચા કૃષ્ણાજિનં પ્રત્યાનહ્યતિ રક્ષસામપહત્યા ઉસ્રાવેતં
ધૂર્ષાહાવિત્યાહ યથાયજુરેવૈતત્પ્ર ચ્યવસ્વ ભુવસ્પત ઇત્યાહ ભૂતાનાગ્
હ્યે

૭૫ ષ પતિર્વિશ્વાન્યભિ ધામાનીત્યાહ વિશ્વાનિ હ્યે ૨ ષોઽભિ ધામાનિ
પ્રચ્યવતે મા ત્વા પરિપરી વિદદિત્યાહ યદેવાદઃ સોમમાહ્રિયમાણં
ગન્ધર્વો વિશ્વાવસુઃ પર્યમુષ્ણાત્તસ્માદેવમાહાપરિમોષાય યજમાનસ્ય
સ્વસ્ત્યયન્યસીત્યાહ યજમાનસ્યૈવૈષ યજ્ઞસ્યાન્વારંભોઽનવચ્છિત્ત્યૈ
વરુણો વા એષ યજમાનમભ્યૈતિ યત્

૭૬ ક્રીતઃ સોમ ઉપનદ્ધો નમો મિત્રસ્ય વરુણસ્ય ચક્ષસ
ઇત્યાહ શાન્ત્યા આ સોમં વહન્ત્યગ્નિના પ્રતિ તિષ્ઠતે તૌ સંભવન્તૌ
યજમાનમભિ સંભવતઃ પુરા ખલુ વાવૈષ મેધાયાત્માનમારભ્ય ચરતિ
યો દીક્ષિતો યદગ્નીષોમીયં પશુમાલભત આત્મનિષ્ક્રયણ એવાસ્ય સ
તસ્માત્તસ્ય નાશ્યં પુરુષ નિષ્ક્રયણ ઇવ હ્યથો ખલ્વાહુરગ્નીષોમાભ્યાં
વા ઇન્દ્રો વૃત્રમહન્નિતિ યદગ્નીષોમીયં પશુમાલભતે વાર્ત્રઘ્ન
એવાસ્ય સ તસ્માદ્વાશ્યં વારુણ્યર્ચા પરિ ચરતિ સ્વયૈવૈનં દેવતયા
પરિ ચરતિ ॥ ૬। ૧। ૧૧॥ અન્વારભ્યોથ્સર્વાભિરેવ સૂર્યં ભૂતાનાગ્ હ્યેતિ
યદાહુઃ સપ્તવિઁશતિશ્ચ ॥ ૬। ૧। ૧૧॥

પ્રાચીનવઁશં યાવન્ત ઋખ્સામો વાગ્વૈ દેવેભ્યો દેવા વૈ દેવયજનં
કદ્રૂશ્ચ તદ્ધિરણ્યઁ ષટ્પદાનિ બ્રહ્મવાદિનો વિચિત્યો યત્કલયા

તે વારુણો વૈ ક્રીતઃ સોમ એકાદશ ॥

પ્રાચીનવꣳશગ્ગ્ સ્વાહેત્યાહ યોન્તઃ શરા હ્યેષ સન્તપસા ચ

યત્કર્ણગૃહીતેતિ લોમતો વારુણઃ ષટ્થ્સપ્તતિઃ ॥

પ્રાચીનવꣳશં પરિ ચરતિ ॥

## ષષ્ઠકાણ્ડે દ્વિતીયઃ પ્રશ્નઃ ૨

૧ યદુભૌ વિમુચ્યાતિથ્યં ગૃહ્ણીયાદ્યજ્ઞં વિ ચ્છિન્દ્યાદ્યદુભાવ

વિમુચ્ય યથાનાગતાયાતિથ્યં ક્રિયતે તાદૃગેવ તદ્વિમુક્તોઽન્યોઽનડ્વાન્

ભવત્યવિમુક્તોઽન્યોઽથાતિથ્યં ગૃહ્ણાતિ યજ્ઞસ્ય સંતત્યૈ

પત્ન્યન્વારભતે પત્ની હિ પારીણહ્યસ્યેશે પત્નિયૈવાનુમતં નિર્વપતિ

યદ્વૈ પત્ની યજ્ઞસ્ય કરોતિ મિથુનં તદથો પત્નિયા એવૈ

૨ ષ યજ્ઞસ્યાન્વારંભોઽનવચ્છિત્ત્યૈ યાવદ્ભિર્વૈ

રાજાનુચરૈરાગચ્છતિ સર્વેભ્યો વૈ તેભ્ય આતિથ્યં ક્રિયતે

છન્દાꣳસિ ખલુ વૈ સોમસ્ય રાજ્ઞોઽનુચરાણ્યગ્નેરાતિથ્યમસિ

વિષ્ણવે ત્વેત્યાહ ગાયત્રિયા એવૈતેન કરોતિ સોમસ્યાતિથ્યમસિ

વિષ્ણવે ત્વેત્યાહ ત્રિષ્ટુભ એવૈતેન કરોત્યતિથેરાતિથ્યમસિ

વિષ્ણવે ત્વેત્યાહ જગત્યા

૩ એવૈતેન કરોત્યગ્નયે ત્વા રાયસ્પોષદાવ્ને વિષ્ણવે ત્વેત્યાહાનુષ્ટુભ

એવૈતેન કરોતિ શ્યેનાય ત્વા સોમભૃતે વિષ્ણવે ત્વેત્યાહ ગાયત્રિયા

એવૈતેન કરોતિ પઞ્ચ કૃત્વો ગૃહ્ણાતિ પઞ્ચાક્ષરા પઙ્ક્તિઃ પાઙ્ક્તો

યજ્ઞો યજ્ઞમેવાવ રુંધે બ્રહ્મવાદિનો વદન્તિ કસ્માથ્સત્યાદ્ગાયત્રિયા

ઉભયત આતિથ્યસ્ય ક્રિયત ઇતિ યદેવાદઃ સોમમા

૪ ઽહરત્તસ્માદ્ગાયત્રિયા ઉભયત આતિથ્યસ્ય ક્રિયતે

પુરસ્તાચ્ચોપરિષ્ટાચ્ચ શિરો વા એતદ્યજ્ઞસ્ય યદાતિથ્યં નવકપાલઃ

પુરોડાશો ભવતિ તસ્માન્નવધા શિરો વિષ્યૂતં નવકપાલઃ પુરોડાશો

ભવતિ તે ત્રયસ્ત્રિકપાલાસ્ત્રિવૃતા સ્તોમેન સં મિતાસ્તેજસ્ત્રિવૃત્તેજ

એવ યજ્ઞસ્ય શીર્ષન્દધાતિ નવકપાલઃ પુરોડાશો ભવતિ તે
ત્રયસ્ત્રિકપાલાસ્ત્રિવૃતા પ્રાણેન સં મિતાસ્ત્રિવૃદ્વૈ
૫ પ્રાણસ્ત્રિવૃતમેવ પ્રાણમભિપૂર્વં યજ્ઞસ્ય શીર્ષન્દધાતિ
પ્રજાપતેર્વા એતાનિ પક્ષ્માણિ યદશ્વવાલા ઐક્ષવી તિરશ્ચી
યદાશ્વવાલઃ પ્રસ્તરો ભવત્યૈક્ષવી તિરશ્ચી પ્રજાપતેરેવ તચ્ચક્ષુઃ
સંભરતિ દેવા વૈ યા આહુતીરજુહવુસ્તા અસુરા નિષ્કાવમાદન્તે
દેવાઃ કાર્ષ્મર્યમપશ્યન્કર્મણ્યો વૈ કર્મૈનેન કુર્વીતેતિ તે
કાર્ષ્મર્યમયાન્પરિધીન
૬ કુર્વત તૈર્વૈ તે રક્ષાગ્ સ્યપાઘ્નત યત્કાર્ષ્મર્યમયાઃ પરિધયો
ભવન્તિ રક્ષસામપહત્યૈ સગ્ગ્ સ્પર્શયતિ રક્ષસામનન્વવચારાય
ન પુરસ્તાત્પરિ દધાત્યાદિત્યો હ્યેવોદ્યન્પુરસ્તાદ્રક્ષાગ્ સ્યપહન્ત્યૂર્ધ્વે
સમિધાવા દધાત્યુપરિષ્ટાદેવ રક્ષાગ્ સ્યપહન્તિ યજુષાન્યાં
તૂષ્ણીમન્યાં મિથુનત્વાય દ્વે આ દધાતિ દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યૈ
બ્રહ્મવાદિનો વદન્ત્ય
૭ ગ્નિશ્ચ વા એતૌ સોમશ્ચ કથા સોમાયાતિથ્યં ક્રિયતે નાગ્નય
ઇતિ યદગ્નાવગ્નિં મથિત્વા પ્રહરતિ તેનૈવાગ્નય આતિથ્યં
ક્રિયતેઽથો ખલ્વાહુરગ્નિઃ સર્વા દેવતા ઇતિ યદ્ધવિરાસાદ્યાગ્નિં
મન્થતિ હવ્યાયૈવાસન્નાય સર્વા દેવતા જનયતિ ॥ ૬। ૨। ૧॥ પત્નિયા એવ
જગત્યા આ ત્રિવૃદ્વૈ પરિધીન્, વદન્ત્યેક ચત્વારિꣳશચ્ચ ॥ ૬। ૨। ૧॥
૮ દેવાસુરાઃ સંયત્તા આસન્તે દેવા મિથો વિપ્રિયા આસન્તે ૨ ઽન્યોઽન્યસ્મૈ
જ્યૈષ્ઠ્યાયાતિષ્ઠમાનાઃ પઞ્ચધા વ્યક્રામન્નગ્નિર્વસુભિઃ સોમો રુદ્રૈરિન્દ્રો
મરુદ્ભિર્વરુણ આદિત્યૈર્બૃહસ્પતિર્વિશ્વૈર્દેવૈસ્તેઽમન્યન્તાસુરેભ્યો
વા ઇદં ભ્રાતૃવ્યેભ્યો રધ્યામો યન્મિથો વિપ્રિયાઃ સ્મો યાન ઇમાઃ
પ્રિયાસ્તનુવસ્તાઃ સમવદ્યામહૈ તાભ્યઃ સ નિરૃચ્છાદ્યો
૯ નઃ પ્રથમોઽ૧ઽ ન્યોઽન્યસ્મૈ દ્રુહ્યાદિતિ તસ્માદ્યઃ સતાનૂનપ્ત્રિણાં
પ્રથમો દ્રુહ્યતિ સ આર્તિમાર્ચ્છતિ યત્તાનૂનપ્ત્રꣳ સમવદ્યતિ
ભ્રાતૃવ્યાભિભૂત્યૈ ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો ભવતિ પઞ્ચ

કૃત્વોઽવ દ્યતિ પઞ્ચધા હિ તે તથ્સમવાદ્યન્તાથો પઞ્ચાક્ષરા પઙ્ક્તિઃ
પાઙ્ક્તો યજ્ઞો યજ્ઞમેવાવ રુંધ આપતયે ત્વા ગૃહ્ણામીત્યાહ પ્રાણો વા
૧૦ આપતિઃ પ્રાણમેવ પ્રીણાતિ પરિપતય ઇત્યાહ મનો વૈ
પરિપતિર્મન એવ પ્રીણાતિ તનૂનપ્ત્ર ઇત્યાહ તનુવો હિ તે તાઃ
સમવાદ્યન્ત શાક્વરાયેત્યાહ શક્ત્યૈ હિ તે તાઃ સમવાદ્યન્ત
શક્મન્નોજિષ્ઠાયેત્યાહૌજિષ્ઠꣳ હિ તે તદાત્મનઃ
સમવાદ્યન્તાનાધૃષ્ટમસ્યનાધૃષ્યમિત્યાહાનાધૃષ્ટꣳ
હ્યેતદનાધૃષ્યં દેવાનામોજ
૧૧ ઇત્યાહ દેવાનાꣳ હ્યેતદોજોઽભિશસ્તિપા અનભિશસ્તેન્યમિત્યાહાભિશસ્તિપા
હ્યેતદનભિશસ્તેન્યમનુ મે દીક્ષાં દીક્ષાપતિર્મન્યતામિત્યાહ યથા
યજુરેવૈતદ્ઘૃતં વૈ દેવા વજ્રં કૃત્વા સોમમઘ્નન્નન્તિકમિવ ખલુ
વા અસ્યૈતચ્ચરન્તિ યત્તાનૂનપ્ત્રેણ પ્રચરન્ત્યꣳશુરꣳશુસ્તે
દેવ સોમાપ્યાયતામિત્યાહ ય
૧૨ દેવાસ્યાપુવાયતે યન્મીયતે તદેવાસ્યૈતેનાપ્યા યયત્યા તુભ્યમિન્દ્રઃ
પ્યાયતામા ત્વમિન્દ્રાય પ્યાયસ્વેત્યાહોભાવેવેન્દ્રં ચ સોમં
ચાપ્યાયયત્યા પ્યાયય સખીન્થ્સન્યા મેધયેત્યાહર્ત્વિજો વા અસ્ય
સખાયસ્તાનેવાપ્યાયયતિ સ્વસ્તિ તે દેવ સોમ સુત્યામશીયે
૧૩ ત્યાહાશિષમેવૈતામા શાસ્તે પ્ર વા એતેઽસ્માલ્લોકાચ્ચ્યવન્તે યે
સોમમાપ્યાયયન્ત્યન્તરિક્ષદેવત્યો હિ સોમ આપ્યાયિત એષ્ટા રાયઃ પ્રેષે
ભગાયેત્યાહ દ્યાવાપૃથિવીભ્યામેવ નમસ્કૃત્યાસ્મિꣳલ્લોકે
પ્રતિ તિષ્ઠન્તિ દેવાસુરાઃ સંયત્તા આસન્તે દેવા બિભ્યતોઽગ્નિં
પ્રાવિશન્તસ્માદાહુરગ્નિઃ સર્વા દેવતા ઇતિ તે
૧૪ ઽગ્નિમેવ વરૂથં કૃત્વાસુરાનભ્યભવન્નગ્નિમિવ ખલુ વા એષ
પ્ર વિશતિ યોઽવાન્તરદીક્ષામુપૈતિ ભ્રાતૃવ્યાભિભૂત્યૈ ભવત્યાત્મના
પરાસ્ય ભ્રાતૃવ્યો ભવત્યાત્માનમેવ દીક્ષયા પાતિ પ્રજામવાન્તરદીક્ષયા
સંતરાં મેખલાꣳ સમાયચ્છતે પ્રજા હ્યાત્મનોઽન્તરતરા તપ્તવ્રતો
ભવતિ મદન્તીભિર્માર્જયતે નિર્હ્યગ્નિઃ શીતેન વાયતિ સમિદ્ધ્યૈ યા તે

અગ્ને રુદ્રિયા તનૂરિત્યાહ સ્વયૈવૈનદ્દેવતયા વ્રતયતિ સયોનિત્વાય
શાન્ત્યૈ ॥ ૬। ૨। ૨॥ યો વા ઓજ આહ યદશીયેતિ તેગ્ર એકાદશ ચ ॥ ૬। ૨। ૨॥

૧૫ તેષામસુરાણાં તિસ્રઃ પુર આસન્નયસ્મય્યવમાથ રજતાથ હરિણી
તા દેવા જેતું નાશક્નુવન્તા ઉપસદૈવાજિગીષન્તસ્માદાહુર્યશ્ચૈવં
વેદ યશ્ચ નોપસદા વૈ મહાપુરં જયન્તીતિ ત ઇષુ ꣳ
સમસ્કુર્વતાગ્નિમનીક ꣳ સોમ ꣳ શલ્યં વિષ્ણું તેજનં તેઽબ્રુવન્ક
ઇમામસિષ્યતીતિ

૧૬ રુદ્ર ઇત્યબ્રુવન્રુદ્રો વૈ ક્રૂરઃ સોઽસ્યત્વિતિ સોઽબ્રવીદ્વરં વૃણા
અહમેવ પશૂનામધિપતિરસાનીતિ તસ્માદ્રુદ્રઃ પશૂનામધિપતિસ્તા ꣳ
રુદ્રોઽવાસૃજથ્સ તિસ્રઃ પુરો ભિત્ત્વૈભ્યો લોકેભ્યોઽસુરાન્પ્રાણુદત
યદુપસદ ઉપસદ્યન્તે ભ્રાતૃવ્યપરાણુત્ત્યૈ નાન્યામાહુતિં
પુરસ્તાજ્જુહુયાદ્યદન્યામાહુતિં પુરસ્તાજ્જુહુયા

૧૭ દન્યન્મુખં કુર્યાથ્સ્રુવેણાઘારમા ઘારયતિ યજ્ઞસ્ય પ્રજ્ઞાત્યૈ
પરાઽતિક્રમ્ય જુહોતિ પરાચ એવૈભ્યો લોકેભ્યો યજમાનો ભ્રાતૃવ્યાન્
પ્રણુદતે પુનરત્યાક્રમ્યોપસદં જુહોતિ પ્રણુદ્યૈવૈભ્યો લોકેભ્યો
ભ્રાતૃવ્યાંજિત્વા ભ્રાતૃવ્યલોકમભ્યારોહતિ દેવા વૈ યાઃ પ્રાતરુપસદ
ઉપાસીદન્નહ્નસ્તાભિરસુરાન્પ્રાણુદન્ત યાઃ સાય ꣳ રાત્રિયૈ
તાભિર્યથ્સાયં પ્રાતરુપસદ

૧૮ ઉપસદ્યન્તેઽહોરાત્રાભ્યામેવ તદ્યજમાનો ભ્રાતૃવ્યાન્ પ્રણુદતે
યાઃ પ્રાતર્યાજ્યાઃ સ્યુસ્તાઃ સાયં પુરોઽનુવાક્યાઃ કુર્યાદયાતયામત્વાય તિસ્ર
ઉપસદ ઉપૈતિ ત્રય ઇમે લોકા ઇમાનેવ લોકાન્પ્રીણાતિ ષટ્થ્સં
પદ્યન્તે ષડ્વા ઋતવ ઋતૂનેવ પ્રીણાતિ દ્વાદશાહીને સોમ ઉપૈતિ
દ્વાદશ માસાઃ સંવથ્સરઃ સંવથ્સરમેવ પ્રીણાતિ ચતુર્વિ ꣳ શતિઃ સં

૧૯ પદ્યન્તે ચતુર્વિ ꣳ શતિરર્ધમાસા અર્ધમાસાનેવ
પ્રીણાત્યારાગ્રામવાન્તરદીક્ષામુપેયાદ્યઃ કામયેતાસ્મિન્મે
લોકેઽર્ધુકગ્ગ્ સ્યાદિત્યેકમગ્રેઽથ દ્વાવથ ત્રીનથ ચતુર
એષા વા આરાગ્રાવાન્તરદીક્ષાસ્મિન્નેવાસ્મૈ લોકેઽર્ધુકં ભવતિ

પરોવરીયસીમવાન્તરદીક્ષામુપેયાદ્યઃ કામયેતામુષ્મિન્મે
લોકેઽર્ધુકગ્ગ્ સ્યાદિતિ ચતુરોઽગ્રેઽથ ત્રીનથ દ્વાવથૈકમેષા વૈ
પરોવરીયસ્યવાન્તરદીક્ષામુષ્મિન્નેવાસ્મૈ લોકેઽર્ધુકં ભવતિ ॥ ૬। ૨। ૩॥ અસિષ્યતીતિ જુહુયાથ્સાયં
પ્રાતરુપસદશ્ચતુર્વિઁશતિઃ
સગ્ચતુરોઽગ્રે ષોડશ ચ ॥ ૬। ૨। ૩॥

૨૦ સુવર્ગં વા એતે લોકં યન્તિ ય ઉપસદ ઉપયન્તિ તેષાં ય
ઉન્નયતે હીયત એવ સ નોદનેષીતિ સૂન્નીયમિવ યો વૈ સ્વાર્થેતાં
યતાગ્ શ્રાન્તો હીયત ઉત સ નિષ્ટયાય સહ વસતિ તસ્માથ્સકૃદુન્નીય
નાપરમુન્નયેત દધ્નોન્નયેતૈતદ્વૈ પશૂનાઁ રૂપઁ રૂપેણૈવ
પશૂનવ રુંધે

૨૧ યજ્ઞો દેવેભ્યો નિલાયત વિષ્ણૂ રૂપં કૃત્વા સ પૃથિવીં
પ્રાવિશત્તં દેવા હસ્તાન્થ્સઁરભ્યૈચ્છન્તમિન્દ્ર
ઉપર્યુપર્યત્યક્રામથ્સોઽબ્રવીત્કો માયમુપર્યુપર્યત્યક્રમીદિત્યહં
દુર્ગે હન્તેત્યથ કસ્ત્વમિત્યહં દુર્ગાદાહર્તેતિ સોઽબ્રવીદ્દુર્ગેવૈ હન્તાવોચથા
વરાહોઽયં વામમોષઃ

૨૨ સપ્તાનાં ગિરીણાં પરસ્તાદ્વિત્તં વેદ્યમસુરાણાં બિભર્તિ તં જહિ
યદિ દુર્ગે હન્તાસીતિ સ દર્ભપુંજીલમુદ્વૃહ્ય સપ્ત ગિરીન્ભિત્ત્વા
તમહન્થ્સોઽબ્રવીદ્દુર્ગાદ્વા આહર્તાવોચથા એતમા હરેતિ તમેભ્યો યજ્ઞ
એવ યજ્ઞમાહરદ્યત્તદ્વિત્તં વેદ્યમસુરાણામવિન્દન્ત તદેકં વેદ્યૈ
વેદિત્વમસુરાણાં

૨૩ વા ઇયમગ્ર આસીદ્યાવદાસીનઃ પરાપશ્યતિ તાવદ્દેવાનાં તે દેવા
અબ્રુવન્નસ્ત્વેવ નોઽસ્યામપીતિ કિયદ્ધો દાસ્યામ ઇતિ યાવદિયઁ સલાવૃકી
ત્રિઃ પરિક્રામતિ તાવન્નો દત્તેતિ સ ઇન્દ્રઃ સલાવૃકી રૂપં કૃત્વેમાં
ત્રિઃ સર્વતઃ પર્યક્રામત્તદિમામવિન્દન્ત યદિમામવિન્દન્ત તદ્વેદ્યૈ
વેદિત્વઁ

૨૪ સા વા ઇયઁ સર્વૈવ વેદિરિયતિ શક્ષ્યામીતિ ત્વા અવમાય યજન્તે
ત્રિઁશત્પદાનિ પશ્ચાત્તિરશ્ચી ભવતિ ષટ્ત્રિઁશત્પ્રાચી

ચતુર્વિંꣳશતિઃ પુરસ્તાત્તિરશ્ચી દશદશ સં પદ્યન્તે દશાક્ષરા
વિરાડન્નં વિરાડ્વિરાજૈવાન્નાદ્યમવ રુંધ ઉદ્ધન્તિ યદેવાસ્યા અમેધ્યં
તદપ હન્ત્યુદ્ધન્તિ તસ્માદોષધયઃ પરા ભવન્તિ બર્હિઃ સ્તૃણાતિ
તસ્માદોષધયઃ પુનરા ભવન્ત્યુત્તરં બર્હિષ ઉત્તરબર્હિઃ સ્તૃણાતિ
પ્રજા વૈ બર્હિર્યજમાન ઉત્તરબર્હિર્યજમાનમેવાયજમાનાદુત્તરં
કરોતિ તસ્માદ્યજમાનોઽયજમાનાદુત્તરઃ ॥ ૬। ૨। ૪॥ રુન્ધે વામમોષો
વેદિત્વમસુરાણાં વેદિત્વં ભવન્તિ પઞ્ચવિꣳશતિશ્ચ ॥ ૬। ૨। ૪॥

૨૫ યદ્વા અનીશાનો ભારમાદત્તે વિ વૈ સ લિશતે યદ્દ્વાદશ સાહ્નસ્યોપસદઃ
સ્યુસ્તિસ્રોઽહીનસ્ય યજ્ઞસ્ય વિલોમ ક્રિયેત તિસ્ર એવ સાહ્નસ્યોપસદો
દ્વાદશાહીનસ્ય યજ્ઞસ્ય સવીર્યત્વાયાથો સલોમ ક્રિયતે વત્સસ્યૈકઃ
સ્તનો ભાગી હિ સોઽથૈકગ્ગ્ સ્તનં વ્રતમુપૈત્યથ દ્વાવથ ત્રીનથ
ચતુર એતદ્વૈ

૨૬ ક્ષુરપવિ નામ વ્રતં યેન પ્ર જાતાન્ભ્રાતૃવ્યાન્નુદતે
પ્રતિ જનિષ્યમાણાનથો કનીયસૈવ ભૂય ઉપૈતિ ચતુરોઽગ્રે
સ્તનાન્વ્રતમુપૈત્યથ ત્રીનથ દ્વાવથૈકમેતદ્વૈ સુજઘનં નામ વ્રતં
તપસ્યꣳસુવર્ગ્યમથો પ્રૈવ જાયતે પ્રજયા પશુભિર્યવાગૂ
રાજન્યસ્ય વ્રતં ક્રૂરેવ વૈ યવાગૂઃ ક્રૂર ઇવ

૨૭ રાજન્યો વજ્રસ્ય રૂપꣳ સમૃદ્ધ્યા આમિક્ષા વૈશ્યસ્ય પાકયજ્ઞસ્ય
રૂપં પુષ્ટ્યૈ પયો બ્રાહ્મણસ્ય તેજો વૈ બ્રાહ્મણસ્તેજઃ પયસ્તેજસૈવ
તેજઃ પય આત્મન્ધત્તેઽથો પયસા વૈ ગર્ભા વર્ધન્તે ગર્ભ ઇવ ખલુ
વા એષ યદ્દીક્ષિતો યદસ્ય પયો વ્રતં ભવત્યાત્માનમેવ તદ્વર્ધયતિ
ત્રિવ્રતો વૈ મનુરાસીદ્દ્વિવ્રતા અસુરા એકવ્રતા

૨૮ દેવાઃ પ્રાતર્મધ્યંદિને સાયં તન્મનોર્વ્રતમાસીત્પાકયજ્ઞસ્ય રૂપં
પુષ્ટ્યૈ પ્રાતશ્ચ સાયં ચાસુરાણાં નિર્મધ્યં ક્ષુધો રૂપં તતસ્તે
પરાભવન્મધ્યંદિને મધ્યરાત્રે દેવાનાં તતસ્તેઽભવન્થ્સુવર્ગં
લોકમાયન્, યદસ્ય મધ્યંદિને મધ્યરાત્રે વ્રતં ભવતિ મધ્યતો
વા અન્નેન ભુઞ્જતે મધ્યત એવ તદૂર્જં ધત્તે ભ્રાતૃવ્યાભિભૂત્યૈ

ભવત્યાત્મના

૨૯ પરાસ્ય ભ્રાતૃવ્યો ભવતિ ગર્ભો વા એષ યદ્દીક્ષિતો યોનિર્દીક્ષિત
વિમિતં યદ્દીક્ષિતો દીક્ષિતવિમિતાત્પ્રવસેદ્યથા યોનેર્ગર્ભઃ સ્કન્દતિ
તાદૃગેવ તન્ન પ્રવસ્તવ્યમાત્મનો ગોપીથાયૈષ વૈ વ્યાઘ્રઃ કુલગોપો
યદગ્નિસ્તસ્માદ્યદ્દીક્ષિતઃ પ્રવસેથ્સ એનમીશ્વરોઽનૂત્થાય
હન્તોર્ન પ્રવસ્તવ્યમાત્મનો ગુપ્ત્યૈ દક્ષિણતઃ શય એતદ્વૈ
યજમાનસ્યાયતનગ્ગ્ સ્વ એવાયતને શયેઽગ્નિમભ્યાવૃત્ય શયે દેવતા
એવ યજ્ઞમભ્યાવૃત્ય શયે ॥ ૬। ૨। ૫॥ એતદ્વૈ ક્રૂર ઇવૈકવ્રતા આત્મના
યજમાનસ્ય ત્રયોદશ ચ ॥ ૬। ૨। ૫॥

૩૦ પુરોહવિષિ દેવયજને યાજયેદ્યં કામયેતોપૈનમુત્તરો યજ્ઞો
નમેદભિ સુવર્ગં લોકં જયેદિત્યેતદ્વૈ પુરોહવિર્દેવયજનં
યસ્ય હોતા પ્રાતરનુવાકમનુબ્રુવન્નગ્નિમપ આદિત્યમભિ
વિપશ્યત્યુપૈનમુત્તરો યજ્ઞો નમત્યભિ સુવર્ગં લોકં જયત્યાપ્તે
દેવયજને યાજયેદ્ભ્રાતૃવ્યવન્તં પન્થાં વાધિસ્પર્શયેત્કર્તં વા
યાવન્નાનસે યાત વૈ

૩૧ ન રથાયૈતદ્વા આપ્તં દેવયજનમાપ્નોત્યેવ ભ્રાતૃવ્યં નૈનં
ભ્રાતૃવ્ય આપ્નોત્યેકોન્નતે દેવ યજને યાજયેત્પશુકામમેકોન્નતાદ્વૈ
દેવયજનાદંગિરસઃ પશૂનસૃજન્તાન્તરા સદોહવિર્ધાને ઉન્નતગ્ગ્
સ્યાદેતદ્વા એકોન્નતં દેવયજનં પશુમાનેવ ભવતિ ત્ર્યુન્નતે દેવયજને
યાજયેથ્સુવર્ગકામં ત્ર્યુન્નતાદ્વૈ દેવયજનાદંગિરસઃ સુવર્ગં
લોકમાયન્નન્તરાહવનીયં ચ હવિર્ધાનં ચો

૩૨ ન્નતગ્ગ્ સ્યાદન્તરા હવિર્ધાનં ચ સદશ્ચાન્તરા સદશ્ચ ગાર્હપત્યં
ચૈતદ્વૈ ત્ર્યુન્નતં દેવયજનꣳ સુવર્ગમેવ લોકમેતિ પ્રતિષ્ઠિતે
દેવયજને યાજયેત્પ્રતિષ્ઠાકામમેતદ્વૈ પ્રતિષ્ઠિતં દેવયજનં
યથ્સર્વતઃ સમં પ્રત્યેવ તિષ્ઠતિ યત્રાન્યા અન્યા ઓષધયો
વ્યતિષક્તાઃ સ્યુસ્તદ્યાજયેત્પશુકામમેતદ્વૈ પશૂનાꣳ રૂપꣳ
રૂપેણૈવાસ્મૈ પશૂ

૩૩ નવ રુંધે પશુમાનેવ ભવતિ નિરૃતિગૃહીતે દેવયજને યાજયેદ્યં
કામયેત નિરૃત્યાસ્ય યજ્ઞં ગ્રાહયેયમિત્યેતદ્વૈ નિરૃતિગૃહીતં
દેવયજનં યથ્સદૃશ્યૈ સત્યા ઋક્ષં નિરૃત્યૈવાસ્ય યજ્ઞં
ગ્રાહયતિ વ્યાવૃત્તે દેવયજને યાજયેદ્વ્યાવૃત્કામં યં પાત્રે વા
તલ્પે વા મીમાꣳસેરન્પ્રાચીનમાહવનીયાત્પ્રવણગ્ગ્ સ્યાત્પ્રતીચીનં
ગાર્હપત્યાદેતદ્વૈ વ્યાવૃત્તં દેવયજનં વિ પાપ્મના ભ્રાતૃવ્યેણા
વર્તતે નૈનં પાત્રે ન તલ્પે મીમાꣳસન્તે કાર્યે દેવયજને
યાજયેદ્ભૂતિકામં કાર્ર્યો વૈ પુરુષો ભવત્યેવ ॥ ૬। ૨। ૬॥ યાતવૈ
હવિર્ધાનં ચ પશૂન્પાપ્મનાષ્ટાદશ ચ ॥ ૬। ૨। ૬॥
૩૪ તેભ્ય ઉત્તરવેદિઃ સિꣳહી રૂપં કૃત્વોભયાનન્તરાપક્રમ્યાતિષ્ઠત્તે
દેવા અમન્યન્ત યતરાન્, વા ઇયમુપાવર્થ્સ્યતિ ત ઇદં
ભવિષ્યન્તીતિ તામુપામન્ત્રયન્ત સાબ્રવીદ્વરં વૃણૈ સર્વાન્મયા
કામાન્વ્યશ્નવથ પૂર્વાં તુ માગ્નેરાહુતિરશ્નવતા ઇતિ તસ્માદુત્તરવેદિં
પૂર્વામગ્નેર્વ્યાઘારયન્તિ વારેવૃતગ્ગ્ હ્યસ્યૈ શમ્યયા પરિ મિમીતે
૩૫ માત્રૈવાસ્યૈ સાથો યુક્તેનૈવ યુક્તમવ રુંધે વિત્તાયની મેઽસીત્યાહ
વિત્તા હ્યેનાનાવત્તિક્તાયની મેઽસીત્યાહ તિક્તાન્ હ્યેનાનાવદવતાન્મા
નાથિતમિત્યાહ નાથિતાન્ હ્યેનાનાવદવતાન્મા વ્યથિતમિત્યાહ વ્યથિતાન્
હ્યેનાનાવદ્વિદેરગ્નિર્નભો નામા
૩૬ ઽગ્ને અઙ્ગિર ઇતિ ત્રિર્હરતિ ય એવૈષુ લોકેષ્વગ્નયસ્તાનેવાવ
રુંધે તૂષ્ણીં ચતુર્થꣳ હરત્યનિરુક્તમેવાવ રુંધે
સિꣳહીરસિ મહિષીરસીત્યાહ સિꣳહીર્હ્યેષા રૂપં
કૃત્વોભયાનન્તરાપક્રમ્યાતિષ્ઠદુરુ પ્રથસ્વોરુ તે યજ્ઞપતિઃ
પ્રથતામિત્યાહ યજમાનમેવ પ્રજયા પશુભિઃ પ્રથયતિ ધ્રુવા
૩૭ ઽસીતિ સꣳહન્તિ ધૃત્યૈ દેવેભ્યઃ શુન્ધસ્વ
દેવેભ્યઃ શુંભસ્વેત્યવ ચોક્ષતિ પ્ર ચ કિરતિ શુદ્ધ્યા
ઇન્દ્રઘોષસ્ત્વા વસુભિઃ પુરસ્તાત્પાત્વિત્યાહ દિગ્ભ્ય એવૈનાં પ્રોક્ષતિ
દેવાગ્શ્ચેદુત્તરવેદિરુપાવવર્તીહૈવ વિ જયામહા ઇત્યસુરા વજ્રમુદ્યત્ય

દેવાનભ્યાયન્ત તાનિન્દ્રઘોષો વસુભિઃ પુરસ્તાદપા
૩૮ ઽનુદત મનોજવાઃ પિતૃભિર્દક્ષિણતઃ પ્રચેતા રુદ્રૈઃ
પશ્ચાદ્વિશ્વકર્માદિત્યૈરુત્તરતો યદેવમુત્તરવેદિં પ્રોક્ષતિ દિગ્ભ્ય
એવ તદ્યજમાનો ભ્રાતૃવ્યાન્પ્રણુદત ઇન્દ્રો યતીન્થ્સાલાવૃકેભ્યઃ
પ્રાયચ્છત્તાન્દક્ષિણત ઉત્તરવેદ્યા આદન્ યત્પ્રોક્ષણીનામુચ્છિષ્યેત
તદ્દક્ષિણત ઉત્તરવેદ્યૈ નિ નયેદ્યદેવ તત્ર ક્રૂરં તત્તેન શમયતિ યં
દ્વિષ્યાત્તં ધ્યાયેચ્છુચૈવૈનમર્પયતિ ॥ ૬। ૨। ૭॥ મિમીતે નામ ધ્રુવાપ
શુચા ત્રીણિ ચ ॥ ૬। ૨। ૭॥
૩૯ સોત્તરવેદિરબ્રવીથ્સર્વાન્મયા કામાન્વ્યશ્નવથેતિ તે
દેવા અકામયન્તાસુરાન્ભ્રાતૃવ્યાનભિ ભવેમેતિ તેઽજુહવુઃ
સિँ હીરસિ સપત્નસાહી સ્વાહેતિ તેઽસુરાન્ભ્રાતૃવ્યાનભ્યભવન્તેઽ
સુરાન્ભ્રાતૃવ્યાનભિભૂયા કામયન્ત પ્રજાં વિન્દેમહીતિ તેઽજુહવુઃ
સિँ હીરસિ સુપ્રજાવનિઃ સ્વાહેતિ તે પ્રજામવિન્દન્ત તે પ્રજાં વિત્ત્વા
૪૦ ઽકામયન્ત પશૂન્, વિન્દેમહીતિ તેઽજુહવુઃ સિँ હીરસિ
રાયસ્પોષવનિઃ સ્વાહેતિ તે પશૂનવિન્દન્ત તે પશૂન્, વિત્ત્વાકામયન્ત
પ્રતિષ્ઠાં વિન્દેમહીતિ તેઽજુહવુઃ સિँ હીરસ્યાદિત્યવનિઃ સ્વાહેતિ ત
ઇમાં પ્રતિષ્ઠામવિન્દન્ત ત ઇમાં પ્રતિષ્ઠાં વિત્ત્વાકામયન્ત દેવતા
આશિષ ઉપેયામેતિ તેઽજુહવુઃ સિँ હીરસ્યા વહ દેવાન્દેવયતે
૪૧ યજમાનાય સ્વાહેતિ તે દેવતા આશિષ ઉપાયન્પઞ્ચ કૃત્વો
વ્યાઘારયતિ પઞ્ચાક્ષરા પઙ્ક્તિઃ પાઙ્ક્તો યજ્ઞો યજ્ઞમેવાવ
રુંધેઽક્ષ્ણયા વ્યાઘારયતિ તસ્માદક્ષ્ણયા પશવોઽઙ્ગાનિ પ્ર હરન્તિ
પ્રતિષ્ઠિત્યૈ ભૂતેભ્યસ્ત્વેતિ સ્રુચમુદ્ગૃહ્ણાતિ ય એવ દેવા ભૂતાસ્તેષાં
તદ્ભાગધેયં તાનેવ તેન પ્રીણાતિ પૌતુદ્રવાન્પરિધીન્પરિ દધાત્યેષાં
૪૨ લોકાનાં વિધૃત્યા અગ્નેસ્ત્રયો જ્યાયાँસો ભ્રાતર આસન્તે દેવેભ્યો
હવ્યં વહન્તઃ પ્રામીયન્ત સોઽગ્નિરબિભેદિત્થં વાવ સ્ય આર્તિમારિષ્યતીતિ
સ નિલાયત સ યાં વનસ્પતિષ્વવસત્તાં પૂતુદ્રૌ યામોષધીષુ તાँ
સુગન્ધિતેજને યાં પશુષુ તાં પેત્વસ્યાન્તરા શૃઙ્ગે તં દેવતાઃ

પ્રૈષમૈચ્છન્તમન્વવિન્દન્તમબ્રુવ
૪૩ ન્નુપ ન આ વર્તસ્વ હવ્યં નો વહેતિ સોઽબ્રવીદ્વરં વૃણૈ
યદેવ ગૃહીતસ્યાહુતસ્ય બહિઃ પરિધિ સ્કન્દાત્તન્મે ભ્રાતૃણાં
ભાગધેયમસદિતિ તસ્માદ્યદ્ગૃહીતસ્યાહુતસ્ય બહિઃ પરિધિ સ્કન્દતિ
તેષાં તદ્ભાગધેયં તાનેવ તેન પ્રીણાતિ સોઽમન્યતાસ્થન્વન્તો મે
પૂર્વે ભ્રાતરઃ પ્રામેષતાસ્થાનિ શાતયા ઇતિ સ યાન્ય
૪૪ સ્થાન્યશાતયત તત્પૂતુદ્રવભવદ્યન્મા ँ સમુપમૃતં
તદ્ગુલ્ગુલુ યદેતાન્થ્સંભારાન્થ્સંભરત્યગ્નિમેવ તથ્સંભરત્યગ્નેઃ
પુરીષમસીત્યાહાગ્નેર્હ્યેતત્પુરીષં યથ્સંભારા અથો ખલ્વાહુરેતે
વાવૈનં તે ભ્રાતરઃ પરિ શેરે યત્પૌતુદ્રવાઃ પરિધય ઇતિ ॥ ૬। ૨। ૮॥
વિત્વા દેવયત એષામબ્રુવન્ યાનિ ચતુશ્ચત્વારિँ શચ્ચ ॥ ૬। ૨। ૮॥
૪૫ બદ્ધમવ સ્યતિ વરુણપાશાદેવૈને મુઞ્ચતિ પ્રણેનેક્તિ મેધ્યે
એવૈને કરોતિ સાવિત્રિયર્ચા હુત્વા હવિર્ધાને પ્ર વર્તયતિ સવિતૃપ્રસૂત
એવૈને પ્ર વર્તયતિ વરુણો વા એષ દુર્વાગુભયતો બદ્ધો યદક્ષઃ
સ યદુથ્સર્જેદ્યજમાનસ્ય ગૃહાનભ્યુથ્સર્જેથ્સુવાગ્દેવ દુર્યા ँ
આ વદેત્યાહ ગૃહા વૈ દુર્યાઃ શાન્ત્યૈ પત્ન્યુ
૪૬ પાનક્તિ પત્ની હિ સર્વસ્ય મિત્રં મિત્રત્વાય યદ્વૈ પત્ની યજ્ઞસ્ય
કરોતિ મિથુનં તદથો પત્નિયા એવૈષ યજ્ઞસ્યાન્વારંભોનવચ્છિત્ત્યૈ
વર્ત્મના વા અન્વિત્ય યજ્ઞ ँ રક્ષા ँસિ જિઘા ँ સન્તિ
વૈષ્ણવીભ્યામૃગ્ભ્યાં વર્ત્મનોર્જુહોતિ યજ્ઞો વૈ વિષ્ણુર્યજ્ઞાદેવ
રક્ષાગ્ સ્યપ હન્તિ યદધ્વર્યુરનગ્નાવાહુતિં જુહુયાદન્ધોઽધ્વર્યુઃ
સ્યાદ્રક્ષા ँસિ યજ્ઞ ँ હન્યુર્
૪૭ હિરણ્યમુપાસ્ય જુહોત્યગ્નિવત્યેવ જુહોતિ નાન્ધોઽધ્વર્યુર્ભવતિ ન
યજ્ઞ ँ રક્ષા ँસિ ઘ્નન્તિ પ્રાચી પ્રેતમધ્વરં કલ્પયન્તી ઇત્યાહ
સુવર્ગમેવૈને લોકં ગમયત્યત્ર રમેથાં વર્ષ્મન્પૃથિવ્યા ઇત્યાહ
વર્ષ્મ હ્યેતત્પૃથિવ્યા યદ્દેવયજન ँ શિરો વા એતદ્યજ્ઞસ્ય
યદ્ધવિર્ધાનં દિવો વા વિષ્ણવુત વા પૃથિવ્યા

૪૮ ઇત્યાશીર્પદયર્ચા દક્ષિણસ્ય હવિર્ધાનસ્ય મેથીં નિ હન્તિ
શીર્ષત એવ યજ્ઞસ્ય યજમાન આશિષોઽવ રુંધે દણ્ડો વા
ઔપરસ્તૃતીયસ્ય હવિર્ધાનસ્ય વષટ્કારેણાક્ષમચ્છિનદ્યત્તૃતીયં
છદિર્હવિર્ધાનયોરુદાહ્રિયતે તૃતીયસ્ય હવિર્ધાનસ્યાવરુદ્ધ્યૈ
શિરો વા એતદ્યજ્ઞસ્ય યદ્ધવિર્ધાનં વિષ્ણો રરાટમસિ વિષ્ણોઃ
પૃષ્ઠમસીત્યાહ તસ્માદેતાવદ્ધા શિરો વિષ્યૂતં વિષ્ણોઃ સ્યૂરસિ
વિષ્ણોર્ધ્રુવમસીત્યાહ વૈષ્ણવꣳ હિ દેવતયા હવિર્ધાનં યં પ્રથમં
ગ્રન્થિં ગ્રથ્નીયાદ્યત્તં ન વિસ્રꣳ સયેદમેહેનાધ્વર્યુઃ પ્ર મીયેત
તસ્માથ્સ વિસ્રસ્યઃ ॥ ૬। ૨। ૯॥ પત્ની હન્યુર્વા પૃથિવ્યા વિષ્યૂતં વિષ્ણોઃ
ષડ્વિꣳશતિશ્ચ ॥ ૬। ૨। ૯॥

૪૯ દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇત્યભ્રિમા દત્તે પ્રસૂત્યા
અશ્વિનોર્બાહુભ્યામિત્યાહાશ્વિનૌ હિ દેવાનામધ્વર્યૂ આસ્તાં પૂષ્ણો
હસ્તાભ્યામિત્યાહ યત્યૈ વજ્ર ઇવ વા એષા યદભ્રિરભ્રિરસિ
નારિરસીત્યાહ શાન્ત્યૈ કાણ્ડેકાણ્ડે વૈ ક્રિયમાણે યજ્ઞꣳ રક્ષાꣳસિ
જિઘાꣳસન્તિ પરિલિખિતꣳ રક્ષઃ પરિલિખિતા અરાતય ઇત્યાહ
રક્ષસામપહત્યા

૫૦ ઇદમહꣳ રક્ષસો ગ્રીવા અપિ કૃન્તામિ યોઽસ્માન્દ્વેષ્ટિ યં ચ વયં
દ્વિષ્મ ઇત્યાહ દ્વૌ વાવ પુરુષૌ યં ચૈવ દ્વેષ્ટિ યશ્ચૈનં દ્વેષ્ટિ
તયોરેવાનન્તરાયં ગ્રીવાઃ કૃન્તતિ દિવે ત્વાન્તરિક્ષાય ત્વા પૃથિવ્યૈ
ત્વેત્યાહૈભ્ય એવૈનાં લોકેભ્યઃ પ્રોક્ષતિ પરસ્તાદર્વાચીં પ્રોક્ષતિ
તસ્માત્

૫૧ પરસ્તાદર્વાચીં મનુષ્યા ઊર્જમુપ જીવન્તિ ક્રૂરમિવ વા એતત્કરોતિ
યત્ખનત્યપોઽવ નયતિ શાન્ત્યૈ યવમતીરવ નયત્યૂર્ગ્વૈ યવ
ઊર્ગુદુંબર ઊર્જૈવોર્જꣳ સમર્ધયતિ યજમાનેન સં મિતૌદુંબરી
ભવતિ યાવાનેવ યજમાનસ્તાવતીમેવાસ્મિન્નૂર્જં દધાતિ પિતૃણાꣳ
સદનમસીતિ બર્હિરવ સ્તૃણાતિ પિતૃદેવત્યાઽ અગ્ગ્

પર હ્યેતદ્યન્નિખાતં યદ્બર્હિરનવસ્તીર્યં મિનુયાત્પિતૃદેવત્યા નિખાતા
સ્યાદ્બર્હિરવસ્તીર્ય મિનોત્યસ્યામેવૈનાં મિનોત્યથો સ્વારુહમેવૈનાં
કરોત્યુદ્દિવગ્ગ્ સ્તભાનાન્તરિક્ષં પૃણેત્યાહૈષાં લોકાનાં વિધૃત્યૈ
દ્યુતાનસ્ત્વા મારુતો મિનોત્વિત્યાહ દ્યુતાનો હ સ્મ વૈ મારુતો
દેવાનામૌદુંબરીં મિનોતિ તેનૈવૈ

પ૩ નાં મિનોતિ બ્રહ્મવનિં ત્વા ક્ષત્રવનિમિત્યાહ યથાયજુરેવૈ તદ્ઘૃતેન
દ્યાવાપૃથિવી આ પૃણેથામિત્યૌદુંબર્યાં જુહોતિ દ્યાવાપૃથિવી એવ
રસેનાનક્ત્યાન્તમન્વવસ્રાવયત્યાન્તમેવ યજમાનં તેજસાનક્ત્યૈન્દ્રમસીતિ
છદિરધિ નિ દધાત્યૈન્દ્રઁ હિ દેવતયા સદો વિશ્વજનસ્ય છાયેત્યાહ
વિશ્વજનસ્ય હ્યેષા છાયા યથ્સદો નવછદિ

પ૪ તેજસ્કામસ્ય મિનુયાત્ત્રિવૃતા સ્તોમેન સં મિતં તેજસ્ત્રિવૃત્તેજસ્વ્યેવ
ભવત્યેકાદશ છદીન્દ્રિય કામસ્યૈકા દશાક્ષરા ત્રિષ્ટુગિન્દ્રિયં
ત્રિષ્ટુગિન્દ્રિયાવ્યેવ ભવતિ પઞ્ચદશ છદિ ભ્રાતૃવ્યવતઃ પઞ્ચદશો
વજ્રો ભ્રાતૃવ્યાભિભૂત્યૈ સપ્તદશ છદિ પ્રજાકામસ્ય સપ્તદશઃ પ્રજાપતિઃ
પ્રજાપતેરાપ્ત્યા એકવિઁશતિ છદિ પ્રતિષ્ઠાકામસ્યૈકવિઁશઃ
સ્તોમાનાં પ્રતિષ્ઠા પ્રતિષ્ઠિત્યા ઉદરં વૈ સદ ઊર્ગુદુંબરો મધ્યત
ઔદુંબરીં મિનોતિ મધ્યત એવ પ્રજાનામૂર્જં દધાતિ તસ્મા

પપ ન્મધ્યત ઊર્જા ભુઞ્જતે યજમાનલોકે વૈ દક્ષિણાનિ
છદીઁષિ ભ્રાતૃવ્યલોક ઉત્તરાણિ દક્ષિણાન્યુત્તરાણિ
કરોતિ યજમાનમેવાયજમાનાદુત્તરં કરોતિ તસ્માદ્યજમાનોઽ
યજમાનાદુત્તરોઽન્તર્વર્તાન્કરોતિ વ્યાવૃત્ત્યૈ તસ્માદરણ્યં પ્રજા
ઉપ જીવન્તિ પરિ ત્વા ગિર્વણો ગિર ઇત્યાહ યથાયજુરેવૈતદિન્દ્રસ્ય
સ્યૂરસીન્દ્રસ્ય ધ્રુવમસીત્યાહૈન્દ્રઁ હિ દેવતયા સદો યં પ્રથમં
ગ્રન્થિં ગ્રથ્નીયાદ્યત્તં ન વિસ્રઁસયેદમેહેનાધ્વર્યુઃ પ્ર મીયેત
તસ્માથ્સ વિસ્રસ્યઃ ॥ ૬। ૨। ૧૦॥ અપહત્યૈ તસ્માત્પિતૃદેવત્યં તેનૈવ
નવછદિ તસ્માથ્સદઃ પંચદશ ચ ॥ ૬। ૨। ૧૦॥

પ૬ શિરો વા એતદ્યજ્ઞસ્ય યદ્ધવિર્ધાનં પ્રાણા ઉપરવા હવિર્ધાને

ખાયન્તે તસ્માચ્છીર્ષન્પ્રાણા અધસ્તાત્ખાયન્તે તસ્માદધસ્તાચ્છીર્ષણઃ
પ્રાણા રક્ષોહણો વલગહનો વૈષ્ણવાન્ખનામીત્યાહ વૈષ્ણવા
હિ દેવતયોપરવા અસુરા વૈ નિર્યન્તો દેવાનાં પ્રાણેષુ
વલગાન્ન્યખનન્તાન્બાહુમાત્રેઽન્વવિન્દન્તસ્માદ્બાહુમાત્રાઃ ખાયન્ત ઇદમહં
તં વલગમુદ્વપામિ

૫૭ યં નઃ સમાનો યમસમાનો નિચખાનેત્યાહ દ્વૌ વાવ પુરુષૌ યશ્ચૈવ
સમાનો યશ્ચાસમાનો યમેવાસ્મૈ તૌ વલગં નિખનતસ્તમેવોદ્વપતિ
સં તૃણત્તિ તસ્માત્સંતૃણ્ણા અન્તરતઃ પ્રાણા ન સંભિનત્તિ
તસ્માદસંભિન્નાઃ પ્રાણા અપોઽવ નયતિ તસ્માદાર્દ્રા અન્તરતઃ પ્રાણા
યવમતીરવ નય

૫૮ ત્યૂર્ગ્વૈ યવઃ પ્રાણા ઉપરવાઃ પ્રાણેષ્વેવોર્જં દધાતિ
બર્હિરવ સ્તૃણાતિ તસ્માલ્લોમશા અન્તરતઃ પ્રાણા આજ્યેન વ્યાઘારયતિ
તેજો વા આજ્યં પ્રાણા ઉપરવાઃ પ્રાણેષ્વેવ તેજો દધાતિ હનૂ વા એતે
યજ્ઞસ્ય યદધિષવણે ન સં તૃણત્ત્યસંતૃણ્ણે હિ હનૂ અથો ખલુ
દીર્ઘસોમે સંતૃદ્યે ધૃત્યૈ શિરો વા એતદ્યજ્ઞસ્ય યદ્ધવિર્ધાનં

૫૯ પ્રાણા ઉપરવા હનૂ અધિષવણે જિહ્વા ચર્મ ગ્રાવાણો દન્તા
મુખમાહવનીયો નાસિકોત્તરવેદિરુદર ँ સદો યદા ખલુ વૈ જિહ્વયા
દથ્સ્વધિ ખાદત્યથ મુખં ગચ્છતિ યદા મુખં ગચ્છત્યથોદરં
ગચ્છતિ તસ્માદ્ધવિર્ધાને ચર્મન્નધિ ગ્રાવભિરભિષુત્યાહવનીયે
હુત્વા પ્રત્યઞ્ચઃ પરેત્ય સદસિ ભક્ષયન્તિ યો વૈ વિરાજો યજ્ઞમુખે
દોહં વેદ દુહ એવૈનામિયં વૈ વિરાટ્ તસ્યૈ ત્વક્ચર્મોધોઽધિષવણે
સ્તના ઉપરવા ગ્રાવાણો વથ્સા ઋત્વિજો દુહન્તિ સોમઃ પયો ય એવં વેદ
દુહ એવૈનામ્ ॥ ૬। ૨। ૧૧॥ વપામિ યવમતીરવ નયતિ હવિર્ધાનમેવ
ત્રયોવિ ँ શતિશ્ચ ॥ ૬। ૨। ૧૧॥

યદુભૌ દેવાસુરા મિથસ્તેષા ँ સુવર્ગં યદ્વા અનીશાનઃ પુરો હવિષિ
તેભ્યઃ સોત્તરવેદિર્બદ્ધં દેવસ્યાભ્રિ ँ વજ્ઞઃ શિરો વા એકાદશ ॥
યદુભાવિત્યાહ દેવાનાં યજ્ઞો દેવેભ્યો ન રથાય યજમાનાય

પરસ્તાદર્વાચીં નવ પંચાશત્ ॥
યદુભૌ દુહ એવૈનામ્ ॥

## ષષ્ઠકાણ્ડે તૃતીયઃ પ્રશ્નઃ 3

૧ ચાત્વાલાદ્ધિષ્ણિયાનુપ વપતિ યોનિર્વૈ યજ્ઞસ્ય ચાત્વાલં યજ્ઞસ્ય
સયોનિત્વાય દેવા વૈ યજ્ઞં પરાજયન્ત તમાગ્નીધ્રાત્પુનરપાજયન્નેતદ્વૈ
યજ્ઞસ્યાપરાજિતં યદાગ્નીધ્રં યદાગ્નીધ્રાદ્ધિષ્ણિયાન્, વિહરતિ
યદેવ યજ્ઞસ્યાપરાજિતં તત એવૈનં પુનસ્તનુતે પરાજિત્યેવ ખલુ
વા એતે યન્તિ યે બહિષ્પવમાનꣳ સર્પન્તિ બહિષ્પવમાને સ્તુત
૨ આહાગ્નીદગ્નીન્, વિહર બર્હિઃ સ્તૃણાહિ પુરોડાશાꣳ અલં કુર્વિતિ
યજ્ઞમેવાપજિત્ય પુનસ્તન્વાના યન્ત્યઙ્ગારૈર્દ્વે સવને વિ હરતિ
શલાકાભિસ્તૃતીયꣳસશુક્રત્વાયાથો સંભરત્યેવૈનદ્ધિષ્ણિયા વા
અમુષ્મિꣳલ્લોકે સોમમરક્ષન્તેભ્યોઽધિ સોમમાહરન્તમન્વવાયન્તં
પર્યવિશન્, ય એવં વેદ વિન્દતે
૩ પરિવેષ્ટારં તે સોમપીથેન વ્યાર્ધ્યન્ત તે દેવેષુ સોમપીથમૈચ્છન્ત
તાન્દેવા અબ્રુવન્દ્વેદ્વે નામની કુરુધ્વમથ પ્ર વાપ્સ્યથ ન વેત્યગ્નયો
વા અથ ધિષ્ણિયાસ્તસ્માદ્દ્વિનામા બ્રાહ્મણોઽર્ધુકસ્તેષાં યે નેદિષ્ઠં
પર્યવિશન્તે સોમપીથં પ્રાપ્નુવન્નાહવનીય આગ્નીધ્રીયો હોત્રીયો
માર્જાલીયસ્તસ્માત્તેષુ જુહ્વત્યતિહાય વષટ્ કરોતિ વિ હ્યે
૪ તે સોમપીથેનાર્ધ્યન્ત દેવા વૈ યાઃ પ્રાચીરાહુતીરજુહવુર્યે
પુરસ્તાદસુરા આસન્તાꣳસ્તાભિઃ પ્રાણુદન્ત યાઃ પ્રતીચીર્યે પશ્ચાદસુરા
આસન્તાꣳસ્તાભિરપાનુદન્ત પ્રાચીરન્યા આહુતયો હૂયન્તે પ્રત્યઙ્ઙાસીનો
ધિષ્ણિયાન્વ્યાઘારયતિ પશ્ચાચ્ચૈવ પુરસ્તાચ્ચ યજમાનો
ભ્રાતૃવ્યાન્ પ્રણુદતે તસ્માત્પરાચીઃ પ્રજાઃ પ્ર વીયન્તે પ્રતીચી
૫ ર્જાયન્તે પ્રાણા વા એતે યદ્ધિષ્ણિયા યદધ્વર્યુઃ પ્રત્યઙ્
ધિષ્ણિયાનતિસર્પેત્પ્રાણાન્થ્સં કર્ષેત્પ્રમાયુકઃ સ્યાન્નાભિર્વા

એષા યજ્ઞસ્ય  યદ્ધોતોર્ધ્વઃ ખલુ  વૈ નાભ્યૈ  પ્રાણોઽવાઙ્પાનો
યદધ્વર્યુઃ પ્રત્યઙ્ હોતારમતિસર્પેદપાને પ્રાણં દધ્યાત્પ્રમાયુકઃ
સ્યાન્નાધ્વર્યુરુપ  ગાયેદ્વાગ્વીર્યો  વા અધ્વર્યુર્યદધ્વર્યુરુપ
ગાયેદુદ્ગાત્રે
૬ વાચઁ  સં પ્ર યચ્છેદુપદાસુકાસ્ય  વાક્સ્યાદ્બ્રહ્મવાદિનો  વદન્તિ
નાસગ્ગ્સ્થિતે  સોમેઽધ્વર્યુઃ પ્રત્યઙ્ખ્સદોઽતીયાદથ  કથા દાક્ષિણાનિ
હોતુમેતિ  યામો  હિ સ તેષાં  કસ્મા  અહ  દેવા યામં  વાયામં  વાનુ
જ્ઞાસ્યન્તીત્યુત્તરેણાગ્નીધ્રં પરીત્ય  જુહોતિ દાક્ષિણાનિ  ન પ્રાણાન્થ્સં
કર્ષતિ  ન્યન્યે ધિષ્ણિયા ઉપ્યન્તે  નાન્યે યાન્નિવપતિ  તેન  તાન્પ્રીણાતિ
યાન્ન નિવપતિ  યદનુદિશતિ  તેન  તાન્ ॥ ૬। ૩। ૧॥ સ્તુતે વિન્દતે  હિ
વીયન્તે પ્રતીચીરુદ્ગાત્ર ઉપ્યન્તે  ચતુર્દશ ચ ॥ ૬। ૩। ૧॥
૭ સુવર્ગાય  વા એતાનિ  લોકાય  હૂયન્તે  યદ્વૈસર્જનાનિ  દ્વાભ્યાં  ગાર્હપત્યે
જુહોતિ દ્વિપાદ્યજમાનઃ  પ્રતિષ્ઠિત્યા  આગ્નીધ્રે જુહોત્યન્તરિક્ષ એવા ક્રમત
આહવનીયે  જુહોતિ સુવર્ગમેવૈનં  લોકં ગમયતિ દેવાન્, વૈ સુવર્ગં લોકં
યતો રક્ષાગ્સ્યજિઘાઁસન્તે સોમેન  રાજ્ઞા  રક્ષાગ્સ્યપહત્યાપ્સુમાત્માનં
કૃત્વા સુવર્ગં લોકમાયન્રક્ષસામનુપલાભાયાત્તઃ  સોમો  ભવત્યથ
૮ વૈસર્જનાનિ  જુહોતિ  રક્ષસામપહત્યૈ  ત્વઁ સોમ તનૂકૃદ્ભ્ય
ઇત્યાહ તનૂકૃદ્ધ્યેષ દ્વેષોભ્યોઽન્યકૃતેભ્ય  ઇત્યાહાન્યકૃતાનિ  હિ
રક્ષાગ્સ્યુરુ યન્તાસિ  વરૂથમિત્યાહોરુણસ્કૃધીતિ  વાવૈતદાહ જુષાણો
અપ્તુરાજ્યસ્ય વેત્વિત્યાહાપ્સુમેવ યજમાનં કૃત્વા સુવર્ગં લોકં ગમયતિ
રક્ષસામનુપલાભાયા સોમં  દદત
૯ આ ગ્રાવણ  આ વાયવ્યાન્યા દ્રોણકલશમુત્પત્નીમા નયન્ત્યન્વનાઁસિ
પ્ર વર્તયન્તિ  યાવદેવાસ્યાસ્તિ  તેન  સહ સુવર્ગં લોકમેતિ
નયવત્યર્ચાગ્નીધ્રે જુહોતિ સુવર્ગસ્ય  લોકસ્યાભિનીત્યૈ  ગ્રાવણો
વાયવ્યાનિ દ્રોણકલશમાગ્નીધ્ર  ઉપ  વાસયતિ  વિ હ્યેનં  તૈર્ગૃહ્ણતે
યથ્સહોપવાસયેદપુવાયેત  સૌમ્યર્ચા પ્ર પાદયતિ  સ્વયૈ
૧૦ વૈનં  દેવતયા  પ્ર પાદયત્યદિત્યાઃ  સદોઽસ્યદિત્યાઃ  સદ  આ

સીદેત્યાહ યથાયજુરેવૈતદ્યજમાનો વા એતસ્ય પુરા ગોપ્તા ભવત્યેષ
વો દેવ સવિતઃ સોમ ઇત્યાહ સવિતૃપ્રસૂત એવૈનં દેવતાભ્યઃ સં પ્ર
યચ્છત્યેતત્ત્વꣳ સોમ દેવો દેવાનુપાગા ઇત્યાહ દેવો હ્યેષ સ
૧૧ ન્દેવાનુપૈતીદમહં મનુષ્યો મનુષ્યાનિત્યાહ મનુષ્યો ૨
હ્યેષ સન્મનુષ્યાનુપૈતિ યદેતદ્યજુર્ન બ્રૂયાદપ્રજા અપશુર્યજમાનઃ
સ્યાથ્સહ પ્રજયા સહ રાયસ્પોષેણેત્યાહ પ્રજયૈવ પશુભિઃ સહેમં
લોકમુપાવર્તતે નમો દેવેભ્ય ઇત્યાહ નમસ્કારો હિ દેવાનાગ્ં સ્વધા
પિતૃભ્ય ઇત્યાહ સ્વધાકારો હિ
૧૨ પિતૃણામિદમહં નિર્વરુણસ્ય પાશાદિત્યાહ વરુણપાશાદેવ
નિર્મુચ્યતેઽગ્ને વ્રતપત આત્મનઃ પૂર્વા તનૂરાદેયેત્યાહુઃ કો હિ તદ્વેદ
યદ્વસીયાન્થ્સ્વે વશે ભૂતે પુનર્વા દદાતિ ન વેતિ ગ્રાવાણો વૈ સોમસ્ય
રાજ્ઞો મલિમ્લુસેના ય એવં વિદ્વાન્ગ્રાવણ આગ્નીધ્ર ઉપવાસયતિ નૈનં
મલિમ્લુસેના વિન્દતિ ॥ ૬। ૩। ૨॥ અથ દદતે સ્વયા સન્થ્સ્વધાકારો હિ વિન્દતિ ॥
૬। ૩। ૨॥
૧૩ વૈષ્ણવ્યર્ચા હુત્વા યૂપમચ્છૈતિ વૈષ્ણવો વૈ દેવતયા યૂપઃ
સ્વયૈવૈનં દેવતયાચ્છૈત્યત્યન્યાનગાં નાન્યાનુપાગામિત્યાહાતિ
હ્યન્યાનેતિ નાન્યાનુપૈત્યર્વાક્ત્વા પરૈરવિદં પરોવરૈરિત્યાહાર્વાગ્ઘ્યેનં
પરૈર્વિન્દતિ પરોવરૈસ્તં ત્વા જુષે
૧૪ વૈષ્ણવં દેવયજ્યાયા ઇત્યાહ દેવયજ્યાયૈ હ્યેનં જુષતે દેવસ્ત્વા
સવિતા મધ્વાનક્ત્વિત્યાહ તેજસૈવૈનમનક્ત્યોષધે ત્રાયસ્વૈનગ્ં
સ્વધિતે મૈનꣳ હિꣳ સીરિત્યાહ વજ્રો વૈ સ્વધિતિઃ શાન્ત્યૈ
સ્વધિતેર્વૃક્ષસ્ય બિભ્યતઃ પ્રથમેન શકલેન સહ તેજઃ પરા પતતિ
યઃ પ્રથમઃ શકલઃ પરાપતેત્તમપ્યા હરેથ્સતેજસ
૧૫ મેવૈનમાહરતીમે વૈ લોકા યૂપાત્પ્રયતો બિભ્યતિ દિવમગ્રેણ
મા લેખીરન્તરિક્ષં મધ્યેન મા હિꣳસીરિત્યાહૈભ્ય એવૈનં
લોકેભ્યઃ શમયતિ વનસ્પતે શતવલ્શો વિ રોહેત્યાવ્રશ્ચને જુહોતિ
તસ્માદાવ્રશ્ચનાદ્વૃક્ષાણાં ભૂયાꣳસ ઉત્તિષ્ઠન્તિ સહસ્રવલ્શા

વિ વયꣳ રુહેમેત્યાહાશિષમેવૈતામા શાસ્તેઽનક્ષસઙ્ગં
૧૬ વૃશ્ચેદ્ધદક્ષસઙ્ગં વૃશ્ચેદધ ઈષં યજમાનસ્ય
પ્રમાયુકગ્ગ્ સ્યાદ્યં કામયેતાપ્રતિષ્ઠિતઃ સ્યાદિત્યારોહં તસ્મૈ
વૃશ્ચેદેષ વૈ વનસ્પતીનામપ્રતિષ્ઠિતોઽપ્રતિષ્ઠિત એવ ભવતિ
યં કામયેતાપશુઃ સ્યાદિત્યપર્ણં તસ્મૈ શુષ્કાગ્રં વૃશ્ચેદેષ વૈ
વનસ્પતીનામપશવ્યોઽપશુરેવ ભવતિ યં કામયેત પશુમાન્થ્સ્યાદિતિ
બહુપર્ણં તસ્મૈ બહુશાખં વૃશ્ચેદેષ વૈ
૧૭ વનસ્પતીનાં પશવ્યઃ પશુમાનેવ ભવતિ પ્રતિષ્ઠિતં
વૃશ્ચેત્પ્રતિષ્ઠાકામસ્યૈષ વૈ વનસ્પતીનાં પ્રતિષ્ઠિતો યઃ સ
મે ભૂમ્યૈ સ્વાદ્યોને રૂઢઃ પ્રત્યેવ તિષ્ઠતિ યઃ પ્રત્યઙ્ઙુપનતસ્તં
વૃશ્ચેથ્સ હિ મેધમભ્યુપનતઃ પઞ્ચારત્નિં તસ્મૈ વૃશ્ચેદ્યં
કામયેતોપૈનમુત્તરો યજ્ઞો નમેદિતિ પઞ્ચાક્ષરા પઙ્ક્તિઃ પાઙ્ક્તો
યજ્ઞ ઉપૈનમુત્તરો યજ્ઞો
૧૮ નમતિ ષડરત્નિં પ્રતિષ્ઠાકામસ્ય ષડ્વા ઋતવ ઋતુષ્વેવ પ્રતિ
તિષ્ઠતિ સપ્તારત્નિં પશુકામસ્ય સપ્તપદા શક્વરી પશવઃ શક્વરી
પશૂનેવાવ રુંધે નવારત્નિં તેજસ્કામસ્ય ત્રિવૃતા સ્તોમેન સં મિતં
તેજસ્ત્રિવૃત્તેજસ્વ્યેવ ભવત્યેકાદશારત્નિમિન્દ્રિયકામસ્યૈકાદશાક્ષરા
ત્રિષ્ટુગિન્દ્રિયં ત્રિષ્ટુગિન્દ્રિયાવ્યેવ ભવતિ પઞ્ચદશારત્નિં
ભ્રાતૃવ્યવતઃ પઞ્ચદશો વજ્રો ભ્રાતૃવ્યાભિભૂત્યૈ સપ્તદશારત્નિં
પ્રજાકામસ્ય સપ્તદશઃ પ્રજાપતિઃ પ્રજાપતેરાપ્ત્યા એકવિꣳશત્યરત્નિં
પ્રતિષ્ઠાકામસ્યૈકવિꣳશઃ સ્તોમાનાં પ્રતિષ્ઠા પ્રતિષ્ઠિત્યા
અષ્ટાશ્રિર્ભવત્યષ્ટાક્ષરા ગાયત્રી તેજો ગાયત્રી ગાયત્રી યજ્ઞમુખં
તેજસૈવ ગાયત્રિયા યજ્ઞમુખેન સં મિતઃ ॥ ૬। ૩। ૩॥ જુષે
સતેજસમનક્ષસંગં બહુશાખં વૃશ્ચેદેષ વૈ યજ્ઞ ઉપૈનમુત્તરો
યજ્ઞ આપ્ત્યા એકાન્ન વિꣳશતિશ્ચ ॥ ૬। ૩। ૩॥
૧૯ પૃથિવ્યૈ ત્વાન્તરિક્ષાય ત્વા દિવે ત્વેત્યાહૈભ્ય એવૈનં લોકેભ્યઃ
પ્રોક્ષતિ પરાઞ્ચં પ્રોક્ષતિ પરાઙિવ હિ સુવર્ગો લોકઃ ક્રૂરમિવ

વા એતત્કરોતિ યત્ખનત્યપોવ નયતિ શાન્ત્યૈ યવમતીરવ નયત્યૂર્ગ્વૈ
યવો યજમાનેન યૂપઃ સં મિતો યાવાનેવ યજમાનસ્તાવતીમેવાસ્મિન્નૂર્જં
દધાતિ

૨૦ પિતૃણાઁ સદનમસીતિ બર્હિરવ સ્તૃણાતિ પિતૃદેવત્યા અગ્ગ્
હ્યેતદ્યન્નિખાતં યદ્બર્હિરનવસ્તીર્ય મિનુયાત્પિતૃદેવત્યો નિખાતઃ
સ્યાદ્બર્હિરવસ્તીર્ય મિનોત્યસ્યામેવૈનં મિનોતિ યૂપશકલમવાસ્યતિ
સતેજસમેવૈનં મિનોતિ દેવસ્ત્વા સવિતા મધ્વાનક્ત્વિત્યાહ
તેજસૈવૈનમનક્તિ સુપિપ્પલાભ્યસ્ત્વૌષધીભ્ય ઇતિ ચષાલં પ્રતિ

૨૧ મુઞ્ચતિ તસ્માચ્છીર્ષત ઓષધયઃ ફલં ગૃહ્ણન્ત્યનક્તિ તેજો
વા આજ્યં યજમાનેનાગ્નિષ્ઠાશ્રિઃ સં મિતા યદગ્નિષ્ઠામશ્રિમનક્તિ
યજમાનમેવ તેજસાનક્ત્યાન્તમનક્ત્યાન્તમેવ યજમાનં તેજસાનક્તિ સર્વતઃ
પરિ મૃશત્યપરિવર્ગમેવાસ્મિન્તેજો દધાત્યુદ્દિવગ્ગ્ સ્તભાનાન્તરિક્ષં
પૃણેત્યાહૈષાં લોકાનાં વિધૃત્યૈ વૈષ્ણવ્યર્ચા

૨૨ કલ્પયતિ વૈષ્ણવો વૈ દેવતયા યૂપઃ સ્વયૈવૈનં દેવતયા કલ્પયતિ
દ્વાભ્યાં કલ્પયતિ દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યૈ યં કામયેત તેજસૈનં
દેવતાભિરિન્દ્રિયેણ વ્યર્ધયેયમિત્યગ્નિષ્ઠાં તસ્યાશ્રિમાહવનીયાદિત્થં
વેત્થં વાતિ નાવયેત્તેજસૈવૈનં દેવતાભિરિન્દ્રિયેણ વ્યર્ધયતિ
યં કામયેત તેજસૈનં દેવતાભિરિન્દ્રિયેણ સમર્ધયેયમિત્ય

૨૩ ગ્નિષ્ઠાં તસ્યાશ્રિમાહવનીયેન સં મિનુયાત્તેજસૈવૈનં
દેવતાભિરિન્દ્રિયેણ સમર્ધયતિ બ્રહ્મવનિં ત્વા ક્ષત્રવનિમિત્યાહ
યથાયજુરેવૈતત્પરિ વ્યયત્યૂર્ગ્વૈ રશના યજમાનેન યૂપઃ સં મિતો
યજમાનમેવોર્જા સમર્ધયતિ નાભિદઘ્ને પરિ વ્યયતિ નાભિદઘ્ન એવાસ્મા
ઊર્જં દધાતિ તસ્માન્નાભિદઘ્ન ઊર્જા ભુઞ્જતે યં કામયેતોર્જૈનં

૨૪ વ્યર્ધયેયમિત્યૂર્ધ્વાં વા તસ્યાવાચીં વાવોહેદૂર્જૈવૈનં
વ્યર્ધયતિ યદિ કામયેત વર્ષુકઃ પર્જન્યઃ
સ્યાદિત્યવાચીમવોહેદ્વૃષ્ટિમેવ નિ યચ્છતિ યદિ કામયેતાવર્ષુકઃ
સ્યાદિત્યૂર્ધ્વામુદૂહેદ્વૃષ્ટિમેવોદ્યચ્છતિ પિતૃણાં નિખાતં

મનુષ્યાણામૂર્ધ્વં નિખાતાદા રશનાયા ઓષધીના\ँ રશના વિશ્વેષાં
૨૫ દેવાનામૂર્ધ્વ\ँ રશનાયા આ ચષાલાદિન્દ્રસ્ય ચષાલ\ँ
સાધ્યાનામતિરિક્ત\ँ સ વા એષ સર્વદેવત્યો યદ્યૂપો યદ્યૂપં
મિનોતિ સર્વા એવ દેવતાઃ પ્રીણાતિ યજ્ઞેન વૈ દેવાઃ સુવર્ગં
લોકમાયન્તેઽમન્યન્ત મનુષ્યા નોઽન્વાભવિષ્યન્તીતિ તે યૂપેન યોપયિત્વા
સુવર્ગં લોકમાયન્તમૃષયો યૂપેનૈવાનુ પ્રાજાનન્તદ્યૂપસ્ય યૂપત્વં
૨૬ યદ્યૂપં મિનોતિ સુવર્ગસ્ય લોકસ્ય પ્રજ્ઞાત્યૈ પુરસ્તાન્મિનોતિ
પુરસ્તાદ્ધિ યજ્ઞસ્ય પ્રજ્ઞાયતેઽપ્રજ્ઞાત\ँ હિ તદ્યદતિપન્ન આહુરિદં
કાર્યમાસીદિતિ સાધ્યા વૈ દેવા યજ્ઞમત્યમન્યન્ત તાન્, યજ્ઞો નાસ્પૃશત્
તાન્, યદ્યજ્ઞસ્યાતિરિક્તમાસીત્ તદસ્પૃશદતિરિક્તં વા એતદ્યજ્ઞસ્ય
યદગ્નાવગ્નિં મથિત્વા પ્રહરત્યતિરિક્તમેત
૨૭ દ્યૂપસ્ય યદૂર્ધ્વં ચષાલાત્તેષાં તદ્ભાગધેયં તાનેવ
તેન પ્રીણાતિ દેવા વૈ સર\ँ સ્થિતે સોમે પ્ર સ્રુચોહરન્પ્ર યૂપં
તેઽમન્યન્ત યજ્ઞવેશસં વા ઇદં કુર્મ ઇતિ તે પ્રસ્તરગ્ગ્ સ્રુચાં
નિષ્ક્રયણમપશ્યન્ત્સ્વરું યૂપસ્ય સર\ँ સ્થિતે સોમે પ્ર પ્રસ્તર\ँ
હરતિ જુહોતિ સ્વરુમયજ્ઞવેશસાય ॥ ૬। ૩। ૪॥ દધાતિ પ્રત્યૃચા
સમર્ધયેયમિત્યૂર્જેનં વિશ્વેષાં યૂપત્વમતિરિક્તમેતદ્વિચત્વારિ\ँ શચ્ચ
॥ ૬। ૩। ૪॥

૨૮ સાધ્યા વૈ દેવા અસ્મિઙ\ँ લ્લોક આસન્નાન્યત્કિંચન મિષત્તેઽગ્નિમેવાગ્નયે
મેધાયાલભન્ત ન હ્યન્યદાલંભ્યમવિન્દન્તતો વા ઇમાઃ પ્રજાઃ
પ્રાજાયન્ત યદગ્નાવગ્નિં મથિત્વા પ્રહરતિ પ્રજાનાં પ્રજનનાય
રુદ્રો વા એષ યદગ્નિર્યજમાનઃ પશુર્યત્પશુમાલભ્યાગ્નિં મન્થેદ્રુદ્રાય
યજમાન
૨૯ મપિ દધ્યાત્પ્રમાયુકઃ સ્યાદથો ખલ્વાહુરગ્નિઃ સર્વા દેવતા
હવિરેતદ્યત્પશુરિતિ યત્પશુમાલભ્યાગ્નિં મન્થતિ હવ્યાયૈવાસન્નાય
સર્વા દેવતા જનયત્યુપાકૃત્યૈવ મન્થ્યસ્તન્નેવાલબ્ધં
નેવાઽનાલબ્ધમગ્નેર્જનિત્રમસીત્યાહા ગ્નેર્હ્યેતજ્જનિત્રં વૃષણૌ સ્થ

ઇત્યાહ વૃષણૌ
૩૦ હ્યેતાવુર્વશ્યસ્યાયુરસીત્યાહ મિથુનત્વાય ઘૃતેનાક્તે વૃષણં
દધાથામિત્યાહ વૃષણગ્ગ્ હ્યેતે દધાતે યે અગ્નિં ગાયત્રં છન્દોઽનુ
પ્ર જાયસ્વેત્યાહ છન્દોભિરેવૈનં પ્ર જનયત્યગ્નયે મથ્યમાનાયાનુ
બ્રૂહીત્યાહ સાવિત્રીમૃચમન્વાહ સવિતૃપ્રસૂત એવૈનં મન્થતિ જાતાયાનુ
બ્રૂહિ
૩૧ પ્રહ્રિયમાણાયાનુ બ્રૂહીત્યાહ કાણ્ડેકાણ્ડ એવૈનં ક્રિયમાણે
સમર્ધયતિ ગાયત્રીઃ સર્વા અન્વાહ ગાયત્રછન્દા વા અગ્નિઃ સ્વેનૈવૈનં
છંદસા સમર્ધયત્યગ્નિઃ પુરા ભવત્યગ્નિં મથિત્વા પ્ર હરતિ તૌ
સંભવન્તૌ યજમાનમભિ સંભવતો ભવતં નઃ સમનસાવિત્યાહ
શાન્ત્યૈ પ્રહૃત્ય જુહોતિ જાતાયૈવાસ્મા અન્નમપિ દધાત્યાજ્યેન જુહોત્યેતદ્વા
અગ્નેઃ પ્રિયં ધામ યદાજ્યં પ્રિયેણૈવૈનં ધામ્ના સમર્ધયત્યથો તેજસા
॥ ૬। ૩। ૫॥ યજમાનમાહ વૃષણૌ જાતાયાનુ બ્રૂહ્યષ્ટાદશ ચ ॥ ૬। ૩। ૫॥
૩૨ ઇષે ત્વેતિ બર્હિરા દત્ત ઇચ્છત ઇવ હ્યેષ યો યજત
ઉપવીરસીત્યાહોપ હ્યેનાનાકરોત્યુપો દેવાન્દૈવીર્વિશઃ પ્રાગુરિત્યાહ
દૈવીર્હ્યેતા વિશઃ સતીર્દેવાનુપયન્તિ વહ્નીરુશિજ ઇત્યાહર્ત્વિજો
વૈ વહ્નય ઉશિજસ્તસ્માદેવમાહ બૃહસ્પતે ધારયા વસૂનીત્યા
૩૩ હ બ્રહ્મ વૈ દેવાનાં બૃહસ્પતિર્બ્રહ્મણૈવાસ્મૈ પશૂનવ રુંધે
હવ્યા તે સ્વદન્તામિત્યાહ સ્વદયત્યેવૈનાન્દેવ ત્વષ્ટર્વસુ રણ્વેત્યાહ
ત્વષ્ટા વૈ પશૂનાં મિથુનાનાꣳ રૂપકૃદ્રૂપમેવ પશુષુ દધાતિ
રેવતી રમધ્વમિત્યાહ પશવો વૈ રેવતીઃ પશૂનેવાસ્મૈ રમયતિ
દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇતિ
૩૪ રશનામા દત્તે પ્રસૂત્યા અશ્વિનોર્બાહુભ્યામિત્યાહાશ્વિનૌ હિ
દેવાનામધ્વર્યૂ આસ્તાં પૂષ્ણો હસ્તાભ્યામિત્યાહ યત્યા ઋતસ્ય ત્વા
દેવહવિઃ પાશેનારભ ઇત્યાહ સત્યં વા ઋતꣳ સત્યેનૈવૈનમૃતેના
રભતેઽક્ષ્ણયા પરિ હરતિ વધ્યꣳ હિ પ્રત્યઞ્ચં પ્રતિમુઞ્ચન્તિ
વ્યાવૃત્ત્યૈ ધર્ષા માનુષાનિતિ નિ યુનક્તિ ધૃત્યા અદ્ભ્ય

૩૫ સ્ત્વૌષધીભ્યઃ પ્રોક્ષામીત્યાહાદ્ભ્યો હ્યેષ ઓષધીભ્યઃ સંભવતિ
યત્પશુરપાં પેરુરસીત્યાહૈષ હ્યપાં પાતા યો મેધાયારભ્યતે
સ્વાત્તં ચિથ્સદેવꣳ હવ્યમાપો દેવીઃ સ્વદતૈનમિત્યાહ
સ્વદયત્યેવૈનમુપરિષ્ટાત્ પ્રોક્ષત્યુપરિષ્ટાદેવૈનં મેધ્યં
કરોતિ પાયયત્યન્તરત એવૈનં મેધ્યં કરોત્યધસ્તાદુપોક્ષતિ સર્વત
એવૈનં મેધ્યં કરોતિ ॥ ૬। ૩। ૬॥ વસૂનીતિ પ્રસવ ઇત્યદ્ભ્યોઽન્તરત
એવૈનં દશ ચ ॥ ૬। ૩। ૬॥

૩૬ અગ્નિના વૈ હોત્રા દેવા અસુરાનભ્યભવન્નગ્નયે સમિધ્યમાનાયાનુ
બ્રૂહીત્યાહ ભ્રાતૃવ્યાભિભૂત્યૈ સપ્તદશ સામિધેનીરન્વાહ સપ્તદશઃ
પ્રજાપતિઃ પ્રજાપતેરાપ્ત્યૈ સપ્તદશાન્વાહ દ્વાદશ માસાઃ
પઞ્ચર્તવઃ સ સંવથ્સરઃ સંવથ્સરં પ્રજા અનુ પ્ર જાયન્તે પ્રજાનાં
પ્રજનનાય દેવા વૈ સામિધેનીરનૂચ્ય યજ્ઞં નાન્વપશ્યન્થ્સ
પ્રજાપતિસ્તૂષ્ણીમાઘાર

૩૭ માઽઘારયત્તતો વૈ દેવા યજ્ઞમન્વપશ્યન્,
યત્તૂષ્ણીમાઘારમાઘારયતિ યજ્ઞસ્યાનુખ્યાત્યા અસુરેષુ વૈ યજ્ઞ
આસીત્તં દેવાસ્તૂષ્ણીꣳ હોમેનાવૃઞ્જત યત્તૂષ્ણીમાઘારમાઘારયતિ
ભ્રાતૃવ્યસ્યૈવ તદ્યજ્ઞં વૃઙ્ક્તે પરિધીન્થ્સં માર્ષ્ટિ
પુનાત્યેવૈનાન્ત્રિસ્ત્રિઃ સં માર્ષ્ટિ ત્ર્યાવૃદ્ધિ યજ્ઞોઽથો
રક્ષસામપહત્યૈ દ્વાદશ સં પદ્યન્તે દ્વાદશ

૩૮ માસાઃ સંવથ્સરઃ સંવથ્સરમેવ પ્રીણાત્યથો સંવથ્સરમેવાસ્મા
ઉપ દધાતિ સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ શિરો વા એતદ્યજ્ઞસ્ય
યદાઘારોઽગ્નિઃ સર્વા દેવતા યદાઘારમાઘારયતિ શીર્ષત એવ
યજ્ઞસ્ય યજમાનઃ સર્વા દેવતા અવ રુંધે શિરો વા એતદ્યજ્ઞસ્ય
યદાઘાર આત્મા પશુરાઘારમાઘાર્ય પશુꣳ સમનક્ત્યાત્મન્નેવ
યજ્ઞસ્ય

૩૯ શિરઃ પ્રતિ દધાતિ સં તે પ્રાણો વાયુના ગચ્છતામિત્યાહ વાયુદેવત્યો
વૈ પ્રાણો વાયાવેવાસ્ય પ્રાણં જુહોતિ સં યજત્રૈરઙ્ગાનિ સં

યજ્ઞપતિરાશિષેત્યાહ યજ્ઞપતિમેવાસ્યાશિષં ગમયતિ વિશ્વરૂપો
વૈ ત્વાષ્ટ્ર ઉપરિષ્ટાત્ પશુમભ્યવમીત્ તસ્માદુપરિષ્ટાત્ પશોર્નાવ
દ્યન્તિ યદુપરિષ્ટાત્પશુꣳ સમનક્તિમેધ્યમેવૈ
૪૦ નં કરોત્યૃત્વિજો વૃણીતે છન્દાગ્સ્યેવ વૃણીતે સપ્ત વૃણીતે
સપ્ત ગ્રામ્યાઃ પશવઃ સપ્તારણ્યાઃ સપ્ત છન્દાગ્સ્યુભયસ્યાવરુદ્ધ્યા
એકાદશ પ્રયાજાન્, યજતિ દશ વૈ પશોઃ પ્રાણા આત્મૈકાદશો યાવાનેવ
પશુસ્તં પ્ર યજતિ વપામેકઃ પરિ શય આત્મૈવાત્માનં પરિ શયે વજ્રો
વૈ સ્વધિતિર્વજ્રો યૂપશકલો ઘૃતં ખલુ વૈ દેવા વજ્રં કૃત્વા
સોમમઘ્નન્ઘૃતેનાક્તૌ પશું ત્રાયેથામિત્યાહ વજ્રેણૈવૈનં વશે
કૃત્વાઽલભતે ॥ ૬। ૩। ૭॥ આધારં પઘન્તે દ્વાદશાઽત્મન્નેવ યજ્ઞસ્ય
મેધ્યમેવ ખલુ વા અષ્ટાદશ ચ ॥ ૬। ૩। ૭॥
૪૧ પર્યગ્નિ કરોતિ સર્વહુતમેવૈનં કરોત્યસ્કન્દાયાસ્કન્નꣳ હિ
તદ્યદ્ધુતસ્ય સ્કન્દતિ ત્રિઃ પર્યગ્નિ કરોતિ ત્ર્યાવૃદ્ધિ યજ્ઞોઽથો
રક્ષસામપહત્યૈ બ્રહ્મવાદિનો વદન્ત્યન્વારભ્યઃ પશૂ ૩ ર્નાન્વારભ્યા ૩
ઇતિ મૃત્યવે વા એષ નીયતે યત્પશુસ્તં યદન્વારભેત પ્રમાયુકો
યજમાનઃ સ્યાદથો ખલ્વાહુઃ સુવર્ગાય વા એષ લોકાય નીયતે યત્
૪૨ પશુરિતિ યન્નાન્વારભેત સુવર્ગાલ્લોકાદ્યજમાનો હીયેત
વપાશ્રપણીભ્યામન્વારભતે તન્નેવાન્વારબ્ધં નેવાનન્વારબ્ધમુપ
પ્રેષ્ય હોતર્હવ્યા દેવેભ્ય ઇત્યાહેષિતꣳ હિ કર્મ ક્રિયતે
રેવતીર્યજ્ઞપતિં પ્રિયધા વિશતેત્યાહ યથાયજુરેવૈતદગ્નિના
પુરસ્તાદેતિ રક્ષસામપહત્યૈ પૃથિવ્યાઃ સં પૃચઃ પાહીતિ બર્હિ
૪૩ રુપાસ્યત્યસ્કન્દાયાસ્કન્નꣳ હિ તદ્યદ્બર્હિષિ સ્કન્દત્યથો
બર્હિષદમેવૈનં કરોતિ પરાઙા વર્તતેઽધ્વર્યુઃ પશોઃ
સંજ્ઞપ્યમાનાત્પશુભ્ય એવ તન્નિહ્નુત આત્મનોનાવ્રસ્કાય ગચ્છતિ
શ્રિયં પ્ર પશૂનાપ્નોતિ ય એવં વેદ પશ્ચાલ્લોકા વા એષા
પ્રાચ્યુદાનીયતે યત્પત્ની નમસ્ત આતાનેત્યાહાદિત્યસ્ય વૈ રશ્મય
૪૪ આતાનાસ્તેભ્ય એવ નમસ્કરોત્યનર્વા પ્રેહીત્યાહ ભ્રાતૃવ્યો વા

અર્વા ભ્રાતૃવ્યાપનુત્ત્યૈ ઘૃતસ્ય કુલ્યામનુ સહ પ્રજયા સહ
રાયસ્પોષેણેત્યાહાશિષમેવૈતામા શાસ્ત આપો દેવીઃ શુદ્ધાયુવ ઇત્યાહ
યથાયજુરેવૈતત્ ॥ ૬। ૩। ૮॥ લોકાય નીયતે યદ્બર્હી રશ્મયઃ સપ્ત
ત્રિꣳશચ્ચ ॥ ૬। ૩। ૮॥

૪૫ પશોર્વા આલબ્ધસ્ય પ્રાણાઙ્છુગૃચ્છતિ વાક્ત આ પ્યાયતાં પ્રાણસ્ત આ
પ્યાયતામિત્યાહ પ્રાણેભ્ય એવાસ્ય શુચꣳશમયતિ સા પ્રાણેભ્યોઽધિ
પૃથિવીꣳ શુક્પ્ર વિશતિ શમહોભ્યામિતિ નિ નયત્યહોરાત્રાભ્યામેવ
પૃથિવ્યૈ શુચꣳશમયત્યોષધે ત્રાયસ્વૈનગ્ગ્ સ્વધિતે મૈનꣳ
હિꣳસીરિત્યાહ વજ્રો વૈ સ્વધિતિઃ

૪૬ શાન્ત્યૈ પાર્શ્વત આ ચ્છ્યતિ મધ્યતો હિ મનુષ્યા આચ્છ્યન્તિ
તિરશ્ચીનમા ચ્છ્યત્યનૂચીનꣳ હિ મનુષ્યા આચ્છ્યન્તિ વ્યાવૃત્ત્યૈ
રક્ષસાં ભાગોઽસીતિ સ્થવિમતો બર્હિરક્ત્વાપાસ્યત્યસ્નૈવ રક્ષાꣳસિ
નિરવદયત ઇદમહꣳ રક્ષોઽધમં તમો નયામિ યોઽસ્માન્દ્વેષ્ટિ
યં ચ વયં દ્વિષ્મ ઇત્યાહ દ્વૌ વાવ પુરુષૌ યં ચૈવ

૪૭ દ્વેષ્ટિ યશ્ચૈનં દ્વેષ્ટિ તાવુભાવધમં તમો નયતીષે ત્વેતિ
વપામુત્ખિદતીચ્છત ઇવ હ્યેષ યો યજતે યદુપતૃન્દ્યાદ્રુદ્રોઽસ્ય
પશૂન્ઘાતુકઃ સ્યાદ્યન્નોપ તૃન્દ્યાદયતા સ્યાદન્યયોપતૃણત્ત્યન્યયા
ન ધૃત્યૈ ઘૃતેન દ્યાવાપૃથિવી પ્રોર્ણ્વાથામિત્યાહ દ્યાવાપૃથિવી
એવ રસેનાનક્ત્યચ્છિન્નો

૪૮ રાયઃ સુવીર ઇત્યાહ યથાયજુરેવૈતત્ક્રૂરમિવ વા એતત્કરોતિ
યદ્વપામુત્ખિદત્યુર્વન્તરિક્ષમન્વિહીત્યાહ શાન્ત્યૈ પ્ર વા
એષોઽસ્માલ્લોકાચ્ચ્યવતે યઃ પશું મૃત્યવે નીયમાનમન્વારભતે
વપાશ્રપણી પુનરન્વારભતેઽસ્મિન્નેવ લોકે પ્રતિ તિષ્ઠત્યગ્નિના
પુરસ્તાદેતિ રક્ષસામપહત્યા અથો દેવતા એવ હવ્યેના

૪૯ ઽન્વેતિ નાન્તમમઙ્ગારમતિ હરેદ્યદન્તમમઙ્ગારમતિહરેદ્દેવતા
અતિ મન્યેત વાયો વીહિ સ્તોકાનામિત્યાહ તસ્માદ્વિભક્તાઃ
સ્તોકા અવ પદ્યન્તેઽગ્રં વા એતત્પશૂનાં યદ્વપાગ્રમોષધીનાં

બર્હિરગ્રેણૈવાગ્રꣳ સમર્ધયત્યથો ઓષધીષ્વેવ પશૂન્પ્રતિ
ષ્ઠાપયતિ સ્વાહાકૃતીભ્યઃ પ્રેષ્યેત્યાહ

૫૦ યજ્ઞસ્ય સમિષ્ટ્યૈ પ્રાણાપાનૌ વા એતૌ પશૂનાં યત્ પૃષદાજ્યમાત્મા
વપા પૃષદાજ્યમભિઘાર્ય વપામભિ ઘારયત્યાત્મન્નેવ પશૂનાં
પ્રાણાપાનૌ દધાતિ સ્વાહોર્ધ્વનભસં મારુતં ગચ્છતમિત્યાહોર્ધ્વનભા
હ સ્મ વૈ મારુતો દેવાનાં વપાશ્રપણી પ્ર હરતિ તેનૈવૈને પ્ર
હરતિ વિષૂચી પ્ર હરતિ તસ્માદ્વિષ્વઞ્ચૌ પ્રાણાપાનૌ ॥ ૬। ૩। ૯॥

સ્વધિતિશ્ચૈવાઽચ્છિન્નો હવ્યેનેષ્યેત્યાહ ષટ્ ચત્વારિꣳશચ્ચ ॥ ૬। ૩। ૯॥

૫૧ પશુમાલભ્ય પુરોડાશં નિર્વપતિ સમેધમેવૈનમા લભતે વપયા
પ્રચર્ય પુરોડાશેન પ્ર ચરત્યૂર્ગ્વૈ પુરોડાશ ઊર્જમેવ પશૂનાં
મધ્યતો દધાત્યથો પશોરેવ છિદ્રમપિ દધાતિ પૃષદાજ્યસ્યોપહત્ય
ત્રિઃ પૃચ્છતિ શૃતꣳ હવી૩ઃ શમિતરિતિ ત્રિષત્યા હિ દેવા
યોઽશૃતꣳ શૃતમાહ સ એનસા પ્રાણાપાનૌ વા એતૌ પશૂનાં

૫૨ યત્પૃષદાજ્યં પશોઃ ખલુ વા આલબ્ધસ્ય હૃદયમાત્માભિ
સમેતિ યત્પૃષદાજ્યેન હૃદયમભિઘારયત્યાત્મન્નેવ પશૂનાં
પ્રાણાપાનૌ દધાતિ પશુના વૈ દેવાઃ સુવર્ગં લોકમાયન્તેઽમન્યન્ત
મનુષ્યા નોઽન્વાભવિષ્યન્તીતિ તસ્ય શિરશ્છિત્ત્વા મેધં
પ્રાક્ષારયન્થ્સ પ્રક્ષોઽભવત્તત્પ્રક્ષસ્ય પ્રક્ષત્વં
યત્પ્લક્ષશાખોત્તરબર્હિર્ભવતિ સમેધસ્યૈવ

૫૩ પશોરવ દ્યતિ પશું વૈ હ્રિયમાણꣳ રક્ષાગ્સ્યનુ સચન્તેઽન્તરા
યૂપં ચાહવનીયં ચ હરતિ રક્ષસામપહત્યૈ પશોર્વા આલબ્ધસ્ય મનોપ
ક્રામતિ મનોતાયૈ હવિષોઽવદીયમાનસ્યાનુ બ્રૂહીત્યાહ મન એવાસ્યાવ
રુંધ એકાદશાવદાનાન્યવ દ્યતિ દશ વૈ પશોઃ પ્રાણા આત્મૈકાદશો
યાવાનેવ પશુસ્તસ્યાવ

૫૪ દ્યતિ હૃદયસ્યાગ્રેઽવ દ્યત્યથ જિહ્વાયા અથ વક્ષસો
યદ્વૈ હૃદયેનાભિ ગચ્છતિ તજ્જિહ્વયા વદતિ યજ્જિહ્વયા વદતિ
તદુરસોઽધિ નિર્વદત્યેતદ્વૈ પશોર્યથાપૂર્વં યસ્યૈવમવદાય

યથાકામમુત્તરેષામવદ્યતિ યથાપૂર્વમેવાસ્ય પશોરવત્તં ભવતિ
મધ્યતો ગુદસ્યાવ દ્યતિ મધ્યતો હિ પ્રાણ ઉત્તમસ્યાવ દ્યત્યુ
૫૫ ત્તમો હિ પ્રાણો યદીતરં યદીતરમુભયમેવાજામિ જાયમાનો વૈ
બ્રાહ્મણસ્ત્રિભિરૃણવા જાયતે બ્રહ્મચર્યેણ ઋષિભ્યો યજ્ઞેન
દેવેભ્યઃ પ્રજયા પિતૃભ્ય એષ વા અનૃણો યઃ પુત્રી યજ્વા
બ્રહ્મચારિવાસી તદવદાનૈરેવાવ દયતે તદવદાનાનામવદાનત્વં
દેવાસુરાઃ સંયત્તા આસન્તે દેવા અગ્નિમબ્રુવન્ત્વયા વીરેણાસુરાનભિ
ભવામેતિ
૫૬ સોઽબ્રવીદ્વરં વૃણૈ પશોરુદ્ધારમુદ્ધરા ઇતિ સ
એતમુદ્ધારમુદહરત દોઃ પૂર્વાર્ધસ્ય ગુદં મધ્યતઃ શ્રોણિં
જઘનાર્ધસ્ય તતો દેવા અભવન્પરાસુરા યત્ત્ર્યઙ્ગાણા ँसमवद्यति
ભ્રાતૃવ્યાભિભૂત્યૈ ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો ભવત્યક્ષ્ણયાવ
દ્યતિ તસ્માદક્ષ્ણયા પશવોઽઙ્ગાનિ પ્ર હરન્તિ પ્રતિષ્ઠિત્યૈ ॥ ૬। ૩। ૧૦॥ એતૌ પશૂના ँ સમેધસ્યૈવ
તસ્યાઽવોત્તમસ્યાવ દ્યતીતિ પંચ
ચત્વારિ ँ શચ્ચ ॥ ૬। ૩। ૧૦॥
૫૭ મેદસા સ્રુચૌ પ્રોર્ણોતિ મેદોરૂપા વૈ પશવો રૂપમેવ પશુષુ
દધાતિ યૂષન્નવધાય પ્રોર્ણોતિ રસો વા એષ પશૂનાં યદ્યૂ રસમેવ
પશુષુ દધાતિ પાર્શ્વેન વસાહોમં પ્ર યૌતિ મધ્યં વા એતત્પશૂનાં
યત્પાર્શ્વ ँ રસ એષ પશૂનાં યદ્વસા યત્પાર્શ્વેન વસાહોમં
પ્રયૌતિ મધ્યત એવ પશૂના ँ રસં દધાતિ ઘ્નન્તિ
૫૮ વા એતત્પશું યત્સંજ્ઞપયન્ત્યૈન્દ્રઃ ખલુ વૈ દેવતયા પ્રાણ
ઐન્દ્રોઽપાન ઐન્દ્રઃ પ્રાણો અઙ્ગે અઙ્ગે નિ દેધ્યદિત્યાહ પ્રાણાપાનાવેવ
પશુષુ દધાતિ દેવ ત્વષ્ટર્ભૂરિ તે સ ँ સમેત્વિત્યાહ ત્વાષ્ટ્રા હિ
દેવતયા પશવો વિષુરૂપા યત્સલક્ષ્માણો ભવથેત્યાહ વિષુરૂપા
હ્યેતે સન્તઃ સલક્ષ્માણ એતર્હિ ભવન્તિ દેવત્રા યન્ત
૫૯ મવસે સખાયોઽનુ ત્વા માતા પિતરો મદન્ત્વિત્યાહાનુમતમેવૈનં
માત્રા પિત્રા સુવર્ગં લોકં ગમયત્યર્ધર્ચે વસાહોમં જુહોત્યસૌ વા

અર્ધર્ચ ઇયમર્ધર્ચ ઇમે એવ રસેનાનક્તિ દિશો જુહોતિ દિશ એવ
રસેનાનક્ત્યથો દિગ્ભ્ય એવોર્જꣳ રસમવ રુંધે પ્રાણાપાનૌ વા એતૌ
પશૂનાં યત્પૃષદાજ્યં વાનસ્પત્યાઃ ખલુ
૬૦ વૈ દેવતયા પશવો યત્પૃષદાજ્યસ્યોપહત્યાહ વનસ્પતયેઽનુ
બ્રૂહિ વનસ્પતયે પ્રેષ્યેતિ પ્રાણાપાનાવેવ પશુષુ દધાત્યન્યસ્યાન્યસ્ય
સમવત્તꣳ સમવદ્યતિ તસ્માન્નાનારૂપાઃ પશવો યૂષ્ણોપ સિઞ્ચતિ
રસો વા એષ પશૂનાં યદ્યૂ રસમેવ પશુષુ દધાતીડામુપ હ્વયતે
પશવો વા ઇડા પશૂનેવોપ હ્વયતે ચતુરુપ હ્વયતે
૬૧ ચતુષ્પાદો હિ પશવો યં કામયેતાપશુઃ સ્યાદિત્યમેદસ્કં
તસ્મા આ દધ્યાન્મેદોરૂપા વૈ પશવો રૂપેણૈવૈનં પશુભ્યો
નિર્ભજત્યપશુરેવ ભવતિ યં કામયેત પશુમાન્થ્સ્યાદિતિ
મેદસ્વત્તસ્મા આ દધ્યાન્મેદોરૂપા વૈ પશવો રૂપેણૈવાસ્મૈ પશૂનવ
રુંધે પશુમાનેવ ભવતિ પ્રજાપતિર્યજ્ઞમસૃજત સ આજ્યં
૬૨ પુરસ્તાદસૃજત પશું મધ્યતઃ પૃષદાજ્યં
પશ્ચાત્તસ્માદાજ્યેન પ્રયાજા ઇજ્યન્તે પશુના મધ્યતઃ
પૃષદાજ્યેનાનૂયાજાસ્તસ્માદેતન્મિશ્રમિવ પશ્ચાથ્સૃષ્ટꣳ
હ્યેકાદશાનૂયાજાન્, યજતિ દશ વૈ પશોઃ પ્રાણા આત્મૈકાદશો યાવાનેવ
પશુસ્તમનુ યજતિ ઘ્નન્તિ વા એતત્પશું યથ્સંજ્ઞપયન્તિ પ્રાણાપાનૌ
ખલુ વા એતૌ પશૂનાં યત્પૃષદાજ્યં યત્પૃષદાજ્યેનાનૂયાજાન્, યજતિ
પ્રાણાપાનાવેવ પશુષુ દધાતિ ॥ ૬। ૩। ૧૧॥ ઘ્નન્તિ યન્તં ખલુ ચતુરુપ
હ્વયત આજ્યં યત્પૃષદાજ્યેન ષટ્ચ ॥ ૬। ૩। ૧૧॥
ચાત્વાલાથ્સુવર્ગાય યદ્વૈસર્જનાનિ વૈષ્ણવ્યર્ચા પૃથિવ્યૈ સાધ્યા
ઇષે ત્વેત્યગ્નિના પર્યગ્નિ પશોઃ પશુમાલભ્ય મેદસા સ્રુચાવેકાદશ ॥
ચાત્વાલાદ્દેવાનુપૈતિ મુંચતિ પ્રહ્રિયમાણાય પર્યગ્નિ પશુમાલભ્ય
ચતુષ્પાદો દ્વિષષ્ટિઃ ॥
ચાત્વાલાત્પશુષુ દધાતિ ॥

## ષષ્ઠકાણ્ડે ચતુર્થઃ પ્રશ્નઃ ૪

૧ યજ્ઞેન વૈ પ્રજાપતિઃ પ્રજા અસૃજત તા ઉપયડ્ભિરેવાસૃજત
યદુપયજ ઉપયજતિ પ્રજા એવ તદ્યજમાનઃ સૃજતે જઘનાર્ધાદવ
દ્યતિ જઘનાર્ધાદ્ધિ પ્રજાઃ પ્રજાયન્તે સ્થવિમતોઽવ દ્યતિ સ્થવિમતો
હિ પ્રજાઃ પ્રજાયન્તેઽસંભિન્દન્નવ દ્યતિ પ્રાણાનામસંભેદાય ન
પર્યાવર્તયતિ યત્પર્યાવર્તયેદુદાવર્તઃ પ્રજા ગ્રાહુકઃ સ્યાથ્સમુદ્રં
ગચ્છ સ્વાહેત્યાહ રેત
૨ એવ તદ્દધાત્યન્તરિક્ષં ગચ્છ સ્વાહેત્યાહાન્તરિક્ષેણૈવાસ્મૈ પ્રજાઃ
પ્ર જનયત્યન્તરિક્ષગ્ગ્ હ્યનુ પ્રજાઃ પ્રજાયન્તે દેવꣳ સવિતારં
ગચ્છ સ્વાહેત્યાહ સવિતૃપ્રસૂત એવાસ્મૈ પ્રજાઃ પ્ર જનયત્યહોરાત્રે
ગચ્છ સ્વાહેત્યાહાહોરાત્રાભ્યામેવાસ્મૈ પ્રજાઃ પ્ર જનયત્યહોરાત્રે હ્યનુ
પ્રજાઃ પ્રજાયન્તે મિત્રાવરુણૌ ગચ્છ સ્વાહે
૩ ત્યાહ પ્રજાસ્વેવ પ્રજાતાસુ પ્રાણાપાનૌ દધાતિ સોમં ગચ્છ સ્વાહેત્યાહ
સૌમ્યા હિ દેવતયા પ્રજા યજ્ઞં ગચ્છ સ્વાહેત્યાહ પ્રજા એવ
યજ્ઞિયાઃ કરોતિ છન્દાꣳસિ ગચ્છ સ્વાહેત્યાહ પશવો વૈ છન્દાꣳસિ
પશૂનેવાવ રુંધે દ્યાવાપૃથિવી ગચ્છ સ્વાહેત્યાહ પ્રજા એવ પ્રજાતા
દ્યાવાપૃથિવીભ્યામુભયતઃ પરિગૃહ્ણાતિ નભો
૪ દિવ્યં ગચ્છ સ્વાહેત્યાહ પ્રજાભ્ય એવ પ્રજાતાભ્યો વૃષ્ટિં નિ
યચ્છત્યગ્નિં વૈશ્વાનરં ગચ્છ સ્વાહેત્યાહ પ્રજા એવ પ્રજાતા અસ્યાં
પ્રતિ ષ્ઠાપયતિ પ્રાણાનાં વા એષોઽવ દ્યતિ યોઽવદ્યતિ ગુદસ્ય
મનો મે હાર્દિ યચ્છેત્યાહ પ્રાણાનેવ યથાસ્થાનમુપ હ્વયતે પશોર્વા
આલબ્ધસ્ય હૃદયꣳ શુગૃચ્છતિ સા હૃદયશૂલ
૫ મભિ સમેતિ યત્પૃથિવ્યાꣳ હૃદયશૂલમુદ્વાસયેત્પૃથિવીꣳ
શુચાર્પયેદ્યદપ્સ્વપઃ શુચાર્પયેચ્છુષ્કસ્ય ચાર્દ્રસ્ય
ચ સંધાવુદ્વાસયત્યુભયસ્ય શાન્ત્યૈ યં દ્વિષ્યાત્તં
ધ્યાયેચ્છુચૈવૈનમર્પયતિ ॥ ૬। ૪। ૧॥ રેતો મિત્રાવરુણૌ ગચ્છ સ્વાહા

નમો હૃદયશૂલં દ્વાત્રિꣳશચ્ચ ॥ ૬। ૪। ૧॥

૬ દેવા વૈ યજ્ઞમાગ્નીધ્રે વ્યભજન્ત તતો યદત્યશિષ્યત
તદબ્રુવન્વસતુ નુ ન ઇદમિતિ તદ્વસતીવરીણાં
વસતીવરિત્વં તસ્મિન્પ્રાતર્ન સમશક્નુવન્તદપ્સુ
પ્રાવેશયન્તા વસતીવરીરભવન્વસતીવરીર્ગૃહ્ણાતિ યજ્ઞો વૈ
વસતીવરીર્યજ્ઞમેવારભ્ય ગૃહીત્વોપ વસતિ યસ્યાગૃહીતા અભિ
નિમ્રોચેદનારબ્ધોઽસ્ય યજ્ઞઃ સ્યાદ્

૭ યજ્ઞં વિ ચ્છિન્દ્યાજ્જ્યોતિષ્યા વા ગૃહ્ણીયાદ્ધિરણ્યં વાવધાય
સશુક્રાણામેવ ગૃહ્ણાતિ યો વા બ્રાહ્મણો બહુયાજી તસ્ય કુંભ્યાનાં
ગૃહ્ણીયાથ્સ હિ ગૃહીતવસતીવરીકો વસતીવરીર્ગૃહ્ણાતિ પશવો
વૈ વસતીવરીઃ પશૂનેવારભ્ય ગૃહીત્વોપ વસતિ યદન્વીપં
તિષ્ઠન્ગૃહ્ણીયાન્નિર્માર્ગુકા અસ્માત્પશવઃ સ્યુઃ પ્રતીપં તિષ્ઠન્ગૃહ્ણાતિ
પ્રતિરુધ્યૈવાસ્મૈ પશૂન્ગૃહ્ણાતીન્દ્રો

૮ વૃત્રમહન્થ્સો ૨ ઽપો ૨ ઽભ્યમ્રિયત તાસાં યન્મેધ્યં
યજ્ઞિયꣳ સદેવમાસીત્તદત્યમુચ્યત તા વહન્તીરભવન્વહન્તીનાં
ગૃહ્ણાતિ યા એવ મેધ્યા યજ્ઞિયાઃ સદેવા આપસ્તાસામેવ ગૃહ્ણાતિ
નાન્તમા વહન્તીરતીયાદ્યદન્તમા વહન્તીરતીયાદ્યજ્ઞમતિ મન્યેત
ન સ્થાવરાણાં ગૃહ્ણીયાદ્વરુણગૃહીતા વૈ સ્થાવરા યથ્સ્થાવરાણાં
ગૃહ્ણીયાદ્

૯ વરુણેનાસ્ય યજ્ઞં ગ્રાહયેદ્યદ્વૈ દિવા ભવત્યપો રાત્રિઃ પ્ર વિશતિ
તસ્માત્તામ્રા આપો દિવા દદૃશ્રે યન્નક્તં ભવત્યપોઽહઃ પ્ર વિશતિ
તસ્માચ્ચન્દ્રા આપો નક્તં દદૃશ્રે છાયાયૈ ચાતપતશ્ચ સંધૌ
ગૃહ્ણાત્યહોરાત્રયોરેવાસ્મૈ વર્ણં ગૃહ્ણાતિ હવિષ્મતીરિમા આપ ઇત્યાહ
હવિષ્કૃતાનામેવ ગૃહ્ણાતિ હવિષ્માꣳ અસ્તુ

૧૦ સૂર્ય ઇત્યાહ સશુક્રાણામેવ ગૃહ્ણાત્યનુષ્ટુભા ગૃહ્ણાતિ
વાગ્વા અનુષ્ટુગ્વાચૈવૈનાઃ સર્વયા ગૃહ્ણાતિ ચતુષ્પદયર્ચા
ગૃહ્ણાતિ ત્રિઃ સાદયતિ સપ્ત સં પદ્યન્તે સપ્તપદા શક્વરી

પશવઃ શક્વરી પશૂનેવાવ રુંધેઽસ્મૈ વૈ લોકાય ગાર્હપત્ય
આ ધીયતેઽમુષ્મા આહવનીયો યદ્ગાર્હપત્ય ઉપસાદયેદસ્મિંલ્લોકે
પશુમાન્થ્સ્યાદ્યદાહવનીયેઽમુષ્મિં
૧૧ લ્લોકે પશુમાન્થ્સ્યાદુભયોરુપ સાદયત્યુભયોરેવૈનં
લોકયોઃ પશુમન્તં કરોતિ સર્વતઃ પરિ હરતિ રક્ષસામપહત્યા
ઇન્દ્રાગ્નિયોર્ભાગધેયીઃ સ્થેત્યાહ યથાયજુરેવૈતદાગ્નીધ્ર ઉપ
વાસયત્યેતદ્વૈ યજ્ઞસ્યાપરાજિતં યદાગ્નીધ્રં યદેવ યજ્ઞસ્યાપરાજિતં
તદેવૈના ઉપ વાસયતિ યતઃ ખલુ વૈ યજ્ઞસ્ય વિતતસ્ય ન ક્રિયતે
તદનુ યજ્ઞꣳ રક્ષાꣳસ્યવ ચરન્તિ યદ્વહન્તીનાં ગૃહ્ણાતિ
ક્રિયમાણમેવ તદ્યજ્ઞસ્ય શયે રક્ષસામનન્વવચારાય ન હ્યેતા
ઈલયન્ત્યા તૃતીયસવનાત્પરિ શેરે યજ્ઞસ્ય સંતત્યૈ ॥ ૬। ૪। ૨॥ સ્યાદિન્દ્રો
ગૃહ્ણીયાદસ્ત્વમુષ્મિન્ ક્રિયતે ષડ્વિꣳશતિશ્ચ ॥ ૬। ૪। ૨॥
૧૨ બ્રહ્મવાદિનો વદન્તિ સ ત્વા અધ્વર્યુઃ સ્યાદ્યઃ
સોમમુપાવહરન્થ્સર્વાભ્યો દેવતાભ્ય ઉપાવહરેદિતિ હૃદે ત્વેત્યાહ
મનુષ્યેભ્ય એવૈતેન કરોતિ મનસે ત્વેત્યાહ પિતૃભ્ય એવૈતેન
કરોતિ દિવે ત્વા સૂર્યાય ત્વેત્યાહ દેવેભ્ય એવૈતેન કરોત્યેતાવતીર્વૈ
દેવતાસ્તાભ્ય એવૈનꣳ સર્વાભ્ય ઉપાવહરતિ પુરા વાચઃ
૧૩ પ્રવદિતોઃ પ્રાતરનુવાકમુપાકરોતિ યાવત્યેવ વાક્તામવ
રુંધેઽપોઽગ્રેઽભિવ્યાહરતિ યજ્ઞો વા આપો યજ્ઞમેવાભિ વાચં વિ
સૃજતિ સર્વાણિ છન્દાꣳસ્યન્વાહ પશવો વૈ છન્દાꣳસિ પશૂનેવાવ
રુંધે ગાયત્રિયા તેજસ્કામસ્ય પરિ દધ્યાત્ત્રિષ્ટુભેન્દ્રિયકામસ્ય
જગત્યા પશુકામસ્યાનુષ્ટુભા પ્રતિષ્ઠાકામસ્ય પઙ્ક્ત્યા યજ્ઞકામસ્ય
વિરાજાન્નકામસ્ય શ꣡ૃણોત્વગ્નિઃ સમિધા હવં
૧૪ મ ઇત્યાહ સવિતૃપ્રસૂત એવ દેવતાભ્યો નિવેદ્યાપોઽચ્છૈત્યપ
ઇષ્ય હોતરિત્યાહેષિતꣳ હિ કર્મ ક્રિયતે મૈત્રાવરુણસ્ય ચમસાધ્વર્યવા
દ્રવેત્યાહ મિત્રાવરુણૌ વા અપાં નેતારૌ તાભ્યામેવૈના અચ્છૈતિ
દેવીરાપો અપાં નપાદિત્યાહાહુત્યૈવૈના નિષ્ક્રીય ગૃહ્ણાત્યથો

હવિષ્કૃતાનામેવાભિઘૃતાનાં ગૃહ્ણાતિ
૧૫ કાર્ષિરસીત્યાહ શમલમેવાસામપ પ્લાવયતિ સમુદ્રસ્ય વોક્ષિત્યા
ઉન્નય ઇત્યાહ તસ્માદધમાનાઃ પીયમાના આપો ન ક્ષીયન્તે યોનિર્વૈ
યજ્ઞસ્ય ચાત્વાલં યજ્ઞો વસતીવરીર્હોતૃચમસં ચ મૈત્રાવરુણચમસં
ચ સગ્ગ્સ્પર્શ્ય વસતીવરીર્વ્યાનયતિ યજ્ઞસ્ય સયોનિત્વાયાથો
સ્વાદેવૈના યોનેઃ પ્ર જનયત્યધ્વર્યોઽવેરપા ૩ ઇત્યાહોતેમનન્નમુરુતેમાઃ
પશ્યેતિ વાવૈતદાહ યદ્યગ્નિષ્ટોમો જુહોતિ યદ્યુક્થ્યઃ પરિધૌ નિ
માર્ષ્ટિ યદ્યતિરાત્રો યજુર્વદન્પ્ર પદ્યતે યજ્ઞક્રતૂનાં વ્યાવૃત્ત્યૈ ॥ ૬। ૪। ૩॥ વાચો હવમભિ ઘૃતાનાં ગૃહ્ણાત્યુત પંચ
વિꣳશતિશ્ચ ॥ ૬। ૪। ૩॥
૧૬ દેવસ્ય ત્વા સવિતુઃ પ્રસવ ઇતિ ગ્રાવાણમા દત્તે પ્રસૂત્યા
અશ્વિનોર્બાહુભ્યામિત્યાહાશ્વિનૌ હિ દેવાનામધ્વર્યૂ આસ્તાં પૂષ્ણો
હસ્તાભ્યામિત્યાહ યત્યૈ પશવો વૈ સોમો વ્યાન ઉપાꣳશુસવનો
યદુપાꣳશુસવનમભિ મિમીતે વ્યાનમેવ પશુષુ દધાતીન્દ્રાય
ત્વેન્દ્રાય ત્વેતિ મિમીત ઇન્દ્રાય હિ સોમ આહ્રિયતે પઞ્ચ કૃત્વો યજુષા
મિમીતે
૧૭ પઞ્ચાક્ષરા પઙ્ક્તિઃ પાઙ્ક્તો યજ્ઞો યજ્ઞમેવાવ રુંધે
પઞ્ચ કૃત્વસ્તૂષ્ણીં દશ સં પદ્યન્તે દશાક્ષરા વિરાડન્નં
વિરાડ્વિરાજૈવાન્નાદ્યમવ રુંધે શ્વાત્રાઃ સ્થ વૃત્રતુર ઇત્યાહૈષ
વા અપાꣳ સોમપીથો ય એવં વેદ નાપ્સ્વાર્તિમાર્ચ્છતિ યત્તે સોમ દિવિ
જ્યોતિરિત્યાહૈભ્ય એવૈનં
૧૮ લોકેભ્યઃ સંભરતિ સોમો વૈ રાજા દિશોઽભ્યધ્યાયથ્સ દિશોઽનુ
પ્રાવિશત્પ્રાગપાગુદગધરાગિત્યાહ દિગ્ભ્ય એવૈનꣳ સંભરત્યથો
દિશ એવાસ્મા અવ રુંધેઽંબ નિષ્વરેત્યાહ કામુકા એનગ્ગ્ સ્ત્રિયો
ભવન્તિ ય એવં વેદ યત્તે સોમાદાભ્યં નામ જાગૃવીત્યા
૧૯ હૈષ વૈ સોમસ્ય સોમપીથો ય એવં વેદ ન સૌમ્યામાર્તિમાર્ચ્છતિ
ઘ્નન્તિ વા એતથ્સોમં યદભિષુણ્વન્ત્યꣳશૂનપ ગૃહ્ણાતિ ત્રાયત
એવૈનં પ્રાણા વા અꣳશવઃ પશવઃ સોમોઽꣳશૂન્ પુનરપિ સૃજતિ

પ્રાણાનેવ પશુષુ દધાતિ દ્વૌદ્વાવપિ સૃજતિ તસ્માદ્વૌદ્વૌ પ્રાણાઃ ॥

૬। ૪। ૪॥ યજુષા મિમીત એનં જાગૃવીતિ ચતુશ્ચત્વારિँ શચ્ચ ॥ ૬। ૪। ૪॥

૨૦ પ્રાણો વા એષ યદુપાँ શુર્યદુપાગ્શ્વગ્રા ગ્રહા ગૃહ્યન્તે
પ્રાણમેવાનુ પ્ર યન્ત્યરુણો હ સ્માહૌપવેશિઃ પ્રાતઃસવન એવા હં
યજ્ઞँ સગ્ગ્ સ્થાપયામિ તેન તતઃ સરँ સ્થિતેન ચરામીત્યષ્ટૌ
કૃત્વોઽગ્રેઽભિ ષુણોત્યષ્ટાક્ષરા ગાયત્રી ગાયત્રં પ્રાતઃસવનં
પ્રાતઃસવનમેવ તેનાપ્નોત્યેકાદશ કૃત્વો દ્વિતીયમેકાદશાક્ષરા
ત્રિષ્ટુપ્ત્રૈષ્ટુભં માધ્યંદિનँ

૨૧ સવનં માધ્યંદિનમેવ સવનં તેનાપ્નોતિ દ્વાદશ
કૃત્વસ્તૃતીયં દ્વાદશાક્ષરા જગતી જાગતં તૃતીયસવનં
તૃતીયસવનમેવ તેનાપ્નોત્યેતાँ હ વાવ સ યજ્ઞસ્ય
સરँ સ્થિતિમુવાચાસ્કન્દાયાસ્કન્નँ હિ તદ્યદ્યજ્ઞસ્ય
સરँ સ્થિતસ્ય સ્કન્દત્યથો ખલ્વાહુર્ગાયત્રી વાવ પ્રાતઃસવને નાતિવાદ
ઇત્યનતિવાદુક એનં ભ્રાતૃવ્યો ભવતિ ય એવં વેદ તસ્માદષ્ટાવષ્ટૌ

૨૨ કૃત્વોઽભિષુત્યં બ્રહ્મવાદિનો વદન્તિ પવિત્રવન્તોઽન્યે ગ્રહા
ગૃહ્યન્તે કિં પવિત્ર ઉપાँ શુરિતિ વાક્પવિત્ર ઇતિ બ્રૂયાદ્વાચસ્પતયે
પવસ્વ વાજિન્નિત્યાહ વાચૈવૈનં પવયતિ વૃષ્ણો અँ શુભ્યામિત્યાહ
વૃષ્ણો હ્યેતાવँ શૂ યૌ સોમસ્ય ગભસ્તિપૂત ઇત્યાહ ગભસ્તિના
હ્યેનં પવયતિ દેવો દેવાનાં પવિત્રમસીત્યાહ દેવો હ્યેષ

૨૩ સન્દેવાનાં પવિત્રં યેષાં ભાગોઽસિ તેભ્યસ્ત્વેત્યાહ યેષાગ્ હ્યેષ
ભાગસ્તેભ્ય એનં ગૃહ્ણાતિ સ્વાંકૃતોઽસીત્યાહ પ્રાણમેવ સ્વમકૃત
મધુમતીર્ન ઇષસ્કૃધીત્યાહ સર્વમેવાસ્મા ઇદગ્ગ્ સ્વદયતિ
વિશ્વેભ્યસ્ત્વેન્દ્રિયેભ્યો દિવ્યેભ્યઃ પાર્થિવેભ્ય ઇત્યાહોભયેષ્વેવ
દેવમનુષ્યેષુ પ્રાણાન્દધાતિ મનસ્ત્વા

૨૪ ઽષ્ટ્વિત્યાહ મન એવાશ્નુત ઉર્વન્તરિક્ષમન્વિહીત્યાહાન્તરિક્ષદેવત્યો
હિ પ્રાણઃ સ્વાહા ત્વા સુભવઃ સૂર્યાયેત્યાહ પ્રાણા વૈ સ્વભવસો દેવાસ્તેષ્વેવ
પરોઽક્ષં જુહોતિ દેવેભ્યસ્ત્વા મરીચિપેભ્ય ઇત્યાહાદિત્યસ્ય વૈ રશ્મયો

દેવા મરીચિપાસ્તેષાં તદ્ભાગધેયં તાનેવ તેન પ્રીણાતિ યદિ કામયેત
વર્ષુકઃ પર્જન્યઃ

૨૫ સ્યાદિતિ નીચા હસ્તેન નિ મૃજ્યાદ્વૃષ્ટિમેવ નિ યચ્છતિ યદિ
કામયેતાવર્ષુકઃ સ્યાદિત્યુત્તાનેન નિ મૃજ્યાદ્વૃષ્ટિમેવોદ્યચ્છતિ
યદ્યભિચરેદમું જહ્યથ ત્વા હોષ્યામીતિ બ્રૂયાદાહુતિમેવૈનં
પ્રેપ્સન્ હન્તિ યદિ દૂરે સ્યાદા તમિતોસ્તિષ્ઠેત્ પ્રાણમેવાસ્યાનુગત્ય હન્તિ
યદ્યભિચરેદમુષ્ય

૨૬ ત્વા પ્રાણે સાદયામીતિ સાદયેદસન્નો વૈ પ્રાણઃ પ્રાણમેવાસ્ય સાદયતિ
ષડ્ભિરꣳશુભિઃ પવયતિ ષડ્વા ઋતવ ઋતુભિરેવૈનં
પવયતિ ત્રિઃ પવયતિ ત્રય ઇમે લોકા એભિરેવૈનં લોકૈઃ પવયતિ
બ્રહ્મવાદિનો વદન્તિ કસ્માથ્સત્યાત્ત્રયઃ પશૂનાꣳ હસ્તાદાના ઇતિ
યત્ત્રિરુપાꣳશુꣳ હસ્તેન વિગૃહ્ણાતિ તસ્માત્ત્રયઃ પશૂનાꣳ
હસ્તાદાનાઃ પુરુષો હસ્તી મર્કટઃ ॥ ૬। ૪। ૫॥ માધ્યન્દિનમષ્ટાવષ્ટાવેષ
મનસ્ત્વા પર્જન્યોઽમુષ્ય પુરુષો દ્વે ચ ॥ ૬। ૪। ૫॥

૨૭ દેવા વૈ યદ્યજ્ઞેઽકુર્વત તદસુરા અકુર્વત તે દેવા
ઉપાꣳશૌ યજ્ઞꣳ સગ્ગ્સ્થાપ્યમપશ્યન્તમુપાꣳશૌ
સમસ્થાપયન્તેઽસુરા વજ્રમુદ્યત્ય દેવાનભ્યાયન્ત તે દેવા બિભ્યત
ઇન્દ્રમુપાધાવન્તાનિન્દ્રોઽન્તર્યામેણાન્તરધત્ત તદન્તર્યામસ્યાન્તર્યામત્વં
યદન્તર્યામો ગૃહ્યતે ભ્રાતૃવ્યાનેવ તદ્યજમાનોઽન્તર્ધત્તેઽન્તસ્તે

૨૮ દધામિ દ્યાવાપૃથિવી અન્તરુર્વન્તરિક્ષમિત્યાહૈભિરેવ
લોકૈર્યજમાનો ભ્રાતૃવ્યાનન્તર્ધત્તે તે દેવા અમન્યન્તેન્દ્રો વા
ઇદમભૂદ્યદ્વયગ્ગ્ સ્મ ઇતિ તેઽબ્રુવન્મઘવન્નનુ ન આ ભજેતિ
સજોષા દેવૈરવરૈઃ પરૈશ્ચેત્યબ્રવીદ્યે ચૈવ દેવાઃ પરે યે ચાવરે
તાનુભયા

૨૯ નન્વાભજથ્સજોષા દેવૈરવરૈઃ પરૈશ્ચેત્યાહ યે ચૈવ દેવાઃ
પરે યે ચાવરે તાનુભયાનન્વાભજત્યન્તર્યામે મઘવન્માદયસ્વેત્યાહ
યજ્ઞાદેવ યજમાનં નાન્તરેત્યુપયામગૃહીતોઽસીત્યાહાપાનસ્ય ધૃત્યૈ

યદુભાવપવિત્રૌ ગૃહ્યેયાતાં પ્રાણમપાનોઽનુ ન્યૃચ્છેત્પ્રમાયુકઃ
સ્યાત્પવિત્રવાનન્તર્યામો ગૃહ્યતે

૩૦ પ્રાણાપાનયોર્વિધૃત્યૈ પ્રાણાપાનૌ વા એતૌ યદુપાગ્શ્વન્તર્યામૌ વ્યાન
ઉપાꣳશુ સવનો યં કામયેત પ્રમાયુકઃ સ્યાદિત્યસગ્ગ્સ્પૃષ્ટૌ તસ્ય
સાદયેદ્વ્યાનેનૈવાસ્ય પ્રાણાપાનૌ વિ ચ્છિનત્તિ તાજક્પ્ર મીયતે યં કામયેત
સર્વમાયુરિયાદિતિ સરꣳસ્પૃષ્ટૌ તસ્ય સાદયેદ્વ્યાનેનૈવાસ્ય
પ્રાણાપાનૌ સં તનોતિ સર્વમાયુરેતિ ॥ ૬। ૪। ૬॥ ત ઉભયાન્ગૃહ્યતે
ચતુશ્ચત્વારિꣳશચ્ચ ॥ ૬। ૪। ૬॥

૩૧ વાગ્વા એષા યદૈન્દ્રવાયવો યદૈન્દ્રવાયવાગ્રા ગ્રહા ગૃહ્યન્તે
વાચમેવાનુ પ્ર યન્તિ વાયું દેવા અબ્રુવન્થ્સોમꣳ રાજાનꣳ
હનામેતિ સોઽબ્રવીદ્વરં વૃણૈ મદગ્રા એવ વો ગ્રહા ગૃહ્યાન્તા ઇતિ
તસ્માદૈન્દ્રવાયવાગ્રા ગ્રહા ગૃહ્યન્તે તમઘ્નન્થ્સોઽપૂયત્તં દેવા
નોપાધૃષ્ણુવન્તે વાયુમબ્રુવન્નિમં નઃ સ્વદયે

૩૨ તિ સોઽબ્રવીદ્વરં વૃણૈ મદ્દેવત્યાન્યેવ વઃ પાત્રાણ્યુચ્યાન્તા ઇતિ
તસ્માન્નાના દેવત્યાનિ સન્તિ વાયવ્યાન્યુચ્યન્તે તમેભ્યો વાયુરેવાસ્વદયત્
તસ્માદ્યત્પૂયતિ તત્પ્રવાતે વિષજન્તિ વાયુર્હિ તસ્ય પવયિતા સ્વદયિતા
તસ્ય વિગ્રહણં નાવિન્દન્થ્ સાદિતિરબ્રવીદ્વરં વૃણા અથ મયા
વિ ગૃહ્ણીધ્વં મદ્દેવત્યા એવ વઃ સોમાઃ

૩૩ સન્ના અસન્નિત્યુપયામગૃહીતોઽસીત્યાહાદિતિદેવત્યાસ્તેન યાનિ
હિ દારુમયાણિ પાત્રાણ્યસ્યૈતાનિ યોનેઃ સંભૂતાનિ યાનિ મૃન્મયાનિ
સાક્ષાત્તાન્યસ્યૈ તસ્માદેવમાહ વાગ્ વૈ પરાચ્યવ્યાકૃતાવદત્તે દેવા
ઇન્દ્રમબ્રુવન્નિમાં નો વાચં વ્યાકુર્વિતિ સોઽબ્રવીદ્વરં વૃણૈ મહ્યં
ચૈવૈષ વાયવે ચ સહ ગૃહ્યાતા ઇતિ તસ્માદૈન્દ્રવાયવઃ સહ
ગૃહ્યતે તામિન્દ્રો મધ્યતોઽવક્રમ્ય વ્યાકરોત્તસ્માદિયં વ્યાકૃતા
વાગુદ્યતે તસ્માત્સકૃદિન્દ્રાય મધ્યતો ગૃહ્યતે દ્વિર્વાયવે દ્વૌ હિ સ
વરાવવૃણીત ॥ ૬। ૪। ૭॥ સ્વદય સોમાઃ સહાઽષ્ટાવિꣳશતિશ્ચ ॥ ૬। ૪। ૭॥

૩૪ મિત્રં દેવા અબ્રુવન્થ્સોમꣳ રાજાનꣳ હનામેતિ સોઽબ્રવીન્નાહꣳ

સર્વસ્ય વા અહં મિત્રમસ્મીતિ તમબ્રુવન્ હનામૈવેતિ સોઽબ્રવીદ્વરં
વૃણૈ પયસૈવ મે સોમગ્ગ્ં શ્રીણન્નિતિ તસ્માન્મૈત્રાવરુણં પયસા શ્રીણન્તિ
તસ્માત્પશવોઽપાક્રામન્મિત્રઃ સન્ક્રૂરમકરિતિ ક્રૂરમિવ ખલુ વા એષ
૩૫ કરોતિ યઃ સોમેન યજતે તસ્માત્પશવોઽપ ક્રામન્તિ યન્મૈત્રાવરુણં
પયસા શ્રીણાતિ પશુભિરેવ તન્મિત્રꣳ સમર્ધયતિ
પશુભિર્યજમાનં પુરા ખલુ વાવૈવં મિત્રોઽવેદપમત્ક્રૂરં
ચક્રુષઃ પશવઃ ક્રમિષ્યન્તીતિ તસ્માદેવમવૃણીત વરુણં દેવા
અબ્રુવન્ત્વયા ꣳશભુવા સોમꣳ રાજાનꣳ હનામેતિ સોઽબ્રવીદ્વરં
વૃણૈ મહ્યં ચૈ
૩૬ વૈષ મિત્રાય ચ સહ ગૃહ્યાતા ઇતિ તસ્માન્મૈત્રાવરુણઃ સહ
ગૃહ્યતે તસ્માદ્રાજ્ઞા રાજાનમꣳશભુવા ઘ્નન્તિ વૈશ્યેન
વૈશ્યꣳશૂદ્રેણ શૂદ્રં ન વા ઇદં દિવા ન નક્તમાસીદવ્યાવૃત્તં
તે દેવા મિત્રાવરુણાવબ્રુવન્નિદં નો વિ વાસયતમિતિ તાવબ્રૂતાં વરં
વૃણાવહા એક એવાવત્પૂર્વો ગ્રહો ગૃહ્યાતા ઇતિ તસ્માદૈન્દ્રવાયવઃ
પૂર્વો મૈત્રાવરુણાદ્ગૃહ્યતે પ્રાણાપાનૌ હ્યેતૌ યદુપાગ્શ્વન્તર્યામૌ
મિત્રોઽહરજનયદ્વરુણો રાત્રિં તતો વા ઇદં વ્યૌચ્છદ્યન્મૈત્રાવરુણો
ગૃહ્યતે વ્યુષ્ટ્યૈ ॥ ૬। ૪। ૮॥ એષ ચૈન્દ્રવાયવો દ્વાવિꣳશતિશ્ચ ॥ ૬। ૪। ૮॥
૩૭ યજ્ઞસ્ય શિરોઽચ્છિદ્યત તે દેવા અશ્વિનાવબ્રુવન્ભિષજૌ વૈ સ્થ
ઇદં યજ્ઞસ્ય શિરઃ પ્રતિ ધત્તમિતિ તાવબ્રૂતાં વરં વૃણાવહૈ
ગ્રહ એવ નાવત્રાપિ ગૃહ્યતામિતિ તાભ્યામેતમાશ્વિનમગૃહ્ણન્તતો
વૈ તૌ યજ્ઞસ્ય શિરઃ પ્રત્યધત્તાં યદાશ્વિનો ગૃહ્યતે યજ્ઞસ્ય
નિષ્કૃત્યૈ તૌ દેવા અબ્રુવન્નપૂતૌ વા ઇમૌ મનુષ્યચરૌ
૩૮ ભિષજાવિતિ તસ્માદ્બ્રાહ્મણેન ભેષજં ન કાર્યમપૂતો
હ્યે ૨ ષોઽમેધ્યો યો ભિષક્તૌ બહિષ્પવમાનેન પવયિત્વા
તાભ્યામેતમાશ્વિનમગૃહ્ણન્તસ્માદ્બહિષ્પવમાને સ્તુત આશ્વિનો
ગૃહ્યતે તસ્માદેવં વિદુષા બહિષ્પવમાન ઉપસદ્યઃ પવિત્રં
વૈ બહિષ્પવમાન આત્માનમેવ પવયતે તયોસ્ત્રેધા ભૈષજ્યં વિ

ન્યદધુરગ્નૌ તૃતીયમપ્સુ તૃતીયં બ્રાહ્મણે તૃતીયં તસ્માદુદપાત્ર
૩૯ મુપનિધાય બ્રાહ્મણં દક્ષિણતો નિષાદ્ય ભેષજં કુર્યાદ્યાવદેવ
ભેષજં તેન કરોતિ સમર્ધુકમસ્ય કૃતં ભવતિ બ્રહ્મવાદિનો
વદન્તિ કસ્માથ્સત્યાદેકપાત્રા દ્વિદેવત્યા ગૃહ્યન્તે દ્વિપાત્રા હૂયન્ત
ઇતિ યદેકપાત્રા ગૃહ્યન્તે તસ્માદેકોઽન્તરતઃ પ્રાણો દ્વિપાત્રા હૂયન્તે
તસ્માદ્વૌદ્વૌ બહિષ્ટાત્પ્રાણાઃ પ્રાણા વા એતે યદ્વિદેવત્યાઃ પશવ
ઇડા યદિડાં પૂર્વાં દ્વિદેવત્યેભ્ય ઉપહ્વયેત
૪૦ પશુભિઃ પ્રાણાનન્તર્દધીત પ્રમાયુકઃ
સ્યાદ્વિદેવત્યાન્ભક્ષયિત્વેડામુપ હ્વયતે પ્રાણાનેવાત્મન્ધિત્વા પશૂનુપ
હ્વયતે વાગ્વા ઐન્દ્રવાયવશ્ચક્ષુર્મૈત્રાવરુણઃ શ્રોત્રમાશ્વિનઃ
પુરસ્તાદૈન્દ્રવાયવં ભક્ષયતિ તસ્માત્પુરસ્તાદ્વાચા વદતિ
પુરસ્તાન્મૈત્રાવરુણં તસ્માત્પુરસ્તાચ્ચક્ષુષા પશ્યતિ સર્વતઃ
પરિહારમાશ્વિનં તસ્માથ્સર્વતઃ શ્રોત્રેણ શ૰ૃણોતિ પ્રાણા વા એતે
યદ્વિદેવત્યા
૪૧ અરિક્તાનિ પાત્રાણિ સાદયતિ તસ્માદરિક્તા અન્તરતઃ પ્રાણા યતઃ ખલુ
વૈ યજ્ઞસ્ય વિતતસ્ય ન ક્રિયતે તદનુ યજ્ઞꣳ રક્ષાꣳસ્યવ
ચરન્તિ યદરિક્તાનિ પાત્રાણિ સાદયતિ ક્રિયમાણમેવ તદ્યજ્ઞસ્ય શયે
રક્ષસામનન્વવચારાય દક્ષિણસ્ય હવિર્ધાનસ્યોત્તરસ્યાં વર્તન્યાꣳ
સાદયતિ વાચ્યેવ વાચં દધાત્યા તૃતીયસવનાત્પરિ શેરે યજ્ઞસ્ય
સંતત્યૈ ॥ ૬। ૪। ૯॥ મનુષ્ય ચરાવુદપાત્રમુપહ્વયેત દ્વિદેવત્યાઃ
ષટ્ ચત્વારિꣳશચ્ચ ॥ ૬। ૪। ૯॥
૪૨ બૃહસ્પતિર્દેવાનાં પુરોહિત આસીચ્છણ્ડામર્કાવસુરાણાં બ્રહ્મણ્વન્તો
દેવા આસન્બ્રહ્મણ્વન્તોઽસુરાસ્તે ૨ ઽન્યોઽન્યં નાશક્નુવન્નભિ ભવિતું
તે દેવાઃ શણ્ડામર્કાવુપામન્ત્રયન્ત તાવબ્રૂતાં વરં વૃણાવહૈ ગ્રહાવેવ
નાવત્રાપિ ગૃહ્યેતામિતિ તાભ્યામેતૌ શુક્રામન્થિનાવગૃહ્ણન્તતો
દેવા અભવન્પરાસુરા યસ્યૈવં વિદુષઃ શુક્રામન્થિનૌ ગૃહ્યેતે
ભવત્યાત્મના પરા

૪૩ ઽસ્ય ભ્રાતૃવ્યો ભવતિ તૌ દેવા અપનુદ્યાત્મન
ઇન્દ્રાયાજુહવુરપનુત્તૌ શણ્ડામર્કૌ સહામુનેતિ બ્રૂયાદ્યં
દ્વિષ્યાદ્યમેવ દ્વેષ્ટિ તેનૈનૌ સહાપ નુદતે સ પ્રથમઃ
સંકૃતિર્વિશ્વકર્મેત્યેવૈનાવાત્મન ઇન્દ્રાયાજુહવુરિન્દ્રો હ્યેતાનિ
રૂપાણિ કરિક્રદચરદસૌ વા આદિત્યઃ શુક્રશ્ચન્દ્રમા
મન્થ્યપિગૃહ્ય પ્રાઞ્ચૌ નિ
૪૪ ષ્ક્રામતસ્તસ્માત્પ્રાઞ્ચૌ યન્તૌ ન પશ્યન્તિ પ્રત્યઞ્ચાવાવૃત્ય
જુહુતસ્માત્પ્રત્યઞ્ચૌ યન્તૌ પશ્યન્તિ ચક્ષુષી વા એતે
યજ્ઞસ્ય યચ્છુક્રામન્થિનૌ નાસિકોત્તરવેદિરભિતઃ પરિક્રમ્ય
જુહુતસ્તસ્માદભિતો નાસિકાં ચક્ષુષી તસ્માન્નાસિકયા ચક્ષુષી
વિધૃતે સર્વતઃ પરિ ક્રામતો રક્ષસામપહત્યૈ દેવા વૈ યાઃ
પ્રાચીરાહુતીરજુહવુર્યે પુરસ્તાદસુરા આસન્તાગ્સ્તાભિઃ પ્રા
૪૫ ઽણુદન્ત યાઃ પ્રતીચીર્યે પશ્ચાદસુરા આસન્તાગ્સ્તાભિરપાનુદન્ત
પ્રાચીરન્યા આહુતયો હૂયન્તે પ્રત્યઞ્ચૌ શુક્રામન્થિનૌ પશ્ચાચ્ચૈવ
પુરસ્તાચ્ચ યજમાનો ભ્રાતૃવ્યાન્પ્ર ણુદતે તસ્માત્પરાચીઃ
પ્રજાઃ પ્ર વીયન્તે પ્રતીચીર્જાયન્તે શુક્રામન્થિનૌ વા અનુ પ્રજાઃ પ્ર
જાયન્તેઽત્રીશ્ચાદ્યાશ્ચ સુવીરાઃ પ્રજાઃ પ્રજનયન્પરીહિ શુક્રઃ
શુક્રશોચિષા
૪૬ સુપ્રજાઃ પ્રજાઃ પ્રજનયન્પરીહિ મન્થી મન્થિશોચિષેત્યાહૈતા વૈ
સુવીરા યા અત્રીરેતાઃ સુપ્રજા યા આદ્યા ય એવં વેદાત્ર્યસ્ય પ્રજા જાયતે
નાદ્યા પ્રજાપતેરક્ષ્યશ્વયત્ તત્ પરાપતત્ તદ્વિકઙ્કતં પ્રાવિશત્
તદ્વિકઙ્કતે નારમત તદ્યવં પ્રાવિશત્તદ્યવેઽરમત તદ્યવસ્ય
૪૭ યવત્વં યદ્વૈકઙ્કતં મન્થિપાત્રં ભવતિ સક્તુભિઃ શ્રીણાતિ
પ્રજાપતેરેવ તચ્ચક્ષુઃ સંભરતિ બ્રહ્મવાદિનો વદન્તિ
કસ્માત્સત્યાન્મન્થિપાત્રꣳ સદો નાશ્નુત ઇત્યાર્તપાત્રꣳ હીતિ
બ્રૂયાદ્યદશ્નુવીતાન્ધોઽધ્વર્યુઃ સ્યાદાર્તિમાર્ચ્છેત્તસ્માન્નાશ્નુતે ॥ ૬। ૪। ૧૦॥ આત્મના પરા નિશ્પ્ર શુક્રશોચિષા
યવસ્ય સપ્ત ત્રિꣳશચ્ચ ॥

૬। ૪। ૧૦॥

૪૮ દેવા વૈ યદ્યજ્ઞેઽકુર્વત તદસુરા અકુર્વત તે દેવા
આગ્રયણાગ્રાન્ગ્રહાનપશ્યન્તાનગૃહ્ણત તતો વૈ તેઽગ્રં પર્યાયન્
યસ્યૈવં વિદુષ આગ્રયણાગ્રા ગ્રહા ગૃહ્યન્તેઽગ્રમેવ સમાનાનાં
પર્યેતિ રુગ્ણવત્યર્ચા ભ્રાતૃવ્યવતો ગૃહ્ણીયાદ્ભ્રાતૃવ્યસ્યૈવ
રુક્ત્વાગ્ર ँ સમાનાનાં પર્યેતિ યે દેવા દિવ્યેકાદશ સ્થેત્યાહૈ

૪૯ તાવતીર્વૈ દેવતાસ્તાભ્ય એવૈન ँ સર્વાભ્યો ગૃહ્ણાત્યેષ તે
યોનિર્વિશ્વેભ્યસ્ત્વા દેવેભ્ય ઇત્યાહ વૈશ્વદેવો હ્યેષ દેવતયા
વાગ્વૈ દેવેભ્યોઽપાક્રામદ્યજ્ઞાયાતિષ્ઠમાના તે દેવા વાચ્યપક્રાન્તાયાં
તૂષ્ણીં ગ્રહાનગૃહ્ણત સામન્યત વાગન્તર્યન્તિ વૈ મેતિ સાગ્રયણં
પ્રત્યાગચ્છત્તદાગ્રયણસ્યાગ્રયણત્વં

૫૦ તસ્માદાગ્રયણે વાગ્વિ સૃજ્યતે યત્તૂષ્ણીં પૂર્વે ગ્રહા ગૃહ્યન્તે
યથા ત્સારીયતિ મ આખ ઇયતિ નાપ રાત્સ્યામીત્યુપાવસૃજત્યેવમેવ
તદધ્વર્યુરાગ્રયણં ગૃહીત્વા યજ્ઞમારભ્ય વાચં વિ સૃજતે
ત્રિર્હિં કરોત્યુદ્ગાતૄનેવ તદ્વૃણીતે પ્રજાપતિર્વા એષ યદાગ્રયણો
યદાગ્રયણં ગૃહીત્વા હિં કરોતિ પ્રજાપતિરેવ

૫૧ તત્પ્રજા અભિ જિઘ્રતિ તસ્માદ્વત્સં જાતં ગૌરભિ જિઘ્રત્યાત્મા
વા એષ યજ્ઞસ્ય યદાગ્રયણઃ સવનેસવનેઽભિ ગૃહ્ણાત્યાત્મન્નેવ
યજ્ઞ ँ સં તનોત્યુપરિષ્ટાદા નયતિ રેત એવ તદ્દધાત્યધસ્તાદુપ
ગૃહ્ણાતિ પ્ર જનયત્યેવ તદ્બ્રહ્મવાદિનો વદન્તિ કસ્માત્સત્યાદ્ગાયત્રી
કનિષ્ઠા છંદસા ँ સતી સર્વાણિ સવનાનિ વહતીત્યેષ વૈ
ગાયત્રિયૈ વત્સો યદાગ્રયણસ્તમેવ તદભિનિવર્ત ँ સર્વાણિ
સવનાનિ વહતિ તસ્માદ્વત્સમપાકૃતં ગૌરભિ નિવર્તતે ॥ ૬। ૪। ૧૧॥

આહાઽગ્રયણત્વં પ્રજાપતિરેવેતિ વિ ँ શતિશ્ચ ॥ ૬। ૪। ૧૧॥

યજ્ઞેન તા ઉપયડ્ભિર્દેવા વૈ યજ્ઞમાગ્નીધ્રે બ્રહ્મવાદિનઃ સ ત્વૈ
દેવસ્ય ગ્રાવાણં પ્રાણો વા ઉપાગ્શ્વગ્રા દેવા વા ઉપા ँ શૌ વાગ્વૈ
મિત્રં યજ્ઞસ્ય બૃહસ્પતિર્દેવા વા આગ્રયણાગ્રાનેકાદશ ॥ યજ્ઞેન

લોકે પશુમાન્થ્સ્યાથ્સવનં માધ્યંદિનં વાગ્વા અરિક્તાનિ તત્પ્રજા એક
પંચાશત્ ॥ યજ્ઞેન નિ વર્તતે ॥

## ષષ્ઠકાણ્ડે પઞ્ચમઃ પ્રશ્નઃ ૫

૧ ઇન્દ્રો વૃત્રાય વજ્રમુદયચ્છથ્સ વૃત્રો
વજ્રાદુદ્યતાદબિભેથ્સોઽબ્રવીન્મા મે પ્ર હારસ્તિ વા ઇદં મયિ
વીર્યં તત્તે પ્ર દાસ્યામીતિ તસ્મા ઉક્થ્યં પ્રાયચ્છત્તસ્મૈ
દ્વિતીયમુદયચ્છથ્સોઽબ્રવીન્મા મે પ્ર હારસ્તિ વા ઇદં મયિ વીર્યં
તત્તે પ્ર દાસ્યામીતિ
૨ તસ્મા ઉક્થ્યમેવ પ્રાયચ્છત્તસ્મૈ તૃતીયમુદયચ્છત્તં
વિષ્ણુરન્વતિષ્ઠત જહીતિ સોઽબ્રવીન્મા મે પ્ર હારસ્તિ વા ઇદં મયિ
વીર્યં તત્તે પ્ર દાસ્યામીતિ તસ્મા ઉક્થ્યમેવ પ્રાયચ્છત્તં નિર્માયં
ભૂતમહન્, યજ્ઞો હિ તસ્ય માયાસીદ્યદુક્થ્યો ગૃહ્યત ઇન્દ્રિયમેવ
૩ તદ્વીર્યં યજમાનો ભ્રાતૃવ્યસ્ય વૃઙ્ક્ત ઇન્દ્રાય ત્વા બૃહદ્વતે
વયસ્વત ઇત્યાહેન્દ્રાય હિ સ તં પ્રાયચ્છત્તસ્મૈ ત્વા વિષ્ણવે
ત્વેત્યાહ યદેવ વિષ્ણુરન્વતિષ્ઠત જહીતિ તસ્માદ્વિષ્ણુમન્વાભજતિ
ત્રિર્નિર્ગૃહ્ણાતિ ત્રિર્હિ સ તં તસ્મૈ પ્રાયચ્છદેષ તે યોનિઃ
પુનર્હવિરસીત્યાહ પુનઃ પુનર્
૪ હ્યસ્માન્નિર્ગૃહ્ણાતિ ચક્ષુર્વા એતદ્યજ્ઞસ્ય યદુક્થ્યસ્તસ્માદુક્થ્યꣳ
હુતꣳ સોમા અન્વાયન્તિ તસ્માદાત્મા ચક્ષુરન્વેતિ તસ્માદેકં
યન્તં બહવોઽનુ યન્તિ તસ્માદેકો બહૂનાં ભદ્રો ભવતિ
તસ્માદેકો બહ્વીર્જાયા વિન્દતે યદિ કામયેતાધ્વર્યુરાત્માનં
યજ્ઞયશસેનાર્પયેયમિત્યન્તરાહવનીયં ચ હવિર્ધાનં ચ
તિષ્ઠન્નવ નયે
૫ દાત્માનમેવ યજ્ઞયશસેનાર્પયતિ યદિ કામયેત યજમાનં
યજ્ઞયશસેનાર્પયેયમિત્યન્તરા સદોહવિર્ધાને તિષ્ઠન્નવ

નયેદ્યજમાનમેવ યજ્ઞયશસેનાર્પયતિ યદિ કામયેત સદસ્યાન્
યજ્ઞયશસેનાર્પયેયમિતિ સદ આલભ્યાવ નયેત્સદસ્યાનેવ
યજ્ઞયશસેનાર્પયતિ ॥ ૬। ૫। ૧॥ ઇતીન્દ્રિયમેવ પુનઃ
પુનર્નયેત્ત્રયસ્ત્રિꣳ શચ્ચ ॥ ૬। ૫। ૧॥

૬ આયુર્વા એતદ્યજ્ઞસ્ય યદ્ધ્રુવ ઉત્તમો ગ્રહાણાં ગૃહ્યતે
તસ્માદાયુઃ પ્રાણાનામુત્તમં મૂર્ધાનં દિવો અરતિં પૃથિવ્યા ઇત્યાહ
મૂર્ધાનમેવૈનꣳ સમાનાનાં કરોતિ વૈશ્વાનરમૃતાય જાતમગ્નિમિત્યાહ
વૈશ્વાનરꣳ હિ દેવતયાયુરુભયતોવૈશ્વાનરો ગૃહ્યતે તસ્માદુભયતઃ
પ્રાણા અધસ્તાચ્ચોપરિષ્ટાચ્ચાર્ધિનોઽન્યે ગ્રહા ગૃહ્યન્તેઽર્ધી
ધ્રુવસ્તસ્મા

૭ દર્ધ્યં વાઙ્પ્રાણોઽન્યેષાં પ્રાણાનામુપોપ્તેઽન્યે ગ્રહાઃ
સાદ્યન્તેઽનુપોપ્તે ધ્રુવસ્તસ્માદસ્થ્નાન્યાઃ પ્રજાઃ પ્રતિતિષ્ઠન્તિ
માꣳ સેનાન્યા અસુરા વા ઉત્તરતઃ પૃથિવીં પર્યાચિકીર્ષન્તાં દેવા
ધ્રુવેણાદૃꣳ હન્તદ્ધ્રુવસ્ય ધ્રુવત્વં યદ્ધ્રુવ ઉત્તરતઃ સાદ્યતે
ધૃત્યા આયુર્વા એતદ્યજ્ઞસ્ય યદ્ધ્રુવ આત્મા હોતા યદ્ધોતૃચમસે
ધ્રુવમવનયત્યાત્મન્નેવ યજ્ઞસ્યા

૮ ઽયુર્દધાતિ પુરસ્તાદુક્થસ્યાવનીય ઇત્યાહુઃ પુરસ્તાદ્ધ્યાયુષો
ભુઙ્ક્તે મધ્યતોઽવનીય ઇત્યાહુર્મધ્યમેન હ્યાયુષો ભુઙ્ક્ત
ઉત્તરાર્ધેઽવનીય ઇત્યાહુરુત્તમેન હ્યાયુષો ભુઙ્ક્તે વૈશ્વદેવ્યામૃચિ
શસ્યમાનાયામવ નયતિ વૈશ્વદેવ્યો વૈ પ્રજાઃ પ્રજાસ્વેવાયુર્દધાતિ ॥

૬। ૫। ૨॥ ધૃવસ્તસ્માદેવ યજ્ઞસ્યૈકાન્ન ચત્વારિꣳ શચ્ચ ॥ ૬। ૫। ૨॥

૯ યજ્ઞેન વૈ દેવાઃ સુવર્ગં લોકમાયન્તેઽમન્યન્ત મનુષ્યા
નોઽન્વાભવિષ્યન્તીતિ તે સંવથ્સરેણ યોપયિત્વા સુવર્ગં
લોકમાયન્તમૃષય ઋતુગ્રહૈરેવાનુ પ્રાજાનન્ યદૃતુગ્રહા
ગૃહ્યન્તે સુવર્ગસ્ય લોકસ્ય પ્રજ્ઞાત્યૈ દ્વાદશ ગૃહ્યન્તે દ્વાદશ
માસાઃ સંવથ્સરઃ સંવથ્સરસ્ય પ્રજ્ઞાત્યૈ સહ પ્રથમૌ ગૃહ્યેતે
સહોત્તમૌ તસ્માદ્વૌદ્વાવૃતૂ ઉભયતો મુખમૃતુપાત્રંભવતિ કો

૧૦ હિ તદ્વેદ યત ઋતૂનાં મુખમૃતુના પ્રેષ્યેતિ ષટ્કૃત્વ આહ
ષડ્વા ઋતવ ઋતૂનેવ પ્રીણાત્યૃતુભિરિતિ ચતુશ્ચતુષ્પદ એવ
પશૂન્પ્રીણાતિ દ્વિઃ પુનરૃતુનાહ દ્વિપદ એવ પ્રીણાત્યૃતુના પ્રેષ્યેતિ
ષટ્કૃત્વ આહર્તુભિરિતિ ચતુસ્તસ્માચ્ચતુષ્પાદઃ પશવ ઋતૂનુપ
જીવન્તિ દ્વિઃ

૧૧ પુનરૃતુનાહ તસ્માદ્દ્વિપાદશ્ચતુષ્પદઃ પશૂનુપ જીવન્ત્યૃતુના
પ્રેષ્યેતિ ષટ્કૃત્વ આહર્તુભિરિતિ ચતુર્દ્વિઃ પુનરૃતુનાહાક્રમણમેવ
તથ્સેતું યજમાનઃ કુરુતે સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ નાન્યોઽન્યમનુ
પ્ર પદ્યેત યદન્યોઽન્યમનુ પ્ર પદ્યેતર્તુરૃતુમનુ પ્ર પદ્યેતર્તવો
મોહુકાઃ સ્યુઃ

૧૨ પ્રસિદ્ધમેવાધ્વર્યુર્દક્ષિણેન પ્ર પદ્યતે પ્રસિદ્ધં
પ્રતિ પ્રસ્થાતોત્તરેણ તસ્માદાદિત્યઃ ષણ્માસો દક્ષિણેનૈતિ
ષડુત્તરેણોપયામગૃહીતોઽસિ સ ँ સર્પોઽસ્ય ँ હસ્પત્યાય ત્વેત્યાહાસ્તિ
ત્રયોદશો માસ ઇત્યાહુસ્તમેવ તત્પ્રીણાતિ ॥ ૬। ૫। ૩॥ કો જીવન્તિ
દ્વિસ્યુશ્ચતુસ્ત્રિ ँ શચ્ચ ॥ ૬। ૫। ૩॥

૧૩ સુવર્ગાય વા એતે લોકાય ગૃહ્યન્તે યદૃતુગ્રહા જ્યોતિરિન્દ્રાગ્ની
યદૈન્દ્રાગ્નમૃતુપાત્રેણ ગૃહ્ણાતિ જ્યોતિરેવાસ્મા ઉપરિષ્ટાદ્ધાતિ
સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યા ઓજોભૃતૌ વા એતૌ દેવાનાં યદિન્દ્રાગ્ની
યદૈન્દ્રાગ્નો ગૃહ્યત ઓજ એવાવ રુંધે વૈશ્વદેવ ँ શુક્રપાત્રેણ
ગૃહ્ણાતિ વૈશ્વદેવ્યો વૈ પ્રજા અસાવાદિત્યઃ શુક્રો યદ્વૈશ્વદેવ ँ
શુક્રપાત્રેણ ગૃહ્ણાતિ તસ્માદસાવાદિત્યઃ

૧૪ સર્વાઃ પ્રજાઃ પ્રત્યઙ્ઙુદેતિ તસ્માથ્સર્વ એવ મન્યતે માં
પ્રત્યુદગાદિતિ વૈશ્વદેવ ँ શુક્રપાત્રેણ ગૃહ્ણાતિ વૈશ્વદેવ્યો વૈ
પ્રજાસ્તેજઃ શુક્રો યદ્વૈશ્વદેવ ँ શુક્રપાત્રેણ ગૃહ્ણાતિ પ્રજાસ્વેવ
તેજો દધાતિ ॥ ૬। ૫। ૪॥ તસ્માદસાવાદિત્યસ્ત્રિ ँ શચ્ચ ॥ ૬। ૫। ૪॥

૧૫ ઇન્દ્રો મરુદ્ભિઃ સાંવિદ્યેન માધ્યંદિને સવને વૃત્રમહન્

યન્માધ્યંદિને સવને મરુત્વતીયા ગૃહ્યન્તે વાર્ત્રઘ્ના એવ તે યજમાનસ્ય
ગૃહ્યન્તે તસ્ય વૃત્રં જઘ્નુષ ઋતવોઽમુહ્યન્થ્સ ઋતુપાત્રેણ
મરુત્વતીયાનગૃહ્ણાત્તતો વૈ સ ઋતૂન્પ્રાજાનાદ્યદૃતુપાત્રેણ મરુત્વતીયા
ગૃહ્યન્ત ઋતૂનાં પ્રજ્ઞાત્યૈ વજ્રં વા એતં યજમાનો ભ્રાતૃવ્યાય
પ્ર હરતિ યન્મરુત્વતીયા ઉદેવ પ્રથમેન
૧૬ યચ્છતિ પ્ર હરતિ દ્વિતીયેન સ્તૃણુતે તૃતીયેનાયુધં વા
એતદ્યજમાનઃ સરꣳ સ્કુરુતે યન્મરુત્વતીયા ધનુરેવ પ્રથમો
જ્યા દ્વિતીય ઇષુસ્તૃતીયઃ પ્રત્યેવ પ્રથમેન ધત્તે વિ સૃજતિ
દ્વિતીયેન વિધ્યતિ તૃતીયેનેન્દ્રો વૃત્રꣳ હત્વા પરાં
પરાવતમગચ્છદપારાધમિતિ મન્યમાનઃ સ હરિતોઽભવથ્સ
એતાન્મરુત્વતીયાનાત્મસ્પરણાનપશ્યત્તાનગૃહ્ણીત
૧૭ પ્રાણમેવ પ્રથમેનાસ્પૃણુતાપાનં દ્વિતીયેનાત્માનં
તૃતીયેનાત્મસ્પરણા વા એતે યજમાનસ્ય ગૃહ્યન્તે યન્મરુત્વતીયાઃ
પ્રાણમેવ પ્રથમેન સ્પૃણુતેઽપાનં દ્વિતીયેનાત્માનં તૃતીયેનેન્દ્રો
વૃત્રમહન્તં દેવા અબ્રુવન્મહાન્, વા અયમભૂદ્યો વૃત્રમવધીદિતિ
તન્મહેન્દ્રસ્ય મહેન્દ્રત્વꣳ સ એતં માહેન્દ્રમુદ્ધારમુદહરત
વૃત્રꣳ હત્વાન્યાસુ દેવતાસ્વધિ યન્માહેન્દ્રો ગૃહ્યત ઉદ્ધારમેવ
તં યજમાન ઉદ્ધરતેઽન્યાસુ પ્રજાસ્વધિ શુક્રપાત્રેણ ગૃહ્ણાતિ
યજમાનદેવત્યો વૈ માહેન્દ્રસ્તેજઃ શુક્રો યન્માહેન્દ્રꣳ શુક્રપાત્રેણ
ગૃહ્ણાતિ યજમાન એવ તેજો દધાતિ ॥ ૬। ૫। ૫॥ પ્રથમેનાઽગૃહ્ણીત
દેવતાસ્વષ્ટાવિꣳશતિશ્ચ ॥ ૬। ૫। ૫॥
૧૮ અદિતિઃ પુત્રકામા સાધ્યેભ્યો દેવેભ્યો બ્રહ્મૌદનમપચત્તસ્યા
ઉચ્છેષણમદદુસ્તત્પ્રાશ્નાત્સા રેતોઽધત્ત તસ્યૈ ચત્વાર આદિત્યા
અજાયન્ત સા દ્વિતીયમપચથ્સામન્યતોચ્છેષણાન્મ ઇમેઽજ્ઞત યદગ્રે
પ્રાશિષ્યામીતો મે વસીયાꣳસો જનિષ્યન્ત ઇતિ સાગ્રે પ્રાશ્નાત્સા રેતોઽધત્ત
તસ્યૈ વ્યૃદ્ધમાણ્ડમજાયત સાદિત્યેભ્ય એવ
૧૯ તૃતીયમપચદ્ભોગાય મ ઇદગ્ગ્ શ્રાન્તમસ્ત્વિતિ તેઽબ્રુવન્વરં

વૃણામહૈ યોऽતો જાયાતા અસ્માકꣳ સ એકોऽસદ્યોऽસ્ય પ્રજાયામૃધ્યાતા
અસ્માકં ભોગાય ભવાદિતિ તતો વિવસ્વાનાદિત્યોऽજાયત તસ્ય વા ઇયં
પ્રજા યન્મનુષ્યાસ્તાસ્વેક એવર્ધો યો યજતે સ દેવાનાં ભોગાય ભવતિ
દેવા વૈ યજ્ઞાદ્

૨૦ રુદ્રમન્તરાયન્થ્સ આદિત્યાનન્વાક્રમત તે દ્વિદેવત્યાન્પ્રાપદ્યન્ત
તાન્ન પ્રતિ પ્રાયચ્છન્તસ્માદપિ વધ્યં પ્રપન્નં ન પ્રતિ પ્ર યચ્છન્તિ
તસ્માદ્દ્વિદેવત્યેભ્ય આદિત્યો નિર્ગૃહ્યતે યદુચ્છેષણાદજાયન્ત
તસ્માદુચ્છેષણાદ્ગૃહ્યતે તિસૃભિરૃગ્ભિર્ગૃહ્ણાતિ માતા પિતા
પુત્રસ્તદેવ તન્મિથુનમુલ્બં ગર્ભો જરાયુ તદેવ ત

૨૧ ન્મિથુનં પશવો વા એતે યદાદિત્ય ઊર્ગ્દધિ દધ્ના મધ્યતઃ
શ્રીણાત્યૂર્જમેવ પશૂનાં મધ્યતો દધાતિ શ◌ૃતાતઙ્ક્યેન મેધ્યત્વાય
તસ્માદામા પક્વં દુહે પશવો વા એતે યદાદિત્યઃ પરિશ્રિત્ય ગૃહ્ણાતિ
પ્રતિરુધ્યૈવાસ્મૈ પશૂન્ગૃહ્ણાતિ પશવો વા એતે યદાદિત્ય એષ રુદ્રો
યદગ્નિઃ પરિશ્રિત્ય ગૃહ્ણાતિ રુદ્રાદેવ પશૂનન્તર્દધા

૨૨ ત્યેષ વૈ વિવસ્વાનાદિત્યો યદુપાꣳશુસવનઃ સ એતમેવ સોમપીથં
પરિ શય આ તૃતીયસવનાદ્વિવસ્વ આદિત્યૈષ તે સોમપીથ ઇત્યાહ
વિવસ્વન્તમેવાદિત્યꣳ સોમપીથેન સમર્ધયતિ યા દિવ્યા વૃષ્ટિસ્તયા
ત્વા શ્રીણામીતિ વૃષ્ટિકામસ્ય શ્રીણીયાદ્વૃષ્ટિમેવાવ રુંધે યદિ
તાજક્ પ્ર સ્કન્દેદ્વર્ષુકઃ પર્જન્યઃ સ્યાદ્યદિ ચિરમવર્ષુકો
ન સાદયત્યસન્નાદ્ધિ પ્રજાઃ પ્રજાયન્તે નાનુ વષટ્કરોતિ
યદનુવષટ્કુર્યાદ્રુદ્રં પ્રજા અન્વવસૃજેન્ન હુત્વાન્વીક્ષેત
યદન્વીક્ષેત ચક્ષુરસ્ય પ્રમાયુકગ્ગ્ સ્યાત્તસ્માન્નાન્વીક્ષ્યઃ ॥ ૬। ૫। ૬॥

એવ યજ્ઞાજ્જરાયુ તદેવ તદન્તર્દધાતિ ન સપ્તવિꣳશતિશ્ચ ॥ ૬। ૫। ૬॥

૨૩ અન્તર્યામપાત્રેણ સાવિત્રમાગ્રયણાદ્ગૃહ્ણાતિ પ્રજાપતિર્વા
એષ યદાગ્રયણઃ પ્રજાનાં પ્રજનનાય ન સાદયત્યસન્નાદ્ધિ
પ્રજાઃ પ્રજાયન્તે નાનુ વષટ્કરોતિ યદનુવષટ્કુર્યાદ્રુદ્રં પ્રજા
અન્વવસૃજેદેષ વૈ ગાયત્રો દેવાનાં યથ્સવિતૈષ ગાયત્રિયૈ લોકે

ગૃહ્યતે યદાગ્રયણો યદન્તર્યામપાત્રેણ સાવિત્રમાગ્રયણાદ્ગૃહ્ણાતિ
સ્વાદેવૈનં યોનેર્નિર્ગૃહ્ણાતિ વિશ્વે
૨૪ દેવાસ્તૃતીયઁ સવનં નોદયચ્છન્તે સવિતારં
પ્રાતઃસવનભાગઁ સન્તં તૃતીયસવનમભિ પર્યણયન્તતો વૈ
તે તૃતીયઁ સવનમુદયચ્છન્, યત્તૃતીયસવને સાવિત્રો
ગૃહ્યતે તૃતીયસ્ય સવનસ્યોદ્યત્યૈ સવિતૃપાત્રેણ વૈશ્વદેવં
કલશાદ્ગૃહ્ણાતિ વૈશ્વદેવ્યો વૈ પ્રજા વૈશ્વદેવઃ કલશઃ સવિતા
પ્રસવાનામીશે યત્સવિતૃપાત્રેણ વૈશ્વદેવં કલશાદ્ગૃહ્ણાતિ
સવિતૃપ્રસૂત એવાસ્મૈ પ્રજાઃ પ્ર
૨૫ જનયતિ સોમે સોમમભિ ગૃહ્ણાતિ રેત એવ તદ્ધાતિ સુશર્માસિ
સુપ્રતિષ્ઠાન ઇત્યાહ સોમે હિ સોમમભિગૃહ્ણાતિ પ્રતિષ્ઠિત્યા એતસ્મિન્વા અપિ
ગ્રહે મનુષ્યેભ્યો દેવેભ્યઃ પિતૃભ્યઃ ક્રિયતે સુશર્માસિ સુપ્રતિષ્ઠાન
ઇત્યાહ મનુષ્યેભ્ય એવૈતેન કરોતિ બૃહદિત્યાહ દેવેભ્ય એવૈતેન
કરોતિ નમ ઇત્યાહ પિતૃભ્ય એવૈતેન કરોત્યેતાવતીર્વૈ દેવતાસ્તાભ્ય
એવૈનઁ સર્વાભ્યો ગૃહ્ણાત્યેષ તે યોનિર્વિશ્વેભ્યસ્ત્વા દેવેભ્ય ઇત્યાહ
વૈશ્વદેવો હ્યેષઃ ॥ ૬। ૫। ૭॥ વિશ્વે પ્ર પિતૃભ્ય એવૈતેન કરોત્યેકાન્ન
વિઁશતિશ્ચ ॥ ૬। ૫। ૭॥
૨૬ પ્રાણો વા એષ યદુપાઁશુર્યદુપાઁશુપાત્રેણ
પ્રથમશ્ચોત્તમશ્ચ ગ્રહૌ ગૃહ્યેતે પ્રાણમેવાનુ પ્રયન્તિ
પ્રાણમનૂદ્યન્તિ પ્રજાપતિર્વા એષ યદાગ્રયણઃ પ્રાણ ઉપાઁશુઃ પત્નીઃ
પ્રજાઃ પ્ર જનયન્તિ યદુપાઁશુપાત્રેણ પાત્નીવતમાગ્રયણાદ્ગૃહ્ણાતિ
પ્રજાનાં પ્રજનનાય તસ્માત્પ્રાણં પ્રજા અનુ પ્ર જાયન્તે દેવા વા ઇત
ઇતઃ પત્નીઃ સુવર્ગં
૨૭ લોકમજિગાઁ સન્તે સુવર્ગં લોકં ન પ્રાજાનન્ત એતં
પાત્નીવતમપશ્યન્તમગૃહ્ણત તતો વૈ તે સુવર્ગં લોકં પ્રાજાનન્,
યત્પાત્નીવતો ગૃહ્યતે સુવર્ગસ્ય લોકસ્ય પ્રજ્ઞાત્યૈ સ સોમો
નાતિષ્ઠત સ્ત્રીભ્યો ગૃહ્યમાણસ્તં ઘૃતં વજ્રં કૃત્વાઘ્નન્તં

નિરિન્દ્રિયં ભૂતમગૃહ્ણન્તસ્માત્ત્રિયો નિરિન્દ્રિયા અદાયાદીરપિ
પાપાત્પુ ꣳ સ ઉપસ્તિતરં

૨૮ વદન્તિ યદ્ધૃતેન પાત્નીવતગ્ગ્ શ્રીણાતિ વજ્રેણૈવૈનં વશે
કૃત્વા ગૃહ્ણાત્યુપયામગૃહીતોઽસીત્યાહેયં વા ઉપયામસ્તસ્માદિમાં
પ્રજા અનુ પ્ર જાયન્તે બૃહસ્પતિસુતસ્ય ત ઇત્યાહ બ્રહ્મ વૈ દેવાનાં
બૃહસ્પતિર્બ્રહ્મણૈવાસ્મૈ પ્રજાઃ પ્ર જનયતીન્દો ઇત્યાહ રેતો વા ઇન્દૂ
રેત એવ તદ્દધાતીન્દ્રિયાવ ઇ

૨૯ ત્યાહ પ્રજા વા ઇંદ્રિયં પ્રજા એવાસ્મૈ પ્ર જનયત્યગ્ના ૩ ઇત્યાહાગ્નિર્વૈ
રેતોધાઃ પત્નીવ ઇત્યાહ મિથુનત્વાય સજૂર્દેવેન ત્વષ્ટ્રા સોમં
પિબેત્યાહ ત્વષ્ટા વૈ પશૂનાં મિથુનાના ꣳ રૂપકૃદ્રૂપમેવ
પશુષુ દધાતિ દેવા વૈ ત્વષ્ટારમજિઘા ꣳ સન્ત્સ પત્નીઃ પ્રાપદ્યત
તં ન પ્રતિ પ્રાયચ્છન્તસ્માદપિ

૩૦ વધ્યં પ્રપન્નં ન પ્રતિ પ્ર યચ્છન્તિ તસ્માત્પાત્નીવતે
ત્વષ્ટેઽપિ ગૃહ્યતે ન સાદયત્યસન્નાદ્ધિ પ્રજાઃ પ્રજાયન્તે નાનુ
વષટ્કરોતિ યદનુવષટ્કુર્યાદ્રુદ્રં પ્રજા અન્વવસૃજેદ્યન્નાનુ
વષટ્કુર્યાદશાન્તમગ્નીથ્સોમં ભક્ષયેદુપાગ્શ્વનુ વષટ્કરોતિ ન રુદ્રં
પ્રજા અન્વવસૃજતિ શાન્તમગ્નીથ્સોમં ભક્ષયત્યગ્નીન્નેષ્ટુરુપસ્થમા
સીદ

૩૧ નેષ્ટઃ પત્નીમુદાનયેત્યાહાગ્નીદેવ નેષ્ટરિ રેતો દધાતિ નેષ્ટા
પત્નિયામુદ્ગાત્રા સં ખ્યાપયતિ પ્રજાપતિર્વા એષ યદુદ્ગાતા પ્રજાનાં
પ્રજનનાયાપ ઉપ પ્ર વર્તયતિ રેત એવ તથ્સિઞ્ચત્યૂરુણોપ પ્ર
વર્તયત્યૂરુણા હિ રેતઃ સિચ્યતે નગ્નં કૃત્યોરુમુપ પ્ર વર્તયતિ યદા
હિ નગ્ન ઊરુર્ભવત્યથ મિથુની ભવતોઽથ રેતઃ સિચ્યતેઽથ
પ્રજાઃ પ્ર જાયન્તે ॥ ૬। ૫। ૮॥ પત્નીઃ સુવર્ગમુપસ્તિતરમિન્દ્રિયાવ ઇત્યપિ
સીદ મિથુન્યષ્ટૌ ચ ॥ ૬। ૫। ૮॥

૩૨ ઇન્દ્રો વૃત્રમહન્તસ્ય શીર્ષકપાલમુદૌબ્જથ્સ દ્રોણકલશોઽભવત્
તસ્માથ્સોમઃ સમસ્રવથ્સ હારિયોજનોઽભવત્તં વ્યચિકિથ્સજ્જુહવાની ૩

મા હૌષા ૩ મિતિ સોઽમન્યત યદ્ધોષ્યામ્યામꣳ હોષ્યામિ યન્ન હોષ્યામિ
યજ્ઞવેશસં કરિષ્યામીતિ તમધ્રિયત હોતુꣳ સોઽગ્નિરબ્રવીન્ન
મય્યામꣳ હોષ્યસીતિ તં ધાનાભિરશ્રીણાત્
33 તꣳ શૃતં ભૂતમજુહોદ્યદ્ધાનાભિર્ હારિયોજનગ્ગ્
શ્રીણાતિ શૃતત્વાય શૃતમેવૈનં ભૂતં જુહોતિ બહ્વીભિઃ
શ્રીણાત્યેતાવતીરેવાસ્યામુષ્મિꣳલ્લોકે કામદુઘા ભવન્ત્યથો
ખલ્વાહુરેતા વા ઇન્દ્રસ્ય પૃશ્નયઃ કામદુઘા યદ્ધારિયોજનીરિતિ
તસ્માદ્બહ્વીભિઃ શ્રીણીયાદૃક્સામે વા ઇંદ્રસ્ય હરી સોમપાનૌ તયોઃ
પરિધય આધાનં યદપ્રહૃત્ય પરિધીઞ્જુહુયાદન્તરાધાનાભ્યાં
3૪ ઘાસં પ્ર યચ્છેત્પ્રહૃત્ય પરિધીઞ્જુહોતિ નિરાધાનાભ્યામેવ ઘાસં
પ્ર યચ્છત્યુન્નેતા જુહોતિ યાતયામેવ હ્યેતર્હ્યધ્વર્યુઃ સ્વગાકૃતો
યદધ્વર્યુર્જુહુયાદ્યથા વિમુક્તં પુનર્યુનક્તિ તાદૃગેવ
તચ્છીર્ષન્નધિ નિધાય જુહોતિ શીર્ષતો હિ સ સમભવદ્વિક્રમ્ય જુહોતિ
વિક્રમ્ય હીન્દ્રો વૃત્રમહન્થ્સમૃદ્ધ્યૈ પશવો વૈ હારિયોજનીર્યથ્સં
ભિન્દ્યાદલ્પા
૩૫ એનં પશવો ભુઞ્જન્ત ઉપ તિષ્ઠેરન્, યન્ન સંભિન્દ્યાદ્બહવ એનં
પશવોઽભુઞ્જન્ત ઉપ તિષ્ઠેરન્મનસા સંબાધત ઉભયં કરોતિ બહવ
એવૈનં પશવો ભુઞ્જન્ત ઉપ તિષ્ઠન્ત ઉન્નેતર્યુપહવમિચ્છન્તે
ય એવ તત્ર સોમપીથસ્તમેવાવ રુંધત ઉત્તરવેદ્યાં નિ વપતિ પશવો
વા ઉત્તરવેદિઃ પશવો હારિયોજનીઃ પશુષ્વેવ પશૂન્પ્રતિ ષ્ઠાપયન્તિ ॥
૬। ૫। ૯॥ અશ્રીણાદન્તરાધાનાભ્યામલ્પાઃ સ્થાપયન્તિ ॥ ૬। ૫। ૯॥
૩૬ ગ્રહાન્, વા અનુ પ્રજાઃ પશવઃ પ્ર જાયન્ત ઉપાગ્શ્વન્તર્યામાવજાવયઃ
શુક્રામન્થિનૌ પુરુષા ઋતુગ્રહાનેકશફા આદિત્યગ્રહં ગાવ
આદિત્યગ્રહો ભૂયિષ્ઠાભિરૃગ્ભિર્ગૃહ્યતે તસ્માદ્ગાવઃ પશૂનાં
ભૂયિષ્ઠા યત્ત્રિરુપાꣳશુꣳ હસ્તેન વિગૃહ્ણાતિ તસ્માદ્દ્વૌ ત્રીનજા
જનયત્યથાવયો ભૂયસીઃ પિતા વા એષ યદાગ્રયણઃ પુત્રઃ કલશો
યદાગ્રયણ ઉપદસ્યેત્કલશાદ્ગૃહ્ણીયાદ્યથા પિતા

૩૭ પુત્રં ક્ષિત ઉપધાવતિ તાદૃગેવ તદ્યત્કલશ
ઉપદસ્યેદાગ્રયણાદ્ગૃહ્ણીયાદ્યથા પુત્રઃ પિતરં ક્ષિત ઉપધાવતિ
તાદૃગેવ તદાત્મા વા એષ યજ્ઞસ્ય યદાગ્રયણો યદ્ગ્રહો વા કલશો
વોપદસ્યેદાગ્રયણાદ્ગૃહ્ણીયાદાત્મન એવાધિ યજ્ઞં નિષ્કરોત્યવિજ્ઞાતો
વા એષ ગૃહ્યતે યદાગ્રયણઃ સ્થાલ્યા ગૃહ્ણાતિ વાયવ્યેન જુહોતિ તસ્માદ્
૩૮ ગર્ભેણાવિજ્ઞાતેન બ્રહ્મહાવભૃથમ વયન્તિ પરા
સ્થાલીરસ્યન્ત્યુદ્વાયવ્યાનિ હરન્તિ તસ્માત્સ્ત્રિયં જાતાં
પરાસ્યન્ત્યુત્પુમાꣳ સꣳ હરન્તિ યત્પુરોરુચમાહ યથા વસ્યસ
આહરતિ તાદૃગેવ તદ્યદ્ગ્રહં ગૃહ્ણાતિ યથા વસ્યસ આહૃત્य
પ્રાહ તાદૃગેવ તદ્યથ્સાદયતિ યથા વસ્યસ ઉપનિધાયાપક્રામતિ
તાદૃગેવ તદ્યદ્વૈ યજ્ઞસ્ય સામ્ના યજુષા ક્રિયતે શિથિલં તદ્યદૃચા
તદ્દૃઢં પુરસ્તાદુપયામા યજુષા ગૃહ્યન્ત ઉપરિષ્ટાદુપયામા ઋચા
યજ્ઞસ્ય ધૃત્યૈ ॥ ૬। ૫। ૧૦॥ યથા પિતા તસ્માદપક્રામતિ તાદૃગેવ
તદ્યદષ્ટાદશ ચ ॥ ૬। ૫। ૧૦॥
૩૯ પ્રાન્યાનિ પાત્રાણિ યુજ્યન્તે નાન્યાનિ યાનિ પરાચીનાનિ પ્રયુજ્યન્તેઽમુમેવ
તૈર્લોકમભિ જયતિ પરાઙિવ હ્યસૌ લોકો યાનિ પુનઃ પ્રયુજ્યન્ત
ઇમમેવ તૈર્લોકમભિ જયતિ પુનઃપુનરિવ હ્યયં લોકઃ પ્રાન્યાનિ પાત્રાણિ
યુજ્યન્તે નાન્યાનિ યાનિ પરાચીનાનિ પ્રયુજ્યન્તે તાન્યન્વોષધયઃ પરા
ભવન્તિ યાનિ પુનઃ
૪૦ પ્રયુજ્યન્તે તાન્યન્વોષધયઃ પુનરા ભવન્તિ પ્રાન્યાનિ પાત્રાણિ યુજ્યન્તે
નાન્યાનિ યાનિ પરાચીનાનિ પ્રયુજ્યન્તે તાન્યન્વારણ્યાઃ પશવોઽરણ્યમપ
યન્તિ યાનિ પુનઃ પ્રયુજ્યન્તે તાન્યનુ ગ્રામ્યાઃ પશવો ગ્રામમુપાવયન્તિ
યો વૈ ગ્રહાણાં નિદાનં વેદ નિદાનવાન્ભવત્યાજ્યમિત્યુક્થ્યં તદ્વૈ ગ્રહાણાં
નિદાનં યદુપાꣳશુ શꣳસતિ ત
૪૧ દુપાꣳશ્વન્તર્યામયોર્યદુચ્ચૈસ્તદિતરેષાં ગ્રહાણામેતદ્વૈ ગ્રહાણાં
નિદાનં ય એવં વેદ નિદાનવાન્ભવતિ યો વૈ ગ્રહાણાં મિથુનં વેદ પ્ર

પ્રજયા પશુભિર્મિથુનૈર્જાયતે સ્થાલીભિરન્યે ગ્રહા ગૃહ્યન્તે
વાયવ્યૈરન્ય એતદ્વૈ ગ્રહાણાં મિથુનં ય એવં વેદ પ્ર પ્રજયા
પશુભિર્મિથુનૈર્જાયત ઇન્દ્રસ્ત્વષ્ટુઃ સોમમભીષહાપિબથ્સ વિષ્વઙ્
૪૨ વ્યાર્ચ્છથ્સ આત્મન્નારમણં નાવિન્દથ્સ એતાનનુસવનં
પુરોડાશાનપશ્યત્તાન્નિરવપત્તૈર્વૈ સ આત્મન્નારમણમકુરુત
તસ્માદનુસવનં પુરોડાશા નિરુપ્યન્તે તસ્માદનુસવનં પુરોડાશાનાં
પ્રાશ્નીયાદાત્મન્નેવારમણં કુરુતે નૈન ँ સોમોઽતિ પવતે બ્રહ્મવાદિનો
વદન્તિ નર્ચા ન યજુષા પઙ્ક્તિરાપ્યતેઽથ કિં યજ્ઞસ્ય પાઙ્ક્તત્વમિતિ
ધાનાઃ કરંભઃ પરિવાપઃ પુરોડાશઃ પયસ્યા તેન પઙ્ક્તિરાપ્યતે
તદ્યજ્ઞસ્ય પાઙ્ક્તત્વમ્ ॥ ૬। ૫। ૧૧॥ ભવન્તિ યાનિ પુનઃ શ ँ સતિ
તદ્વિષ્વઙ્ઙ્ચતુર્દશ ચ ॥ ૬। ૫। ૧૧॥

ઇન્દ્રો વૃત્રાયાયુર્વૈ યજ્ઞેન સુવર્ગાયેન્દ્રો મરુદ્ભિરદિતિરન્તર્યામ
પાત્રેણ પ્રાણ ઉપા ँ શુપાત્રેણેન્દ્રો વૃત્રમહન્તસ્ય
ગ્રહાન્પ્રાન્યાન્યેકાદશ ॥

ઇન્દ્રો વૃત્રાય પુનર્ ઋતુનાહ મિથુનં પશવો નેષ્ટઃ
પત્નીમુપાગ્શ્વન્તર્યામયોર્દ્વિ ચત્વારિ ँ શત્ ॥

ઇન્દ્રો વૃત્રાય પાઙ્ક્તત્વમ્ ॥

## ષષ્ઠકાણ્ડે ષષ્ઠઃ પ્રશ્નઃ ૬

૧ સુવર્ગાય વા એતાનિ લોકાય હૂયન્તે યદ્દાક્ષિણાનિ દ્વાભ્યાં ગાર્હપત્યે
જુહોતિ દ્વિપાદ્યજમાનઃ પ્રતિષ્ઠિત્યા આગ્નીધ્રે જુહોત્યન્તરિક્ષ એવા
ક્રમતે સદોઽભ્યૈતિ સુવર્ગમેવૈનં લોકં ગમયતિ સૌરીભ્યામૃગ્ભ્યાં
ગાર્હપત્યે જુહોત્યમુમેવૈનં લોક ँ સમારોહયતિ નયવત્યર્ચાગ્નીધ્રે
જુહોતિ સુવર્ગસ્ય લોકસ્યાભિનીત્યૈ દિવં ગચ્છ સુવઃ પતેતિ
હિરણ્ય ँ
૨ હુત્વોદ્ગૃહ્ણાતિ સુવર્ગમેવૈનં લોકં ગમયતિ રૂપેણ વો

રૂપમભ્યૈમીત્યાહ રૂપેણ હ્યાસાꣳ રૂપમભ્યૈતિ યદ્ધિરણ્યેન તુથો
વો વિશ્વવેદા વિ ભજત્વિત્યાહ તુથો હ સ્મ વૈ વિશ્વવેદા દેવાનાં
દક્ષિણા વિ ભજતિ તેનૈવૈના વિ ભજત્યેતત્તે અગ્ને રાધ
૩ ઐતિ સોમચ્યુતમિત્યાહ સોમચ્યુતગ્ગ્ હ્યસ્ય રાધ ઐતિ તન્મિત્રસ્ય
પથા નયેત્યાહ શાન્ત્યા ઋતસ્ય પથા પ્રેત ચન્દ્રદક્ષિણા
ઇત્યાહ સત્યં વા ઋતꣳ સત્યેનૈવૈના ઋતેન વિ ભજતિ યજ્ઞસ્ય
પથા સુવિતા નયન્તીરિત્યાહ યજ્ઞસ્ય હ્યેતાઃ પથા યન્તિ યદ્દક્ષિણા
બ્રાહ્મણમદ્ય રાધ્યાસ
૪ મૃષિમાર્ષેયમિત્યાહૈષ વૈ બ્રાહ્મણ ઋષિરાર્ષેયો યઃ
શુશ્રુવાન્તસ્માદેવમાહ વિ સુવઃ પશ્ય વ્યન્તરિક્ષમિત્યાહ
સુવર્ગમેવૈનં લોકં ગમયતિ યતસ્વ સદસ્યૈરિત્યાહ
મિત્રત્વાયાસ્મદ્દાત્રા દેવત્રા ગચ્છત મધુમતીઃ પ્ર દાતારમા
વિશતેત્યાહ વયમિહ પ્રદાતારઃ સ્મોઽસ્માનમુત્ર મધુમતીરા
વિશતેતિ
૫ વાવૈતદાહ હિરણ્યં દદાતિ જ્યોતિર્વૈ હિરણ્યં જ્યોતિરેવ પુરસ્તાદ્ધત્તે
સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યા અગ્નીધે દદાત્યગ્નિમુખાનેવર્તૂન્પ્રીણાતિ
બ્રહ્મણે દદાતિ પ્રસૂત્યૈ હોત્રે દદાત્યાત્મા વા એષ યજ્ઞસ્ય
યદ્ધોતાત્માનમેવ યજ્ઞસ્ય દક્ષિણાભિઃ સમર્ધયતિ ॥
૬। ૬। ૧॥ હિરણ્યꣳ રાધો રાધ્યાસમમુત્ર મધુમતીરા
વિશતેત્યષ્ટાત્રિꣳશચ્ચ ॥ ૬। ૬। ૧॥
૬ સમિષ્ટયજૂꣳષિ જુહોતિ યજ્ઞસ્ય સમિષ્ટ્યૈ યદ્વૈ યજ્ઞસ્ય
ક્રૂરં યદ્વિલિષ્ટં યદત્યેતિ યન્નાત્યેતિ યદતિકરોતિ યન્નાપિ કરોતિ
તદેવ તૈઃ પ્રીણાતિ નવ જુહોતિ નવ વૈ પુરુષે પ્રાણાઃ પુરુષેણ યજ્ઞઃ
સં મિતો યાવાનેવ યજ્ઞસ્તં પ્રીણાતિ ષડૃગ્મિયાણિ જુહોતિ ષડ્વા ઋતવ
ઋતૂનેવ પ્રીણાતિ ત્રીણિ યજૂꣳષિ
૭ ત્રય ઇમે લોકા ઇમાનેવ લોકાન્પ્રીણાતિ યજ્ઞ યજ્ઞં ગચ્છ યજ્ઞપતિં
ગચ્છેત્યાહ યજ્ઞપતિમેવૈનં ગમયતિ સ્વાં યોનિં ગચ્છેત્યાહ

સ્વામેવૈનં યોનિં ગમયત્યેષ તે યજ્ઞો યજ્ઞપતે સહસૂક્તવાકઃ સુવીર
ઇત્યાહ યજમાન એવ વીર્યં દધાતિ વાસિષ્ઠો હ સાત્યહવ્યો દેવભાગં
પપ્રચ્છ યથ્સૃઞ્જયાન્બહુયાજિનોઽયીયજો યજ્ઞે

૮ યજ્ઞં પ્રત્યતિષ્ઠિપા૩ યજ્ઞપતા૩ વિતિ સ હોવાચ યજ્ઞપતાવિતિ
સત્યાદ્વૈ સૃઞ્જયાઃ પરા બભૂવુરિતિ હોવાચ યજ્ઞે વાવ યજ્ઞઃ
પ્રતિષ્ઠાપ્ય આસીદ્યજમાનસ્યાપરાભાવાયેતિ દેવા ગાતુવિદો ગાતું વિત્ત્વા
ગાતુમિતેત્યાહ યજ્ઞ એવ યજ્ઞં પ્રતિ ષ્ઠાપયતિ યજમાનસ્યાપરાભાવાય
॥ ૬। ૬। ૨॥ યજૂꣳષિ યજ્ઞ એકચત્વારિꣳશચ્ચ ॥ ૬। ૬। ૨॥

૯ અવભૃથયજૂꣳષિ જુહોતિ યદેવાર્વાચીનમેકહાયનાદેનઃ
કરોતિ તદેવ તૈરવ યજતેઽપોઽવભૃથમવૈત્યપ્સુ વૈ વરુણઃ
સાક્ષાદેવ વરુણમવ યજતે વર્ત્મના વા અન્વિત્ય યજ્ઞꣳ
રક્ષાꣳસિ જિઘાꣳસન્તિ સામ્ના પ્રસ્તોતાન્વવૈતિ સામ વૈ રક્ષોહા
રક્ષસામપહત્યૈ ત્રિર્નિધનમુપૈતિ ત્રય ઇમે લોકા એભ્ય એવ
લોકેભ્યો રક્ષાગ્ં

૧૦ સ્યપ હન્તિ પુરુષઃ પુરુષો નિધનમુપૈતિ પુરુષઃ પુરુષો હિ
રક્ષસ્વી રક્ષસામપહત્યા ઉરુꣳ હિ રાજા વરુણશ્ચકારેત્યાહ
પ્રતિષ્ઠિત્યૈ શતં તે રાજન્ભિષજઃ સહસ્રમિત્યાહ ભેષજમેવાસ્મૈ
કરોત્યભિષ્ઠિતો વરુણસ્ય પાશ ઇત્યાહ વરુણપાશમેવાભિ તિષ્ઠતિ
બર્હિરભિ જુહોત્યાહુતીનાં પ્રતિષ્ઠિત્યા અથો અગ્નિવત્યેવ
જુહોત્યપબર્હિષઃ પ્રયાજાન્

૧૧ યજતિ પ્રજા વૈ બર્હિઃ પ્રજા એવ વરુણપાશાન્મુઞ્ચત્યાજ્યભાગૌ
યજતિ યજ્ઞસ્યૈવ ચક્ષુષી નાન્તરેતિ વરુણં યજતિ
વરુણપાશાદેવૈનં મુઞ્ચત્યગ્નીવરુણૌ યજતિ સાક્ષાદેવૈનં
વરુણપાશાન્મુઞ્ચત્યપબર્હિષાવનૂયાજૌ યજતિ પ્રજા વૈ બર્હિઃ પ્રજા
એવ વરુણપાશાન્મુઞ્ચતિ ચતુરઃ પ્રયાજાન્, યજતિ દ્વાવનૂયાજૌ ષટ્થ્સં
પદ્યન્તે ષડ્વા ઋતવ

૧૨ ઋતુષ્વેવ પ્રતિ તિષ્ઠત્યવભૃથ નિચઙ્કુણેત્યાહ યથોદિતમેવ

વરુણમવ યજતે સમુદ્રે તે હૃદયમપ્સ્વન્તરિત્યાહ
સમુદ્રે હ્યન્તર્વરુણઃ સં ત્વા વિશન્ત્વોષધીરુતાપ
ઇત્યાહાદ્ભિરેવૈનમોષધીભિઃ સમ્યઞ્ચં દધાતિ દેવીરાપ એષ વો
ગર્ભ ઇત્યાહ યથાયજુરેવૈતત્પશવો વૈ
૧૩ સોમો યદ્ભિન્દૂનાં ભક્ષયેત્પશુમાન્થ્સ્યાદ્વરુણસ્ત્વેનં ગૃહ્ણીયાદ્યન્ન
ભક્ષયેદપશુઃ સ્યાન્નૈનં વરુણો ગૃહ્ણીયાદુપસ્પૃશ્યમેવ
પશુમાન્ભવતિ નૈનં વરુણો ગૃહ્ણાતિ પ્રતિયુતો વરુણસ્ય પાશ
ઇત્યાહ વરુણપાશાદેવ નિર્મુચ્યતેઽપ્રતીક્ષમા યન્તિ વરુણસ્યાન્તર્હિત્યા
એધોઽસ્યેધિષીમહીત્યાહ સમિધૈવાગ્નિં નમસ્યન્ત ઉપાયન્તિ તેજોઽસિ
તેજો મયિ ધેહીત્યાહ તેજ એવાત્મન્ધત્તે ॥ ૬। ૬। ૩॥ રક્ષાઁસિ
પ્રયાજાનૃતવો વૈ નમસ્યન્તો દ્વાદશ ચ ॥ ૬। ૬। ૩॥
૧૪ સ્ફ્યેન વેદિમુદ્ધન્તિ રથાક્ષેણ વિ મિમીતે યૂપં મિનોતિ
ત્રિવૃતમેવ વજ્રઁસંભૃત્ય ભ્રાતૃવ્યાય પ્ર હરતિ સ્તૃત્યૈ
યદન્તર્વેદિ મિનુયાદ્દેવલોકમભિ જયેદ્યદ્બહિર્વેદિ મનુષ્યલોકં
વેદ્યન્તસ્ય સંધૌ મિનોત્યુભયોર્લોકયોરભિજિત્યા ઉપર સં મિતાં
મિનુયાત્પિતૃલોકકામસ્ય રશન સં મિતાં મનુષ્યલોકકામસ્ય ચષાલ
સં મિતામિન્દ્રિયકામસ્ય સર્વાન્થ્સમાન્પ્રતિષ્ઠા કામસ્ય યે ત્રયો
મધ્યમાસ્તાન્થ્સમાન્પશુકામસ્યૈતાન્, વા
૧૫ અનુ પશવ ઉપ તિષ્ઠન્તે પશુમાનેવ ભવતિ
વ્યતિષજેદિતરાન્પ્રજયૈવૈનં પશુભિર્વ્યતિષજતિ યં
કામયેત પ્રમાયુકઃ સ્યાદિતિ ગર્તમિતં તસ્ય મિનુયાદુત્તરાર્ધ્યં
વર્ષિષ્ઠમથ હ્રસીયાઁ સમેષા વૈ ગર્તમિદ્યસ્યૈવં મિનોતિ
તાજક્પ્ર મીયતે દક્ષિણાર્ધ્યં વર્ષિષ્ઠં મિનુયાથ્સુવર્ગકામસ્યાથ
હ્રસીયાઁ સમાક્રમણમેવ તથ્સેતું યજમાનઃ કુરુતે સુવર્ગસ્ય લોકસ્ય
સમષ્ટ્યૈ
૧૬ યદેકસ્મિન્, યૂપે દ્વે રશને પરિવ્યયતિ તસ્માદેકો દ્વે જાયે
વિન્દતે યન્નૈકાઁરશનાં દ્વયોર્યૂપયોઃ પરિવ્યયતિ તસ્માન્નૈકા

દ્વૌ પતી વિન્દતે યં કામયેત સ્ત્ર્યસ્ય જાયેતેત્યુપાન્તે તસ્ય
વ્યતિષજેત્સ્ત્ર્યેવાસ્ય જાયતે યં કામયેત પુમાનસ્ય જાયેતેત્યાન્તં તસ્ય
પ્ર વેષ્ટયેત્પુમાનેવાસ્ય
૧૭ જાયતેઽસુરા વૈ દેવાન્દક્ષિણત ઉપાનયન્તાન્દેવા
ઉપશયેનૈવાપાનુદન્ત તદુપશયસ્યોપશયત્વં યદ્દક્ષિણત ઉપશય
ઉપશયે ભ્રાતૃવ્યાપનુત્ત્યૈ સર્વે વા અન્યે યૂપાઃ પશુમન્તોઽથોપશય
એવાપશુસ્તસ્ય યજમાનઃ પશુર્યન્ન નિર્દિશેદાર્તિમાર્ચ્છેદ્યજમાનોઽસૌ
તે પશુરિતિ નિર્દિશેદ્યં દ્વિષ્યાદ્યમેવ
૧૮ દ્વેષ્ટિ તમસ્મૈ પશું નિર્દિશતિ યદિ ન દ્વિષ્યાદાખુસ્તે
પશુરિતિ બ્રૂયાન્ન ગ્રામ્યાન્પશૂન્ હિનસ્તિ નારણ્યાન્પ્રજાપતિઃ પ્રજા
અસૃજત સોઽન્નાદ્યેન વ્યાર્ધ્યત સ એતામેકાદશિનીમપશ્યત્તયા
વૈ સોઽન્નાદ્યમવારુંધ યદ્દશ યૂપા ભવન્તિ દશાક્ષરા વિરાડન્નં
વિરાડ્વિરાજૈવાન્નાદ્યમવ રુંધે
૧૯ ય એકાદશઃ સ્તન એવાસ્યૈ સ દુહ એવૈનાં તેન વજ્રો વા એષા સં
મીયતે યદેકાદશિની સેશ્વરા પુરસ્તાત્પ્રત્યઞ્ચં યજ્ઞँ સં
મર્દિતોર્યત્પાત્નીવતં મિનોતિ યજ્ઞસ્ય પ્રત્યુત્તબ્ધ્યૈ સયત્વાય ॥ ૬। ૬। ૪॥ વૈ સમષ્ટ્યૈ પુમાનેવાસ્ય યમેવ
રુન્ધે ત્રિँશચ્ચ ॥ ૬। ૬। ૪॥
૨૦ પ્રજાપતિઃ પ્રજા અસૃજત સ રિરિચાનોઽમન્યત સ
એતામેકાદશિનીમપશ્યત્તયા વૈ સ આયુરિંદ્રિયં વીર્યમાત્મન્નધત્ત
પ્રજા ઇવ ખલુ વા એષ સૃજતે યો યજતે સ એતર્હિ રિરિચાન
ઇવ યદેષૈકાદશિની ભવત્યાયુરેવ તયેંદ્રિયં વીર્યં યજમાન
આત્મન્ધત્તે પ્રૈવાગ્નેયેન વાપયતિ મિથુનँ સારસ્વત્યા કરોતિ રેતઃ
૨૧ સૌમ્યેન દધાતિ પ્ર જનયતિ પૌષ્ણેન બાર્હસ્પત્યો ભવતિ બ્રહ્મ વૈ
દેવાનાં બૃહસ્પતિર્બ્રહ્મણૈવાસ્મૈ પ્રજાઃ પ્ર જનયતિ વૈશ્વદેવો ભવતિ
વૈશ્વદેવ્યો વૈ પ્રજાઃ પ્રજા એવાસ્મૈ પ્ર જનયતીન્દ્રિયમેવૈન્દ્રેણાવ રુંધે
વિશં મારુતેનૌજો બલમૈન્દ્રાગ્નેન પ્રસવાય સાવિત્રો નિર્વરુણત્વાય
વારુણો મધ્યત ઐન્દ્રમા લભતે મધ્યત એવેન્દ્રિયં યજમાને દધાતિ

૨૨ પુરસ્તાદૈન્દ્રસ્ય  વૈશ્વદેવમા લભતે વૈશ્વદેવં વા અન્નમન્નમેવ
પુરસ્તાદ્ધત્તે  તસ્માત્પુરસ્તાદન્નમદ્યત ઐન્દ્રમાલભ્ય  મારુતમા
લભતે  વિડ્વૈ મરુતો  વિશમેવાસ્મા  અનુ  બધ્નાતિ  યદિ  કામયેત
યોઽવગતઃ  સોઽપ  રુધ્યતાં  યોઽપરુદ્ધઃ  સોઽવ  ગચ્છત્વિત્યૈન્દ્રસ્ય
લોકે વારુણમા લભેત વારુણસ્ય  લોક ઐન્દ્રં
૨૩ ય એવાવગતઃ  સોઽપ  રુધ્યતે  યોઽપરુદ્ધઃ  સોઽવ  ગચ્છતિ  યદિ
કામયેત પ્રજા મુહ્યેયુરિતિ  પશૂન્વ્યતિષજેત્પ્રજા એવ મોહયતિ
યદભિવાહતોઽપાં વારુણમાલભેત પ્રજા વરુણો ગૃહ્ણીયાદ્દક્ષિણત
ઉદઞ્ચમા લભતેઽપવાહતોઽપાં પ્રજાનામવરુણગ્રાહાય ॥ ૬। ૬। ૫॥ રેતો
યજમાને દધાતિ લોક ઐન્દ્રઁ સમ ત્રિઁશચ્ચ ॥ ૬। ૬। ૫॥
૨૪ ઇન્દ્રઃ  પત્નિયા  મનુમયાજયત્તાં પર્યગ્નિકૃતામુદસૃજત્તયા
મનુરાર્ધ્નોદ્યત્પર્યગ્નિકૃતં પાત્નીવતમુત્સૃજતિ  યામેવ
મનુરૃદ્ધિમાર્ધ્નોત્તામેવ યજમાન ઋધ્નોતિ યજ્ઞસ્ય  વા અપ્રતિષ્ઠિતાદ્યજ્ઞઃ
પરા  ભવતિ યજ્ઞં પરાભવન્તં  યજમાનોઽનુ  પરા  ભવતિ
યદાજ્યેન પાત્નીવતઁ સગ્ગ્સ્થાપયતિ યજ્ઞસ્ય  પ્રતિષ્ઠિત્યૈ યજ્ઞં
પ્રતિતિષ્ઠન્તં  યજમાનોઽનુ  પ્રતિ  તિષ્ઠતીષ્ટં વપયા
૨૫ ભવત્યનિષ્ટં વશયાથ  પાત્નીવતેન  પ્ર ચરતિ તીર્થ એવ પ્ર
ચરત્યથો  એતર્હ્યેવાસ્ય  યામસ્ત્વાષ્ટ્રો ભવતિ  ત્વષ્ટા  વૈ રેતસઃ
સિક્તસ્ય  રૂપાણિ  વિ કરોતિ  તમેવ વૃષાણં  પત્નીષ્વપિ  સૃજતિ
સોઽસ્મૈ રૂપાણિ  વિ કરોતિ ॥ ૬। ૬। ૬॥ વપયા  ષટ્ ત્રિઁશચ્ચ ॥ ૬। ૬। ૬॥
૨૬ ઘ્નન્તિ  વા એતત્સોમં  યદભિષુણ્વન્તિ  યત્સૌમ્યો ભવતિ  યથા
મૃતાયાનુસ્તરણીં  ઘ્નન્તિ  તાદૃગેવ તદ્યદુત્તરાર્ધે વા  મધ્યે  વા
જુહુયાદ્દેવતાભ્યઃ સમદં  દધ્યાદ્દક્ષિણાર્ધે જુહોત્યેષા વૈ પિતૃણાં
દિક્સ્વાયામેવ દિશિ પિતૄન્નિરવદયત ઉદ્ગાતૃભ્યો  હરન્તિ સામદેવત્યો
વૈ સૌમ્યો યદેવ સામ્નશ્છંબટ્કુર્વન્તિ  તસ્યૈવ સ શાન્તિરવે
૨૭ ક્ષન્તે પવિત્રં  વૈ સૌમ્ય આત્માનમેવ પવયન્તે  ય આત્માનં  ન

પરિપશ્યેદિતાસુઃ સ્યાદભિદદિં કૃત્વાવેક્ષેત તસ્મિન્, હ્યાત્માનં
પરિપશ્યત્યથો આત્માનમેવ પવયતે યો ગતમનાઃ સ્યાથ્સોઽવેક્ષેત
યન્મે મનઃ પરાગતં યદ્વા મે અપરાગતમ્ । રાજ્ઞા સોમેન તદ્વયમસ્માસુ
ધારયામસીતિ મન એવાત્મન્દાધાર

૨૮ ન ગતમના ભવત્યપ વૈ તૃતીયસવને યજ્ઞઃ
ક્રામતીજાનાદનીજાનમભ્યાગ્નાવૈષ્ણવ્યર્ચા ઘૃતસ્ય યજત્યગ્નિઃ સર્વા
દેવતા વિષ્ણુર્યજ્ઞો દેવતાશ્ચૈવ યજ્ઞં ચ દાધારોપાઁ શુ યજતિ
મિથુનત્વાય બ્રહ્મવાદિનો વદન્તિ મિત્રો યજ્ઞસ્ય સ્વિષ્ટં યુવતે વરુણો
દુરિષ્ટં ક્વ તર્હિ યજ્ઞઃ ક્વ યજમાનો ભવતીતિ યન્મૈત્રાવરુણીં
વશામાલભતે મિત્રેણૈવ

૨૯ યજ્ઞસ્ય સ્વિષ્ટઁ શમયતિ વરુણેન દુરિષ્ટં નાર્તિમાર્ચ્છતિ
યજમાનો યથા વૈ લાઙ્ગલેનોર્વરાં પ્રભિન્દન્ત્યેવમૃક્સામે યજ્ઞં
પ્ર ભિન્તો યન્મૈત્રાવરુણીં વશામાલભતે યજ્ઞાયૈવ પ્રભિન્નાય
મત્યમન્વવાસ્યતિ શાન્ત્યૈ યાતયામાનિ વા એતસ્ય છન્દાઁસિ ય
ઈજાનશ્છંદસામેષ રસો યદ્વશા યન્મૈત્રાવરુણીં વશામાલભતે
છન્દાગ્સ્યેવ પુનરા પ્રીણાત્યયાતયામત્વાયાથો છંદસ્સ્વેવ રસં દધાતિ ॥

૬। ૬। ૭॥ અવ દાધાર મિત્રેણૈવ પ્રીણાતિ ષટ્ ચ ॥ ૬। ૬। ૭॥

૩૦ દેવા વા ઇંદ્રિયં વીર્યં ઽઅ વ્યભજન્ત તતો યદત્યશિષ્યત
તદતિ ગ્રાહ્યા અભવન્તદતિ ગ્રાહ્યાણામતિ ગ્રાહ્યત્વં યદતિ ગ્રાહ્યા
ગૃહ્યન્ત ઇન્દ્રિયમેવ તદ્વીર્યં યજમાન આત્મન્ધત્તે તેજ
આગ્નેયેનેન્દ્રિયમૈન્દ્રેણ બ્રહ્મવર્ચસઁ સૌર્યેણોપસ્તંભનં
વા એતદ્યજ્ઞસ્ય યદતિગ્રાહ્યાશ્ચક્રે પૃષ્ઠાનિ યત્પૃષ્ઠ્યે ન
ગૃહ્ણીયાત્પ્રાઞ્ચં યજ્ઞં પૃષ્ઠાનિ સઁ શૃણીયુર્યદુક્થ્યે

૩૧ ગૃહ્ણીયાત્પ્રત્યઞ્ચં યજ્ઞમતિ ગ્રાહ્યાઃ સઁ શૃણીયુર્વિશ્વજિતિ
સર્વપૃષ્ઠે ગ્રહીતવ્યા યજ્ઞસ્ય સવીર્યત્વાય પ્રજાપતિર્દેવેભ્યો
યજ્ઞાન્વ્યાદિશથ્સ પ્રિયાસ્તનૂરપ ન્યધત્ત તદતિગ્રાહ્યા
અભવન્વિતનુસ્તસ્ય યજ્ઞ ઇત્યાહુર્યસ્યાતિગ્રાહ્યા ન ગૃહ્યન્ત

ઇત્યપ્યગ્નિષ્ટોમે ગ્રહીતવ્યા યજ્ઞસ્ય સતનુત્વાય દેવતા વૈ સર્વાઃ
સદૃશીરાસન્તા ન વ્યાવૃતમગચ્છન્તે દેવા
૩૨ એત એતાન્ગ્રહાનપશ્યન્તાનગૃહ્ણતાગ્નેયમગ્નિરૈન્દ્રમિન્દ્રઃ
સૌર્યꣳ સૂર્યસ્તતો વૈ તેઽન્યાભિર્દેવતાભિર્વ્યાવૃતમગચ્છન્,
યસ્યૈવં વિદુષ એતે ગ્રહા ગૃહ્યન્તે વ્યાવૃતમેવ પાપ્મના
ભ્રાતૃવ્યેણ ગચ્છતીમે લોકા જ્યોતિષ્મન્તઃ સમાવદ્વીર્યાઃ કાર્યા
ઇત્યાહુરાગ્નેયેનાસ્મિꣳ લ્લોકે જ્યોતિર્ધત્ત ઐન્દ્રેણાન્તરિક્ષ ઇન્દ્રવાયૂ હિ
સયુજૌ સૌર્યેણામુષ્મિꣳ લ્લોકે
૩૩ જ્યોતિર્ધત્તે જ્યોતિષ્મન્તોઽસ્મા ઇમે લોકા ભવન્તિ સમાવદ્વીર્યાનેનાન્કુરુત
એતાન્, વૈ ગ્રહાન્બંબાવિશ્વવયસાવવિત્તાં તાભ્યામિમે લોકાઃ
પરાઞ્ચશ્ચાર્વાઞ્ચશ્ચ પ્રાભુર્યસ્યૈવં વિદુષ એતે ગ્રહા ગૃહ્યન્તે
પ્રાસ્મા ઇમે લોકાઃ પરાઞ્ચશ્ચાર્વાઞ્ચશ્ચ ભાન્તિ ॥ ૬। ૬। ૮॥ ઉક્થ્યે દેવા
અમુષ્મિꣳ લ્લોક એકાન્ન ચત્વારિꣳ શચ્ચ ॥ ૬। ૬। ૮॥
૩૪ દેવા વૈ યદ્યજ્ઞેઽકુર્વત તદસુરા અકુર્વત તે દેવા અદાભ્યે
છન્દાꣳસિ સવનાનિ સમસ્થાપયન્તતો દેવા અભવન્પરાસુરા
યસ્યૈવં વિદુષોઽદાભ્યો ગૃહ્યતે ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો
ભવતિ યદ્વૈ દેવા અસુરાનદાભ્યેનાદભ્નુવન્તદદાભ્યસ્યાદાભ્યત્વં ય
એવં વેદ દભ્નોત્યેવ ભ્રાતૃવ્યં નૈનં ભ્રાતૃવ્યો દભ્નોત્યે
૩૫ ષા વૈ પ્રજાપતેરતિ મોક્ષિણી નામ તનૂર્યદદાભ્ય ઉપનદ્ધસ્ય
ગૃહ્ણાત્યતિમુક્ત્યા અતિપાપ્માનં ભ્રાતૃવ્યં મુચ્યતે ય એવં વેદ
ઘ્નન્તિ વા એતથ્સોમં યદભિષુણ્વન્તિ સોમે હન્યમાને યજ્ઞો હન્યતે
યજ્ઞે યજમાનો બ્રહ્મવાદિનો વદન્તિ કિં તદ્યજ્ઞે યજમાનઃ કુરુતે યેન
જીવન્થ્સુવર્ગં લોકમેતીતિ જીવગ્રહો વા એષ યદદાભ્યોઽનભિષુતસ્ય ગૃહ્ણાતિ
જીવન્તમેવૈનꣳ સુવર્ગં લોકં ગમયતિ વિ વા એતદ્યજ્ઞં છિન્દન્તિ
યદદાભ્યે સરꣳ સ્થાપયન્ત્યꣳ શૂનપિ સૃજતિ યજ્ઞસ્ય સંતત્યૈ ॥
૬। ૬। ૯॥ દભ્નોત્યનભિષુતસ્ય ગૃહ્ણાત્યેકાન્ન વિꣳશતિશ્ચ ॥ ૬। ૬। ૯॥
૩૬ દેવા વૈ પ્રબાહુગ્ગ્રહાનગૃહ્ણત સ એતં પ્રજાપતિરꣳ શુમપશ્યત્

તમગૃહ્ણીત તેન વૈ સ આર્ધ્નોદ્યસ્યૈવં વિદુષોઽ ꣳ શુર્ગૃહ્યત
ઋધ્નોત્યેવ સકૃદભિષુતસ્ય ગૃહ્ણાતિ સકૃદ્ધિ સ તેનાઽર્ધ્નોન્મનસા
ગૃહ્ણાતિ મન ઇવ હિ પ્રજાપતિઃ પ્રજાપતેરાપ્ત્યા ઔદુંબરેણ ગૃહ્ણાત્યૂર્ગ્વા
ઉદુંબર ઊર્જમેવાવ રુંધે ચતુઃ સ્રક્તિ ભવતિ દિક્ષ્વે
૩૭ વ પ્રતિ તિષ્ઠતિ યો વા અ ꣳ શોરાયતનં વેદાયતનવાન્ભવતિ
વામદેવ્યમિતિ સામ તદ્વા અસ્યાયતનં મનસા ગાયમાનો
ગૃહ્ણાત્યાયતનવાનેવ ભવતિ યદધ્વર્યુર ꣳ શું
ગૃહ્ણન્નાર્ધયેદુભાભ્યાં નર્ધ્યેતાધ્વર્યવે ચ યજમાનાય ચ
યદર્ધયેદુભાભ્યામૃધ્યેતાનવાનં ગૃહ્ણાતિ સૈવાસ્યર્દ્ધિર્હિરણ્યમભિ
વ્યનિત્યમૃતં વૈ હિરણ્યમાયુઃ પ્રાણ આયુષૈવામૃતમભિ ધિનોતિ
શતમાનં ભવતિ શતાયુઃ પુરુષઃ શતેન્દ્રિય આયુષ્યેવેન્દ્રિયે પ્રતિ
તિષ્ઠતિ ॥ ૬। ૬। ૧૦॥ દિક્ષ્વનિતિ વિ ꣳ શતિશ્ચ ॥ ૬। ૬। ૧૦॥
૩૮ પ્રજાપતિર્દેવેભ્યો યજ્ઞાન્વ્યાદિશથ્સ રિરિચાનોઽમન્યત
સ યજ્ઞાના ꣳ ષોડશધેંદ્રિયં વીર્યમાત્માનમભિ સમક્ખિદત્
તત્ષોડશ્યભવન્ન વૈ ષોડશી નામ યજ્ઞોઽસ્તિ યદ્વાવ ષોડશગ્ગ્
સ્તોત્ર ꣳ ષોડશ ꣳ શસ્ત્રં તેન ષોડશી તથ્ષોડશિનઃ ષોડશિત્વં
યથ્ષોડશી ગૃહ્યત ઇન્દ્રિયમેવ તદ્વીર્યં યજમાન આત્મન્ધત્તે
દેવેભ્યો વૈ સુવર્ગો લોકો
૩૯ ન પ્રાભવત્ત એત ꣳ ષોડશિનમપશ્યન્તમગૃહ્ણત
તતો વૈ તેભ્યઃ સુવર્ગો લોકઃ પ્રાભવદ્યથ્ષોડશી ગૃહ્યતે
સુવર્ગસ્ય લોકસ્યાભિજિત્યા ઇન્દ્રો વૈ દેવાનામાનુજાવર આસીથ્સ
પ્રજાપતિમુપાધાવત્તસ્મા એત ꣳ ષોડશિનં પ્રાયચ્છત્તમગૃહ્ણીત
તતો વૈ સોઽગ્રં દેવતાનાં પર્યૈદ્યસ્યૈવં વિદુષઃ ષોડશી ગૃહ્યતે
૪૦ ઽગ્રમેવ સમાનાનાં પર્યેતિ પ્રાતઃસવને ગૃહ્ણાતિ વજ્રો વૈ ષોડશી
વજ્રઃ પ્રાતઃસવનગ્ગ્ સ્વાદેવૈનં યોનેર્નિર્ગૃહ્ણાતિ સવનેસવનેઽભિ
ગૃહ્ણાતિ સવનાથ્સવનાદેવૈનં પ્ર જનયતિ તૃતીયસવને પશુકામસ્ય
ગૃહ્ણીયાદ્વજ્રો વૈ ષોડશી પશવસ્તૃતીયસવનં વજ્રેણૈવાસ્મૈ

તૃતીયસવનાત્પશૂનવ રુંધે નોક્થ્યે ગૃહ્ણીયાત્પ્રજા વૈ પશવ ઉક્થાનિ
યદુક્થ્યે

૪૧ ગૃહ્ણીયાત્પ્રજાં પશૂનસ્ય નિર્દહેદતિરાત્રે પશુકામસ્ય
ગૃહ્ણીયાદ્વજ્રો વૈ ષોડશી વજ્રેણૈવાસ્મૈ પશૂનવરુધ્ય
રાત્રિયોપરિષ્ટાચ્છમયત્યપ્યગ્નિષ્ટોમે રાજન્યસ્ય ગૃહ્ણીયાદ્વ્યાવૃત્કામો
હિ રાજન્યો યજતે સાહ્ન એવાસ્મૈ વજ્રં ગૃહ્ણાતિ સ એનં વજ્રો
ભૂત્યા ઇન્ધે નિર્વા દહત્યેકવિ ँ શગ્ગ્ સ્તોત્રં ભવતિ પ્રતિષ્ઠિત્યૈ
હરિવચ્છસ્યત ઇન્દ્રસ્ય પ્રિયં ધામો

૪૨ પાપ્નોતિ કનીયા ँ સિ વૈ દેવેષુ છન્દાગ્સ્યાસઞ્જ્યાયાગ્સ્યસુરેષુ
તે દેવાઃ કનીયસા છંદસા જ્યાયશ્છન્દોઽભિ વ્યશ ँ સન્તતો વૈ
તેઽસુરાણાં લોકમવૃઞ્જત યત્કનીયસા છંદસા જ્યાયશ્છન્દોઽભિ
વિશ ँ સતિ ભ્રાતૃવ્યસ્યૈવ તલ્લોકં વૃઙ્ક્તે ષડક્ષરાણ્યતિ
રેચયન્તિ ષડ્વા ઋતવ ઋતૂનેવ પ્રીણાતિ ચત્વારિ પૂર્વાણ્યવ કલ્પયન્તિ

૪૩ ચતુષ્પદ એવ પશૂનવ રુંધે દ્વે ઉત્તરે દ્વિપદ એવાવ
રુંધેઽનુષ્ટુભમભિ સં પાદયન્તિ વાગ્વા અનુષ્ટુમસ્માત્પ્રાણાનાં
વાગુત્તમા સમયાવિષિતે સૂર્યે ષોડશિનઃ સ્તોત્રમુપાકરોત્યેતસ્મિન્વૈ
લોક ઇન્દ્રો વૃત્રમહન્થ્સાક્ષાદેવ વજ્રં ભ્રાતૃવ્યાય પ્ર
હરત્યરુણપિશઙ્ગોઽશ્વો દક્ષિણૈતદ્વૈ વજ્રસ્ય રૂપ ँ સમૃદ્ધ્યૈ
॥ ૬। ૬। ૧૧॥ લોકો વિદુષઃ ષોડશી ગૃહ્યતે યદુક્થ્યે ધામ કલ્પયન્તિ
સમચત્વારિ ँ શચ્ચ ॥ ૬। ૬। ૧૧॥

સુવર્ગાય યદ્દાક્ષિણાનિ સમિષ્ટ યજૂગ્ષ્યવભૃથ યજૂ ँ ષિ
સ્ફ્યેન પ્રજાપતિરેકાદશિનીમિન્દ્રઃ પત્નિયા ઘ્નન્તિ દેવા વા ઇન્દ્રિયં
વીર્યન્દેવા વા અદાભ્યે દેવા વૈ પ્રબાહુક્પ્રજાપતિર્દેવેભ્યઃ સ રિરિચાનઃ
ષોડશધૈકાદશ ॥

સુવર્ગાય યજતિ પ્રજાઃ સૌમ્યેન ગૃહ્ણીયાત્પ્રત્યઞ્ચઙ્ગૃહ્ણીયાત્પ્રજાં
પશૂન્ત્રિચત્વારિ ँ શત્ ॥

સુવર્ગાય વજ્રસ્ય રૂપ ँ સમૃધ્યૈ ॥

ઇતિ ષષ્ઠં કાણ્ડં સંપૂર્ણમ્ ૬॥

॥ તૈત્તિરીય-સંહિતા ॥

# તૈત્તિરીય-સંહિતા

## ॥ સપ્તમં કાણ્ડમ્ ॥

॥ શ્રી ગુરુભ્યો નમઃ ॥ હરિઃ ઓ(૪)મ્ ॥

### સપ્તમકાણ્ડે પ્રથમઃ પ્રશ્નઃ ૧

૧ પ્રજનનં જ્યોતિરગ્નિર્દેવતાનાં જ્યોતિર્વિરાટ્છંદસાં
જ્યોતિર્વિરાડ્વાચોઽગ્નૌ સં તિષ્ઠતે વિરાજમભિ સં પદ્યતે
તસ્માત્તજ્જ્યોતિરુચ્યતે દ્વૌ સ્તોમૌ પ્રાતઃસવનં વહતો યથા
પ્રાણશ્ચાપાનશ્ચ દ્વૌ માધ્યંદિન ઁ સવનં યથા ચક્ષુશ્ચ
શ્રોત્રં ચ દ્વૌ તૃતીયસવનં યથા વાક્ ચ પ્રતિષ્ઠા ચ પુરુષ
સંમિતો વા એષ યજ્ઞોઽસ્થૂરિ

૨ યં કામં કામયતે તમેતેનાભ્યશ્નુતે સર્વગ્ગ્
હ્યસ્થૂરિણાભ્યશ્નુતેઽગ્નિષ્ટોમેન વૈ પ્રજાપતિઃ પ્રજા અસૃજત
તા અગ્નિષ્ટોમેનૈવ પર્યગૃહ્ણાત્તાસાં પરિગૃહીતાનામશ્વતરોઽત્ય
પ્રવત તસ્યાનુહાય રેત આદત્ત તદ્ગર્દભે ન્યમાર્ટ્ તસ્માદ્ગર્દભો
દ્વિરેતા અથો આહુર્વડબાયાં ન્યમાર્ડિતિ તસ્માદ્વડબા દ્વિરેતા અથો
આહુરોષધીષુ

૩ ન્યમાર્ડિતિ તસ્માદોષધયોઽનભ્યક્તા રેભન્ત્યથો આહુઃ પ્રજાસુ
ન્યમાર્ડિતિ તસ્માદ્યમૌ જાયેતે તસ્માદશ્વતરો ન પ્ર જાયત આત્તરેતા
હિ તસ્માદ્બર્હિષ્યનવક્લૃપ્તઃ સર્વવેદસે વા સહસ્રે વાવક્લૃપ્તોઽતિ
હ્યપ્રવત ય એવં વિદ્વાનગ્નિષ્ટોમેન યજતે પ્રાજાતાઃ પ્રજા જનયતિ
પરિ પ્રજાતા ગૃહ્ણાતિ તસ્માદાહુર્જ્યેષ્ઠયજ્ઞ ઇતિ

૪ પ્રજાપતિર્વાવ જ્યેષ્ઠઃ સ હ્યેતેનાગ્રેઽયજત પ્રજાપતિરકામયત પ્ર
જાયેયેતિ સ મુખતસ્ત્રિવૃતં નિરમિમીત તમગ્નિર્દેવતાન્વસૃજ્યત
ગાયત્રી છન્દો રથંતરꣳ સામ બ્રાહ્મણો મનુષ્યાણામજઃ પશૂનાં
તસ્માત્તે મુખ્યા મુખતો હ્યસૃજ્યન્તોરસો બાહુભ્યાં પઞ્ચદશં
નિરમિમીત તમિન્દ્રો દેવતાન્વસૃજ્યત ત્રિષ્ટુપ્છન્દો બૃહથ્
૫ સામ રાજન્યો મનુષ્યાણામવિઃ પશૂનાં તસ્માત્તે વીર્યાવન્તો
વીર્યાદ્ધ્યસૃજ્યન્ત મધ્યતઃ સપ્તદશં નિરમિમીત તં વિશ્વે
દેવા દેવતા અન્વસૃજ્યન્ત જગતી છન્દો વૈરૂપꣳ સામ વૈશ્યો
મનુષ્યાણાં ગાવઃ પશૂનાં તસ્માત્ત આદ્યા અન્નધાનાદ્ધ્યસૃજ્યન્ત
તસ્માદ્ભૂયાꣳસોઽન્યેભ્યો ભૂયિષ્ઠા હિ દેવતા અન્વસૃજ્યન્ત પત્ત
એકવિꣳશં નિરમિમીત તમનુષ્ટુપ્છન્દો
૬ ઽન્વસૃજ્યત વૈરાજꣳ સામ શૂદ્રો મનુષ્યાણામશ્વઃ પશૂનાં
તસ્માત્તૌ ભૂતસંક્રામિણાવશ્વશ્ચ શૂદ્રશ્ચ તસ્માચ્છૂદ્રો
યજ્ઞેઽનવક્લૃપ્તો ન હિ દેવતા અન્વસૃજ્યત તસ્માત્પાદાવુપ જીવતઃ
પત્તો હ્યસૃજ્યેતાં પ્રાણા વૈ ત્રિવૃદર્ધમાસાઃ પઞ્ચદશઃ પ્રજાપતિઃ
સપ્તદશસ્ત્રય ઇમે લોકા અસાવાદિત્ય એકવિꣳશ એતસ્મિન્વા
એતે શ્રિતા એતસ્મિન્પ્રતિષ્ઠિતા ય એવં વેદૈતસ્મિન્નેવ શ્રયત
એતસ્મિન્પ્રતિ તિષ્ઠતિ ॥ ૭। ૧। ૧॥ અસ્થૂરિરોષધીષુ જ્યેષ્ઠયજ્ઞ ઇતિ
બૃહદનુષ્ટુપ્છંદઃ પ્રતિષ્ઠિતા નવ ચ ॥ ૭। ૧। ૧॥
૭ પ્રાતઃસવને વૈ ગાયત્રેણ છંદસા ત્રિવૃતે સ્તોમાય
જ્યોતિર્દધદેતિ ત્રિવૃતા બ્રહ્મવર્ચસેન પઞ્ચદશાય જ્યોતિર્દધદેતિ
પઞ્ચદશેનૌજસા વીર્યેણ સપ્તદશાય જ્યોતિર્દધદેતિ સપ્તદશેન
પ્રાજાપત્યેન પ્રજનનેનૈકવિꣳશાય જ્યોતિર્દધદેતિ સ્તોમ એવ
તથ્સ્તોમાય જ્યોતિર્દધદેત્યથો સ્તોમ એવ સ્તોમમભિ પ્રણયતિ યાવન્તો
વૈ સ્તોમાસ્તાવન્તઃ કામાસ્તાવન્તો લોકાસ્તાવન્તિ જ્યોતીગ્ષ્યેતાવત એવ
સ્તોમાનેતાવતઃ કામાનેતાવતો લોકાનેતાવન્તિ જ્યોતીગ્ષ્યવ રુંધે ॥
૭। ૧। ૨॥ તાવન્તો લોકાસ્ત્રયોદશ ચ ॥ ૭। ૧। ૨॥

૮ બ્રહ્મવાદિનો વદન્તિ સ ત્વૈ યજેત યોઽગ્નિષ્ટોમેન યજમાનોઽથ
સર્વસ્તોમેન યજેતેતિ યસ્ય ત્રિવૃતમન્તર્યન્તિ પ્રાણાગ્સ્તસ્યાન્તર્યન્તિ
પ્રાણેષુ મેઽપ્યસદિતિ ખલુ વૈ યજ્ઞેન યજમાનો યજતે યસ્ય
પઞ્ચદશમન્તર્યન્તિ વીર્યં તસ્યાન્તર્યન્તિ વીર્યે મેઽપ્યસદિતિ
ખલુ વૈ યજ્ઞેન યજમાનો યજતે યસ્ય સપ્તદશમન્તર્યન્તિ
૯ પ્રજાં તસ્યાન્તર્યન્તિ પ્રજાયાં મેઽપ્યસદિતિ ખલુ વૈ યજ્ઞેન
યજમાનો યજતે યસ્યૈકવિ૱શમન્તર્યન્તિ પ્રતિષ્ઠાં તસ્યાન્તર્યન્તિ
પ્રતિષ્ઠાયાં મેઽપ્યસદિતિ ખલુ વૈ યજ્ઞેન યજમાનો યજતે
યસ્ય ત્રિણવમન્તર્યન્ત્યૃતૂગ્શ્ચ તસ્ય નક્ષત્રિયાં ચ
વિરાજમન્તર્યન્ત્યૃતુષુ મેઽપ્યસન્નક્ષત્રિયાયાં ચ વિરાજીતિ
૧૦ ખલુ વૈ યજ્ઞેન યજમાનો યજતે યસ્ય ત્રયસ્ત્રિ૱શમન્તર્યન્તિ
દેવતાસ્તસ્યાન્તર્યન્તિ દેવતાસુ મેઽપ્યસદિતિ ખલુ વૈ યજ્ઞેન
યજમાનો યજતે યો વૈ સ્તોમાનામવમં પરમતાં ગચ્છન્તં વેદ
પરમતામેવ ગચ્છતિ ત્રિવૃદ્વૈ સ્તોમાનામવમસ્ત્રિવૃત્પરમો ય એવં
વેદ પરમતામેવ ગચ્છતિ ॥ ૭। ૧। ૩॥ સપ્તદશમન્તર્યન્તિ વિરાજીતિ
ચતુશ્ચત્વારિ૱શચ્ચ ॥ ૭। ૧। ૩॥
૧૧ અંગિરસો વૈ સત્ત્રમાસત તે સુવર્ગં લોકમાયન્તેષા૱
હવિષ્માગ્શ્ચ હવિષ્કૃચ્ચાહીયેતાં તાવકામયેતા૱ સુવર્ગં
લોકમિયાવેતિ તાવેતં દ્વિરાત્રમપશ્યતાં તમાહરતાં તેનાયજેતાં
તતો વૈ તૌ સુવર્ગં લોકમૈતાં ય એવં વિદ્વાન્દ્વિરાત્રેણ યજતે
સુવર્ગમેવ લોકમેતિ તાવૈતાં પૂર્વેણાહ્નાગચ્છતામુત્તરેણા
૧૨ ઽભિપ્લવઃ પૂર્વમહર્ભવતિ ગતિરુત્તરં જ્યોતિષ્ટોમોઽગ્નિષ્ટોમઃ
પૂર્વમહર્ભવતિ તેજસ્તેનાવ રુંધે સર્વસ્તોમોઽતિરાત્ર ઉત્તર૱
સર્વસ્યાપ્ત્યૈ સર્વસ્યાવરુદ્ધ્યૈ ગાયત્રં પૂર્વેહન્થ્સામ ભવતિ તેજો વૈ
ગાયત્રી ગાયત્રી બ્રહ્મવર્ચસં તેજ એવ બ્રહ્મવર્ચસમાત્મન્ધત્તે
ત્રૈષ્ટુભમુત્તર ઓજો વૈ વીર્યં ત્રિષ્ટુગોજ એવ વીર્યમાત્મન્ધત્તે
રથંતરં પૂર્વે

૧૩ ઽહન્થ્સામ ભવતીયં વૈ રથંતરમસ્યામેવ પ્રતિ તિષ્ઠતિ
બૃહદુત્તરેઽસૌ વૈ બૃહદમુષ્યામેવ પ્રતિ તિષ્ઠતિ તદાહુઃ ક્વ
જગતી ચાનુષ્ટુપ્ચેતિ વૈખાનસં પૂર્વેઽહન્થ્સામ ભવતિ તેન જગત્યૈ
નૈતિ ષોડશ્યુત્તરે તેનાનુષ્ટુભોઽથાહુર્યથ્સમાનેઽર્ધમાસે
સ્યાતામન્યતરસ્યાહ્નો વીર્યમનુ પદ્યેતેત્યમાવાસ્યાયાં
પૂર્વમહર્ભવત્યુત્તરસ્મિન્નુત્તરં નાનૈવાર્ધમાસયોર્ભવતો નાનાવીર્યે
ભવતો હવિષ્મન્નિધનં પૂર્વમહર્ભવતિ હવિષ્કૃન્નિધનમુત્તરં
પ્રતિષ્ઠિત્યૈ ॥ ૭। ૧। ૪॥ ઉત્તરેણ રથન્તરં પૂર્વેઽન્વેક વિꣳશતિશ્ચ ॥ ૭। ૧। ૪॥

૧૪ આપો વા ઇદમગ્રે સલિલમાસીત્તસ્મિન્પ્રજાપતિર્વાયુર્ભૂત્વાચરથ્સ
ઇમામપશ્યત્તાં વરાહો ભૂત્વાહરત્તાં વિશ્વકર્મા ભૂત્વા
વ્યમાર્ટ્સાપ્રથત સા પૃથિવ્યભવત્તત્પૃથિવ્યૈ પૃથિવિત્વં
તસ્યામશ્રામ્યત્પ્રજાપતિઃ સ દેવાનસૃજત વસૂન્રુદ્રાનાદિત્યાન્તે દેવાઃ
પ્રજાપતિમબ્રુવન્ પ્ર જાયામહા ઇતિ સોઽબ્રવીદ્

૧૫ યથાહં યુષ્માગ્સ્તપસાસૃક્ષ્યેવં તપસિ પ્રજનનમિચ્છધ્વમિતિ
તેભ્યોઽગ્નિમાયતનં પ્રાયચ્છદેતેનાયતનેન શ્રામ્યતેતિ
તેઽગ્નિનાયતનેનાશ્રામ્યન્તે સંવથ્સર એકાં ગામસૃજન્ત તાં વસુભ્યો
રુદ્રેભ્ય આદિત્યેભ્યઃ પ્રાયચ્છન્નેતાꣳ રક્ષધ્વમિતિ તાં વસવો રુદ્રા
આદિત્યા અરક્ષન્ત સા વસુભ્યો રુદ્રેભ્ય આદિત્યેભ્યઃ પ્રાજાયત ત્રીણિ ચ

૧૬ શતાનિ ત્રયસ્ત્રિꣳશતં ચાથ સૈવ સહસ્રતમ્યભવત્તે
દેવાઃ પ્રજાપતિમબ્રુવન્થ્સહસ્રેણ નો યાજયેતિ સોઽગ્નિષ્ટોમેન
વસૂનયાજયત્ત ઇમં લોકમજયન્તચ્ચાદદુઃ સ ઉક્થ્યેન
રુદ્રાનયાજયન્તેઽન્તરિક્ષમજયન્તચ્ચાદદુઃ
સોઽતિરાત્રેણાદિત્યાનયાજયત્તેઽમું
લોકમજયન્તચ્ચાદદુસ્તદન્તરિક્ષં

૧૭ વ્યવૈર્યત તસ્માદ્રુદ્રા ઘાતુકા અનાયતના હિ તસ્માદાહુઃ શિથિલં વૈ
મધ્યમમહસ્ત્રિરાત્રસ્ય વિ હિ તદવૈર્યતેતિ ત્રૈષ્ટુભં મધ્યમસ્યાહ્ન
આજ્યં ભવતિ સંયાનાનિ સૂક્તાનિ શꣳસતિ ષોડશિનꣳશꣳસત્યહ્નો

ધૃત્યા  અશિથિલં ભાવાય  તસ્માત્ત્રિરાત્રસ્યાગ્નિષ્ટોમ એવ પ્રથમમહઃ
સ્યાદથોક્થ્યોઽથાતિરાત્ર એષાં લોકાનાં  વિધૃત્યૈ  ત્રીણિત્રીણિ
શતાન્યનૂચીનાહમવ્યવચ્છિન્નાનિ દદા
૧૮ ત્યેષાં લોકાનામનુ  સંતત્યૈ દશતં  ન વિ ચ્છિન્દ્યાદ્વિરાજં
નેદ્વિચ્છિનદાનીત્યથ  યા સહસ્રતમ્યાસીત્તસ્યામિન્દ્રશ્ચ  વિષ્ણુશ્ચ
વ્યાયચ્છેતા ँ  સ ઇન્દ્રોઽમન્યતાનયા  વા ઇદં વિષ્ણુઃ  સહસ્રં  વર્ક્ષ્યત
ઇતિ  તસ્યામકલ્પેતાં  દ્વિભાગ  ઇન્દ્રસ્તૃતીયે  વિષ્ણુસ્તદ્વા એષાભ્યનૂચ્યત
ઉભા જિગ્યથુરિતિ  તાં વા એતામચ્છાવાક
૧૯ એવ શ ँ સત્યથ  યા સહસ્રતમી સા હોત્રે  દેયેતિ  હોતારં
વા અભ્યતિરિચ્યતે  યદતિરિચ્યતે  હોતાનામસ્યાપયિતાથાહુરુન્નેત્રે
દેયેત્યતિરિક્તા  વા એષા સહસ્રસ્યાતિરિક્ત ઉન્નેતર્ત્વિજામથાહુઃ  સર્વેભ્યઃ
સદસ્યેભ્યો  દેયેત્યથાહુરુદાકૃત્યા  સા વશં  ચરેદિત્યથાહુર્બ્રહ્મણે
ચાગ્નીધે  ચ  દેયેતિ
૨૦ દ્વિભાગં બ્રહ્મણે  તૃતીયમગ્નીધ  ઐન્દ્રો વૈ બ્રહ્મા
વૈષ્ણવોઽગ્નીધ્રથૈવ તાવકલ્પેતામિત્યથાહુર્યા કલ્યાણી બહુરૂપા સા
દેયેત્યથાહુર્યા દ્વિરૂપોભયત  એની  સા દેયેતિ  સહસ્રસ્ય  પરિગૃહીત્યૈ
તદ્વા એતથ્સહસ્રસ્યાયન ँ સહસ્રગ્ગ્ં  સ્તોત્રીયાઃ  સહસ્રં  દક્ષિણાઃ
સહસ્ર  સંમિતઃ સુવર્ગો લોકઃ સુવર્ગસ્ય  લોકસ્યાભિજિત્યૈ ॥
૭। ૧। ૫॥ અબ્રવીચ્ચ  તદન્તરિક્ષન્દદાત્યચ્છાવાકશ્ચ  દેયેતિ
સપ્તચત્વારિ ँ શચ્ચ ॥ ૭। ૧। ૫॥
૨૧ સોમો  વૈ સહસ્રમવિન્દત્તમિન્દ્રોઽન્વવિન્દત્તૌ યમો
ન્યાગચ્છત્તાવબ્રવીદસ્તુ  મેઽત્રાપીત્યસ્તુ  હીઉ ઇત્યબ્રૂતા ँ  સ યમ
એકસ્યાં વીર્યં  પર્યપશ્યદિયં વા અસ્ય સહસ્રસ્ય વીર્યં  બિભર્તીતિ
તાવબ્રવીદિયં મમાસ્ત્વેતદ્યુવયોરિતિ  તાવબ્રૂતા ँ  સર્વે  વા એતદેતસ્યાં
વીર્યં
૨૨ પરિ  પશ્યામોઽ ँ શમા હરામહા  ઇતિ  તસ્યામ ँ શમાહરન્ત
તામપ્સુ પ્રાવેશયન્થ્સોમાયોદેહીતિ  સા રોહિણી પિઙ્ગલૈકહાયની રૂપં

કૃત્વા ત્રયસ્ત્રિઁશતા ચ ત્રિભિશ્ચ શતૈઃ સહોદૈત્તસ્માદ્રોહિણ્યા
પિઙ્ગલયૈકહાયન્યા સોમં ક્રીણીયાદ્ય એવં વિદ્વાન્ રોહિણ્યા
પિઙ્ગલયૈકહાયન્યા સોમં ક્રીણાતિ ત્રયસ્ત્રિઁશતા ચૈવાસ્ય ત્રિભિશ્ચ
૨૩ શતૈઃ સોમઃ ક્રીતો ભવતિ સુક્રીતેન યજતે તામપ્સુ
પ્રાવેશયન્નિન્દ્રાયોદેહીતિ સા રોહિણી લક્ષ્મણા પષ્ઠૌહી વાર્ત્રઘ્ની રૂપં
કૃત્વા ત્રયસ્ત્રિઁશતા ચ ત્રિભિશ્ચ શતૈઃ સહોદૈત્તસ્માદ્રોહિણીં
લક્ષ્મણાં પષ્ઠૌહીં વાર્ત્રઘ્નીં દદ્યાદ્ય એવં વિદ્વાન્રોહિણીં લક્ષ્મણાં
પષ્ઠૌહીં વાર્ત્રઘ્નીં દદાતિ ત્રયસ્ત્રિઁશચ્ચૈવાસ્ય ત્રીણિ ચ
શતાનિ સા દત્તા
૨૪ ભવતિ તામપ્સુ પ્રાવેશયન્, યમાયોદેહીતિ સા જરતી મૂર્ખા તજ્જઘન્યા
રૂપં કૃત્વા ત્રયસ્ત્રિઁશતા ચ ત્રિભિશ્ચ શતૈઃ સહોદૈત્તસ્માજ્જરતીં
મૂર્ખાં તજ્જઘન્યામનુસ્તરણીં કુર્વીત ય એવં વિદ્વાઞ્જરતીં મૂર્ખાં
તજ્જઘન્યામનુસ્તરણીં કુરુતે ત્રયસ્ત્રિઁશચ્ચૈવાસ્ય ત્રીણિ ચ
શતાનિ સામુષ્મિઁલ્લોકે ભવતિ વાગેવ સહસ્રતમી તસ્માદ્
૨૫ વરો દેયઃ સા હિ વરઃ સહસ્રમસ્ય સા દત્તા ભવતિ તસ્માદ્વરો
ન પ્રતિગૃહ્યઃ સા હિ વરઃ સહસ્રમસ્ય પ્રતિગૃહીતં ભવતીયં વર
ઇતિ બ્રૂયાદથાન્યાં બ્રૂયાદિયં મમેતિ તથાસ્ય તથ્સહસ્રમપ્રતિગૃહીતં
ભવત્યુભયત એની સ્યાત્તદાહુરન્યત એની સ્યાથ્સહસ્રં પરસ્તાદેતમિતિ
યૈવ વરઃ
૨૬ કલ્યાણી રૂપસમૃદ્ધા સા સ્યાથ્સા હિ વરઃ સમૃદ્ધ્યૈ
તામુત્તરેણાગ્નીધ્રં પર્યાણીયાહવનીયસ્યાન્તે દ્રોણકલશમવ
ઘ્રાપયેદા જિઘ્ર કલશં મહ્યુરુધારા પયસ્વત્યા ત્વા વિશન્ત્વિન્દવઃ
સમુદ્રમિવ સિન્ધવઃ સા મા સહસ્ર આ ભજ પ્રજયા પશુભિઃ સહ
પુનર્માઽઽ વિશતાદ્રયિરિતિ પ્રજયૈવૈનં પશુભી રય્યા સ
૨૭ મર્ધયતિ પ્રજાવાન્પશુમાન્રયિમાન્ભવતિ ય એવં વેદ તયા
સહાગ્નીધ્રં પરેત્ય પુરસ્તાત્પ્રતીચ્યાં તિષ્ઠન્ત્યાં જુહુયાદુભા
જિગ્યથુર્ન પરા જયેથે ન પરા જિગ્યે કતરશ્ચનૈનોઃ । ઇન્દ્રશ્ચ વિષ્ણો

યદપસ્પૃધેથાં ત્રેધા સહસ્રં વિ તદૈરયેથામિતિ ત્રેધાવિભક્તં વૈ
ત્રિરાત્રે સહસ્રꣳસાહસ્રીમેવૈનાં કરોતિ સહસ્રસ્યૈવૈનાં માત્રાં
૨૮ કરોતિ રૂપાણિ જુહોતિ રૂપૈરેવૈના ꣳ સમર્ધયતિ તસ્યા
ઉપોત્થાય કર્ણમા જપેદિડે રન્તેऽદિતે સરસ્વતિ પ્રિયે પ્રેયસિ
મહિ વિશ્રુત્યેતાનિ તે અઘ્નિયે નામાનિ સુકૃતં મા દેવેષુ બ્રૂતાદિતિ
દેવેભ્ય એવૈનમા વેદયત્યન્વેનં દેવા બુધ્યન્તે ॥ ૭। ૧। ૬॥ એતદેતસ્યાં
વીર્યમસ્ય ત્રિભિશ્ચ દત્તા સહસ્રતમી તસ્માદેવ વરઃ સં માત્રામેકાન્ન
ચત્વારિ ꣳ શચ્ચ ॥ ૭। ૧। ૬॥
૨૯ સહસ્રતમ્યા વૈ યજમાનઃ સુવર્ગં લોકમેતિ સૈનꣳસુવર્ગં
લોકં ગમયતિ સા મા સુવર્ગં લોકં ગમયેત્યાહ સુવર્ગમેવૈનં લોકં
ગમયતિ સા મા જ્યોતિષ્મન્તં લોકં ગમયેત્યાહ જ્યોતિષ્મન્તમેવૈનં
લોકં ગમયતિ સા મા સર્વાન્પુણ્યાઉꣳ લ્લોકાન્ગમયેત્યાહ સર્વાનેવૈનં
પુણ્યાઉꣳ લ્લોકાન્ગમયતિ સા
૩૦ મા પ્રતિષ્ઠાં ગમય પ્રજયા પશુભિઃ સહ પુનર્મા
વિશતાદ્રયિરિતિ પ્રજયૈવૈનં પશુભી રય્યાં પ્રતિષ્ઠાપયતિ
પ્રજાવાન્પશુમાન્રયિમાન્ભવતિ ય એવં વેદ તામગ્નીધે વા બ્રહ્મણે
વા હોત્રે વોદ્ગાત્રે વાધ્વર્યવે વા દદ્યાથ્સહસ્રમસ્ય સા દત્તા ભવતિ
સહસ્રમસ્ય પ્રતિગૃહીતં ભવતિ યસ્તામવિદ્વાન્
૩૧ પ્રતિગૃહ્ણાતિ તાં પ્રતિ ગૃહ્ણીયાદેકાસિ ન સહસ્રમેકાં ત્વા ભૂતાં
પ્રતિ ગૃહ્ણામિ ન સહસ્રમેકા મા ભૂતા વિશ મા સહસ્રમિત્યેકામેવૈનાં
ભૂતાં પ્રતિ ગૃહ્ણાતિ ન સહસ્રં ય એવં વેદ સ્યોનાસિ સુષદા સુશેવા
સ્યોના મા વિશ સુષદા મા વિશ સુશેવા મા વિશે
૩૨ ત્યાહ સ્યોનૈવૈનꣳસુષદા સુશેવા ભૂતાવિશતિ
નૈનꣳહિનસ્તિ બ્રહ્મવાદિનો વદન્તિ સહસ્રꣳસહસ્રતમ્યન્વેતી
૩ સહસ્રતમીꣳ સહસ્રા ૩ મિતિ યત્પ્રાચીમુથ્સૃજેથ્સહસ્રꣳ
સહસ્રતમ્યન્વિયાત્તથ્સહસ્રમપ્રજ્ઞાત્રꣳ સુવર્ગં લોકં ન પ્ર
જાનીયાત્પ્રતીચીમુથ્સૃજતિ તાꣳ સહસ્રમનુ પર્યાવર્તતે સા

પ્રજાનતી સુવર્ગં લોકમેતિ યજમાનમભ્યુત્સૃજતિ ક્ષિપ્રે સહસ્રં
પ્ર જાયત ઉત્તમા નીયતે પ્રથમા દેવાન્ગચ્છતિ ॥ ૭। ૧। ૭॥ લોકાન્ગમયતિ
સાઽવિદ્વાન્થ્સુશેવા માઽવિશ યજમાનન્દ્વાદશ ચ ॥ ૭। ૧। ૭॥

૩૩ અત્રિરદદાદૌર્વાય પ્રજાં પુત્રકામાય સ રિરિચાનોઽમન્યત નિર્વીર્યઃ
શિથિલો યાતયામા સ એતં ચતૂરાત્રમપશ્યત્તમાહરત્તેનાયજત
તતો વૈ તસ્ય ચત્વારો વીરા આજાયન્ત સુહોતા સૂદ્ગાતા સ્વધ્વર્યુઃ
સુસભેયો ય એવં વિદ્વાગ્શ્ચતૂરાત્રેણ યજત આસ્ય ચત્વારો વીરા
જાયન્તે સુહોતા સૂદ્ગાતા સ્વધ્વર્યુઃ સુસભેયો યે ચતુર્વિꣳશાઃ
પવમાના બ્રહ્મવર્ચસં તદ્

૩૪ ય ઉદ્યન્તઃ સ્તોમાઃ શ્રીઃ સાત્રિગ્ગ્ શ્રદ્ધાદેવં યજમાનં ચત્વારિ
વીર્યાણિ નોપાનમન્તેજ ઇન્દ્રિયં બ્રહ્મવર્ચસમન્નાદ્યꣳ સ
એતાગ્શ્ચતુરશ્ચતુષ્ટોમાન્થ્સોમાનપશ્યત્તાનાહરત્તૈરયજત તેજ એવ
પ્રથમેનાવારુંધેંદ્રિયં દ્વિતીયેન બ્રહ્મવર્ચસં તૃતીયેનાન્નાદ્યં
ચતુર્થેન ય એવં વિદ્વાગ્શ્ચતુરશ્ચતુષ્ટોમાન્થ્સોમાનાહરતિ
તૈર્યજતે તેજ એવ પ્રથમેનાવ રુંધ ઇંદ્રિયં દ્વિતીયેન બ્રહ્મવર્ચસં
તૃતીયેનાન્નાદ્યં ચતુર્થેન યામેવાત્રિરૃદ્ધિમાર્ધ્નોત્તામેવ યજમાન
ઋધ્નોતિ ॥ ૭। ૧। ૮॥ તત્તેજ એવાષ્ટાદશ ચ ॥ ૭। ૧। ૮॥

૩૫ જમદગ્નિઃ પુષ્ટિકામશ્ચતૂરાત્રેણાયજત સ એતાન્પોષાꣳ
અપુષ્યત્તસ્માત્પલિતૌ જામદગ્નિયૌ ન સં જાનાતે એતાનેવ પોષાન્પુષ્યતિ ય
એવં વિદ્વાગ્શ્ચતૂરાત્રેણ યજતે પુરોડાશિન્ય ઉપસદો ભવન્તિ પશવો
વૈ પુરોડાશઃ પશૂનેવાવ રુંધેઽન્નં વૈ પુરોડાશોઽન્નમેવાવ
રુંધેઽન્નાદઃ પશુમાન્ભવતિ ય એવં વિદ્વાગ્શ્ચતૂરાત્રેણ યજતે ॥
૭। ૧। ૯॥ જમદગ્નિરષ્ટા ચત્વારિꣳશત્ ॥ ૭। ૧। ૯॥

૩૬ સંવથ્સરો વા ઇદમેક આસીથ્સોઽકામયતર્તૂન્થ્સૃજેયેતિ સ એતં
પઞ્ચરાત્રમપશ્યત્તમાહરત્તેનાયજત તતો વૈ સ ઋતૂનસૃજત
ય એવં વિદ્વાન્પઞ્ચરાત્રેણ યજતે પ્રૈવ જાયતે ત ઋતવઃ સૃષ્ટા
ન વ્યાવર્તન્ત ત એતં પઞ્ચરાત્રમપશ્યન્તમાહરન્તેનાયજન્ત તતો

વૈ તે વ્યાવર્તન્ત

૩૭ ય એવં વિદ્વાન્પઞ્ચરાત્રેણ યજતે વિ પાપ્મના
ભ્રાતૃવ્યેણાવર્તતે સાર્વસેનિઃ શૌચેયોઽકામયત પશુમાન્થ્સ્યામિતિ સ
એતં પઞ્ચરાત્રમાહરત્તેનાયજત તતો વૈ સ સહસ્રં પશૂન્પ્રાપ્નોદ્ય
એવં વિદ્વાન્પઞ્ચરાત્રેણ યજતે પ્ર સહસ્રં પશૂનાપ્નોતિ બબરઃ
પ્રાવાહણિરકામયત વાચઃ પ્રવદિતા સ્યામિતિ સ એતં પઞ્ચરાત્રમા

૩૮ ઽહરત્તેનાયજત તતો વૈ સ વાચઃ પ્રવદિતાભવદ્ય એવં
વિદ્વાન્પઞ્ચરાત્રેણ યજતે પ્રવદિતૈવ વાચો ભવત્યથો એનં
વાચસ્પતિરિત્યાહુરનાપ્તશ્ચતૂરાત્રોઽતિરિક્તઃ ષડ્રાત્રોઽથ વા એષ
સં પ્રતિ યજ્ઞો યત્પઞ્ચરાત્રો ય એવં વિદ્વાન્પઞ્ચરાત્રેણ યજતે
સં પ્રત્યેવ યજ્ઞેન યજતે પઞ્ચરાત્રો ભવતિ પઞ્ચ વા ઋતવઃ
સંવથ્સર

૩૯ ઋતુષ્વેવ સંવથ્સરે પ્રતિ તિષ્ઠત્યથો પઞ્ચાક્ષરા
પઙ્ક્તિઃ પાઙ્ક્તો યજ્ઞો યજ્ઞમેવાવ રુંધે ત્રિવૃદગ્નિષ્ટોમો
ભવતિ તેજ એવાવ રુંધે પઞ્ચદશો ભવતીન્દ્રિયમેવાવ
રુંધે સપ્તદશો ભવત્યન્નાદ્યસ્યાવરુદ્ધ્યા અથો પ્રૈવ તેન
જાયતે પઞ્ચવિ ँ શોઽગ્નિષ્ટોમો ભવતિ પ્રજાપતેરાપ્ત્યૈ
મહાવ્રતવાનન્નાદ્યસ્યાવરુદ્ધ્યૈ વિશ્વજિથ્સર્વપૃષ્ઠોઽતિરાત્રો ભવતિ
સર્વસ્યાભિજિત્યૈ ॥ ૭। ૧। ૧૦॥ તે વ્યાવર્તન્ત પ્રવદિતા સ્યામિતિ સ એતં
પઞ્ચરાત્રમા સંવથ્સરોઽભિજિત્યૈ ॥ ૭। ૧। ૧૦॥

૪૦ દેવસ્ય ત્વા સવિતુઃ પ્રસવેઽશ્વિનોર્બાહુભ્યાં પૂષ્ણો હસ્તાભ્યામા
દદ ઇમામગૃભ્ણન્રશનામૃતસ્ય પૂર્વ આયુષિ વિદથેષુ કવ્યા । તયા
દેવાઃ સુતમા બભૂવુરૃતસ્ય સામન્થ્સરમારપન્તી ॥ અભિધા અસિ
ભુવનમસિ યન્તાસિ ધર્તાસિ સોઽગ્નિં વૈશ્વાનર ँ સપ્રથ સં ગચ્છ
સ્વાહાકૃતઃ પૃથિવ્યાં યન્તા રાડ્યન્તાસિ યમનો ધર્તાસિ ધરુણઃ કૃષ્યૈ
ત્વા ક્ષેમાય ત્વા રય્યૈ ત્વા પોષાય ત્વા પૃથિવ્યૈ ત્વાન્તરિક્ષાય ત્વા દિવે
ત્વા સતે ત્વાસતે ત્વાદ્ભ્યસ્ત્વૌષધીભ્યસ્ત્વા વિશ્વેભ્યસ્ત્વા ભૂતેભ્યઃ ॥

૭। ૧। ૧૧॥ ધરુણઃ પઞ્ચવિꣳશતિશ્ચ ॥ ૭। ૧। ૧૧॥

૪૧ વિભૂર્માત્રા પ્રભૂઃ પિત્રાશ્વોઽસિ હયોઽસ્યત્યોઽસિ નરોઽસ્યર્વાસિ
સપ્તિરસિ વાજ્યસિ વૃષાસિ નૃમણા અસિ યયુર્નામાસ્યાદિત્યાનાં
પત્વાન્વિહ્યગ્નયે સ્વાહા સ્વાહેન્દ્રાગ્નિભ્યાગ્ સ્વાહા પ્રજાપતયે સ્વાહા
વિશ્વેભ્યો દેવેભ્યઃ સ્વાહા સર્વાભ્યો દેવતાભ્ય ઇહ ધૃતિઃ સ્વાહેહ
વિધૃતિઃ સ્વાહેહ રન્તિઃ સ્વાહેહ રમતિઃ સ્વાહા ભૂરસિ ભુવે ત્વા ભવ્યાય
ત્વા ભવિષ્યતે ત્વા વિશ્વેભ્યસ્ત્વા ભૂતેભ્યો દેવા આશાપાલા એતં દેવેભ્યોઽશ્વં
મેધાય પ્રોક્ષિતં ગોપાયત ॥ ૭। ૧। ૧૨॥ રન્તિઃ સ્વાહા દ્વાવિꣳશતિશ્ચ ॥ ૭। ૧। ૧૨॥

૪૨ આયનાય સ્વાહા પ્રાયણાય સ્વાહોદ્દ્રાવાય સ્વાહોદ્દ્રુતાય સ્વાહા શૂકારાય
સ્વાહા શૂકૃતાય સ્વાહા પલાયિતાય સ્વાહાપલાયિતાય સ્વાહાવલ્ગતે સ્વાહા
પરાવલ્ગતે સ્વાહાયતે સ્વાહા પ્રયતે સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૧। ૧૩॥
આયનાયોત્તરમાપલાયિતાય ષડ્વિꣳશતિઃ ॥ ૭। ૧। ૧૩॥

૪૩ અગ્નયે સ્વાહા સોમાય સ્વાહા વાયવે સ્વાહાપાં મોદાય સ્વાહા સવિત્રે
સ્વાહા સરસ્વત્યૈ સ્વાહેન્દ્રાય સ્વાહા બૃહસ્પતયે સ્વાહા મિત્રાય
સ્વાહા વરુણાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૧। ૧૪॥ અગ્નયે વાયવેઽપાં
મોદાયેન્દ્રાય ત્રયોવિꣳશતિઃ ॥ ૭। ૧। ૧૪॥

૪૪ પૃથિવ્યૈ સ્વાહાન્તરિક્ષાય સ્વાહા દિવે સ્વાહા સૂર્યાય સ્વાહા
ચન્દ્રમસે સ્વાહા નક્ષત્રેભ્યઃ સ્વાહા પ્રાચ્યૈ દિશે સ્વાહા દક્ષિણાયૈ
દિશે સ્વાહા પ્રતીચ્યૈ દિશે સ્વાહોદીચ્યૈ દિશે સ્વાહોર્ધ્વાયૈ દિશે
સ્વાહા દિગ્ભ્યઃ સ્વાહાવાન્તરદિશાભ્યઃ સ્વાહા સમાભ્યઃ સ્વાહા શરદ્ભ્યઃ
સ્વાહાહોરાત્રેભ્યઃ સ્વાહાર્ધમાસેભ્યઃ સ્વાહા માસેભ્યઃ સ્વાહર્તુભ્યઃ સ્વાહા
સંવથ્સરાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૧। ૧૫॥ પૃથિવ્યૈ સૂર્યાય
નક્ષત્રેભ્યઃ પ્રાચ્યૈ સપ્ત ચત્વારિꣳશત્ ॥ ૭। ૧। ૧૫॥

૪૫ અગ્નયે સ્વાહા સોમાય સ્વાહા સવિત્રે સ્વાહા સરસ્વત્યૈ સ્વાહા પૂષ્ણે
સ્વાહા બૃહસ્પતયે સ્વાહાપાં મોદાય સ્વાહા વાયવે સ્વાહા મિત્રાય સ્વાહા
વરુણાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૧। ૧૬॥ અગ્નયે સવિત્રે પૂષ્ણેઽપાં
મોદાય વાયવે ત્રયોવિꣳશતિઃ ॥ ૭। ૧। ૧૬॥

૪૬ પૃથિવ્યૈ સ્વાહાન્તરિક્ષાય સ્વાહા દિવે સ્વાહાગ્નયે સ્વાહા સોમાય
સ્વાહા સૂર્યાય સ્વાહા ચન્દ્રમસે સ્વાહાહ્ને સ્વાહા રાત્રિયૈ સ્વાહર્જવે
સ્વાહા સાધવે સ્વાહા સુક્ષિત્યૈ સ્વાહા ક્ષુધે સ્વાહાશિતિમ્ને સ્વાહા રોગાય
સ્વાહા હિમાય સ્વાહા શીતાય સ્વાહાતપાય સ્વાહારણ્યાય સ્વાહા સુવર્ગાય
સ્વાહા લોકાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૧। ૧૭॥ પૃથિવ્યા અગ્નયેઽહ્ને
રાત્રિયૈ ચતુશ્ચત્વારિꣳશત્ ॥ ૭। ૧। ૧૭॥

૪૭ ભુવો દેવાનાં કર્મણાપસર્તસ્ય પથ્યાસિ વસુભિર્દેવેભિર્દેવતયા
ગાયત્રેણ ત્વા છંદસા યુનજ્મિ વસન્તેન ત્વર્તુના હવિષા દીક્ષયામિ
રુદ્રેભિર્દેવેભિર્દેવતયા ત્રૈષ્ટુભેન ત્વા છંદસા યુનજ્મિ
ગ્રીષ્મેણ ત્વર્તુના હવિષા દીક્ષયામ્યાદિત્યેભિર્દેવેભિર્દેવતયા
જાગતેન ત્વા છંદસા યુનજ્મિ વર્ષાભિસ્ત્વર્તુના હવિષા દીક્ષયામિ
વિશ્વેભિર્દેવેભિર્દેવતયાનુષ્ટુભેન ત્વા છંદસા યુનજ્મિ

૪૮ શરદા ત્વર્તુના હવિષા દીક્ષયામ્યંગિરોભિર્દેવેભિર્દેવતયા
પાઙ્ક્તેન ત્વા છંદસા યુનજ્મિ હેમન્તશિશિરાભ્યાં ત્વર્તુના હવિષા
દીક્ષયામ્યાહં દીક્ષામરુહમૃતસ્ય પત્નીં ગાયત્રેણ છંદસા બ્રહ્મણા
ચર્તꣳ સત્યેઽધાꣳ સત્યમૃતેઽધામ્ ॥ મહી મૂષુ સુત્રામાણમિહ
ધૃતિઃ સ્વાહેહ વિધૃતિઃ સ્વાહેહ રન્તિઃ સ્વાહેહ રમતિઃ સ્વાહા ॥ ૭। ૧। ૧૮॥ આનુષ્ટેભેન ત્વા છન્દસા
યુનજ્મ્યેકાન્ન પઞ્ચાશચ્ચ ॥ ૭। ૧। ૧૮॥

૪૯ ઈંકારાય સ્વાહેંકૃતાય સ્વાહા ક્રન્દતે સ્વાહાવક્રન્દતે
સ્વાહા પ્રોથતે સ્વાહા પ્રપ્રોથતે સ્વાહા ગન્ધાય સ્વાહા ઘ્રાતાય
સ્વાહા પ્રાણાય સ્વાહા વ્યાનાય સ્વાહાઽપાનાય સ્વાહા સંદીયમાનાય
સ્વાહા સંદિતાય સ્વાહા વિચૃત્યમાનાય સ્વાહા વિચૃત્તાય સ્વાહા
પલાયિષ્યમાણાય સ્વાહા પલાયિતાય સ્વાહોપરꣳસ્ય તે સ્વાહોપરતાય
સ્વાહા નિવેક્ષ્યતે સ્વાહા નિવિશમાનાય સ્વાહા નિવિષ્ટાય સ્વાહા નિષથ્સ્ય
તે સ્વાહા નિષીદતે સ્વાહા નિષણ્ણાય સ્વાહા

૫૦ ઽસિષ્યતે સ્વાહાસીનાય સ્વાહાસિતાય સ્વાહા નિપથ્સ્યતે સ્વાહા

નિપદ્યમાનાય સ્વાહા નિપન્નાય સ્વાહા શયિષ્યતે સ્વાહા શયાનાય સ્વાહા
શયિતાય સ્વાહા સં મીલિષ્યતે સ્વાહા સં મીલતે સ્વાહા સં મીલિતાય
સ્વાહા સ્વપ્સ્યતે સ્વાહા સ્વપતે સ્વાહા સુપ્તાય સ્વાહા પ્રભોત્સ્યતે સ્વાહા
પ્રબુધ્યમાનાય સ્વાહા પ્રબુદ્ધાય સ્વાહા જાગરિષ્યતે સ્વાહા જાગ્રતે સ્વાહા
જાગરિતાય સ્વાહા શુશ્રૂષમાણાય સ્વાહા શ઼ૃણ્વતે સ્વાહા શ્રુતાય સ્વાહા
વીક્ષિષ્યતે સ્વાહા

૫૧ વીક્ષમાણાય સ્વાહા વીક્ષિતાય સ્વાહા સꣳહાસ્યતે સ્વાહા સંજિહાનાય
સ્વાહોજ્જિહાનાય સ્વાહા વિવર્થ્સ્યતે સ્વાહા વિવર્તમાનાય સ્વાહા વિવૃત્તાય
સ્વાહોત્થાસ્યતે સ્વાહોત્તિષ્ઠતે સ્વાહોત્થિતાય સ્વાહા વિધવિષ્યતે સ્વાહા
વિધૂન્વાનાય સ્વાહા વિધૂતાય સ્વાહોત્ક્રꣳસ્યતે સ્વાહોત્ક્રામતે
સ્વાહોત્ક્રાન્તાય સ્વાહા ચંક્રમિષ્યતે સ્વાહા ચંક્રમ્યમાણાય સ્વાહા
ચંક્રમિતાય સ્વાહા કણ્ડૂયિષ્યતે સ્વાહા કણ્ડૂયમાનાય સ્વાહા કણ્ડૂયિતાય
સ્વાહા નિકષિષ્યતે સ્વાહા નિકષમાણાય સ્વાહા નિકષિતાય સ્વાહા
યદત્તિ તસ્મૈ સ્વાહા યત્પિબતિ તસ્મૈ સ્વાહા યન્મેહતિ તસ્મૈ સ્વાહા
યચ્છકૃત્કરોતિ તસ્મૈ સ્વાહા રેતસે સ્વાહા પ્રજાભ્યઃ સ્વાહા
પ્રજનનાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૧। ૧૯॥ નિષણ્ણાય સ્વાહા
વીક્ષિષ્યતે સ્વાહા નિકષમાણાય સ્વાહા સપ્તવિꣳશતિશ્ચ ॥ ૭। ૧। ૧૯॥

૫૨ અગ્નયે સ્વાહા વાયવે સ્વાહા સૂર્યાય સ્વાહર્તમસ્યૃતસ્યર્તમસિ
સત્યમસિ સત્યસ્ય સત્યમસ્યૃતસ્ય પન્થા અસિ દેવાનાં છાયામૃતસ્ય
નામ તથ્સત્યં યત્ત્વં પ્રજાપતિરસ્યધિ યદસ્મિન્વાજિનીવ શુભઃ
સ્પર્ધન્તે દિવઃ સૂર્યેણ વિશોઽપો વૃણાનઃ પવતે કવ્યન્પશું ન ગોપા
ઇર્યઃ પરિજ્મા ॥ ૭। ૧। ૨૦॥ અગ્નયે વાયવે સૂર્યાયાઽષ્ટા ચત્વારિꣳશત્ ॥
૭। ૧। ૨૦॥

પ્રજનનં પ્રાતસ્સવને વૈ બ્રહ્મવાદિનઃ સ ત્વા અંગિરસ આપો વૈ સોમો
વૈ સહસ્રતમ્યાઽત્રિર્જમદગ્નિઃ સંવથ્સરો દેવસ્ય વિભૂરાયનાયાગ્નયે
પૃથિવ્યા અગ્નયે પૃથિવ્યૈ ભુવ ઈડ્ડારાયાઽગ્નયે વાયવે સૂર્યાય
વિꣳશતિઃ ॥

પ્રજનનમંગિરસઃ સોમો વૈ પ્રતિગૃહ્ણાતિ વીભૂર્વીક્ષમાણાય દ્વિ
પઞ્ચાશત્ ॥
પ્રજનનં પરિજ્મા ॥

## સપ્તમકાણ્ડે દ્વિતીયઃ પ્રશ્નઃ ૨

૧ સાધ્યા વૈ દેવાઃ સુવર્ગકામા એત ઁ
ષડ્રાત્રમપશ્યન્તમાહરન્તેનાયજન્ત તતો વૈ તે સુવર્ગં
લોકમાયન્ ય એવં વિદ્વા ઁ સઃ ષડ્રાત્રમાસતે સુવર્ગમેવ લોકં
યન્તિ દેવસત્રં વૈ ષડ્રાત્રઃ પ્રત્યક્ષગ્ગ્ હ્યેતાનિ પૃષ્ઠાનિ
ય એવં વિદ્વા ઁ સઃ ષડ્રાત્રમાસતે સાક્ષાદેવ દેવતા અભ્યારોહન્તિ
ષડ્રાત્રો ભવતિ ષડ્વા ઋતવઃ ષટ્પૃષ્ઠાનિ
૨ પૃષ્ઠૈરેવર્તૂનન્વારોહન્ત્યૃતુભિઃ સંવથ્સરં તે સંવથ્સર એવ
પ્રતિ તિષ્ઠન્તિ બૃહદ્રથંતરાભ્યાં યન્તીયં વાવ રથંતરમસૌ
બૃહદાભ્યામેવ યન્ત્યથો અનયોરેવ પ્રતિ તિષ્ઠન્ત્યેતેવૈ
યજ્ઞસ્યાઞ્જસાયની સ્રુતી તાભ્યામેવ સુવર્ગં લોકં યન્તિ
ત્રિવૃદગ્નિષ્ટોમો ભવતિ તેજ એવાવ રુંધતે પઞ્ચદશો
ભવતીન્દ્રિયમેવાવ રુંધતે સપ્તદશો
૩ ભવત્યન્નાદ્યસ્યાવરુદ્ધ્યા અથો પ્રૈવ તેન જાયન્ત એકવિ ઁ શો
ભવતિ પ્રતિષ્ઠિત્યા અથો રુચમેવાત્મન્દધતે ત્રિણવો ભવતિ
વિજિત્યૈ ત્રયસ્ત્રિ ઁ શો ભવતિ પ્રતિષ્ઠિત્યૈ સદોહવિર્ધાનિન
એતેન ષડ્રાત્રેણ યજેરન્નાશ્વત્થી હવિર્ધાનં ચાગ્નીધ્રં ચ
ભવતસ્તદ્ધિ સુવર્ગ્યં ચક્રીવતી ભવતઃ સુવર્ગસ્ય લોકસ્ય
સમષ્ટ્યા ઉલૂખલબુધ્નો યૂપો ભવતિ પ્રતિષ્ઠિત્યૈ પ્રાઞ્ચો યાન્તિ
પ્રાઙિવ હિ સુવર્ગો
૪ લોકઃ સરસ્વત્યા યાન્ત્યેષ વૈ દેવયાનઃ પન્થાસ્તમેવાન્વારોહન્ત્યાક્રોશન્તો
યાન્ત્યવર્તિમેવાન્યસ્મિન્પ્રતિષજ્ય પ્રતિષ્ઠાં ગચ્છન્તિ યદા

દશ  શતં કુર્વન્ત્યથૈકમુત્થાનꣳશતાયુઃ  પુરુષઃ
શતેન્દ્રિય  આયુષ્યેવેન્દ્રિયે પ્રતિ  તિષ્ઠન્તિ યદા શતꣳ સહસ્રં
કુર્વન્ત્યથૈકમુત્થાનꣳસહસ્રસંમિતો  વા અસૌ લોકોઽમુમેવ
લોકમભિ જયન્તિ યદૈષાં  પ્રમીયેત યદા વા  જીયેરન્નથૈકમુત્થાનં
તદ્ધિ તીર્થમ્ ॥ ૭। ૨। ૧॥ પૃષ્ઠાનિ  સપ્તદશઃ સુવર્ગો જયન્તિ યદૈકાદશ
ચ ॥ ૭। ૨। ૧॥

૫ કુસુરુબિન્દ  ઔદ્દાલકિરકામયત પશુમાન્થ્સ્યામિતિ  સ
એતꣳ સપ્તરાત્રમાહરત્તેનાયજત  તેન  વૈ સ યાવન્તો ગ્રામ્યાઃ
પશવસ્તાનવારુંધ  ય એવં વિદ્વાન્થ્સપ્તરાત્રેણ  યજતે  યાવન્ત એવ
ગ્રામ્યાઃ પશવસ્તાનેવાવ  રુંધે સપ્તરાત્રો ભવતિ સપ્ત ગ્રામ્યાઃ પશવઃ
સપ્તારણ્યાઃ સપ્ત છન્દાગ્સ્યુભયસ્યાવરુદ્ધ્યૈ ત્રિવૃદગ્નિષ્ટોમો ભવતિ
તેજ

૬ એવાવ  રુંધે પઞ્ચદશો ભવતીન્દ્રિયમેવાવ  રુંધે સપ્તદશો
ભવત્યન્નાદ્યસ્યાવરુદ્ધ્યા  અથો  પ્રૈવ તેન  જાયત એકવિꣳશો
ભવતિ  પ્રતિષ્ઠિત્યા  અથો  રુચમેવાત્મન્ધત્તે ત્રિણવો ભવતિ
વિજિત્યૈ પઞ્ચવિꣳશોઽગ્નિષ્ટોમો ભવતિ પ્રજાપતેરાપ્ત્યૈ
મહાવ્રતવાનન્નાદ્યસ્યાવરુદ્ધ્યૈ વિશ્વજિથ્સર્વપૃષ્ઠોઽતિરાત્રો ભવતિ
સર્વસ્યાભિજિત્યૈ  યત્પ્રત્યક્ષં  પૂર્વેષ્વહસ્સુ પૃષ્ઠાન્યુપેયુઃ
પ્રત્યક્ષં

૭ વિશ્વજિતિ  યથા  દુગ્ધામુપસીદત્યેવમુત્તમમહઃ
સ્યાન્નૈકરાત્રશ્ચન સ્યાદ્બૃહદ્રથન્તરે પૂર્વેષ્વહસ્સૂપ  યન્તીયં
વાવ રથંતરમસૌ બૃહદાભ્યામેવ ન યન્ત્યથો  અનયોરેવ પ્રતિ
તિષ્ઠન્તિ  યત્પ્રત્યક્ષં  વિશ્વજિતિ  પૃષ્ઠાન્યુપયન્તિ  યથા  પ્રત્તાં
દુહે તાદૃગેવ તત્ ॥ ૭। ૨। ૨॥ તેજ  ઉપેયુઃ પ્રત્યક્ષં  દ્વિચત્વારિꣳશચ્ચ
॥ ૭। ૨। ૨॥

૮ બૃહસ્પતિરકામયત બ્રહ્મવર્ચસી સ્યામિતિ  સ એતમષ્ટરાત્રમપશ્યત્
તમાહરત્ તેનાયજત  તતો  વૈ સ બ્રહ્મવર્ચસ્યભવદ્ય એવં

વિદ્વાનષ્ટરાત્રેણ  યજતે બ્રહ્મવર્ચસ્યેવ ભવત્યષ્ટરાત્રો
ભવત્યષ્ટાક્ષરા ગાયત્રી ગાયત્રી બ્રહ્મવર્ચસં ગાયત્રિયૈવ
બ્રહ્મવર્ચસમવ  રુંધેઽષ્ટરાત્રો ભવતિ  ચતસ્રો  વૈ
દિશશ્ચતસ્રોઽવાન્તરદિશા દિગ્ભ્ય એવ બ્રહ્મવર્ચસમવ  રુંધે
૯ ત્રિવૃદગ્નિષ્ટોમો ભવતિ  તેજ  એવાવ  રુંધે પઞ્ચદશો
ભવતીન્દ્રિયમેવાવ  રુંધે સપ્તદશો ભવત્યન્નાદ્યસ્યાવરુદ્ધ્યા
અથો  પ્રૈવ તેન  જાયત એકવિ ꣳ શો ભવતિ  પ્રતિષ્ઠિત્યા  અથો
રુચમેવાત્મન્ધત્તે ત્રિણવો ભવતિ  વિજિત્યૈ ત્રયસ્ત્રિ ꣳ શો ભવતિ
પ્રતિષ્ઠિત્યૈ પઞ્ચવિ ꣳ શોઽગ્નિષ્ટોમો ભવતિ પ્રજાપતેરાપ્ત્યૈ
મહાવ્રતવાનન્નાદ્યસ્યાવરુદ્ધ્યૈ વિશ્વજિત્સર્વપૃષ્ઠોઽતિરાત્રો
ભવતિ  સર્વસ્યાભિજિત્યૈ ॥ ૭। ૨। ૩॥ દિગ્ભ્ય એવ બ્રહ્મવર્ચસમવ
રુન્ધેઽભિજિત્યૈ ॥ ૭। ૨। ૩॥
૧૦ પ્રજાપતિઃ પ્રજા અસૃજત  તાઃ સૃષ્ટાઃ, ક્ષુધં  ન્યાયન્થ્સ એતં
નવરાત્રમપશ્યત્ તમાહરત્ તેનાયજત  તતો  વૈ પ્રજાભ્યોઽકલ્પત
યર્હિ  પ્રજાઃ, ક્ષુધં  નિગચ્છેયુસ્તર્હિ  નવરાત્રેણ  યજેતેમે હિ વા એતાસાં
લોકા અક્લૃપ્તા  અથૈતાઃ, ક્ષુધં  નિ ગચ્છન્તીમાનેવાભ્યો  લોકાન્કલ્પયતિ
તાન્કલ્પમાનાન્પ્રજાભ્યોઽનુ  કલ્પતે  કલ્પન્તે
૧૧ ઽસ્મા ઇમે લોકા ઊર્જં  પ્રજાસુ  દધાતિ ત્રિરાત્રેણૈવેમં લોકં
કલ્પયતિ ત્રિરાત્રેણાન્તરિક્ષં ત્રિરાત્રેણામું લોકં યથા  ગુણે
ગુણમન્વસ્યત્યેવમેવ તલ્લોકે લોકમન્વસ્યતિ  ધૃત્યા  અશિથિલં
ભાવાય  જ્યોતિર્ગૌરાયુરિતિ  જ્ઞાતા સ્તોમા  ભવન્તીયં વાવ જ્યોતિરન્તરિક્ષં
ગૌરસાવાયુરેષ્વેવ લોકેષુ  પ્રતિ  તિષ્ઠન્તિ  જ્ઞાત્રં  પ્રજાનાં
૧૨ ગચ્છતિ નવરાત્રો ભવત્યભિપૂર્વમેવાસ્મિન્તેજો  દધાતિ  યો જ્યોગામયાવી
સ્યાથ્સ નવરાત્રેણ  યજેત પ્રાણા હિ વા એતસ્યાધૃતા  અથૈતસ્ય  જ્યોગામયતિ
પ્રાણાનેવાસ્મિન્દાધારોત યદીતાસુર્ભવતિ  જીવત્યેવ ॥ ૭। ૨। ૪॥ કલ્પન્તે
પ્રજાનાન્ત્રયસ્ત્રિ ꣳ શચ્ચ ॥ ૭। ૨। ૪॥
૧૩ પ્રજાપતિરકામયત  પ્ર જાયેયેતિ  સ એતં

દશહોતારમપશ્યત્તમજુહોત્તેન દશરાત્રમસૃજત તેન દશરાત્રેણ
પ્રાજાયત દશરાત્રાય દીક્ષિષ્યમાણો દશહોતારં જુહુયાદ્દશહોત્રૈવ
દશરાત્રꣳ સૃજતે તેન દશરાત્રેણ પ્ર જાયતે વૈરાજો વા એષ
યજ્ઞો યદ્દશરાત્રો
૧૪ ય એવં વિદ્વાન્દશરાત્રેણ યજતે વિરાજમેવ ગચ્છતિ
પ્રાજાપત્યો વા એષ યજ્ઞો યદ્દશરાત્રો ય એવં વિદ્વાન્દશરાત્રેણ
યજતે પ્રૈવ જાયત ઇન્દ્રો વૈ સદૃઙ્ગેવતાભિરાસીથ્સ
ન વ્યાવૃતમગચ્છથ્સ પ્રજાપતિમુપાધાવત્તસ્મા
એતં દશરાત્રં પ્રાયચ્છત્તમાહરત્તેનાયજત તતો વૈ
સોઽન્યાભિર્દેવતાભિર્વ્યાવૃતમગચ્છદ્ય એવં વિદ્વાન્દશરાત્રેણ
યજતે વ્યાવૃતમેવ પાપ્મના ભ્રાતૃવ્યેણ ગચ્છતિ ત્રિકકુદ્વા
૧૫ એષ યજ્ઞો યદ્દશરાત્રઃ કકુત્પઞ્ચદશઃ કકુદેકવિꣳશઃ
કકુત્ત્રયસ્ત્રિꣳશો ય એવં વિદ્વાન્દશરાત્રેણ યજતે ત્રિકકુદેવ
સમાનાનાં ભવતિ યજમાનઃ પઞ્ચદશો યજમાન એકવિꣳશો
યજમાનસ્ત્રયસ્ત્રિꣳશઃ પુર ઇતરા અભિચર્યમાણો દશરાત્રેણ
યજેત દેવપુરા એવ પર્યૂહતે તસ્ય ન કુતશ્ચનોપાવ્યાધો ભવતિ
નૈનમભિચરન્થ્સ્તૃણુતે દેવાસુરાઃ સંયત્તા આસન્તે દેવા એતા
૧૬ દેવપુરા અપશ્યન્, યદ્દશરાત્રસ્તાઃ પર્યૌહન્ત તેષાં
ન કુતશ્ચનોપાવ્યાધોઽભવત્તતો દેવા અભવન્પરાસુરા યો
ભ્રાતૃવ્યવાન્થ્સ્યાથ્સ દશરાત્રેણ યજેત દેવપુરા એવ પર્યૂહતે તસ્ય ન
કુતશ્ચનોપાવ્યાધો ભવતિ ભવત્યાત્મના પરાસ્ય ભ્રાતૃવ્યો ભવતિ
સ્તોમ સ્તોમસ્યોપસ્તિર્ભવતિ ભ્રાતૃવ્યમેવોપસ્તિં કુરુતે જામિ વા
૧૭ એતત્કુર્વન્તિ યજ્જ્યાયાꣳસꣳ સ્તોમમુપેત્ય કનીયાꣳ સમુપયન્તિ
યદગ્નિષ્ટોમસામાન્યવસ્તાચ્ચ પરસ્તાચ્ચ ભવન્ત્યજામિત્વાય
ત્રિવૃદગ્નિષ્ટોમોઽગ્નિષ્ટુદાગ્નેયીષુ ભવતિ તેજ એવાવ રુંધે
પઞ્ચદશ ઉક્થ્ય ઐન્દ્રીષ્વિન્દ્રિયમેવાવ રુંધે ત્રિવૃદગ્નિષ્ટોમો
વૈશ્વદેવીષુ પુષ્ટિમેવાવ રુંધે સપ્તદશોઽગ્નિષ્ટોમઃ પ્રાજાપત્યાસુ

તીવ્રસોમોઽન્નાદ્યસ્યાવરુદ્ધ્યા અથો પ્રૈવ તેન જાયત
૧૮ એકવિꣳશ ઉક્થ્યઃ સૌરીષુ પ્રતિષ્ઠિત્યા અથો રુચમેવાત્મન્ધત્તે
સપ્તદશોઽગ્નિષ્ટોમઃ પ્રાજાપત્યાસૂપહવ્ય ઉપહવમેવ ગચ્છતિ
ત્રિણવાવગ્નિષ્ટોમાવભિત ઐન્દ્રીષુ વિજિત્યૈ ત્રયસ્ત્રિꣳશ ઉક્થ્યો
વૈશ્વદેવીષુ પ્રતિષ્ઠિત્યૈ વિશ્વજિત્સર્વપૃષ્ઠોઽતિરાત્રો ભવતિ
સર્વસ્યાભિજિત્યૈ ॥ ૭। ૨। ૫॥ વિરાજમેવ ગચ્છતિ પ્રાજાપત્યો વા એષ
યજ્ઞો યદ્દશરાત્રસ્ત્રિકકુદ્વા એતા વૈ જાયત એકત્રિꣳશચ્ચ ॥ ૭। ૨। ૫॥
૧૯ ઋતવો વૈ પ્રજાકામાઃ પ્રજાં નાવિન્દન્ત તેઽકામયન્ત પ્રજાꣳ
સૃજેમહિ પ્રજામવ રુંધીમહિ પ્રજાં વિન્દેમહિ પ્રજાવન્તઃ સ્યામેતિ
ત એતમેકાદશરાત્રમપશ્યન્તમાહરન્તેનાયજન્ત તતો વૈ તે
પ્રજામસૃજન્ત પ્રજામવારુંધત પ્રજામવિન્દન્ત પ્રજાવન્તોઽભવન્ત
ઋતવોઽભવન્તદાર્તવાનામાર્તવત્વમૃતૂનાં વા એતે પુત્રાસ્તસ્મા
૨૦ દાર્તવા ઉચ્યન્તે ય એવં વિદ્વાꣳસ એકાદશરાત્રમાસતે પ્રજામેવ
સૃજન્તે પ્રજામવ રુંધતે પ્રજાં વિન્દન્તે પ્રજાવન્તો ભવન્તિ
જ્યોતિરતિરાત્રો ભવતિ જ્યોતિરેવ પુરસ્તાદ્દધતે સુવર્ગસ્ય
લોકસ્યાનુખ્યાત્યૈ પૃષ્ઠ્યઃ ષડહો ભવતિ ષડ્વા ઋતવઃ
ષટ્પૃષ્ઠાનિ પૃષ્ઠૈરેવર્તૂનન્વારોહન્ત્યૃતુભિઃ સંવત્સરં
તે સંવત્સર એવ પ્રતિ તિષ્ઠન્તિ ચતુર્વિꣳશો ભવતિ
ચતુર્વિꣳશત્યક્ષરા ગાયત્રી
૨૧ ગાયત્રં બ્રહ્મવર્ચસં ગાયત્રિયામેવ બ્રહ્મવર્ચસે પ્રતિ તિષ્ઠન્તિ
ચતુશ્ચત્વારિꣳશો ભવતિ ચતુશ્ચત્વારિꣳશદક્ષરા ત્રિષ્ટુગિંદ્રિયં
ત્રિષ્ટુપ્ત્રિષ્ટુભ્યેવેન્દ્રિયે પ્રતિ તિષ્ઠન્ત્યષ્ટાચત્વારિꣳશો
ભવત્યષ્ટાચત્વારિꣳશદક્ષરા જગતી જાગતાઃ પશવો જગત્યામેવ
પશુષુ પ્રતિ તિષ્ઠન્ત્યેકાદશરાત્રો ભવતિ પઞ્ચ વા ઋતવ
આર્તવાઃ પઞ્ચર્તુષ્વેવાર્તવેષુ સંવત્સરે પ્રતિષ્ઠાય પ્રજામવ
રુંધતેઽતિરાત્રાવભિતો ભવતઃ પ્રજાયૈ પરિગૃહીત્યૈ ॥ ૭। ૨। ૬॥
તસ્માદ્ગાયત્ર્યેકાન્ન પઞ્ચાશચ્ચ ॥ ૭। ૨। ૬॥

૨૨ ઐન્દ્રવાયવાગ્રાન્ગૃહ્ણીયાદ્યઃ કામયેત યથાપૂર્વં
પ્રજાઃ કલ્પેરન્નિતિ યજ્ઞસ્ય વૈ ક્લૃપ્તિમનુ પ્રજાઃ કલ્પન્તે
યજ્ઞસ્યાક્લૃપ્તિમનુ ન કલ્પન્તે યથાપૂર્વમેવ પ્રજાઃ કલ્પયતિ ન
જ્યાયાꣳસં કનીયાનતિ ક્રામત્યૈન્દ્રવાયવાગ્રાન્ગૃહ્ણીયાદામયાવિનઃ
પ્રાણેન વા એષ વ્યૃધ્યતે યસ્યામયતિ પ્રાણ ઐન્દ્રવાયવઃ
પ્રાણેનૈવૈન ꣳ સમર્ધયતિ મૈત્રાવરુણાગ્રાન્ગૃહ્ણીરન્ યેષાં
દીક્ષિતાનાં પ્રમીયેત

૨૩ પ્રાણાપાનાભ્યાં વા એતે વ્યૃધ્યન્તે યેષાં દીક્ષિતાનાં પ્રમીયતે
પ્રાણાપાનૌ મિત્રાવરુણૌ પ્રાણાપાનાવેવ મુખતઃ પરિ હરન્ત
આશ્વિનાગ્રાન્ગૃહ્ણીતાનુજાવરોશ્વિનૌ વૈ દેવાનામાનુજાવરૌ પશ્ચેવાગ્રં
પર્યૈતામશ્વિનાવેતસ્ય દેવતા ય આનુજાવરસ્તાવેવૈનમગ્રં પરિ
ણયતઃ શુક્રાગ્રાન્ગૃહ્ણીત ગતશ્રીઃ પ્રતિષ્ઠાકામોઽસૌ વા આદિત્યઃ શુક્ર
એષોઽન્તોઽન્તં મનુષ્યઃ

૨૪ શ્રિયૈ ગત્વા નિ વર્તતેઽન્તાદેવાન્તમા રભતે ન તતઃ
પાપીયાન્ભવતિ મન્થ્યગ્રાન્ગૃહ્ણીતાભિચરન્નાર્તપાત્રં વા એતદ્યન્મન્થિપાત્રં
મૃત્યુનૈવૈનં ગ્રાહયતિ તાજગાર્તિમાર્ચ્છત્યાગ્રયણાગ્રાન્ગૃહ્ણીત યસ્ય
પિતા પિતામહઃ પુણ્યઃ સ્યાદથ તન્ન પ્રાપ્નુયાદ્વાચા વા એષ ઇન્દ્રિયેણ
વ્યૃધ્યતે યસ્ય પિતા પિતામહઃ પુણ્યો

૨૫ ભવત્યથ તન્ન પ્રાપ્નોત્યુર ઇવૈતદ્યજ્ઞસ્ય વાગિવ
યદાગ્રયણો વાચૈવૈનમિન્દ્રિયેણ સમર્ધયતિ ન તતઃ
પાપીયાન્ભવત્યુક્થ્યાગ્રાન્ગૃહ્ણીતાભિચર્યમાણઃ સર્વેષાં વા
એતત્પાત્રાણામિંદ્રિયં યદુક્થ્યપાત્રꣳ સર્વેણૈવૈનમિન્દ્રિયેણાતિ પ્ર
યુઙ્ક્તે સરસ્વત્યભિ નોનેષિ વસ્ય ઇતિ પુરોરુચં કુર્યાદ્વાગ્વૈ

૨૬ સરસ્વતી વાચૈવૈનમતિ પ્ર યુઙ્ક્તે મા ત્વત્ક્ષેત્રાણ્યરણાનિ ગન્મેત્યાહ
મૃત્યોર્વૈ ક્ષેત્રાણ્યરણાનિ તેનૈવ મૃત્યોઃ, ક્ષેત્રાણિ ન ગચ્છતિ
પૂર્ણાન્ગ્રહાન્ગૃહ્ણીયાદામયાવિનઃ પ્રાણાન્, વા એતસ્ય શુગૃચ્છતિ

યસ્યામયતિ પ્રાણા ગ્રહાઃ પ્રાણાનેવાસ્ય શુચો મુઞ્ચત્યુત
યદીતાસુર્ભવતિ જીવત્યેવ પૂર્ણાન્ગ્રહાન્ગૃહ્ણીયાદ્યર્હિ પર્જન્યો ન
વર્ષેત્પ્રાણાન્, વા એતર્હિ પ્રજાના ँ શુગૃચ્છતિ યર્હિ પર્જન્યો
ન વર્ષતિ પ્રાણા ગ્રહાઃ પ્રાણાનેવ પ્રજાના ँશુચો મુઞ્ચતિ તાજક્પ્ર
વર્ષતિ ॥ ૭। ૨। ૭॥ પ્રમીયેત મનુષ્ય ઋધ્યતે યસ્ય પિતા પિતામહઃ
પુણ્યો વાગ્વા એવ પૂર્ણાન્ગ્રહાન્પઞ્ચવિ ँ શતિશ્ચ ॥ ૭। ૨। ૭॥
૨૭ ગાયત્રો વા ઐન્દ્રવાયવો ગાયત્રં
પ્રાયણીયમહસ્તસ્માત્પ્રાયણીયેઽહન્નૈન્દ્રવાયવો ગૃહ્યતે સ્વ
એવૈનમાયતને ગૃહ્ણાતિ ત્રૈષ્ટુભો વૈ શુક્રસ્ત્રૈષ્ટુભં
દ્વિતીયમહસ્તસ્માદ્દ્વિતીયેઽહઙ્છુક્રો ગૃહ્યતે
સ્વ એવૈનમાયતને ગૃહ્ણાતિ જાગતો વા આગ્રયણો જાગતં
તૃતીયમહસ્તસ્માત્તૃતીયેઽહન્નાગ્રયણો ગૃહ્યતે સ્વ એવૈનમાયતને
ગૃહ્ણાત્યેતદ્વૈ
૨૮ યજ્ઞમાપદ્યચ્છન્દાગ્સ્યાપ્નોતિ યદાગ્રયણઃ શ્વો ગૃહ્યતે યત્રૈવ
યજ્ઞમદૃશન્તત એવૈનં પુનઃ પ્ર યુઙ્ક્તે જગન્મુખો વૈ
દ્વિતીયસ્ત્રિરાત્રો જાગત આગ્રયણો યચ્ચતુર્થેઽહન્નાગ્રયણો ગૃહ્યતે
સ્વ એવૈનમાયતને ગૃહ્ણાત્યથો સ્વમેવ છન્દોઽનુ પર્યાવર્તન્તે
રાથંતરો વા ઐન્દ્રવાયવો રાથંતરં પઞ્ચમમહસ્તસ્માત્ પઞ્ચમેઽહ
૨૯ ન્નૈન્દ્રવાયવો ગૃહ્યતે સ્વ એવૈનમાયતને ગૃહ્ણાતિ બાર્હતો વૈ
શુક્રો બાર્હત ँ ષષ્ઠમહસ્તસ્માત્ષષ્ઠેઽહઙ્છુક્રો ગૃહ્યતે સ્વ
એવૈનમાયતને ગૃહ્ણાત્યેતદ્વૈ દ્વિતીયં યજ્ઞમાપદ્યચ્છન્દાગ્સ્યાપ્નોતિ
યચ્છુક્રઃ શ્વો ગૃહ્યતે યત્રૈવ યજ્ઞમદૃશન્તત એવૈનં પુનઃ
પ્ર યુઙ્ક્તે ત્રિષ્ટુઙ્મુખો વૈ તૃતીયસ્ત્રિરાત્રસ્ત્રૈષ્ટુભઃ
૩૦ શુક્રો યત્સપ્તમેઽહઙ્છુક્રો ગૃહ્યતે સ્વ એવૈનમાયતને
ગૃહ્ણાત્યથો સ્વમેવ છન્દોઽનુ પર્યાવર્તન્તે વાગ્વા આગ્રયણો
વાગષ્ટમમહસ્તસ્માદષ્ટમેઽહન્નાગ્રયણો ગૃહ્યતે
સ્વ એવૈનમાયતને ગૃહ્ણાતિ પ્રાણો વા ઐન્દ્રવાયવઃ પ્રાણો

નવમમહસ્તસ્માન્નવમેઽહન્નૈન્દ્રવાયવો ગૃહ્યતે સ્વ એવૈનમાયતને
ગૃહ્ણાત્યેતદ્

31 વૈ તૃતીયં યજ્ઞમાપદ્યચ્છન્દાગ્ંસ્યાપ્નોતિ યદૈન્દ્રવાયવઃ
શ્વો ગૃહ્યતે યત્રૈવ યજ્ઞમદૃશન્તત એવૈનં પુનઃ પ્ર
યુઙ્ક્તેઽથો સ્વમેવ છન્દોઽનુ પર્યાવર્તન્તે પથો વા એતેઽધ્યપથેન
યન્તિ યેઽન્યેનૈન્દ્રવાયવાત્પ્રતિપદ્યન્તેઽન્તઃ ખલુ વા એષ યજ્ઞસ્ય
યદ્દશમમહર્દશમેઽહન્નૈન્દ્રવાયવો ગૃહ્યતે યજ્ઞસ્યૈ

32 વાન્તં ગત્વાપથાત્પન્થામપિ યન્ત્યથો યથા વહીયસા
પ્રતિસારં વહન્તિ તાદૃગેવ તચ્છન્દાગ્ંસ્યન્યોઽન્યસ્ય
લોકમભ્યધ્યાયન્તાન્યેતેનૈવ દેવા વ્યવાહયન્નૈન્દ્રવાયવસ્ય
વા એતદાયતનં યચ્ચતુર્થમહસ્તસ્મિન્નાગ્રયણો ગૃહ્યતે
તસ્માદાગ્રયણસ્યાયતને નવમેઽહન્નૈન્દ્રવાયવો ગૃહ્યતે શુક્રસ્ય
વા એતદાયતનં યત્પઞ્ચમ

33 મહસ્તસ્મિન્નૈન્દ્રવાયવો ગૃહ્યતે તસ્માદૈન્દ્રવાયવસ્યાયતને
સપ્તમેઽહઞ્છુક્રો ગૃહ્યત આગ્રયણસ્ય વા
એતદાયતનં યત્ષષ્ઠમહસ્તસ્મિઞ્છુક્રો ગૃહ્યતે
તસ્માચ્છુક્રસ્યાયતનેઽષ્ટમેઽહન્નાગ્રયણો ગૃહ્યતે છન્દાગ્ંસ્યેવ
તદ્વિ વાહયતિ પ્ર વસ્યસો વિવાહમાપ્નોતિ ય એવં વેદાથો દેવતાભ્ય એવ
યજ્ઞે સંવિદં દધાતિ તસ્માદિદમન્યોઽન્યસ્મૈ દદાતિ ॥ ૭। ૨। ૮॥ એતદ્વૈ
પઞ્ચમેઽહન્ત્રૈષ્ટુભ એતદ્ગૃહ્યતે યજ્ઞસ્ય પઞ્ચમમન્યસ્મા
એકઞ્ચ ॥ ૭। ૨। ૮॥ ગાયત્રસ્ત્રૈષ્ટુભો જાગતો જગન્મુખોઽથો સ્વઁ
રાથન્તરો બાર્હત એતદ્વૈ દ્વિતીયઁ શુક્રસ્ત્રિષ્ટુઙ્ગુખોઽથો
વાક્પ્રાણ એતદથો પથશ્ચતુર્થં નવમે પંચમઁ સપ્તમે
યથ્ષષ્ઠમષ્ટમેઽહઞ્છંદાઁસિ ॥

34 પ્રજાપતિરકામયત પ્ર જાયેયેતિ સ એતં
દ્વાદશરાત્રમપશ્યત્તમાહરત્તેનાયજત તતો વૈ સ પ્રાજાયત
યઃ કામયેત પ્ર જાયેયેતિ સ દ્વાદશરાત્રેણ યજેત પ્રૈવ જાયતે

બ્રહ્મવાદિનો વદન્ત્યગ્નિષ્ટોમપ્રાયણા યજ્ઞા અથ કસ્માદતિરાત્રઃ પૂર્વઃ
પ્ર યુજ્યત ઇતિ ચક્ષુષી વા એતે યજ્ઞસ્ય યદતિરાત્રૌ કનીનિકે
અગ્નિષ્ટોમૌ ય
૩૫ દગ્નિષ્ટોમં પૂર્વં પ્રયુંજીરન્બહિર્ધા કનીનિકે દધ્યુસ્તસ્માદતિરાત્રઃ
પૂર્વઃ પ્ર યુજ્યતે ચક્ષુષી એવ યજ્ઞે ધિત્વા મધ્યતઃ કનીનિકે
પ્રતિ દધતિ યો વૈ ગાયત્રીં જ્યોતિઃપક્ષાં વેદ જ્યોતિષા ભાસા સુવર્ગં
લોકમેતિ યાવગ્નિષ્ટોમૌ તૌ પક્ષૌ યેઽન્તરેઽષ્ટાવુક્થ્યાઃ સ આત્મૈષા
વૈ ગાયત્રી જ્યોતિઃપક્ષા ય એવં વેદ જ્યોતિષા ભાસા સુવર્ગં લોક
૩૬ મેતિ પ્રજાપતિર્વા એષ દ્વાદશધા વિહિતો યદ્દ્વાદશરાત્રો
યાવતિરાત્રૌ તૌ પક્ષૌ યેઽન્તરેઽષ્ટાવુક્થ્યાઃ સ આત્મા પ્રજાપતિર્વાવૈષ
સન્થ્સદ્ધ વૈ સત્રેણ સ્પૃણોતિ પ્રાણા વૈ સત્પ્રાણાનેવ સ્પૃણોતિ સર્વાસાં
વા એતે પ્રજાનાં પ્રાણૈરાસતે યે સત્રમાસતે તસ્માત્પૃચ્છન્તિ કિમેતે
સત્રિણ ઇતિ પ્રિયઃ પ્રજાનામુત્થિતો ભવતિ ય એવં વેદ ॥ ૭। ૨। ૯॥
અગ્નિષ્ટોમૌ યથ્સુવર્ગ૩ઁ લ્લોકં પ્રિયઃ પ્રજાનાં પઞ્ચ ચ ॥ ૭। ૨। ૯॥
૩૭ ન વા એષોઽન્યતો વૈશ્વાનરઃ સુવર્ગાય લોકાય પ્રાભવદૂર્ધ્વો હ વા
એષ આતત આસીત્તે દેવા એતં વૈશ્વાનરં પર્યૌહન્થ્સુવર્ગસ્ય લોકસ્ય પ્ર
ભૂત્યા ઋતવો વા એતેન પ્રજાપતિમયાજયન્તેષ્વાર્ધ્નોદધિ તદૃધ્નોતિ
હ વા ઋત્વિક્ષુ ય એવં વિદ્વાન્દ્વાદશાહેન યજતે તેઽસ્મિન્નૈચ્છન્ત
સ રસમહ વસન્તાય પ્રાયચ્છદ્
૩૮ યવં ગ્રીષ્માયૌષધીર્વર્ષાભ્યો વ્રીહીઞ્છરદે માષતિલૌ
હેમન્તશિશિરાભ્યાં તેનેન્દ્રં પ્રજાપતિરયાજયત્તતો વા ઇન્દ્ર
ઇન્દ્રોઽભવત્તસ્માદાહુરાનુજાવરસ્ય યજ્ઞ ઇતિ સ હ્યેતેનાગ્રેઽયજતૈષ
હ વૈ કુણપમત્તિ યઃ સત્રે પ્રતિગૃહ્ણાતિ પુરુષકુણપમશ્વકુણપં
ગૌર્વા અન્નં યેન પાત્રેણાન્નં બિભ્રતિ યત્તન્ન નિર્ણેનિજતિ તતોઽધિ
૩૯ મલં જાયત એક એવ યજેતૈકો હિ પ્રજાપતિરાર્ધ્નોદ્દ્વાદશ
રાત્રીર્દીક્ષિતઃ સ્યાદ્દ્વાદશ માસાઃ સંવથ્સરઃ સંવથ્સરઃ પ્રજાપતિઃ
પ્રજાપતિર્વાવૈષ એષ હ ત્વૈ જાયતે યસ્તપસોઽધિ જાયતે ચતુર્ધા

વા એતાસ્તિસ્રસ્તિસ્રો રાત્રયો યદ્વાદશોઽપસદો યાઃ પ્રથમા યજ્ઞં
તાભિઃ સંભરતિ યા દ્વિતીયા યજ્ઞં તાભિરા રભતે
૪૦ યાસ્તૃતીયાઃ પાત્રાણિ તાભિર્નિર્ણેનિક્તે યાશ્ચતુર્થીરપિ
તાભિરાત્માનમન્તરતઃ શુન્ધતે યો વા અસ્ય પશુમત્તિ માꣳસꣳ
સોઽત્તિ યઃ પુરોડાશં મસ્તિષ્કꣳ સ યઃ પરિવાપં પુરીષꣳ
સ ય આજ્યં મજ્જાનꣳ સ યસ્સોમગ્ગ્ સ્વેદꣳ સોઽપિ હ વા અસ્ય
શીર્ષણ્યા નિષ્પદઃ પ્રતિ ગૃહ્ણાતિ યો દ્વાદશાહે પ્રતિગૃહ્ણાતિ
તસ્માદ્વાદશાહેન ન યાજ્યં પાપ્મનો વ્યાવૃત્ત્યૈ ॥ ૭। ૨। ૧૦॥ અયચ્છદધિ
રભતે દ્વાદશાહેન ચત્વારિ ચ ॥ ૭। ૨। ૧૦॥

૪૧ એકસ્મૈ સ્વાહા દ્વાભ્યાગ્ સ્વાહા ત્રિભ્યઃ સ્વાહા ચતુર્ભ્યઃ સ્વાહા
પઞ્ચભ્યઃ સ્વાહા ષડ્ભ્યઃ સ્વાહા સપ્તભ્યઃ સ્વાહાષ્ટાભ્યઃ સ્વાહા
નવભ્યઃ સ્વાહા દશભ્યઃ સ્વાહૈકાદશભ્યઃ સ્વાહા દ્વાદશભ્યઃ
સ્વાહા ત્રયોદશભ્યઃ સ્વાહા ચતુર્દશભ્યઃ સ્વાહા પઞ્ચદશભ્યઃ
સ્વાહા ષોડશભ્યઃ સ્વાહા સપ્તદશભ્યઃ સ્વાહાષ્ટાદશભ્યઃ સ્વાહૈકાન્ન
વિꣳશત્યૈ સ્વાહા નવવિꣳશત્યૈ સ્વાહૈકાન્ન ચત્વારિꣳશતે
સ્વાહા નવચત્વારિꣳશતે સ્વાહૈકાન્ન ષષ્ટ્યૈ સ્વાહા નવષષ્ટ્યૈ
સ્વાહૈકાન્નાશીત્યૈ સ્વાહા નવાશીત્યૈ સ્વાહૈકાન્ન શતાય સ્વાહા શતાય
સ્વાહા દ્વાભ્યાꣳશતાભ્યાગ્ સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૨। ૧૧॥
નવચત્વારિꣳશતે સ્વાહૈકાન્નૈકવિꣳશતિશ્ચ ॥ ૭। ૨। ૧૧॥

૪૨ એકસ્મૈ સ્વાહા ત્રિભ્યઃ સ્વાહા પઞ્ચભ્યઃ સ્વાહા સપ્તભ્યઃ સ્વાહા
નવભ્યઃ સ્વાહૈકાદશભ્યઃ સ્વાહા ત્રયોદશભ્યઃ સ્વાહા પઞ્ચદશભ્યઃ
સ્વાહા સપ્તદશભ્યઃ સ્વાહૈકાન્ન વિꣳશત્યૈ સ્વાહા નવવિꣳશત્યૈ
સ્વાહૈકાન્ન ચત્વારિꣳશતે સ્વાહા નવચત્વારિꣳશતે સ્વાહૈકાન્ન
ષષ્ટ્યૈ સ્વાહા નવષષ્ટ્યૈ સ્વાહૈકાન્નાશીત્યૈ સ્વાહા નવાશીત્યૈ
સ્વાહૈકાન્ન શતાય સ્વાહા શતાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૨। ૧૨॥
એકસ્મૈ ત્રિભ્યઃ પઞ્ચાશત્ ॥ ૭। ૨। ૧૨॥

૪૩ દ્વાભ્યાગ્ સ્વાહા ચતુર્ભ્યઃ સ્વાહા ષડ્ભ્યઃ સ્વાહાઽષ્ટાભ્યઃ સ્વાહા

દશભ્યઃ સ્વાહા દ્વાદશભ્યઃ સ્વાહા ચતુર્દશભ્યઃ સ્વાહા ષોડશભ્યઃ
સ્વાહાઽષ્ટાદશભ્યઃ સ્વાહા વિꣳશત્યૈ સ્વાહાઽષ્ટાનવત્યૈ સ્વાહા શતાય
સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૨। ૧૩॥ દ્વાભ્યામષ્ટાનવત્યૈ ષડ્વિꣳશતિઃ ॥
૭। ૨। ૧૩॥

૪૪ ત્રિભ્યઃ સ્વાહા પઞ્ચભ્યઃ સ્વાહા સપ્તભ્યઃ સ્વાહા નવભ્યઃ
સ્વાહૈકાદશભ્યઃ સ્વાહા ત્રયોદશભ્યઃ સ્વાહા પઞ્ચદશભ્યઃ સ્વાહા
સપ્તદશભ્યઃ સ્વાહૈકાન્ન વિꣳશત્યૈ સ્વાહા નવવિꣳશત્યૈ સ્વાહૈકાન્ન
ચત્વારિꣳશતે સ્વાહા નવચત્વારિꣳશતે સ્વાહૈકાન્ન ષષ્ટ્યૈ સ્વાહા
નવષષ્ટ્યૈ સ્વાહૈકાન્નાશીત્યૈ સ્વાહા નવાશીત્યૈ સ્વાહૈકાન્ન શતાય સ્વાહા
શતાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૨। ૧૪॥ ત્રિભ્યોઽષ્ટા ચત્વારિꣳશત્
॥ ૭। ૨। ૧૪॥

૪૫ ચતુર્ભ્યઃ સ્વાહાષ્ટાભ્યઃ સ્વાહા દ્વાદશભ્યઃ સ્વાહા ષોડશભ્યઃ
સ્વાહા વિꣳશત્યૈ સ્વાહા ષણ્ણવત્યૈ સ્વાહા શતાય સ્વાહા સર્વસ્મૈ
સ્વાહા ॥ ૭। ૨। ૧૫॥ ચતુર્ભ્યઃ ષણ્ણવત્યૈ ષોડશ ॥ ૭। ૨। ૧૫॥

૪૬ પઞ્ચભ્યઃ સ્વાહા દશભ્યઃ સ્વાહા પઞ્ચદશભ્યઃ સ્વાહા વિꣳશત્યૈ
સ્વાહા પઞ્ચનવત્યૈ સ્વાહા શતાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૨। ૧૬॥
પઞ્ચભ્યઃ પઞ્ચનવત્યૈ ચતુર્દશ ॥ ૭। ૨। ૧૬॥

૪૭ દશભ્યઃ સ્વાહા વિꣳશત્યૈ સ્વાહા ત્રિꣳશતે સ્વાહા
ચત્વારિꣳશતે સ્વાહા પઞ્ચાશતે સ્વાહા ષષ્ટ્યૈ સ્વાહા સપ્તત્યૈ
સ્વાહાઽશીત્યૈ સ્વાહા નવત્યૈ સ્વાહા શતાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૨। ૧૭॥ દશભ્યો દ્વાવિꣳશતિઃ
॥ ૭। ૨। ૧૭॥

૪૮ વિꣳશત્યૈ સ્વાહા ચત્વારિꣳશતે સ્વાહા ષષ્ટ્યૈ સ્વાહાશીત્યૈ
સ્વાહા શતાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૨। ૧૮॥ વિꣳશત્યૈ દ્વાદશ
॥ ૭। ૨। ૧૮॥

૪૯ પઞ્ચાશતે સ્વાહા શતાય સ્વાહા દ્વાભ્યાꣳશતાભ્યાગ્ં સ્વાહા
ત્રિભ્યઃ શતેભ્યઃ સ્વાહા ચતુર્ભ્યઃ શતેભ્યઃ સ્વાહા પઞ્ચભ્યઃ
શતેભ્યઃ સ્વાહા ષડ્ભ્યઃ શતેભ્યઃ સ્વાહા સપ્તભ્યઃ શતેભ્યઃ

સ્વાહાષ્ટાભ્યઃ શતેભ્યઃ સ્વાહા નવભ્યઃ શતેભ્યઃ સ્વાહા સહસ્રાય
સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૨। ૧૯॥ પંચાશતે દ્વાત્રિꣳશત્ ॥ ૭। ૨। ૧૯॥
૫૦ શતાય સ્વાહા સહસ્રાય સ્વાહાઽયુતાય સ્વાહા નિયુતાય સ્વાહા
પ્રયુતાય સ્વાહાર્બુદાય સ્વાહા ન્યર્બુદાય સ્વાહા સમુદ્રાય સ્વાહા મધ્યાય
સ્વાહાન્તાય સ્વાહા પરાર્ધાય સ્વાહોષસે સ્વાહા વ્યુષ્ટ્યૈ સ્વાહોદેષ્યતે
સ્વાહોદ્યતે સ્વાહોદિતાય સ્વાહા સુવર્ગાય સ્વાહા લોકાય સ્વાહા સર્વસ્મૈ
સ્વાહા ॥ ૭। ૨। ૨૦॥ શતાયાષ્ટાત્રિꣳશત્ ॥ ૭। ૨। ૨૦॥

સાધ્યાઃ ષડ્રાત્રં કુસુરુબિંદઃ સપ્તરાત્રં બૃહસ્પતિરષ્ટરાત્રં
પ્રજાપતિસ્તાઃ, ક્ષુધન્નવરાત્રં પ્રજાપતિરકામયત દશહોતારમૃતવ
ઐંદ્રવાયવાગ્રાન્ગાયત્રો વૈ પ્રજાપતિઃ સ દ્વાદશ રાત્રં ન વા એકસ્મા
એકસ્મૈ દ્વાભ્યાન્ત્રિભ્યશ્ચતુર્ભ્યઃ પંચભ્યો દશભ્યો વિꣳશત્યૈ
પંચાશતે શતાય વિꣳશતિઃ ॥

સાધ્યા અસ્મા ઇમે લોકા ગાયત્રં વૈ તૃતીયમેકસ્મૈ પંચાશત્ ॥

સાધ્યાઃ સર્વસ્મૈ સ્વાહા ॥

## સપ્તમકાણ્ડે તૃતીયઃ પ્રશ્નઃ ૩

૧ પ્રજવં વા એતેન યન્તિ યદ્દશમમહઃ પાપાવહીયં વા એતેન ભવન્તિ
યદ્દશમમહ૨્યો વૈ પ્રજવં યતામપથેન પ્રતિપદ્યતે યઃ સ્થાણુꣳ
હન્તિ યો ભ્રેષં ન્યેતિ સ હીયતે સ યો વૈ દશમેઽહન્નવિવાક્ય
ઉપહન્યતે સ હીયતે તસ્મૈ ય ઉપહતાય વ્યાહ તમેવાન્વારભ્ય
સમશ્નુતેઽથ યો વ્યાહ સ
૨ હીયતે તસ્માદ્દશમેઽહન્નવિવાક્ય ઉપહતાય ન વ્યુચ્યમથો
ખલ્વાહુર્યજ્ઞસ્ય વૈ સમૃદ્ધેન દેવાઃ સુવર્ગં લોકમાયન્,
યજ્ઞસ્ય વ્યૃદ્ધેનાસુરાન્પરાભાવયન્નિતિ યત્ખલુ વૈ યજ્ઞસ્ય
સમૃદ્ધં તદ્યજમાનસ્ય યદ્વ્યૃદ્ધં તદ્ભ્રાતૃવ્યસ્ય સ યો વૈ
દશમેઽહન્નવિવાક્ય ઉપહન્યતે સ એવાતિ રેચયતિ તે યે બાહ્યા

દૃશીકવઃ
૩ સ્યુસ્તે વિ બ્રૂયુર્યદિ તત્ર ન વિન્દેયુરન્તઃ સદસાદ્વ્યુચ્યં યદિ
તત્ર ન વિન્દેયુર્ગૃહપતિના વ્યુચ્યં તદ્વ્યુચ્યમેવાથ વા
એતથ્સર્પરાજ્ઞિયા ઋગ્ભિઃ સ્તુવન્તીયં વૈ સર્પતો રાજ્ઞી યદ્વા અસ્યાં
કિં ચાર્ચન્તિ યદાનૃચુસ્તેનેયꣳ સર્પરાજ્ઞી તે યદેવ કિંચ
વાચાનૃચુર્યદતોઽધ્યર્ચિતાર
૪ સ્તદુભયમાપ્ત્વાવરુધ્યોત્તિષ્ઠામેતિ તાભિર્મનસા સ્તુવતે ન વા
ઇમામશ્વરથો નાશ્વતરીરથઃ સદ્યઃ પર્યાપ્તુમર્હતિ મનો વા ઇમાꣳ
સદ્યઃ પર્યાપ્તુમર્હતિ મનઃ પરિભવિતુમથ બ્રહ્મ વદન્તિ પરિમિતા વા
ઋચઃ પરિમિતાનિ સામાનિ પરિમિતાનિ યજૂગ્ષ્યથૈતસ્યૈવાન્તો નાસ્તિ
યદ્બ્રહ્મ તત્પ્રતિગૃણત આ ચક્ષીત સ પ્રતિગરઃ ॥ ૭। ૩। ૧॥ વ્યાહ સ
દૃશીકવોઽર્ચિતારઃ સ એકં ચ ॥ ૭। ૩। ૧॥
૫ બ્રહ્મવાદિનો વદન્તિ કિં દ્વાદશાહસ્ય પ્રથમેનાહ્નર્ત્વિજાં યજમાનો
વૃઙ્ક્ત ઇતિ તેજ ઇન્દ્રિયમિતિ કિં દ્વિતીયેનેતિ પ્રાણાનન્નાદ્યમિતિ
કિં તૃતીયેનેતિ ત્રીનિમાઉꣳલ્લોકાનિતિ કિં ચતુર્થેનેતિ ચતુષ્પદઃ
પશૂનિતિ કિં પઞ્ચમેનેતિ પઞ્ચાક્ષરાં પઙ્ક્તિમિતિ કિꣳ ષષ્ઠેનેતિ
ષડ્તૂનિતિ કિꣳ સપ્તમેનેતિ સપ્તપદાꣳ શક્વરીમિતિ
૬ કિમષ્ટમેનેત્યષ્ટાક્ષરાં ગાયત્રીમિતિ કિં નવમેનેતિ
ત્રિવૃતગ્ગ્ સ્તોમમિતિ કિં દશમેનેતિ દશાક્ષરાં વિરાજમિતિ
કિમેકાદશેનેત્યેકાદશાક્ષરાં ત્રિષ્ટુભમિતિ કિં દ્વાદશેનેતિ
દ્વાદશાક્ષરાં જગતીમિત્યેતાવદ્વા અસ્તિ યાવદેતદ્યાવદેવાસ્તિ
તદેષાં વૃઙ્ક્તે ॥ ૭। ૩। ૨॥ શક્વરીમિત્યેક ચત્વારિꣳશચ્ચ ॥ ૭। ૩। ૨॥
૭ એષ વા આપ્તો દ્વાદશાહો યત્ત્રયોદશરાત્રઃ સમાનરꣳ
હ્યેતદહર્યત્પ્રાયણીયશ્ચોદયનીયશ્ચ ત્ર્યતિરાત્રો ભવતિ ત્રય
ઇમે લોકા એષાં લોકાનામાપ્ત્યૈ પ્રાણો વૈ પ્રથમોઽતિરાત્રો વ્યાનો
દ્વિતીયોઽપાનસ્તૃતીયઃ પ્રાણાપાનોદાનેષ્વેવાન્નાદ્યે પ્રતિ તિષ્ઠન્તિ
સર્વમાયુર્યન્તિ ય એવં વિદ્વાꣳસસ્ત્રયોદશરાત્રમાસતે તદાહુર્વાગ્વા

એષા વિતતા

૮ યદ્દ્વાદશાહસ્તાં વિ ચ્છિન્દ્યુર્યન્મધ્યેઽતિરાત્રં કુર્યુરુપદાસુકા
ગૃહપતેર્વાક્સ્યાદુપરિષ્ટાચ્છન્દોમાનાં મહાવ્રતં કુર્વન્તિ સંતતામેવ
વાચમવ રુંધતેઽનુપદાસુકા ગૃહપતેર્વાગ્ભવતિ પશવો વૈ છન્દોમા
અન્નં મહાવ્રતં યદુપરિષ્ટાચ્છન્દોમાનાં મહાવ્રતં કુર્વન્તિ પશુષુ
ચૈવાન્નાદ્યે ચ પ્રતિ તિષ્ઠન્તિ ॥ ૭। ૩। ૩॥ વિતતા ત્રિચત્વારિઁ શચ્ચ ॥
૭। ૩। ૩॥

૯ આદિત્યા અકામયન્તોભયોર્લોકયોર્ઋધ્નુયામેતિ ત એતં
ચતુર્દશરાત્રમપશ્યન્તમાહરન્તેનાયજન્ત તતો
વૈ ત ઉભયોર્લોકયોરાર્ધ્નુવન્નસ્મિઁ શ્ચામુષ્મિગ્ગ્શ્ચ
ય એવં વિદ્વાઁ સશ્ચતુર્દશરાત્રમાસત ઉભયોરેવ
લોકયોર્ઋધ્નુવન્ત્યસ્મિઁ શ્ચામુષ્મિગ્ગ્શ્ચ ચતુર્દશરાત્રો ભવતિ સપ્ત
ગ્રામ્યા ઓષધયઃ સપ્તારણ્યા ઉભયીષામવરુદ્ધ્યૈ યત્પરાચીનાનિ
પૃષ્ઠાનિ

૧૦ ભવન્ત્યમુમેવ તૈર્લોકમભિ જયન્તિ યત્પ્રતીચીનાનિ પૃષ્ઠાનિ
ભવન્તીમમેવ તૈર્લોકમભિ જયન્તિ ત્રયસ્ત્રિઁ શૌ મધ્યત સ્તોમૌ
ભવતઃ સામ્રાજ્યમેવ ગચ્છન્ત્યધિરાજૌ ભવતોઽધિરાજા એવ સમાનાનાં
ભવન્ત્યતિરાત્રાવભિતો ભવતઃ પરિગૃહીત્યૈ ॥ ૭। ૩। ૪॥ પૃષ્ઠાનિ
ચતુસ્ત્રિઁ શચ્ચ ॥ ૭। ૩। ૪॥

૧૧ પ્રજાપતિઃ સુવર્ગં લોકમૈત્તં દેવા અન્વાયન્તાનાદિત્યાશ્ચ
પશવશ્ચાન્વાયન્તે દેવા અબ્રુવન્ યાન્ પશૂનુપાજીવિષ્મ
ત ઇમેઽન્વાગ્મન્નિતિ તેભ્ય એતં ચતુર્દશરાત્રં પ્રત્યૌહન્ત
આદિત્યાઃ પૃષ્ઠૈઃ સુવર્ગં લોકમારોહન્ત્ર્યહાભ્યામસ્મિઁ લ્લોકે
પશૂન્પ્રત્યૌહન્પૃષ્ઠૈરાદિત્યા અમુષ્મિઁ લ્લોક
આર્ધ્નુવન્ત્ર્યહાભ્યામસ્મિઁ

૧૨ લ્લોકે પશવો ય એવં વિદ્વાઁ સશ્ચતુર્દશરાત્રમાસત ઉભયોરેવ
લોકયોર્ઋધ્નુવન્ત્યસ્મિઁ શ્ચામુષ્મિગ્ગ્શ્ચ પૃષ્ઠૈરેવામુષ્મિઁ લ્લોક

ઋધ્નુવન્તિ ત્ર્યહાભ્યામસ્મિꣳ લ્લોકે જ્યોતિર્ગૌરાયુરિતિ
ત્ર્યહો ભવતીયં વાવ જ્યોતિરન્તરિક્ષં ગૌરસાવાયુરિમાનેવ
લોકાનભ્યારોહન્તિ યદન્યતઃ પૃષ્ઠાનિ સ્યુર્વિવિવધꣳ સ્યાન્મધ્યે
પૃષ્ઠાનિ ભવન્તિ સવિવધત્વાયૌ

૧૩ જો વૈ વીર્યં પૃષ્ઠાન્યોજ એવ વીર્યં મધ્યતો
દધતે બૃહદ્રથંતરાભ્યાં યન્તીયં વાવ રથંતરમસૌ
બૃહદાભ્યામેવ યન્ત્યથો અનયોરેવ પ્રતિ તિષ્ઠન્ત્યેતે વૈ
યજ્ઞસ્યાઞ્જસાયની સ્રુતી તાભ્યામેવ સુવર્ગં લોકં યન્તિ
પરાઞ્ચો વા એતે સુવર્ગં લોકમભ્યારોહન્તિ યે પરાચીનાનિ
પૃષ્ઠાન્યુપયન્તિ પ્રત્યઙ્ત્ર્યહો ભવતિ પ્રત્યવરૂઢ્યા અથો
પ્રતિષ્ઠિત્યા ઉભયોર્લોકયોરૃદ્ધ્વોત્તિષ્ઠન્તિ ચતુર્દશૈતાસ્તાસાં
યા દશ દશાક્ષરા વિરાડન્નં વિરાડ્વિરાજૈવાન્નાદ્યમવ રુંધતે
યાશ્ચતસ્રશ્ચતસ્રો દિશો દિક્ષ્વેવ પ્રતિ તિષ્ઠન્ત્યતિરાત્રાવભિતો
ભવતઃ પરિગૃહીત્યૈ ॥ ૭। ૩। ૫॥ આર્ધ્નુવન્ત્ર્યહાભ્યામસ્મિન્થ્સવિવધત્વાય
પ્રતિષ્ઠિત્યા એકત્રિꣳશચ્ચ ॥ ૭। ૩। ૫॥

૧૪ ઇન્દ્રો વૈ સદૃઙ્ગેવતાભિરાસીથ્સ ન
વ્યાવૃતમગચ્છથ્સ પ્રજાપતિમુપાધાવત્તસ્મા એતં
પઞ્ચદશરાત્રં પ્રાયચ્છત્તમાહરત્તેનાયજત તતો વૈ
સોઽન્યાભિર્દેવતાભિર્વ્યાવૃતમગચ્છદ્ય એવં વિદ્વાꣳ સઃ
પઞ્ચદશરાત્રમાસતે વ્યાવૃતમેવ પાપ્મના ભ્રાતૃવ્યેણ ગચ્છન્તિ
જ્યોતિર્ગૌરાયુરિતિ ત્ર્યહો ભવતીયં વાવ જ્યોતિરન્તરિક્ષં

૧૫ ગૌરસાવાયુરેષ્વેવ લોકેષુ પ્રતિ તિષ્ઠન્ત્યસત્રં વા
એતદ્યદછન્દોમં યચ્છન્દોમા ભવન્તિ તેન સત્રં દેવતા એવ
પૃષ્ઠૈરવ રુંધતે પશૂઙ્છન્દો મૈરોજો વૈ વીર્યં પૃષ્ઠાનિ
પશવશ્છન્દોમા ઓજસ્યેવ વીર્યે પશુષુ પ્રતિ તિષ્ઠન્તિ
પઞ્ચદશરાત્રો ભવતિ પઞ્ચદશો વજ્રો વજ્રમેવ ભ્રાતૃવ્યેભ્યઃ
પ્ર હરન્ત્યતિ રાત્રાવભિતો ભવત ઇન્દ્રિયસ્ય પરિગૃહીત્યૈ ॥ ૭। ૩। ૬॥

અન્તરિક્ષમિન્દ્રિયસ્યૈકં ચ ॥ ૭। ૩। ૬॥

૧૬ ઇન્દ્રો વૈ શિથિલ ઇવાપ્રતિષ્ઠિત આસીથ્સોઽસુરેભ્યોઽબિભેથ્સ
પ્રજાપતિમુપાધાવત્તસ્મા એતં પઞ્ચદશરાત્રં વજ્રં
પ્રાયચ્છત્તેનાસુરાન્પરાભાવ્ય વિજિત્ય શ્રિયમગચ્છદગ્નિષ્ટુતા પાપ્માનં
નિરદહત પઞ્ચદશરાત્રેણૌજો બલમિંદ્રિયં વીર્યમાત્મન્નધત્ત ચ
એવં વિદ્વાઁ સઃ પઞ્ચદશરાત્રમાસતે ભ્રાતૃવ્યાનેવ પરાભાવ્ય
વિજિત્ય શ્રિયં ગચ્છન્ત્યગ્નિષ્ટુતા પાપ્માનં નિ

૧૭ ર્દહન્તે પઞ્ચદશરાત્રેણૌજો બલમિંદ્રિયં વીર્યમાત્મન્દધત એતા એવ
પશવ્યાઃ પઞ્ચદશ વા અર્ધમાસસ્ય રાત્રયોઽર્ધમાસશઃ સંવથ્સર
આપ્યતે સંવથ્સરં પશવોઽનુ પ્ર જાયન્તે તસ્માત્પશવ્યા એતા એવ
સુવર્ગ્યાઃ પઞ્ચદશ વા અર્ધમાસસ્ય રાત્રયોઽર્ધમાસશઃ સંવથ્સર
આપ્યતે સંવથ્સરઃ સુવર્ગો લોકસ્તસ્માથ્સુવર્ગ્યા જ્યોતિર્ગૌરાયુરિતિ
ત્ર્યહો ભવતીયં વાવ જ્યોતિરન્તરિક્ષં

૧૮ ગૌરસાવાયુરિમાનેવ લોકાનભ્યારોહન્તિ યદન્યતઃ પૃષ્ઠાનિ
સ્યુર્વિવિવધરઁ સ્યાન્મધ્યે પૃષ્ઠાનિ ભવન્તિ સવિવધત્વાયૌજો વૈ
વીર્યં પૃષ્ઠાન્યોજ એવ વીર્યં મધ્યતો દધતે બૃહદ્રથંતરાભ્યાં
યન્તીયં વાવ રથંતરમસૌ બૃહદાભ્યામેવ યન્ત્યથો અનયોરેવ પ્રતિ
તિષ્ઠન્ત્યેતે વૈ યજ્ઞસ્યાઞ્જસાયની સ્રુતી તાભ્યામેવ સુવર્ગં લોકં

૧૯ યન્તિ પરાઞ્ચો વા એતે સુવર્ગં લોકમભ્યારોહન્તિ યે પરાચીનાનિ
પૃષ્ઠાન્યુપયન્તિ પ્રત્યઙ્ત્ર્યહો ભવતિ પ્રત્યવરૂઢ્યા અથો
પ્રતિષ્ઠિત્યા ઉભયોર્લોકયોર્ઋદ્ધ્વોત્તિષ્ઠન્તિ પઞ્ચદશૈતાસ્તાસાં યા
દશ દશાક્ષરા વિરાડન્નં વિરાડ્વિરાજૈવાન્નાદ્યમવ રુંધતે યાઃ પઞ્ચ
પઞ્ચ દિશો દિક્ષ્વેવ પ્રતિ તિષ્ઠન્ત્યતિરાત્રાવભિતો ભવત ઇન્દ્રિયસ્ય
વીર્યસ્ય પ્રજાયૈ પશૂનાં પરિગૃહીત્યૈ ॥ ૭। ૩। ૭॥ ગચ્છન્ત્યગ્નિષ્ટુતા
પાપ્માનન્નિરન્તરિક્ષં લોકં પ્રજાયૈ દ્વે ચ ॥ ૭। ૩। ૭॥

૨૦ પ્રજાપતિરકામયતાન્નાદઃ સ્યામિતિ સ એતઁ
સપ્તદશરાત્રમપશ્યત્તમાહરત્તેનાયજત તતો વૈ સોઽન્નાદોઽભવદ્ય

એવં વિદ્વા૨ઁસઃ સપ્તદશરાત્રમાસતેઽન્નાદા એવ ભવન્તિ પઞ્ચાહો
ભવતિ પઞ્ચ વા ઋતવઃ સંવથ્સર ઋતુષ્વેવ સંવથ્સરે પ્રતિ
તિષ્ઠન્ત્યથો પઞ્ચાક્ષરા પઙ્ક્તિઃ પાઙ્ક્તો યજ્ઞો યજ્ઞમેવાવ
રુંધતેઽસત્રં વા એતદ્
૨૧ યદચ્છન્દોમં યચ્છન્દોમા ભવન્તિ તેન સત્રં દેવતા એવ
પૃષ્ઠૈરવ રુંધતે પશૂઞ્છન્દોમૈરોજો વૈ વીર્યં પૃષ્ઠાનિ
પશવશ્છન્દોમા ઓજસ્યેવ વીર્યે પશુષુ પ્રતિ તિષ્ઠન્તિ સપ્તદશરાત્રો
ભવતિ સપ્તદશઃ પ્રજાપતિઃ પ્રજાપતેરાપ્ત્યા અતિરાત્રાવભિતો
ભવતોઽન્નાદ્યસ્ય પરિગૃહીત્યૈ ॥ ૭। ૩। ૮॥ એતથ્સપ્ત ત્રિ૨ઁશચ્ચ ॥
૭। ૩। ૮॥
૨૨ સા વિરાડ્વિક્રમ્યાતિષ્ઠદ્બ્રહ્મણા દેવેષ્વન્નેનાસુરેષુ તે દેવા
અકામયન્તોભય૨ઁ સં વૃઞ્જીમહિ બ્રહ્મ ચાન્નં ચેતિ ત એતા
વિ૨ઁશતિ૨ઁ રાત્રીરપશ્યન્તતો વૈ ત ઉભય૨ઁ સમવૃઞ્જત
બ્રહ્મ ચાન્નં ચ બ્રહ્મવર્ચસિનોઽન્નાદા અભવન્ ય એવં વિદ્વા૨ઁસ
એતા આસત ઉભયમેવ સં વૃઞ્જતે બ્રહ્મ ચાન્નં ચ
૨૩ બ્રહ્મવર્ચસિનોઽન્નાદા ભવન્તિ દ્વે વા એતે વિરાજૌ તયોરેવ નાના
પ્રતિ તિષ્ઠન્તિ વિ૨ઁશો વૈ પુરુષો દશ હસ્ત્યા અઙ્ગુલયો દશ
પદ્યા યાવાનેવ પુરુષસ્તમાપ્ત્વોત્તિષ્ઠન્તિ જ્યોતિર્ગૌરાયુરિતિ
ત્ર્યહા ભવન્તીયં વાવ જ્યોતિરન્તરિક્ષં ગૌરસાવાયુરિમાનેવ
લોકાનભ્યારોહન્ત્યભિપૂર્વં ત્ર્યહા ભવન્ત્યભિપૂર્વમેવ સુવર્ગં
૨૪ લોકમભ્યારોહન્તિ યદન્યતઃ પૃષ્ઠાનિ સ્યુર્વિવિવધર૨ઁ સ્યાન્મધ્યે
પૃષ્ઠાનિ ભવન્તિ સવિવધત્વાયૌજો વૈ વીર્યં પૃષ્ઠાન્યોજ
એવ વીર્યં મધ્યતો દધતે બૃહદ્રથંતરાભ્યાં યન્તીયં વાવ
રથંતરમસૌ બૃહદાભ્યામેવ યન્ત્યથો અનયોરેવ પ્રતિ
તિષ્ઠન્ત્યેતે વૈ યજ્ઞસ્યાઞ્જસાયની સ્રુતી તાભ્યામેવ સુવર્ગં લોકં
યન્તિ પરાઞ્ચો વા એતે સુવર્ગં લોક મભ્યારોહન્તિ યે પરાચીનાનિ
પૃષ્ઠાન્યુપયન્તિ પ્રત્યઙ્ત્ર્યહો ભવતિ પ્રત્યવરૂઢ્યા અથો

પ્રતિષ્ઠિત્યા ઉભયોર્લોકયોરૃદ્ધ્વોત્તિષ્ઠન્ત્યતિરાત્રાવભિતો ભવતો
બ્રહ્મવર્ચસસ્યાન્નાદ્યસ્ય પરિગૃહીત્યૈ ॥ ૭। ૩। ૯॥ વૃંજતે બ્રહ્મ
ચાન્નંચ સુવર્ગમેતે સુવર્ગન્ત્રયો વિꣳશતિશ્ચ ॥ ૭। ૩। ૯॥
૨૫ અસાવાદિત્યોઽસ્મિꣳલ્લોક આસીત્તં દેવાઃ પૃષ્ઠૈઃ પરિગૃહ્ય
સુવર્ગં લોકમગમયન્પરૈરવસ્તાત્પર્યગૃહ્ણન્દિવાકીર્ત્યેન સુવર્ગે લોકે
પ્રત્યસ્થાપયન્પરૈઃ પરસ્તાત્પર્યગૃહ્ણન્પૃષ્ઠૈરુપાવારોહન્થ્સ
વા અસાવાદિત્યોઽમુષ્મિꣳલ્લોકે પરૈરુભયતઃ પરિગૃહીતો
યત્પૃષ્ઠાનિ ભવન્તિ સુવર્ગમેવ તૈર્લોકં યજમાના યન્તિ
પરૈરવસ્તાત્પરિ ગૃહ્ણન્તિ દિવાકીર્ત્યેન
૨૬ સુવર્ગે લોકે પ્રતિ તિષ્ઠન્તિ પરૈઃ પરસ્તાત્પરિ ગૃહ્ણન્તિ
પૃષ્ઠૈરુપાવરોહન્તિ યત્પરે પરસ્તાન્ન સ્યુઃ પરાઞ્ચઃ
સુવર્ગાલ્લોકાન્નિષ્પદ્યેરન્ યદવસ્તાન્ન સ્યુઃ પ્રજા નિર્દહેયુરભિતો
દિવાકીર્ત્યં પરઃ સામાનો ભવન્તિ સુવર્ગ એવૈનાꣳલ્લોક ઉભયતઃ પરિ
ગૃહ્ણન્તિ યજમાના વૈ દિવાકીર્ત્યꣳસંવથ્સરઃ પરઃ સામાનોઽભિતો
દિવાકીર્ત્યં પરઃ સામાનો ભવન્તિ સંવથ્સર એવોભયતઃ
૨૭ પ્રતિ તિષ્ઠન્તિ પૃષ્ઠં વૈ દિવાકીર્ત્યં પાર્શ્વે પરઃ સામાનોઽભિતો
દિવાકીર્ત્યં પરઃ સામાનો ભવન્તિ તસ્માદભિતઃ પૃષ્ઠં પાર્શ્વે
ભૂયિષ્ઠા ગ્રહા ગૃહ્યન્તે ભૂયિષ્ઠꣳ શસ્યતે યજ્ઞસ્યૈવ તન્મધ્યતો
ગ્રન્થિં ગ્રથ્નન્ત્યવિસ્રꣳસાય સપ્ત ગૃહ્યન્તે સપ્ત વૈ શીર્ષણ્યાઃ
પ્રાણાઃ પ્રાણાનેવ યજમાનેષુ દધતિ યત્પરાચીનાનિ પૃષ્ઠાનિ
ભવન્ત્યમુમેવ તૈર્લોકમભ્યારોહન્તિ યદિમં લોકં ન
૨૮ પ્રત્યવરોહેયુરુદ્વા માદ્યેયુર્યજમાનાઃ પ્ર વા મીયેરન્
યત્પ્રતીચીનાનિ પૃષ્ઠાનિ ભવન્તીમમેવ તૈર્લોકં પ્રત્યવરોહન્ત્યથો
અસ્મિન્નેવ લોકે પ્રતિ તિષ્ઠન્ત્યનુન્માદાયેન્દ્રો વા અપ્રતિષ્ઠિત
આસીથ્સ પ્રજાપતિમુપાધાવત્તસ્મા એતમેકવિꣳશતિરાત્રં
પ્રાયચ્છત્તમાહરત્તેનાયજત તતો વૈ સ પ્રત્યતિષ્ઠદ્યે
બહુયાજિનોઽપ્રતિષ્ઠિતાઃ

૨૯ સ્યુસ્ત એકવિꣳશતિરાત્રમાસીરન્દ્વાદશ માસાઃ પઞ્ચર્તવસ્ત્રય
ઇમે લોકા અસાવાદિત્ય એકવિꣳશ એતાવન્તો વૈ
દેવલોકાસ્તેષ્વેવ યથાપૂર્વં પ્રતિ તિષ્ઠન્ત્યસાવાદિત્યો ન
વ્યરોચત સ પ્રજાપતિમુપાધાવત્તસ્મા એતમેકવિꣳશતિરાત્રં
પ્રાયચ્છત્તમાહરત્તેનાયજત તતો વૈ સોઽરોચત ય એવં વિદ્વાꣳસ
એકવિꣳશતિરાત્રમાસતે રોચન્ત એવૈકવિꣳશતિરાત્રો ભવતિ રુગ્વા
એકવિꣳશો રુચમેવ ગચ્છન્ત્યથો પ્રતિષ્ઠામેવ પ્રતિષ્ઠા
હ્યેકવિꣳશોઽતિરાત્રાવભિતો ભવતો બ્રહ્મવર્ચસસ્ય પરિગૃહીત્યૈ ॥
૭। ૩। ૧૦॥ ગૃહ્ણન્તિ દિવાકીર્ત્યનૈવોભયતો નાપ્રતિષ્ઠિતા આસત
એકવિꣳશતિશ્ચ ॥ ૭। ૩। ૧૦॥

૩૦ અર્વાઙ્યજ્ઞઃ સં ક્રામત્વમુષ્માદધિ મામભિ । ઋષીણાં યઃ પુરોહિતઃ
॥ નિર્દેવં નિર્વીરં કૃત્વા વિષ્કન્ધં તસ્મિન્ હીયતાં યોઽસ્માન્દ્વેષ્ટિ
। શરીરં યજ્ઞશમલં કુસીદં તસ્મિન્થ્સીદતુ યોઽસ્માન્દ્વેષ્ટિ ॥ યજ્ઞ
યજ્ઞસ્ય યત્તેજસ્તેન સં ક્રામ મામભિ । બ્રાહ્મણાનૃત્વિજો દેવાન્,
યજ્ઞસ્ય તપસા તે સવાહમા હુવે ॥ ઇષ્ટેન પક્વમુપ

૩૧ તે હુવે સવાહમ્ । સં તે વૃઞ્જે સુકૃતꣳ સં પ્રજાં પશૂન્ ॥
પ્રૈષાન્થ્સામિધેનીરાઘારાવાજ્યભાગાવાશ્રુતં પ્રત્યાશ્રુતમા શૃણામિ
તે । પ્રયાજાનૂયાજાન્થ્સ્વિષ્ટકૃતમિડામાશિષ આ વૃઞ્જે
સુવઃ ॥ અગ્નિનેન્દ્રેણ સોમેન સરસ્વત્યા વિષ્ણુના દેવતાભિઃ ।
યાજ્યાનુવાક્યાભ્યામુપ તે હુવે સ વાહં યજ્ઞમા દદે તે વષટ્કૃતમ્ ॥
સ્તુતꣳ શસ્ત્રં પ્રતિગરં ગ્રહમિડામાશિષ

૩૨ આ વૃઞ્જે સુવઃ । પત્નીસંયાજાનુપ તે હુવે સવાહꣳ સમિષ્ટ
યજુરા દદે તવ ॥ પશૂન્થ્સુતં પુરોડાશાન્થ્સવનાન્યોત યજ્ઞમ્ ।
દેવાન્થ્સેન્દ્રાનુપ તે હુવે સવાહમગ્નિમુખાન્થ્સોમવતો યે ચ વિશ્વે ॥
૭। ૩। ૧૧॥ ઉપ ગ્રહમિડામાશિષો દ્વાત્રિꣳશચ્ચ ॥ ૭। ૩। ૧૧॥

૩૩ ભૂતં ભવ્યં ભવિષ્યદ્વષટ્થ્સ્વાહા નમ ઋક્સામ યજુર્વષટ્થ્સ્વાહા

નમો ગાયત્રી ત્રિષ્ટુબ્જગતી વષટ્થ્સ્વાહા નમઃ પૃથિવ્યન્તરિક્ષં
દ્યૌર્વષટ્થ્સ્વાહા નમોઽગ્નિર્વાયુઃ સૂર્ ્યો વષટ્થ્સ્વાહા નમઃ પ્રાણો
વ્યાનોઽપાનો વષટ્થ્સ્વાહા નમોઽન્નં કૃષિર્વૃષ્ટિર્વષટ્થ્સ્વાહા નમઃ
પિતા પુત્રઃ પૌત્રો વષટ્થ્સ્વાહા નમો ભૂર્ભુવઃ સુવર્વષટ્થ્સ્વાહા નમઃ
॥ ૭। ૩। ૧૨॥ ભુવશ્ચત્વારિ ચ ॥ ૭। ૩। ૧૨॥

૩૪ આ મે ગૃહા ભવન્ત્વા પ્રજા મ આ મા યજ્ઞો વિશતુ વીર્યાવાન્ ।
આપો દેવીર્યજ્ઞિયા મા વિશન્તુ સહસ્રસ્ય મા ભૂમા મા પ્ર હાસીત્ ॥ આ મે
ગ્રહો ભવત્વા પુરોરુક્સ્તુતશસ્ત્રે મા વિશતાઁ સમીચી । આદિત્યા
રુદ્રા વસવો મે સદસ્યાઃ સહસ્રસ્ય મા ભૂમા મા પ્ર હાસીત્ ॥ આ માઽગ્નિષ્ટોમો
વિશતૂક્થ્યશ્ચાતિરાત્રો મા વિશત્વાપિશર્વરઃ । તિરો અહ્નિયા મા સુહુતા
આ વિશન્તુ સહસ્રસ્ય મા ભૂમા મા પ્ર હાસીત્ ॥ ૭। ૩। ૧૩॥ અગ્નિષ્ટોમો
વિશત્વષ્ટાદશ ચ ॥ ૭। ૩। ૧૩॥

૩૫ અગ્નિના તપોઽન્વભવદ્વાચા બ્રહ્મ મણિના રૂપાણીન્દ્રેણ
દેવાન્, વાતેન પ્રાણાન્થ્સૂર્યેણ દ્યાં ચન્દ્રમસા નક્ષત્રાણિ
યમેન પિતૄન્રાજ્ઞા મનુષ્યાન્ફલેન નાદેયાનજગરેણ
સર્પાન્વ્યાઘ્રેણારણ્યાન્પશૂઞ્છ્યેનેન પતત્રિણો વૃષ્ણાશ્વાનૃષભેણ
ગાબસ્તેનાજા વૃષ્ણિનાવીર્વ્રીહિણાન્નાનિ યવેનૌષધીર્ન્યગ્રોધેન
વનસ્પતીનુદુંબરેણોર્જં ગાયત્રિયા છન્દાઁસિ ત્રિવૃતા
સ્તોમાન્બ્રાહ્મણેન વાચમ્ ॥ ૭। ૩। ૧૪॥ બ્રાહ્મણેનૈકં ચ ॥ ૭। ૩। ૧૪॥

૩૬ સ્વાહાધિમાધીતાય સ્વાહા સ્વાહાધીતં મનસે સ્વાહા સ્વાહા મનઃ
પ્રજાપતયે સ્વાહા કાય સ્વાહા કસ્મૈ સ્વાહા કતમસ્મૈ સ્વાહાદિત્યૈ
સ્વાહાદિત્યૈ મહ્યૈ સ્વાહાદિત્યૈ સુમૃડીકાયૈ સ્વાહા સરસ્વત્યૈ સ્વાહા
સરસ્વત્યૈ બૃહત્યૈ સ્વાહા સરસ્વત્યૈ પાવકાયૈ સ્વાહા પૂષ્ણે સ્વાહા
પૂષ્ણે પ્રપથ્યાય સ્વાહા પૂષ્ણે નરંધિષાય સ્વાહા ત્વષ્ટ્રે સ્વાહા
ત્વષ્ટ્રે તુરીપાય સ્વાહા ત્વષ્ટ્રે પુરુરૂપાય સ્વાહા વિષ્ણવે સ્વાહા
વિષ્ણવે નિખુર્યપાય સ્વાહા વિષ્ણવે નિભૂયપાય સ્વાહા સર્વસ્મૈ સ્વાહા
॥ ૭। ૩। ૧૫॥ પુરુરૂપાય સ્વાહા દશ ચ ॥ ૭। ૩। ૧૫॥

૩૭ દદ્ભ્યઃ સ્વાહા હનૂભ્યાગ્ં સ્વાહોષ્ઠાભ્યાગ્ં સ્વાહા મુખાય
સ્વાહા નાસિકાભ્યાગ્ં સ્વાહાક્ષીભ્યાગ્ં સ્વાહા કર્ણાભ્યાગ્ં સ્વાહા પાર
ઇક્ષવોઽવાર્યેભ્યઃ પક્ષ્મભ્યઃ સ્વાહાવાર ઇક્ષવઃ પાર્યેભ્યઃ
પક્ષ્મભ્યઃ સ્વાહા શીર્ષ્ણે સ્વાહા ભ્રૂભ્યાગ્ં સ્વાહા લલાટાય સ્વાહા
મૂર્ધ્ને સ્વાહા મસ્તિષ્કાય સ્વાહા કેશેભ્યઃ સ્વાહા વહાય સ્વાહા
ગ્રીવાભ્યઃ સ્વાહા સ્કન્ધેભ્યઃ સ્વાહા કીકસાભ્યઃ સ્વાહા પૃષ્ટીભ્યઃ
સ્વાહા પાજસ્યાય સ્વાહા પાર્શ્વાભ્યાગ્ં સ્વાહા

૩૮ ઽગ્ં સાભ્યાગ્ં સ્વાહા દોષભ્યાગ્ં સ્વાહા બાહુભ્યાગ્ં સ્વાહા
જઙ્ઘાભ્યાગ્ં સ્વાહા શ્રોણીભ્યાગ્ં સ્વાહોરુભ્યાગ્ં સ્વાહાષ્ઠીવદ્ભ્યાગ્ં સ્વાહા
જઙ્ઘાભ્યાગ્ં સ્વાહા ભસદે સ્વાહા શિખણ્ડેભ્યઃ સ્વાહા વાલધાનાય
સ્વાહાણ્ડાભ્યાગ્ં સ્વાહા શેપાય સ્વાહા રેતસે સ્વાહા પ્રજાભ્યઃ સ્વાહા
પ્રજનનાય સ્વાહા પદ્ભ્યઃ સ્વાહા શફેભ્યઃ સ્વાહા લોમભ્યઃ સ્વાહા
ત્વચે સ્વાહા લોહિતાય સ્વાહા મા ગ્ં સાય સ્વાહા સ્નાવભ્યઃ સ્વાહાસ્થભ્યઃ
સ્વાહા મજ્જભ્યઃ સ્વાહાઙ્ગેભ્યઃ સ્વાહાત્મને સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૩। ૧૬॥ પાર્શ્વાભ્યાગ્ં
સ્વાહા મજ્જભ્યઃ સ્વાહા ષટ્ચ ॥ ૭। ૩। ૧૬॥

૩૯ અઞ્જ્યેતાય સ્વાહાઞ્જિસક્થાય સ્વાહા શિતિપદે સ્વાહા શિતિકકુદે
સ્વાહા શિતિરન્ધ્રાય સ્વાહા શિતિપૃષ્ઠાય સ્વાહા શિત્યગ્ં સાય સ્વાહા
પુષ્પકર્ણાય સ્વાહા શિત્યોષ્ઠાય સ્વાહા શિતિભ્રવે સ્વાહા શિતિભસદે
સ્વાહા શ્વેતાનૂકાશાય સ્વાહાઞ્જયે સ્વાહા લલામાય સ્વાહાસિતજ્ઞવે સ્વાહા
કૃષ્ણૈતાય સ્વાહા રોહિતૈતાય સ્વાહારુણૈતાય સ્વાહેદૃશાય સ્વાહા
કીદૃશાય સ્વાહા તાદૃશાય સ્વાહા સદૃશાય સ્વાહા વિસદૃશાય
સ્વાહા સુસદૃશાય સ્વાહા રૂપાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૩। ૧૭॥
રૂપાય સ્વાહા દ્વે ચ ॥ ૭। ૩। ૧૭॥

૪૦ કૃષ્ણાય સ્વાહા શ્વેતાય સ્વાહા પિશઙ્ગાય સ્વાહા સારઙ્ગાય
સ્વાહારુણાય સ્વાહા ગૌરાય સ્વાહા બભ્રવે સ્વાહા નકુલાય સ્વાહા
રોહિતાય સ્વાહા શોણાય સ્વાહા શ્યાવાય સ્વાહા શ્યામાય સ્વાહા પાકલાય
સ્વાહા સુરૂપાય સ્વાહાનુરૂપાય સ્વાહા વિરૂપાય સ્વાહા સરૂપાય સ્વાહા

પ્રતિરૂપાય સ્વાહા શબલાય સ્વાહા કમલાય સ્વાહા પૃશ્નયે સ્વાહા
પૃશ્નિસક્થાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૩। ૧૮॥ કૃષ્ણાય ષટ્
ચત્વારિઁશત્ ॥ ૭। ૩। ૧૮॥

૪૧ ઓષધીભ્યઃ સ્વાહા મૂલેભ્યઃ સ્વાહા તૂલેભ્યઃ સ્વાહા કાણ્ડેભ્યઃ સ્વાહા
વલ્શેભ્યઃ સ્વાહા પુષ્પેભ્યઃ સ્વાહા ફલેભ્યઃ સ્વાહા ગૃહીતેભ્યઃ
સ્વાહાગૃહીતેભ્યઃ સ્વાહાવપન્નેભ્યઃ સ્વાહા શયાનેભ્યઃ સ્વાહા સર્વસ્મૈ
સ્વાહા ॥ ૭। ૩। ૧૯॥ ઓષધીભ્યશ્ચતુર્વિઁશતિઃ ॥ ૭। ૩। ૧૯॥

૪૨ વનસ્પતિભ્યઃ સ્વાહા મૂલેભ્યઃ સ્વાહા તૂલેભ્યઃ સ્વાહા સ્કન્ધોભ્યઃ
સ્વાહા શાખાભ્યઃ સ્વાહા પર્ણેભ્યઃ સ્વાહા પુષ્પેભ્યઃ સ્વાહા
ફલેભ્યઃ સ્વાહા ગૃહીતેભ્યઃ સ્વાહાગૃહીતેભ્યઃ સ્વાહાવપન્નેભ્યઃ
સ્વાહા શયાનેભ્યઃ સ્વાહા શિષ્ટાય સ્વાહાતિશિષ્ટાય સ્વાહા પરિશિષ્ટાય
સ્વાહા સઁશિષ્ટાય સ્વાહોચ્છિષ્ટાય સ્વાહા રિક્તાય સ્વાહારિક્તાય સ્વાહા
પ્રરિક્તાય સ્વાહા સઁરિક્તાય સ્વાહોદ્રિક્તાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૩। ૨૦॥ વનસ્પતિભ્યઃ
સ્કન્ધોભ્યઃ શિષ્ટાય રિક્તાય ષટ્ ચત્વારિઁશત્
॥ ૭। ૩। ૨૦॥

પ્રજવં બ્રહ્મવાદિનઃ કિમેષ વા આપ્ત આદિત્યા ઉભયોઃ
પ્રજાપતિરન્વાયન્નિંદ્રો વૈ સદૃઙ્ઙિંદ્રો વૈ શિથિલઃ
પ્રજાપતિરકામયતાન્નાદઃ સા વિરાડસાવાદિત્યોઽર્વાઙ્ ભૂતમા મેઽગ્નિના
સ્વાહાઽધિન્દદ્ભ્યોઽગ્જ્યેતાય કૃષ્ણાયૌષધીભ્યો વનસ્પતિભ્યો
વિઁશતિઃ ॥

પ્રજવં પ્રજાપતિર્યદછંદોમન્તે હુવે સવાહમોષધીભ્યો
દ્વિચત્વારિઁશત્ ॥

પ્રજવઁ સર્વસ્મૈ સ્વાહા ॥

## સપ્તમકાણ્ડે ચતુર્થઃ પ્રશ્નઃ ૪

૧ બૃહસ્પતિરકામયત શ્રન્મે દેવા દધીરન્ગચ્છેયં પુરોધામિતિ

સ એતં ચતુર્વિꣳ શતિરાત્રમપશ્યત્તમાહરત્તેનાયજત
તતો વૈ તસ્મૈ શ્રદ્દેવા અદધતાગચ્છત્પુરોધાં ય એવં
વિદ્વાꣳ સશ્ચતુર્વિꣳ શતિરાત્રમાસતે શ્રદેભ્યો મનુષ્યા
દધતે ગચ્છન્તિ પુરોધાં જ્યોતિર્ગૌરાયુરિતિ ત્ર્યહા ભવન્તીયં વાવ
જ્યોતિરન્તરિક્ષં ગૌરસાવાયુ
૨ રિમાનેવ લોકાનભ્યારોહન્ત્યભિપૂર્વં ત્ર્યહા ભવન્ત્યભિપૂર્વમેવ
સુવર્ગં લોકમભ્યારોહન્ત્યસત્ત્રં વા એતદ્યદચ્છન્દોમં
યચ્છન્દોમા ભવન્તિ તેન સત્ત્રં દેવતા એવ પૃષ્ઠૈરવ
રુંધતે પશૂ૨્છન્દોમૈરોજો વૈ વીર્યં પૃષ્ઠાનિ પશવશ્છન્દોમા
ઓજસ્યેવ વીર્યે પશુષુ પ્રતિ તિષ્ઠન્તિ બૃહદ્રથંતરાભ્યાં યન્તીયં
વાવ રથંતરમસૌ બૃહદાભ્યામેવ
૩ યન્ત્યથો અનયોરેવ પ્રતિ તિષ્ઠન્ત્યેતેવૈ યજ્ઞસ્યાઞ્જસાયની
સ્રુતી તાભ્યામેવ સુવર્ગં લોકં યન્તિ ચતુર્વિꣳ શતિરાત્રો ભવતિ
ચતુર્વિꣳ શતિરર્ધમાસાઃ સંવથ્સરઃ સંવથ્સરઃ સુવર્ગો લોકઃ
સંવથ્સર એવ સુવર્ગે લોકે પ્રતિ તિષ્ઠન્ત્યથો ચતુર્વિꣳ શત્યક્ષરા
ગાયત્રી ગાયત્રી બ્રહ્મવર્ચસં ગાયત્રિયૈવ બ્રહ્મવર્ચસમવ
રુંધતેઽતિરાત્રાવભિતો ભવતો બ્રહ્મવર્ચસસ્ય પરિગૃહીત્યૈ ॥ ૭। ૪। ૧॥

અસાવાયુરાભ્યામેવ પંચ ચત્વારિꣳ શચ્ચ ॥ ૭। ૪। ૧॥

૪ યથા વૈ મનુષ્યા એવં દેવા અગ્ર આસન્તેઽકામયન્તાવર્તિં પાપ્માનં
મૃત્યુમપહત્ય દૈવીꣳસꣳ સદં ગચ્છેમેતિ ત એતં
ચતુર્વિꣳ શતિરાત્રમપશ્યન્તમાહરન્તેનાયજન્ત તતો વૈ તેઽવર્તિં
પાપ્માનં મૃત્યુમપહત્ય દૈવીꣳસꣳ સદમગચ્છન્, ય એવં
વિદ્વાꣳ સશ્ચતુર્વિꣳ શતિ રાત્રમાસતેઽવર્તિમેવ પાપ્માનમપહત્ય
શ્રિયં ગચ્છન્તિ શ્રીર્હિ મનુષ્યસ્ય
૫ દૈવી સꣳ સજ્જ્યોતિરતિરાત્રો ભવતિ સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યૈ
પૃષ્ઠ્યઃ ષડહો ભવતિ ષડ્વા ઋતવઃ સંવથ્સરસ્તં માસા
અર્ધમાસા ઋતવઃ પ્રવિશ્ય દૈવીꣳસꣳ સદમગચ્છન્ ય

એવં વિદ્વાઁ સશ્ચતુર્વિઁ શતિરાત્રમાસતે સંવથ્સરમેવ પ્રવિશ્ય
વસ્યસીઁ સ ઁ સદં ગચ્છન્તિ ત્રયસ્ત્રયસ્ત્રિ ઁ શા અવસ્તાદ્ભવન્તિ
ત્રયસ્ત્રયસ્ત્રિ ઁ શાઃ પરસ્તાત્ત્રયસ્ત્રિ ઁ શૈરેવોભયતોઽવર્તિં
પાપ્માનમપહત્ય દૈવીઁસ ઁ સદં મધ્યતો
૬ ગચ્છન્તિ પૃષ્ઠાનિ હિ દૈવી સ ઁ સજ્જામિ વા એતત્કુર્વન્તિ
યત્ત્રયસ્ત્રયસ્ત્રિ ઁ શા અન્વઞ્ચો મધ્યેઽનિરુક્તો ભવતિ તેનાજામ્યૂર્ધ્વાનિ
પૃષ્ઠાનિ ભવન્ત્યૂર્ધ્વાશ્છન્દોમા ઉભાભ્યાઁરૂપાભ્યાઁસુવર્ગં
લોકં યન્ત્યસત્ત્રં વા એતદ્યદચ્છન્દોમં યચ્છન્દોમા ભવન્તિ
તેન સત્ત્રં દેવતા એવ પૃષ્ઠૈરવ રુંધતે પશૂઞ્છન્દોમૈરોજો
વૈ વીર્યં પૃષ્ઠાનિ પશવ
૭ શ્છન્દોમા ઓજસ્યેવ વીર્યે પશુષુ પ્રતિ તિષ્ઠન્તિ
ત્રયસ્ત્રયસ્ત્રિ ઁ શા અવસ્તાદ્ભવન્તિ ત્રયસ્ત્રયસ્ત્રિ ઁ શાઃ
પરસ્તાન્મધ્યે પૃષ્ઠાન્યુરો વૈ ત્રયસ્ત્રિ ઁ શા આત્મા પૃષ્ઠાન્યાત્મન
એવ તદ્યજમાનાઃ શર્મ નહ્યન્તેઽનાર્ત્યૈ બૃહદ્રથંતરાભ્યાં યન્તીયં
વાવ રથંતરમસૌ બૃહદાભ્યામેવ યન્ત્યથો અનયોરેવ પ્રતિ
તિષ્ઠન્ત્યેતે વૈ યજ્ઞસ્યાઞ્જસાયની સ્રુતી તાભ્યામેવ
૮ સુવર્ગં લોકં યન્તિ પરાઞ્ચો વા એતે સુવર્ગં લોકમભ્યારોહન્તિ
યે પરાચીનાનિ પૃષ્ઠાન્યુપયન્તિ પ્રત્યઙ્ખ્ષડહો ભવતિ
પ્રત્યવરૂઢ્યા અથો પ્રતિષ્ઠિત્યા ઉભયોર્લોકયોર્ ઋદ્ધ્વોત્તિષ્ઠન્તિ
ત્રિવૃતોઽધિ ત્રિવૃતમુપ યન્તિ સ્તોમાના ઁ સંપત્ત્યૈ પ્રભવાય
જ્યોતિરગ્નિષ્ટોમો ભવત્યયં વાવ સ ક્ષયોઽસ્માદેવ તેન ક્ષયાન્ન યન્તિ
ચતુર્વિઁ શતિરાત્રો ભવતિ ચતુર્વિઁ શતિરર્ધમાસાઃ સંવથ્સરઃ
સંવથ્સરઃ સુવર્ગો લોકઃ સંવથ્સર એવ સુવર્ગે લોકે પ્રતિ
તિષ્ઠન્ત્યથો ચતુર્વિઁ શત્યક્ષરા ગાયત્રી ગાયત્રી બ્રહ્મવર્ચસં
ગાયત્રિયૈવ બ્રહ્મવર્ચસમવ રુંધતેઽતિ રાત્રાવભિતો ભવતો
બ્રહ્મવર્ચસસ્ય પરિગૃહીત્યૈ ॥ ૭। ૪। ૨॥ મનુષ્યસ્ય મધ્યતઃ
પશવસ્તાભ્યામેવ સંવથ્સરશ્ચતુર્વિઁ શતિશ્ચ ॥ ૭। ૪। ૨॥

૯ ઋક્ષા વા ઇયમલોમકાસીથ્સાકામયતૌષધીભિર્વનસ્પતિભિઃ
પ્ર જાયેયેતિ સૈતાસ્ત્રિꣳશત ꣳ રાત્રીરપશ્યત્તતો વા
ઇયમોષધીભિર્વનસ્પતિભિઃ પ્રાજાયત યે પ્રજાકામાઃ પશુકામાઃ
સ્યુસ્ત એતા આસીરન્પ્રૈવ જાયન્તે પ્રજયા પશુભિરિયં વા અક્ષુધ્યથ્સૈતાં
વિરાજમપશ્યત્ તામાત્મન્ધિત્વાન્નાદ્યમવારુંધૌષધી
૧૦ ર્વનસ્પતીન્પ્રજાં પશૂન્તેનાઽવર્ધત સા જેમાનં મહિમાનમગચ્છદ્ય
એવં વિદ્વાꣳસ એતા આસતે વિરાજમેવાત્મન્ધિત્વાન્નાદ્યમવ રુંધતે
વર્ધન્તે પ્રજયા પશુભિર્જેમાનં મહિમાનં ગચ્છન્તિ જ્યોતિરતિરાત્રો
ભવતિ સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યૈ પૃષ્ઠ્યઃ ષડહો ભવતિ
ષડ્વા ઋતવઃ ષટ્પૃષ્ઠાનિ પૃષ્ઠૈરેવર્તૂનન્વારોહન્ત્યૃતુભિઃ
સંવથ્સરં તે સંવથ્સર એવ
૧૧ પ્રતિ તિષ્ઠન્તિ ત્રયસ્ત્રિꣳશાત્ત્રયસ્ત્રિꣳશમુપ યન્તિ યજ્ઞસ્ય
સંતત્યા અથો પ્રજાપતિર્વૈ ત્રયસ્ત્રિꣳશઃ પ્રજાપતિમેવારભન્તે
પ્રતિષ્ઠિત્યૈ ત્રિણવો ભવતિ વિજિત્યા એકવિꣳશો ભવતિ પ્રતિષ્ઠિત્યા
અથો રુચમેવાત્મન્દધતે ત્રિવૃદગ્નિષ્ટુદ્ભવતિ પાપ્માનમેવ તેન
નિર્દહન્તેઽથો તેજો વૈ ત્રિવૃત્તેજ એવાત્મન્દધતે પઞ્ચદશ ઇન્દ્રસ્તોમો
ભવતીન્દ્રિયમેવાવ
૧૨ રુંધતે સપ્તદશો ભવત્યન્નાદ્યસ્યાવરુદ્ધ્યા અથો પ્રૈવ તેન
જાયન્ત એકવિꣳશો ભવતિ પ્રતિષ્ઠિત્યા અથો રુચમેવાત્મન્દધતે
ચતુર્વિꣳશો ભવતિ ચતુર્વિꣳશતિરર્ધમાસાઃ સંવથ્સરઃ
સંવથ્સરઃ સુવર્ગો લોકઃ સંવથ્સર એવ સુવર્ગે લોકે પ્રતિ
તિષ્ઠન્ત્યથો એષ વૈ વિષૂવાન્, વિષૂવન્તો ભવન્તિ ય એવં વિદ્વાꣳસ
એતા આસતે ચતુર્વિꣳશાત્પૃષ્ઠાન્યુપ યન્તિ સંવથ્સર એવ પ્રતિષ્ઠાય
૧૩ દેવતા અભ્યારોહન્તિ ત્રયસ્ત્રિꣳશાત્ત્રયસ્ત્રિꣳશમુપ યન્તિ
ત્રયસ્ત્રિꣳશદ્વૈ દેવતા દેવતાસ્વેવ પ્રતિ તિષ્ઠન્તિ ત્રિણવો ભવતીમે
વૈ લોકાસ્ત્રિણવ એષ્વેવ લોકેષુ પ્રતિ તિષ્ઠન્તિ દ્વાવેકવિꣳશૌ
ભવતઃ પ્રતિષ્ઠિત્યા અથો રુચમેવાત્મન્દધતે બહવઃ ષોડશિનો

ભવન્તિ તસ્માદ્બહવઃ પ્રજાસુ વૃષાણો યદેતે સ્તોમા વ્યતિષક્તા
ભવન્તિ તસ્માદિયમોષધીભિર્વનસ્પતિભિર્વ્યતિષક્તા
૧૪ વ્યતિષજ્યન્તે પ્રજયા પશુભિર્ય એવં વિદ્વાꣳસ એતા
આસતેઽક્લૃપ્તા વા એતે સુવર્ગં લોકં યન્ત્યુચ્ચાવચાન્ હિ સ્તોમાનુપયન્તિ
યદેત ઊર્ધ્વાઃ ક્લૃપ્તાઃ સ્તોમા ભવન્તિ ક્લૃપ્તા એવ સુવર્ગં લોકં
યન્ત્યુભયોરેભ્યો લોકયોઃ કલ્પતે ત્રિꣳશદેતાસ્ત્રિꣳશદક્ષરા
વિરાડન્નં વિરાડ્વિરાજૈવાન્નાદ્યમવ રુંધતેઽતિરાત્રાવભિતો
ભવતોઽન્નાદ્યસ્ય પરિગૃહીત્યૈ ॥ ૭। ૪। ૩॥ ઓષધીઃ સંવથ્સર એવાવ
પ્રતિષ્ઠાય વ્યતિષક્તૈકાન્ન પંચાશચ્ચ ॥ ૭। ૪। ૩॥
૧૫ પ્રજાપતિઃ સુવર્ગં લોકમૈત્તં દેવા યેન યેન છંદસાનુ
પ્રાયુઞ્જત તેન નાપ્નુવન્ત એતા દ્વાત્રિꣳશત ꣳ
રાત્રીરપશ્યન્દ્વાત્રિꣳશદક્ષરાનુષ્ટુગાનુષ્ટુભઃ પ્રજાપતિઃ
સ્વેનૈવ છંદસા પ્રજાપતિમાપ્ત્વાભ્યારુહ્ય સુવર્ગં
લોકમાયન્ ય એવં વિદ્વાꣳસ એતા આસતે દ્વાત્રિꣳશદેતા
દ્વાત્રિꣳશદક્ષરાનુષ્ટુગાનુષ્ટુભઃ પ્રજાપતિઃ સ્વેનૈવ છંદસા
પ્રજાપતિમાપ્ત્વા શ્રિયં ગચ્છન્તિ
૧૬ શ્રીર્હિ મનુષ્યસ્ય સુવર્ગો લોકો દ્વાત્રિꣳશદેતા
દ્વાત્રિꣳશદક્ષરાનુષ્ટુગ્વાગનુષ્ટુપ્સર્વામેવ વાચમાપ્નુવન્તિ સર્વે
વાચો વદિતારો ભવન્તિ સર્વે હિ શ્રિયં ગચ્છન્તિ જ્યોતિર્ગૌરાયુરિતિ
ત્ર્યહા ભવન્તીયં વાવ જ્યોતિરન્તરિક્ષં ગૌરસાવાયુરિમાનેવ
લોકાનભ્યારોહન્ત્યભિપૂર્વં ત્ર્યહા ભવન્ત્યભિપૂર્વમેવ સુવર્ગં
લોકમભ્યારોહન્તિ બૃહદ્રથંતરાભ્યાં યન્તી
૧૭ યં વાવ રથંતરમસૌ બૃહદાભ્યામેવ યન્ત્યથો અનયોરેવ
પ્રતિ તિષ્ઠન્ત્યેતે વૈ યજ્ઞસ્યાઞ્જસાયની સ્રુતી તાભ્યામેવ સુવર્ગં
લોકં યન્તિ પરાઞ્ચો વા એતે સુવર્ગં લોકમભ્યારોહન્તિ યે
પરાચસ્ત્ર્યહાનુપયન્તિ પ્રત્યઙ્ત્ર્યહો ભવતિ પ્રત્યવરૂઢ્યા અથો
પ્રતિષ્ઠિત્યા ઉભયોર્લોકયોર્ ઋદ્ધ્વોત્તિષ્ઠન્તિ દ્વાત્રિꣳશદેતાસ્તાસાં

યાસ્ત્રિઁ શત્ત્રિઁ શદક્ષરા વિરાડન્નં વિરાડ્વિરાજૈવાન્નાદ્યમવ
રુંધતે યે દ્વે અહોરાત્રે એવ તે ઉભાભ્યાઁરૂપાભ્યાઁસુવર્ગં લોકં
યન્ત્યતિરાત્રાવભિતો ભવતઃ પરિગૃહીત્યૈ ॥ ૭। ૪। ૪॥ ગચ્છન્તિ યન્તિ
ત્રિઁ શદક્ષરા દ્વાવિઁશતિશ્ચ ॥ ૭। ૪। ૪॥
૧૮ દ્વે વાવ દેવસત્ત્રે દ્વાદશાહશ્ચૈવ ત્રયસ્ત્રિઁ શદહશ્ચ
ય એવં વિદ્વાઁ સસ્ત્રયસ્ત્રિઁ શદહમાસતે સાક્ષાદેવ દેવતા
અભ્યારોહન્તિ યથા ખલુ વૈ શ્રેયાનભ્યારૂઢઃ કામયતે તથા
કરોતિ યદ્યવવિધ્યતિ પાપીયાન્ભવતિ યદિ નાવવિધ્યતિ સદૃઙ્ય
એવં વિદ્વાઁ સસ્ત્રયસ્ત્રિઁ શદહમાસતે વિ પાપ્મના ભ્રાતૃવ્યેણા
વર્તન્તેઽહર્ભાજો વા એતા દેવા અગ્ર આહર
૧૯ ન્નહરેકોઽભજતાહરેકસ્તાભિર્વૈ તે પ્રબાહુગાર્ધ્નુવન્ ય એવં
વિદ્વાઁ સસ્ત્રયસ્ત્રિઁ શદહમાસતે સર્વ એવ પ્રબાહુગૃધ્નુવન્તિ
સર્વે ગ્રામણીયં પ્રાપ્નુવન્તિ પઞ્ચાહા ભવન્તિ પઞ્ચ વા ઋતવઃ
સંવત્સર ઋતુષ્વેવ સંવત્સરે પ્રતિ તિષ્ઠન્ત્યથો પઞ્ચાક્ષરા
પઙ્ક્તિઃ પાઙ્ક્તો યજ્ઞો યજ્ઞમેવાવ રુંધતે ત્રીણ્યાશ્વિનાનિ ભવન્તિ
ત્રય ઇમે લોકા એ
૨૦ ષ્વેવ લોકેષુ પ્રતિ તિષ્ઠન્ત્યથો ત્રીણિ વૈ યજ્ઞસ્યેન્દ્રિયાણિ
તાન્યેવાવ રુંધતે વિશ્વજિદ્ભવત્યન્નાદ્યસ્યાવરુદ્ધ્યૈ સર્વપૃષ્ઠો ભવતિ
સર્વસ્યાભિજિત્યૈ વાગ્વૈ દ્વાદશાહો યત્પુરસ્તાદ્વાદશાહમુપેયુરનાપ્તાં
વાચમુપેયુરુપદાસુકૈષાં વાક્સ્યાદુપરિષ્ટાદ્વાદશાહમુપ યન્ત્યાપ્તામેવ
વાચમુપ યન્તિ તસ્માદુપરિષ્ટાદ્વાચા વદામોઽવાન્તરં
૨૧ વૈ દશરાત્રેણ પ્રજાપતિઃ પ્રજા અસૃજત યદ્દશરાત્રો
ભવતિ પ્રજા એવ તદ્યજમાનાઃ સૃજન્ત એતાઁ હ વા ઉદઙ્કઃ
શૌલ્બાયનઃ સત્ત્રસ્યર્દ્ધિમુવાચ યદ્દશરાત્રો યદ્દશરાત્રો
ભવતિ સત્ત્રસ્યર્દ્ધ્યા અથો યદેવ પૂર્વેષ્વહસ્સુ વિલોમ
ક્રિયતે તસ્યૈવૈષા શાન્તિર્દ્વ્યનીકા વા એતા રાત્રયો યજમાના
વિશ્વજિથ્સહાતિરાત્રેણ પૂર્વાઃ ષોડશ સહાતિરાત્રેણોત્તરાઃ

ષોડશ ય એવં વિદ્વાꣳ સસ્ત્રયસ્ત્રિꣳ શદહમાસત ઐષાં
દ્વ્યનીકા પ્રજા જાયતેઽતિરાત્રાવભિતો ભવતઃ પરિગૃહીત્યૈ ॥ ૭। ૪। ૫॥
અહરન્નેષ્વવાન્તરꣳ ષોડશ સહ સપ્તદશ ચ ॥ ૭। ૪। ૫॥
૨૨ આદિત્યા અકામયન્ત સુવર્ગં લોકમિયામેતિ તે સુવર્ગં
લોકં ન પ્રાજાનન્ન સુવર્ગં લોકમાયન્ત એતꣳ
ષટ્ત્રિꣳ શદ્રાત્રમપશ્યન્તમાહરન્તેનાયજન્ત તતો વૈ તે
સુવર્ગં લોકં પ્રાજાનન્થ્સુવર્ગં લોકમાયન્, ય એવં વિદ્વાꣳ સઃ
ષટ્ત્રિꣳ શદ્રાત્રમાસતે સુવર્ગમેવ લોકં પ્ર જાનન્તિ સુવર્ગં લોકં
યન્તિ જ્યોતિરતિરાત્રો
૨૩ ભવતિ જ્યોતિરેવ પુરસ્તાદ્દધતે સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યૈ ષડહા
ભવન્તિ ષડ્વા ઋતવ ઋતુષ્વેવ પ્રતિ તિષ્ઠન્તિ ચત્વારો ભવન્તિ
ચતસ્રો દિશો દિક્ષ્વેવ પ્રતિ તિષ્ઠન્ત્યસત્રં વા એતદ્યદછન્દોમં
યચ્છન્દોમા ભવન્તિ તેન સત્રં દેવતા એવ પૃષ્ઠૈરવ રુંધતે
પશૂꣳ છન્દોમૈરોજો વૈ વીર્યં પૃષ્ઠાનિ પશવશ્છન્દોમા ઓજસ્યેવ
૨૪ વીર્યે પશુષુ પ્રતિ તિષ્ઠન્તિ ષટ્ત્રિꣳ શદ્રાત્રો ભવતિ
ષટ્ત્રિꣳ શદક્ષરા બૃહતી બાર્હતાઃ પશવો બૃહત્યૈવ પશૂનવ
રુંધતે બૃહતી છંદસાગ્ં સ્વારાજ્યમાશ્નુતાશ્નુવતે સ્વારાજ્યં
ય એવં વિદ્વાꣳ સઃ ષટ્ત્રિꣳ શદ્રાત્રમાસતે સુવર્ગમેવ લોકં
યન્ત્યતિરાત્રાવભિતો ભવતઃ સુવર્ગસ્ય લોકસ્ય પરિગૃહીત્યૈ ॥ ૭। ૪। ૬॥ અતિરાત્ર ઓજસ્યેવ ષટ્ ત્રિꣳશચ્ચ
॥ ૭। ૪। ૬॥
૨૫ વસિષ્ઠો હતપુત્રોઽકામયત વિન્દેય પ્રજામભિ સૌદાસાન્ભવેયમિતિ
સ એતમેકસ્માન્ન પઞ્ચાશમપશ્યત્તમાહરત્તેનાયજત તતો વૈ સોઽવિન્દત
પ્રજામભિ સૌદાસાનભવદ્ય એવં વિદ્વાꣳ સ એકસ્માન્ન પઞ્ચાશમાસતે
વિન્દન્તે પ્રજામભિ ભ્રાતૃવ્યાન્ભવન્તિ ત્રયસ્ત્રિવૃતોઽગ્નિષ્ટોમા
ભવન્તિ વજ્રસ્યૈવ મુખꣳ સꣳ શ્યન્તિ દશ પઞ્ચદશા
ભવન્તિ પઞ્ચદશો વજ્રો
૨૬ વજ્રમેવ ભ્રાતૃવ્યેભ્યઃ પ્ર હરન્તિ ષોડશિમદ્દશમમહર્ભવતિ

વજ્ર એવ વીર્યં દધતિ દ્વાદશ સપ્તદશા ભવન્ત્યન્નાદ્યસ્યાવરુદ્ધ્યા
અથો પ્રૈવ તૈર્જાયન્તે પૃષ્ઠ્યઃ ષડહો ભવતિ ષડ્વા ઋતવઃ
ષટ્પૃષ્ઠાનિ પૃષ્ઠૈરેવર્તૂનન્વારોહન્ત્યૃતુભિઃ સંવથ્સરં
તે સંવથ્સર એવ પ્રતિ તિષ્ઠન્તિ દ્વાદશૈકવિꣳ શા ભવન્તિ
પ્રતિષ્ઠિત્યા અથો રુચમેવાત્મ
૨૭ ન્દધતે બહવઃ ષોડશિનો ભવન્તિ વિજિત્યૈ ષડાશ્વિનાનિ
ભવન્તિ ષડ્વા ઋતવ ઋતુષ્વેવ પ્રતિ તિષ્ઠન્ત્યૂનાતિરિક્તા વા એતા
રાત્રય ઊનાસ્તદ્યદેકસ્યૈ ન પઞ્ચાશદતિરિક્તાસ્તદ્યદ્ભૂયસીરષ્ટા
ચત્વારિꣳ શત ઊનાશ્ચ ખલુ વા અતિરિક્તાશ્ચ પ્રજાપતિઃ પ્રાજાયત
યે પ્રજાકામાઃ પશુકામાઃ સ્યુસ્ત એતા આસીરન્પ્રૈવ જાયન્તે પ્રજયા
પશુભિર્વૈરાજો વા એષ યજ્ઞો યદેકસ્માન્નપઞ્ચાશો ય એવં
વિદ્વાꣳ સ એકસ્માન્નપઞ્ચાશમાસતે વિરાજમેવ ગચ્છન્ત્યન્નાદા
ભવન્ત્યતિરાત્રાવભિતો ભવતોઽન્નાદ્યસ્ય પરિગૃહીત્યૈ ॥ ૭। ૪। ૭॥ વજ્ર
આત્મન્પ્રજયા દ્વાવિꣳશતિશ્ચ ॥ ૭। ૪। ૭॥
૨૮ સંવથ્સરાય દીક્ષિષ્યમાણા એકાષ્ટકાયાં દીક્ષેરન્નેષા વૈ
સંવથ્સરસ્ય પત્ની યદેકાષ્ટકૈતસ્યાં વા એષ એતાꣳ રાત્રિં વસતિ
સાક્ષાદેવ સંવથ્સરમારભ્ય દીક્ષન્ત આર્તં વા એતે સંવથ્સરસ્યાભિ
દીક્ષન્તે ય એકાષ્ટકાયાં દીક્ષન્તેઽન્તનામાનાવૃતૂ ભવતો વ્યસ્તં વા
એતે સંવથ્સરસ્યાભિ દીક્ષન્તે ય એકાષ્ટકાયાં દીક્ષન્તેઽન્તનામાનાવૃતૂ
ભવતઃ ફલ્ગુનીપૂર્ણમાસે દીક્ષેરન્મુખં વા એતથ્
૨૯ સંવથ્સરસ્ય યત્ફલ્ગુનીપૂર્ણમાસો મુખત એવ સંવથ્સરમારભ્ય
દીક્ષન્તે તસ્યૈકૈવ નિર્યા યથ્સાં મેઘ્યે વિષૂવાન્થ્સં પદ્યતે ચિત્રાપૂર્ણમાસે
દીક્ષેરન્મુખં વા એતથ્સંવથ્સરસ્ય યચ્ચિત્રાપૂર્ણમાસો મુખત એવ
સંવથ્સરમારભ્ય દીક્ષન્તે તસ્ય ન કાચન નિર્યા ભવતિ ચતુરહે
પુરસ્તાત્પૌર્ણમાસ્યૈ દીક્ષેરન્તેષામેકાષ્ટકાયાં ક્રયઃ સં પદ્યતે
તેનૈકાષ્ટકાં ન છંબટ્કુર્વન્તિ તેષાં
૩૦ પૂર્વપક્ષે સુત્યા સં પદ્યતે પૂર્વપક્ષં માસા અભિ સં

પદ્યન્તે તે પૂર્વપક્ષ ઉત્તિષ્ઠન્તિ તાનુત્તિષ્ઠત ઓષધયો
વનસ્પતયોઽનૂત્તિષ્ઠન્તિ તાન્કલ્યાણી કીર્તિરનૂત્તિષ્ઠત્યરાથ્સુરિમે
યજમાના ઇતિ તદનુ સર્વે રાધ્નુવન્તિ ॥ ૭। ૪। ૮॥ એતચ્છંબટ્કુર્વન્તિ
તેષાં ચતુસ્ત્રિꣳશચ્ચ ॥ ૭। ૪। ૮॥

૩૧ સુવર્ગં વા એતે લોકં યન્તિ યે સત્રમુપયન્ત્યભીન્ધત
એવ દીક્ષાભિરાત્માનગ્ગ્ શ્રપયન્ત ઉપસદ્ભિર્દ્વાભ્યાં લોમાવ દ્યન્તિ
દ્વાભ્યાં ત્વચં દ્વાભ્યામસૃદ્વાભ્યાં માꣳસં દ્વાભ્યામસ્થિ દ્વાભ્યાં
મજ્જાનમાત્મદક્ષિણં વૈ સત્રમાત્માનમેવ દક્ષિણાં નીત્વા સુવર્ગં
લોકં યન્તિ શિખામનુ પ્ર વપન્ત ઋદ્ધ્યા અથો રઘીયાꣳસઃ સુવર્ગં
લોકમયામેતિ ॥ ૭। ૪। ૯॥ સુવર્ગં પંચાશત્ ॥ ૭। ૪। ૯॥

૩૨ બ્રહ્મવાદિનો વદન્ત્યતિરાત્રઃ પરમો યજ્ઞક્રતૂનાં
કસ્માત્તં પ્રથમમુપ યન્તીત્યેતદ્વા અગ્નિષ્ટોમં પ્રથમમુપ
યન્ત્યથોક્થ્યમથ ષોડશિનમથાતિરાત્રમનુપૂર્વમેવૈતદ્યજ્ઞ
ક્રતૂનુપેત્ય તાનાલભ્ય પરિગૃહ્ય સોમમેવૈતત્પિબન્ત આસતે જ્યોતિષ્ટોમં
પ્રથમમુપ યન્તિ જ્યોતિષ્ટોમો વૈ સ્તોમાનાં મુખં મુખત એવ સ્તોમાન્
પ્ર યુઞ્જતે તે

૩૩ સરꣳસ્તુતા વિરાજમભિ સં પદ્યન્તે દ્વે ચર્ચાવતિ
રિચ્યેતે એકયા ગૌરતિરિક્ત એકયાયુરૂનઃ સુવર્ગો વૈ લોકો
જ્યોતિરૂર્ગ્વિરાટ્થ્સુવર્ગમેવ તેન લોકં યન્તિ રથંતરં દિવા ભવતિ
રથંતરં નક્તમિત્યાહુર્બ્રહ્મવાદિનઃ કેન તદજામીતિ સૌભરં
તૃતીયસવને બ્રહ્મસામં બૃહત્તન્મધ્યતો દધતિ વિધૃત્યૈ
તેનાજામિ ॥ ૭। ૪। ૧૦॥ ત એકાન્ન પંચાશચ્ચ ॥ ૭। ૪। ૧૦॥

૩૪ જ્યોતિષ્ટોમં પ્રથમમુપ યન્ત્યસ્મિન્નેવ તેન લોકે પ્રતિ તિષ્ઠન્તિ
ગોષ્ટોમં દ્વિતીયમુપ યન્ત્યન્તરિક્ષ એવ તેન પ્રતિ તિષ્ઠન્ત્યાયુષ્ટોમં
તૃતીયમુપ યન્ત્યમુષ્મિન્નેવ તેન લોકે પ્રતિ તિષ્ઠન્તીયં વાવ
જ્યોતિરન્તરિક્ષં ગૌરસાવાયુર્યદેતાન્થ્સ્તોમાનુપયન્ત્યેષ્વેવ તલ્લોકેષુ
સત્રિણઃ પ્રતિતિષ્ઠન્તો યન્તિ તે સરꣳસ્તુતા વિરાજ

૩૫ મભિ સં પદ્યન્તે દ્વે ચર્ચાવતિ રિચ્યેતે એકયા ગૌરતિરિક્ત
એકયાયુરૂનઃ સુવર્ગો વૈ લોકો જ્યોતિરૂર્ગ્વિરાડૂર્જમેવાવ રુંધતે
તે ન ક્ષુધાર્તિમાર્ચ્છન્ત્યક્ષોધુકા ભવન્તિ ક્ષુથ્સંબાધા ઇવ
હિ સત્રિણોઽગ્નિષ્ટોમાવભિતઃ પ્રધીતાવુક્થ્યા મધ્યે નભ્યં
તત્તદેતત્પરિયદ્દેવચક્રં યદેતેન

૩૬ ષડહેન યન્તિ દેવચક્રમેવ સમારોહન્ત્યરિષ્ટ્યૈ તે
સ્વસ્તિ સમશ્નુવતે ષડહેન યન્તિ ષડ્વા ઋતવ ઋતુષ્વેવ પ્રતિ
તિષ્ઠન્ત્યુભયતો જ્યોતિષા યન્ત્યુભયત એવ સુવર્ગે લોકે પ્રતિતિષ્ઠન્તો
યન્તિ દ્વૌ ષડહૌ ભવતસ્તાનિ દ્વાદશાહાનિ સં પદ્યન્તે દ્વાદશો
વૈ પુરુષો દ્વે સક્થ્યૌ દ્વૌ બાહૂ આત્મા ચ શિરશ્ચ ચત્વાર્યઙ્ગાનિ
સ્તનૌ દ્વાદશૌ

૩૭ તત્પુરુષમનુ પર્યાવર્તન્તે ત્રયઃ ષડહા ભવન્તિ
તાન્યષ્ટાદશાહાનિ સં પદ્યન્તે નવાન્યાનિ નવાન્યાનિ નવ વૈ
પુરુષે પ્રાણાસ્તત્પ્રાણાનનુ પર્યાવર્તન્તે ચત્વારઃ ષડહા ભવન્તિ
તાનિ ચતુર્વિઁ શતિરહાનિ સં પદ્યન્તે ચતુર્વિઁ શતિરર્ધમાસાઃ
સંવથ્સરસ્તથ્સંવથ્સરમનુ પર્યાવર્તન્તેઽપ્રતિષ્ઠિતઃ સંવથ્સર
ઇતિ ખલુ વા આહુર્વર્ષીયાન્પ્રતિષ્ઠાયા ઇત્યેતાવદ્વૈ સંવથ્સરસ્ય
બ્રાહ્મણં યાવન્માસો માસિમાસ્યેવ પ્રતિતિષ્ઠન્તો યન્તિ ॥ ૭। ૪। ૧૧॥

વિરાજમેતેન દ્વાદશાવેતાવદ્વા અષ્ટૌ ચ ॥ ૭। ૪। ૧૧॥

૩૮ મેષસ્ત્વા પચતૈરવતુ લોહિતગ્રીવશ્છાગૈઃ શલ્મલિર્વૃદ્ધ્યા પર્ણો
બ્રહ્મણા પ્લક્ષો મેધેન ન્યગ્રોધશ્ચમસૈરુદુંબર ઊર્જા ગાયત્રી
છન્દોભિસ્ત્રિવૃથ્સ્તોમૈરવન્તીઃ સ્થાવન્તીસ્ત્વાવન્તુ પ્રિયં ત્વા પ્રિયાણાં
વર્ષિષ્ઠમાપ્યાનાં નિધીનાં ત્વા નિધિપતિઁ હવામહે વસો મમ ॥ ૭। ૪। ૧૨॥

મેષઃ ષટ્ ત્રિઁ શત્ ॥ ૭। ૪। ૧૨॥

૩૯ કૂપ્યાભ્યઃ સ્વાહા કૂલ્યાભ્યઃ સ્વાહા વિકર્યાભ્યઃ સ્વાહાઽવટ્યાભ્યઃ
સ્વાહા ખન્યાભ્યઃ સ્વાહા હ્રદ્યાભ્યઃ સ્વાહા સૂદ્યાભ્યઃ સ્વાહા સરસ્યાભ્યઃ
સ્વાહા વૈશન્તીભ્યઃ સ્વાહા પલ્વલ્યાભ્યઃ સ્વાહા વર્ષ્યાભ્યઃ

સ્વાહાઽવટ્યાભ્યઃ સ્વાહા હ્રાદુનીભ્યઃ સ્વાહા પૃષ્વાભ્યઃ
સ્વાહા સ્યન્દમાનાભ્યઃ સ્વાહા સ્થાવરાભ્યઃ સ્વાહા નાદેયીભ્યઃ સ્વાહા
સૈન્ધવીભ્યઃ સ્વાહા સમુદ્રિયાભ્યઃ સ્વાહા સર્વાભ્યઃ સ્વાહા ॥ ૭। ૪। ૧૩॥
કૂપ્યાભ્યશ્ચત્વારિ ँ શત્ ॥ ૭। ૪। ૧૩॥

૪૦ અદ્ભ્યઃ સ્વાહા વહન્તીભ્યઃ સ્વાહા પરિવહન્તીભ્યઃ સ્વાહા સમન્તં
વહન્તીભ્યઃ સ્વાહા શીઘ્રં વહન્તીભ્યઃ સ્વાહા શીભં વહન્તીભ્યઃ
સ્વાહોગ્રં વહન્તીભ્યઃ સ્વાહા ભીમં વહન્તીભ્યઃ સ્વાહાઽમ્ભોભ્યઃ સ્વાહા
નભોભ્યઃ સ્વાહા મહોભ્યઃ સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૪। ૧૪॥ અદ્ભ્ય
એકાન્ન ત્રિ ँ શત્ ॥ ૭। ૪। ૧૪॥

૪૧ યો અર્વન્તં જિઘા ँ સતિ તમભ્યમીતિ વરુણઃ । પરો મર્તઃ પરઃ
શ્વા ॥ અહં ચ ત્વં ચ વૃત્રહન્થ્સં બભૂવ સનિભ્ય આ । અરાતીવા
ચિદદ્રિવોઽનુ નૌ શૂર મ ँ સતૈ ભદ્રા ઇન્દ્રસ્ય રાતયઃ ॥ અભિ ક્રત્વેન્દ્ર
ભૂરધ જ્મન્ન તે વિવ્યઙ્મહિમાન ँ રજા ँસિ । સ્વેના હિ વૃત્ર ँ
શવસા જઘન્થ ન શત્રુરન્તં વિવિદદ્યુધા તે ॥ ૭। ૪। ૧૫॥ વિવિદ
દ્વે ચ ॥ ૭। ૪। ૧૫॥

૪૨ નમો રાજ્ઞે નમો વરુણાય નમોઽશ્વાય નમઃ પ્રજાપતયે
નમોઽધિપતયેઽધિપતિરસ્યધિપતિં મા કુર્વધિપતિરહં પ્રજાનાં
ભૂયાસં માં ધેહિ મયિ ધેહ્યુપાકૃતાય સ્વાહાલબ્ધાય સ્વાહા હુતાય
સ્વાહા ॥ ૭। ૪। ૧૬॥ નમ એકાન્ન ત્રિ ँ શત્ ॥ ૭। ૪। ૧૬॥

૪૩ મયોભૂર્વાતો અભિ વાતૂસ્રા ઊર્જસ્વતીરોષધીરા રિશન્તામ્ ।
પીવસ્વતીર્જીવધન્યાઃ પિબન્ત્વવસાય પદ્વતે રુદ્ર મૃડ ॥ યાઃ સરૂપા
વિરૂપા એકરૂપા યાસામગ્નિરિષ્ટ્યા નામાનિ વેદ । યા અંગિરસસ્તપસેહ
ચક્રુસ્તાભ્યઃ પર્જન્ય મહિ શર્મ યચ્છ ॥ યા દેવેષુ તનુવમૈરયન્ત
યાસા ँ સોમો વિશ્વા રૂપાણિ વેદ । તા અસ્મભ્યં પયસા પિન્વમાનાઃ
પ્રજાવતીરિન્દ્ર

૪૪ ગોષ્ઠે રિરીહિ ॥ પ્રજાપતિર્મહ્યમેતા રરાણો વિશ્વૈર્દેવૈઃ
પિતૃભિઃ સંવિદાનઃ । શિવાઃ સતીરુપ નો ગોષ્ઠમાકસ્તાસાં વયં

પ્રજયા સꣳ સદેમ ॥ ઇહ ધૃતિઃ સ્વાહેહ વિધૃતિઃ સ્વાહેહ રન્તિઃ
સ્વાહેહ રમતિઃ સ્વાહા મહી મૂષુ સુત્રામાણમ્ ॥ ૭। ૪। ૧૭॥ ઇન્દ્રાષ્ટા
ત્રિꣳશચ્ચ ॥ ૭। ૪। ૧૭॥

૪૫ કિરꣳ સ્વિદાસીત્પૂર્વચિત્તિઃ કિરꣳ સ્વિદાસીદ્બૃહદ્વયઃ । કિરꣳ
સ્વિદાસીત્પિશંગિલા કિરꣳ સ્વિદાસીત્પિલિપ્પિલા ॥ દ્યૌરાસીત્પૂર્વચિત્તિરશ્વ
આસીદ્બૃહદ્વયઃ । રાત્રિરાસીત્પિશંગિલાવિરાસીત્પિલિપ્પિલા ॥ કઃ સ્વિદેકાકી
ચરતિ ક ઉ સ્વિજ્જાયતે પુનઃ । કિરꣳ સ્વિદ્ધિમસ્ય ભેષજં કિરꣳ
સ્વિદાવપનં મહત્ ॥ સૂર્ય એકાકી ચરતિ

૪૬ ચન્દ્રમા જાયતે પુનઃ । અગ્નિર્હિમસ્ય ભેષજં ભૂમિરાવપનં મહત્ ॥
પૃચ્છામિ ત્વા પરમન્તં પૃથિવ્યાઃ પૃચ્છામિ ત્વા ભુવનસ્ય નાભિમ્
। પૃચ્છામિ ત્વા વૃષ્ણો અશ્વસ્ય રેતઃ પૃચ્છામિ વાચઃ પરમં
વ્યોમ ॥ વેદિમાહુઃ પરમન્તં પૃથિવ્યા યજ્ઞમાહુર્ભુવનસ્ય નાભિમ્ ।
સોમમાહુર્વૃષ્ણો અશ્વસ્ય રેતો બ્રહ્મૈવ વાચઃ પરમં વ્યોમ ॥ ૭। ૪। ૧૮॥ સૂર્ય એકાકી ચરતિ ષટ્
ચત્વારિꣳશચ્ચ ॥ ૭। ૪। ૧૮॥

૪૭ અમ્બે અંબાલ્યંબિકે ન મા નયતિ કશ્ચન । સ સસસ્ત્યશ્વકઃ ॥
સુભગે કાંપીલવાસિનિ સુવર્ગે લોકે સં પ્રોર્ણ્વાથામ્ । આહમજાનિ ગર્ભધમા
ત્વમજાસિ ગર્ભધમ્ । તૌ સહ ચતુરઃ પદઃ સં પ્ર સારયાવહૈ । વૃષા
વાꣳ રેતોધા રેતો દધાતૂત્સક્થ્યોર્ગૃદં ધેહ્યંજિમુદંજિમન્વજ ।
યઃ સ્ત્રીણાં જીવભોજનો ય આસાં

૪૮ બિલધાવનઃ । પ્રિયઃ સ્ત્રીણામપીચ્યઃ । ય આસાં કૃષ્ણે લક્ષ્મણિ
સર્દિગૃદિં પરાવધીત્ ॥ અમ્બે અંબાલ્યંબિકે ન મા યભતિ કશ્ચન ।
સસસ્ત્યશ્વકઃ ॥ ઊર્ધ્વામેનામુચ્છ્રયતાદ્વેણુભારં ગિરાવિવ । અથાસ્યા
મધ્યમેધતાꣳ શીતે વાતે પુનન્નિવ ॥ અમ્બે અંબાલ્યંબિકે ન મા યભતિ
કશ્ચન । સસસ્ત્યશ્વકઃ ॥ યદ્ધરિણી યવમત્તિ ન

૪૯ પુષ્ટં પશુ મન્યતે । શૂદ્રા યદર્યજારા ન પોષાય ધનાયતિ ॥ અમ્બે
અંબાલ્યંબિકે ન મા યભતિ કશ્ચન । સસસ્ત્યશ્વકઃ ॥ ઇયં યકા
શકુન્તિકાહલમિતિ સર્પતિ । આહતં ગભે પસો નિ જલ્ગુલીતિ ધાણિકા ॥

અમ્બે અંબાલ્યંબિકે ન મા યભતિ કશ્ચન । સસસ્ત્યશ્વકઃ ॥ માતા ચ
તે પિતા ચ તેઽગ્રં વૃક્ષસ્ય રોહતઃ ।
૫૦ પ્ર સુલામીતિ તે પિતા ગભે મુષ્ટિમતꣳ સયત્ ॥ દધિક્રાવ્ણો અકારિષં
જિષ્ણોરશ્વસ્ય વાજિનઃ । સુરભિ નો મુખા કરત્પ્રણ આયૂꣳષિ તારિષત્
॥ આપો હિષ્ઠા મયોભુવસ્તા ન ઊર્જે દધાતન । મહે રણાય ચક્ષસે ॥
યો વઃ શિવતમો રસસ્તસ્ય ભાજયતેહ નઃ । ઉશતીરિવ માતરઃ ॥
તસ્મા અરં ગમામ વો યસ્ય ક્ષયાય જિન્વથ । આપો જનયથા ચ નઃ ॥
૭। ૪। ૧૯॥ આસામત્તિ ન રોહતો જિન્વથ ચત્વારિ ચ ॥ ૭। ૪। ૧૯॥
૫૧ ભૂર્ભુવઃસુવર્વસવસ્ત્વાઽઞ્જન્તુ ગાયત્રેણ છંદસા રુદ્રાસ્ત્વાઞ્જન્તુ
ત્રૈષ્ટુભેન છંદસાદિત્યાસ્ત્વાઞ્જન્તુ જાગતેન છંદસા યદ્વાતો
અપો અગમદિન્દ્રસ્ય તનુવં પ્રિયામ્ । એતꣳ સ્તોતરેતેન પથા
પુનરશ્વમા વર્તયાસિ નઃ ॥ લાજી૩ ઙ્છાચી૩ ન્, યશો મમા૪ મ્ । યવ્યાયૈ
ગવ્યાયા એતદ્દેવા અન્નમત્તૈતદન્નમદ્ધિ પ્રજાપતે ॥ યુઞ્જન્તિ
બ્રધ્નમરુષં ચરન્તં પરિ તસ્થુષઃ । રોચન્તે રોચના દિવિ ॥
યુઞ્જન્ત્યસ્ય કામ્યા હરી વિપક્ષસા રથે । શોણા ધૃષ્ણૂ નૃવાહસા
॥ કેતું કૃણ્વન્નકેતવે પેશો મર્યા અપેશસે । સમુષદ્ભિરજાયથાઃ ॥
૭। ૪। ૨૦॥ બ્રધ્નં પંચ વિꣳશતિશ્ચ ॥ ૭। ૪। ૨૦॥
૫૨ પ્રાણાય સ્વાહા વ્યાનાય સ્વાહાપાનાય સ્વાહા સ્નાવભ્યઃ સ્વાહા
સંતાનેભ્યઃ સ્વાહા પરિસંતાનેભ્યઃ સ્વાહા પર્વભ્યઃ સ્વાહા સંધાનેભ્યઃ
સ્વાહા શરીરેભ્યઃ સ્વાહા યજ્ઞાય સ્વાહા દક્ષિણાભ્યઃ સ્વાહા સુવર્ગાય
સ્વાહા લોકાય સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૪। ૨૧॥ પ્રાણાયાષ્ટાવિꣳશતિઃ ॥
૭। ૪। ૨૧॥
૫૩ સિતાય સ્વાહાસિતાય સ્વાહાભિહિતાય સ્વાહાનભિહિતાય સ્વાહા યુક્તાય
સ્વાહાયુક્તાય સ્વાહા સુયુક્તાય સ્વાહોદ્યુક્તાય સ્વાહા વિમુક્તાય સ્વાહા
પ્રમુક્તાય સ્વાહા વઞ્ચતે સ્વાહા પરિવઞ્ચતે સ્વાહા સંવઞ્ચતે

સ્વાહાનુવઞ્ચતે સ્વાહોદ્વઞ્ચતે સ્વાહા યતે સ્વાહા ધાવતે સ્વાહા
તિષ્ઠતે સ્વાહા સર્વસ્મૈ સ્વાહા ॥ ૭। ૪। ૨૨॥ સિતાયાષ્ટા ત્રિꣳશત્ ॥ ૭। ૪। ૨૨॥

બૃહસ્પતિઃ શ્રદ્ધયા વા ઋક્ષા વૈ પ્રજાપતિર્યેન યેન દ્વે વાવાદિત્યા
વસિષ્ઠઃ સંવથ્સરાય સુવર્ગં બ્રહ્મવાદિનો જ્યોતિષ્ટોમં મેષઃ
કૂપ્યાભ્યોઽદ્ભ્યો યો નમો મયોભૂઃ કિગ્ગ્ સ્વિદંબે ભૂઃ પ્રાણાય સિતાય
દ્વાવિꣳશતિઃ ॥

બૃહસ્પતિઃ પ્રતિ તિષ્ઠન્તિ વૈ દશરાત્રેણ સુવર્ગં યો અર્વન્તં
ભૂસ્ત્રિપંચાશત્ ॥

બૃહસ્પતિઃ સર્વસ્મૈ સ્વાહા ॥

## સપ્તમકાણ્ડે પઞ્ચમઃ પ્રશ્નઃ ૫

૧ ગાવો વા એતથ્સત્રમાસતાશꣳઙ્ગાઃ સતીઃ શꣳઙ્ગાણિ નો
જાયન્તા ઇતિ કામેન તાસાં દશ માસા નિષણ્ણા આસન્નથ
શꣳઙ્ગાન્યજાયન્ત તા ઉદતિષ્ઠન્નરાથ્સ્મેત્યથ યાસાં નાજાયન્ત તાઃ
સંવથ્સરમાપ્ત્વોદતિષ્ઠન્નરાથ્સ્મેતિ યાસાં ચાજાયન્ત યાસાં ચ
ન તા ઉભયીરુદતિષ્ઠન્નરાથ્સ્મેતિ ગોસત્રં વૈ
૨ સંવથ્સરો ય એવં વિદ્વાꣳસઃ સંવથ્સરમુપયન્ત્યૃધ્નુવન્ત્યેવ
તસ્માત્તૂપરા વાર્ષિકૌ માસૌ પર્ત્વા ચરતિ સત્રાભિજિતગ્ગ્
હ્યસ્યૈ તસ્માથ્સંવથ્સરસદો યત્કિંચ ગૃહે ક્રિયતે
તદાપ્તમવરુદ્ધમભિજિતં ક્રિયતે સમુદ્રં વા એતે પ્ર પ્લવન્તે યે
સંવથ્સરમુપયન્તિ યો વૈ સમુદ્રસ્ય પારં ન પશ્યતિ ન વૈ સ
તત ઉદેતિ સંવથ્સરો
૩ વૈ સમુદ્રસ્તસ્યૈતત્પારં યદતિરાત્રૌ ય એવં વિદ્વાꣳસઃ
સંવથ્સરમુપયન્ત્યનાર્તા એવોદૃચં ગચ્છન્તીયં વૈ
પૂ?ર્વોઽતિરાત્રોઽસાવુત્તરો મનઃ પૂર્વો વાગુત્તરઃ પ્રાણઃ
પૂર્વોઽપાન ઉત્તરઃ પ્રરોધનં પૂર્વ ઉદયનમુત્તરો

જ્યોતિષ્ટોમો વૈશ્વાનરોઽતિરાત્રો ભવતિ જ્યોતિરેવ પુરસ્તાદ્દધતે
સુવર્ગસ્ય લોકસ્યાનુખ્યાત્યૈ ચતુર્વિ ँ શઃ પ્રાયણીયો ભવતિ
ચતુર્વિ ँ શતિરર્ધમાસાઃ
૪ સંવથ્સરઃ પ્રયન્ત એવ સંવથ્સરે પ્રતિ તિષ્ઠન્તિ તસ્ય ત્રીણિ
ચ શતાનિ ષષ્ટિશ્ચ સ્તોત્રીયાસ્તાવતીઃ સંવથ્સરસ્ય રાત્રય
ઉભે એવ સંવથ્સરસ્ય રૂપે આપ્નુવન્તિ તે સર ँ સ્થિત્યા અરિષ્ટ્યા
ઉત્તરૈરહોભિશ્ચરન્તિ ષડહા ભવન્તિ ષડ્વા ઋતવઃ સંવથ્સર
ઋતુષ્વેવ સંવથ્સરે પ્રતિ તિષ્ઠન્તિ ગૌશ્ચાયુશ્ચ મધ્યતઃ સ્તોમૌ
ભવતઃ સંવથ્સરસ્યૈવ તન્મિથુનં મધ્યતો
૫ દધતિ પ્રજનનાય જ્યોતિરભિતો ભવતિ વિમોચનમેવ તચ્છન્દાગ્સ્યેવ
તદ્વિમોકં યન્ત્યથો ઉભયતો જ્યોતિષૈવ ષડહેન સુવર્ગં લોકં
યન્તિ બ્રહ્મવાદિનો વદન્ત્યાસતે કેન યન્તીતિ દેવયાનેન પથેતિ
બ્રૂયાચ્છન્દાँસિ વૈ દેવયાનઃ પન્થા ગાયત્રી ત્રિષ્ટુબ્જગતી
જ્યોતિર્વૈ ગાયત્રી ગૌસ્ત્રિષ્ટુગા?યુર્જગતી યદેતે સ્તોમા ભવન્તિ
દેવયાનેનૈવ
૬ તત્પથા યન્તિ સમાન ँ સામ ભવતિ દેવલોકો વૈ સામ
દેવલોકાદેવ ન યન્ત્યન્યા અન્યા ઋચો ભવન્તિ મનુષ્યલોકો વા ઋચો
મનુષ્યલોકાદેવાન્યમન્યં દેવલોકમભ્યારોહન્તો યન્ત્યભિવર્તો
બ્રહ્મસામં ભવતિ સુવર્ગસ્ય લોકસ્યાભિવૃત્ત્યા અભિજિદ્ભવતિ
સુવર્ગસ્ય લોકસ્યાભિજિત્યૈ વિશ્વજિદ્ભવતિ વિશ્વસ્ય જિત્યૈ
માસિમાસિ પૃષ્ઠાન્યુપ યન્તિ માસિમાસ્યતિગ્રાહ્યા ગૃહ્યન્તે માસિમાસ્યેવ
વીર્યં દધતિ માસાં પ્રતિષ્ઠિત્યા ઉપરિષ્ટાન્માસાં પૃષ્ઠાન્યુપ યન્તિ
તસ્માદુપરિષ્ટાદોષધયઃ ફલં ગૃહ્ણન્તિ ॥ ૭। ૫। ૧॥ ગોસત્રં વા
એતિ સંવથ્સરોઽર્ધમાસા મિથુનં મધ્યતો દેવયાનેનૈવ વીર્યં
ત્રયોદશ ચ ॥ ૭। ૫। ૧॥
૭ ગાવો વા એતથ્સત્રમાસતાશૃઙ્ગાઃ સતીઃ શૃઙ્ગાણિ
સિષાસન્તીસ્તાસાં દશ માસા નિષણ્ણા આસન્નથ શૃઙ્ગાણ્યજાયન્ત

તા અબ્રુવન્નરાથ્સ્મોત્તિષ્ઠામાવ તં કામમરુથ્સ્મહિ યેન કામેન
ન્યષદામેતિ તાસામુ ત્વા અબ્રુવન્નર્ધા વા યાવતીર્વાસામહા એવેમૌ
દ્વાદશૌ માસૌ સંવથ્સરꣳ સં પાદ્યોત્તિષ્ઠામેતિ તાસાં
૮ દ્વાદશે માસિ શꣳઙ્ગાણિ પ્રાવર્તન્ત શ્રદ્ધયા વાઽશ્રદ્ધયા વા તા
ઇમા યાસ્તૂપરા ઉભય્યો વાવ તા આર્ધ્નુવન્, યાશ્ચ શꣳઙ્ગાણ્યસન્વન્
યાશ્ચોર્જમવારુંધતર્ધ્નોતિ દશસુ માસૂત્તિષ્ઠન્નૃધ્નોતિ
દ્વાદશસુ ય એવં વેદ પદેન ખલુ વા એતે યન્તિ વિન્દતિ ખલુ
વૈ પદેન યન્તદ્વા એતદૃધ્દમયનં તસ્માદેતદ્ગોસનિ ॥ ૭। ૫। ૨॥
તિષ્ઠામેતિ તાસાં તસ્માદ્વૈ ચ ॥ ૭। ૫। ૨॥
૯ પ્રથમે માસિ પૃષ્ઠાન્યુપ યન્તિ મધ્યમ ઉપ યન્ત્યુત્તમ ઉપ યન્તિ
તદાહુર્યાં વૈ ત્રિરેકસ્યાહ્ન ઉપસીદન્તિ દહ્રં વૈ સાપરાભ્યાં દોહાભ્યાં
દુહેઽથ કુતઃ સા ધોક્ષ્યતે યાં દ્વાદશ કૃત્વ ઉપસીદન્તીતિ
સંવથ્સરꣳ સં પાદ્યોત્તમે માસિ સકૃત્પૃષ્ઠાન્યુપેયુસ્તદ્યજમાના
યજ્ઞં પશૂનવ રુંધતે સમુદ્રં વા
૧૦ એતેઽનવારમપારં પ્ર પ્લવન્તે યે સંવથ્સરમુપયન્તિ
યદ્બૃહદ્રથંતરે અન્વર્જેયુર્યથા મધ્યે સમુદ્રસ્ય
પ્લવમન્વર્જેયુસ્તાદૃક્તદનુથ્સર્ગં બૃહદ્રથંતરાભ્યામિત્વા
પ્રતિષ્ઠાં ગચ્છન્તિ સર્વેભ્યો વૈ કામેભ્યઃ સંધિર્દુહે તદ્યજમાનાઃ
સર્વાન્કામાનવ રુંધતે ॥ ૭। ૫। ૩॥ સમુદ્રં વૈ ચતુસ્ત્રિꣳશચ્ચ ॥ ૭। ૫। ૩॥
૧૧ સમાન્ય ઋચો ભવન્તિ મનુષ્યલોકો વા ઋચો મનુષ્યલોકાદેવ ન
યન્ત્યન્યદન્યથ્સામ ભવતિ દેવલોકો વૈ સામ દેવલોકાદેવાન્યમન્યં
મનુષ્યલોકં પ્રત્યવરોહન્તો યન્તિ જગતીમગ્ર ઉપ યન્તિ જગતીં
વૈ છન્દાꣳસિ પ્રત્યવરોહન્ત્યાગ્રયણં ગ્રહા બૃહત્પૃષ્ઠાનિ
ત્રયસ્ત્રિꣳશꣳ સ્તોમાસ્તસ્માજ્જ્યાયાꣳસં કનીયાન્પ્રત્યવરોહતિ
વૈશ્વકર્મણો ગૃહ્યતે વિશ્વાન્યેવ તેન કર્માણિ યજમાના અવ રુંધત
આદિત્યો
૧૨ ગૃહ્યત ઇયં વા અદિતિરસ્યામેવ પ્રતિ તિષ્ઠન્ત્યન્યોઽન્યો ગૃહ્યેતે

મિથુનત્વાય  પ્રજાત્યા અવાન્તરં વૈ દશરાત્રેણ  પ્રજાપતિઃ પ્રજા
અસૃજત  યદ્દશરાત્રો ભવતિ પ્રજા એવ તદ્યજમાનાઃ સૃજન્ત એતાઁ હ
વા ઉદઙ્કઃ શૌલ્બાયનઃ સત્રસ્યર્દ્ધિમુવાચ  યદ્દશરાત્રો યદ્દશરાત્રો
ભવતિ સત્રસ્યર્ધ્યા  અથો  યદેવ પૂર્વેષ્વહસ્સુ  વિલોમ ક્રિયતે
તસ્યૈવૈષા શાન્તિઃ  ॥ ૭। ૫। ૪॥ આદિત્યસ્તસ્યૈવ દ્વે ચ  ॥ ૭। ૫। ૪॥

૧૩ યદિ  સોમૌ  સઁસુતૌ  સ્યાતાં  મહતિ રાત્રિયૈ
પ્રાતરનુવાકમુપાકુર્યાત્પૂર્વો  વાચં  પૂર્વો  દેવતાઃ  પૂર્વશ્છન્દાઁસિ
વૃઙ્ક્તે  વૃષણ્વતીં પ્રતિપદં  કુર્યાત્પ્રાતઃ સવનાદેવૈષામિન્દ્રં
વૃઙ્ક્તેઽથો  ખલ્વાહુઃ સવનમુખે સવનમુખે કાર્યેતિ
સવનમુખાત્સવનમુખાદેવૈષામિન્દ્રં  વૃઙ્ક્તે સંવેશાયોપવેશાય
ગાયત્રિયાસ્ત્રિષ્ટુભો  જગત્યા અનુષ્ટુભઃ  પઙ્ક્ત્યા અભિભૂત્યૈ  સ્વાહા
છન્દાઁસિ  વૈ સંવેશ ઉપવેશશ્છન્દોભિરેવૈષાં

૧૪ છન્દાઁસિ વૃઙ્ક્તે સજનીયઁ  શસ્યં  વિહવ્યઁ
શસ્યમગસ્ત્યસ્ય કયાશુભીયઁ  શસ્યમેતાવદ્વા અસ્તિ
યાવદેતદ્યાવદેવાસ્તિ  તદેષાં વૃઙ્ક્તે  યદિ  પ્રાતઃ સવને કલશો  દીર્યેત
વૈષ્ણવીષુ  શિપિવિષ્ટવતીષુ સ્તુવીરન્, યદ્વૈ યજ્ઞસ્યાતિરિચ્યતે
વિષ્ણું  તચ્છિપિવિષ્ટમભ્યતિ  રિચ્યતે  તદ્વિષ્ણુઃ  શિપિવિષ્ટોઽતિરિક્ત
એવાતિરિક્તં દધાત્યથો  અતિરિક્તેનૈવાતિરિક્તમાપ્ત્વાવ  રુંધતે  યદિ
મધ્યંદિને  દીર્યેત વષટ્કારનિધનઁ  સામ  કુર્યુર્વષટ્કારો વૈ
યજ્ઞસ્ય  પ્રતિષ્ઠા પ્રતિષ્ઠામેવૈનદ્ગમયન્તિ  યદિ  તૃતીયસવન
એતદેવ ॥ ૭। ૫। ૫॥ છન્દોભિરેવૈષામવૈકાન્ન વિઁશતિશ્ચ  ॥ ૭। ૫। ૫॥

૧૫ ષડહૈર્માસાન્ત્સં  પાદ્યાહરુત્સૃજન્તિ ષડહૈર્હિ માસાન્ત્સં
પશ્યન્ત્યર્ધમાસૈર્માસાન્ત્સં  પાદ્યાઽહરુત્સૃજન્ત્યર્ધમાસૈર્હિ માસાન્ત્સં
પશ્યન્ત્યમાવાસ્યયા  માસાન્ત્સં  પાદ્યાહરુત્સૃજન્ત્યમાવાસ્યયા  હિ
માસાન્ત્સં  પશ્યન્તિ પૌર્ણમાસ્યા માસાન્ત્સં  પાદ્યાહરુત્સૃજન્તિ પૌર્ણમાસ્યા
હિ માસાન્ત્સં  પશ્યન્તિ  યો વૈ પૂર્ણ આસિઞ્ચતિ  પરા  સ સિઞ્ચતિ
યઃ પૂર્ણાદુદચતિ

૧૬ પ્રાણમસ્મિન્થ્સ દધાતિ યત્પૌર્ણમાસ્યા માસાન્થ્સં પાદ્યાહરુથ્સૃજન્તિ
સંવથ્સરાયૈવ તત્પ્રાણં દધતિ તદનુ સત્ત્રિણઃ પ્રાણન્તિ
યદહર્નોથ્સૃજેયુર્યથા દૃતિરુપનદ્ધો વિપતત્યેવꣳ સંવથ્સરો
વિ પતેદાર્તિમાર્ચ્છેયુર્યત્પૌર્ણમાસ્યા માસાન્થ્સં પાદ્યાહરુથ્સૃજન્તિ
સંવથ્સરાયૈવ તદુદાનં દધતિ તદનુ સત્ત્રિણ ઉ
૧૭ દનન્તિ નાર્તિમાર્ચ્છન્તિ પૂર્ણમાસે વૈ દેવાનાꣳસુતો યત્પૌર્ણમાસ્યા
માસાન્થ્સં પાદ્યાહરુથ્સૃજન્તિ દેવાનામેવ તદ્યજ્ઞેન યજ્ઞં
પ્રત્યવરોહન્તિ વિ વા એતદ્યજ્ઞં છિન્દન્તિ યત્ષડહ સંતતꣳ
સન્તમથાહરુથ્સૃજન્તિ પ્રાજાપત્યં પશુમાલભન્તે પ્રજાપતિઃ સર્વા
દેવતા દેવતાભિરેવ યજ્ઞꣳ સં તન્વન્તિ યન્તિ વા એતે સવનાદ્યેઽહ
૧૮ રુથ્સૃજન્તિ તુરીયં ખલુ વા એતથ્સવનં યથ્સાન્નાય્યં યથ્સાન્નાય્યં
ભવતિ તેનૈવ સવનાન્નયન્તિ સમુપહૂય ભક્ષયન્ત્યેતથ્સોમપીથા
હ્યેતર્હિ યથાયતનં વા એતેષાꣳસવનભાજો દેવતા ગચ્છન્તિ
યેઽહરુથ્સૃજન્ત્યનુસવનં પુરોડાશાન્નિર્વપન્તિ યથાયતનાદેવ
સવનભાજો દેવતા અવ રુંધતેઽષ્ટાકપાલાન્ પ્રાતઃ સવન
એકાદશકપાલાન્માધ્યંદિને સવને દ્વાદશકપાલાગ્સ્તૃતીયસવને
છન્દાગ્સ્યેવાપ્ત્વાવ રુંધતે વૈશ્વદેવં ચરું તૃતીયસવને નિર્વપન્તિ
વૈશ્વદેવં વૈ તૃતીયસવનં તેનૈવ તૃતીયસવનાન્ન યન્તિ ॥ ૭। ૫। ૬॥

ઉદયત્યુદ્યેઽહરાપ્ત્વા પંચદશ ચ ॥ ૭। ૫। ૬॥

૧૯ ઉથ્સૃજ્યાંઉ નોથ્સૃજ્યાઉ મિતિ મીમાꣳસન્તે
બ્રહ્મવાદિનસ્તદ્વાહુરુ?થ્સૃજ્યમેવેત્યમાવાસ્યાયાં ચ પૌર્ણમાસ્યાં
ચોથ્સૃજ્યમિત્યાહુરેતે હિ યજ્ઞં વહત ઇતિ તે ત્વાવ નોથ્સૃજ્યે
ઇત્યાહુર્યે અવાન્તરં યજ્ઞં ભેજાતે ઇતિ યા પ્રથમા વ્યષ્ટકા
તસ્યામુથ્સૃજ્યમિત્યાહુરેષ વૈ માસો વિશર ઇતિ નાદિષ્ટ
૨૦ મુથ્સૃજેયુર્યદાદિષ્ટમુથ્સૃજેયુર્યાદૃશે પુનઃ
પર્યાપ્લાવે મધ્યે ષડહસ્ય સં પદ્યેત ષડહૈર્માસાન્થ્સં
પાદ્ય યથ્સપ્તમમહસ્તસ્મિન્નુથ્સૃજેયુસ્તદગ્નયે વસુમતે

પુરોડાશમષ્ટાકપાલં નિર્વપેયુરૈન્દ્રં દધીન્દ્રાય મરુત્વતે
પુરોડાશમેકાદશકપાલં વૈશ્વદેવં દ્વાદશકપાલમગ્નેર્વૈ વસુમતઃ
પ્રાતઃસવનં યદગ્નયે વસુમતે પુરોડાશમષ્ટાકપાલં નિર્વપન્તિ
દેવતામેવ તદ્ભાગિનીં કુર્વન્તિ
૨૧ સવનમષ્ટાભિરુપ યન્તિ યદૈન્દ્રં દધિ ભવતીન્દ્રમેવ
તદ્ભાગધેયાન્ન ચ્યાવયન્તીન્દ્રસ્ય વૈ મરુત્વતો માધ્યંદિનꣳ
સવનં યદિન્દ્રાય મરુત્વતે પુરોડાશમેકાદશકપાલં નિર્વપન્તિ
દેવતામેવ તદ્ભાગિનીં કુર્વન્તિ સવનમેકાદશભિરુપ યન્તિ
વિશ્વેષાં વૈ દેવાનામૃભુમતાં તૃતીયસવનં યદ્વૈશ્વદેવં
દ્વાદશકપાલં નિર્વપન્તિ દેવતા એવ તદ્ભાગિનીઃ કુર્વન્તિ સવનં
દ્વાદશભિ
૨૨ રુપ યન્તિ પ્રાજાપત્યં પશુમા લભન્તે યજ્ઞો વૈ
પ્રજાપતિર્યજ્ઞસ્યાનનુસર્ગાયાભિવર્ત ઇતઃ ષણ્માસો બ્રહ્મસામં ભવતિ
બ્રહ્મ વા અભિવર્તો બ્રહ્મણૈવ તથ્સુવર્ગં લોકમભિવર્તયન્તો યન્તિ
પ્રતિકૂલમિવ હીતઃ સુવર્ગો લોક ઇન્દ્ર ક્રતું ન આ ભર પિતા પુત્રેભ્યો
યથા । શિક્ષા નો અસ્મિન્પુરુહૂત યામનિ જીવા જ્યોતિરશીમહીત્યમુત
આયતાꣳ ષણ્માસો બ્રહ્મસામં ભવત્યયં વૈ લોકો જ્યોતિઃ પ્રજા
જ્યોતિરિમમેવ તલ્લોકં પશ્યન્તોઽભિવદન્ત આ યન્તિ ॥ ૭। ૫। ૭॥ નાદિષ્ટં
કુર્વન્તિ દ્વાદશભિરિતિ વિꣳશતિશ્ચ ॥ ૭। ૫। ૭॥
૨૩ દેવાનાં વા અન્તં જગ્મુષામિંદ્રિયં
વીર્યમપાક્રામત્તત્ક્રોશેનાવારુંધત તત્ક્રોશસ્ય ક્રોશત્વં યત્ક્રોશેન
ચાત્વાલસ્યાન્તે સ્તુવન્તિ યજ્ઞસ્યૈવાન્તં ગત્વેંદ્રિયં વીર્યમવ
રુંધતે સત્રસ્યર્દ્ધ્યાહવનીયસ્યાન્તે સ્તુવન્ત્યગ્નિમેવોપદ્રષ્ટારં
કૃત્વર્દ્ધિમુપ યન્તિ પ્રજાપતેર્ હૃદયેન હવિર્ધાનેઽન્તઃ સ્તુવન્તિ
પ્રેમાણમેવાસ્ય ગચ્છન્તિ શ્લોકેન પુરસ્તાથ્સદસઃ
૨૪ સ્તુવન્ત્યનુશ્લોકેન પશ્ચાદ્યજ્ઞસ્યૈવાન્તં ગત્વા શ્લોકભાજો
ભવન્તિ નવભિરધ્વર્યુરુદ્ગાયતિ નવ વૈ પુરુષે પ્રાણાઃ પ્રાણાનેવ

યજમાનેષુ દધાતિ સર્વા ઐન્દ્રિયો ભવન્તિ પ્રાણેષ્વેવેંદ્રિયં
દધત્યપ્રતિહૃતાભિરુદ્ગાયતિ તસ્માત્પુરુષઃ સર્વાણ્યન્યાનિ
શીર્ષ્ણોઽઙ્ગાનિ પ્રત્યચતિ શિર એવ ન પઞ્ચદશꣳ રથંતરં
ભવતીન્દ્રિયમેવાવ રુંધતે સપ્તદશં

૨૫ બૃહદન્નાદ્યસ્યાવરુદ્ધ્યા અથો પ્રૈવ તેન જાયન્ત એકવિꣳ શં ભદ્રં
દ્વિપદાસુ પ્રતિષ્ઠિત્યૈ પત્નય ઉપ ગાયન્તિ મિથુનત્વાય પ્રજાત્યૈ
પ્રજાપતિઃ પ્રજા અસૃજત સોઽકામયતાસામહꣳ રાજ્યં પરીયામિતિ
તાસાꣳરાજનેનૈવ રાજ્યં પર્યૈત્તદ્રાજનસ્ય રાજનત્વં યદ્રાજનં
ભવતિ પ્રજાનામેવ તદ્યજમાના રાજ્યં પરિ યન્તિ પઞ્ચવિꣳ શં ભવતિ
પ્રજાપતે

૨૬ રાપ્ત્યૈ પઞ્ચભિસ્તિષ્ઠન્તઃ સ્તુવન્તિ દેવલોકમેવાભિ જયન્તિ
પઞ્ચભિરાસીના મનુષ્યલોકમેવાભિ જયન્તિ દશ સં પદ્યન્તે દશાક્ષરા
વિરાડન્નં વિરાડ્વિરાજૈવાન્નાદ્યમવ રુંધતે પઞ્ચધા વિનિષદ્ય
સ્તુવન્તિ પઞ્ચ દિશો દિક્ષ્વેવ પ્રતિ તિષ્ઠન્ત્યેકૈકયાસ્તુતયા
સમાયન્તિ દિગ્ભ્ય એવાન્નાદ્યꣳ સંભરન્તિ તાભિરુદ્ગાતોદ્ગાયતિ દિગ્ભ્ય
એવાન્નાદ્યꣳ

૨૭ સંભૃત્ય તેજ આત્મન્દધતે તસ્માદેકઃ પ્રાણઃ
સર્વાણ્યઙ્ગાન્યવત્યથો યથા સુપર્ણ ઉત્પતિષ્યઞ્છિર ઉત્તમં કુરુત
એવમેવ તદ્યજમાનાઃ પ્રજાનામુત્તમા ભવન્ત્યાસન્દીમુદ્ગાતાઽરોહતિ
સામ્રાજ્યમેવ ગચ્છન્તિ પ્લેઙ્ખꣳ હોતા નાકસ્યૈવ પૃષ્ઠꣳ
રોહન્તિ કૂર્ચાવધ્વર્યુર્બ્રધ્નસ્યૈવ વિષ્ટપં ગચ્છન્ત્યેતાવન્તો
વૈ દેવલોકાસ્તેષ્વેવ યથાપૂર્વં પ્રતિ તિષ્ઠન્ત્યથો આક્રમણમેવ
તથ્સેતું યજમાનાઃ કુર્વતે સુવર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ॥ ૭। ૫। ૮॥ સદસઃ
સપ્તદશં પ્રજાપતેર્ગાયતિ દિગ્ભ્ય એવાન્નાદ્યં પ્રત્યેકાદશ ચ ॥ ૭। ૫। ૮॥

૨૮ અર્ક્યેણ વૈ સહસ્રશઃ પ્રજાપતિઃ પ્રજા અસૃજત તાભ્ય
ઇલાન્દેનેરાં લૂતામવારુંધ યદર્ક્યં ભવતિ પ્રજા એવ તદ્યજમાનાઃ
સૃજન્ત ઇલાન્દં ભવતિ પ્રજાભ્ય એવ સૃષ્ટાભ્ય ઇરાં લૂતામવ રુંધતે

તસ્માદ્યા ँ સમા ँસત્ર ँ સમૃદ્ધં ક્ષોધુકાસ્તા ँ સમાં પ્રજા
ઇષગ્ગ્ં હ્યાસામૂર્જમાદદતે યા ँ સમાં વ્યૃદ્ધમક્ષોધુકાસ્તા ँ
સમાં પ્રજા

૨૯ ન હ્યાસામિષમૂર્જમાદદત ઉત્ક્રોદં કુર્વતે યથા બન્ધાન્મુમુચાના
ઉત્ક્રોદં કુર્વત એવમેવ તદ્યજમાના દેવબન્ધાન્મુમુચાના
ઉત્ક્રોદં કુર્વત ઇષમૂર્જમાત્મન્દધાના વાણઃ શતતન્તુર્ભવતિ
શતાયુઃ પુરુષઃ શતેંદ્રિય આયુષ્યેવેન્દ્રિયે પ્રતિ તિષ્ઠન્ત્યાજિં
ધાવન્ત્યનભિજિતસ્યાભિજિત્યૈ દુન્દુભીન્થ્સમાઘ્નન્તિ પરમા વા એષા વાગ્યા
દુન્દુભૌ પરમામેવ

૩૦ વાચમવ રુંધતે ભૂમિદુન્દુભિમા ઘ્નન્તિ યૈવેમાં વાક્પ્રવિષ્ટા
તામેવાવ રુંધતેઽથો ઇમામેવ જયન્તિ સર્વા વાચો વદન્તિ સર્વાસાં
વાચામવરુદ્ધ્યા આર્દ્રે ચર્મન્વ્યાયચ્છેતે ઇન્દ્રિયસ્યાવરુદ્ધ્યા આન્યઃ ક્રોશતિ
પ્રાન્યઃ શ ँસતિ ય આક્રોશતિ પુનાત્યેવૈનાન્થ્સ યઃ પ્રશ ँ સતિ
પૂતેષ્વેવાન્નાદ્યં દધાત્યૃષિકૃતં ચ

૩૧ વા એતે દેવકૃતં ચ પૂર્વૈર્માસૈરવ રુંધતે યદ્ભૂતેચ્છદા ँ
સામાનિ ભવન્ત્યુભયસ્યાવરુદ્ધ્યૈ યન્તિ વા એતે મિથુનાદ્યે
સંવથ્સરમુપયન્ત્યન્તર્વેદિ મિથુનૌ સંભવતસ્તેનૈવ મિથુનાન્ન
યન્તિ ॥ ૭। ૫। ૯॥ વ્યૃદ્ધમક્ષોધુકાસ્તા ँ સમાં પ્રજાઃ પરમામેવ
ચ ત્રિ ँ શચ્ચ ॥ ૭। ૫। ૯॥

૩૨ ચર્માવ ભિન્દન્તિ પાપ્માનમેવૈષામવ ભિન્દન્તિ માપ
રાથ્સીર્માતિ વ્યાથ્સીરિત્યાહ સં પ્રત્યેવૈષાં પાપ્માનમવ
ભિન્દન્ત્યુદકુંભાનધિનિધાય દાસ્યો માર્જાલીયં પરિ નૃત્યન્તિ પદો
નિઘ્નતીરિદં મધું ગાયન્ત્યો મધુ વૈ દેવાનાં પરમમન્નાદ્યં
પરમમેવાન્નાદ્યમવ રુંધતે પદો નિ ઘ્નન્તિ મહીયામેવૈષુ દધતિ ॥ ૭। ૫। ૧૦॥ ચર્મૈકાન્ન પંચાશત્ ॥ ૭। ૫।
૧૦॥

૩૩ પૃથિવ્યૈ સ્વાહાન્તરિક્ષાય સ્વાહા દિવે સ્વાહા સં પ્લોષ્યતે સ્વાહા
સં પ્લવમાનાય સ્વાહા સં પ્લુતાય સ્વાહા મેધાયિષ્યતે સ્વાહા મેઘાયતે

સ્વાહા મેધિતાય સ્વાહા મેઘાય સ્વાહા નીહારાય સ્વાહા નિહાકાયૈ સ્વાહા
પ્રાસચાય સ્વાહા પ્રચલાકાયૈ સ્વાહા વિદ્યોતિષ્યતે સ્વાહા વિદ્યોતમાનાય
સ્વાહા સં વિદ્યોતમાનાય સ્વાહા સ્તનયિષ્યતે સ્વાહા સ્તનયતે સ્વાહોગ્રꣳ
સ્તનયતે સ્વાહા વર્ષિષ્યતે સ્વાહા વર્ષતે સ્વાહાભિવર્ષતે સ્વાહા
પરિવર્ષતે સ્વાહા સંવર્ષતે

૩૪ સ્વાહાનુવર્ષતે સ્વાહા શીકાયિષ્યતે સ્વાહા શીકાયતે સ્વાહા શીકિતાય
સ્વાહા પ્રોષિષ્યતે સ્વાહા પ્રુષ્ણતે સ્વાહા પરિપ્રુષ્ણતે સ્વાહોદ્ગ્રહીષ્યતે
સ્વાહોદ્ગૃહ્ણતે સ્વાહોદ્ગૃહીતાય સ્વાહા વિપ્લોષ્યતે સ્વાહા વિપ્લવમાનાય સ્વાહા
વિપ્લુતાય સ્વાહાતપ્સ્યતે સ્વાહાઽતપતે સ્વાહોગ્રમાતપતે સ્વાહર્ગ્ભ્યઃ
સ્વાહા યજુર્ભ્યઃ સ્વાહા સામભ્યઃ સ્વાહાંગિરોભ્યઃ સ્વાહા વેદેભ્યઃ સ્વાહા
ગાથાભ્યઃ સ્વાહા નારાશꣳસીભ્યઃ સ્વાહા રૈભીભ્યઃ સ્વાહા સર્વસ્મૈ
સ્વાહા ॥ ૭। ૫। ૧૧॥ સંવર્ષતે રૈભીભ્યઃ સ્વાહા દ્વે ચ ॥ ૭। ૫। ૧૧॥

૩૫ દત્વતે સ્વાહાદન્તકાય સ્વાહા પ્રાણિને સ્વાહાપ્રાણાય સ્વાહા
મુખવતે સ્વાહામુખાય સ્વાહા નાસિકવતે સ્વાહાનાસિકાય સ્વાહાક્ષ્ણવતે
સ્વાહાનક્ષિકાય સ્વાહા કર્ણિને સ્વાહાઽકર્ણકાય સ્વાહા શીર્ષણ્વતે
સ્વાહાશીર્ષકાય સ્વાહા પદ્વતે સ્વાહાપાદકાય સ્વાહા પ્રાણતે
સ્વાહાપ્રાણતે સ્વાહા વદતે સ્વાહાવદતે સ્વાહા પશ્યતે સ્વાહાપશ્યતે
સ્વાહા શૃણ્વતે સ્વાહાશૃણ્વતે સ્વાહા મનસ્વિને સ્વાહા

૩૬ ઽમનસે સ્વાહા રેતસ્વિને સ્વાહારેતસ્કાય સ્વાહા પ્રજાભ્યઃ સ્વાહા
પ્રજનનાય સ્વાહા લોમવતે સ્વાહાલોમકાય સ્વાહા ત્વચે સ્વાહાત્વક્કાય
સ્વાહા ચર્મણ્વતે સ્વાહાચર્મકાય સ્વાહા લોહિતવતે સ્વાહાલોહિતાય સ્વાહા
માꣳસન્વતે સ્વાહામાꣳસકાય સ્વાહા સ્નાવભ્યઃ સ્વાહાસ્નાવકાય
સ્વાહાસ્થન્વતે સ્વાહાનસ્થિકાય સ્વાહા મજ્જન્વતે સ્વાહામજ્જકાય
સ્વાહાઙ્ગિને સ્વાહાનઙ્ગાય સ્વાહાત્મને સ્વાહાનાત્મને સ્વાહા સર્વસ્મૈ
સ્વાહા ॥ ૭। ૫। ૧૨॥ મનસ્વિને સ્વાહાઽનાત્મને સ્વાહા દ્વે ચ ॥ ૭। ૫। ૧૨॥

૩૭ કસ્ત્વા યુનક્તિ સ ત્વા યુનક્તુ વિષ્ણુસ્ત્વા યુનક્ત્વસ્ય યજ્ઞસ્યર્દ્ધ્યૈ
મહ્યꣳ સંનત્યા અમુષ્મૈ કામાયાયુષે ત્વા પ્રાણાય ત્વાપાનાય ત્વા

વ્યાનાય ત્વા વ્યુષ્ટ્યૈ ત્વા રય્યૈ ત્વા રાધસે ત્વા ઘોષાય ત્વા પોષાય
ત્વારાદ્ઘોષાય ત્વા પ્રચ્યુત્યૈ ત્વા ॥ ૭। ૫। ૧૩॥ કસ્ત્વાઽષ્ટા ત્રિꣳશત્ ॥ ૭। ૫। ૧૩॥

૩૮ અગ્નયે ગાયત્રાય ત્રિવૃતે રાથંતરાય વાસન્તાયાષ્ટાકપાલ ઇન્દ્રાય
ત્રૈષ્ટુભાય પઞ્ચદશાય બાર્હતાય ગ્રૈષ્માયૈકાદશકપાલો વિશ્વેભ્યો
દેવેભ્યો જાગતેભ્યઃ સપ્તદશેભ્યો વૈરૂપેભ્યો વાર્ષિકેભ્યો દ્વાદશકપાલો
મિત્રાવરુણાભ્યામાનુષ્ટુભાભ્યામેકવિꣳ શાભ્યાં વૈરાજાભ્યાꣳ
શારદાભ્યાં પયસ્યા બૃહસ્પતયે પાઙ્ક્તા?ય ત્રિણવાય શાક્વરાય
હૈમન્તિકાય ચરુઃ સવિત્ર આતિચ્છંદસાય ત્રયસ્ત્રિꣳ શાય
રૈવતાય શૈશિરાય દ્વાદશકપાલોઽદિત્યૈ વિષ્ણુપત્ન્યૈ ચરુરગ્નયે
વૈશ્વાનરાય દ્વાદશકપાલોઽનુમત્યૈ ચરુઃ કાય એકકપાલઃ ॥ ૭। ૫। ૧૪॥
અગ્નયેઽદિત્યા અનુમત્યૈ સપ્તચત્વારિꣳ શત્ ॥ ૭। ૫। ૧૪॥

૩૯ યો વા અગ્નાવગ્નિઃ પ્રહ્રિયતે યશ્ચ સોમો રાજા તયોરેષ આતિથ્યં
યદગ્નીષોમીયોઽથૈષ રુદ્રો યશ્ચીયતે યથ્સંચિતેઽગ્નાવેતાનિ
હવીꣳ ષિ ન નિર્વપેદેષ એવ રુદ્રોઽશાન્ત ઉપોત્થાય પ્રજાં પશૂન્,
યજમાનસ્યાભિ મન્યેત યથ્સંચિતેઽગ્નાવેતાનિ હવીꣳ ષિ નિર્વપતિ
ભાગધેયેનૈવૈનꣳશમયતિ નાસ્ય રુદ્રોઽશાન્ત

૪૦ ઉપોત્થાય પ્રજાં પશૂનભિ મન્યતે દશ હવીꣳ ષિ ભવન્તિ
નવ વૈ પુરુષે પ્રાણા નાભિર્દશમી પ્રાણાનેવ યજમાને દધાત્યથો
દશાક્ષરા વિરાડન્નં વિરાડ્વિરાજ્યેવાન્નાદ્યે પ્રતિ તિષ્ઠત્યૃતુભિર્વા એષ
છન્દોભિઃ સ્તોમૈઃ પૃષ્ઠૈશ્ચેતવ્ય ઇત્યાહુર્યદેતાનિ હવીꣳ ષિ
નિર્વપત્યૃતુભિરેવૈનં છન્દોભિઃ સ્તોમૈઃ પૃષ્ઠૈશ્ચિનુતે
દિશઃ સુષુવાણેના

૪૧ ઽભિજિત્યા ઇત્યાહુર્યદેતાનિ હવીꣳ ષિ નિર્વપતિ દિશામભિજિત્યા
એતયા વા ઇન્દ્રં દેવા અયાજયન્તસ્માદિન્દ્રસવ એતયા મનું
મનુષ્યાસ્તસ્માન્મનુસવો યથેન્દ્રો દેવાનાં યથા મનુર્મનુષ્યાણામેવં
ભવતિ ય એવં વિદ્વાનેતયેષ્ટ્યા યજતે દિગ્વતીઃ પુરોઽનુવાક્યા
ભવન્તિ સર્વાસાં દિશામભિજિત્યૈ ॥ ૭। ૫। ૧૫॥ અશાન્તઃ સુષુવાણેનૈક

ચત્વારિꣳશચ્ચ ॥ ૭। ૫। ૧૫॥

૪૨ યઃ પ્રાણતો નિમિષતો મહિત્વૈક ઇદ્રાજા જગતો બભૂવ । ય
ઈશે અસ્ય દ્વિપદશ્ચતુષ્પદઃ કસ્મૈ દેવાય હવિષા વિધેમ
॥ ઉપયામગૃહીતોઽસિ પ્રજાપતયે ત્વા જુષ્ટં ગૃહ્ણામિ તસ્ય
તે દ્યૌર્મહિમા નક્ષત્રાણિ રૂપમાદિત્યસ્તે તેજસ્તસ્મૈ ત્વા મહિમ્ને
પ્રજાપતયે સ્વાહા ॥ ૭। ૫। ૧૬॥ યઃ પ્રાણતો દ્યૌરાદિત્યોઽષ્ટા ત્રિꣳશત્
॥ ૭। ૫। ૧૬॥

૪૩ ય આત્મદા બલદા યસ્ય વિશ્વ ઉપાસતે પ્રશિષં યસ્ય દેવાઃ
। યસ્ય છાયામૃતં યસ્ય મૃત્યુઃ કસ્મૈ દેવાય હવિષા વિધેમ
॥ ઉપયામગૃહીતોઽસિ પ્રજાપતયે ત્વા જુષ્ટં ગૃહ્ણામિ તસ્ય તે
પૃથિવી મહિમૌષધયો વનસ્પતયો રૂપમગ્નિસ્તે તેજસ્તસ્મૈ ત્વા
મહિમ્ને પ્રજાપતયે સ્વાહા ॥ ૭। ૫। ૧૭॥ ય આત્મદાઃ પૃથિવ્યગ્નિરેકાન્ન
ચત્વારિꣳશત્ ॥ ૭। ૫। ૧૭॥

૪૪ આ બ્રહ્મન્બ્રાહ્મણો બ્રહ્મવર્ચસી જાયતામાસ્મિન્રાષ્ટ્રે રાજન્ય
ઇષવ્યઃ શૂરો મહારથો જાયતાં દોગ્ધ્રી ધેનુર્વોઢાનડ્વાનાશુઃ સપ્તિઃ
પુરન્ધિર્યોષા જિષ્ણૂ રથેષ્ઠાઃ સભેયો યુવાસ્ય યજમાનસ્ય વીરો જાયતાં
નિકામે નિકામે નઃ પર્જન્યો વર્ષતુ ફલિન્યો ન ઓષધયઃ પચ્યન્તાં યોગક્ષેમો
નઃ કલ્પતામ્ ॥ ૭। ૫। ૧૮॥ આ બ્રહ્મન્નેક ચત્વારિꣳશત્ ॥ ૭। ૫। ૧૮॥

૪૫ આક્રાન્, વાજી પૃથિવીમગ્નિં યુજમકૃત વાજ્યર્વાક્રાન્, વાજ્યન્તરિક્ષં
વાયું યુજમકૃત વાજ્યર્વા દ્યાં વાજ્યાક્રꣳસ્ત સૂર્યં યુજમકૃત
વાજ્યર્વાગ્નિસ્તે વાજિન્, યુઙ્ઙનુ ત્વારભે સ્વસ્તિ મા સં પારય વાયુસ્તે
વાજિન્, યુઙ્ઙનુ ત્વારભે સ્વસ્તિ મા સં

૪૬ પારયાદિત્યસ્તે વાજિન્, યુઙ્ઙનુ ત્વારભે સ્વસ્તિ મા સં
પારય પ્રાણધૃગસિ પ્રાણં મે દૃꣳહ વ્યાનધૃગસિ વ્યાનં મે
દૃꣳહાપાનધૃગસ્યપાનં મે દૃꣳહ ચક્ષુરસિ ચક્ષુર્મયિ ધેહિ
શ્રોત્રમસિ શ્રોત્રં મયિ ધેહ્યાયુરસ્યાયુર્મયિ ધેહિ ॥ ૭। ૫। ૧૯॥ વાયુસ્તે
વાજિન્, યુઙ્ઙનુ ત્વાઽરભે સ્વસ્તિ મા સન્નિચત્વારિꣳશચ્ચ ॥ ૭। ૫। ૧૯॥

૪૭ જજ્ઞિ બીજં વર્ષ્ટા પર્જન્યઃ પક્તા સસ્યꣳ સુપિપ્પલા ઓષધયઃ
સ્વધિચરણેયꣳ સૂપસદનોઽગ્નિઃ સ્વધ્યક્ષમન્તરિક્ષꣳ
સુપાવઃ પવમાનઃ સૂપસ્થાના દ્યૌઃ શિવમસૌ તપન્, યથાપૂર્વમહોરાત્રે
પઞ્ચદશિનોર્ધમાસાસ્ત્રિꣳશિનો માસાઃ ક્લૃપ્તા ઋતવઃ શાન્તઃ
સંવથ્સરઃ ॥ ૭। ૫। ૨૦॥ જજ્ઞિ બીજમેકત્રિꣳશત્ ॥ ૭। ૫। ૨૦॥

૪૮ આગ્નેયોઽષ્ટાકપાલઃ સૌમ્યશ્ચરુઃ સાવિત્રોષ્ટાકપાલઃ પૌષ્ણશ્ચરૂ
રૌદ્રશ્ચરુરગ્નયે વૈશ્વાનરાય દ્વાદશકપાલો મૃગાખરે યદિ
નાગચ્છેદગ્નયેઽꣳહોમુચેઽષ્ટાકપાલઃ સૌર્યં પયો વાયવ્ય આજ્યભાગઃ
॥ ૭। ૫। ૨૧॥ આગ્નેયશ્ચતુર્વિꣳશતિઃ ॥ ૭। ૫। ૨૧॥

૪૯ અગ્નયેઽꣳહોમુચેઽષ્ટાકપાલ ઇન્દ્રાયાꣳહોમુચ એકાદશકપાલો
મિત્રાવરુણાભ્યામાગોમુગ્ભ્યાં પયસ્યા વાયોસાવિત્ર આગોમુગ્ભ્યાં
ચરુરશ્વિભ્યામાગોમુગ્ભ્યાં ધાના મરુદ્ભ્ય એનોમુગ્ભ્યઃ સપ્તકપાલો
વિશ્વેભ્યો દેવેભ્ય એનોમુગ્ભ્યો દ્વાદશકપાલોઽનુમત્યૈ ચરુરગ્નયે
વૈશ્વાનરાય દ્વાદશકપાલો દ્યાવાપૃથિવીભ્યામꣳહોમુગ્ભ્યાં દ્વિકપાલઃ ॥
૭। ૫। ૨૨॥ અગ્નયેઽꣳહોમુચેઽનુમત્યૈ દ્યાવાપૃથિવીભ્યાં ત્રિꣳશત્
॥ ૭। ૫। ૨૨॥

૫૦ અગ્નયે સમનમત્પૃથિવ્યૈ સમનમદ્યથાગ્નિઃ પૃથિવ્યા સમનમદેવં
મહ્યં ભદ્રાઃ સંનતયઃ સં નમન્તુ વાયવે સમનમદન્તરિક્ષાય
સમનમદ્યથા વાયુરન્તરિક્ષેણ સૂર્યાય સમનમદ્દિવે સમનમદ્યથા
સૂર્યો દિવા ચન્દ્રમસે સમનમન્નક્ષત્રેભ્યઃ સમનમદ્યથા
ચન્દ્રમા નક્ષત્રૈર્વરુણાય સમનમદદ્ભ્યઃ સમનમદ્યથા

૫૧ વરુણોઽદ્ભિઃ સામ્ને સમનમદૃચે સમનમદ્યથા સામર્ચા બ્રહ્મણે
સમનમત્ક્ષત્રાય સમનમદ્યથા બ્રહ્મ ક્ષત્રેણ રાજ્ઞે સમનમદ્વિશે
સમનમદ્યથા રાજા વિશા રથાય સમનમદશ્વેભ્યઃ સમનમદ્યથા
રથોઽશ્વૈઃ પ્રજાપતયે સમનમદ્ભૂતેભ્યઃ સમનમદ્યથા
પ્રજાપતિર્ભૂતૈઃ સમનમદેવં મહ્યં ભદ્રાઃ સંનતયઃ સં નમન્તુ ॥
૭। ૫। ૨૩॥ અદ્ભ્યઃ સમનમદ્યથા મહ્યં ચત્વારિ ચ ॥ ૭। ૫। ૨૩॥

પ૨ યે તે પન્થાનઃ સવિતઃ પૂર્વ્યાસોઽરેણવો વિતતા અન્તરિક્ષે ।
તેભિર્નો અદ્ય પથિભિઃ સુગેભી રક્ષા ચ નો અધિ ચ દેવ બ્રૂહિ ॥
નમોઽગ્નયે પૃથિવિક્ષિતે લોકસ્પૃતે લોકમસ્મૈ યજમાનાય દેહિ નમો
વાયવેઽન્તરિક્ષક્ષિતે લોકસ્પૃતે લોકમસ્મૈ યજમાનાય દેહિ નમઃ
સૂર્યાય દિવિક્ષિતે લોકસ્પૃતે લોકમસ્મૈ યજમાનાય દેહિ ॥ ૭। ૫। ૨૪॥ યે તે
ચતુશ્ચત્વારિꣳશત્ ॥ ૭। ૫। ૨૪॥

પ૩ યો વા અશ્વસ્ય મેધ્યસ્ય શિરો વેદ શીર્ષણ્વાન્મેધ્યો ભવત્યુષા
વા અશ્વસ્ય મેધ્યસ્ય શિરઃ સૂર્યશ્ચક્ષુર્વાતઃ પ્રાણશ્ચન્દ્રમાઃ
શ્રોત્રં દિશઃ પાદા અવાન્તરદિશાઃ પર્શવોઽહોરાત્રે નિમેષોઽર્ધમાસાઃ
પર્વાણિ માસાઃ સંધાનાન્યૃતવોઽઙ્ગાનિ સંવત્સર આત્મા રશ્મયઃ કેશા
નક્ષત્રાણિ રૂપં તારકા અસ્થાનિ નભો માꣳસાન્યોષધયો લોમાનિ
વનસ્પતયો વાલા અગ્નિર્મુખં વૈશ્વાનરો વ્યાત્તꣳ

પ૪ સમુદ્ર ઉદરમન્તરિક્ષં પાયુર્દ્યાવાપૃથિવી આણ્ડૌ ગ્રાવા શેપઃ સોમો
રેતો યજ્જઞ્જભ્યતે તદ્વિ દ્યોતતે યદ્વિધૂનુતે તથ્સ્તનયતિ યન્મેહતિ
તદ્વર્ષતિ વાગેવાસ્ય વાગહર્વા અશ્વસ્ય જાયમાનસ્ય મહિમા પુરસ્તાજ્જાયતે
રાત્રિરેનં મહિમા પશ્ચાદનુ જાયત એતૌ વૈ મહિમાનાવશ્વમભિતઃ
સં બભૂવતુર્હયો દેવાનવહદર્વાસુરાન્, વાજી ગન્ધર્વાનશ્વો
મનુષ્યાન્થ્સમુદ્રો વા અશ્વસ્ય યોનિઃ સમુદ્રઃ (સમુદ્રો બન્ધુઃ - સંપ્રદાયદલ્લિ
હેળુવુદિલ્લ) ॥ ૭। ૫। ૨૫॥ વ્યાત્તમવહદ્દ્વાદશ ચ ॥ ૭। ૫। ૨૫॥

ગાવો ગાવઃ સિષાસન્તીઃ પ્રથમે માસિ સમાન્યો યદિ સોમૌ
ષડહૈરુથ્સૃજ્યા (૩) ં દેવાનામર્ક્યેણ ચર્માવ પૃથિવ્યૈ દત્વતે
કસ્ત્વાગ્નયે યો વૈ યઃ પ્રાણતો ય આત્મદા આ બ્રહ્મન્નાકાઞ્જિ
બીજમાગ્નેયોઽષ્ટા કપાલોઽ ગ્નયે ꣳહોમુચેઽષ્ટા કપાલોઽગ્નયે
સમનમદ્યે તે પન્થાનો યો વા અશ્વસ્ય મેધ્યસ્ય શિરઃ પંચ
વિꣳશતિઃ ॥

ગાવઃ સમાન્યઃ સવનમષ્ટાભિર્વા એતે દેવકૃતં ચાઽભિજિત્યા

ઇત્યાહુર્વરુણોદ્ભિઃ સામ્ને ચતુઃ પંચાશત્ ॥

ગાવો યોનિસ્સમુદ્રઃ (સમુદ્રો બન્ધુઃ - સંપ્રદાયદલ્લિ હેળુવુદિલ્લ) ॥

ઇતિ સપ્તમં કાણ્ડં સંપૂર્ણમ્ ૭ ॥

ઇતિ તૈત્તિરીય-સંહિતા ॥

આભિર્ગીર્ભિર્યદતો ન ઊનમાપ્યાયય હરિવો વર્ધમાનઃ ।
યદા સ્તોતૃભ્યો મહિ ગોત્રા રુજાસિ ભૂયિષ્ઠભાજો અધ તે સ્યામ ॥
બ્રહ્મ પ્રાવાદિષ્મ તન્નો મા હાસીત્ ॥
ઓં શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥
॥ હરિઃ ઓ(૩)મ્ ॥
॥ શ્રી કૃષ્ણાર્પણમસ્તુ ॥

Encoded and proofread by Muralidhara B A muraliba at gmail.com
Shri muralidhar has studied kRRiShNayajurveda
from his father Anathakrishna, Proffessor in Chamarajendra
Sanskrit College, Chamarajpet, Bangalore. Muralidhar received
MA from Karnataka Samskrit University.

---

*Taittiriya Samhita*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*